कविकुलतिलक श्रीनारायणपण्डिताचार्यविरचितः

सुमध्वविजयः

श्रीनारायणपण्डिताचार्यविरचितभावप्रकाशिका
श्रीविश्वपतितीर्थविरचितपदार्थदीपिकोद्बोधिका
श्रीछलारीशेषाचार्यविरचितमन्दोपकारिणी
इति व्याख्यानत्रयसमेतः

द्वितीयं सम्पुटम्

Edited by

A.B. Shyamachar

and

S.R. Pandurangi

Year 2001

Published by

Dvaita Vedanta Studies and Research Foundation

No. 11, Uttaradi Matha Compound, Sankarapuram, Bangalore-4

Sumadhva Vijaya of Nārāyaṇa Panditāchārya with commentaries of Bhāvaprakāśikā, Padārthadīpikodbodhikā and Mandopakāriṇi Vol.2. Edited by Sri A.B. Shyamachar and Sri S.R. Pandurangi, Published by Dvaita Vedanta Studies and Research Foundation, No.11, Uttaradi Matha Compound, Sankarapuram, Bangalore-4

No. of Pages : xxxii+516

Year of Publication : 2001

©: Publisher

Prize : Rs.200/-

Printed at : **Raghavendra Enterprises,** Bangalore. Ph.: 672 2425

Preface

The publication of Śrī Sumadhva Vijaya was planned in two volumes. The first volume containing eight cantoes is already released. This second volume contains 9th to 16th cantoes. The three commentaries given in the first volume are given in this volume also.

In the first eight cantoes the life and works of Śrī Madhvāchārya upto his visit to Nārāyaṇa āśrama in the Himālayas were described. In cantoes 9th to 16th included here, his philosophical debates with two advaita scholars, king Jayasimha meeting him, his discourses at Viṣṇumangala temple, his debate with Trivikrama Panditāchārya are described.

There is a beautiful description of his 37 works by Trivikrama Pandita. The special theme of each work is highlighted. A detailed account of his daily programme of worship, teaching and meeting the public are described. His most distinguished desciple Padmanābhatīrtha and his younger brother Viṣṇutīrtha are introduced. Finally his departure to Badarikāśrama with the showers of flowers over him by the sages and deities is graphically presented.

Śrī Sumadhvavijaya has historical, religious and philosophical appeal. It is hoped that the publication of this work with three valuable commentaries will help the historians as well as religious minded persons.

Two young scholars Sri A.B. Shyamachar and Sri S.R. Pandurangi have edited it with the help of three manuscripts made available by Śrī Śrī Satyātmatīrtha swamiji of Śrī Uttarādi Matha. We are grateful to Śrī Śrī Swāmiji. Our research staff have helped these scholars. We record our appreciation of the efforts of these young scholars and the Research staff. We also thank M/s Raghavendra Enterprises for neatly printing this work in good time.

N. Narasimha Rau
Chairman, Dvaita Vedanta Foundation

Introduction

We are happy to present the second volume of Sumadhva Vijaya to our readers. The first volume contained Cantos I to VIII. and in this second volume Cantos IX to XVI are included. This completes the whole text. Three commentaries viz., (i) Bhāvaprakāśikā of poet himself. (ii) Padārthadīpikodbhodhikā of Viśvapatitīrtha (iii) Maṇḍopakāriṇī of Chalāri Śeṣāchārya which were included in the first volume are continued in this volume also. These are very helpful to comprehend the language and thought of Sumadhvavijaya. Apart from gramatical explanations and quotations from the Laxicons, a large number of quotations from Śruti, Itihāsa-Purāṇa and Dharmaśāstra works are given by the commentators. These give an insight into the doctrines ensrined in this philosophical biography of a Saint and the rejuvinator of a Vedānta school.

In the first volume Śrī Hṛṣikeśatīrtha's sampradāyapaddhati that supplimented the information about Śrī Madhva's life and works was added at the end. Sumadhva Vijaya Prameyanavamālikā of Śri Viṣṇutīrtha was also given. In this second volume Prameya navamālikā (Anumadhva Vijaya) composed by the poet himself is given. The stotras of Śrī Madhvāchārya composed by Śrī Vādirājatīrtha, Anuvāyustuti by Kalyāni devī the sister of Śri Madhva and the extract from Vāyu Purāṇa about Śrī Madhva are added. The list of Śrī Madhva's works given by Śrī Vyāsatīrtha, Śrī Yādavārya and Srinivāsatīrtha is given. Such documentation of life and works of a Saint scholar is rarely found in Indian tradition. It is a unique feature of Dvaita tradition. A few other appendices such as Śukti's from Sumadhvavijaya, information about the Aṣṭamathas etc., are also given. On the whole an attempt is made to provide as exhaustive a source material as possible to comprehend the life and tradition of Śrī Madhvachārya.

A detailed summary of the contents of Sumadhva Vijaya both in English and Kannada is already given in the first volume. With a view to enable the readers to recaputalate the same a brief summary is added in this volume also.

We take this opportunity to express our thanks to Sri N. Narasimha Rau Chairman of Dvaita Vedanta Foundation for entrusting the responsibility of editing valuable work to us.

We express our greatfulness to Prof. K.T. Pandurangi for the guidance provided by him in the course of editing this work. We offer our small effort of editing this holywork at the feet of Lord Nārāyaṇa, Śrī Mukhyaprāṇa and all elders.

A.B. Shyamachar
S.R. Pandurangi

Essentials of Sumadhva Vijaya

(9th to 16th Cantos)

In the introduction to the first volume a summary of the entire Sumadhva Vijaya is already given. However, for the ready reference of the readers brief summary of Canto 9th to 16th included in this volume will be given again. It is not a verbetum reproduction of the summary given in the first volume. However, the contents are the same.

In the first eight cantoes (i) A description of the earlier two incarnations of Mukhyapraṇa, (ii) The need for the third incarnation, the birth and childhood of Śrī Madhvāchārya, (iii) Śrī Madhva's upanayana and Gurukulavāsa, (iv,v) Śrī Madhva taking sannyāsa, his coronation on Vedanta Sāmrajya peetha, his composing Gītābhāṣya and his south Indian tour, (vi to viii) Śrī Madhva's visit to Badari, Śrī Vedavyāsāśrama and finaly his visit to Śrī Nārāyaṇa with Śrī Vedavyāsa are described.

II

1) The 9th Canto begins with the return of Śrī Madhvāchārya from Vedavyāsa Āśrama on Himālaya and visit of the same again by Śrī Madhvāchārya. From Nārāyaṇāśrama Śrī Vedavyāsa and Śrī Madhva return to Vedavyāsāśrama, Śrī Vedavyāsa gives detailed instructions to Śrī Madhva. Keeping these instructions firmly at his heart in which Śrī Vedavyāsa was always firmly seated Śrī Madhva returns to Anantamatha and meets his eagerly waiting desciples. As per the instructions of Śrī Nārāyaṇa when he met him Śrī Madhva composes Brahma sūtrabhāṣya. The poet mentions the salient features of this bhāṣya as under:

i) It describes the Supreme God Viṣṇu as full of auspicious attributes, free from drawbacks, bestower of jñāna, bhakti and Virāgya and ultimately the liberation.
ii) The supremacy of God is established by profusly quoting Śruti, Smṛti and by reasoning.
iii) Its style is simple, direct, flawless, and insightful.
iv) This bhāṣya commands the respect of deities and sages. Śrī Satyatīrtha had the good luck of copying this bhāṣya.

After composing Brahmasūtrabhāṣya Śrī Madhvāchārya started his return journey from Badari and arrived at the bank of river Godavari. In an assembly of Scholars who were wellversed in Veda and Darśana, Śrī Madhvāchārya discoursed on Veda and criticised Nyāya, Vaiśeṣika, Bauddha, etc., Darśanas. Śrī Śobhanabhatta was the

leading scholar among these scholars. He was impressed by Śrī Madhva bhāṣya and started propagating it. The poet compares the choice of Śrī Madhvabhāṣya by Śobhanabhattha for study and propagation to the selection of dakṣiṇāvarta conch i.e., the conch that has its face on the right side. A person who does not know the value of it throws it away. He who knows it to some extent sells it to get some money. But he who knows the highest value of it preserves it and worships it. Śobhana bhatta knew the highest value of Śrī Madhva bhāṣya like that of a dakṣiṇāvarta conch, admired it and worshipped it by propagating it among the jenuine devotees. Śrī Madhvāchārya returned to Udupi. Achyutaprekṣa and another senior ascetic were happy to meet him. They had already received a copy of Śrī Madhvāchārya's Bhāṣya. Some doubts were still persisting in the mind of Achyutaprekṣa because of the earlier influence of advaita bhāṣya. Śrī Madhva removed all his doubts like the swan pushing aside the crows from the lake. Śrī Madhvāchārya gave both the knowledge of Śāstra and heated Sudarśana mudra to his devotees.

He installed the Idol of Śrīkṛṣṇa brought from Dwāraka at Udupi. This Idol was obtained from a navigator by saving his ship from a difficult situation. Śrī Madhvāchārya helped his teacher's son Vasudeva to perform a sacrifice. This indicates that the performance of sacrifices in dedication to the supreme God helps to aquire his knowledge and grace. Śrī Madhvāchārya once again proceeded towards Badarikṣetra.

2) In the tenth canto certain events that revealed the extraordinary power of Śrī Madhva are described. These are fully described in the introduction to the first volume. Therefore, these are briefly mentioned here by way of reminding the earlier description.

i) King Iśvaradeva asked Śrī Madhva to dig the ground. Śrī Madhva asked him to demonstrate the digging. He started but was not able to stop it. He realised his mistake and begged pardon from Śrī Madhva.

ii) When Śrī Madhva and his disciples arrived at the bank of river Gangā there were no boats to cross it. Śrī Madhva crossed it walking on the river with his disciples. The Muslim ruler who watched it was wonderstruck and offered half of the Kingdom to him.

iii) In the course of the journey the robbers encroached upon Śrī Madhva's disciples thrice. They were repulsed. A tiger pounced on Sri Satyatīrtha. It died by mere touch by Śrī Madhva.

Śrī Madhva completed his journey and reached Nārāyaṇāśrama. Śrī Nārāyaṇa gave him Vyāsa muṣṭi and asked him to compose Mahābhārata tātparyanirṇaya. Śrī Madhva started his return journey. He observed Chaturmāsa at Hastināpura.

Gangā river appeared before him through the branch of a tree and also personally in a beautiful form. Then Śrī Madhva went to Vāraṇāsi. A sannyāsi by name Indrapuri met him and discussed the point as to how jñāna supported by karma is the means of liberation. Śrī Madhva explained that jñāna is the primary means of liberation and karma performed after jñāna increases the bliss.

During his journey Śrī Madhva delivered discourses. In the course of his discourses he stressed three points. (i) God is supreme. There is none who is equal or superior to him. (ii) It is by the will of God that the creation, sustainance and destruction of the world take place. (iii) He has jñāna, ānanda etc., unlimited number of attributes. He is conveyed by all words. At Kurukṣetra Śrī Madhva saw the gadā held by him when he was Bhīma. At Hṛṣikeśa, Śrī Madhva received bhikṣā from Rudra. He visited Paraśurāma kṣetra. At Goa he made the trees and plants to yeild the flowers and fruits by his music.

3) In the elevanth canto there is beautiful description of Vaikuṇṭha. Ādiśeṣa who came to listen to the discourses on Brahmasūtra by Śrī Madhvāchārya describes the Vaikuṇṭha.

At the centre of Vaikuṇṭha there is the city of the Supreme God. The houses built by padmarāga gems shine in the middest of white compounds built by Sphaṭika. The terraces are studded with sphaṭika with hanging blue gems. There are beautiful birds carved in the pegions which look like real birds. All these decorative items are the forms of Mahālakṣmi. In this city there are a large number of earlier liberated chaturmukha brahmā, Rudra etc. There are four states of liberated viz., Sārupya, Samipya, Salokya and Sāyujya. The poet impressively describes the women, seasons Vasanta, Grīṣma etc., and the flowers pārijāta etc.

The poet concludes the description of Vaikuṇṭha by stating that those who listen to the Bhāṣya of Śrī Madhvāchārya wll attain the liberation that provides such a great delight.

महानन्दतीर्थस्य ये भाष्यभावं मनो वाग्भिरावर्तयन्ते स्वशक्त्या ।
सुराद्या नरान्ताः मुकुन्दप्रसादात् इमं मोक्षमेते भजन्ते सदेति ॥

4) In the twelth canto the disturbed mind of Māyāvādins and their attempt to oppose tatvavāda is described. Śrī Madhva's mastery over the recitation of Vedic hymns and his deep scholarship in the interpretation of hymns are also described.

The philosophical revolution caused by Śrī Madhva's Brahmasūtrabhāṣya and his discourses on it caused considerable alarm among those who were wedded to Māyāvāda. Puṇḍarīka puri and Padmatīrtha discussed the difficult situation. Puṇḍarīka

puri went to Uḍupi with his companions. He proposed a debate with Śrī Madhva. In the very first round of debate he lost the ground.

Śrī Madhva gave a discourse on Veda. He produced the letters distinctly. He revealed them in the three stages, parā paśyantī and vaikharī reflecting the presiding deities of these stages. He gave discourse on Veda quoting kalpasūtras Nirukta and Vyākaraṇa.

Śrī Madhvāchārya had a rich library. Pejattāya Śankara was its costodian. Padmatīrtha managed to steel it and run away. Śrī Madhva persued and caught him. He begged pardon. Śrī Madhva ordered that it be restored in the presence of the leading men of the town.

The poet compares Śrī Madhva with Sun comparing the seven horses of Sun with seven vehicles of knowledge viz., Four Vedas, Mūla Rāmāyaṇa, Bhārata and Pañcharātra.

5) In the thirteenth canto Śrī Madhvāchārya proceeding from Prāgravāta to Madaneswara temple and further to Viṣṇumangala temple are described. King Jayasimha's request to Śrī Madhvachārya to visit his place and his devotion to Śrī Madhvāchārya are stated. Śrī Madhvāchārya's personality is beautifully described. His desciples' service to him and the description of the grand procession from Madaneswara temple to Viṣṇumangala temple are described.

After his chaturmāsa at pragravāta Śrī Madhvāchārya desired to move in Sahyādri region. King Jayasimha also sent a messenger and requested Śrī Madhva to visit his city. Śrī Madhvā arrived at Madaneswara temple. He stayed there for a night. Next morning when he proceeded, one desciple put tulasi garland to Āchārya, the other took sāligrāma box on his head, the others carried the bundles of books. The temple bell rang and indicated a happy journey. The team of persons led by Śrī Madhvāchārya consisted of Brahmachārins, gṛhasthas and Sannyāsins. These represented as it were āśramadharmas. On the way king Jayasimha arrived and joined the group. All along the journey people from nearby villages came in large numbers to have darśana of Śrī Madhvāchārya. They were wonderstruck by the personality of Śrī Madhvāchārya. The poet graphically describes the personality of Śrī Madhva.

The luster of Madhva's nails was like the luster of red colour gem. His knees were like Kūrma, the thighs were like the trunks of elephants, the belly was thin and there were three lines on his belly, neck and forehead. His chest was large, shoulders and arms were round, and the palm was reddish. There were marks of śankha and chakra on his palms. The teeth were like kund buds, the lips were reddish and the eyes were lotus like. There were tulasi petals in his ears. The features of the personality were distinct and clear. These were a model to the sculptors to prepar idols.

Such a beautiful description of the magnificient personality of a great person is not found in any other literary work. The poet was an younger contemporary of Śrī Madhvāchārya. He must have personally seen him. He has given a true picture with a touch of his poetic gift.

Śrī Madhvāchārya arrived at Viṣṇu mangala temple, took his seat in the middest of a large gathering of people and a group of rulers led by Jayasimha. At Viṣṇumangala temple Śrī Madhva asked his desciple Hṛṣikeshatīrtha to read Bhagavata and himself explained the import of Bhāgavata.

At this juncture the poet narrates the birth and education of Trivikrama paṇḍita. In the family of likuchas of āngīrasa gotra there was a scholar and poet by name Subrahmaṇya. His wife was pious and devoted. Subrahmaṇya's wife prayed the God Hari-Hara to bestow a good child for her. The couple got a male child. He was named as Trivikrama. He studied Veda and Vedāngas. He composed a Kāvya i.e., uṣāharaṇa. He scanned the entire advaita literature and found it to be self-contradictory. His father advised him in confidence that nirguṇa brahmopāsanā was wrong. Trivikrama found that the twenty one bhāṣyas available on brahmasūtra did not explain the import of brahmasūtra correctly. He came to know that Śrī Madhvāchārya is propogating the right Philosophy. Trivikrama read Śrī Madhva's works obtaining them through his brother Śankara who was in charge fo Śrī Madhva's library. He realised that Śrī Madhva's philosophy was most reasonable and free from defects. He was anxious to meet Śrī Madhva and went to Viṣṇumangala temple.

6) The fourteenth canto describes the daily rituals and teaching programme of Śrī Madhva in detail. Śrī Madhva used to take his bath before aruṇodaya and perform the meditation of supreme God Nārāyaṇa. One of his desciples used to perform nirmalya visarjana by removing the flowers and tulasi placed on Sāligrāma and other idols the previous day. His desciples used to gather at the discourse hall and sit around Śrī Madhvāchārya. They were holding palmleaf books in their hand. Śrī Madhva used to recite omkāra and start the lesson. He asked his disciples to read upaniṣad text and explain their import. He allowed the questions by the disciples and removed their doubts. After morning lesson Śrī Madhva went to chakratīrtha and took the bath. At this time all holy rivers and holy tirthas assembled in chakratīrtha and sanctified themselves by Śrī Madhva's bath. After bath he put urdhvapuṇḍra with gopichandana on his forehead and body. He put Śankha, chakra etc. He went to temple, performed abhiṣeka to God, offered chandana, tulasi etc. He offered ṣoḍaśopachāra and eight bhāvapuṣpas viz., ahimsā, satya, asteya brahmacharya, aparigraha śaucha, tuṣṭi, and sarvasamarpaṇa. After worship he took prasāda. Then, he proceeded to the hall and discussed the Śāstric points with the scholars assembled.

People came to meet him from different parts of the country. This went on till the evening. The poet describes the Sun set and rising of the moon and closes the canto.

7) In the fifteenth canto the discourses of Śrī Madhvāchārya pointing out the fallacies in the systems of Sāmkhya, Nyāyavaiśeṣika, and giving the correct import of Brahmasūtras is narrated. Śrī Trivikrama Paṇḍita's debate with him and Trivikrama Paṇḍita becoming his ardent desciple is stated.

Trivikrama Paṇḍita describes the merit of each work of Śrī Madhvāchārya and requests him to compose one more work consolidating the entire vedantic thought.

This canto also tells us about Śrī Viṣṇutīrtha the younger brother of Śrī Madhvāchārya. Śrī Padmanābhatīrtha, Hṛṣikeśatīrtha and other disciples are also mentioned.

Śrī Madhvāchārya conducted his discourse in Amaralaya temple. Śrī Trivikrama Paṇḍita was seated before him. The style of the discourse was quite charming and effective. It was like Mahalakṣmi arising from ocean. The central theme of the discourse has been that 'Śrī Nārāyaṇa has infinite attributes, he is conveyed by the entire Veda. He is creator, he is omniscient'. These points were presented by profusely quoting Śruti, and adducing yukti. Presenting this central theme Śrī Madhva reviewed the other systems as under :

1. Nirīśvara Samkhyas say that Pradhāna i.e., Prakṛti, is an independent cause of the world. It evolves the world independently. This is not correct. A none-sentient cannot perform any activity independently. A chetana i.e., a sentient being only can be the creator.

Seśvara Sāmkhyas though axcept Īśvara, they consider him as subbordinate to Prakṛti. Therefore, their view is also not correct.

2. Bhaskara states that Brahman himself gets evolved as the world. This is also not correct. Brahman will not have any vikāra i.e., modification.

3. Pāśupatas state that Paśupati is the creator. This is also not correct. Paśupati is not perfect or independent like Viṣṇu. For the same reason Gaṇapati, Sūrya etc., are also not creators.

4. Nyāya Vaiśeṣikas accept Īśvara. However, they say that he has jñāna only but not ānanda. They assign only eight qualities to Īśvara. He is not considered as perfect.

5. Madhyamikas say that Śūnya is the ultimate principle, while Māyāvādins say that Nirguṇa brahman is the ultimate principle. These concepts of Śūnya and Nirguṇa brahman are not basically different. Both have no attributes. The world is projected and illusory according to both. Brahman is as much asat as Śūnya, since it has no satva attribute. For the same reason it cannot be the object of meditation, nor can be any result by the meditation of asat. Hence both Śūnyavāda and Māyāvāda have to be totally rejected.

After reviewing the views of different systems Śrī Madhva pointed out the unique nature of Dvaita View, particularly in respect of the nature of Mokṣa. The liberated will have aprākṛta body. Aprākṛta senses etc. He will experience svarūpānanda.

After carefully listening to the above discourse, Trivikrama Paṇḍita raised a discussion to get certain points clarified. He debated for fifteen days and then completely surrendered. He became an ardent disciple of Śrī Madhvāchārya. He composed a commentary i.e., Tatvapradīpikā on Brahmasūtrabhāṣya.

Trivikrama Paṇḍita praised each work of Śrī Madhvāchārya bringing out its special contribution.

1. Brahmasūtra bhāṣya is an ocean of Vedāntic thought. It contains innumerable gems of Nyāya i.e., philosophical reasonings.
2. Upaniṣadbhāṣyas are like temples. The deep import of these will delight like lamps in the temple.
3. Gītābhāṣya and Gītātātparya enlighten the whole world like Sun and Moon.
4. Mahābhārata tātparyanirṇaya is the nector obtained from the ocean of Itihāsa and Pūraṇa.
5. Bhāgavata tātparya nirṇaya is a good friend to know the three levels of meaning viz., Darśana, Guhya, and Samādhi.
6. Tantrasāra is a temple of different forms of supreme God. It gives the hymns of meditation of these forms like kalpavṛkṣa.
7. Pramāṇa lakṣaṇa and kathālakṣaṇa are the two eyes that enable to comprehend pramāṇas and the art of debate.
8. Viṣṇutatvanirṇaya has conquered all opponents single handed like Arjuna.
9. Tatvodyodyota etc., Prakaraṇas burn down the opponents' views like sparks of fire.
10. Anubhāṣya reveals infinite doctrines like Śrīkṛṣṇa revealing Brahmāṇḍa in his mouth to Yaśodā.
11. Yamaka Bharata is a digest of Mahābhārata. It is composed in attractive śabdālankāras.

It is difficult to count the gems in the form of stotra, subhāṣita etc., composed by Śrī Madhva like counting gems in the ocean.

Describing the works of Śrī Madhva as described above Trivikrama Paṇḍita appealed to him to prepare a work consolidating all the points schattered in these works to enable his desciples to have a total picture of the Vedanta thought. Responding to this request Śrī Madhva simeltaneously dictated four chapters of Brahmasūtra anuvyākhyāna to four disciples. He also composed Nyāya vivaraṇa consolidating the Nyāyas stated in Anuvyākhyāna.

After describing the works of Śrī Madhva the poet gives the details about Śrī Viṣṇutīrtha the younger brother of Śrī Madhva. He was taking care of his parents at

Pajakakṣetra. In due course the parents died. Then he approached Śrī Madhva to get sannyāsa. He gave sannyāsa to him and named him as Viṣṇutīrtha. He instructed most secret doctrines about Brahman. Viṣṇutīrtha lived extremely regorous ascetic life. He went to Hariśchandra hill and performed severe panence. Finally he went to Kumaraparvata. He is reported to be performing panence at this hill even now.

Among the disciples of Śrī Madhvāchārya outside Paraśurāmakṣetra Śrī Padmanābhatīrtha was prominent. He hailed from the bank of Godāvari. He was a distinguished scholar at the court of king Mahadeva of Yādava dynasty at Paithana. Before he took sannyasa from Śrī Madhva he was known as śobhana bhatta or Ānandabhatta. He propagated Śrī Madhva's philosophy on this side of Sahyādri ghat. He wrote commentaries on Brahmasūtrabhāṣya and Anuvyākhyāna named as Sattarka deepāvali and Sannyāyaratnāvali. Hṛṣikeśatīrtha, Janārdanatīrtha, Narasimhatīrtha, Upendratīrtha etc., were other prominent Sannyāsi disciples.

8) In the sixteenth canto the poet mentions certain events that had taken place earlier but not mentioned. The poet broadly follows cronological order to describe the academic and saintly career of Śrī Madhvāchārya. It is broadly arranged in three stages. (i) The background of his incarnation, his boyhood, study and sannyāsa, (ii) His tour of South and North India, visit to Badari and propagation of Dvaita Siddhānta, (iii) Trivikrama Paṇḍita meeting him, the discription of the special features of his works, his daily programme of worship and teaching. Here and there a few events of his physical strength and mystic power are also described to enable the average people to realise his greatness. However many more such events had taken place during his career. These were not mentioned in the chronological order in the respective places to avoid distraction from the main theme. The poet puts together these events in this last canto. Some of these are historically important and make an impact on the mind of the common man. Full details of these events are given in the introduction to the first volume.

After narrating these events the poet informs that the glory of Śrī Madhva was sung by Gandharvas at the court of the deities and was listened by them with rapt attention. They all proceeded to have a darśana of Śrī Madhvāchārya. Śrī Madhva was delivering discourse on Aitareya Upaniṣat. They sung his glory in three incarnations and showered flowers from the sky.

ववृषुरखिलदृश्यं पुष्पवारं सुगन्धम्। हरिदयितवरिष्ठे श्रीमदानन्दतीर्थे ॥

Mahāmahopādhyāya
Prof. K.T. Pandurangi

ಸುಮಧ್ವವಿಜಯ

ಸುಮಧ್ವವಿಜಯವು ಆಧ್ಯಾತ್ಮನೇತಾರರಾದ ಆಚಾರ್ಯಮಧ್ವರ (1238-1317) ಪವಿತ್ರ ಚರಿತ್ರೆಯನ್ನು ಅಧಿಕೃತವಾಗಿ ತಿಳಿಸಿಕೊಡುವ ಶ್ರೇಷ್ಠ ವೇದಾಂತ ಕಾವ್ಯ. ಇದು ವೇದಾಂತಶಾಸ್ತ್ರವೂ ಹೌದು. ಇದನ್ನು ರಚಿಸಿದವರು ಶ್ರೀತ್ರಿವಿಕ್ರಮಪಂಡಿತಾಚಾರ್ಯರ ಮೂರನೆಯ ಮಕ್ಕಳಾದ ಶ್ರೀನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು. ಇವರು ಆಚಾರ್ಯ ಮಧ್ವರನ್ನು ಕಣ್ಣಾರೆ ಕಂಡಿರುವ ಸಾಧ್ಯತೆಗಳಿವೆ.

ಸುಮಧ್ವವಿಜಯವು 16 ಸರ್ಗಗಳ 1008 ಶ್ಲೋಕಗಳ ವ್ಯಾಪ್ತಿಯಲ್ಲಿ ಉಡುಪಿಯ ಬಳಿ ಪಾಜಕವೆಂಬ ಪುಟ್ಟ ಗ್ರಾಮದಲ್ಲಿ ಅವತರಿಸಿದ ಶ್ರೀ ಮಧ್ವರ ಜೀವನ ಚರಿತ್ರೆಯನ್ನು ಯಥಾವತ್ತಾಗಿ ತಿಳಿಸಿಕೊಡುವ ಮಹಾಕಾವ್ಯ. ಇಲ್ಲಿ ವಾಯುದೇವರ ಅವತಾರಗಳಾದ ಹನುಮ ಮತ್ತು ಭೀಮರ ಬಗ್ಗೆ ಸಂಕ್ಷೇಪವಾಗಿ ಮಹಿಮೆಗಳನ್ನು ಸಂಗ್ರಹಿಸಿ, ಮೂರನೇ ಅವತಾರವಾದ ಶ್ರೀಮಧ್ವರ ಮಹಿಮೆಗಳನ್ನು ಹುಟ್ಟಿನಿಂದ ಪ್ರಾರಂಭಿಸಿ ಅದೃಶ್ಯರಾಗುವವರೆಗೆ ವಿಸ್ತಾರವಾಗಿ, ಪ್ರಾಮಾಣಿಕವಾಗಿ ಹಾಗೂ ನಿರ್ದುಷ್ಟವಾಗಿ ಶ್ರೀನಾರಾಯಣಪಂಡಿತಾಚಾರ್ಯರು ಚಿತ್ರಿಸಿದ್ದಾರೆ.

ಆಚಾರ್ಯ ಮಧ್ವರನ್ನು ಕಂಡವರಿಂದ ಹಲವಾರು ಮಹಿಮೆಗಳನ್ನು ಸ್ವತಃ ಖಚಿತಪಡಿಸಿಕೊಂಡು, ಪೂರ್ಣ ಪ್ರಮಾಣದಲ್ಲಿ ಸತ್ಯವಾಗಿರುವ ಸಂಗತಿಗಳನ್ನು ಮಾತ್ರ ಸಂಗ್ರಹಿಸಿ ಜಗತ್ತಿಗೆ ನೀಡಿದವರು ಶ್ರೀ ನಾರಾಯಣಪಂಡಿತರು. ಗ್ರಂಥ ವಿಸ್ತಾರ ಭಯದಿಂದ ಅನೇಕ ಸಂಗತಿಗಳನ್ನು ಹೇಳದೇ ಬಿಟ್ಟಿದ್ದಾರೆ. (ಗ್ರಂಥಬಾಹುಲ್ಯಭೀತಿತಃ, - ಭಾ.ಪ್ರ). ಇವರ ಕಾವ್ಯನಿಷ್ಠೆ, ವಸ್ತುನಿಷ್ಠೆ ಹಾಗೂ ಇತಿಹಾಸನಿಷ್ಠೆ ಅಸಾಧಾರಣವಾದುದು. ಸುಮಧ್ವ ವಿಜಯಕ್ಕೆ ''ಭಾವಪ್ರಕಾಶಿಕಾ'' ಎಂಬ ಟೀಕೆಯನ್ನು ರಚಿಸುವುದರ ಮೂಲಕ ಗ್ರಂಥ ಅಧ್ಯಯನಕ್ಕೆ ತುಂಬಾ ಸಹಾಯಮಾಡಿದ್ದಾರೆ. ಶ್ಲೋಕಗಳಿಗೆ ವಿವರಣೆ, ವ್ಯಾಕರಣ ವಿಶೇಷ ಹಾಗೂ ತುಳುನಾಡಿನ ಅನೇಕ ಸ್ಥಳಗಳ ಆಗಿನ ಕಾಲದ ಹೆಸರುಗಳ ಉಲ್ಲೇಖ ಇಲ್ಲಿ ಬಂದಿವೆ. ನಾರಾಯಣಪಂಡಿತಾಚಾರ್ಯರ ದಾಖಲೆಯ ಖಚಿತೆಯ ಬಗ್ಗೆ, ವಸ್ತುನಿಷ್ಠೆಯ ಬಗ್ಗೆ ಇತಿಹಾಸ ಪ್ರಮಾಣಿಕತೆಯ ಬಗ್ಗೆ ''ಭಾವಪ್ರಕಾಶಿಕಾ'' ಮಾತುಗಳೇ ಸಾಕ್ಷಿಯಾಗಿವೆ.

प्रायेण नैकमात्राक्ताः कथिता इह सर्वशः ।
मया दृष्टा ध्रुवमिति प्रोक्ताः प्रायेण पूरुषैः ॥
द्वयोर्वक्त्रोर्विरोधे तु स्वीकृता प्रबलस्य गीः ।

काव्यश्रिये वा गुरुकीर्तये वा प्रोक्तं स्वयैवापि मनीषया वा ।
तस्मान्न शङ्केत महाजनेऽस्मिन् पुंसा कुशाग्रीयधियाऽप्यवश्यम् ॥

ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯದಲ್ಲಿಯೇ ಇಂಥಹ ವೇದಾಂತ ಕಾವ್ಯ ಇನ್ನೊಂದಿಲ್ಲ. ಸಂಪೂರ್ಣ ಲಕ್ಷಣಗಳಿಂದ ಕೂಡಿದ (32 ಸಲ್ಲಕ್ಷಣಗಳು) ವಿಶ್ವಗುರುಗಳಾದ, ಜೀವೊತ್ತಮರಾದ, ಶುದ್ಧ ಭಾಗವತ ಧರ್ಮನಿರತರಾದ ಭಗವಂತನಿಗೆ ಅತ್ಯಂತ ಪ್ರೀತ್ಯಾಸ್ಪದರಾದ, ಭಗವಂತನಿಗೆ ಮುಖ್ಯ ಪ್ರತೀಕರಾದ, ಆಧ್ಯಾತ್ಮನೇತಾರರಾದ, ಆಚಾರ್ಯಮಧ್ವರ ಮಹಿಮೆಗಳನ್ನು ಸಂಗ್ರಹಿಸಿರುವ ''ಸುಮಧ್ವವಿಜಯ''ವು ಮಾಧ್ವರಲ್ಲಿ ನಿತ್ಯಪಾರಾಯಣ ಗ್ರಂಥವಾಗಿ ಮಾನ್ಯ ವಾಗಿದೆ. ಮಾದನೂರು ಶ್ರೀವಿಷ್ಣುತೀರ್ಥರಂಥಹ ಜ್ಞಾನಿವರೇಣ್ಯರು ನಿತ್ಯದಲ್ಲಿ ಸಮಗ್ರ ಪಾರಾಯಣವನ್ನು ಮಾಡಿ ಸಿದ್ಧಿಯನ್ನು ಪಡೆದುಕೊಂಡ ಮಹನೀಯರು.

ಸುಮಧ್ವವಿಜಯವು ಪ್ರತಿಯೊಬ್ಬರಿಂದಲೂ (ಮಸ್ತಕದಲ್ಲಿ) ಧರಿಸಲೇಬೇಕಾದ ಮಂಗಳಸೂತ್ರ. ಇದು ಆಧ್ಯಾತ್ಮ ಜೀವನಕ್ಕೆ ವಜ್ರಕವಚ. ಮನಸ್ಸನ್ನು ಶುದ್ಧಿಗೊಳಿಸುವ ಪವಿತ್ರ ಗಂಗಾಜಲ. (ಮನೋವಿಶುದ್ಧ್ಯೈ ಚರಿತಾನು ವಾದಃ, 1/7) ಸಕಲ ರೋಗಗಳಿಗೆ ದಿವ್ಯೌಷಧಿ. ಹರಿಭಕ್ತಿಗೆ ಸಾಧನ. ಮೋಕ್ಷಕ್ಕೆ ಸೋಪಾನ.

ಆಚಾರ್ಯ ಮಧ್ವರ ಅವತಾರ : ಸುಮಾರು 750 ವರ್ಷಗಳ ಹಿಂದೆ ಆಚಾರ್ಯ ಮಧ್ವರು ಉಡುಪಿಯ ಸಮೀಪದ ''ಪಾಜಕ'' ಎಂಬ ಪುಟ್ಟ ಗ್ರಾಮದಲ್ಲಿ ಅವತಾರ ಮಾಡಿದ ಶ್ರೇಷ್ಠ ತತ್ತ್ವಜ್ಞಾನಿಗಳು. ಸತ್ಯ ಲೋಕಾಧಿಪತಿಯಾದ ಪ್ರಾಣದೇವರು ಮಧ್ವರೂಪದಿಂದ ಭೂಮಿಗೆ ಇಳಿದು ಬಂದ ದಿನವೇ ವಿಲಂಬಿನಾಮ ಸಂವತ್ಸರದ ಆಶ್ವಯುಜ ಮಾಸ ಶುಕ್ಲಪಕ್ಷ ದಶಮಿ (ವಿಜಯದಶಮಿ).

ತಂದೆ ಮಧ್ಯಗೇಹಭಟ್ಟರು. ತಾಯಿ ವೇದವತಿ. 12 ವರ್ಷಗಳ ಕಾಲ ವಿವಿಧ ವ್ರತ-ಉಪವಾಸ ಹಾಗೂ ನಿರಂತರ ಪಾಠ-ಪ್ರವಚನಗಳಿಂದ ರಜತಪೀಠಸ್ಥ ಅನಂತೇಶ್ವರನನ್ನು ಆರಾಧಿಸಿ, ವಾಯುದೇವರ ಮೂರನೇ ಅವತಾರರಾದ ಮಧ್ವರನ್ನು ಮಗನನ್ನಾಗಿ ಪಡೆದ ಪುಣ್ಯಾತ್ಮರು. ಇಟ್ಟ ಹೆಸರು ವಾಸುದೇವ.

ಮಧ್ವರ ಬಾಲಲೀಲೆಗಳು : ಪುಟ್ಟ ವಾಸುದೇವನ ಪ್ರತಿಯೊಂದು ಬಾಲಲೀಲೆಗಳು ಅದ್ಭುತ, ಆಶ್ಚರ್ಯ ಹಾಗೂ ಆಧ್ಯಾತ್ಮಮಯ. ವಾಯುದೇವರ ಪೂರ್ಣಾವತಾರರಾದ ಇವರು ಬಾಲಕರಾಗಿದ್ದಾಗಲೂ ಜ್ಞಾನ, ಬಲಾದಿಗಳನ್ನು ಪೂರ್ಣಪ್ರಮಾಣದಲ್ಲಿ ಹೊಂದಿದ್ದವರು.

ಬಾಲಕ ವಾಸುದೇವನಿಗೆ ಹಾಲುಕುಡಿಯಲು ಗೋದಾನ ಮಾಡಿದ ಪೂರ್ವಾಲಯ ಬ್ರಾಹ್ಮಣನಿಗೆ ಕಾಲಾಂತರದಲ್ಲಿ ಮೋಕ್ಷಕ್ಕೆ ಕಾರಣವಾದ ಪರಾತ್ಮವಿದ್ಯೆಯನ್ನು ಕರುಣಿಸಿದ ಯೋಗಿಗಳು. ತಂದೆಯು ಮಾಡಿದ ಎತ್ತಿನ ಸಾಲವನ್ನು ಹುಣಸೇಬೀಜವನ್ನು ಕೊಡುವುದರ ನೆಪದಲ್ಲಿ (ಆದರರಿಂದ ಸ್ವೀಕರಿಸಿದ) ಧನಿಕನಿಗೆ ಕಾಲಾಂತರದಲ್ಲಿ ಮೋಕ್ಷ ಬೀಜವನ್ನು ಕರುಣಿಸಿದ ದಯಾಳುಗಳು. ಸರ್ಪರೂಪಿ ಅಸುರನನ್ನು ಕಾಲಿನ ಹೆಬ್ಬೆರಳಿನ ತುದಿಯಿಂದ ನಾಶಪಡಿಸಿದ ಬಲಶಾಲಿಗಳು. ದೊಡ್ಡವರಿಂದಲೂ ಜೀರ್ಣಿಸಿಕೊಳ್ಳಲು ಅಸಾಧ್ಯವಾದ ಹುರುಳಿಯನ್ನು ತಿಂದು ಆನಂದದಿಂದ ಓಡಾಡಿದ ಸುಖಪುರುಷರು. ಎತ್ತಿನ ಬಾಲಹಿಡಿದು ಒಂಟಿಯಾಗಿ ಕಾಡಿನಲ್ಲಿ ಸಂಚರಿಸಿದ ಭಯರಹಿತರು. ಸರ್ವತ್ರ ನಮಸ್ಕಾರವನ್ನು ಮಾಡುತ್ತಾ ಸ್ವವಸ್ತುವಾದ ಭಗವಂತನನ್ನು ಸದಾ ಸರ್ವಸ್ಥಳದಲ್ಲಿ ಕಾಣುತ್ತಿದ್ದ ಮಹಾಮಹಿಮರು. ಇವೇ ಮೊದಲಾದ ಬಾಲಲೀಲೆಗಳನ್ನು ತೋರಿಸುತ್ತಾ ವಾಸುದೇವನು ಲೋಕದ ಜನರಿಗೆ ಆನಂದ ಹಾಗೂ ಆಶ್ಚರ್ಯವನ್ನುಂಟು ಮಾಡಿದನು.

ಗುರುಕುಲವಾಸ : ಮಧ್ಯಗೇಹ ಭಟ್ಟರು ಅಪ್ರತಿಮ ಪ್ರತಿಭೆಯುಳ್ಳ ಮಗ ವಾಸುದೇವನಿಗೆ ಅಕ್ಷರಾಭ್ಯಾಸ ಮಾಡಿಸಿದರು. ೫ನೇ ವಯಸ್ಸಿನಲ್ಲಿ ಭಾವಿ ಬ್ರಹ್ಮನಿಗೆ ಬ್ರಹ್ಮೋಪದೇಶ ಮಾಡಿದರು. ವಟು ವಾಸುದೇವನು ಜಗತ್ತಿಗೆ ನೀತಿ ತೋರಿಸಬೇಕೆಂದು ಆಲೋಚಿಸಿ ಗುರುಕುಲವಾಸ ಮಾಡಿದನು. ಹುಟ್ಟಿನಿಂದ ಬಳಲುತ್ತಿದ್ದ ಗುರುಪುತ್ರನ ತಲೆನೋವನ್ನು ಬಾಲಕ ವಾಸುದೇವ ಅವನ ಕಿವಿಯಲ್ಲಿ ಗಾಳಿ ಊದಿ (ಶಾಸ್ತ್ರೋಪದೇಶವನ್ನು ಮಾಡಿ) ತಲೆ ನೋವು ಮತ್ತೊಮ್ಮೆ ಬಾರದಂತೆ ಅನುಗ್ರಹಿಸಿದನು. ಗುರುಕುಲದಲ್ಲಿ ಪಾಠಕಲಿಯುವ ನೆಪಮಾಡಿಕೊಂಡು ಗುರುಗಳಾದ ತೋಟಂತಿಲ್ಲಾಯರಿಗೆ ತಾನು ಸರ್ವಜ್ಞನೆಂದು ತಿಳಿಸಿಕೊಟ್ಟರು. ಐತರೇಯೋಪನಿಷತ್ತನ್ನು ಒಪ್ಪಿಸುವ ಮೂಲಕ ಗುರುಗಳಿಗೆ ಮೋಕ್ಷಕ್ಕೆ ಕಾರಣವಾದ ವಿಷ್ಣುಭಕ್ತಿಯನ್ನು ಗುರುದಕ್ಷಿಣೆಯನ್ನಾಗಿ ಅನುಗ್ರಹಿಸಿದರು.

ಸಂನ್ಯಾಸ ಸ್ವೀಕಾರ : ಬಾಲಕ ವಾಸುದೇವನು ತನ್ನ ಅವತಾರ ಕಾರ್ಯವನ್ನು ಜಗತ್ತಿಗೆ ತಿಳಿಸಲು ಆಲೋಚಿಸಿದನು. ಅಜ್ಞಾನ ಮತ್ತು ಮಿಥ್ಯಾಜ್ಞಾನದಿಂದ ಕುರುಡರಾದ ಸಜ್ಜನರಿಗೆ ಈ ಜಗತ್ತು ಸತ್ಯ, ಜಗತ್ತಿಗೆ ಒಬ್ಬನಾಥನಿದ್ದಾನೆ ಅವನು ಸ್ವತಂತ್ರ, ಗುಣಗಳ ಖನಿ, ದೋಷದೂರ, ಮೋಕ್ಷವನ್ನು ಕರುಣಿಸುವವನು, ವೇದಾದಿಶಾಸ್ತ್ರಗಳಿಗೆ ಭಗವಂತನ ಗುಣೋತ್ಕರ್ಷದಲ್ಲಿಯೇ ಮುಖ್ಯ ತಾತ್ಪರ್ಯ, ಪರಬ್ರಹ್ಮನು ಜೀವರಿಂದ ಅತ್ಯಂತ ಭಿನ್ನನು ಮುಂತಾದ ತತ್ತ್ವಗಳನ್ನು ಉಪದೇಶ ಮಾಡಲು ಬಯಸಿದವರಾಗಿ ತಮ್ಮ ಎಳೆ ೧೧ನೇ ವಯಸ್ಸಿನಲ್ಲಿ ಅಚ್ಯುತಪ್ರೇಕ್ಷರಿಂದ ಸಂನ್ಯಾಸ ಸ್ವೀಕರಿಸಲು ನಿಶ್ಚಯಿಸಿದರು. ಸಂನ್ಯಾಸ ಸ್ವೀಕಾರಕ್ಕೆ ತಂದೆ-ತಾಯಿಗಳು ಒಪ್ಪಿಗೆಯನ್ನು ನಿರಾಕರಿಸಿದಾಗ ವೃದ್ಧಾಪ್ಯದಲ್ಲಿ ತಂದೆ-ತಾಯಿಗಳನ್ನು ನೋಡಿಕೊಳ್ಳಲು ಇನ್ನೊಬ್ಬ ಮಗನನ್ನು ಕರುಣಿಸಿ ಅವರ ಅನುಮತಿಯನ್ನು ಪಡೆದು, ಸಂನ್ಯಾಸ ಸ್ವೀಕರಿಸಿದರು. ವೃದ್ಧಾಪ್ಯದಲ್ಲಿ ತಂದೆ-ತಾಯಿಗಳ ಪಾಲನೆ ಮಕ್ಕಳ ಅವಶ್ಯ ಕರ್ತವ್ಯವೆಂಬುದನ್ನು ಲೋಕಕ್ಕೆ ತಿಳಿಸಿದರು.

ಒಮ್ಮೆ ಅಚ್ಯುತಪ್ರೇಕ್ಷರು ಶಿಷ್ಯರಿಗೆ ಭಾಗವತಪಾಠ ಹೇಳುತ್ತಿರುವಾಗ ಲಿಖಿತಪ್ರತಿಗಳಲ್ಲಿ ಪಾಠವ್ಯತ್ಯಾಸ ತೋರಿದಾಗ, ವ್ಯಾಸರಿಗೆ ಸಮ್ಮತವಾದ ಪಾಠವನ್ನು ತಿಳಿಸಿ, ತಾವು ವ್ಯಾಸರ ಶಿಷ್ಯರೆಂಬುದನ್ನು ಖಚಿತಪಡಿಸಿದರು.

ವೇದಾಂತ ಸಾಮ್ರಾಜ್ಯ ಪಟ್ಟಾಭಿಷೇಕ : ಮುಂದೆ ಪೂರ್ಣಪ್ರಜ್ಞರ ಅಲೌಕಿಕ ಪ್ರತಿಭೆಯಿಂದ ಸಂತಸಗೊಂಡರು ಅಚ್ಯುತ ಪ್ರೇಕ್ಷರು. ಪೂರ್ಣಪ್ರಜ್ಞರನ್ನು ವೇದಾಂತ ಸಾಮ್ರಾಜ್ಯದಲ್ಲಿ ಕುಳ್ಳಿರಿಸಿ ಪಟ್ಟಾಭಿಷೇಕ ಮಾಡಿ **''ಆನಂದತೀರ್ಥ''** ಎಂದು ನಾಮಕರಣ ಮಾಡಿದರು.

ಆಶ್ರಮ ಸ್ವೀಕಾರದ ಸ್ವಲ್ಪ ದಿನಗಳಲ್ಲಿಯೇ ವಾದಕ್ಕೆ ಧಾವಿಸಿದ ಬುದ್ಧಿಸಾಗರ, ವಾದಿಸಿಂಹ, ಪುಂಡರೀಕ ಪುರಿ, ಪದ್ಮತೀರ್ಥ ಮುಂತಾದ ಪಂಡಿತಮಂಡಳಿಯನ್ನು ನಿರುತ್ತರರನ್ನಾಗಿ ಮಾಡಿ ತತ್ತ್ವವಾದವನ್ನು ಸ್ಥಾಪಿಸಿದರು.

ದಕ್ಷಿಣ ದಿಗ್ವಿಜಯ : ಆಚಾರ್ಯರು ದಕ್ಷಿಣಭಾರತದ ದಿಗ್ವಿಜಯ ಕೈಕೊಂಡರು. ಕ್ರಮೇಣ ಸಂಚಾರ ಮಾಡುತ್ತಾ ಅನಂತಶಯನ, ಕನ್ಯಾಕುಮಾರಿ, ರಾಮೇಶ್ವರ, ಶ್ರೀರಂಗ, ಶ್ರೀಮುಷ್ಣ ಮುಂತಾದ ಪ್ರಮುಖ ಕ್ಷೇತ್ರಗಳನ್ನು ಸಂದರ್ಶಿಸಿದರು. ಹೋದೆಡೆಯಲ್ಲೆಲ್ಲ ತತ್ತ್ವವಾದ ಸಂದೇಶವನ್ನು ಜನರಿಗೆ ತಲುಪಿಸಿದರು.

ಆಚಾರ್ಯ ಮಧ್ವರು ಮುಂದೆ ಪ್ರಯಾಣ ಬೆಳೆಸುತ್ತಾ ವೇದಗಳಿಗೆ ಮೂರು ಅರ್ಥ, ಮಹಾಭಾರತಕ್ಕೆ ಹತ್ತು ಅರ್ಥ, ವಿಷ್ಣುಸಹಸ್ರನಾಮದ ಪ್ರತಿ ನಾಮಕ್ಕೂ ನೂರು ಅರ್ಥಗಳು ಎಂಬುದನ್ನು ಸಮರ್ಥಿಸಿ ತಾವು ಸರ್ವಜ್ಞರೆಂದು ಇನ್ನೊಮ್ಮೆ ಪಂಡಿತರಿಂದ ಪ್ರಶಂಶಿಸಲ್ಪಟ್ಟರು.

ಬದರಿಕಾಶ್ರಮಕ್ಕೆ ಪ್ರಯಾಣ ಮತ್ತು ಗೀತಾಭಾಷ್ಯ ಸಮರ್ಪಣೆ.

ಮುಂದೆ ಆಚಾರ್ಯಮಧ್ವರು ಕ್ರಮೇಣ ಗಂಗಾದಿ ತೀರ್ಥಗಳಲ್ಲಿ ಮಿಂದು, ಅವುಗಳನ್ನು ಪವಿತ್ರೀಕರಿಸಿದರು. ನೇರವಾಗಿ ಬದರಿಗೆ ತೆರಳಿ ನಾರಾಯಣದೇವರ ಅನುಗ್ರಹ ಬಯಸಿದವರಾಗಿ ಶ್ರೇಷ್ಠವಾದ ಗೀತಾಭಾಷ್ಯವನ್ನು ಕಾಣಿಕೆಯಾಗಿ ಸಮರ್ಪಿಸಿದರು. ಗುರುಗಳ ಹಾಗೂ ದೇವತೆಗಳ ಬಳಿಗೆ ಬರಿಗೈಯಿಂದ ಹೋಗಬಾರದೆಂಬ ತತ್ತ್ವವನ್ನು ತಿಳಿಸಿದರು.

ಮಧ್ವರ ಸಂದೇಶ : ಶುದ್ಧಾಂತಃಕರಣವುಳ್ಳ ಮಧ್ವರು 48 ದಿನಗಳ ಕಾಷ್ಠಮೌನವ್ರತ, ಶೀತಲ ಗಂಗಾ ಸ್ನಾನ ಹಾಗೂ ಭಗವಂತನ ಗುಣ ಚಿಂತನೆ ಮಾಡಿದರು. ಅಲ್ಲಿಂದ ವ್ಯಾಸಾಶ್ರಮಕ್ಕೆ ಹೊರಡುವ ಮುಂಚೆ ಶಿಷ್ಯರಿಗೆ ಚತುರ್ವಿಧ ಪುರುಷಾರ್ಥಗಳನ್ನು ಕೊಡುವ ನಾಲ್ಕು ಮಾತುಗಳನ್ನು ಬರೆದು ಶಿಷ್ಯರಿಗೆ ಅನುಗ್ರಹಿಸಿದರು. ಮಧ್ವರ ಸಾರ್ವಕಾಲಿಕ ಸಂದೇಶ -

नेदृशं स्थलमलं शमलग्नं नास्य तीर्थसलिलस्य समं वाः ।
नास्ति विष्णुसदृशं ननु दैवं नास्मद्गुक्तिसदृशं हितरूपम् ॥ vi/47

ವ್ಯಾಸ - ಮಧ್ವರ ಸಮಾಗಮ :

ವೇದವ್ಯಾಸರ ಆದೇಶದಂತೆ ಮಧ್ವರು ವ್ಯಾಸಾಶ್ರಮದತ್ತ ಪ್ರಯಾಣ ಬೆಳೆಸಿದರು. ಅಲ್ಲಿ ಅದ್ಭುತವಾದ ಹಿಮಾಲಯಪರ್ವತವನ್ನು ನೋಡುತ್ತಾ ಮಹಾಲಕ್ಷ್ಮಿ, ದೇವತೆಗಳು ಹಾಗೂ ಋಷಿಗಳು ಇವರಿಂದ ಕೂಡಿದ ಸರ್ವೋತ್ತಮನಾದ ನಾರಾಯಣನನ್ನು ಚಿಂತಿಸಿದರು. ಪರ್ವತದ ಮತ್ತೊಂದು ಪಾರ್ಶ್ವದಲ್ಲಿರುವ ಬದರಿ ಮೊದಲಾದ ವೃಕ್ಷಗಳಿಂದ, ಶುಕಾದಿ ವಿಶೇಷ ಪಕ್ಷಿಗಳಿಂದ, ದೇವತೆಗಳು ಋಷಿಗಳು ಹಾಗೂ ಮುನಿಗಳು ಇವರ ಸಮೂಹದಿಂದ ''ವೈಕುಂಠ''ದಂತೆ ಶೋಭಿಸುತ್ತಿದ್ದ ಆಶ್ರಮವನ್ನು ನೋಡಿದರು. ಸದಾ ತಮ್ಮ ಹೃದಯದಲ್ಲಿಯೇ ಭಗವಂತನನ್ನು ನೋಡುವವರಾದರೂ ಮುನಿಗಳ ಮಧ್ಯದಲ್ಲಿ ಉನ್ನತವಾದ ಆಸನದಲ್ಲಿ ಕುಳಿತಿದ್ದ ಮೂರು ಲೋಕಕ್ಕೂ ಭೂಷಣರಾದ ಗುಣಪೂರ್ಣನಾದ ಸಾಕ್ಷಾತ್ ನಾರಾಯಣನೇ ಆದ ವ್ಯಾಸರನ್ನು ನವನೂತನವಾಗಿಯೇ ಕಂಡರು. ಯಾರ ಮನಸ್ಸಿನಿಂದ ಶ್ರುತಿಗಳು ವ್ಯಕ್ತವಾದವೋ, ಯಾರಿಂದ ಮಹಾಭಾರತ, ಪುರಾಣಗಳು, ಬ್ರಹ್ಮಸೂತ್ರಗಳು ರಚಿತವಾದವೋ ಅಂತಹ

ವೇದವ್ಯಾಸರನ್ನು ನೋಡಿದರು. ಅವರು ಉತ್ತಮವಾದ ಕೃಷ್ಣಾಜಿನದ ಮೇಲೆ ಯೋಗಪೀಠದಲ್ಲಿ ಕುಳಿತಿದ್ದರು. ಲಕ್ಷ್ಮೀ ಬ್ರಹ್ಮವಾಯು ಮೊದಲಾದ ದೇವತೆಗಳು ವ್ಯಾಸರ ಪಾದಕಮಲಗಳಲ್ಲಿ ಆಸೀನರಾಗಿದ್ದರು. ಮಧ್ವಾಚಾರ್ಯರು ವೇದವ್ಯಾಸರನ್ನು ನಖದಿಂದ ಪ್ರಾರಂಭಿಸಿ ಜಟಾಪರ್ಯಂತ ಚಿಂತಿಸಿದರು. ವ್ಯಾಸರ ಸಮೀಪಕ್ಕೆ ಧಾವಿಸಿ ಭಕ್ತಿಪೂರ್ವಕವಾಗಿ ಸಾಷ್ಟಾಂಗನಮಸ್ಕಾರ ಮಾಡಿದರು. ಆಗ ವೇದವ್ಯಾಸರು ಮಧ್ವಾಚಾರ್ಯರನ್ನು ಎರಡೂ ಕೈಗಳಿಂದ ಹಿಡಿದು ಎಬ್ಬಿಸಿ ಗಾಢವಾದ ಆಲಿಂಗನ ಮಾಡಿಕೊಂಡರು. ಮಧ್ವಾಚಾರ್ಯರಿಗೆ ವೇದವ್ಯಾಸರ ಶಿಷ್ಯರು ಉತ್ತಮವಾದ ಆಸನವನ್ನು ನೀಡಿ ಅರ್ಘ್ಯಪಾದ್ಯಾದಿಗಳಿಂದ ಪೂಜಿಸಿದರು. ವ್ಯಾಸ-ಮಧ್ವರ ಸಮಾಗಮ ಅಪೂರ್ವವಾಗಿ ಕಂಗೊಳಿಸಿತು. ಅವರಿಬ್ಬರ ಮನೋಹರವಾದ ಸಂಭಾಷಣೆಯು ಇಲ್ಲಿ ನೆರೆದಿದ್ದ ಮುನಿವರ್ಯರಿಗೆ, ದೇವತಾಸಮುದಾಯಕ್ಕೆ ಪರಮಾನಂದವನ್ನು ನೀಡಿತು. ನಾರಾಯಣ ಪಂಡಿತರು ಅವರಿಬ್ಬರ ಸಮಾಗಮವನ್ನು ಶಾಸ್ತ್ರಕಾವ್ಯಮಯವಾಗಿ ವರ್ಣಿಸಿದ್ದಾರೆ.

सज्ज्ञानायानन्दविज्ञानमूर्ती प्राप्तौ पृथ्वीमाश्रमे तत्र तावत् ।
जाज्वल्येते विष्णुवायू स्म देवौ वेदव्यासानन्दतीर्थाभिधानौ ॥ vii/59

ವೇದವ್ಯಾಸರಿಂದ ಜ್ಞಾನೋಪದೇಶ

ಮಧ್ವಾಚಾರ್ಯರು ವ್ಯಾಸಾಶ್ರಮದಲ್ಲಿ ವಿಶೇಷ ತತ್ತ್ವೋಪದೇಶ ಪಡೆಯಲು ಏಕಾಂತದಲ್ಲಿ ವೇದವ್ಯಾಸರನ್ನು ಪ್ರಾರ್ಥಿಸಿದರು. ಶ್ರುತಿ, ಪುರಾಣ, ಇತಿಹಾಸ, ಪಂಚರಾತ್ರ ಮೊದಲಾದ ಗ್ರಂಥಗಳ ಪರಮಾರ್ಥಗಳನ್ನು (ಗೂಢಾರ್ಥಗಳನ್ನು) ವ್ಯಾಸರಿಂದ ಶ್ರವಣಮಾಡಿದರು. ಮೊದಲೇ ಜ್ಞಾನದಿಂದ ಪರಿಪೂರ್ಣವಾಗಿದ್ದ ಮಧ್ವರ ಮನಸ್ಸನ್ನು ಇನ್ನೂ ಹೆಚ್ಚಿನ ತತ್ತ್ವಜ್ಞಾನೋಪದೇಶದಿಂದ ವ್ಯಾಸರು ತುಂಬಿದರು.

ನಾರಾಯಣ-ವ್ಯಾಸ-ಮಧ್ವರ ಸಮಾಗಮ

ಅಲ್ಲಿಂದ ವ್ಯಾಸರು ಮಧ್ವಾಚಾರ್ಯರನ್ನು ನಾರಾಯಣಾಶ್ರಮಕ್ಕೆ ಕರೆದೊಯ್ದರು. ಅಲ್ಲಿ ವ್ಯಾಸರ ಇನ್ನೊಂದು ರೂಪವಾದ ನಾರಾಯಣದೇವರನ್ನು ನೋಡಿ ಮಧ್ವರು ಭಕ್ತಿಪೂರ್ವಕ ನಮಸ್ಕಾರ ಮಾಡಿದರು. ಸೃಷ್ಟಿಕರ್ತನಾದ ಸರ್ವೋತ್ತಮನಾದ ನಾರಾಯಣನ ಅಚಿಂತ್ಯ ಮಹಿಮೆಗಳನ್ನು ಸ್ಮರಿಸಿದರು. ಮತ್ಸ್ಯಾದಿ ಹತ್ತು ಅವತಾರಗಳ ಹಾಗೂ ವಿಶೇಷ ಅವತಾರಗಳಾದ ಮಹಿದಾಸ, ಧನ್ವಂತರಿ, ಯಜ್ಞ, ಋಷಭ, ಹಂಸ ಮುಂತಾದ ಭಗವಂತನ ರೂಪಗಳ ಅವತಾರ ಕಾರ್ಯಗಳನ್ನು ಸ್ಮರಿಸಿದರು. ಭಗವಂತನ ಎಲ್ಲರೂಪಗಳು ಪರಿಪೂರ್ಣ, ಜ್ಞಾನಾನಂದಮಯ, ಸ್ವಗತಭೇದ ವಿವರ್ಜಿತ, ಅನಾದಿನಿತ್ಯ, ದೋಷದೂರ ಎಂಬುದಾಗಿ ಎಲ್ಲ ರೂಪಗಳನ್ನು ವಿಶೇಷವಾಗಿ ಚಿಂತಿಸುತ್ತಾ ನಾರಾಯಣನಿಗೆ ನಮಸ್ಕಾರ ಮಾಡಿದರು.

ಸೂತ್ರಭಾಷ್ಯರಚನೆಗೆ - ನಾರಾಯಣದೇವರ ಆದೇಶ

ನಂತರ ವೇದವ್ಯಾಸ ಹಾಗೂ ನಾರಾಯಣರು ಪರಸ್ಪರ ಆಲಿಂಗನ ಮಾಡಿಕೊಂಡರು. ಅವರ ಹತ್ತಿರ ಆಸೀನರಾದ ಮಧ್ವಾಚಾರ್ಯರನ್ನು ಕುರಿತು ''ಬೇರೆ ಭಾಷ್ಯಕಾರರು ಬ್ರಹ್ಮಸೂತ್ರಗಳಿಗೆ ಭಾಷ್ಯವನ್ನು ಬರೆದು ನಿಜವಾದ ಅರ್ಥವನ್ನು ಮುಚ್ಚಿಟ್ಟು ಸಜ್ಜನರನ್ನು ಚಿಂತಾಕ್ರಾಂತರನ್ನಾಗಿ ಮಾಡಿದ್ದಾರೆ. ಆದ್ದರಿಂದ ತಾವು ಬೇಗನೆ ಬ್ರಹ್ಮಸೂತ್ರಗಳಿಗೆ ನಿಜವಾದ ಅರ್ಥವನ್ನು ತಿಳಿಸುವ ಭಾಷ್ಯವನ್ನು ರಚಿಸಿ ಸಜ್ಜನರನ್ನು ಉದ್ಧಾರ ಮಾಡಿರಿ ಎಂದು ಆದೇಶ ನೀಡಿದರು.

ಸೂತ್ರ ಭಾಷ್ಯರಚನೆ : ನಾರಾಯಣ ದೇವರಿಂದ ''ಕುರು ಸೂತ್ರಭಾಷ್ಯಮವಲಂಬಿತ ವ್ರಜೇಃ'' ಎಂಬ ಆಜ್ಞೆಯನ್ನು ಸ್ವೀಕರಿಸಿದ ಮಧ್ವರು ವೇದವ್ಯಾಸರನ್ನು ಕೂಡಿಕೊಂಡು ವ್ಯಾಸಾಶ್ರಮಕ್ಕೆ ಬಂದು ಅಲ್ಲಿ ವಿಶೇಷ ತತ್ತ್ವೋಪದೇಶ ಶ್ರವಣ ಮಾಡಿದರು. ಬದರಿಯಲ್ಲಿ (ಅನಂತ ಮಠದಲ್ಲಿ) ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ ರಚನೆ ಮಾಡಿದರು.

ಭಾಷ್ಯ ವೈಶಿಷ್ಟ್ಯ : ಸೂತ್ರಕಾರರಾದ ವೇದವ್ಯಾಸರಿಗೆ ಸಮ್ಮತವಾದ ಭಾಷ್ಯವನ್ನು ಮಧ್ವರು ರಚಿಸಿದರು. ಅದರ ವೈಶಿಷ್ಟ್ಯವನ್ನು ಪಂಡಿತಾಚಾರ್ಯರು ಐದು ಶ್ಲೋಕಗಳಲ್ಲಿ ವರ್ಣಿಸಿದ್ದಾರೆ.

೧. ಭಗವಂತನು ಅನಂತ ಕಲ್ಯಾಣ ಗುಣಪರಿಪೂರ್ಣ, ದೋಷ ದೂರ ಭಾಷ್ಯದ ಶ್ರವಣಾದಿಗಳು ಜ್ಞಾನ ಭಕ್ತಿ ಹಾಗೂ ಮೋಕ್ಷವನ್ನು ಕೊಡುವಂತಹುದು.

೨. ಆಚಾರ್ಯರು ಪ್ರತಿಪಾದಿಸಿದ ಪ್ರತಿಯೊಂದು ಪ್ರಮೇಯಗಳನ್ನು ಶ್ರುತಿ, ಸ್ಮೃತಿ ಮತ್ತು ಯುಕ್ತಿಗಳಿಂದ ಸಮರ್ಥಿಸಿರುವರು.

೩. ಸಾಮಾನ್ಯರಿಗೂ ಸುಲಭವಾಗಿ ತಿಳಿಯುವಂತಹ, ವಿದ್ವಾಂಸರಿಗೂ ಪೂರ್ಣವಾಗಿ ತಿಳಿಯಲಸಾಧ್ಯ ವಾದಂತಹ ಗಂಭೀರ ಮತ್ತು ಬಹ್ವರ್ಥಗಳಿಂದ ಕೂಡಿರುವಂತಹದು. ಸಜ್ಜನರಿಗೆ ಸಂತೋಷವನ್ನು ಹಾಗೂ ದುರ್ವಾದಿಗಳಿಗೆ ದುಃಖವನ್ನುಂಟು ಮಾಡುವಂತಹದು.

೪. ಭಾಷ್ಯವು ವ್ಯರ್ಥವಚನ ಮತ್ತು ಅಪಶಬ್ದಾದಿ ದೋಷಗಳಿಂದ ರಹಿತವಾಗಿ ಸಕಲ ಲಕ್ಷಣಗಳಿಂದ ಕೂಡಿ ದೇವತೆಗಳಿಂದ ಮಾನ್ಯವಾಗಿರುವಂತಹುದು.

೫. ಪ್ರಸಿದ್ಧವಾಗಿದ್ದ 21 ಕುಭಾಷ್ಯಗಳನ್ನು ಸಮರ್ಥವಾಗಿ ಖಂಡಿಸುವುದರ ಜೊತೆಗೆ ಯಾವಕಾಲಕ್ಕೂ ಯಾರಿಂದಲೂ ಖಂಡಿಸಲಾಗದಂತಹ ಅದ್ಭುತವಾದ ತಮ್ಮ ಇನ್ನೊಂದು ರೂಪದಂತಿರುವ ಸೂತ್ರ ಭಾಷ್ಯವನ್ನು ರಚಿಸಿದರು.

ಶ್ರೇಷ್ಠವಾದ ಸಮಗ್ರ ಭಾಷ್ಯವನ್ನು ಪ್ರಪ್ರಥಮವಾಗಿ ಲೇಖನ ಮಾಡಿದವರು ಶ್ರೀ ಸತ್ಯತೀರ್ಥರು.

ಭಕ್ತಿಯಿಂದ ಸೂತ್ರಭಾಷ್ಯದ ಒಂದಕ್ಷರವನ್ನು ಬರೆಯುವವರಿಗೆ ಗಂಗಾ ನದಿಯ ಪವಿತ್ರವಾದ ತರಂಗಗಳು ಅಪ್ಪಳಿಸುವಂತಹ ಭೂಪ್ರದೇಶದಲ್ಲಿ ವಿಷ್ಣುಮಂದಿರ ನಿರ್ಮಾಣ ಮಾಡಿದವರಿಗೆ ಬರುವಷ್ಟು ಪುಣ್ಯ ಲಭಿಸುವುದು.

ಶೋಭನ ಭಟ್ಟರ ಹಾಗೂ ಮಧ್ವಾಚಾರ್ಯರ ಸಮಾಗಮ : ಆಚಾರ್ಯರು ಬದರಿಯಿಂದ (ಆನಂತಮಠ) ಅನೇಕ ಪುಣ್ಯಕ್ಷೇತ್ರಗಳನ್ನು ಸಂದರ್ಶಿಸುತ್ತಾ ಗೋದಾವರಿ ತೀರಕ್ಕೆ ಆಗಮಿಸಿದರು. ಪ್ರಕಾಂಡ ಪಂಡಿತರಾದ ಶೋಭನಭಟ್ಟರು ಆಚಾರ್ಯರನ್ನು ಕಂಡರು. ಮಧ್ವರ ಮುಖಕಮಲದಿಂದ ಹೊರಹೊಮ್ಮಿದ ಭಾಷ್ಯಪ್ರವಚನವನ್ನು ಶ್ರವಣ ಮಾಡಿ ಅವರ ಶಿಷ್ಯರಾದರು. ಮುಂದೆ ಸಿದ್ಧಾಂತ ಪ್ರಚಾರಕ್ಕೆ ತಮ್ಮ ಜೀವನವನ್ನೇ ಸಮರ್ಪಿಸಿದರು. ವಿದ್ವತ್ ಸಭೆಗಳಲ್ಲಿ ದುರ್ಮತಗಳನ್ನು ಖಂಡಿಸುತ್ತಾ ಮಧ್ವಸಿದ್ಧಾಂತವನ್ನು ಶ್ರೇಷ್ಠವಾದ ಬಲಮುರಿಶಂಖಕ್ಕೆ ಹೋಲಿಸಿ ಮಧ್ವ ಮತದ ವೈಶಿಷ್ಟ್ಯವನ್ನು ಪ್ರಚಾರ ಮಾಡಿದರು.

ಶ್ರೀಕೃಷ್ಣ ಪ್ರತಿಷ್ಠೆ : ಶ್ರೀಮದಾಚಾರ್ಯರು ಸಂಚಾರ ಮಾಡುತ್ತಾ ಮಾರ್ಗದಲ್ಲಿ ಶಿಷ್ಯರಿಗೆ ವಿಶೇಷ ತತ್ತ್ವೋಪದೇಶವನ್ನು ಮಾಡುತ್ತಾ ರಜತಪೀಠಕ್ಕೆ ಬಂದರು. ಜನರ ಮನದಲ್ಲಿದ್ದ ಎಲ್ಲ ಸಂಶಯ ಹಾಗೂ ಅಜ್ಞಾನಗಳನ್ನು ಪರಿಹಾರ ಮಾಡಿ ಸೂತ್ರಭಾಷ್ಯದಲ್ಲಿ ವಿಶೇಷ ಶ್ರದ್ಧೆಯನ್ನುಂಟು ಮಾಡಿದರು. ಶಿಷ್ಯರಿಗೆ ತತ್ತ್ವೋಪದೇಶ ಮತ್ತು ತಪ್ತಮುದ್ರಾಧಾರಣೆ ಮಾಡಿದರು.

ಆಚಾರ್ಯ ಮಧ್ವರು ಭಕ್ತರ ಅನುಗ್ರಹಕ್ಕಾಗಿ ಶ್ರೀಕೃಷ್ಣನನ್ನು ಉಡುಪಿಯಲ್ಲಿ ಪ್ರತಿಷ್ಠೆ ಮಾಡಬೇಕೆಂದು ಸಂಕಲ್ಪಿಸಿ ಪಶ್ಚಿಮ ಸಮುದ್ರ ತೀರಕ್ಕೆ ಹೋದರು. ದ್ವಾರಕೆಯಿಂದ ಬರುತ್ತಿದ್ದ ನಾವೆಯು ಮಧ್ಯದಲ್ಲಿ ಅಪಾಯಕ್ಕೆ ಸಿಲುಕಿದಾಗ ನೌಕಾಧಿಪನ ಪ್ರಾರ್ಥನೆಯಂತೆ, ನಾವೆಯನ್ನು ಸುರಕ್ಷಿತವಾಗಿ ದಡಕ್ಕೆ ತಲುಪುವಂತೆ ಮಾಡಿದರು. ಯಜಮಾನನ ಪ್ರಾರ್ಥನೆಯಂತೆ ನಾವೆಯಲ್ಲಿದ್ದ ಗೋಪೀಚಂದನ ಗಡ್ಡೆಯನ್ನು ಸ್ವೀಕರಿಸಿ, ರಜತಪೀಠಪುರಕ್ಕೆ ತಂದು ಅದರೊಳಗಿದ್ದ ರುಕ್ಮಿಣಿಯಿಂದ ಪೂಜೆಗೊಂಡ ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಮಧ್ವಸರೋವರದಲ್ಲಿ ಅಭಿಷೇಕ ಮಾಡಿದರು. ಆ ಪ್ರತಿಮೆಯಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣನ ವಿಶೇಷ ಸನ್ನಿಧಾನವನ್ನು ಇಟ್ಟು, ಭಕ್ತರ ಅನುಗ್ರಹಕ್ಕಾಗಿ ಪ್ರತಿಷ್ಠೆ ಮಾಡಿದರು.

ಶ್ರೀಮದಾಚಾರ್ಯರು ಕೃಷ್ಣನನ್ನು ಉಡುಪಿಗೆ ತರುವಾಗ - ದ್ವಾದಶ ಸ್ತೋತ್ರವನ್ನು ರಚಿಸಿದರು.

ಗುರುಪುತ್ರನಿಂದ ಯಜ್ಞ : ಗುರುಪುತ್ರನಾದ ವಾಸುದೇವನಿಂದ ಯಾಗವನ್ನು ಮಾಡಿಸಿದ ಆಚಾರ್ಯ ಮಧ್ವರು ಯಜ್ಞಯಾಗಾದಿಗಳು ಮೋಕ್ಷಕ್ಕೆ ಸಹಕಾರಿಯೆಂದು ತಿಳಿಸಿಕೊಟ್ಟರು.

ದ್ವಿತೀಯ ಬದರಿಯಾತ್ರೆ : ಆಚಾರ್ಯರು ಎರಡನೇ ಬಾರಿ ಬದರಿಯಾತ್ರೆ ಕೈಗೊಂಡು ತಾವು ರಚಿಸಿದ ಸೂತ್ರಭಾಷ್ಯವನ್ನು ವೇದವ್ಯಾಸರಿಗೆ ಸಮರ್ಪಿಸಿದರು. ವ್ಯಾಸರಿಂದ ಮತ್ತೊಮ್ಮೆ ''ಸಹಭೋಗ'' ಎಂಬ ಶ್ರೇಷ್ಠ ಅನುಗ್ರಹವನ್ನು ಪಡೆದು ಉಡುಪಿಗೆ ಮರಳಿ ಬಂದರು. ಎಲ್ಲ ಭಕ್ತ ಜನರಿಗೆ ಆನಂದವನ್ನುಂಟು ಮಾಡಿದರು.

ಮಧ್ವರು ತೋರಿಸಿದ ಮಹಿಮೆಗಳ ವರ್ಣನೆ :

ಈಶ್ವರದೇವನೆಂಬ ರಾಜನು ತನ್ನ ರಾಜ್ಯದಲ್ಲಿ ಸಂಚಾರ ಕ್ರಮೇಣ ಹೋಗುತ್ತಿದ್ದ ಮಧ್ವಾಚಾರ್ಯರಿಗೆ ಅಗೆಯುವ ಕಾರ್ಯವನ್ನು ಮಾಡಲು ಹೇಳಿದ. ಆಗ ಮಧ್ವರು ನಮಗೆ ಅಗೆಯುವ ಕಾರ್ಯ ಬರುವುದಿಲ್ಲ. ನೀನು ತೋರಿಸು ಎಂದು ರಾಜನಿಗೆ ಹೇಳಿದರು. ಅಗೆಯುವ ಕಾರ್ಯ ಪ್ರಾರಂಭಿಸಿದ ಈಶ್ವರದೇವ ದಿನವಿಡೀ ಅಗೆಯುತ್ತಲೇ ಇದ್ದ. ಇತ್ತ ಆಚಾರ್ಯ ಮಧ್ವರು ಪ್ರಯಾಣ ಬೆಳೆಸಿದರು.

ಒಮ್ಮೆ ಗಂಗಾನದಿಯನ್ನು ದಾಟುವ ಪ್ರಸಂಗ. ನಾವೆಗಳೇ ಇಲ್ಲ. ಮಧ್ವರು ಶಿಷ್ಯರ ಸಮೇತರಾಗಿ ಗಂಗಾನದಿಯನ್ನು ದಾಟಿದರು. ಮುಸ್ಲೀಂ ಸೈನಿಕರು ತಡೆದರೂ ನಿರ್ಭಯರಾಗಿ ನದಿಯನ್ನು ದಾಟಿ ಸಾಗುತ್ತಿದ್ದ ಮಧ್ವರನ್ನು ನೋಡಿ ತುರುಷ್ಕರಾಜ ಆಶ್ಚರ್ಯಗೊಂಡ. ರಾಜನನ್ನು ಕುರಿತು ''ಇಡೀ ಜಗತ್ತನ್ನು ಬೆಳಗಿಸುವ ಸೂರ್ಯಾಂತಸ್ಥನಾದ ನಾರಾಯಣನ ಅನುಗ್ರಹದಿಂದ ನಾವು ಎಲ್ಲವನ್ನೂ ಮಾಡುತ್ತೇವೆ.'' ಎಂದು ಅವನ ಭಾಷೆಯಲ್ಲಿಯೇ ಉತ್ತರ ಕೊಟ್ಟು ಮುಂದೆ ಸಾಗಿದರು. ಆಚಾರ್ಯರ ಧೈರ್ಯ, ಬ್ರಹ್ಮವರ್ಚಸ್ಸು, ದೇಶ-ಕಾಲ ಉಚಿತವಾದ ಮಾತನ್ನು ಕೇಳಿ ತುರುಷ್ಕರಾಜ ಅರ್ಧರಾಜ್ಯವನ್ನು ಅರ್ಪಿಸಿದನು. ಬಲಾತ್ಕಾರವಾಗಿ ಹೋಗಲು ಸಮರ್ಥರಿದ್ದರೂ ಆಪತ್ಕಾಲದಲ್ಲಿ ಹೀಗೆ ವರ್ತಿಸಬೇಕೆಂಬ ನೀತಿಯನ್ನು ತೋರಿಸುವುದಕ್ಕಾಗಿಯೇ ಆಚಾರ್ಯರು ಹಾಗೆ ಮಾಡಿದರು.

ಹೀಗೆಯೇ ಮುಂದೆ ಸಾಗುತ್ತಿದ್ದಾಗ ಕಳ್ಳರ ಗುಂಪೊಂದು ಆಚಾರ್ಯರ ಮೇಲೆ ಆಕ್ರಮಣ ಮಾಡಿದಾಗ, ಮಧ್ವಾಚಾರ್ಯರು ಒಂದು ವಸ್ತ್ರವನ್ನು ಗಂಟಿನಂತೆ ಮಾಡಿ, ಆ ವಸ್ತ್ರದಲ್ಲಿ ಧನವಿದೆ ಎಂಬ ಬುದ್ಧಿಯನ್ನು ಹುಟ್ಟಿಸಿದರು. ಕಳ್ಳರ ಮಧ್ಯ ಓಡಾಡಿದರು. ''ಧನವನ್ನು ನಾನೇ ಪಡೆಯಬೇಕೆಂಬ ಬುದ್ಧಿ ಹುಟ್ಟಿಸಿ'' ತಮ್ಮಲ್ಲೇ ಪರಸ್ಪರ ಹೊಡದಾಡಿ ಕೊಳ್ಳುವಂತೆ ಮಾಡಿ ಮುಂದೆ ಸಾಗಿದರು.

ಇನ್ನೊಂದು ಸ್ಥಳದಲ್ಲಿ ಆಚಾರ್ಯರ ಶಿಷ್ಯರ ಮೇಲೆ ಕಳ್ಳರ ಗುಂಪೊಂದು ಆಕ್ರಮಿಸಿದಾಗ, ಉಪೇಂದ್ರತೀರ್ಥರ ಮೂಲಕ ಆ ಕಳ್ಳರನ್ನು ಹೊಡೆಸಿ ಓಡಿಸಿದರು.

ಮತ್ತೊಂದು ಸ್ಥಳದಲ್ಲಿ ಕಳ್ಳರು ಆಚಾರ್ಯರ ಸಮೀಪಕ್ಕೆ ಆಗಮಿಸಿದಾಗ, ಅವರಿಗೆ ತಾವು ಶಿಲೆಗಳೋ ಎಂಬಂತೆ ಭ್ರಾಂತಿ ಹುಟ್ಟಿಸಿದರು. ಆನಂತರ ಇವರು ಶಿಲೆಗಳಲ್ಲ ಮನುಷ್ಯರು ಎಂದು ಗಮನಿಸಿ, ಅವರ ಪ್ರಭಾವಕ್ಕೆ ಆಶ್ಚರ್ಯರಾಗಿ ಆಕ್ರಮಿಸಲು ಬಂದ ಕಳ್ಳರು ನಮಸ್ಕಾರ ಮಾಡಿದರು.

ಹಿಮಾಲಯ ಪರ್ವತದ ಒಂದು ಭಾಗದಲ್ಲಿ ಶಿಷ್ಯರ ಸಮೇತ ಸಂಚರಿಸುತ್ತಿದ್ದಾಗ ದೈತ್ಯನೊಬ್ಬನು ಹುಲಿಯರೂಪದಿಂದ ಸತ್ಯತೀರ್ಥರನ್ನು ಕೊಲ್ಲಲು ಆಕ್ರಮಿಸಿದಾಗ ಆಚಾರ್ಯರು ಹಸ್ತಸ್ಪರ್ಶದಿಂದ ಅದನ್ನು ಕೊಂದು ಶಿಷ್ಯರನ್ನು ರಕ್ಷಿಸಿದರು.

ನಂತರ ಮಧ್ವಾಚಾರ್ಯರು ನಾರಾಯಣಾಶ್ರಮವನ್ನು ತಲುಪಿದರು. ಅಲ್ಲಿ ನಾರಾಯಣ (ವೇದವ್ಯಾಸ) ದೇವರಿಂದ ಲಕ್ಷ್ಮೀನಾರಾಯಣ ಸನ್ನಿಧಾನವಿರುವ ಎಂಟು ಶಿಲಾರೂಪ ಪ್ರತಿಮೆಗಳನ್ನು ಸ್ವೀಕರಿಸಿದರು. ಇವೇ ''ವ್ಯಾಸ ಮುಷ್ಟಿಗಳು.''

ಸಜ್ಜನರಿಗೆ ಭಗವತ್ತತ್ತ್ವ ತಿಳಿಸಿಕೊಡುವುದಕ್ಕೋಸ್ಕರ ವೇದವ್ಯಾಸರು ಆಚಾರ್ಯರಿಗೆ ಮಹಾಭಾರತಕ್ಕೆ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯವನ್ನುರಚಿಸಲು ಆದೇಶವಿತ್ತರು.

ನಂತರ ಮಧ್ವಾಚಾರ್ಯರು ಬದರಿಯಿಂದ ಉಡುಪಿಯ ಕಡೆಗೆ ಪ್ರಯಾಣ ಬೆಳೆಸಿದವರಾಗಿ ಗಂಗಾನದಿಯನ್ನು ತಲುಪಿದರು. ಗಂಗೆಯ ತುಂಬು ಪ್ರವಾಹ. ನಾವೆಗಳೇ ಇಲ್ಲದ ಗಂಗೆಯನ್ನು ದಾಟಿ, ನಾವಿಕರ ಸಹಾಯದಿಂದ ಆಚೆ ದಡದಲ್ಲಿದ್ದ ಶಿಷ್ಯರನ್ನು ದಾಟಿಸಿದರು.

ಅಲ್ಲಿಂದ ಹಸ್ತಿನಾಪುರಕ್ಕೆ ತೆರಳಿ, ಚಾತುರ್ಮಾಸ್ಯವನ್ನು ಕೈಗೊಂಡರು. ಗಂಗಾನದಿಯು ಭೂಮಿಯನ್ನು ಸೀಳಿಕೊಂಡು (ವೃಕ್ಷದ ರಂಬೆಯ ಮೂಲಕ) ಆಚಾರ್ಯರ ಬಳಿಗೆ ತೆರಳಿದಳು. ಭಾಗೀರಥಿಯು ಸುಂದರ ಸ್ತ್ರೀ ರೂಪ ಧರಿಸಿ ಆಚಾರ್ಯರಿಗೆ ನಮಸ್ಕರಿಸಿದುದನ್ನು ಕಂಡು ಶಿಷ್ಯರು ಆಶ್ಚರ್ಯಗೊಂಡರು.

ಅಲ್ಲಿಂದ ಕಾಶಿಗೆ ಆಗಮಿಸಿದರು. ಒಮ್ಮೆ ವಿಹಾರ ಸಮಯದಲ್ಲಿ ವಿನೋದದಿಂದ ಶಿಷ್ಯರು ''ಆಚಾರ್ಯರಿಗಿಂತ ತಾವು ಯುವಕರು, ಹೆಚ್ಚು ಬಲಶಾಲಿಗಳು'' ಎಂದು ಅಹಂಕಾರ ಹೊಂದಿದಾಗ, ಮಧ್ವಾಚಾರ್ಯರು ತಮ್ಮ ಮೇಲೆ ಒಟ್ಟಾಗಿ ಮಲ್ಲಯುದ್ಧಕ್ಕೆ ಬರಲು ಆಜ್ಞಾಪಿಸಿ, ಬಂದ ಶಿಷ್ಯರೆಲ್ಲರನ್ನು ಸೋಲಿಸಿ ಕೆಳಕ್ಕೆ ಬೀಳಿಸಿದರು. ಆಚಾರ್ಯರ ಬೆರಳಿನ ಭಾರವನ್ನೇ ಸಹಿಸಲಾಗದೇ ತಮ್ಮನ್ನು ಬಿಡುಗಡೆ ಮಾಡಲು ಪ್ರಾರ್ಥಿಸಿದರು. ಬಿಡುಗಡೆ ಹೊಂದಿದ ಶಿಷ್ಯರು ಆಚಾರ್ಯರ ಶಕ್ತಿಯನ್ನು ಅರಿತು ವಿಸ್ಮಿತರಾದರು. ವಾರಣಾಸಿಯಲ್ಲಿ ಸಮಸ್ತ ಸಿದ್ಧಾಂತಗಳನ್ನು ಖಂಡಿಸುತ್ತಿದ್ದ ''ಇಂದ್ರಪುರಿ'' (ಅಮರಾವತಿ) ಎಂಬ ಸಂನ್ಯಾಸಿಯನ್ನು ವಾದದಲ್ಲಿ ಸೋಲಿಸಿ ನಿರುತ್ತರನನ್ನಾಗಿ ಮಾಡಿದರು.

ಮಧ್ವರ ಪ್ರವಚನ ಸಾರ

ಆಚಾರ್ಯಮಧ್ವರು ವಿದ್ವತ್ಸಭೆಗಳಲ್ಲಿ ಪ್ರವಚನ ಮಾಡುತ್ತಾ ಕಂಗೊಳಿಸಿದರು. ಪ್ರವಚನದ ಸಾರವನ್ನು ಪಂಡಿತಾಚಾರ್ಯರ ಮನೋಹರವಾಗಿ ಸಂಗ್ರಹಿಸಿದ್ದಾರೆ.

(ಅ) ವಿಷ್ಣುವು ಸರ್ವಶಬ್ದಗಳಿಂದಲೂ ವಾಚ್ಯ, ಸರ್ವವ್ಯಾಪಿ, ಸರ್ವಾಂತರಾತ್ಮ, ಲೋಕವಿಲಕ್ಷಣ, ಸಚ್ಚಿದಾನಂದ ಸ್ವರೂಪಿ, ಜಗತ್ತಿನ ಸೃಷ್ಟಿ, ಸ್ಥಿತಿ, ಸಂಹಾರಗಳನ್ನು ಆಯಾ ಕಾಲದಲ್ಲಿ ಕೇವಲ ಸಂಕಲ್ಪ ಮಾತ್ರದಿಂದಲೇ ಮಾಡುತ್ತಾನೆ.

(ಆ) ಭಗವಂತನು ದುಷ್ಟರನ್ನು ನಿಗ್ರಹಿಸುವನು. ಶಿಷ್ಯರನ್ನು ರಕ್ಷಿಸುವವನು. ಮುಕ್ತಿಯೋಗ್ಯ ಜನರಿಗೆ ಮೋಕ್ಷವನ್ನು ಕರುಣಿಸುವವನು.

(ಇ) ಲಕ್ಷ್ಮೀಪತಿಯಾದ ವಿಷ್ಣುವಿಗೆ ಸಮರೂ ಇಲ್ಲ. ಅಧಿಕರೂ ಇಲ್ಲ. ಜೀವರಿಂದ ಅತ್ಯಂತ ಭಿನ್ನನು.

ವೈಕುಂಠ ವರ್ಣನೆ

ಒಮ್ಮೆ ಆಚಾರ್ಯಮಧ್ವರು ಉಡುಪಿಯಲ್ಲಿ ಬ್ರಹ್ಮಸೂತ್ರ ಪ್ರವಚನ ಮಾಡುತ್ತಿದ್ದಾಗ, ಶೇಷದೇವರು ಸನಕಾದಿ ಮುನಿಗಳಿಂದ ಕೂಡಿಕೊಂಡು ಅಲ್ಲಿಗೆ ಆಗಮಿಸಿದರು. ಆಕಾಶದಲ್ಲಿಯ ವಿಶೇಷ ಬೆಳದಿಂಗಳ ಕಾಂತಿಯಿಂದ ಅವರ ಆಗಮನವು ತಿಳಿಯಲ್ಪಟ್ಟಿತು. ಭಾಷ್ಯ ಶ್ರವಣ ಮಾಡಿ ತಮ್ಮ ಲೋಕಕ್ಕೆ ತೆರಳಿದರು. ತಮ್ಮ ಲೋಕಕ್ಕೆ ಹೋದಮೇಲೆ, ಮಧ್ವಕೃತ ಬ್ರಹ್ಮಸೂತ್ರ ಭಾಷ್ಯ ಶ್ರವಣದ ಫಲ ತಿಳಿಸಲು ಶೇಷದೇವರನ್ನು ಪ್ರಾರ್ಥಿಸಿದರು. ಆಗ ಶೇಷದೇವರು ''ಪರಮ ಭಾಗವತರಿಂದ ವರ್ಣಿಸಲ್ಪಡುವ ಮೋಕ್ಷವೇ ಮುಖ್ಯ ಫಲ'' ಎಂದು ತಿಳಿಸಿದರು. ಅದರೊಂದಿಗೆ ಸ್ವರ್ಗಾದಿಫಲಗಳು, ಲೌಕಿಕ ಸುಖ ಸಂಪತ್ತುಗಳು ತಾವಾಗಿಯೇ ದೊರಕುತ್ತವೆ.

ಅಂತಹ ಮೋಕ್ಷದ ಕಲ್ಪನೆ ತಿಳಿಸಿಕೊಡುವುದಕ್ಕೋಸ್ಕರ ವೈಕುಂಠ ವರ್ಣನೆಯನ್ನು ಪಂಡಿತಾಚಾರ್ಯರು ಮಾಡುತ್ತಾರೆ.

ಶ್ರೀಹರಿಯ ವಾಸಸ್ಥಾನವಾದ ವೈಕುಂಠವು ಸಕಲ ವಿಧವಾದ ಭೋಗಭಾಗ್ಯಗಳಿಗೆ ನೆಲೆಯಾಗಿದೆ. ಭವನಗಳು ಪದ್ಮರಾಗ ಮಣಿಗಳಿಂದ ಕಟ್ಟಲ್ಪಟ್ಟವುಗಳು. ಸುತ್ತಲೂ ಸ್ಫಟಿಕ ಮಣಿಗಳಿಂದ ಕೂಡಿದ ಪ್ರಾಕಾರ. ಮೇಲ್ಛಾವಣಿಯು ಇಂದ್ರ ನೀಲಮಣಿಗಳಿಂದ ನಿರ್ಮಿತವಾದುದು. ಛಾವಣಿಯ ತುದಿಯ ಸೂರುಗಳಲ್ಲಿ ಸ್ಫಟಿಕಮಣಿಗಳು. ನೋಡುವವರಿಗೆ ಗಂಗಾ-ಯಮುನಾ ನದಿಗಳ ಸಂಗಮದಂತೆ ತೋರುವದು.

ವೈಕುಂಠದಲ್ಲಿ ಎಲ್ಲ ವಸ್ತುಗಳು ರಮಾಸ್ವರೂಪ. ವಿಶಾಲವಾದುದು. ನಕ್ಷತ್ರ ಮಂಡಲದಲ್ಲಿ ಚಂದ್ರ ಮಂಡಲ ಶೋಭಿಸುವಂತೆ ಹರಿಯ ಮಂದಿರವು ವಿಶಿಷ್ಟವಾಗಿ ಶೋಭಿಸುವುದು. ಭಗವಂತನ ಹಾಗೂ ಅವನ ಮಂದಿರದ ಸೇವೆಯನ್ನು ಸ್ವತಃ ರಮಾದೇವಿಯರೇ ಭಕ್ತಿಯಿಂದ ಮಾಡುವರು. ಸ್ವರಮಣನಾದ ಶ್ರೀಹರಿ ರಮಾದೇವಿಗೆ ಆನಂದವೀಯಲು

ಅವರೊಂದಿಗೆ ಕ್ರೀಡಿಸುತ್ತಾನೆ. ಅಸಂಖ್ಯಾತ ಬ್ರಹ್ಮ-ರುದ್ರಾದಿ ದೇವತೆಗಳು, ಅಸಂಖ್ಯಾತ ಮುಕ್ತರು ಭಗವಂತನ ಧ್ಯಾನಮಾಡುತ್ತಾ ಅವರವರ ಯೋಗ್ಯತೆಗೆ ಅನುಗುಣವಾಗಿ ಪೂರ್ಣಸುಖವನ್ನು ಅನುಭವಿಸುತ್ತಾರೆ. ಅಲ್ಲಿ ನಾಲ್ಕು ವಿಧ ಮುಕ್ತರಿರುತ್ತಾರೆ. (೧) ಸಾರೂಪ್ಯ, (೨) ಸಾಮೀಪ್ಯ, (೩) ಸಾಲೋಕ್ಯ ಮತ್ತು (೪) ಸಾಯುಜ್ಯಮುಕ್ತಿಯನ್ನು ಹೊಂದಿದವರು.

ಮುಕ್ತರ ಲಕ್ಷಣ : ಮೋಕ್ಷದಲ್ಲಿ ಹುಟ್ಟು, ಸಾವು, ದುಃಖ ಮುಪ್ಪು ಮಾತ್ಸರ್ಯಾದಿ ಯಾವ ದೋಷಗಳು ಯಾರಿಗೂ ಯಾವ ಕಾಲಕ್ಕೂ ಇರುವುದಿಲ್ಲ. ಚಿದಾನಂದ ಸ್ವರೂಪವುಳ್ಳವರಾಗಿ ಪರಸ್ಪರ ಪ್ರೀತಿಯಿಂದ ಇರುತ್ತಾರೆ. ತಮಗಿಂತ ಉತ್ತಮರಲ್ಲಿ ಭಕ್ತಿ ಹೊಂದಿರುತ್ತಾರೆ. ಸ್ವರೂಪಕ್ಕನುಗುಣವಾಗಿ ಪೂರ್ಣವಾದ ಆನಂದವನ್ನು ಅನುಭವಿಸುತ್ತಾರೆ. ಸದಾ ತರುಣರು, ಸುಂದರರು ಸದಾ ಭಗವಂತನನ್ನು ನೋಡುತ್ತಿರುತ್ತಾರೆ. ಸ್ತ್ರೀಯರು ಕಾಂತಿಯುಕ್ತರಾಗಿರುತ್ತಾರೆ. ತಮ್ಮ ಪತಿಗಳಿಂದ ಕೂಡಿಕೊಂಡು ವಿಹಾರ ಮಾಡುತ್ತಾರೆ. ಅವರ ವಿಹಾರ ಅಲೌಕಿಕ.

ವೈಕುಂಠ ವೈಭವ : ವೈಕುಂಠದಲ್ಲಿರುವ ನಂದನವನವು ಇಂದ್ರನ ನಂದನವನವನ್ನು ಮೀರಿಸುತ್ತದೆ. ಪಾರಿಜಾತ, ಕಲ್ಪವೃಕ್ಷ ಮುಂತಾದ ಶ್ರೇಷ್ಠ ವೃಕ್ಷಗಳ ಸಮೂಹದಿಂದ ಕೂಡಿರುವುದು. ವಸಂತಾದಿ ಆರು ಋತುಗಳ ವಾತಾವರಣ ಸದಾ ಇರುವುದು. ಎಲ್ಲ ಋತುಗಳ ಫಲ-ಪುಷ್ಪಗಳು ಯಾವಾಗಲು ಇರುವುದು. ಋತುಧರ್ಮಗಳಾದ ಬಿಸಿಲು, ಸೀತ, ಛಳಿ, ಮಳೆ ಮುಂತಾದವುಗಳ ಬಾಧೆ ಇರುವುದಿಲ್ಲ. ಹರಿಯ ವಿಸ್ಮರಣೆ ಯಾವ ಕಾಲಕ್ಕೂ ಯಾರಿಗೂ ಇರುವುದಿಲ್ಲ. ಹರಿಗೆ ಅರ್ಪಿತವಾದುದನ್ನು ಮಾತ್ರ ಸ್ವೀಕರಿಸುತ್ತಾರೆ. ಧರ್ಮದ ನೆಲೆಯನ್ನು ಯಾರೂ ಮೀರುವುದಿಲ್ಲ. ಸಂತೋಷಕ್ಕೆ ಪಾರವೇ ಇಲ್ಲ. ದುಃಖದ ಲೇಶವೂ ಇಲ್ಲ. ಮೋಕ್ಷದಲ್ಲಿರುವ ಮುಕ್ತರು ಅಮೃತ ಪಾನ ಮಾಡುವರು.

ಮೋಕ್ಷದಲ್ಲಿನ ಭಗವದ್ರೂಪಗಳು

ಮೋಕ್ಷದಲ್ಲಿನ ಭಗವದ್ರೂಪಗಳು ದುರ್ಲಭವಾದವುಗಳು. ಚತುರ್ಭುಜ ಹರಿಯು ಸುದರ್ಶನ, ಪಾಂಚಜನ್ಯ, ಕೌಮೋದಕಿ, ಶಾರ್ಙ್ಗ ಇವುಗಳನ್ನು ಕೈಗಳಲ್ಲಿ ಧರಿಸಿರುವನು. ವಕ್ಷಸ್ಥಳದಲ್ಲಿ ಲಕ್ಷ್ಮೀ, ಉದರದಲ್ಲಿ 14 ಲೋಕಗಳನ್ನು ನಾಭಿಕಮಲದಲ್ಲಿ ಬ್ರಹ್ಮದೇವರನ್ನು ಧರಿಸಿರುವನು. ಶ್ರೀಹರಿಯು ಪಾದಗಳಿಂದಾರಂಭಿಸಿ ವಿರಾಡ್ರೂಪ ಪರ್ಯಂತ ಭಗವದ್ರೂಪಗಳನ್ನು ಮುಕ್ತರ ಯೋಗ್ಯತೆಗೆ ಅನುಗುಣವಾಗಿ ತೋರಿಸುತ್ತಾನೆ. ಅವನ ಎಲ್ಲ ರೂಪಗಳು ಪರಿಪೂರ್ಣ.

ಇಂತಹ ಮೋಕ್ಷದಲ್ಲಿ (ವೈಕುಂಠದಲ್ಲಿ) ಮುಕ್ತನು ಯಾವುದನ್ನು ಅಪೇಕ್ಷಿಸುತ್ತಾನೋ ಅವುಗಳನ್ನೆಲ್ಲ ಸಂಕಲ್ಪ ಮಾತ್ರದಿಂದಲೇ ಹೊಂದುವನು.

यं यं सुखी कमयतेऽर्थमत्र सङ्कल्पमात्रात् सकलोऽपि स स्यात् ॥

ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯಕೃತ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯಾದಿ ಗ್ರಂಥಗಳ ಶ್ರವಣಮನನಾದಿರೂಪ ಆವೃತ್ತಿಯಿಂದ ಇಂಥಹ ಮೋಕ್ಷವು ಲಭಿಸುವುದು.

महानन्दतीर्थस्य ये भाष्यभावं मनो वाग्भिरावर्तयन्ते स्वशक्त्या ।
सुराद्या नरान्ता मुकुन्दप्रसादात् इमं मोक्षमेते भजन्ते सदेति ॥ xi-79

ಪುಂಡರೀಕಪುರಿಯನ್ನು ಮಧ್ವರು ಸೋಲಿಸಿದರು : ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ''ತತ್ತ್ವವಾದವು'' ಎಲ್ಲ ಕಡೆಗೆ ವ್ಯಾಪಕವಾಗಿ ಶೋಭಿಸುತ್ತಿರಲು, ವ್ಯಥೆಗೊಂಡ ಮಾಯಾವಾದಿಗಳು ಉಡುಪಿಯಲ್ಲಿ ಮಧ್ವಾಚಾರ್ಯರನ್ನು ವಾದದಲ್ಲಿ ಸೋಲಿಸಬೇಕೆಂದು ಪುಂಡರೀಕಪುರಿ ಎಂಬ ಅದ್ವೈತ ಸಂನ್ಯಾಸಿಯನ್ನು ನಿಯೋಜಿಸಿದರು. ಶ್ರೀ ಪೂರ್ಣಪ್ರಜ್ಞರು ದ್ವೈತ ಸಿದ್ಧಾಂತವನ್ನು ಶ್ರುತಿಸ್ಮೃತಿಗಳಿಂದ ಸಮರ್ಥಿಸಿ ಪುಂಡರೀಕಪುರಿಯನ್ನು ಸೋಲಿಸಿದರು.

ಆಚಾರ್ಯಮಧ್ವರು ಹರಿಪ್ರೀತಿಗೋಸ್ಕರ ವೇದಪ್ರವಚನವನ್ನು ಮಾಡಿದರು. ವರ್ಣಗಳನ್ನು ವಿಹಿತವಾದ ಕಂಠ, ತಾಲು ಮುಂತಾದ ಸ್ಥಾನಗಳಿಂದ ಉಚ್ಚರಿಸಿದರು. ಆಚಾರ್ಯರ ವೇದೋಚ್ಚಾರಣೆಯು ಅಸದೃಶವಾಗಿದ್ದಿತು. ವೇದ

ವ್ಯಾಖ್ಯಾನವು ವೇದಾಂಗಗಳಾದ ಶಿಕ್ಷಾ, ಕಲ್ಪ, ಛಂದಸ್ಸು, ವ್ಯಾಕರಣ, ನಿರುಕ್ತ ಮತ್ತು ಜ್ಯೋತಿಷ್ ಇವುಗಳಿಗೆ ಅನುಗುಣವಾಗಿದ್ದಿತು. ಇದರಿಂದ ಸಂತೋಷಗೊಂಡ ವಿದ್ವತ್ಸಭೆಯಲ್ಲಿ ಸೇರಿದ್ದ ಪಂಡಿತರು ಪುಂಡರೀಕಪುರಿಗೆ ವೇದವ್ಯಾಖ್ಯಾನ ಮಾಡಲು ಹೇಳಿದರು. ಮೊದಲ ಸೂಕ್ತದ ಉಚ್ಚಾರಣೆಯಲ್ಲಿಯೇ ತಪ್ಪಾಗಿ ಉಚ್ಚರಿಸಿ ಹಾಸ್ಯಾಸ್ಪದನಾಗಿ ವಾದದಲ್ಲಿ ಸೋತನು.

ಇದೇ ಸಮಯದಲ್ಲಿ ಕಾಸರಗೋಡಿನಲ್ಲಿ ಲಿಕುಚ ವಂಶದ ಶಂಕರಪಂಡಿತರ ವಶದಲ್ಲಿ ಇದ್ದ ಆಚಾರ್ಯರ ಅಪೂರ್ವ ಗ್ರಂಥ ಸಂಗ್ರಹವನ್ನು ಪದ್ಮತೀರ್ಥ ಎಂಬ ಯತಿಯು ಕಳವು ಮಾಡಿದನು. ಆಚಾರ್ಯರು ಪದ್ಮತೀರ್ಥರನ್ನು ವಾದದಲ್ಲಿ ಸೋಲಿಸಿದರು. ಆಗ ನಡೆದ ವಾದದ ಸಾರವನ್ನು ಶಿಷ್ಯರು ಬರೆದಿಟ್ಟರು. ಅದೇ ''ತತ್ತ್ವೋದ್ಯೋತ'' ಎನ್ನುವ ಗ್ರಂಥ ಪ್ರಸಿದ್ಧಿಯಾಯಿತು. ಮುಂದೆ ಜಯಸಿಂಹರಾಜ ಆಚಾರ್ಯರನ್ನು ತನ್ನ ಆಸ್ಥಾನಕ್ಕೆ ಬರಮಾಡಿಕೊಂಡು ಕಳುವಾದ ಪುಸ್ತಕಗಳನ್ನು ಹಿಂದುರುಗಿಸಿ ಗೌರವಿಸಿದನು.

ಮಧ್ವರ ಹಿರಿಮೆ : ಸೂರ್ಯೋದಯವಾದಾಗ ಕತ್ತಲೆ ನಾಶವಾಗುವಂತೆ, ಮಧ್ವಸುರ್ಯೋದಯದಿಂದ ಅಜ್ಞಾನ, ಮಿಥ್ಯಾಜ್ಞಾನ ಎಂಬ ಕತ್ತಲೆ ನಾಶವಾಯಿತು. ಎಲೈ ಮಾಯಾವಾದಿಗಳೆ, ನಿಮ್ಮ ಮತವನ್ನು ಖಂಡಿಸಲು ಮಧ್ವಾಚಾರ್ಯರು ಸಪ್ತಸದಾಗಮಗಳ ಭಾವವನ್ನು ಧರಿಸಿ ಬಂದಿದ್ದಾರೆ. ಗರುಡನನ್ನು ಕಂಡು ಹಾವುಗಳು ಓಡಿಹೋಗುವಂತೆ, ಓಡಿ ಹೋಗಿ ಗುಹೆಯನ್ನು ಸೇರಿ ಎಂದು ಆಚಾರ್ಯರ ಶಿಷ್ಯರು ಮಾಯಾವಾದಿಗಳನ್ನು ಕುರಿತು ಹೇಳಿದರು.

ನಂತರ ಮಧ್ವರು ''ಕಾವು'' ಎಂಬ ಗ್ರಾಮದಿಂದ ಹೊರಟು ''ಕೋಡಿಪಾಡಿ'' (ಪ್ರಾಗ್ಯ್ವಾಟ) ಎಂಬ ಗ್ರಾಮಕ್ಕೆ ಬಂದು ಅಲ್ಲಿ ಜನಾರ್ದನ ದೇವರ ಸನ್ನಿಧಾನದಲ್ಲಿ ಚಾತುರ್ಮಾಸ್ಯ ಕೈಗೊಂಡರು.

ಜಯಸಿಂಹರಾಜನಿಂದ ಮಧ್ವಾಚಾರ್ಯರಿಗೆ ಆಹ್ವಾನ : ಶ್ರೀಮದಾಚಾರ್ಯರು ಪ್ರಾಗ್ಯ್ವಾಟದಲ್ಲಿ ಚಾತುರ್ಮಾಸ್ಯವನ್ನು ಪೂರೈಸಿದರು. ಜಯಸಿಂಹರಾಜನ ಪ್ರಾರ್ಥನೆಯಂತೆ ಆಚಾರ್ಯಮಧ್ವರು ಕಬೇನಾಡು (ಕಾಸರಗೋಡು) ಎಂಬ ಪ್ರಾಂತದ ಮದನೇಶ್ವರ ದೇವಸ್ಥಾನಕ್ಕೆ ಆಗಮಿಸಿದರು. ಆಚಾರ್ಯರ ಶಿಷ್ಯವರ್ಗದಲ್ಲಿ ಬ್ರಹ್ಮಚಾರಿಗಳು, ಗೃಹಸ್ಥರು, ಸಂನ್ಯಾಸಿಗಳು ಮೊದಲಾದ ಎಲ್ಲ ಆಶ್ರಮದವರೂ ಇದ್ದರು.

ಇತ್ತ ಮದನೇಶ್ವರದೇವಸ್ಥಾನದ ಬಳಿ ಮಧ್ವಾಚಾರ್ಯರು ಆಗಮಿಸಿರುವುದನ್ನು ತಿಳಿದು, ಜಯಸಿಂಹರಾಜ ಬ್ರಾಹ್ಮಣರನ್ನು ಮುಂದೆ ಮಾಡಿಕೊಂಡು ಆಚಾರ್ಯರನ್ನು ಸ್ವಾಗತಿಸಲು ತನ್ನ ಪರಿವಾರ ಸಮೇತವಾಗಿ ಧಾವಿಸಿದ. ಮಧ್ವರ ಅಪಾರವಾದ ತೇಜಸ್ಸು ಗಾಂಭೀರ್ಯವನ್ನು ನೋಡಿ, ತನ್ನ ಜೀವನ ಸಾರ್ಥಕ ವಾಯಿತೆಂದು ಭಾವಿಸಿದ. ವಿನಯಭಕ್ತಿಗಳಿಂದ ಆಚಾರ್ಯರಿಗೆ ನಮಸ್ಕಾರಗಳನ್ನು ಸಮರ್ಪಿಸಿ ಅವರನ್ನು ಹಿಂಬಾಲಿಸಿದ. ವಿಷ್ಣುಮಂಗಲದೇವಾಲಯದ ಸಮೀಪಕ್ಕೆ ಬಂದರು. ರಾಜನನ್ನು ಕಾಣಲು ಬಂದ ಜನರು ಪೂರ್ಣಪ್ರಜ್ಞರನ್ನು ಕಂಡು ವಿಸ್ಮಿತರಾಗಿ ಕುತೂಹಲದಿಂದ ನೋಡತೊಡಗಿದರು.

ಪೂರ್ಣಪ್ರಜ್ಞರ ವ್ಯಕ್ತಿತ್ವ : ಪೂರ್ಣಪ್ರಜ್ಞರ ಅಪಾರ ತೇಜಸ್ಸು ಸೂರ್ಯನ ಪ್ರಭೆಯನ್ನು ಹಾಗೂ ಚಂದ್ರನ ಕಾಂತಿಯನ್ನು ಮೀರಿಸುತ್ತಿತ್ತು. ಯುವಸಿಂಹದ ನಡುಗೆ, ಪದ್ಮರಾಗ ಮಣಿಯಂತೆ ಕೆಂಪಾದ ಉಗುರುಗಳು, ದುಂಡಾದ ಕಾಲುಗಳು, ಆನೆಯ ಸೊಂಡಿಲಿನಂತೆ ತೊಡೆಗಳು, ವಿಶಾಲ ಎದೆ, ಪುಷ್ಟವಾದ ಆಜಾನುಬಾಹುಗಳು, ಧ್ವಜ, ಚಕ್ರ, ಚಿನ್ಹೆಯಿಂದ ಕೂಡಿದ ಅಂಗೈಗಳು, ಮಲ್ಲಿಗೆ ಮಗ್ಗಿನಂತಹ ದಂತಪಕ್ತಿ, ಕೆಂಪಾದ ತುಟಿಗಳು, ಕಮಲದಂತಹ ಕಣ್ಣುಗಳು, ತುಳಸಿ ಧರಿಸಿದ ಕಿವಿಗಳು. ಮಂದಹಾಸಮುಖ ಇಂತಹ ಶ್ರೀಮದಾಚಾರ್ಯರು ಲಕ್ಷಣ ಶಾಸ್ತ್ರಕ್ಕೆ ಅನುಗುಣವಾದ ಎಲ್ಲ ಲಕ್ಷಣಗಳಿಂದ ಕೂಡಿ, ಶ್ರೇಷ್ಠ ಸುಲಕ್ಷಣ ಪ್ರತಿಮೆಯಂತೆ ಎಲ್ಲರಿಗೂ ಕಂಡರು.

ಇಂತಹ ಮಧ್ವಾಚಾರ್ಯರು ವಿಷ್ಣುಮಂಗಲದ ದೇವಾಲಯವನ್ನು ಪ್ರವೇಶಿಸಿದರು. ಜಯಸಿಂಹರಾಜನೇ ಮೊದಲಾದ ರಾಜರ ಮಧ್ಯದಲ್ಲಿ ಆಸೀನರಾದ ಮಧ್ವರು ವಿಶೇಷವಾಗಿ ಶೋಭಿಸಿದರು. ಹೃಷೀಕೇಶ ತೀರ್ಥರು ಶ್ರಾವ್ಯವಾಗಿ ಭಾಗವತ ವಾಚನ ಮಾಡಿದರು. ಪೂರ್ಣ ಪ್ರಜ್ಞರು ಸುಮಧುರವಾಗಿ ಶ್ರೀಕೃಷ್ಣ ಕಥೆಯನ್ನು ವರ್ಣಿಸಿದರು. ಅಲ್ಲಿನೆರದಿದ್ದ ಜನರು ಆನಂದಾಮೃತ ಸಾಗರದಲ್ಲಿ ಮುಳುಗಿದರು.

ಶ್ರೀ ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತರ ಹಿನ್ನೆಲೆ, ಬಾಲ್ಯ : ಲಿಕುಚವಂಶದ ಅಂಗೀರಸಗೋತ್ರದ ಸುಬ್ರಹ್ಮಣ್ಯ ಪಂಡಿತರು ತ್ರಿವಿಕ್ರಮರ ತಂದೆಯವರು. ಪ್ರಚಂಡ ಕವಿಗಳು, ವಿದ್ವಾಂಸರು. ಇವರ ಪತ್ನಿ ಕೃಷ್ಣಭಕ್ತಳು. ಶ್ರೇಷ್ಠ ಮಕ್ಕಳನ್ನು ಪಡೆಯಲು ವಿಶೇಷವಾಗಿ ಹರಿ-ಹರನನ್ನು ಸೇವಿಸಿ ಉತ್ತಮ ಮಗನನ್ನು ಪಡೆದರು. 'ತ್ರಿವಿಕ್ರಮ' ಎಂದು ನಾಮಕರಣ ಮಾಡಿದರು. ಬಾಲ್ಯದಲ್ಲಿಯೇ ತ್ರಿವಿಕ್ರಮರು ಆಶುಕವಿಗಳಾಗಿದ್ದರು. ಸಕಾಲದಲ್ಲಿ ತ್ರಿವಿಕ್ರಮನಿಗೆ ಉಪನಯನ ವೇದಾಧ್ಯಯನ ಹಾಗೂ ಸಕಲ ಶಾಸ್ತ್ರಾಧ್ಯಯನ ಮಾಡಿಸಿದರು. ಒಮ್ಮೆ ಏಕಾಂತದಲ್ಲಿ ಸುಬ್ರಹ್ಮಣ್ಯ ಪಂಡಿತರು ತ್ರಿವಿಕ್ರಮನನ್ನು ಕರೆದು 'ನಿರ್ಗುಣ ಬ್ರಹ್ಮನ ಉಪಾಸನೆಯಿಂದ ಮೋಕ್ಷ ಎಂದಿಗೂ ಸಿಗದು. ಆದ್ದರಿಂದ ಗುಣಪೂರ್ಣನಾದ ಸಗುಣ ಬ್ರಹ್ಮನನ್ನು ಉಪಾಸನೆ ಮಾಡು' ಎಂದು ಉಪದೇಶಿಸಿದರು.

ತ್ರಿವಿಕ್ರಮರಿಗೆ ಮನಸ್ಸಿನ ಗೊಂದಲದ ಜೊತೆಗೆ ಬ್ರಹ್ಮಸೂತ್ರಕ್ಕೆ ರಚಿತವಾದ ಎಲ್ಲ ಭಾಷ್ಯಗಳನ್ನು ವಿಮರ್ಶಾತ್ಮಕವಾಗಿ ಅಧ್ಯಯನ ಮಾಡಿದರು. ಸಮಾಧಾನವಾಗಲಿಲ್ಲ. ಹೀಗಿರುವಾಗ ಪೂರ್ಣಪ್ರಜ್ಞರ ಕೀರ್ತಿಯು ಪಂಡಿತರ ಕಿವಿಗೆ ಬಿದ್ದಿತು. ಈ ಹೊತ್ತಿಗೆ ತ್ರಿವಿಕ್ರಮರ ತಮ್ಮ ಶಂಕರಪಂಡಿತರು ಮಧ್ವರ ಶಿಷ್ಯರಾಗಿ ಅವರ ಗ್ರಂಥಪಾಲಕರಾಗಿದ್ದರು. ಶಂಕರಪಂಡಿತರು ತರುತ್ತಿದ್ದ ಮಧ್ವಶಾಸ್ತ್ರ ಗ್ರಂಥಗಳನ್ನು ರಹಸ್ಯವಾಗಿ ರಾತ್ರಿ ಸಮಯದಲ್ಲಿ ಅವಲೋಕನ ಮಾಡುತ್ತಾ ಮನಸ್ಸಿನಲ್ಲಿ ಅಪಾರವಾದ ಆನಂದ ಹೊಂದಿದರು. ಶ್ರೀಮದಾಚಾರ್ಯರ ತತ್ತ್ವವಾದ, ವಿಮರ್ಶಾತ್ಮಕ ಚಿಂತನೆ, ಅಪೂರ್ವ ರಚನಾಕೌಶಲಗಳಿಗೆ ಮಣಿದು ಮನಸ್ಸಿನಲ್ಲಿಯೇ ಮಾಧ್ವರಾದರು.

ನಂತರ ತ್ರಿವಿಕ್ರಮಪಂಡಿತರು ವಿಷ್ಣು ಮಂಗಲದಲ್ಲಿ ಮಧ್ವಾಚಾರ್ಯರ ಬಳಿಗೆ ಆಗಮಿಸಿ ನಮಸ್ಕಾರಗಳನ್ನು ಅರ್ಪಿಸಿದರು. ಶ್ರೀಮದಾಚಾರ್ಯರ ಚರಣ ಸನ್ನಿಧಿಯಲ್ಲಿ ಕುಳಿತರು. ಅದೊಂದು ವಿದ್ವತ್ಸಭೆ. ಆಚಾರ್ಯರ ಸಂಪರ್ಕ ಹೊಂದಿದ ಜಯಸಿಂಹ ರಾಜನಿಗೆ ಶುಭ ಕೋರಿದರು. ''ಆನಂದ ತೀರ್ಥರ ಪಾದಧೂಳಿಗಳು ನಿನಗೆ ಸದಾ ಆನಂದವನ್ನೀಯಲಿ'' ಎಂದು ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತರು ಹರಸಿದರು.

''आनन्दतीर्थभगवत्पदपद्मरेणुः स्वानन्ददो भवतु ते जयसिंहभूप'' (ಭಾ.ಪ್ರ)

ಯಾರು ಶ್ರೀಮದಾಚಾರ್ಯರ ಗ್ರಂಥಗಳನ್ನು ಅಧ್ಯಯನ ಮಾಡುತ್ತಾರೋ ಅವರಿಗೆ ಸದಾ ಆನಂದವುಂಟಾಗುತ್ತದೆ ಎಂಬ ತತ್ತ್ವ ಇಲ್ಲಿ ಅಡಗಿದೆ.

ಶ್ರೀಪೂರ್ಣಪ್ರಜ್ಞರ ಆಹ್ನಿಕವರ್ಣನೆ (ದಿನಚರಿ) : ಮಧ್ವಾಚಾರ್ಯರು ಅರುಣೋದಯಕಾಲದಲ್ಲಿ ಸ್ನಾನಾದಿ ಪ್ರಾತಃಕಾರ್ಯಗಳನ್ನು ಮುಗಿಸಿ ಯೋಗಾಸನದಲ್ಲಿ ಕುಳಿತು ನಾರಾಯಣನನ್ನು ಚಿಂತಿಸುತ್ತಿದ್ದರು. ಅರುಣೋದಯ ಕಾಲದಲ್ಲಿ ನಿರ್ಮಾಲ್ಯ ವಿಸರ್ಜನೆ ತಪ್ಪದೇ ಮಾಡುತ್ತಿದ್ದರು. ನಿರ್ಮಾಲ್ಯ ಪುಷ್ಪಗಳಲ್ಲಿ ಅಮೃತವು ಸುರಿಯುತ್ತಿತ್ತು. ಸೂರ್ಯೋದಯಕ್ಕೆ ಸರಿಯಾಗಿ ಆಚಾರ್ಯರು ಶಿಷ್ಯರಿಗೆ ಪಾಠ ಹಾಗೂ ಉಪದೇಶ ಮಾಡುತ್ತಿದ್ದರು. ಶಿಷ್ಯರು ಈ ಹೊತ್ತಿಗೆ ಸ್ನಾನ, ಜಪ ಪೂಜಾದಿಗಳನ್ನು ಪೂರೈಸಿ ಪಾಠಕ್ಕೆ ಆಚಾರ್ಯರ ಬಳಿ ಸೇರುತ್ತಿದ್ದರು. ಪ್ರಣವ ಮಂತ್ರವನ್ನು ಉಚ್ಚರಿಸಿ, ಆರಂಭದಲ್ಲಿ ಉಪನಿಷತ್ತಿನ ರಹಸ್ಯ ಅರ್ಥವನ್ನು ತಿಳಿಸುತ್ತಿದ್ದರು. ಶ್ರೀಮದಾಚಾರ್ಯರ ಪ್ರವಚನವು ಕಿವಿಗಳಿಗೆ ಮನಸ್ಸಿಗೆ ಅತ್ಯಂತ ಆನಂದವನ್ನುಂಟು ಮಾಡುತ್ತಿತ್ತು, ಶಿಷ್ಯರ ಎಲ್ಲ ಸಂಶಯಗಳನ್ನು ಪರಿಹಾರ ಮಾಡುತ್ತಿದ್ದರು.

ಬೆಳಗಿನ ಪಾಠ ಪ್ರವಚನಗಳನ್ನು ಪೂರೈಸಿ ಮಧ್ಯಾಹ್ನ ಸ್ನಾನಕ್ಕೆ ಸರೋವರಕ್ಕೆ ಹೋಗುತ್ತಿದ್ದರು. ಆ ವೇಳೆಗೆ ಗಂಗಾದಿ ಸಕಲ ತೀರ್ಥಗಳ ಅಭಿಮಾನಿದೇವತೆಗಳು ಆ ಸರೋವರದಲ್ಲಿ ಸನ್ನಿಹಿತರಾಗುತ್ತಿದ್ದರು. ನಂತರ ಸಾಲಿಗ್ರಾಮ ಅಭಿಷೇಕ ಮಾಡಿ, ನಿರ್ಮಾಲ್ಯ ತೀರ್ಥವನ್ನು ಪ್ರಾಶನ ಮಾಡಿ ಊರ್ಧ್ವಪುಂಡ್ರಾದಿಗಳನ್ನು ಧಾರಣ ಮಾಡುತ್ತಿದ್ದರು. ಶಿಷ್ಯರು ತಂದಿದ್ದ ಶುದ್ಧವಾದ ಜಲವನ್ನು ಶಂಖದಲ್ಲಿ ತುಂಬಿಸಿ ಅಭಿಷೇಕ ಮಾಡುತ್ತಿದ್ದರು. ಪರಿಶುದ್ಧವಾದ ಗಂಧ, ತುಳಸಿ, ಪುಷ್ಪಗಳಿಂದ ಹರಿಯನ್ನು ಪೂಜಿಸುತ್ತಿದ್ದರು. ಪೂಜಾಕಾಲದಲ್ಲಿ ಅರ್ಘ್ಯಪಾದ್ಯಾದಿ ಷೋಡಶೋಪಚಾರಾದಿಗಳನ್ನು ಸಮರ್ಪಿಸಿ ಅನಂತಗುಣ ಪರಿಪೂರ್ಣನಾದ ಹರಿಯನ್ನು ಪೂಜಿಸುತ್ತಿದ್ದರು. ಬಿಂಬರೂಪಿ ಪರಮಾತ್ಮನನ್ನು ಅಷ್ಟಭಾವಪುಷ್ಪಗಳಿಂದ ಪೂಜಿಸುತ್ತಿದ್ದರು. ಹೀಗೆ ಪರಮಾತ್ಮನನ್ನು ಭಕ್ತಿಯಿಂದ ಶಾಸ್ತ್ರೋಕ್ತವಾಗಿ ಪೂಜಿಸಿ ಶ್ರೀಹರಿಯ ನಿರ್ಮಾಲ್ಯ ಗಂಧಾದಿಗಳನ್ನು

ಲೇಪನ ಮಾಡಿಕೊಂಡು ''ಜಗನ್ನಾಥನಾದ ಶ್ರೀಕೃಷ್ಣನು ನನಗೆ ಪ್ರಸನ್ನನಾಗಲಿ'' ಎಂದು ವಿಶೇಷವಾಗಿ ಸ್ಮರಿಸುತ್ತಾ ಭಗವತ್ಪ್ರಸಾದವನ್ನು ಸ್ವೀಕರಿಸುತ್ತಿದ್ದರು.

ನಂತರ ಶಿಷ್ಯರಿಗೆ ಮಧ್ಯಾಹ್ನದ ಪಾಠವನ್ನು, ಶಾಸ್ತ್ರಾರ್ಥ ವಿಚಾರರವನ್ನು ಮಾಡುತ್ತಾ ಅವರಿಗೆ ಆನಂದವನ್ನುಂಟುಮಾಡುತ್ತಿದ್ದರು. ಶ್ರೀಮದಾಚಾರ್ಯರ ಮಹಾತ್ಮ್ಯವನ್ನು ಕೇಳಿ ಅವರನ್ನು ಕಾಣಲು ಆಗಮಿಸಿದ ನಾನಾದೇಶದ ಜನರನ್ನು ಪ್ರೀತಿಯಿಂದ ನೋಡಿ ''ಕುಳಿತುಕೊಳ್ಳಿರಿ'' ಎಂದು ಆದರಿಸುತ್ತಿದ್ದರು. ಸಾಯಂಕಾಲದ ಆಹ್ನಿಕವನ್ನು ಸೂರ್ಯನಿರುವಾಗಲೇ ಪ್ರಾರಂಭಿಸಿ ನಕ್ಷತ್ರ ಗೋಚರಿಸುವವರೆಗೆ ಮುಂದುವರೆಸುತ್ತಿದ್ದರು. ಮಧ್ವಾಚಾರ್ಯರು ಸಕಲಸಜ್ಜನರಿಗೂ ಮೋಕ್ಷವನ್ನು ತಂದುಕೊಡುವಂತಹ ಕೃಷ್ಣಾದಿಭಗವದ್ರೂಪಗಳ ಸ್ವರೂಪವನ್ನು ಉಪದೇಶ ಮಾಡುತ್ತಾ ದಿನಗಳನ್ನು ಕಳೆಯುತ್ತಿದ್ದರು.

ಆಚಾರ್ಯ ಮಧ್ವರು ಅಮರಾಲಯದಲ್ಲಿ ಸೂತ್ರಭಾಷ್ಯದ ಮೇಲೆ ಅದ್ಭುತವಾದ ಪ್ರವಚನ ನೀಡಿದರು. ಅಲ್ಲಿ ಪ್ರತಿವೀರರಂತೆ ಇದ್ದ ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತರನ್ನು ಕಂಡರು. ಆಚಾರ್ಯರ ಉಪನ್ಯಾಸ ಭಾರತಿಯು ಗಂಗೆಯಂತೆ ಅತ್ಯಂತಪಾವನವಾಗಿದ್ದಿತು.

ಉಪನ್ಯಾಸ ಸಾರ : ನಾರಾಯಣನು ಅನಂತಗುಣ ಪರಿಪೂರ್ಣನು. ಬ್ರಹ್ಮಶಬ್ದವಾಚ್ಯನು. ಸಕಲ ವೇದಗಳಿಂದ ಮುಖ್ಯವಾಗಿ ಪ್ರತಿಪಾದ್ಯನು. ಜಗತ್ತಿನ ಸೃಷ್ಟ್ಯಾದಿಗಳಿಗೆ ಮುಖ್ಯಕಾರಣನು. ಸರ್ವಜ್ಞನು. ಈ ರೀತಿಯಾಗಿ ಪೂರ್ಣಪ್ರಜ್ಞರು ಶ್ರುತಿ-ಸ್ಮೃತಿ-ಯುಕ್ತಿಗಳಿಂದ ಪ್ರತಿಪಾದಿಸಿದರು.

ಪರಮತದ ನಿರಾಕರಣೆಯೊಂದಿಗೆ ಸ್ವಮತ ಸ್ಥಾಪನೆಯು ಮಧ್ವರ ವೈಶಿಷ್ಟ್ಯ. ನಿರೀಶ್ವರ ಸಾಂಖ್ಯಮತ, ಭಾಸ್ಕರಮತ, ಬೌದ್ಧಮತ, ಪಾಶುಪತ, ವೈಶೇಷಿಕ ಮತ, ಶೂನ್ಯವಾದ, ಮಾಯಾವಾದ, ಚಾರ್ವಾಕ ಮುಂತಾದ ಮತಗಳಲ್ಲಿಯ ದೋಷಗಳನ್ನು ಪ್ರಮಾಣಪುರಸ್ಸರವಾಗಿ ನಿರಾಕರಿಸುತ್ತಾ ದ್ವೈತ ಸಿದ್ಧಾಂತವನ್ನು ಶ್ರುತಿ-ಸ್ಮೃತಿ-ಯುಕ್ತಿಗಳ ಸಹಾಯದಿಂದ ಸ್ಥಾಪಿಸಿದರು.

ಮೋಕ್ಷದಲ್ಲಿ ಮಾತ್ರ ಸುಖವಿರುವುದು. ದುಃಖದ ಲವಲೇಶವೂ ಇಲ್ಲ. ಅಂತಹ ಮೋಕ್ಷವು ಕ್ರೀಡಾದಿಗುಣ ವಿಶಿಷ್ಟನಾದ ಭಗವಂತನ ಪರಮ ಪ್ರಸಾದದಿಂದ ಮಾತ್ರ ದೊರಕುವುದು. ಆ ಭಗವಂತ ವೇದಗಳಿಂದ ಮಾತ್ರ ವೇದ್ಯನು. ವೇದೋಕ್ತ ಗುಣಗಳಿಂದ ಅನನ್ಯಭಕ್ತಿಯಿಂದ ಆರಾಧಿಸಿದಾಗ ಮಾತ್ರ ಅವನ ಪ್ರಸಾದ ದೊರಕುವುದು ಇತ್ಯಾದಿ ಪ್ರಮೇಯಗಳನ್ನು ಪ್ರತಿಪಾದಿಸಿದರು.

ಪೂರ್ಣಪ್ರಜ್ಞರೊಂದಿಗೆ ತ್ರಿವಿಕ್ರಮಪಂಡಿತರ ವಾದಕಥೆ : ಆಚಾರ್ಯ ಮಧ್ವರ ಉಪನ್ಯಾಸ ಭಾರತಿಯನ್ನು ತ್ರಿವಿಕ್ರಮರು ಶ್ರವಣ ಮಾಡಿದರು. ನಂತರ ಆಚಾರ್ಯರೊಂದಿಗೆ 15 ದಿನಗಳಕಾಲವಾದ ಕಥೆಯನ್ನು ಮಾಡಿದರು. ಆಚಾರ್ಯರು ತ್ರಿವಿಕ್ರಮರ ವಾದಗಳನ್ನು ಪ್ರಮಾಣ ಪುರಸ್ಸರವಾಗಿ ಖಂಡಿಸಿ ನಿರುತ್ತರರನ್ನಾಗಿ ಮಾಡಿದರು. ಸಂಶಯಗಳು ನಿವಾರಣೆಯಾದವು. ಸೋಲನ್ನೊಪ್ಪಿ ಮಧ್ವರಲ್ಲಿ ಕ್ಷಮೆಯಾಚಿಸಿದರು. ಅಲ್ಲದೇ ''पदपद्मरजोदास्यं ध्रुवं मे दीयतामिति ।'' (xv/70) ಎಂದು ಬೇಡಿಕೊಂಡರು. ಮಧ್ವಾಚಾರ್ಯರು ತಮ್ಮ ಬ್ರಹ್ಮಸೂತ್ರ ಭಾಷ್ಯಕ್ಕೆ ವ್ಯಾಖ್ಯಾನವನ್ನು ರಚಿಸಲು ಅಪ್ಪಣೆ ಮಾಡಿದರು. ಗುರುಗಳ ಅಪ್ಪಣೆಯನ್ನು ಗೌರವಿಸಿ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯಕ್ಕೆ ''ತತ್ತ್ವಪ್ರದೀಪ'' ಎಂಬ ಟೀಕೆಯನ್ನು ಬರೆದರು.

ಮಧ್ವಾಚಾರ್ಯರ ಸರ್ವಮೂಲಗ್ರಂಥಗಳ ವರ್ಣನೆ : ಮಧ್ವಾಚಾರ್ಯರ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳ ವೈಶಿಷ್ಟ್ಯವನ್ನು ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತರು ಬಹಳ ಸೊಗಸಾಗಿ ವರ್ಣಿಸಿದ್ದಾರೆ.

೧. ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯದಲ್ಲಿ (ನ್ಯಾಯ) ಪ್ರಮೇಯ ರತ್ನಗಳು ಅನಂತ. ಪಂಡಿತಶ್ರೇಷ್ಠರಿಂದ ಎಷ್ಟು ಸಂಗ್ರಹಿಸಿದರೂ ಆ ರತ್ನಗಳು ಮುಗಿಯುವಂತಿಲ್ಲ. ಭಾಷ್ಯದ ಗಾಂಭೀರ್ಯವು ಅದ್ಭುತವಾದದ್ದು.

೨. ಹತ್ತು ಉಪನಿಷದ್ಭಾಷ್ಯಗಳಲ್ಲಿ ಉತ್ಕೃಷ್ಟವಾದ ಅರ್ಥಗಳನ್ನು ವಿವರಿಸಿ, ಓದುಗರಿಗೆ ಉಪನಿಷತ್ತಿನ ಸಾರವನ್ನು ಸಂಗ್ರಹಿಸಿದ್ದಾರೆ.

೩. ಚಂದ್ರ-ಸೂರ್ಯರು ವಿಶ್ವಕ್ಕೆ ಪ್ರಕಾಶವನ್ನು ಕೊಡುವಂತೆ ಗೀತಾಭಾಷ್ಯ-ಗೀತಾತಾತ್ಪರ್ಯಗಳು ಸಮಸ್ತ ಪ್ರಮೇಯಗಳನ್ನು ಸ್ಫುಟವಾಗಿ ತಿಳಿಸಿ ಕೇಡುತ್ತವೆ.

೪. ಇತಿಹಾಸ ಪುರಾಣಗಳೆಂಬ ಕ್ಷೀರಸಾಗರದಲ್ಲಿ ಮಧ್ವರ ಮನಸ್ಸೆಂಬ ಮಂದರ ಪರ್ವತದಿಂದ ಕಡೆಯಲ್ಪಟ್ಟಾಗ ಬಂದ ಅಮೃತವೇ ಮಹಾಭಾರತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯ.

೫. ಶ್ರೀಭಾಗವತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯವು, ಮೂರು ಭಾಷೆ (ಗುಹ್ಯ, ದರ್ಶನ, ಮತ್ತು ಸಮಾಧಿ)ಗಳನ್ನು ತಿಳಿಯದೇ ಪುರಾಣ ಪ್ರಪಂಚದಲ್ಲಿ ಪ್ರವೇಶಿಸುವವರಿಗೆ ಅತ್ಯುತ್ತಮ ಮಿತ್ರನಂತೆ ಮಾರ್ಗದರ್ಶನ ನೀಡುತ್ತದೆ.

೬. ತಂತ್ರಸಾರ ಗ್ರಂಥವು ಕಲ್ಪವೃಕ್ಷ. ಇದನ್ನಾಶ್ರಯಿಸಿದವರು ಸಕಲ ಅಭೀಷ್ಟವನ್ನು ಹೊಂದುವರು.

೭. ವಿಷ್ಣುತತ್ತ್ವನಿರ್ಣಯ ಗ್ರಂಥವು ಪರವಾದಿಗಳನ್ನು ನಿಗ್ರಹಿಸುವಲ್ಲಿ ಶ್ರೇಷ್ಠ ಗ್ರಂಥವಾಗಿದೆ.

೮. ತತ್ತ್ವೋದ್ಯೋತ ಮೊದಲಾದ ದಶಪ್ರಕರಣ ಗ್ರಂಥಗಳು ಪ್ರತಿವಾದಿಗಳ ದುರ್ಮತಗಳನ್ನು (ಸುಡುವಂತಹ) ಖಂಡಿಸುವಂತಹ ಬೆಂಕಿಯ ಕಿಡಿಗಳು.

೯. ಚಿಕ್ಕದಾದ ಅಣುಭಾಷ್ಯದಲ್ಲಿ ಸಮಗ್ರ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯದ ಭಾವವನ್ನು ಸಂಗ್ರಹಿಸಿದ್ದಾರೆ. ಇದು ಕೃಷ್ಣ ತನ್ನ ಚಿಕ್ಕ ಬಾಯಿಯಲ್ಲಿ ಬ್ರಹ್ಮಾಂಡವನ್ನು ತೋರಿಸಿದಂತಿದೆ.

೧೦. ಮಹಾಭಾರತದ ಅರ್ಥಸಂಗ್ರಹ ರೂಪವಾದ ಯಮಕಭಾರತವು ಚಿತ್ರಕಾವ್ಯವಾಗಿ ಅತ್ಯಾಶ್ಚರ್ಯಕರವಾಗಿ ರಚಿತವಾಗಿದೆ.

೧೧. ಆಚಾರ್ಯರಿಂದ ರಚಿತವಾದ ಅನೇಕ ಸುಭಾಷಿತಗಳು, ಸ್ತೋತ್ರಗಳು, ಗಾಥಾ ಇತ್ಯಾದಿಗಳು ಎಷ್ಟಿವೆ ಎಂದು ಎಣಿಸಲು ಅಸಾಧ್ಯವಾಗಿವೆ.

ಅನುವ್ಯಾಖ್ಯಾನ ರಚನೆ : ತ್ರಿವಿಕ್ರಮಪಂಡಿತಾಚಾರ್ಯರು ಸಕಲ ಶಾಸ್ತ್ರಾರ್ಥ ಸಂಗ್ರಾಹಕವಾದ, ಮಂದಮತಿಗಳಿಗೆ ಅರ್ಥವಾಗುವ ಇನ್ನೊಂದು ಗ್ರಂಥ ರಚಿಸಲು ಮಧ್ವರನ್ನು ಪ್ರಾರ್ಥಿಸಿದರು. ಇದರ ಫಲವಾಗಿ 'ಅನುವ್ಯಾಖ್ಯಾನ' ಎಂಬ ಗ್ರಂಥವನ್ನು ರಚಿಸಿದರು. ಶ್ರೀಮದಾಚಾರ್ಯರು ನಾಲ್ಕು ಜನ ಶಿಷ್ಯರಿಗೆ ನಾಲ್ಕು ಅಧ್ಯಾಯವನ್ನು ಏಕಕಾಲಕ್ಕೆ ಹೇಳುತ್ತಾ ಈ ಕೃತಿಯನ್ನು ರಚಿಸಿದ ರೀತಿ ಅತ್ಯಾಶ್ಚರ್ಯಕರವಾದುದು. ಅನುವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಹೇಳಲ್ಪಟ್ಟಿರುವ ಸಂಗ್ರಹರೂಪವಾದ ''ಯುಕ್ತಿಮಾಲಾ'' (ನ್ಯಾಯವಿವರಣ) ಎಂಬ ಗ್ರಂಥವನ್ನು ರಚಿಸಿದರು. ಹೀಗೆ ಆಚಾರ್ಯರ ಪ್ರತಿಯೊಂದು ಕೃತಿಯು ವಿಶಿಷ್ಟತೆಯಿಂದ ಕೂಡಿದೆ.

ಮಧ್ವಾಚಾರ್ಯರ ಶಿಷ್ಯರು.

ವಿಷ್ಣುತೀರ್ಥರು : ಮಧ್ಯಗೇಹ ದಂಪತಿಗಳು ವೈಕುಂಠವಾಸಿಗಳಾದ ಮೇಲೆ ಅತ್ಯಂತ ವಿರಕ್ತರು, ಜ್ಞಾನಿಗಳೂ, ತಪೋನಿಷ್ಠರೂ ಆದ ಮಧ್ವಾಚಾರ್ಯರ ಪೂರ್ವಾಶ್ರಮದ ಸೋದರರು ಆಚಾರ್ಯರ ಬಳಿಗೆ ಬಂದು ಸಂನ್ಯಾಸ ದೀಕ್ಷೆ ಪ್ರಾರ್ಥಿಸಿದರು. ಚಾತುರ್ಮಾಸ ಕಾಲ ಕಳೆದ ನಂತರ ಆಚಾರ್ಯರು ಪಾಜಕಕ್ಕೆ ಮರಳಿ ಸಂನ್ಯಾಸ ದೀಕ್ಷೆಯನ್ನು ನೀಡಿ ''ವಿಷ್ಣುತೀರ್ಥ''ರೆಂದು ನಾಮಕರಣ ಮಾಡಿದರು. ರಹಸ್ಯವಾಗಿ ಪರಬ್ರಹ್ಮ ತತ್ತ್ವೋಪದೇಶವನ್ನು ಮಾಡಿದರು.

ವಿಷ್ಣುತೀರ್ಥರು ವೇದಾಂತಶಾಸ್ತ್ರದ ಶ್ರವಣದಿಂದಲೂ, ಅನುವಾದದಿಂದಲೂ, ಮನನದಿಂದಲೂ ಕಾಲವನ್ನು ಸಾರ್ಥಕಪಡಿಸಿಕೊಂಡರು. ವಿಷ್ಣುತೀರ್ಥರ ಕೈಗೊಂಡ ಕಠಿಣ ವ್ರತ, ತಪಸ್ಸು ಇಂದ್ರಿಯನಿಗ್ರಹ, ಭಗವಂತನಲ್ಲಿ ತೊಡಗಿಸಿದ ಮನಸ್ಸು ಅಸಾಮಾನ್ಯವಾದುದು. ಮಧ್ವಪತಿಯಾದ ನಾರಾಯಣನು ವಿಷ್ಣುತೀರ್ಥರ ಮೇಲೆ ಮಾಡಿದ ಅನುಗ್ರಹವು ಊಹೆಗೂ ನಿಲುಕದು. ಇಂಥಹ ವಿಷ್ಣುತೀರ್ಥರು ಅದ್ಯಾಪಿ ಕುಮಾರ ಪರ್ವತದಲ್ಲಿ ತಪೋನಿರತರಾಗಿರುವರೆಂದೂ, ಮುಂದೊಂದು ದಿನ ಮಧ್ವಸಿದ್ಧಾಂತವು ನಶಿಸಿಹೋದಾಗ ಇವರು ಆಗಮಿಸಿ, 'ಸೇತುತಿಲ' ಎಂಬಲ್ಲಿ

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರಿಂದ ಸ್ಥಾಪಿತವಾಗಿರುವ ಮೂಲಗ್ರಂಥಗಳನ್ನು ಹೊರತೆಗೆದು ಸತ್ಸಿದ್ಧಾಂತವನ್ನು ಪುನಃ ಸಜ್ಜನರಿಗೆ ಉಪದೇಶ ಮಾಡುವರೆಂದು ''ಸಂಪ್ರದಾಯ ಪದ್ಧತಿ''ಯಲ್ಲಿ ಉಲ್ಲೇಖಿಸಲ್ಪಟ್ಟಿದೆ.

ಪದ್ಮನಾಭ ತೀರ್ಥರು : ಗೋದಾವರೀತೀರದಿಂದ ಆಗಮಿಸಿದ ಪಂಡಿತವರೇಣ್ಯರು ಶೋಭನಭಟ್ಟರು. ಆಚಾರ್ಯರ ಮುಖದಿಂದ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ ಶ್ರವಣ ಮಾಡಿದ ಪುಣ್ಯಾತ್ಮರು. ಮಧ್ವಮತ ಪ್ರಸಾರದಲ್ಲಿ ತಮ್ಮ ಜೀವನವನ್ನೇ ಮೀಸಲಾಗಿಟ್ಟವರು. ಭಕ್ತಿ ವಿರಕ್ತಿ ಗುರುಸೇವೆ. ಇವುಗಳಿಂದ ಪ್ರಸನ್ನರಾದ ಮಧ್ವರು ಸಂನ್ಯಾಸ ದೀಕ್ಷೆಯನ್ನು ನೀಡಿ ''ಪದ್ಮನಾಭತೀರ್ಥ''ರೆಂದು ನಾಮಕರಣ ಮಾಡಿ ಆಧ್ಯಾತ್ಮವಿದ್ಯೆಯನ್ನು ಉಪದೇಶಿಸಿದರು. ಆಚಾರ್ಯರ ಅನುವ್ಯಾಖ್ಯಾನಕ್ಕೆ ಅಮೂಲ್ಯವಾದ ''ಸಂನ್ಯಾಯರತ್ನಾವಲಿ'' ಎಂಬ ಟೀಕೆಯನ್ನು ಬರೆದರು. ವೇದಪ್ರವಚನಾಚಾರ್ಯರೆಂದು ಎಲ್ಲಕಡೆಗೆ ಇವರ ಕೀರ್ತಿ ಹರಡಿತು. ಶಾಸ್ತ್ರಸಾಗರದಲ್ಲಿ ವಿದ್ವತ್ತಿಮಿಂಗಿಲದಂತಿದ್ದು ಸಿದ್ಧಾಂತವನ್ನು ಪ್ರಸಾರ ಮಾಡಿದರು. ಮುಂದೆ ಶ್ರೀಮದಾಚಾರ್ಯರ ವೇದಾಂತ ಸಾಮ್ರಾಜ್ಯವನ್ನಲಂಕರಿಸಿದ ಮಹನೀಯರು.

ಮಧ್ವಾಚಾರ್ಯರ ಜೊತೆಗೆ ಇನ್ನೂ ಅನೇಕ ಸಂನ್ಯಾಸಿ ಶಿಷ್ಯರು ಹಾಗೂ ಗೃಹಸ್ಥ ಶಿಷ್ಯರು ಇದ್ದರು. ಇವರಲ್ಲಿ ಮುಖ್ಯರಾದವರು ಶ್ರೀ ಹೃಷೀಕೇಶತೀರ್ಥರು, ಶ್ರೀಜನಾರ್ದನತೀರ್ಥರು, ಶ್ರೀನರಸಿಂಹತೀರ್ಥರು, ಶ್ರೀ ಉಪೇಂದ್ರತೀರ್ಥರು, ಶ್ರೀ ನರಹರಿತೀರ್ಥರು, ಶ್ರೀವಾಮನತೀರ್ಥರು, ಶ್ರೀರಾಮತೀರ್ಥರು, ಶ್ರೀ ಅಧೋಕ್ಷಜತೀರ್ಥರು, ಇನ್ನೂ ಅನೇಕ ಶಿಷ್ಯರಿದ್ದರು. ಎಲ್ಲ ಶಿಷ್ಯರು ವಿಷ್ಣುಭಕ್ತಿ, ಜ್ಞಾನ, ವೈರಾಗ್ಯಾದಿ ಗುಣಗಳಿಂದ ಕೂಡಿದವರಾಗಿದ್ದರು. ಈವರೆಲ್ಲರೂ ಪರಮತನಿರಾಕರಣೆ ಸ್ವಮತಸ್ಥಾಪನೆಯಲ್ಲಿ ಸಮರ್ಥರಾಗಿದ್ದರು.

ಗೃಹಸ್ಥ ಶಿಷ್ಯರು : ಸಂನ್ಯಾಸ ಶಿಷ್ಯರಲ್ಲದೇ ಅನೇಕ ಗೃಹಸ್ಥಶಿಷ್ಯರಿದ್ದರು. ಅವರಲ್ಲಿ ಲಿಕುಚ ವಂಶಕ್ಕೆ ಸೇರಿದ ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತರು, ಅವರ ತಮ್ಮಂದಿರಾದ ಶಂಕರಪಂಡಿತರು ಮತ್ತು ಅದೇ ವಂಶದ ಇನ್ನೊಬ್ಬ ಶಂಕರಾಚಾರ್ಯರು ಪ್ರಮುಖರು.

ಆಚಾರ್ಯರು ಶಿಷ್ಯರ ಮೇಲೆ ಜ್ಞಾನಭಕ್ತಿಗಳ ಮಳೆಯನ್ನೇ ಕರೆದರು. ದುರ್ಲಭವಾದ ಮೋಕ್ಷವನ್ನು ಅನುಗ್ರಹಿಸಿದರು.

ಏಕವಾಟದಲ್ಲಿ ಚಾತುರ್ಮಾಸ್ಯ : ಕಣ್ವತೀರ್ಥದ ಬಳಿಯ ಏಕವಾಟ ಎಂಬ ಗ್ರಾಮದ ಭಕ್ತಜನರಿಂದ ಪ್ರಾರ್ಥಿತರಾದ ಮಧ್ವರು ಚಾತುರ್ಮಾಸ್ಯ ಸಂಕಲ್ಪಿಸಿದರು. ಆಚಾರ್ಯಮಧ್ವರು ತಮ್ಮ ಅಮೃತ ಸದೃಶವಾದ ಪ್ರವಚನಗಳಿಂದ ಅಲ್ಲಿಯ ಭಕ್ತರಿಗೆ ಆನಂದವನ್ನುಂಟು ಮಾಡಿದರು.

ಮಧ್ವಾಚಾರ್ಯ ಅದ್ಭುತ ಮಹಿಮೆಗಳ ನಿರೂಪಣೆ : ಶ್ರೀ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು ಆಚಾರ್ಯ ಮಧ್ವರ ಅವತಾರದ ಹಿನ್ನೆಲೆಯಿಂದ ಪ್ರಾರಂಭಿಸಿ ಅವರ ಬಾಲಲೀಲೆಗಳು, ಗುರುಕುಲವಾಸ ಸಂನ್ಯಾಸ ಸ್ವೀಕಾರ, ದಕ್ಷಿಣ ಹಾಗೂ ಉತ್ತರ ಭಾರತದ ಸಂಚಾರ, ಬದರಿಕಾಶ್ರಮಕ್ಕೆ ಪ್ರಯಾಣ, ಸಿದ್ಧಾಂತ ಪ್ರಚಾರ, ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತಾಚಾರ್ಯರು ಆಚಾರ್ಯರಲ್ಲಿ ಶಿಷ್ಯರಾದದ್ದು, ಆಚಾರ್ಯಕೃತ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳ ವೈಶಿಷ್ಟ್ಯ ಮುಂತಾದ ಮಹಿಮೆಗಳನ್ನು ನಿರೂಪಿಸಿ, ಹದಿನಾರನೇ ಸರ್ಗದಲ್ಲಿ ಕ್ರಮವನ್ನನುಸರಿಸದೇ ಇನ್ನೂ ಅನೇಕ ಮಧ್ವರ ಮಹಿಮೆಗಳನ್ನು ಅದೃಶ್ಯರಾಗುವವರೆಗೂ ವರ್ಣಿಸಿದ್ದಾರೆ.

೧. **ವೇದಪ್ರಾಮಾಣ್ಯ ಸಮರ್ಥನೆ :** ಗೋಮತೀ ನದೀ ತೀರದಲ್ಲಿದ್ದ ಒಬ್ಬ ರಾಜನು ಆಚಾರ್ಯರನ್ನು ಕುರಿತು ''ವೇದವಾಕ್ಯಗಳು ಅಪ್ರಮಾಣ'' ಯಾಕೆಂದರೆ ''ವೇದಗಳ ಯಾವುದೇ ಒಂದು ವಾಕ್ಯದಿಂದ ನಿರೂಪಿತವಾದ ಫಲವು ದೊರಕದೇ ಇರುವುದರಿಂದ'' ಸಮಗ್ರವೇದಗಳು ಅಪ್ರಮಾಣಗಳಾಗುವುವು ಎಂದು ಆಕ್ಷೇಪಿಸಿದ. ತಕ್ಷಣ ಆಚಾರ್ಯ ಮಧ್ವರು ಹೆಸರುಕಾಳಿನ ಒಂದು ಬೀಜವನ್ನು ತಮ್ಮ ಕೈಯಲ್ಲಿ ತೆಗೆದುಕೊಂಡು ''या ओषधीः वा जाता देवेभ्यः'' ಎಂಬ ಸೂಕ್ತವನ್ನು ಪಠಿಸಿ ತತ್ಕ್ಷಣದಲ್ಲೇ ಅಂಕುರ, ದಲ, ಎಲೆ ಮತ್ತು ಫಲಗಳ ಉತ್ಪತ್ತಿಯನ್ನು ತೋರಿಸಿ ವೇದಪ್ರಾಮಾಣ್ಯವನ್ನು ಸಮರ್ಥಿಸಿದರು.

೨. **''ವಿದ್ಯುತ್'' ಅಭಿಮಾನಿ ಭಾರತೀಪತಿ :** ಒಮ್ಮೆ ರಾತ್ರಿ ಶಿಷ್ಯರಿಗೆ ಪಾಠ ಹೇಳುತ್ತಿರುವಾಗ ದೀಪವು ಶಾಂತವಾಯಿತು. ಆಚಾರ್ಯರು ತಮ್ಮ ಪಾದದ ಹೆಬ್ಬೆರಳಿನ ಉಗುರಿನ ತುದಿಯಿಂದ ಪ್ರಕಾಶವನ್ನು ಉತ್ಪನ್ನಮಾಡಿ ಶಿಷ್ಯರಿಗೆ ಪಾಠವನ್ನು ಮುಂದುವರೆಸಿದರು.

೩. **ಭದ್ರಾನದಿಯ ದಂಡೆಯಲ್ಲಿದ್ದ ಭಾರದ ಬಂಡೆಯನ್ನು ಎತ್ತಿದ್ದು :** ಒಮ್ಮೆ ಸಂಚಾರಕ್ರಮೇಣ ಚಿಕ್ಕಮಗಳೂರಿನ ಕಳಸ ಎಂಬ ಗ್ರಾಮಕ್ಕೆ ಬಂದರು. ಅಲ್ಲಿ ಭದ್ರಾನದಿಯ ದಂಡೆಯ ಸಮೀಪದಲ್ಲಿ ಜನರಿಗೆ ಅಡ್ಡವಾಗಿದ್ದ ದೊಡ್ಡ ಬಂಡೆಯನ್ನು ಒಂದೇ ಕೈಯಿಂದ ಎತ್ತಿ ಅದನ್ನು ಜನರಿಗೆ ಉಪಕಾರವಾಗುವ ಒಂದು ನಿರ್ದಿಷ್ಟ ಸ್ಥಳದಲ್ಲಿ ಇರಿಸಿ ತಾವು ಭೀಮಸೇನನ ಅವತಾರರೆಂದು ಜನರಿಗೆ ತಿಳಿಸಿದರು.

೪. **ಸೂರ್ಯಗ್ರಹಣದಲ್ಲಿ - ಸಮುದ್ರಸ್ನಾನ :** ಒಮ್ಮೆ ಸೂರ್ಯಗ್ರಹಣದ ಪರ್ವಕಾಲದಲ್ಲಿ ಸ್ನಾನಕ್ಕೆಂದು ಅನೇಕ ಶಿಷ್ಯರಿಂದ ಕೂಡಿಕೊಂಡು ಸಮುದ್ರಕ್ಕೆ ತೆರಳಿದರು. ಕಣ್ವತೀರ್ಥದಲ್ಲಿ ಮೊದಲು ಸ್ನಾನಮಾಡಿ ನಂತರ ಸಮುದ್ರ ಸ್ನಾನ ಮಾಡಿದರು. ಅಲ್ಲಿ ಶಿಷ್ಯರಿಗೆ ''ಐತರೇಯ'' ಶಾಖೆಯ ಸೂಕ್ತಗಳನ್ನು ಸುಂದರವಾಗಿ ವ್ಯಾಖ್ಯಾನಮಾಡಿ ಶಿಷ್ಯರಿಗೆ ಸಂತೋಷವನ್ನುಂಟುಮಾಡಿದರು. ನಾರಾಯಣಪಂಡಿತಾಚಾರ್ಯರು ಈ ಸಂದರ್ಭದಲ್ಲಿ ಮಧ್ವಾಚಾರ್ಯರನ್ನು ಸಮುದ್ರಕ್ಕೆ ಅನೇಕ ರೀತಿಯಾಗಿ ಹೋಲಿಸಿ, ಮಧ್ವರು ಸಮುದ್ರಕ್ಕಿಂತ ಉತ್ತಮರು ಎಂಬುದನ್ನು ಶಾಸ್ತ್ರೀಯವಾಗಿ ಪ್ರತಿಪಾದಿಸಿದ್ದಾರೆ.

೫. **ಗಂಡವಾಟ ಸಹೋದರರನ್ನು ಸೋಲಿಸಿದ್ದು :** ಆಚಾರ್ಯ ಮಧ್ವರ ಬಲವನ್ನು ಪರೀಕ್ಷಿಸಲು ಗಂಡವಾಟನು ಆಗಮಿಸಿದಾಗ, ಆಚಾರ್ಯರು ಅವನಿಗೆ ಅವಕಾಶ ಕೊಟ್ಟರು. ಆಚಾರ್ಯರ ಕಂಠವನ್ನು ಇಬ್ಬರೂ ಕೂಡಿ ತಮ್ಮ ಕೈಗಳಿಂದ ಅಮುಕಿದಷ್ಟೂ ಅವರ ಕಂಠ ಇನ್ನೂ ಕಠಿಣವಾಗತೊಡಗಿತು. ಆಯಾಸಗೊಂಡ ಗಂಡವಾಟ ಸಹೋದರರಿಗೆ ಶಿಷ್ಯರಿಂದ ಗಾಳಿ ಬೀಸಿಸಿದರು.

ಮತ್ತೆ ಮಧ್ವರು ತಾವು ನೆಲಕ್ಕೆ ಊರಿದ ಹೆಬ್ಬರಳನ್ನು ಮೇಲಕ್ಕೆ ಎತ್ತಲು ಹೇಳಿದರು. ಗಂಡವಾಟ ಸಹೋದರರಿಗೆ ಆಚಾರ್ಯರ ಬೆರಳನ್ನು ಅಲುಗಾಡಿಸಲು ಸಮರ್ಥರಾಗಲಿಲ್ಲ.

ಸಿದ್ಧಿ ಪ್ರದರ್ಶನ

೬. ಇನ್ನೊಮ್ಮೆ ಮಧ್ವಾಚಾರ್ಯರು ಸಣ್ಣವಟುವಿನ ಮೇಲೆ ಕುಳಿತು ನರಸಿಂಹದೇವಾಲಯದ ಸುತ್ತಲೂ ಪ್ರದಕ್ಷಿಣೆ ಮಾಡಿದರು. ಹೀಗೆ ಆಚಾರ್ಯರು ತಾವು ಲಘಿಮಾ, ಗರಿಮಾ ಸಿದ್ಧಿಯನ್ನು ಹೊಂದಿರುವರಾಗಿ ಪ್ರದರ್ಶಿಸಿದರು.

೭. **ಪಾರಂತಿಯಲ್ಲಿ ಪೂಜಾದಿ ವ್ಯವಸ್ಥೆ :** ಸಂಚಾರಕ್ರಮೇಣ ಆಚಾರ್ಯ ಮಧ್ವರು ಪಾರಂತಿ ದೇವಸ್ಥಾನವನ್ನು ತಲುಪಿದರು. ಅಲ್ಲಿ ಹಿಂದೆ ಭೀಮಸೇನದೇವರು ಸಹೋದರರಿಂದ ಕೂಡಿಕೊಂಡು ಪಂಚ ರೂಪಗಳ ಹರಿಯನ್ನು ಪ್ರತಿಷ್ಠೆ ಮಾಡಿ ದ್ರೌಪದಿಯಿಂದ ಕೂಡಿಕೊಂಡು ಪೂಜೆ ಮಾಡಿದ್ದರು. ಮಧ್ವರು ಬಂದಾಗ ಪೂಜಾದಿ ವ್ಯವಸ್ಥೆ ತಪ್ಪಿದ್ದನ್ನು ನೋಡಿ, ಅಲ್ಲಿಯ ರಾಜನನ್ನು ಕರೆಸಿ ತಕ್ಷಣ ಪೂಜಾದಿ ವ್ಯವಸ್ಥೆ ಮಾಡಿದರು.

೮. ಮಧ್ವಾಚಾರ್ಯರು ಸಿರಿದಂತರವೆಂಬ ಪ್ರದೇಶಕ್ಕೆ ಆಗಮಿಸಿ, ಮಳೆಯನ್ನು ಸುರಿಸಿ ಒಣಗಿಹೋಗಿದ್ದ ಕೆರೆಯನ್ನು ತುಂಬಿಸಿ ಜನರಿಗೆ ವಿಸ್ಮಯವನ್ನುಂಟು ಮಾಡಿದರು.

೯. **ಶ್ರೀಕೃಷ್ಣಾಮೃತಮಹಾರ್ಣವ ರಚನೆ :** ವೈದ್ಯನಾಥೇಶ್ವರ ಕ್ಷೇತ್ರಕ್ಕೆ ಆಗಮಿಸಿ ಅಲ್ಲಿ ಭಕ್ತನೊಬ್ಬನ ಶ್ರೇಯಸ್ಸಿಗೆಂದು ಶ್ರೀಕೃಷ್ಣಾಮೃತ ಮಹಾರ್ಣವ ಗ್ರಂಥ ರಚನೆ ಮಾಡಿದರು.

೧೦. **ಕರ್ಮನಿರ್ಣಯ ಗ್ರಂಥ ರಚನೆ :** ಉಜರೆಗೆ ಮಧ್ವರು ಆಗಮಿಸಿದಾಗ ಕರ್ಮವಿಷಯವನ್ನು ತಿಳಿಸುವ ಶ್ರುತಿಗಳ ಅರ್ಥವನ್ನು ತಿಳಿಸಲು ಕೇಳಿದರು. ಅದರಲ್ಲೂ ಮಹಾನಾಮ್ನೀ ಋಕ್ಕುಗಳ ಅರ್ಥವನ್ನು ತಿಳಿಸಲು ಪ್ರಾರ್ಥಿಸಿದರು. ಮಧ್ವರು ಅರ್ಥವನ್ನು ವಿವರಿಸಿ, ತಕ್ಷಣವೇ ಲೇಖನ ಮಾಡಿಸಿದರು. ಅದೇ ಕರ್ಮ ನಿರ್ಣಯ ಗ್ರಂಥ.

ಶ್ರೀ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರೇ ತಿಳಿಸಿದಂತೆ ಆಚಾರ್ಯ ಮಧ್ವರ ಅದ್ಭುತವಾದ ಮಹಿಮೆಗಳನ್ನು ಸಂಪೂರ್ಣವಾಗಿ ವರ್ಣಿಸಲು ರುದ್ರಾದಿದೇವತೆಗಳಿಂದಲೂ ಅಸಾಧ್ಯ. ಇಂತಹ ಚರಿತ್ರೆಗಳ ಸ್ಮರಣೆಯು ಮನಸ್ಸನ್ನು ನಿರ್ಮಲಗೊಳಿಸಿ ಹರಿಭಕ್ತಿಯನ್ನುಂಟುಮಾಡುತ್ತದೆ. ಶ್ರೀಮದಾಚಾರ್ಯರ ದಿವ್ಯಚರಿತ್ರೆಯನ್ನು ದೇವತೆಗಳು ನಿತ್ಯದಲ್ಲೂ ಶಿರಸ್ಸಿನಲ್ಲಿ ಧರಿಸಿರುವರು. ಗಂಧರ್ವರು ದೇವಸಭೆಯಲ್ಲಿ ಗಾನ ಮಾಡುವರು. ಪೂರ್ಣಪ್ರಜ್ಞರ ಚರಿತ್ರೆಯು ಗಂಗೆಗಿಂತ ಪಾವನ.

ಶ್ರೀಮದಾಚಾರ್ಯರು ಶ್ರೀ ಅನಂತೇಶ್ವರ ದೇವರ ಸನ್ನಿಧಾನದಲ್ಲಿ ಶಿಷ್ಯರಿಗೆ ''ಐತರೇಯ ಉಪನಿಷತ್'' ಪ್ರವಚನ ಮಾಡುತ್ತಿರುವ ಸಂದರ್ಭ. ಅಂತರಿಕ್ಷದಲ್ಲಿ ಮಿಲಿತರಾದ ದೇವತೆಗಳು ಮಧ್ವಾಚಾರ್ಯರ ವಿಜಯೋತ್ಸವವನ್ನು ಕೊಂಡಾಡುತ್ತಾ ಜಯಕಾರ ಮಾಡುತ್ತಾ ಮಧ್ವರ ಮೇಲೆ ದೇವತಾವೃಂದವು ಪುಷ್ಪವೃಷ್ಟಿ ಮಾಡಿದ್ದಾರೆ. ಮಧ್ವಾಚಾರ್ಯರು ಅದೃಶ್ಯರಾದರು. ''ಅದೃಶ್ಯೋ ರೂಪ್ಯಪೀಠೇऽಸ್ತಿ ದೃಶ್ಯಸ್ತು ಬದರಿ ತಟೇ'' ಅದ್ಯಾಪಿ ರೂಪ್ಯಪೀಠದಲ್ಲಿ ಅದೃಶ್ಯರಾಗಿ, ಬದರಿಯಲ್ಲಿ ದೃಶ್ಯರಾಗಿ ವೇದವ್ಯಾಸರ ಸನ್ನಿಧಾನದಲ್ಲಿ ವಿರಾಜಮಾನರಾಗಿದ್ದಾರೆ.

ಶ್ರೀನಾರಾಯಣಪಂಡಿತಾಚಾರ್ಯಕೃತ ಶ್ರೀಸುಮಧ್ವವಿಜಯವು ವೇದಾಂತ ಮಹಾಕಾವ್ಯ. ವಿಶ್ವಗುರು ಗಳಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಜೀವನ ಚರಿತ್ರೆಯ ಬಗ್ಗೆ ಅಧಿಕೃತವಾಗಿ ತಿಳಿಸುವ ಲೋಕೋತ್ತರ ಕಾವ್ಯ. ಈ ಗ್ರಂಥವು ಮಂತ್ರ ತುಲ್ಯವಾಗಿ, ಸಕಲಾಭೀಷ್ಟಪ್ರದವಾಗಿ ಮಾಧ್ವ ಪರಂಪರೆಯಲ್ಲಿ ನಿತ್ಯಪಾರಾಯಣ ಗ್ರಂಥವಾಗಿ ಮಾನ್ಯವಾಗಿದೆ.

ಶ್ರೀಸುಮಧ್ವವಿಜಯವು ಶ್ರೀಮದಾಚಾರ್ಯರ ಪರಂಪರೆಯಲ್ಲಿ ವಿರಾಜಮಾನರಾದ ಎಲ್ಲ ಪರಮ ಹಂಸರಿಂದಲೂ ಹಾಗೂ ಸಮಸ್ತ ಗೃಹಸ್ಥ ಟೀಕಾಟಿಪ್ಪಣೀಕಾರರಿಂದಲೂ ಸರ್ವಮಾನ್ಯತೆ ಪಡೆದಿದೆ.

ಈ ಗ್ರಂಥದ ಪಾರಾಯಣದಿಂದ ಮುಖ್ಯವಾಗಿ ಶ್ರೀಹರಿಯಲ್ಲಿ ಭಕ್ತಿ ಉಂಟಾಗಿ ಭಗವದನುಗ್ರಹಕ್ಕೆ ಕಾರಣವಾಗುವುದು. ಶ್ರೀ ಸುಮಧ್ವವಿಜಯದ ಪಾಠ ಪ್ರವಚನ ಪಾರಾಣದಿಂದ ಸಜ್ಜನರ ಮನೋಭೀಷ್ಟವು ಸಿದ್ಧಿಸುವುದು. ಸಕಲ ದುರಿತಗಳು ನಾಶವಾಗುವವು.

ಜಗತ್ತಿಗೆ ಅತೀ ಶ್ರೇಷ್ಠವಾದ ಸಿದ್ಧಾಂತವನ್ನು ನೀಡಿದ ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯರು ಸರ್ವಮಾನ್ಯರಾಗಿ, ಸಜ್ಜನರಿಗೆ ಮೋಕ್ಷಮಾರ್ಗವನ್ನು ತೋರಿಸಿದ ಅಸಾಮಾನ್ಯ ಏಕೈಕ ದಾರ್ಶನಿಕರು.

ಇಂದಿಗೂ ವೇದಾಂತ ಶಾಸ್ತ್ರವನ್ನು ಅಧ್ಯಯನ ಮಾಡುವವರು 'ಶ್ರೀ ಸುಮಧ್ವವಿಜಯ'ದ ಕಾವ್ಯದಿಂದಲೇ ಪ್ರಾರಂಭಿಸುವುದು ಸಂಪ್ರದಾಯದಲ್ಲಿ ಸಿದ್ಧವಾಗಿದೆ. ಭವರೋಗವನ್ನು ಕಳೆಯುವ ದಿವ್ಯೌಷಧಿಯಾಗಿದೆ. ಐಹಿಕ-ಆಮುಷ್ಮಿಕ ಫಲಕೊಡುವ ಕಲ್ಪವೃಕ್ಷ ಕಾಮಧೇನುವಾಗಿದೆ.

ಶ್ರೀಸುಮಧ್ವವಿಜಯವನ್ನು ಪ್ರತಿನಿತ್ಯ ಸಂಪೂರ್ಣ ಪಾರಾಯಣ ಮಾಡುವ ನಿಯಮವನ್ನು ಇಟ್ಟು ಕೊಂಡವರು ಅನೇಕರಿದ್ದಾರೆ ಎಂಬ ಮಾತು ಸಾರ್ವಕಾಲಿಕ ಸತ್ಯವಾಗಿದೆ.

''ಆಚಾರ್ಯಾಃ ಶ್ರೀಮದಾಚಾರ್ಯಾಃ ಸಂತು ಮೇ ಜನ್ಮ ಜನ್ಮನಿ''

ಎಸ್. ಆರ್. ಪಾಂಡುರಂಗಿ

ಎ.ಬಿ. ಶ್ಯಾಮಾಚಾರ್ಯ

ಶ್ರೀ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು

ಶ್ರೀ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು (1295-1370) ತ್ರಿವಿಕ್ರಮಪಂಡಿತರ ಮೂವರು ಗಂಡುಮಕ್ಕಳಲ್ಲಿ ಕೊನೆಯವರು. ಪ್ರಸಿದ್ಧವಾದ ''ಲಿಕುಚ'' ವಂಶಕ್ಕೆ ಸೇರಿದವರು. 14ನೇ ಶತಮಾನದ ಆದಿಭಾಗದಲ್ಲಿ ಇದ್ದವರು. ಇವರು ವಾಸವಾಗಿದ್ದ ಮನೆ ''ಕಾವು ಮಠ'' ಎಂದು ಪ್ರಸಿದ್ಧಿ.

ಸತ್ಯಲೋಕಾಧಿಪತಿಯಾದ ಪ್ರಾಣದೇವರ ಮೂರನೇ ಅವತಾರವಾದ ಶ್ರೀಮಧ್ವರ ಪವಿತ್ರ ಚರಿತ್ರೆಯನ್ನು ಸುಮಧ್ವವಿಜಯ ಎಂಬ ಮಹಾಕಾವ್ಯದ ಮೂಲಕ ಜಗತ್ತಿಗೆ ನೀಡಿದ ಮಹಾಯೋಗಿಗಳು. ತಂದೆಯವರಲ್ಲಿ ಆಮೂಲ ಶಾಸ್ತ್ರಾಭ್ಯಾಸ ಓದಿದವರು. ಆಚಾರ್ಯ ಮಧ್ವರನ್ನು ಕಣ್ಣಾರೆ ಕಂಡಿರುವ ಸಾಧ್ಯತೆಗಳಿವೆ.

ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರು ತಂದೆಯಂತೆ ಆಶುಕವಿಗಳು, ಶಾಸ್ತ್ರಜ್ಞರು ಹಾಗೂ ವೇದಾಂತಿಗಳು. ಅವರ ಕೃತಿಗಳು ವೇದಾಂತ ಕಾವ್ಯ ಹಾಗೂ ಕಾವ್ಯಶಾಸ್ತ್ರ. ಇವರ ಗ್ರಂಥಗಳಲ್ಲಿ ಕಾವ್ಯನಿಷ್ಠೆ, ವಸ್ತುನಿಷ್ಠೆ ಹಾಗೂ ಇತಿಹಾಸ ನಿಷ್ಠೆ ಎದ್ದು ಕಾಣಿಸುತ್ತವೆ. ಲಿಕುಚ ವಂಶದಲ್ಲಿ ಹೆಚ್ಚಿನ ಗ್ರಂಥಗಳನ್ನು ಬರೆದ ಶ್ರೇಯಸ್ಸು ನಾರಾಯಣ ಪಂಡಿತರಿಗೆ ಸಲ್ಲುತ್ತದೆ. ದ್ವೈತವೇದಾಂತವಾಙ್ಮಯದಲ್ಲಿ ಇವರ ಸ್ಥಾನ ಹಿರಿದಾದುದು. ಇವರ ಗ್ರಂಥ ವ್ಯಾಪ್ತಿಯು ಸ್ತೋತ್ರಗಳಿಂದಾರಂಭಿಸಿ ಟೀಕಾ, ಸ್ವತಂತ್ರ, ಉದ್ಗ್ರಂಥಗಳವರಿಗೆ ಹಬ್ಬಿದೆ. ಇವರ ಅದ್ಭುತ ರಚನಾಕೌಶಲ ಎಂತಹವರನ್ನು ಮುಗ್ಧರನ್ನಾಗಿಸುತ್ತದೆ. ಇವರಿಗೆ ಸಮಸ್ತ ಪೀಠಾಧೀಶರಿಂದಲೂ ಹಾಗೂ ಗೃಹಸ್ಥರಿಂದಲೂ ಮಾನ್ಯತೆ ಸಿಕ್ಕಿರುವದು ಇದಕ್ಕೆ ದ್ಯೋತಕ.

ಇವರ ಮಕ್ಕಳ ಹೆಸರು ವಾಮನ ಪಂಡಿತಾಚಾರ್ಯರು. ತಂದೆಯಂತೆ ಇವರೂ ಶಾಸ್ತ್ರಜ್ಞರು. ಅನೇಕ ವೇದಾಂತ ಕೃತಿಗಳನ್ನು ರಚಿಸಿದ್ದಾರೆ.

ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರ ಕೃತಿಗಳು : ಇವರು ಮೂವತ್ತಕ್ಕೂ ಹೆಚ್ಚು ಕೃತಿಗಳನ್ನು ರಚಿಸಿರುವುದಾಗಿ ತಿಳಿದು ಬರುತ್ತದೆ. ಇವರು ಮಹಾಕಾವ್ಯ, ಖಂಡಕಾವ್ಯ, ಸ್ತೋತ್ರ ಕಾವ್ಯ, ವೇದಾಂತ ಗ್ರಂಥ ಮುಂತಾದ ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿ ಸಂಸ್ಕೃತ ಹಾಗೂ ವೇದಾಂತ ಸಾಹಿತ್ಯವನ್ನು ಶ್ರೀಮಂತಗೊಳಿಸಿದ್ದಾರೆ. ಇವರ ಗ್ರಂಥಗಳು ಗೃಹಸ್ಥ ಪಂಡಿತರಿಂದ, ಎಲ್ಲ ಪೀಠಾಧೀಶರಿಂದ ಮಾನ್ಯವಾಗಿವೆ. ಗೃಹಸ್ಥರಲ್ಲದೇ ಅನೇಕ ಪೀಠಾಧೀಶರು ಇವರ ಕೃತಿಗಳಿಗೆ ಸಂಸ್ಕೃತ ವ್ಯಾಖ್ಯಾನ ರಚಿಸಿದ್ದಾರೆ. ಇವರು ರಚಿಸಿದ ''ಸುಮಧ್ವವಿಜಯ''ವು ಎಲ್ಲ ಮಾಧ್ವರ ಪಠ್ಯ ಗ್ರಂಥವಾಗಿದೆ. ಪ್ರತಿನಿತ್ಯದ ಪಾರಾಯಣ ಗ್ರಂಥವಾಗಿ ಅನೇಕರು ಸಿದ್ಧಿಯನ್ನು ಪಡೆದಿದ್ದಾರೆ ಮತ್ತು ಪಡೆಯುತ್ತಿದ್ದಾರೆ.

ಕೃತಿಗಳು

೧. ಸುಮಧ್ವವಿಜಯಃ, ೨. ಭಾವಪ್ರಕಾಶಿಕಾ (ಸುಮಧ್ವವಿಜಯ ಟೀಕಾ), ೩. ಪ್ರಮೇಯನವಮಾಲಿಕಾ (ಅಣುಮಧ್ವವಿಜಯ), ೪. ಮಣಿಮಂಜರೀ, ೫. ಸಂಗ್ರಹರಾಮಾಯಣ, ೬. ನಯಚಂದ್ರಿಕಾ (ಅನುವ್ಯಾಖ್ಯಾನ ಟೀಕಾ), ೭. ತತ್ತ್ವಮಂಜರೀ (ವಿಷ್ಣುತತ್ತ್ವನಿರ್ಣಯ ಟೀಕಾ), ೮. ಯಮಕಭಾರತ ಟೀಕಾ, ೯. ಕೃಷ್ಣಾಮೃತಮಹಾರ್ಣವ ಟೀಕಾ, ೧೦. ಅಣುಭಾಷ್ಯ ಟೀಕಾ, ೧೧. ಪಾರಿಜಾತಹರಣ, ೧೨. ಶುಭೋದಯ, ೧೩. ಶಿವಸ್ತುತಿ, ೧೪. ನೃಸಿಂಹಸ್ತುತಿ, ೧೫. ಯೋಗ ದೀಪಿಕಾ, ೧೬. ಧ್ಯಾನಮಾಲಾ, ೧೭. ಕೃಷ್ಣಮಾಲಾ

ಇವುಗಳಲ್ಲದೇ ಇನ್ನು ಅನೇಕ ಸ್ತೋತ್ರಗಳು ಹಾಗೂ ವೇದಾಂತ ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿರುವುದಾಗಿ ಪ್ರಸಿದ್ಧಿ ಇದೆ.

ಶ್ರೀ ವೇದಾಂಗತೀರ್ಥರು

ಇವರು ಸೋದೆಮಠದ ಪರಂಪರೆಯಲ್ಲಿ ವಿರಾಜಮಾನರಾಗಿದ್ದ 12ನೇ ಯತಿವರ್ಯರು. ಇವರ ಕಾಲ 15ನೇ ಶತಮಾನ.

ಸುಮಧ್ವವಿಜಯಕ್ಕೆ ''ಪದಾರ್ಥ ದೀಪಿಕಾ'' ಎಂಬ ಸಮಗ್ರ ವ್ಯಾಖ್ಯಾನವನ್ನು ಬರೆದಿದ್ದಾರೆ. ಇದು ಅತ್ಯಂತ ಪ್ರಾಚೀನ ವ್ಯಾಖ್ಯಾನ. ಈ ವ್ಯಾಖ್ಯಾನವನ್ನೇ ಅನುಸರಿಸಿ ಶ್ರೀ ವಿಶ್ವಪತಿತೀರ್ಥರು ''ಪದಾರ್ಥ ದೀಪಿಕೋದ್ಯೋಧಿಕಾ'' ಎಂಬ ವ್ಯಾಖ್ಯಾನವನ್ನು ರಚಿಸಿರುವರು.

ಶ್ರೀ ವಿಶ್ವಪತಿತೀರ್ಥರು

ಶ್ರೀ ವಿಶ್ವಪತಿತೀರ್ಥರು ಪೇಜಾವರ ಮಠದ ಪರಂಪರೆಯಲ್ಲಿ ಪೀಠವನ್ನು ಅಲಂಕರಿಸಿದ 19ನೇ ಯತಿವರ್ಯರು. ಇವರ ಕಾಲ 16ನೇ ಶತಮಾನ. ಶ್ರೀ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರ ಅನೇಕ ಕೃತಿಗಳಿಗೆ ಶ್ರೇಷ್ಠವಾದ ಟಿಪ್ಪಣಿಯನ್ನು ಬರೆದಿದ್ದಾರೆ.

ಇವರು ಸುಮಧ್ವ ವಿಜಯಕ್ಕೆ ''ಪದಾರ್ಥದೀಪಿಕೋದ್ಬೋಧಿಕಾ'' ಎಂಬ ಟಿಪ್ಪಣಿಯನ್ನು ರಚಿಸಿದ್ದಾರೆ. ಇದು ಶ್ರೀ ವೇದಾಂಗತೀರ್ಥರು ಬರೆದ ''ಪದಾರ್ಥದೀಪಿಕಾ'' ಎಂಬ ವ್ಯಾಖ್ಯಾನಕ್ಕೆ ವಿವರಣೆ ರೂಪವಾಗಿ ರಚಿತವಾಗಿದೆ. ಶ್ರೀ ವಿಶ್ವಪತಿತೀರ್ಥರು ತಮ್ಮ ಈ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಅನೇಕ ಶಬ್ದಗಳಿಗೆ ವ್ಯಾಕರಣ ವಿಶೇಷಗಳನ್ನು ಕೊಡುತ್ತಾರೆ ಮತ್ತು ಅನೇಕ ಕೋಶಗಳನ್ನು ಉದಾಹರಿಸುತ್ತಾರೆ. ಶ್ಲೋಕಗಳ ವೃತ್ತವನ್ನು ಹಾಗೂ ವೃತ್ತ ಲಕ್ಷಣಗಳನ್ನು ಕೊಡುವದು ವ್ಯಾಖ್ಯಾನದ ಇನ್ನೊಂದು ವೈಶಿಷ್ಟ್ಯ. ಅನೇಕ ಆಧ್ಯಾತ್ಮಿಕ ಪ್ರಮೇಯಗಳಿಗೆ ಪ್ರಮಾಣ ವಚನಗಳನ್ನು ಉದಾಹರಿಸುವುದು ಈ ವ್ಯಾಖ್ಯಾನದ ಮತ್ತೊಂದು ವೈಶಿಷ್ಟ್ಯ.

ಶ್ರೀ ವಿಶ್ವಪತಿತೀರ್ಥರ ಕೃತಿಗಳು

ಶ್ರೀ ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರ ಕೃತಿಗಳಿಗೆ ವ್ಯಾಖ್ಯಾನ : ೧. ಸುಮಧ್ವ ವಿಜಯ ವ್ಯಾಖ್ಯಾನ (ಪದಾರ್ಥ ದೀಪಿಕೋದ್ಬೋದಿಕಾ), ೨. ಮಣಿ ಮಂಜರೀ ವ್ಯಾಖ್ಯಾನ, ೩. ಸಂಗ್ರಹ ರಾಮಾಯಣ ವ್ಯಾಖ್ಯಾನ, ೪. ನರಸಿಂಹ ಸ್ತುತಿ ವ್ಯಾಖ್ಯಾನ, ೫. ಶಿವಸ್ತುತಿ ವ್ಯಾಖ್ಯಾನ.

ಇತರ ವ್ಯಾಖ್ಯಾನಗಳು : ೧. ದ್ವಾದಶಸ್ತೋತ್ರ ವ್ಯಾಖ್ಯಾನ, ೨. ಹರಿ-ವಾಯು ಸ್ತುತಿ ವ್ಯಾಖ್ಯಾನ (ಬಾಲಬೋಧಿನೀ)

ಶ್ರೀ ಛಲಾರಿ ಶೇಷಾಚಾರ್ಯರು

ಶ್ರೀ ಸುಮಧ್ವವಿಜಯಕ್ಕೆ ''ಮಂದೋಪಕಾರಿಣೀ'' ಎಂಬ ಶ್ರೇಷ್ಠ ಟಿಪ್ಪಣಿಯನ್ನು ರಚಿಸಿದವರು. ಶ್ರೀ ಛಲಾರಿ ಶೇಷಾಚಾರ್ಯರು ಛಲಾರಿ ನರಸಿಂಹಾಚಾರ್ಯರ ಶಿಷ್ಯರು. ಉತ್ತರಾದಿಮಠದ ಶ್ರೀ ಸತ್ಯನಿಧಿತೀರ್ಥರು (1631-1636) ಇವರ ದೀಕ್ಷಾಗುರುಗಳು. ತಂದೆ ಶ್ರೀ ಧರ್ಮಪುರಿ ಪುರುಷೋತ್ತಮಾಚಾರ್ಯರು. 17ನೇ ಶತಮಾನದಲ್ಲಿ ಇದ್ದ ಶ್ರೀ ಛಲಾರಿ ಶೇಷಾಚಾರ್ಯರು ಅನೇಕ ಟಿಪ್ಪಣಿಗಳನ್ನು ರಚಿಸುವುದರ ಮೂಲಕ ದ್ವೈತ ವೇದಾಂತ ಪ್ರಪಂಚಕ್ಕೆ ವಿಶೇಷ ಸೇವೆ ಸಲ್ಲಿಸಿದ್ದಾರೆ.

''ಮಂದೋಪಕಾರಿಣೀ'' ವ್ಯಾಖ್ಯಾನವು ಪ್ರಾರಂಭಿಕ ಅಭ್ಯಾಸಿಗಳಿಗೆ ಮಧ್ವವಿಜಯದ ಅನೇಕ ಪ್ರಮೇಯಗಳನ್ನು अयं भावः, इति भावः ಎಂಬುದಾಗಿ ಸಂಗ್ರಹಿಸುತ್ತಾ ವಿಷಯಗಳನ್ನು ಸ್ಫುಟವಾಗಿ ಅರ್ಥೈಸುತ್ತದೆ. ಎಲ್ಲ ಶ್ಲೋಕಗಳಿಗೆ ಅನ್ವಯಾರ್ಥವನ್ನು ಸರಳವಾಗಿ ಸೊಗಸಾಗಿ ತಿಳಿಸಿಕೊಡುವುದು ಈ ವ್ಯಾಖ್ಯಾನದ ವೈಶಿಷ್ಟ್ಯವಾಗಿದೆ. ಅನೇಕ ಕೋಶಗಳ ಉದಾಹರಣೆ, ವ್ಯಾಕರಣ ವಿಶ್ಲೇಷಣೆ, ಅಲಂಕಾರ ಹಾಗೂ ವೃತ್ತಗಳನ್ನು ತಿಳಿಸಿಕೊಡುವುದು ಈ ವ್ಯಾಖ್ಯಾನದ ಮತ್ತೊಂದು ವೈಶಿಷ್ಟ್ಯ.

ಶ್ರೀ ಛಲಾರಿ ಶೇಷಾಚಾರ್ಯರ ಕೃತಿಗಳು.

೧. ಸುಮಧ್ವ ವಿಜಯ ಟೀಕಾ (ಮಂದೋಪಕಾರಿಣೀ), ೨. ಮಣಿ ಮಂಜರೀ ಟೀಕಾ (ಮಂದೋಪಕಾರಿಣೀ), ೩. ನಖಸ್ತುತಿ ಟೀಕಾ, ೪. ವಾಯುಸ್ತುತಿ ಟೀಕಾ, ೫. ಮಹಾಭಾರತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯ ಟೀಕಾ, ೬. ಶ್ರೀಮದ್ಭಾಗವತ, ೭. ತಂತ್ರಸಾರ ಟೀಕಾ, ೮. ಅಣು ಭಾಷ್ಯ ಟೀಕಾ, ೯. ತತ್ತ್ವಸಂಖ್ಯಾನ ಟೀಕಾ ಟಿಪ್ಪಣೀ, ೧೦. ಈಶಾವಾಸ್ಯೋಪನಿಷದ್ಭಾಷ್ಯ ಟೀಕಾ ಟಿಪ್ಪಣೀ, ೧೧. ಷಟ್ ಪ್ರಶ್ನೋಪನಿಷದ್ಭಾಷ್ಯ ಟೀಕಾ ಟಿಪ್ಪಣೀ, ೧೨. ಶ್ರುತಿಗೀತಾ ವ್ಯಾಖ್ಯಾ, ೧೩. ಮಂತ್ರ ಪ್ರಕಾಶಿಕಾ, ೧೪. ಪ್ರಮಾಣ ಚಂದ್ರಿಕಾ, ೧೫. ಪ್ರಮೇಯ ಸಂಗ್ರಹ, ೧೬. ನಿರ್ಣಯ ರತ್ನಮ್, ೧೭. ಸುಶಬ್ದ ಪ್ರದೀಪಃ, ಅಷ್ಟಮ ಹಾಗೂ ನವಮಸ್ಕಂಧ ಟೀಕಾ (ಮಂದಬೋಧಿನೀ), ೧೯. ಅಶೌಚ ನಿರ್ಣಯಃ, ೧೯. ಲಘುತಿಥಿ ನಿರ್ಣಯಃ, ೨೦. ಗಂಗಾಸ್ತೋತ್ರಮ್, ೨೧. ಛಲಾರಿ ನರಸಿಂಹಾಚಾರ್ಯಸ್ತುತಿಃ, ಮುಂತಾದವುಗಳು.

●●●

सुमध्वविजयविषयानुक्रमणिका

नवमः सर्गः

		श्लोक संख्या
१.	श्री नारायणाश्रमात् श्री वेदव्यासाश्रमाय पुनरागमनम्	१-२
२.	श्री वेदव्यासाश्रमात् बदरीक्षेत्राय आगमनम्	३-६
३.	अग्निशर्मादिभिः प्रदत्तायाः भिक्षायाः स्वीकारः	७
४.	श्री मध्वाचार्यैः विरचितस्य ब्रह्मसूत्रभाष्यस्य वर्णनम्, श्री सत्यतीर्थेन भाष्यलेखनम्	८-१३
५.	बदरीक्षेत्रात् गोदावरीतीरागमनम्, तत्र विद्वत्सभायां श्रुत्यर्थविवरणम्	१४-१६
६.	शोभनभट्टस्य आगमनम्, श्रीमध्वभाष्यश्रवणम्, तेन मध्वमतप्रचारारम्भः, दक्षिणावर्तशङ्खदृष्टान्तः	१७-२७
७.	उडुपिक्षेत्रं प्रति आगमनम्, श्रीमध्वदर्शनेन अच्युतप्रेक्षस्य आनन्दोद्रेकः, ब्रह्मसूत्रभाष्यश्रवणम्, मध्वमतप्रचारः, श्रीमध्वाचार्येण शिष्येभ्यः तन्मुदाप्रदानम्	२८-३९
८.	उडुपि क्षेत्रे श्रीकृष्णप्रतिमायाः प्रतिष्ठापनम्	४०-४३
९.	गुरुपुत्रेण वासुदेवेन यज्ञानुष्ठापनम्	४४-५१
१०.	उडुपिक्षेत्रात् पुनः बदरिकाश्रमप्रयाणारम्भः	५२-५३

दशमः सर्गः

१.	परशुरामक्षेत्रे प्रयाणारम्भः, शिष्येण केनचित् श्रीमध्वस्य स्तोत्ररचना	१-३
२.	ईश्वरदेवनाम्ना नृपेण श्रीमध्वाय भूमिखननाज्ञा, स्वयं खननप्रदर्शनावसरे स्तब्धता, 'नाने नेना' इत्याद्येकाक्षरश्लोकः	४-७
३.	शिष्यैः सह गङ्गायाः तरणम्, चकितेन तुरुष्कनृपेण राज्यार्धप्रदानम्	८-१९
४.	चोराणां पराजयः	२०-२२
५.	व्याघ्रात् सत्यतीर्थस्य रक्षणम्	२३
६.	श्रीनारायणेन व्यासमुष्टिप्रदानम्, महाभारततात्पर्यनिर्णयविरचनाय श्री वेदव्यासेन आदेशः	२४-२५
७.	नावैः विना गङ्गातरणमहिमा	२६-३३
८.	हस्तिनापुरे चातुर्मासानुष्ठानम्, शाखाविशेषात् गङ्गायाः प्रत्यक्षता	३४-३६
९.	वाराणस्यां शिष्येभ्यः शक्तिप्रदर्शनम्	३७-४१
१०.	इन्द्रपुरीनाम्नः पण्डितस्य पराभवः	४२-४३
११.	श्रीमध्वाचार्यस्य प्रवचनशैली, 'समानया यानमास' इत्यादि शब्दालङ्कार कौशलम्	४४-४८
१२.	कुरुक्षेत्रे भीमावतार धृतगदादर्शनम्, हृषीकेशे रुद्रेण श्रीमध्वचार्याय भिक्षासमर्पणम्	४९-५०
१३.	इषुपातक्षेत्रे परशुरामस्मरणम्, सहस्रकदलीफलभक्षणम्	५१-५२
१४.	गोवाप्रदेशे सङ्गीतेन वृक्षलतानां पुष्पफलवृद्धिप्रदर्शनम्	५३
१५.	श्रीमध्वाचार्यस्य यशसः कीर्तनम्	५४

एकादशः सर्गः

१.	शेषदेवेन सनकादिभिः सह आगत्य श्रीमध्वभाष्यश्रवणम्, श्रवणस्य फलं मोक्षप्राप्तिरेव इति सनकादिभ्यः निवेदनम्	१-७

२. वैकुण्ठवर्णनारम्भः, तत्रत्यगृहानां वर्णनम् ८-१२
३. वैकुण्ठगतवस्तूनाम् अप्राकृतत्ववर्णनम्, वैकुण्ठस्य वैशाल्यवर्णनम् १३-१४
४. हरिमन्दिरवर्णनम्, रमादेव्याः सेवावर्णनम्, श्रीहरेः अनन्तगुणत्ववर्णनम् १५-२०
५. मुक्तानां वर्णनम्, मुक्तानां स्त्रीविहारवर्णनम्, कल्पवृक्ष पारिजातादि वृक्षसम्पदः वर्णनम्, ऋतूनां वर्णनम् २१-४५
६. मुक्तैः भगवत्पूजावर्णनम्, प्रमदाभिः हरेः चरित्रगानम्, स्त्रीणां विहारवर्णनम् ४६-६३
७. मुक्तलोकगतभगवद्रूप वर्णनम् ६४-७६
८. वैकुण्ठमहिमावर्णनम् ७७-७९

द्वादशः सर्गः

१. मायावादिनां व्यथा, पद्मतीर्थपुण्डरीकपुरीभ्यां सह समालोचना १-३
२. केनचित् मायावादिना मायावादसिद्धान्तानां पुनरुच्चारः, तेषां रक्षणस्य आवश्यकतानिरूपणम् ४-११
३. श्रीमध्वभाष्येण तत्प्रवचनेन च केचन मायिनोपि वशीकृताः इति निरूपणम् १२-१६
४. अन्येन केनचित् मायिना धैर्यमवलम्ब्य मायावादः समर्थनीयः, मध्वसिद्धान्तः प्रतिभटनीयः इति निरूपणम् १७-२५
५. पुण्डरीकपुरीनाम्नः मायिनः पराभवः २६-२८
६. श्रीमध्वाचार्यैः वेदव्याख्यानम् २६-३६
७. वेदं व्याख्यातुं पुण्डरीकपुरिणः प्रयत्नः अपशब्दोच्चारणेन हास्यास्पदता च ३७-४०
८. पद्मतीर्थेन श्रीमध्वाचार्याणां ग्रन्थानामपहारः, पद्मतीर्थमनुधाव्य तस्य पराभवः ४१-४६
९. निर्गुणोपासना न कर्तव्या इति पित्रा सुब्रह्मण्यपण्डितेन त्रिविक्रमपण्डिताय उपदेशः, मायावादसिद्धान्ते पूर्वतनभाष्येषु च त्रिविक्रमपण्डितस्य अनास्था
१०. त्रिविक्रमपण्डितेन श्रीमध्वाचार्यस्य कीर्तेः श्रवणम्, मायावादिभिः श्रीमध्वाचार्यमतपराभवाय प्रार्थना ६१-६६
११. त्रिविक्रमपण्डितेन श्रीमध्वाचार्याणां ग्रन्थानामध्ययनम् ६७

चतुर्दशः सर्गः

१. पद्मतीर्थेन अपहृतग्रन्थानां जयसिंहनृपसमक्षं स्वीकारः १-२
२. त्रिविक्रमपण्डितस्य आगमनम्, श्रीमध्वाचार्यस्य अनुग्रहः ते अस्तु इति जयसिंहनृपाय आशीर्वादः ३-५
३. १. श्रीमध्वाचार्याणाम् प्रातःप्रभृतिः सायान्हपर्यन्तदिनचर्या निरूपणम् ७-५५
२. मध्ये सूर्योदय वर्णनम् १४-१७
३. अष्ट भावपुष्पसमर्पणम् ३७
४. मध्याह्ने पाठप्रवचनम् ४०-४४
५. सूर्यास्तवर्णनम् ४६-४७
७. चन्द्रोदयवर्णनम् ४८-५५

पञ्चदशः सर्गः

१.	विष्णुमङ्गले श्रीमध्वाचार्यैः भाष्यप्रवचनम्, उपन्यासशैल्याः वर्णनम्	१-८
२.	निरीश्वरसाङ्ख्यमतनिरासः	९-१३
३.	भास्कर-पाशुपत-वैशेषिकादिमतनिरासः	१४-२३
४.	शून्यवादमायावादयोः निरासः	२४-४२
५.	चार्वाकमतनिरासः	४३-४६
६.	मोक्षस्वरूपनिरूपणम्	४७-६४
७.	त्रिविक्रमपण्डितेन वादारम्भः	६५-७१
८.	त्रिविक्रमपण्डितेन श्रीमध्वाचार्याणां ग्रन्थानां महिमावर्णनम्	७२-८५
९.	त्रिविक्रमप्रार्थनया ब्रह्मसूत्रानुव्याख्यानरचना, न्यायविवरणरचना	८६-९०
१०.	विष्णुतीर्थपरिचयः, तन्महिमा च	९१-११४
११.	अनिरुद्धतीर्थ बादरायणतीर्थयोः परिचयः	११५-११९
१२.	पद्मनाभतीर्थानां परिचयः, तेषां वैदुष्यस्य प्रशंसा, तैः सन्न्यायरत्नावली रचना	१२०-१२६
१३.	हृषीकेशतीर्थ नरसिंहतीर्थ वामनतीर्थ रामतीर्थ अधोक्षजतीर्थादि यतिशिष्याणां परिचयः	१२७-१३४
१४.	लिकुच वंशीयानां त्रयाणां अन्येषां च गृहस्थशिष्याणां च परिचयः	१३५-१३९
१५.	सन्मठे चातुर्मासानुष्ठाननिरूपणम्, श्रीमदाचार्यस्तोत्रण सर्गसमाप्तिः	१४०-१४१

षोडशः सर्गः

१.	केन चन शिष्येण श्रीमध्वमहिमा वर्णनम्	१
२.	गोमतीतीरे प्रवचने वेदप्रामाण्यसमर्थनम्	२-६
३.	तुङ्गभद्रातीरे विशाल शिलायाः स्थानान्तरे स्थापनम्	७-९
४.	सूर्यग्रहणकाले समुद्रस्नानम्, समुद्रेण तरङ्गैः श्रीमध्वस्य पादप्रक्षालनम्	१०-१५
५.	समुद्रतीरे उपविश्य एतरेयप्रवचनम्	१६-२४
६.	गण्डवारनाम्नः मल्लस्य पराजयः	२५-२९
७.	कस्यचन वटोः स्कन्धे उपविश्य नृसिंहदेवालय प्रदक्षिणा	३०
८.	पूर्ववाटशिवाग्निप्रभृतीनां पराभवः	३१-३५
९.	पारन्तीदेवालये पूजादिव्यवस्था	३६-३७
१०.	सरिदन्तरग्रामे वृष्टया तटाकपूरणम्	३८-३९
११.	कृष्णामृतमहार्णवग्रन्थरचना, कर्मनिर्णयरचना	४०-४५
१२.	अन्ये केचन महिमानः	४६-४८
१३.	गन्धर्वैः देवताभिश्च श्रीमध्वस्य महिमागानम्	४९-५७
१४.	ऐतरेय प्रवचननिरतस्य श्रीमध्वस्य उपरि गन्धर्वैः देवताभिश्च पुष्पवृष्टिः	५८

॥ श्री वेदव्यासाय नमः ॥

॥ श्रीमदानन्दतीर्थभगवत्पादाचार्यगुरुभ्यो नमः ॥

श्रीमत्कविकुलतिलकनारायणपण्डिताचार्यविरचितः

सुमध्वविजयः

नवमः सर्गः

चोदयन्तमथ गन्तुमादरात्तत्र धर्मजमजं प्रणम्य सः ।
सौख्यतीर्थकविलोकनायको वेदनायकपुरस्सरो ययौ ॥ १ ॥

श्रीविश्वपतितीर्थविरचिता पदार्थदीपिकोद्बोधिका

चोदयन्तमिति ॥ अथ सः । सुखमेव सौख्यं तत्करं तीर्थं शास्त्रं यस्मात् तादृशो यः कविलोकनायकः कवीनां ज्ञानिनां ये लोकाः जनास्तेषां नायकः स्वामी श्रीमध्वाचार्यः । गन्तुं चोदयन्तं प्रेरयन्तम् अजं धर्मजं यमात्मकधर्मप्रजेश्वरजं नारायणं आदरात् भक्तेः 'आदरं भजनं भक्तिरि'त्युक्तेः प्रणम्य । वेदनायकः श्रीवेदव्यासः पुरस्सरः अग्रगामी यस्य तादृशःसन् ययौ । नारायणाश्रमात् व्यासाश्रमं ययौ ॥ १ ॥

श्रीछलारिशेषाचार्यविरचिता मन्दोपकारिणी

श्रीगुरुभ्यो नमः ॥ **चोदयन्तमिति** । वेदव्यासनारायणयोः आज्ञास्वीकारानन्तरम् । नारायणाश्रमे । सः सौख्यतीर्थकविलोकनायकः कवयः पण्डिताश्च ते लोकाः जनाश्च कविलोकाः 'लोकस्तु भुवने जने' इत्यमरः कविलोकानां नायकः अधिपः कविलोकनायकः । 'अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः' इत्यमरः, सौख्यतीर्थः आनन्दतीर्थश्चासौ कविलोकनायकश्च इति तथोक्तः । गन्तुं भूमिं प्रतियातुं चोदयन्तं प्रेरयन्तं धर्मजं धर्मात् जायते इति धर्मजः तं यमपुत्रं अजं श्रीनारायणं आदरात् भक्त्या प्रणम्य ।

वेदनायकपुरस्सरः वेदानां नायकः नेता वेदव्यासः स एव पुरस्सरः अग्रणीः यस्य स तथोक्तः वेदव्यासं पुरस्कृत्य इति भावः । 'पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरस्सराः' इत्यमरः । ययौ नारायणाश्रमात् वेदव्यासाश्रमं प्रति जगाम । 'या प्रापणे' इत्यतो लिट् परस्मैपदम् । सर्गसमाप्तिपर्यन्तं प्रायः रथोद्धतावृत्तं 'रात्परैर्नरलगै रथोद्धता' इत्युक्तेः ॥ १ ॥

आश्रमान्तरमवाप्य कृष्णतः श्राव्यमेष सकलं च शुश्रुवान् ।
चित्तवृत्तिमनुवृत्तिमान् गुरोः साध्ववेत्य गमनोन्मुखोऽभवत् ॥ २ ॥

पदार्थदीपिकोद्बोधिका – आश्रमान्तरमिति । एष श्रीमध्वः । अन्य आश्रमः आश्रमान्तरं श्रीवेदव्यासाश्रममवाप्य गुरोः श्रीव्यासस्य चित्तवृत्तिं साधु सम्यक् यथा भवति तथा अवेत्य ज्ञात्वा । अनुवृत्तिः अस्य अस्ति इति अनुवृत्तिमान् । अनुवृत्तिं कुर्वन् सन् इत्यर्थः । कृष्णतः श्रीव्यासात् सकलं च श्राव्यं श्रोतव्यभागं शुश्रुवान् श्रुतवान् सन् । गमने परावृत्य दक्षिणबदरीं प्रत्यागमने उन्मुखं यस्य तादृशोऽभवत् ॥ २ ॥

मन्दोपकारिणी – आश्रमान्तरमिति ॥ एषः श्रीमध्वः । आश्रमान्तरं अन्यः आश्रमः आश्रमान्तरं तत् वेदव्यासाश्रमं अवाप्य प्राप्य । गुरोः श्रीवेदव्यासस्य चित्तवृत्तिं चित्तस्य मनसः वृत्तिं प्रवृत्तिं साधु सम्यक् अवेत्य ज्ञात्वा । अनुवृत्तिमान् चित्तानुकूलशुश्रूषां कुर्वन् । कृष्णतः वेदव्यासात् 'व्यासार्जुनाग्निहरिकोकिलकाकशूद्रतामिस्रयक्षकलिनीलगुणेषु कृष्णः' इति भास्करः सकलं समस्तं श्राव्यं श्रोतुं योग्यं प्रमेयविशेषं शुश्रुवान् श्रुतवान् सन् गमनोन्मुखः गमने भूमिं प्रति प्रयाणविषये उन्मुखः उद्युक्तः अभवत् ॥ २ ॥

मन्दहासमृदुसुन्दराननं वन्दनीयमभिवन्द्य सत्पतिम् ।
प्राज्ञमौलिमणिरभ्यनुज्ञया तस्य तावदगमन्महामतिः ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – मन्दहास इति ॥ प्राज्ञानां मौलिमणिरिव शिरोमणिरिव, ज्ञानिश्रेष्ठ इत्यर्थः । महती मतिः यस्य तादृशः स श्रीपूर्णप्रज्ञः । मन्दो हासो यस्मिन् तादृशं मृदु सुन्दरम् आननं यस्य तं वन्दनीयं ब्रह्मादिभिः वन्दितुं अर्हं सत्पतिं श्रीवेदव्यासं अभिवन्द्य तस्य अभ्यनुज्ञया तावदगमत् । गमेर्लुङ् ॥ ३ ॥

मन्दोपकारिणी – मन्दहासेति ॥ प्राज्ञमौलिमणिः प्राज्ञानां मौलिमणिः शिरोमणिः श्रेष्ठः । महामतिः पूर्णा प्रज्ञा यस्य सः श्रीमध्वः । मन्दहासमृदुसुन्दराननं मन्दः ईषत् हासः हसनं यस्मिन् तत् । मृदु कोमलं च तत् सुन्दरं च तत् आननं मुखं च मन्दहासं मृदुसुन्दराननं यस्य स तथोक्तः तम् । वन्दनीयं नमस्कर्तुं स्तोतुं च योग्यम् । सत्पतिं सुधियां पतिं ईश्वरं वेदव्यासं 'सन्सुधीः कोविदः' इत्यमरः अभिवन्द्य नमस्कृत्य । तस्य वेदव्यासस्य अभ्यनुज्ञया आज्ञया तावत् अङ्गीकारेणैव 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमरः । अगमत् निर्जगाम । 'गम्लृ गतौ' इत्यतः लुङ् परस्मैपदं अगमत् अगमतां अगमन् ॥ ३ ॥

तस्य वल्लभतमाऽऽस वासभूर्मानसात्पृथुलमानसस्य नो ।
नात्यजत्क्षणमपि ह्यसाविदं नैष नाथविरही ततोऽभवत् ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – तस्येति ॥ तस्य श्रीव्यासस्य । पृथुलं बृहन्मानसं यस्य तस्य श्रीपूर्णप्रज्ञस्य मानसात् मनसोऽन्या वल्लभतमा अतिप्रिया वासभूः आवासस्थानं नो आस । हि यस्मात् तस्मात् असौ श्रीवेदव्यास इदं श्रीमध्वमानसं क्षणं क्षणकालमपि नात्यजत् । तत एष श्रीमध्वः नाथविरहोऽस्यास्तीति नाथविरही नाथवियोगवान् न अभवत् ॥ ४ ॥

मन्दोपकारिणी – तस्येति ॥ तस्य वेदव्यासस्य । हि यस्मात् कारणात् पृथुल-मानसस्य पूर्णप्रज्ञाचार्यस्य मानसात् अन्तःकरणात् अन्येति शेषः । वल्लभतमा अतिशयेन प्रिया वल्लभतमा वासभूः वासस्य आवासस्य भूः स्थानं नो आस न बभूव । ततः तस्मात् असौ श्रीवेदव्यासः इदं श्रीमध्वमानसं क्षणमपि नात्यजत् न त्यक्तवान् । यतो नात्यजत् । ततः एषः श्रीमध्वः नाथविरही नाथस्य स्वस्वामिनः वेदव्यासस्य विरही वियोगवान् न अभवत् । मध्वहृदयापेक्षया अतिप्रियस्य अन्यस्य आवासयोग्यस्थलस्य अभावात् वेदव्यासः मध्वहृदये एव सदा तिष्ठति । अतः मध्वस्य वेदव्यासस्य च वियोगो नास्तीति उक्त्या मध्वः वेदव्यासं ध्यायन्नेव जगाम इति उक्तं भवति ॥ ४ ॥

वीरदृष्टिकृतसिंहविभ्रमः शान्तदृष्टिकृतशान्तसम्मदः ।
तत्र तत्र पथि पथ्यविभ्रमः पर्वतादवततार सर्वधीः ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – वीरेति ॥ वीराणां क्रूरप्राणिनां या दृष्टयः तासां कृतः सिंहविभ्रमो सिंहविलासो येन तादृशः । शान्तया प्रसन्नया दृष्ट्या कृतः शान्तसम्मदः शान्तप्राणिसन्तोषो येन तादृशः । व्याघ्रादिक्रूरप्राणिनां सिंहवद्भयङ्करः, हरिणादिशान्त-प्राणिनां सन्तोषकर इत्यर्थः । एवं तत्र तत्र पथि मार्गे पथ्यस्तत्तदुचितो विभ्रमो विलासो यस्य तादृशः । सर्वा पूर्णा धीर्यस्य तादृशः श्रीपूर्णप्रज्ञः पर्वतात् हिमवतो अवततार ॥ ५ ॥

मन्दोपकारिणी – वीरेति ॥ वीरदृष्टिकृतसिंहविभ्रमः वीराणां क्रूरप्राणिनां दृष्टयः वीरदृष्टीनां कृतः सिंहस्य विभ्रमः विलासो येन स तथोक्तः । क्रूरजन्तूनां सिंहवद्भयङ्कर इति भावः । शान्तदृष्टिकृतशान्तसम्मदः शान्तानां सात्त्विकप्राणिनां दृष्टीनां कृतशान्तसम्मदः साधुप्राणिनां प्रसन्नदर्शनेन सन्तोषकर इति भावः । एवं पथि मार्गे । तत्र तत्र तस्मिन् तस्मिन् स्थलविशेषे । पथ्यविभ्रमः पथ्यः उचितः विभ्रमः विलासो यस्य स तथोक्तः । सर्वधीः सर्वा पूर्णा धीः प्रज्ञा यस्य सः तथोक्तः मध्वः । 'सर्वः पूर्णमिहोच्यते' इत्युक्तेः । पर्वतात् हिमवत्पर्वतात् । अवततार अधः अवारुहत् । 'तॄ प्लवनतरणयोः' इति धातोः लिट् परस्मैपदं ततार तेरतुः तेरुः ॥ ५ ॥

वानरेन्द्र इव तीर्णवारिधिर्वासुदेव इव रत्नराजवान् ।
भीमसेन इव सूनवर्यहृन्निर्वृतिं स्वजनमानिनाय सः ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – वानरेन्द्र इति ॥ स श्रीमध्वः । तीर्णः सीतां दृष्ट्वा पुनरुत्तीर्णो वारिधिः येन स वानरेन्द्रो हनूमान् कपीनिव । अङ्गदादिवानरानिवेत्यर्थः । रत्नराजो रत्नश्रेष्ठोऽस्यास्तीति तादृशः । जाम्बवन्तं जित्वाऽनीतस्यमन्तकाख्य-रत्नश्रेष्ठवानित्यर्थः । वासुदेवः श्रीकृष्णो वसुदेवादियादवानिव । सूनवर्याणि पुष्पश्रेष्ठानि हरतीति तादृशः सौगन्धिकावनात् कुसुमश्रेष्ठहृत् भीमसेनो धर्मजादीनिव । स्वजनमनन्तमठवर्तिनं स्वकीयजनं निर्वृतिं सन्तोषं आनिनाय प्रापयामास ॥ ६ ॥

मन्दोपकारिणी – वानरेन्द्र इति ॥ सः मध्वः । स्वजनं स्वः स्वकीयश्चासौ जनश्च स्वजनः तं मनुष्ययोग्यबदरिकाश्रमे अनन्तमठवर्तिनं निजशिष्यजनं निर्वृतिं सुखं आनिनाय प्रापयामास । 'णीञ् (नी) प्रापणे' इत्यतो लिट् परस्मैपदं निनाय निन्यतुः निन्युः । मध्वः अनन्तमठे सत्यतीर्थादिशिष्यान् संस्थाप्य वेदव्यासाश्रमं प्राप्य कृतकार्यस्सन् पुनरागत्य तान्

अतोषयत् इति भावः । कः कानिव ? तीर्णवारिधिः तीर्णः लङ्घितः वारिधिः समुद्रः येन स तथोक्तः । अङ्गदादिकपीन् तीरे संस्थाप्य सीतादर्शनार्थं समुद्रं उल्लङ्घ्य गत्वा सीतां दृष्ट्वा पुनः लङ्घितसमुद्रः इत्यर्थः वानरेन्द्रः वानराणां कपीनां इन्द्रः स्वामी हनुमान् स्वजनं कपीन् इव । पुनः कः कानिव ? रत्नराजवान् रत्नानां राजा श्रेष्ठः स्यमन्तकमणिः सः अस्ति इति । रत्नराजवान् श्रीकृष्णः यादवान्, जाम्बवतः गुहामुखे संस्थाप्य रत्नार्थं गुहायां स्वयं प्रविश्य जाम्बवन्तं जित्वा तद्दत्तश्यमन्तकमणियुक्तः इत्यर्थः । वासुदेवः वसुदेवस्य अपत्यं पुमान् वासुदेवः श्रीकृष्णः स्वजनं यादवान् इव । पुनः कः कानिव ? सूनवर्यहृत् सूनवर्यं पुष्पश्रेष्ठं हरति आनयति इति सूनवर्यहृत् 'सूनं प्रसवपुष्पयोः' इति विश्वः धर्मादीन् विहाय सौगन्धिकापुष्पार्थं गत्वा सौगन्धिकापुष्पं आनीतवन् इत्यर्थः । भीमसेनः स्वजनं युधिष्ठिरादीन् इव ॥ ६ ॥

अग्निशर्ममुखपञ्चषैर्द्विजैरन्नमाहृतमलं पृथक् समम् ।
कृत्स्नमाददयमित्यविस्मयः कृत्स्नमत्तुमलमेष हि क्षये ॥ ७ ॥

श्रीनारायणपण्डिताचार्यविरचिता भावप्रकाशिका

सर्वेषामपि भक्तानामनुल्लङ्घ्यं क्षणं स्मरन् ।
गमनत्वरितो मध्वः सर्वेभ्योऽपि क्षणं ददौ ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – अग्नीति ॥ अयं श्रीमध्वः । अग्निशर्मनामा कश्चिद्द्विजो मुखं पुरःसरो येषां तादृशाः । पञ्च वा षड् वा पञ्चषाः तैः । 'तस्य पूरण' इति डट् । द्विजैः समं युगपदाहृतं भिक्षार्थं अमरालयं प्रत्यानीतम् । पृथक् प्रत्येकम् आहृतमप्यलं सपरिवारस्य स्वस्य पर्याप्तमन्नं कृत्स्नं सर्वं आदत् बुभुजे । इति विस्मयो न भवति इति अविस्मयः अद्भुतं न भवति । कुत इत्यत आह – कृत्स्नमिति । एष श्रीमध्वः क्षये प्रलये कृत्स्नं सचराचरं सर्वं अत्तुं अलं हि समर्थो हि ।

शीघ्रं जिगमिषुं मध्वं ज्ञात्वा सर्वे समाश्रयन् । अद्यैवाहं करिष्यामीत्येतच्छ्रुत्वा दयापरः । सर्वेषामपि भक्तानां अनुल्लङ्घ्यं क्षणं स्मरन् । गमनं त्वरितो मध्वः सर्वेभ्योऽपि क्षणं ददौ । ते च प्रत्येकमाजह्रुरन्नं सोपस्करं बहु । यथा 'सपरिवारस्य पर्याप्तं स्यादयं पुनः ।
तत्सर्वं बुभुजे मध्वो नैतच्चित्रं समीरणे' ॥ इति श्लोकैः प्रसिद्धोऽयमर्थः ॥ ७ ॥

मन्दोपकारिणी – अग्निशर्मेति ॥ अयं श्रीमध्वः । अग्निशर्ममुखपञ्चषैः पञ्च वा षड् वा पञ्चषाः अग्निशर्माख्यः कश्चित् द्विजः स एव मुखं प्रधानं येषां ते अग्निशर्ममुखाः ते च ते पञ्चषाश्चेति तथोक्ताः तैः द्विजैः विप्रैः पृथक् प्रत्येकं समं युगपत् आहृतं भिक्षार्थं देवालयं प्रत्यानीतं अलं सपरिवारस्य पर्याप्तं 'अलं भूषणपर्याप्तशक्तिवारणवाचकं' इत्यमरः अन्नं कृत्स्नमपि अशेषमपि 'विश्वं अशेषं कृत्स्नं' इत्यमरः आदत् भुक्तवान् । 'अद भक्षण' इत्यतो लङ् परस्मैपदं आदत् आत्तां आदन् इति प्रथमपुरुषैकवचनम् । इति एवं बह्वन्नभोजनं अविस्मयः आश्चर्यं न भवति । कुतः हि यस्मात् एषः मध्वः क्षये प्रलयकाले 'संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि' इत्यमरः कृत्स्नं सर्वं चराचरं जगत् अत्तुं भक्षितुं अलं समर्थः तस्मादिति । अयं भावः-मध्वाचार्यगमनानन्तरं शीघ्रं जिगमिषुं मध्वाचार्यं ज्ञात्वा तत्समीपं आगत्य तद्ग्रामस्थाः ब्राह्मणाः सर्वेऽपि भोः! स्वामिन् अद्यैव अहं भिक्षां दास्यामीति श्रीमध्वस्य एकस्मिन्नेव काले भिक्षार्थं निमन्त्रणं चक्रुः । तच्छ्रुत्वा श्रीमध्वः सर्वेषामपि भक्तानां अनुल्लङ्घ्यत्वात् गमने त्वरावान् तदङ्गीचकार । ततश्च सर्वेऽपि प्रत्येकं प्रत्येकं सपरिवारस्य पर्याप्तं सोपस्करं अन्नं युगपदानीतवन्तः । श्रीमध्वस्तु तत्सर्वं बुभुजे । इदं सर्वं जगद्रक्षके वायौ अद्भुतं न भवतीति भावः ॥ ७ ॥

व्यासदेवहृदयातिवल्लभं वासुदेवमगणेयसद्गुणम् ।
साधयत् सकलदोषवर्जितं ज्ञानभक्तिदमनन्तसौख्यदम् ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – व्यासेति ॥ अनन्तधीः श्रीपूर्णप्रज्ञः । व्यासश्चासौ देवश्च तस्य हृदयस्य मनसः अतिवल्लभं अतिप्रियम् । व्यासेन स्वसूत्रेषु अभिप्रेतस्य अभिप्रायस्य अनुकूलमिति वा । श्रीमध्वप्रणीतभाष्ये हि सूत्राभिप्रायः सम्यग्विवृतः । आत्मनो रूपञ्च व्यासदेवहृदयातिवल्लभम् । वासुदेवं श्रीहरिम् । अगणय्याः गणयितुमशक्याः सद्गुणा यस्य तम्। सकला ये दोषाः तैः वर्जितं, साधयत् । अगणितसाधुगुणः सकलदोषवर्जितो हि भगवान् भाष्ये प्रतिपाद्यते । आत्मनस्स्वरूपमपि एतादृक् इति भावः । ज्ञानञ्च भक्तिञ्च ददातीति तथोक्तं श्रीमध्वस्वरूपमपि तथा । सुखमेव सौख्यम् । अनन्तं नित्यं यत्सौख्यं तद्ददातीति तथोक्तम् । मोक्षदमित्यर्थः । स्वयमप्यनन्तसौख्यमोक्षदः । 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया' इति वचनात् । अद्भुतं ब्रह्मसूत्रगणभाष्यं आत्मनः स्वस्य अन्यद्रूपमिव देहमिव अतनोत् चक्रे । अन्त्यकुलकमेतत् ॥ ८ ॥

मन्दोपकारिणी – व्यासदेवेति ॥ अनन्तधीः अनन्ता पूर्णा धीः प्रज्ञा यस्य सः श्रीमध्वः । अद्भुतं आश्चर्यकरं ब्रह्मसूत्रगणभाष्यं ब्रह्मसूत्राणां गणः समूहः तस्य भाष्यं व्याख्यानरूपं ग्रन्थं अतनोत् चक्रे । 'तनु विस्तारे' इत्यतो लङ् परस्मैपदं अतनोत् अतनुतां अतन्वन् इति । अन्त्यकुलकमेतत् । किमिव धन्यं गुणपूर्णं आत्मनः स्वस्य अन्यद्रूपमपि देहमिव । कथंभूतं भाष्यं व्यासदेवहृदयातिवल्लभं व्यासदेवस्य वेदव्यासस्य हृदयस्य मनसः अतिवल्लभं अतिप्रियम् । यद्वा व्यासदेवस्य हृदयस्य आकूतस्य अभिप्रायस्य अत्यन्तानुकूलं 'आकूतं हृदये चित्ते' इत्यमरः। वेदव्यासाभिप्रेतसूत्रार्थप्रतिपादकं इति भावः। पुनः कथंभूतं वासुदेवं श्रीनारायणं अगणेयसद्गुणं गणितुं सङ्ख्यातुं शक्याः गणेयाः 'गणनीये तु गणेयं सङ्ख्याते गणितं' इत्यमरः न गणेयाः अगणेयाः सन्तः दोषरहिताश्च ते गुणाः आनन्दादिगुणाश्च सद्गुणाः अगणेयाः सद्गुणाः यस्य स तथोक्तः तम् । सकलदोषवर्जितं सकलाश्च ते दोषाः दुःखाज्ञानादयश्च सकलदोषाः तैः वर्जितं रहितम् । साधयत् भगवन्नारायणः अनन्तगुणपूर्णः सर्वदोषदूरश्चेति प्रतिपादकं इत्यर्थः । पुनः कथंभूतं ज्ञानभक्तिदं श्रीमध्वभाष्यश्रवणव्याख्यानादिना विष्णौ ज्ञानभक्ती भवतः इति भावः । पुनः कथंभूतं अनन्तसौख्यदं अनन्तं नाशरहितं सौख्यं मोक्षं ददातीति अनन्तसौख्यदं श्रीमध्वभाष्यश्रवणादिना जनितहर्षपरोक्षज्ञानेन मोक्षो भवतीति भावः । कथंभूतं आत्मनः रूपं व्यासदेवहृदयस्यातिवल्लभं वेदव्यासस्य आवासयोग्यत्वात्, वासुदेवं अगणेयसद्गुणं सकलदोषवर्जितं साधयत् । मध्वरूपेण भगवतः अनन्तगुणत्वेन निर्दोषत्वेन प्रतिपादनात् ज्ञानभक्तिदम् । मध्वरूपेण शास्त्रोपदेशस्य क्रियमाणत्वात् अनन्तसौख्यदम् । 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया' इति वचनात् मोक्षप्रदं च ॥ ८ ॥

उक्तमुक्तमभिधेयमुत्तमं वेदवाक्यमनुवादयन् मुहुः ।
व्यञ्जयत् स्मृतिवचोभिरञ्जसा तस्य चार्थमतियुक्तयुक्तिमत् ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – उक्तमिति ॥ श्रीमध्वः । उक्तमुक्तमभिधेयमर्थं प्रति मुहुः पुनः पुनर्वेदवाक्यमनुवादयत् । तस्य वेदवाक्यस्य अर्थं च स्मृतिवचोभिः पौरुषेयवाक्यैः अञ्जसा व्यञ्जयत् प्रकटीकुर्वत् । न केवलं स्वोक्तार्थे श्रुतिस्मृत्युदाहरणोपेतं किन्तु, अतियुक्तयुक्तिमत्। अतियुक्ता अत्यन्तमुपपन्ना या युक्तयः ता अस्य सन्तीति तथोक्तम् ।

उत्तमं भाष्यमात्मनोऽन्यद्रूपमिवातनोदित्यन्वयः । अत्र कुलके सर्वाणि विशेषणानि श्रीमध्वस्वरूपपरतयापि योज्यानि ॥ ९ ॥

मन्दोपकारिणी – उक्तमिति ॥ कथंभूतं भाष्यम् । उक्तं उक्तं स्वेन प्रतिपादितं उत्तमं अभिधेयं सूत्राणां अर्थं प्रति मुहुः पुनः पुनः वेदवाक्यं अनुवादयत् । भाष्यं स्वयं उक्तं उक्तं सूत्रार्थं वेदवाक्येन अनुवादयति । स्वोक्तार्थे वेदं प्रमाणयति इति भावः । पुनः किं भूतं तस्य च स्वोदाहृतस्य वेदवाक्यस्यापि अर्थं स्मृतिवचोभिः स्मृतिरूपाणि च तानि वचांसि च स्मृतिवचांसि तैः अञ्जसा सम्यक् व्यञ्जयत् प्रकटीकुर्वत् । पुनः कीदृशं अतियुक्तयुक्तिमत् अतियुक्ताः अत्यन्तं उपपन्नाः युक्तयः अस्य सन्तीति अतियुक्तयुक्तिमत् । न केवलं स्वोक्तार्थे श्रुतिस्मृती उदाहृते किं तु युक्तयोऽपि दर्शिताः इति भावः । मध्वरूपमपि यं अर्थं ब्रूयात् स्वयं तमर्थं श्रुतिस्मृतियुक्तिभिः साधयत् इति ज्ञेयम् ॥ ९ ॥

बालसङ्घमपि बोधयद्भृशं दुर्निरूपवचनं च पण्डितैः ।
अप्रमेयहृदयं प्रसादवत् सौम्यकान्ति च विपक्षभीषणम् ॥ १० ॥

पदार्थदीपिकोद्बोधिका – बालेति ॥ श्रीमध्वः । बालसङ्घमपि मन्दबुद्धिमत्समूहमपि । अत्र बालशब्देन न स्तनन्धया उच्यन्ते किन्तु स्थूलबुद्धिमन्तः । बोधयत् भगवत्स्वरूपं बोधयत् । स्वरूपमप्येतादृशम् । तथा पण्डितैश्च विद्वद्भिरपि दुर्निरूपाणि अस्य वाक्यस्यायमर्थ इति दुर्विज्ञेयानि वचनानि वाक्यानि यस्मिंस्तत् । सममेतत्स्वरूपेऽपि । अप्रमेयं हृदयमभिप्रायो यस्य तत् । प्रसादवत्प्रसन्नशब्दोपेतम् । स्वरूपमप्येतादृशं सर्वजनेष्वनुग्रहकरणात् । सौम्या कान्तिर्यस्य तत् । विपक्षाणां प्रतिवादिनां भीषणं भयङ्करम् । अतिदृढयुक्तियुक्तत्वात् प्रतिवादिभयङ्करमित्यर्थः । स्वरूपमप्येतादृशम् । भाष्यमात्मनोऽन्यद्रूपमिवातनोत् ॥ १० ॥

मन्दोपकारिणी – बालेति ॥ पुनः किंभूतम् । बालसङ्घमपि बालानां जिज्ञासेच्छूनां स्थूलबुद्धीनां सङ्घमपि भृशं सम्यक् बोधयत् । 'गणौघसङ्घसङ्घातव्रातवारकुलोत्कराः' इति हलायुधः । मध्वरूपमपि मन्दमतीन् अपि बोधयति । पण्डितैश्च विद्वद्भिरपि दुर्निरूपवचनं दुर्निरूपाणि ज्ञातुं अशक्यार्थानि वचनानि यस्मिन् तत् तथोक्तम् । भाष्यस्थवचनानां अयं

अस्य वचनस्य अर्थः इति विदुषामपि शीघ्रं दुर्ज्ञेयत्वात् इति भावः । मध्वरूपमपि एतादृशं मध्वोक्तवचनानां विद्वद्भिरपि दुर्ज्ञेयार्थत्वात् । पुनः किंभूतं अप्रमेयहृदयं अप्रमेयं ज्ञातुमशक्यं गम्भीरं हृदयं अभिप्रायः यस्य तत् तथोक्तम् । प्रसादवत् प्रसन्नतायुक्तं मृदुशब्दोपेतं इत्यर्थः । 'प्रसादस्तु प्रसन्नता' इत्यमरः । मध्वरूपमपि अप्रमेयहृदयं गम्भीराभिप्रायं प्रसादवत् मृदुभाषणं सर्वसज्जनेषु अनुग्रहवत् । सौम्यकान्ति सौम्यानां साधूनां कान्तिः इच्छा यस्मिन् तत् तथोक्तम् । कमु कान्ताविति धातुव्याख्याने कान्तेः इच्छार्थत्वस्य प्रसिद्धार्थत्वात् सज्जनापेक्षणीयं इति भावः । यद्वा सौम्या आपाततः शान्ता कान्तिः आकारो यस्य तत् तथोक्तं तादृशमपि । विपक्षभीषणं विपक्षाणां कुवादिनां भीषणं भयंकरं आपाततः सौलभ्येन प्रतीयमानस्वरूपमपि अतिदृढयुक्तियुक्तत्वेन दुर्वादिनां भयंकरं इति भावः । मध्वरूपमपि एतादृशमेव ॥ १० ॥

अस्तदूषणमवन्ध्यभाषणं लक्षितं सकललक्षणैः समम् ।
माननीयमपि नाकिनायकैः रूपमन्यदिव धन्यमात्मनः ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – अस्तेति ॥ श्रीमध्वः । अस्तानि निरस्तानि दूषणानि अपशब्दादिदोषा यस्मात् तत् । स्वरूपञ्च कामादिदोषरहितम् । अवन्ध्यानि अनिष्फलानि भाषणानि यस्मिंस्तत् । स्वरूपञ्च सत्यभाषणम् । सकललक्षणानि समस्तलक्षणानि तैः । 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः' इत्युक्तभाष्यलक्षणैस्समं सह लक्षितं लक्षणवत्तया वर्णितम् । स्वरूपञ्च द्वात्रिंशल्लक्षणोपेतम् । नाकिनायकैरपि देवश्रेष्ठैरपि माननीयम् । स्वरूपमप्येतादृशम् । धन्यं पुण्यवद्भाष्य-मात्मनोऽन्यद्रूपमिवातनोत् ॥ ११ ॥

मन्दोपकारिणी – अस्तेति ॥ अस्तदूषणं अस्तानि निरस्तानि दूषणानि अपशब्दादीनि यस्य तत् तथोक्तम् । मध्वरूपमपि सकलदूषणरहितम् । अवन्ध्यभाषणं अवन्ध्यं अनिष्प्रयोजनं भाषणं वचनं यस्य तत् तथोक्तम् । भाष्ये यद्यदुच्यते तत्सर्वमपि आवश्यकत्वेन सार्थकमेव इति भावः । मध्वरूपमपि अवन्ध्यभाषणं सत्यभाषणम् । सकललक्षणैः सकलानि च तानि लक्षणानि च सकललक्षणानि तैः । 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः' इत्युक्तभाष्यलक्षणैः

इत्यर्थः । समं लक्षितं युक्तं एकेनापि लक्षणेन न्यूनं न भवतीति भावः । मध्वरूपमपि सकलैः द्वात्रिंशल्लक्षणैः समं लक्षितम् । नाकिनायकैरपि नाकिनां देवानां नायकैः श्रेष्ठैः अपि माननीयं बहुमानं कर्तुं योग्यम् । मध्वरूपमपि एतादृशम् ॥ ११ ॥

एकविंशतिकुभाष्यदूषकं ब्रह्मसूत्रगणभाष्यमद्भुतम् ।
अप्यदूष्यमतनोदनन्तधीः भूतभाविभवदात्मभिः क्वचित् ॥ १२ ॥

भावप्रकाशिका – भारतीविजय-संविदानन्द-ब्रह्मघोष-शतानन्द-उद्वर्त-विजय-रुद्रभट्ट-वामन-यादवप्रकाश-रामानुज-भर्तृप्रपञ्च-द्रविड-ब्रह्मदत्त-भास्कर-पिशाच-वृत्तिकार-विजयभट्ट-विष्णुक्रान्त-वादीन्द्र-माधवदास-सङ्करकृतान्येकविंशतिकुभाष्याणि ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – एकेति ॥ अनन्ता धीः ज्ञानं यस्य स श्रीपूर्णप्रज्ञः । एकाधिका विंशतिः एकविंशतिः तावत्संख्याकानि यानि कुभाष्याणि अन्यवादिभिः कृतकुत्सितभाष्याणि तेषां दूषकम् । तानि च 'भारतीविजयश्चैव संविदानन्द एव च । ब्रह्मघोषः शतानन्द उद्वर्तश्चैव पञ्चमः । विजयो रुद्रभट्टश्च वामनाख्यस्तथाष्टमः । सयादव-प्रकाशश्च नवमस्तत्र कीर्तितः । रामानुजस्तथा भर्तृप्रपञ्चो द्रविडस्तथा । ब्रह्मदत्तो भास्करश्च पिशाचो वृत्तिकारकः । तथा विजयभट्टश्च विष्णुक्रान्तस्तथैव च । वादीन्द्रस्तु ततः पश्चात्तत्तो माधवदासकः । ततः पश्चात्सङ्करश्चेत्येकविंशतिवादिभिः । प्रणीतानि निराचक्रे कुभाष्याणि महामतिः' ॥ इति प्रसिद्धानि । भूता अतीता, भाविनो भविष्यन्तः, भवन्तो वर्तमानाः ते च ते आत्मानो जीवास्तैः क्वचिदपि अदूष्यं अद्भुतं ब्रह्मसूत्रगणभाष्यं अतनोत् चक्रे ॥ १२ ॥

मन्दोपकारिणी – एकविंशतीति ॥ पुनः कथंभूतम् । एकविंशतिकुभाष्यदूषकं एकविंशतिसङ्ख्याकानि च तानि कुभाष्याणि कुत्सितभाष्याणि एकविंशतिकुभाष्याणि दूषयति निराकारोतीति तत् तथोक्तम् । ब्रह्मवादिभिः ब्रह्मसूत्राणां यानि भाष्याणि कृतानि सन्ति तानि सर्वाणि मध्वभाष्ये निराकृतानि भवन्तीति भावः । मध्वरूपमपि एतादृशमेव । एकविंशतिभाष्याणि च उच्यन्ते– 'भारतीविजयश्चैव संविदानन्द एव च । ब्रह्मघोषः शतानन्द उद्वर्तश्चैव पञ्चमः । विजयो रुद्रभट्टश्च वामनाख्यस्तथाष्टमः । सयादवप्रकाशश्च नवमस्तत्र कीर्तितः । रामानुजस्तथा भर्तृप्रपञ्चो द्रविडस्तथा । ब्रह्मदत्तो भास्करश्च पिशाचो

वृत्तिकारकः । तथा विजयभट्टश्च विष्णुक्रान्तस्तथैव च । वादीन्द्रश्च तथा पश्चात् ततो माधवदासकः । ततश्च सङ्करश्च स्यादेकविंशतिवादिभिः । प्रणीतानि निराचक्रे कुभाष्याणि महामतिः ॥' पुनः कथंभूतम् । भूतभाविभवदात्मभिः भूताः अतीताः भाविनः भविष्यन्तः भवन्तः वर्तमानाः भूताश्च भाविनश्च भवन्तश्च इति भूतभाविभवन्तः ते च ते आत्मानः जीवाश्च भूतभाविभवदात्मानः तैः । 'आत्मा जीवे धृतौ देहे' इति विश्वः । क्वचिदपि भाष्योक्तेः यस्मिन्नपि प्रमेये अदूष्यं दूषयितुं अशक्यं केनापि पुरुषेण कदापि क्वाचिदपि दूषयितुं अशक्यमिति भावः ॥ १२ ॥

गाङ्गमङ्गलतरङ्गभङ्गदप्रान्तसुश्रिहरिवेश्मकृत्समः ।
यद्गतैकतमवर्णलेखकः सत्यतीर्थ इह भाष्यमालिखत् ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – गाङ्गेति ॥ इह श्रीमद्भाष्यनिर्माणसमये । सत्यतीर्थयतिः ॥ यत् भाष्यं, तत्र गतो यद्गतः, य एकतमवर्णः एकोऽपि वर्णस्तस्य लेखकः पुरुषः । गङ्गायाः सम्बन्धिनो गाङ्गाः तादृशा ये मङ्गलतरङ्गाः शोभनतरङ्गाः तेषां भङ्गं नाशं ददातीति तादृशो यः प्रान्तः तीरं तस्मिन् शोभना श्रीर्यस्य तत् सुश्रि । 'ह्रस्वो नपुंसके प्रातिपदिकस्ये'ति ह्रस्वः । तादृशं यद्धरिवेश्म तत्करोतीति तादृशस्तस्य समः सदृशः । गङ्गातीरे शोभनहरि-मन्दिरनिर्माणेन यत्सुकृतं, तद्भाष्यगतैकतमाक्षरलेखनेन भवेदिति भावः । एतादृशं भाष्यं आदौ सत्यतीर्थः आलिखत् ॥ १३ ॥

मन्दोपकारिणी – गाङ्गेति ॥ यद्गतैकतमवर्णलेखकः यस्मिन् गताः यद्गताः तेषु एकतमः अन्यतमश्चासौ वर्णः अक्षरं च तस्य लेखकः पुरुषः । भाष्यगताक्षरमध्ये यस्य कस्यचित् एकस्यापि अक्षरस्य लेखनं कुर्वन् इत्यर्थः । गाङ्गमङ्गलतरङ्गभङ्गद-प्रान्तसुश्रिहरिवेश्मकृत्समः गङ्गायाः भागीरथ्याः इमे गाङ्गाः मङ्गलाः पुण्यकराः मङ्गलाश्च ते तरङ्गाश्च मङ्गलतरङ्गाः गाङ्गाश्च ते मङ्गलतरङ्गाश्च गाङ्गमङ्गलतरङ्गाः तेषां भङ्गं नाशं ददातीति भङ्गदः स चासौ प्रान्तश्च भङ्गदप्रान्तः तस्मिन् तीरे इत्यर्थः । सु शोभना श्रीः कान्तिः यस्य तत् । 'ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः' । सुश्रि च तत् हरेः वेश्म च तत्करोतीति कृत् तस्य समः । भागीरथीतीरे विष्णुदेवालयकर्तुः पुरुषस्य यत्पुण्यं भवेत् तत्पुण्यं ब्रह्मसूत्रमहाभाष्यगतैकाक्षरलेखकस्य भवेत् । एतादृशपुण्यप्रदं भाष्यं

मध्वकृतसूत्रभाष्यं सम्पूर्णमपि इह भाष्यनिर्माणकाले आदौ सत्यतीर्थः आलिखत् लेखनमकरोत् । 'लिख अक्षरविन्यासे' इत्यतो लङ् परस्मैपदम् ॥ १३ ॥

तत्र देवमभिवन्द्य यातवान् स्वामिनो वचनगौरवाद् द्रुतम् ।
सानुगो विविधभूरतीत्य गोदावरीतटमगादलेशधीः ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – तत्रेति ॥ तत्रानन्तमठे देवं श्रीनारायणमभिवन्द्य स्वामिनो नारायणस्य वचनगौरवात् वचने बहुमानात् । 'अविलम्बितं व्रजे'रिति नारायणवचन-गौरवादित्यर्थः । द्रुतं यातवान् । अलेशा पूर्णा धीर्यस्य स श्रीपूर्णप्रज्ञः । सानुगः सपरिवारः सन् विविधभूः नानादेशान् अतीत्य गोदावरीतटम् अगात् प्राप्तः । अत्र विविधभूरिति महाकविप्रयोगत्वात्साधुः । मितद्वादित्वात्कर्तरि डुप्रत्ययान्तो वा । भूरित्यव्ययं वा ॥ १४ ॥

मन्दोपकारिणी – तत्रेति ॥ तत्र बदरिकाश्रमस्थाने मठे नरनारायणं अभिवन्द्य नत्वा। स्वामिनः प्रभोः श्रीनारायणस्य वचनगौरवात् वचने 'अवलम्बितं व्रजेः, इति वचने गौरवात् बहुमानात् द्रुतं शीघ्रं यातवान् । तस्मात् देशात् निर्गतः सन् अलेशधीः अल्पा न भवतीति अलेशा अलेशा धीः प्रज्ञा यस्य स तथोक्तः मध्वाचार्यः सानुगः अनुगैः परिवारैः शिष्यैः सहितः सन् विविधभूः विविधाश्च ताः भुवश्च विविधभुवः ताः विविधभूः नानादेशान् अतीत्य अतिक्रम्य गोदावर्याः नद्याः तटं तीरं अगात् गतवान् । 'गम्लृ गताविति लुङ् परस्मैपदं अगात् अगातां अगुः । ननु विविधभूः इति कथं अचिश्नुधातु-भ्रुवां य्वोरियङुवङावितिं उवङि विविधभुव इति स्यात् इति चेत् न नायं धातूकारः येन उवङि भुव इति स्यात् किन्तु भूधातोः औणादिके ऊ प्रत्यये टिलोपेन धातूकारस्य लोपात् प्रत्ययोकारस्योवङादेशप्राप्त्यभावात् भूधातोरौणादिक ऊ प्रत्ययः । तथा च भूं, भ्वौ, भूः इति वधूशब्दवत् रूपं ज्ञेयम् । न भूसुधियोरिति यण्निषेधस्तु एरनेकाच इत्यस्यैव न तु इको यणचीत्यस्येति ज्ञेयम् ॥ १४ ॥

प्राज्ञवित्तमयमाप्तुमागतैः पण्डितैर्द्विनवशाखिभिः श्रुतीः ।
प्रस्तुता अभिदधौ परीक्षकैः षट् च तत्र समयानखण्डयत् ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – प्राज्ञेति ॥ अयं श्रीपूर्णप्रज्ञाचार्यः । तत्र गोदावरीतटे प्राज्ञैः लभ्यं वित्तं प्राज्ञवित्तम् । विद्याधिक्यतारतम्येन लभ्यमित्यर्थः । आप्तुमागतैः, द्वे च ते नव च द्विनव शाखा येषां सन्तीति तैः । द्विनवशाखाभिज्ञैरित्यर्थः । परीक्षकैः पण्डितैर्विद्वद्भिः प्रस्तुता सूक्तखण्डादिमूलोच्चारणादिना प्रस्तुताः श्रुतीः अभिदधौ । पाठतोऽर्थतश्चाभिदधौ । षट् षट्संख्याकान् समयान्, भाट्ट-प्राभाकर-वैशेषिक-नैयायिक-बौद्ध-चार्वाक-सिद्धान्तान् । 'समयाः शपथाचारकालसिद्धान्तसंविद' इत्यमरः । अखण्डयत् निराचक्रे ॥ १५ ॥

मन्दोपकारिणी – प्राज्ञेति ॥ अयं श्रीमध्वः तत्र गोदावरीतीरे प्राज्ञवित्तं प्राज्ञानां पण्डितानां वित्तं धनं विदुषां वादे सति विद्याधिक्यतारतम्येन लभ्यं द्रव्यं इत्यर्थः । 'वित्तं वस्तु वसु द्रव्यं स्वार्थं राद्रविणं धनं' इति धनञयः । आप्तुं लब्धुं आगतैः द्विनवशाखिभिः द्वौ च ते नव च द्विनव अष्टादश इत्यर्थः । द्विनवशाखाः ऋगादिशाखाः येषां सन्तीति द्विनवशाखिनः तैः पाठतः अर्थतश्च अष्टादशशाखाभिज्ञैः इति यावत् । परीक्षकैः स्वात्मानं परीक्षयद्भिः पण्डितैः विद्वद्भिः प्रस्तुताः श्रुतीः वेदान् अभिदधौ अब्रवीत् । 'डु धाञ् धारणपोषणयोः' इति धातोः लिट् परस्मैपदं दधौ दधतुः दधुः । स्वात्मानं परीक्षणार्थे विद्वद्भिः यद्यत् सूक्तं खण्डं वा पठितं तत्सर्वं तैः सह स्वयमपि पपाठ । अथवा उच्चारणादिविषये यद्यत्पृष्टं तत्सर्वं अवोचत् इति भावः । तथा षट्सङ्ख्यान् समयान् सिद्धान्तांश्च अखण्डयत् निराचक्रे । 'खडि भेदने' इत्यतो लङ् परस्मैपदम् । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । षण्मतानि तु भाट्टप्राभाकरवैशेषिक-नैयायिकबौद्धचार्वाकसम्बन्धीनि इति ज्ञेयम् ॥ १५ ॥

ते पृथक् पृथगमुं स्वशाखया दर्शनेन च परीक्ष्य निर्जिताः ।
सर्ववित् त्वमसि मुख्यतः कवे नास्ति ते सदृश इत्यथाब्रुवन् ॥ १६ ॥

पदार्थदीपिकोद्बोधिका – त इति ॥ ते द्विजाः । अमुं श्रीमध्वं पृथक् पृथक् प्रत्येकं स्वशाखया स्वस्वशाखयेत्यर्थः । दर्शनेन स्वस्वसिद्धान्तेन परीक्ष्य निर्जिताः पराजिताः सन्तः । अथ कवे! ज्ञानिन् श्रीमध्व! त्वं मुख्यतः सर्ववित् सर्वज्ञोऽसि । ते सदृशो नास्तीत्यब्रुवन् ॥ १६ ॥

मन्दोपकारिणी – त इति ॥ ते विद्वांसः अमुं मध्वाचार्यं पृथक् पृथक् प्रत्येकं स्वेषां शाखया येन येन या याः शाखाः अधीताः तेन तेन तास्ता शाखाः । दर्शनेन च स्वस्वशास्त्रेण च येन येन यद्यत् शास्त्रं अधीतं तेन तेन पुरुषेण तेन तेन शास्त्रेण इत्यर्थः । परीक्ष्य परीक्षां कृत्वा निर्जिताः सन्तः । अथ सर्वेऽपि ते, हे कवे! पण्डित! त्वं मुख्यतः उपचारं विना सर्ववित् सर्वं वेत्तीति सर्ववित् सर्वज्ञः असि भवसि । 'अस भुवि' इत्यतो लट् परस्मैपदं असि स्थः स्थ । ते तव सदृशः समानः नास्ति इति अब्रुवन् । 'ब्रूञ् व्यक्तायां वाची'त्यतो लङ् परस्मैपदं अब्रवीत् अब्रूतां अब्रुवन् ॥ १६ ॥

यस्त्रयीसकलपक्षशिक्षकस्तत्र संसदि वरिष्ठसम्मतः ।
शोभनोपपदभट्टनामकः पूर्णसंख्यमनमन्मुहुर्मुदा ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – य इति ॥ त्रय्याः वेदस्य सकलपक्षाणां सकलदर्शनानां शिक्षकः । वैदिकसिद्धान्तानां विप्रतिपत्तौ सत्यां इदमेव इति निर्णेतेत्यर्थः । तत्र संसदि तस्यां सभायां वरिष्ठ इत्ययमेव श्रेष्ठ इति सम्मतः सर्वेषां सम्मतः । यद्वा वरिष्ठस्य श्रीमध्वस्य सम्मतः, प्रियो यः शोभनोपपदभट्टनामकः, शोभनोपपदं भट्ट इति नाम यस्य तादृशः । पूर्णा संख्या ज्ञानं यस्य तं श्रीमध्वं मुदा मुहुरनमत् ॥ १७ ॥

मन्दोपकारिणी – शास्त्रिषट्कपराजयानन्तरं पद्मनाभतीर्थागमने उपोद्घातं वक्ति ॥ **य इति** ॥ शोभनोपपदभट्टनामकः शोभन इति उपपदं यस्य तत् भट्ट इति नाम शोभनोपपदं भट्टनाम यस्य सः । स्वार्थे 'क' प्रत्ययः । पूर्णसङ्ख्यं पूर्णा सङ्ख्या प्रज्ञा यस्य स तथोक्तः । 'चर्चा सङ्ख्या विचारणा' इत्यमरः । मुहुः भृशं मुदा हर्षेण बहुसन्तोषेण इत्यर्थः । मुहुः सद्यः तदैवेति यावत् । मुहुः पुनः पुनः आदरेण इत्यर्थः । एवं अर्थत्रयपरत्वेन मुहुःपदं आवृत्य व्याख्येयम् । 'पौनःपुन्ये भृशार्थे च सद्योर्थे च मुहुःपदं' इति भास्करः । अनमत् नमस्कृतवान् । 'णमु प्रह्वत्वे शब्दे च' इति धातोः लङ् परस्मैपदम् । स कः यः शोभनभट्टः त्रयीसकलपक्षशिक्षकः सकलाः समस्ताश्च ते पक्षाश्च सकलपक्षाः त्रय्याः वेदस्य सकलपक्षाणां लक्षणानां सिद्धान्तानां च शिक्षकः विप्रतिपत्तौ सत्यां इत्थमेवेति निर्णयकर्त्तेत्यर्थः । 'श्रुतिः स्त्री वेद आम्नायस्त्रयी'त्यमरः । तत्र तस्यां सदसि सभायां तदा मिलितविद्वत्समूहे इत्यर्थः । वरिष्ठसंमतः पण्डितानां मध्ये अयमेव

वरिष्ठः श्रेष्ठः इति सर्वैः संमतः निश्चितः अभूत् सः इत्यर्थः । तत्र मिलितविद्वत्सभामध्ये श्रेष्ठत्वेन संमतः शोभनभट्टः वेदशास्त्रेषु सम्यक् मध्वाचार्यं परीक्ष्य पराभूतः सन् अयमेव विचारपूर्वकं निर्णयकर्तृषु सर्वज्ञः अस्मात् विशेषं ज्ञास्यामीति भावेन महासन्तोषेण आदरेण ननाम इति भावः ॥ १७ ॥

यस्तु तार्किकशिखामणिः सुधीर्वर्तमानसमयान् निराकरोत् ।
वेदभारतपुराणनिष्ठितो भाष्यमेतदशृणोत् स मध्वतः ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – य इति ॥ तार्किकशिखामणिः तार्किकोत्तमः सुधीः शोभनबुद्धिर्यः शोभनभट्टः । वर्तमानसमयान् तत्काले विद्यमानभाट्टादिसिद्धान्तान् निराकरोत् निराचक्रे । वेदाश्च भारतञ्च पुराणानि च तेषु निष्ठितो निरतः । वर्तमानसमयेषु अन्यतमपक्षपातं विहाय वेदभारतपुराणोक्ताचारोपासनेषु निरत इत्यर्थः । स शोभनभट्ट एतत् श्रीमध्वकृतं भाष्यं ब्रह्मसूत्रगणभाष्यं मध्वतः श्रीमध्वाचार्यात् अशृणोत् ॥ १८ ॥

मन्दोपकारिणी – यस्त्विति ॥ तार्किकशिखामणिः तार्किकाणां युक्तियुक्त-विचारपूर्वकनिर्णयकर्तृणां शिखामणिः श्रेष्ठः सुधीः पण्डितः यः शोभनभट्टः वर्तमानसमयान् तस्मिन् काले विद्यमानान् सर्वसिद्धान्तान् निराकरोत् । 'डु कृञ् करणे' इत्यतो लङ् परस्मैपदं अकरोत् अकुरुतां अकुर्वन् । तर्हि स्वसिद्धान्तः क इत्यत आह वेदेति । वेदभारतपुराणनिष्ठितः वेदाश्च भारतं च पुराणानि च तेषु तदुक्ताचारेषु तदुक्तोपासनेषु च निष्ठितः निरतः अभूत् । मध्वशास्त्रोत्पत्तेः पूर्वं विद्यमानभाट्टादिसर्वमतानि तत्र पक्षपातं विहाय स्वबुद्ध्या विचार्य युक्तिभिः निराकृत्य स्वयं वेदाद्युक्तप्रकारेण अनुष्ठाननिरत इति भावः । एवं सः शोभनभट्टः मध्वतः श्रीमध्वाचार्यात् एतत् श्रीमध्वाचार्यकृतं भाष्यं ब्रह्मसूत्रभाष्यं अशृणोत् शुश्राव । 'श्रु श्रवणे' इत्यतो लङ् परस्मैपदं अशृणोत् अशृणुतां अशृण्वन् । शोभनभट्टः मध्वशिष्यो भूत्वा ब्रह्मसूत्रभाष्यं अधीतवान् इति भावः ॥ १८ ॥

नापरेषु रतिमाययौ क्वचिद्भाष्यमद्भुतमिदं स शुश्रुवान् ।
नारविन्दमकरन्दमाप्तवानच्छपिच्छ इव वाञ्छतीतरत् ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ स शोभनभट्टः । अद्भुतमिदं भाष्यं शुश्रुवान् श्रुतवान् सन्, अरविन्दस्य मकरन्दं पुष्परसं 'मकरन्दः पुष्परस' इत्यमरः आप्तवान् प्राप्तवान्, अच्छौ श्वेतौ पिच्छौ छदौ यस्य तादृशः हंस इत्यर्थः । इतरत् अन्यत् पुष्पमधु न वाञ्छति नेच्छतीव। 'वाञ्छ इच्छायां लट्' । अपरेषु इतरेषु शास्त्रेषु क्वचिद्रतिं सुखं नाययौ । हंसोऽरविन्दमकरन्दमास्वाद्य मधु यथा न वाञ्छति तद्वत् अयं श्रीमध्वभाष्यादन्यत्र शास्त्रे रतिं न जगामेति भावः ॥ १९ ॥

मन्दोपकारिणी – नापरेष्विति ॥ सः शोभनभट्टः । एतादृशस्य अन्यस्य अभावात् अद्भुतं अत्याश्चर्यं मनस्तुष्टिकरमिति यावत् । इदं भाष्यं शुश्रुवान् श्रुतवान् सन् क्वचित् केष्वपि अपरेषु अन्येषु शास्त्रेषु रतिं सुखं नाययौ न लेभे । 'या प्रापणे' लिट् परस्मैपदम् । अत्र दृष्टान्तमाह ॥ नारविन्देति ॥ अरविन्दमकरन्दं पुष्परसं 'मकरन्दः पुष्परसः' इत्यमरः । आप्तवान् अनुभूतवान् । अच्छपिच्छः अच्छं श्वेतं पिच्छं पक्षः यस्य स तथोक्तः । 'पिच्छबर्हे नपुंसकः' इत्यमरः हंसपक्षी इत्यर्थः । इतरत् अन्यपुष्पमधु यथा न वाञ्छति तद्वत् इति भावः । 'वाञ्छ इच्छायामि'त्यतो लट् परस्मैपदम् ॥ १९ ॥

तत्र तत्र स सभासु भासुरो नन्दितीर्थसमयोक्तयुक्तिभिः ।
वादिनो विशकलय्य तान् समाक्रम्य वाचमुचितामुदाहरत् ॥ २० ॥

पदार्थदीपिकोद्बोधिका – तत्रेति ॥ भासुरः शोभमानः स शोभनभट्टः तत्र तत्र सभासु वादिनः कुवादिनः । नन्दयतीति नन्दि आनन्दकारणं तीर्थं शास्त्रं यस्य तस्य समये शास्त्रे उक्ताभिः युक्तिभिः विशकलय्य निराकृत्य तान् स्वनिराकृतान् वादिनः समाक्रम्य अगणय्य उचितां सभायोग्यां वाचमुदाहरत् ॥ २० ॥

मन्दोपकारिणी – तत्रेति ॥ तत्र तत्र तासु तासु सभासु विद्वत्सभासु भासुरः शोभनः सः शोभनभट्टः वादिनः कुवादिनः नन्दतीर्थसमयोक्तयुक्तिभिः नन्दतीर्थस्य श्रीमदानन्द-तीर्थस्य समये शास्त्रे उक्ताभिः युक्तिभिः विशकलय्य निराकृत्य तान् निराकृतान् वादिनः समाक्रम्य अविगणय्य उचितां सभानुकूलां वाचं उदाहरत् अब्रवीत् । उत्, आङ्, पूर्वात् 'हृञ् हरणे' इत्यतो धातोर्लङ् परस्मैपदं अहरत् अहरतां अहरन् ॥ २० ॥

चूर्णकृद्विविधशङ्खचूर्णकश्चूर्णनाय बहुधाऽप्यशक्नुवान् ।
अत्यजद्विफलधीः प्रदक्षिणावर्तवारिजमनर्घ्यमप्यहो ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – वक्ष्यमाणार्थे दृष्टान्तमाह–**चूर्णकृदिति** ॥ विविधा उच्चावचत्वेन नानाविधा ये शङ्खाः तेषां चूर्णं करोतीति तादृशः चूर्णकृत् ताम्बूलचर्वणाङ्ग-चूर्णकृत् कश्चित्पुरुषः । न विद्यतेऽर्घो मूल्यं यस्य तदनर्घमपि । प्रदक्षिण आवर्तो यस्य तत्प्रदक्षिणावर्तं यद्वारिजं शङ्खः । बहुधापि मूषाग्निनिक्षेपादिनानाविधप्रयत्नेनापि चूर्णनाय चूर्णीकरणाय अशक्नुवन् सन् असमर्थः सन् अत एव विगतं फलं चूर्णलक्षणं प्रयोजनं यस्य तद्विफलम् । विफलमिति धीर्बुद्धिर्यस्य तादृशः सन् अत्यजत् परित्यक्तवान् । अहो ! सर्वैश्वर्यकारणं प्रदक्षिणावर्तशङ्खं परित्यजतोऽस्य मौढ्यम् अत्याश्चर्यमिति भावः ॥ २१ ॥

मन्दोपकारिणी – चूर्णेति ॥ विविधशङ्खचूर्णकः विविधाः नानाप्रकाराः स्थूलसूक्ष्माः इत्यर्थः विविधाश्च ते शङ्खाश्च विविधशङ्खाः तान् चूर्णयतीति चूर्णकः । चूर्णकृत् चूर्णं ताम्बूलचर्वणाङ्गं चूर्णं करोतीति चूर्णकृत् कश्चित् पुरुषः । अनर्घ्यमपि न अर्घः मूल्यं यस्य सः अनर्घः अनर्घस्य अयं अनर्घ्यः 'मूल्ये पूजाविधावर्घः' इत्यमरः । तादृशमपि प्रदक्षिणावर्तवारिजं प्रदक्षिणावर्तनामकश्चासौ वारिजश्च प्रदक्षिणावर्तवारिजः 'अब्जौ शङ्खशशाङ्कौ च' इति अमरोक्तेः । अब्जवारिजशब्दयोः एकार्थत्वात् वारिजशब्दस्य शङ्खोऽर्थः दक्षिणावर्तशङ्खमित्यर्थः । अत्यजत् परित्यक्तवान् । 'त्यज विसर्गे' इत्यतो लङ् परस्मैपदं अत्यजत् अत्यजतां अत्यजन् । कथंभूतः सन् बहुधापि अग्नौ स्थाप्य अग्निदाहादिनानाविधप्रयत्नेनापि चूर्णनाय पिष्टं कर्तुं अशक्नुवन् असमर्थः सन् । अत एव विफलधीः विफला निष्फलत्वविषयिणी बुद्धिः यस्य स तथोक्तः निष्फलमेतत् इति बुद्धिः इत्यर्थः । अहो आश्चर्यं एतस्य मौढ्यं इति भावः ॥ २१ ॥

अप्रमेयमतिशास्त्रमीदृशं यस्त्यजत्युपनतं सुदुर्लभम् ।
तस्य तुल्यमतिरेष दुर्जनो नाथवाऽस्य सुदृशोऽस्ति नीचधीः ॥ २२ ॥

एवं दृष्टान्तमभिधाय दार्ष्टन्तिकमाह-

पदार्थदीपिकोद्बोधिका – अप्रमेयमिति । यः पुरुषः उपनतं सत्संसर्गादिवशात् प्राप्तं सुदुर्लभं भाग्यरहितानां अतिदुर्लभं ईदृशं प्रदक्षिणावर्तशङ्खसदृशम् । अप्रमेया मतिर्यस्य तस्य श्रीपूर्णप्रज्ञस्य शास्त्रं त्यजति पुरुषार्थप्रदं न भवतीति बुद्ध्या परित्यजति एषः दुर्जनः तस्य शङ्खं त्यक्तवतः, तुल्यमतिः सदृशबुद्धिः । अथवा इति पक्षान्तरसूचकम् । अस्य श्रीमध्वशास्त्रं त्यजतः सदृशो नीचधीः निकृष्टबुद्धिः नास्ति ॥ २२ ॥

मन्दोपकारिणी – एवं वक्ष्यमाणार्थे दृष्टान्तं उक्त्वा दार्ष्टान्तिकमाह **अप्रमेयमिति** ॥ यः पुरुषः उपनतं सत्सङ्गवशात् लब्धं सुदुर्लभं पुण्यरहितानां सु अत्यन्तं सर्वथा प्राप्तुमशक्यं ईदृशं अमूल्यदक्षिणावर्तशङ्खसदृशं अप्रमेयमतिशास्त्रं अप्रमेया अपरिमिता मतिः ज्ञानं यस्य स तथोक्तः पूर्णप्रज्ञाचार्य इत्यर्थः । तस्य शास्त्रं ब्रह्मसूत्रभाष्यादिकं त्यजति इदं शास्त्रं निष्फलमिति ज्ञात्वा विसृजति एषः मध्वशास्त्रत्यागी दुर्जनः । तस्य दक्षिणावर्तशङ्खं त्यक्तवतः पुरुषस्य तुल्यमतिः तुल्या सदृशा मतिः बुद्धिः यस्य स तथोक्तः स्यात् । अथवा इत्यत्र अथशब्दः तुशब्दार्थः । वाशब्दस्तु निश्चयार्थः । तथा च अस्य तु शास्त्रं त्यजतः पुरुषस्य तु सदृशः नीचधीः नीचा मन्दा धीः यस्य स तथोक्तः नास्ति वा नास्त्येव । 'वा अव्ययं स्यात् समुच्चये उपमायां विकल्पे च निश्चये च निगद्यते' इति एकाक्षररत्नमाला । मध्वशास्त्रत्यागी एव अत्यधमः इति भावः॥ २२ ॥

कोऽपि तं गुणविशेषविच्च विक्रीय भूरिधनमाप पूरुषः ।
न ह्यनर्घ्यगुणमूल्यमाप्यते भाग्यदैवमिह योग्यतानुगम् ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – क इति ॥ हि यस्मात्, न विद्यतेऽर्घो मौल्यं यस्य सोऽनर्घः तादृशो गुणो यस्य पदार्थस्यासौऽनर्घ्यगुणः प्रदक्षिणावर्तशङ्खादिः तस्य मौल्यं केनापि पुरुषेण नाप्यते, तस्मात्, गुणस्य प्रदक्षिणावर्तशङ्खगुणस्य विशेषं दाहेऽपि अचूर्णभाव-लक्षणविशेषं वेत्तीति तादृशः कोऽपि कश्चित्पुरुषः तं अनर्घ्यशङ्खं विक्रीय भूरिधनं अपरिमितधनं आप । तथा हि । इह लोके भाग्यस्य अदृष्टविशेषस्य नियामकं दैवं भाग्यदैवं योग्यतानुगं पुरुषयोग्यतानुसारि पुरुषस्य योग्यतामनुसृत्य फलं ददातीति भावः ॥ २३ ॥

मन्दोपकारिणी – क इति ॥ गुणविशेषवित् दक्षिणावर्तशङ्खस्य गुणविशेषं भाग्यप्रदत्वादिरूपगुणातिशयं वेत्ति जानातीति गुणविशेषवित् । इदं वस्तु सत्फलमिति

ज्ञानीति भावः । कोऽपि कश्चित् पुरुषः तं दक्षिणावर्तशङ्खं सम्पाद्य तं विक्रीय अन्यस्मै धनापेक्षया विक्रयं कृत्वा भूरि बहुधनं द्रव्यं आप लब्धवान् । 'आपॢ व्याप्तौ' इत्यतो लिट् परस्मैपदं आप आपतुः आपुः । यद्यपि बह्वेव धनमाप तथापि अपरिमितं नाप इति भावः । तत्कुतः, हि यस्मात् केनापि पुरुषेण अनर्घ्यगुणमूल्यं न विद्यते अर्घो मूल्यं यस्य सः अनर्घः तस्य अयं अनर्घ्यः स चासौ गुणश्च तस्य मूल्यं नाप्यते न लभ्यते । तस्मात् तं विक्रीय स्वलभ्यानुसारेण बहुधनं आप तद्युक्तमेव इत्याह भाग्येति ॥ इह लोके भाग्यदैवं भाग्यस्य अदृष्टविशेषस्य दैवं प्रेरकं दैवतं योग्यतानुगं पुरुषस्य योग्यतां अनुसृत्य गच्छति फलदाने प्रवर्तते इति योग्यतानुगं अदृष्टप्रेरकः नारायणः पुरुषयोग्यतानुसारेणैव फलं ददाति। अतः दक्षिणावर्तशङ्खविक्रेता स्वयोग्यं बह्वेव धनमाप किन्तु न अपरिमितं इति भावः ॥ २३ ॥

व्यक्तमुन्नतिमितोऽप्ययं जनस्तस्य यन्न लभतेऽखिलं फलम् ।
स्तोकमानसतया ततो व्रजेत् तस्य हन्त पुरुषस्य तुल्यताम् ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – व्यक्तमिति ॥ अयं जनः । आत्मन एव परोक्षतया निर्देशः। अहमिति यावत् । व्यक्तं सम्यग्स्वयोग्यतानुसारेणेत्यर्थः । उन्नतिं ज्ञानभक्त्यादिगुणैः आधिक्यं इतोऽपि प्राप्तवान् अपि सन् । स्तोकं स्वल्पं मानसं ज्ञानं यस्य तस्य भावस्तत्ता तया स्वल्पबुद्धितयेत्यर्थः । तस्य श्रीमध्वशास्त्रस्याखिलं सम्पूर्णं फलं ज्ञानलक्षणफलं न लभते न प्राप्नोति इति यत् । ततस्तस्मात् तस्य शङ्खविक्रयणेन भूरिधनमाप्तवतः पुरुषस्य तुल्यतां व्रजेत् । हन्त हर्षे ॥ २४ ॥

मन्दोपकारिणी – एवं दृष्टान्तं उक्त्वा दार्ष्टान्तिकमाह ॥ **व्यक्तमिति** ॥ अयं वर्तमानकालीनः जनः व्यक्तं स्पष्टं यथा भवति तथा सम्यक् इत्यर्थः । उन्नतिं स्वयोग्य-ज्ञानभक्त्यादिगुणैः आधिक्यं इतोऽपि प्राप्तोऽपि सन् । यत् यस्मात् स्तोकमानसतया स्तोकं स्वल्पविषयं मानसं अन्तःकरणं यस्य सः स्तोकमानसः स्तोकमानसस्य भावः स्तोकमानसता तया मन्दबुद्धित्वेन इत्यर्थः । 'स्तोकाल्पक्षुल्लकाः श्लक्ष्णं सूक्ष्मं' इत्यमरः । तस्य श्रीमध्वशास्त्रस्य अखिलं फलं न लभते न प्राप्नोति । 'डु लभष् प्राप्तौ' इत्यतो लडात्मनेपदं लभते लभेते लभन्ते । ततः तस्मात् । तस्य दक्षिणावर्तशङ्खं विक्रीय भूरिधनं

प्राप्तवतः पुरुषस्य तुल्यतां साम्यं व्रजेत् प्राप्नुयात् । हन्त हर्षे । स्वयोग्यतानुसारेण बहुफलस्य लाभात् । 'व्रज गतौ' इत्यतो लिङ् परस्मैपदं व्रजेत् व्रजेतां व्रजेयुः । यद्यपि मध्वशास्त्राभ्यासवतः अधिकारिणः बहुफलं भवति । तथापि तत्साध्यं सम्पूर्णफलं न भवति तादृशयोग्यतायाः अभावात् इति भावः ॥ २४ ॥

क्रीतवान् नरपतिर्महादरं सादरं पुनरुदारचेष्टितः ।
अर्चयन् सततमाप सम्पदो या न ता वचनचित्तगोचराः ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – क्रीतवानिति ॥ महान् पूज्यो यो दरः शङ्खः तम् । प्रदक्षिणावर्तशङ्खमित्यर्थः । क्रीतवान् धनं दत्वा स्वीकृतवान् । उदारमुत्तमं चेष्टितं व्यापारो यस्य तादृशो नरपती राजा पुनः सादरं बहुमानेन सहितं यथा तथा सततं अर्चयन् पूजयन् सन् याः सम्पद आप ताः सम्पदः वचनचित्तयोः वाङ्मनसयोः गोचराः विषयाः न ॥ २५ ॥

मन्दोपकारिणी – क्रीतवानिति ॥ उदारचेष्टितः उदाराणि महान्ति उत्तमानीति यावत् चेष्टितानि कर्माणि यस्य स तथोक्तः विष्णुवैष्णवप्रीतिजनककर्मकर्ता इत्यर्थः । 'उदारो दातृमहतोः' इत्यमरः । नरपतिः नराणां पतिः पालकः राजा महादरं महान् उत्तमश्चासौ दरः शङ्खश्च महादरः दक्षिणावर्तशङ्खः तं क्रीतवान् धनं दत्वा स्वीकृतवान् सन् अनन्तरं सादरं आदरेण भक्त्या सहितं यथा भवति तथा 'आदरो भाजनं भक्तिः' इत्यभिधानम् । सततं निरन्तरं अर्चयन् पूजयन् याः सम्पदः सकलदेशाधिपत्याद्यैश्वर्याणि आप लब्धवान् ताः सम्पदः वचनचित्तगोचराः वचनानि च चित्तानि मनांसि च तेषां गोचराः विषयाः न भवन्ति । कश्चन राजा दक्षिणावर्तशङ्खं आदरेण सम्पाद्य सर्वदा पूजयन् सप्तद्वीपाधिपत्यादिमहाफलं लब्धवानिति भावः ॥ २५ ॥

शास्त्रकल्पकतरोरमुष्य कः प्राप्नुयात् सकलमप्यहो फलम् ।
यस्तमुत्तमगुणं विडम्बयेदित्युदीर्य स जनानरञ्जयत् ॥ २६ ॥

भावप्रकाशिका – कः प्राप्नुयाद्ब्रह्मा च ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – शास्त्रेति ॥ अमुष्य श्रीमध्वप्रणीतस्य शास्त्रकल्पकतरोः शास्त्राख्यकल्पवृक्षस्य सकलं फलं ज्ञानलक्षणं मोक्षलक्षणं वा फलं कः प्राप्नुयात् । न कोऽपि प्राप्नुयात् । अहो! आश्चर्यम् । अपि तथापि यः चतुर्मुखः उत्तमगुणं तं शङ्खं विक्रीय अर्चयन्तं राजानं विडम्बयेत् अनुकुर्यात् । डलयोरभेदः । 'लबि अवस्रंसने' । सः को ब्रह्मा प्राप्नुयात्, सकलं फलं प्राप्नुयादेव । ब्रह्मैव हि सर्वशास्त्रोक्तफलप्राप्तियोग्यः । शङ्खं क्रीत्वा सादरमर्चयतो नरपतेः सम्पदो यथा न वचनचित्तगोचराः, एवमेव एतच्छास्त्रकल्पतरोः अखिलं फलं प्राप्तवतो विरिञ्चस्य सम्पदोऽपीति भावः । स शोभनभट्ट इत्युदीर्य जनान् अरञ्जयत् अतोषयत् । 'रञ्ज रागे' लङ् ॥ २६ ॥

मन्दोपकारिणी – अत्रापि दार्ष्टान्तिकमाह ॥ **शास्त्रेति** ॥ यः कः यः कोऽपि पुरुषः अमुष्य मध्वाचार्यप्रणीतस्य शास्त्रकल्पकतरोः शास्त्रं कल्पकतरुः कल्पवृक्ष इव शास्त्रकल्पकतरुः तस्य अपेक्षिताशेषपुरुषार्थप्रदत्वात् मध्वशास्त्रस्य कल्पवृक्षसाम्योक्तिः सकलमपि सम्पूर्णमपि फलं प्राप्नुयात् । भक्तिपूर्वकश्रवणादिना इति शेषः । सः उत्तमगुणं उत्तमाः गुणाः ज्ञानभक्त्यादयः यस्य स तथा तं उत्तमगुणवन्तं तं राजानं विडम्बयेत् अनुकुर्यात् । महाप्रयत्नेन सम्पादितदक्षिणावर्तशङ्खपूजनेन प्राप्तापरिमितसम्पदो राज्ञः सदृशो भवेत् इति भावः । 'आप्लृ व्याप्तौ' इत्यतो लिङ् परस्मैपदं आप्नुयात् आप्नुयातां आप्नुयुः । विपूर्वात् 'डबि अनुकरणे' इत्यतो लिङ् परस्मैपदं विडम्बयेत् विडम्बयेतां विडम्बयेयुः । अहो! आश्चर्यम् । मध्वशास्त्रमाहात्म्यम् । अयं समुदायाभिप्रायः । यस्तु सत्सङ्गवशात् प्राप्तमपि मध्वशास्त्रं निष्फलमिति बुद्ध्या त्यजति स तु अत्यन्तं नीच एव । सफलं एतत् इति मत्वा भक्त्या भजतामपि केषाञ्चित् स्वस्वयोग्यतानुसारेण बह्वेव फलं ददाति मध्वशास्त्रं किन्तु न सम्पूर्णम् । अत्युत्तमानां केषाञ्चिदेव सम्पूर्णफलं ददाति । अतः इदं मध्वशास्त्रं भक्त्या सेव्यमेव । इति एवं प्रकारेण सः शोभनभट्टः उदीर्य अभिधाय जनान् अरञ्जयत् अतोषयत् । मध्वशास्त्रे रुचिं उत्पादयामास इति भावः । 'रञ्ज रागे' इत्यस्मात् लङ् परस्मैपदं अरञ्जयत् अरञ्जयतां अरञ्जयन् ॥ २६ ॥

नेदृशैः कविभिरेव केवलं हन्त पूज्यचरणोऽभ्यपूज्यत ।
शर्वशक्रगुरुपूर्वदैवतैरप्यलं सुसमयोद्गमोत्सवे ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ पूज्यौ चरणौ यस्य तादृशः पूज्याचारो वा । अयं श्रीमध्वः । सुसमयस्य शोभनशास्त्रस्य उद्गमोत्सवे निर्माणोत्सवे केवलं ईदृशैः शोभन-भट्टसदृशैः कविभिः विद्वद्भिः एव न अभ्यपूज्यत । किन्तु, शर्वो रुद्रः शक्र इन्द्रो गुरुर्बृहस्पतिः, ते पूर्वे येषां तानि दैवतानि देवाः तैः अपि अलं अभ्यपूज्यत । हन्त हर्षे । 'पूज पूजायां' कर्मणि लङ् ॥ २७ ॥

मन्दोपकारिणी – नेदृशैरिति ॥ पूज्यचरणः पूज्यं पूजार्हं चरणं स्वरूपं यस्य सः तथोक्तः । 'उत्तमानां स्वरूपन्तु पादशब्देन भण्यते' इत्युक्तेः । चरणशब्दस्य पादपर्यायत्वात् । पूज्यौ चरणौ अंघ्री यस्येति वा । सुसमयोद्गमोत्सवे सु पूज्यश्चासौ समयः शास्त्रं च सुसमयः तस्य उद्गमो निर्माणं स चासै उत्सवश्च तस्मिन् मध्वशास्त्रनिर्माणोत्सवे इत्यर्थः । केवलं अत्यन्तं ईदृशैः शोभनभट्टसदृशैः कविभिरेव विद्वद्भिरेव अभ्यपूज्यत इतीति शेषः । अभ्यपूज्यत इति पूजित इति न किन्तु शर्वशक्रगुरुपूर्वदैवतैरपि शर्वः शिवः 'शर्वस्स्थाणुः' इत्यमरः शक्रः इन्द्रः गुरुः बृहस्पतिः 'बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः' इत्यमरः शर्वश्च शक्रश्च गुरुश्च शर्वशक्रगुरवः एते पूर्वे आदयो येषां तानि शर्वशक्रगुरुपूर्वाणि तानि च तानि दैवतानि देवताश्च 'वृन्दारका दैवतानि पुंसि वा देवता स्त्रियां' इत्यमरः तैः अलं अत्यन्तं अभ्यपूज्यत । 'पूज पूजायाम्' इत्यतः कर्मणि लङ् आत्मनेपदं अपूज्यत अपूज्येतां अपूज्यन्त ॥ २७ ॥

निम्नभूरिव सतीः प्रजा व्रजन् वारिदर्तुरशनैरपूरि सः ।
प्राज्यतापहरदर्शनाम्बुना तुङ्गदेशमिव दुर्जनं तु नो ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – निम्नेति ॥ व्रजन् गोदावरीतटाद्रूप्यपीठपुरं गच्छन् सः श्रीमध्वः । प्राज्यं बहुलं तापं संसारक्लेशं हरतीति तादृशं यद्दर्शनं स्वसिद्धान्तशास्त्रं तदेवाम्बु जलं तेन । 'दर्शनं दर्पणे धर्मोपलब्ध्योर्बुद्धिशास्त्रयोरि'ति हेमचन्द्रः । सतीः तत्त्वज्ञानयोग्याः प्रजा अशनैः क्षिप्रं वारि ददातीति वारिदः । स चासौ ऋतुश्च वारिदर्तुः प्रावृट्कालः । निम्नभूरिव निम्नप्रदेशानिव अपूरि पूरयामास । दुष्टश्चासौ जनश्च दुर्जनः तं तत्त्वज्ञानायोग्यजनमित्यर्थः । वारिदर्तुस्तुङ्गप्रदेशमिव नो अपूरि न पूरयामास ॥ २८ ॥

मन्दोपकारिणी – निम्नेति ॥ सः मध्वाचार्यः व्रजन् तत्र तत्र संचरन् सतीः तत्त्वज्ञानयोग्याः प्रजाः 'प्रजा स्यात् सन्ततौ जने' इत्यमरः । प्राज्यतापहरदर्शनाम्बुना प्राज्यः प्रचुरश्चासौ तापश्च प्राज्यतापः संसारक्लेशः तं हरति परिहरतीति प्राज्यतापहरं 'प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु' इत्यमरः तच्च तत् दर्शनं शास्त्रं च तदेवांबु उदकं तेन अशनैः शीघ्रं अपूरि पूरयामास । कः का इव वारिदर्तुः वारि उदकं ददातीति वारिदः वारिदश्चासौ ऋतुश्च वारिदर्तुः वर्षाकालः निम्नभूरिव निम्नाः नताश्च ताः भुवश्च ताः निम्नभूः निम्नप्रदेशानि दुर्जनं अयोग्यजनं तु नो अपूरि । कमिव तुङ्गदेशमिव तुङ्गश्चासौ देशः प्रदेशश्च तं उन्नतस्थलमिव । यथा वर्षाकालः उदकेन निम्नस्थलं पूरयति न तु उन्नतंस्थलं तथा मध्वाचार्यः तत्र देशे विद्यमानान् मुक्तियोग्यान् जनान् प्रति एव स्वशास्त्रं उपदिदेश न अयोग्यजनान् इति भावः । 'पूरी आप्यायने' इत्यतः कर्तरि लुङ् आत्मनेपदं अपूरि अपूरिषातां अपूरिषत ॥ २८ ॥

कर्मभिः सकललोककौतुकैर्मानितः पथि जनैः समागतः ।
सन्ननाम शिवनामकीर्तनं राजतासनपुरे विराजितम् ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – कर्मभिरिति ॥ पथि सकललोकानां समस्तजनानां कौतुकं कुतूहलं यैः तैः कर्मभिः निमित्तैः जनैः मानितः पूजितः सन् समागतः । रजतासनस्य सम्बन्धि राजतासनं यत्पुरं तस्मिन् विराजितं शिव इति नाम शिवनाम । कीर्त्यते अनेनेति कीर्तनं वाचकं यस्य तं श्रीहरिं सन्ननाम ॥ २९ ॥

मन्दोपकारिणी – कर्मभिः इति ॥ पथि मार्गे सकललोककौतुकैः सकलाश्च ते लोकाश्च तेषां कौतुकानि कुतूहलकारीणि तैः । 'कौतूहलं कौतुकं च कुतुकं च कुतूहलं' इत्यमरः । कर्मभिः चरितैः निमित्तैः जनैः कर्तृभिः मानितः पूजितः । मार्गे गमनकाले जनाः अत्याश्चर्यचरित्राणि दृष्ट्वा मध्वाचार्यं पूजितवन्त इति भावः । तादृशः सन् समागतः रजतपीठपुरं प्राप्तवान् सन् । राजतासनपुरे रजतासनमेव राजतासनं रजतपीठं तच्च तत् पुरं च तस्मिन् विराजितं शोभमानं शिवनामकीर्तनं शिवस्य रुद्रस्य नाम्ना शिव इति पदेन कीर्तनं उक्तिः यस्य सः शिवनामकीर्तनः तं अनन्तेश्वरनामकं इत्यर्थः । देवं सन्ननाम नमस्कृतवान् ॥ २९ ॥

अच्युतप्रमतिरच्युतप्रियं तं दशप्रमतिमागतं तदा ।
वन्दमानमवलोक्य यां मुदं प्राप्तवांस्तदवधिर्न विद्यते ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – अच्युतेति ॥ तदा अच्युतस्य प्रमतिः ज्ञानं यस्य सोऽच्युतप्रज्ञ इत्यर्थः । अच्युतप्रियं वन्दमानं तं, दश प्रमतयो यस्य तं पूर्णप्रज्ञं आगतं अवलोक्य यां मुदं सन्तोषं प्राप्तवान् तस्या अवधिः तदवधिः इयत्ता न विद्यते ॥ ३० ॥

मन्दोपकारिणी – अच्युतेति ॥ अच्युतप्रमतिः अच्युतस्य प्रमतिः ज्ञानं यस्य सः अच्युतप्रेक्षः । अच्युतप्रियं अच्युतस्य नारायणस्य प्रियं प्रीतिविषयं आगतं स्वसमीपं प्राप्तवन्तं वन्दमानं नमस्कुर्वन्तं दशप्रमतिं दश पूर्णा प्रमतिः प्रज्ञा यस्य स तथोक्तः तं पूर्णप्रज्ञाचार्यम् । 'दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते । प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञः ततः स्मृतः' इति वचनात् । अवलोक्य दृष्ट्वा तदा तस्मिन् काले यां मुदं प्राप्तवान् लब्धवान् तदवधिः तस्याः मुदः अवधिः इयत्ता न विद्यते नास्ति । 'विद् सत्तायाम्' इत्यतो लडात्मनेपदं विद्यते विद्येते विद्यन्ते । 'अवधिस्त्ववदाने स्यात्सीम्नि काले वनेऽपि च' इति विश्वः । अच्युतप्रेक्षः आगतं नमस्कुर्वाणं मध्वाचार्यं दृष्ट्वा अपरिमितं सन्तोषं लेभे इति भावः ॥ ३० ॥

प्रीतिमार्ययतिरुत्तमां पुरा प्रेषिताप्रतिमभाष्यदृग्ययौ ।
अप्यतोऽतिशयिनीं शुचिस्मितं तं विलोक्य सुचिराद्दिदृक्षितम् ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – प्रीतिमिति ॥ पुरा एतदागमनात् पूर्वमेव प्रेषितं श्रीमध्वाचार्येण प्रेषितं यत् अप्रतिमभाष्यं असदृशभाष्यं तत् पश्यति इति प्रेषिताप्रतिमभाष्यदृक् आर्ययतिः ज्येष्ठयतिः । लिकुचान्वयजेत्यर्थः । उत्तमां प्रीतिं सन्तोषं ययौ । इदानीं पुनः सुचिरात् सुचिरकाले द्रष्टुं इष्टं दिदृक्षितं शुचिस्मितं मन्दहासोपेतं तं श्रीमध्वाचार्यं विलोक्य अतोऽपि भाष्यदर्शनजातप्रीतेरप्यरतिशयिनीं प्रीतिं ययौ ॥ ३१ ॥

मन्दोपकारिणी – प्रीतिमिति ॥ पुरा मध्वाचार्यागमनात्प्रागेव प्रेषिताप्रतिमभाष्यदृक् प्रेषितं मध्वाचार्येण शिष्यहस्तेन दापितं अप्रतिमं असदृशं भाष्यं ब्रह्मसूत्रभाष्यं तत् पश्यतीति प्रेषिताप्रतिमभाष्यदृक् । आर्ययतिः श्रेष्ठयतिः उत्तमां उत्कृष्टां प्रीतिं हर्षं ययौ

प्राप्तवान् । इदानीं सः श्रेष्ठयतिः सुचिरात् बहुकालात् आरभ्य दिदृक्षितं द्रष्टुं अपेक्षितं शुचिस्मितं शुचि शुभ्रं स्मितं मन्दहासः यस्य स तथोक्तः । तं मध्वाचार्यं विलोक्य दृष्ट्वा अतोऽपि मध्वप्रेषिततत्कृतभाष्यदर्शनजातायाः प्रीतेरपि अतिशयिनीं अत्युत्कृष्टां प्रीतिं ययौ प्राप्तवान् । 'या प्रापण' इत्यतो लिट् परस्मैपदं ययौ ययतुः ययुः ॥ ३१ ॥

पूर्णदृष्टिजलधेर्गृहीतवान् भाष्यसंज्ञममृतं सुखावहम् ।
चित्रमेष यतिराड् घनाघनो ग्राहयंश्च मनुजान् मुमोच नो ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – पूर्ण इति ॥ पूर्णा दृष्टिः ज्ञानं यस्य स एव जलधिः समुद्रः तस्मात् । 'दृष्टिर्ज्ञानेऽक्ष्णिदर्शन' इत्यमरः । भाष्यमिति संज्ञा यस्य तत्सुखावहं सुखकरं अमृतं जलम् 'पयः कीलालममृतं जीवनं भुवनं वनं' इत्यमरः । गृहीतवान् एष यतिराड् यतिश्रेष्ठः स एव घनाघनो वर्षुकमेघः 'वर्षुकाब्दो घनाघनः' इत्यमरः । मनुजान् ग्राहयंश्च स्वयं नो मुमोच । चित्रं आश्चर्यम् । अयं भावः वर्षुकमेघो जलधेः जलं संगृह्य देशान्तरे वर्षन् स्वयं मुञ्चति रिक्तो भवति । अयं यतिश्रेष्ठस्तु मध्वाचार्यात् भाष्यं श्रुत्वा शिष्येभ्यो व्याकुर्वंश्च नो मुमोच । अतितरां तन्निरतोऽभूदिति ॥ ३२ ॥

मन्दोपकारिणी – पूर्णेति ॥ पूर्णदृष्टिजलधेः पूर्णा दृष्टिः ज्ञानं यस्य सः पूर्णप्रज्ञः 'दृष्टिर्ज्ञानेऽक्ष्णिदर्शने' इत्यमरः पूर्णदृष्टिरेव जलधिः समुद्रः तस्मात् । भाष्यसंज्ञं भाष्यमिति संज्ञा नाम यस्य तत् भाष्यसंज्ञम् । सुखावहं सुखं आवहति करोति इति सुखावहम् । अमृतं जलं 'पयः कीलालममृतं' इत्यमरः गृहीतवान् संगृहीतवान् एषः यतिराड् घनाघनः यतीनां राट् राजा श्रेष्ठः ज्येष्ठयतिराडेव घनाघनः वर्षुकमेघः 'वर्षुकाब्दे घनाघनः' इत्यमरः मनुजांश्च मर्त्यांश्च ग्राहयन् स्वीकारयन् सन् नो मुमोच न तत्याज । चित्रं एतत् आश्चर्यम् । 'मुचॢ मोक्षणे' इत्यतो लिट् परस्मैपदं मुमोच मुमुचतुः मुमुचुः । 'मनुजा मानवा नराः' इत्यमरः । अयं भावः यथा वर्षाकालमेघः समुद्रात् उदकं सङ्गृह्य देशान्तरे वर्षयन् स्वयं जलं त्यजति रिक्तो भवति । तथा अयं ज्येष्ठयतिः श्रीमध्वाचार्यात् भाष्यं श्रुत्वा शिष्येभ्यो व्याकुर्वंश्च तद्भाष्यं न तत्याज तत्रैव नितरां निरतोऽभूत् ॥ ३२ ॥

सानुनीतिरथ नीतिमानयं भाष्यसद्गुणगणानवर्णयत् ।
शोभनाय गुरवे स्वभावतः कालतः कुमतलीनबुद्धये ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – सानुनीतिरिति ॥ अथ कस्मिंश्चित्समये सानुनीतिः अनुनयसहितो नीतिमान् अयं श्रीमध्वः । स्वभावतः स्वरूपतः शोभनाय सज्जीवाय कालतः कलिकालवशात्, कुत्सितश्च तत् मतश्च कुमतं मायिमतं तेन लीना निगूढा बुद्धिः यस्य तस्मै गुरवे अच्युतप्रज्ञाय भाष्यस्य सद्गुणानां गणान् समूहान् अवर्णयत् । 'वर्ण वर्णने' लङ् ॥ ३३ ॥

मन्दोपकारिणी – सानुनीतिरिति ॥ अथ आगमनानन्तरं सानुनीतिः अनुनीत्या अनुनयेन सहितः सानुनीतिः अनुवृत्तिमान् इत्यर्थः । नीतिमान् तत्तत्कालोचितप्रकारवान् अयं श्रीमध्वाचार्यः । स्वभावतः 'स्वरूपं च स्वभावश्च' इत्यमरः शोभनाय सज्जीवाय कालतः कलिकालवशात् कुमतलीनबुद्धये कुमतेन कुत्सितमतेन मायिसिद्धान्तेन लीना निगूढा आच्छादिता बुद्धिः मतिः यस्य सः तथोक्तः तस्मै गुरवे अच्युतप्रेक्षाय भाष्यसद्गुणगणान् भाष्यस्य सूत्रभाष्यस्य सन्तः विद्यमानाश्च ते गुणाश्च तेषां गणान् समूहान् । 'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते' इत्युक्तेः । सच्छब्दो विद्यमानार्थकः । अवर्णयत् अकथयत् । 'वर्ण स्तुताविति यतो लङ् परस्मैपदं अवर्णयत् अवर्णयतां अवर्णयन्' । भाष्यगुणाः विशिष्टार्थप्रतिपादकत्व-एकविंशतिकुभाष्यदूषकत्वादयः व्यासदेव-हृदयातिवल्लभं इत्यादिना पूर्वोक्ताः ज्ञेयाः ॥ ३३ ॥

उक्तिभिस्तमसकृत् सुयुक्तिभिर्बोधयन् बहुलधीः प्रसङ्गतः ।
स्थेयसो भिषगिवास्य हृद्गतं मूलदोषमरुचेरचिन्तयत् ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – उक्तिभिरिति ॥ बहुला धीः यस्य स श्रीपूर्णप्रज्ञः । प्रसङ्गतः शोभना युक्तयो यासां ताभिः उक्तिभिः वचनैः तं स्वगुरुं असकृत् बहुवारं बोधयन् सन् । स्थेयसः स्थिरबुद्धेः । 'स्थास्नु स्थिरतरः स्थेयानेकरूपतया तु यः' इत्यमरः । बहुयुक्ति-भिर्बोधनेऽपि मायिशास्त्रप्रवणैकबुद्धेरिति भावः । अस्य स्वगुरोः अच्युतप्रज्ञस्य हृद्गतं अरुचेः स्वशास्त्रे रुचिहीनस्य मूलदोषं कारणीभूतदोषं भिषगिव अचिन्तयत् । तस्य चिद्रोगचिकित्सां कुर्वन् भिषग्यथा यथा रोगिणोऽरुचिनिदानं दोषं चिन्तयेत् आधिर्व्याधिर्वेत्यादि, तद्वत् अस्यापि शास्त्रेऽरुचिः किं निबन्धना स्वभावतो दुष्टबुद्धित्वाद्वा उतोपाधितोऽस्य सच्छास्त्रेऽरुचिनिदानभूतं दोषं चिन्तयामासेति भावः । अत्र स्थेयस इति नारुचिविशेषणम् । तथात्वे स्थेयश्शब्दस्योगित्वेन ङीपि कृते स्थेयस्या इति भवेत् ॥ ३४ ॥

मन्दोपकारिणी – उक्तिभिरिति ॥ बहुलधीः बहुला धीः प्रज्ञा यस्य सः श्रीमध्वः । प्रसङ्गतः तत्तत्सूत्रार्थविचारप्रसङ्गे सुयुक्तिभिः सुदृढाः युक्तयः यासां ताः सुयुक्तयः ताभिः उक्तिभिः स्ववचनैः तं स्वगुरुं असकृत् बहुवारं बोधयन् सन् स्थेयसः स्थिरतरस्य बहुयुक्तिभिः बोधने कृतेऽपि मायिशास्त्रप्रवणैकप्रकारबुद्धेः इति भावः । 'स्थास्नुः स्थिरतरः स्थेयान्' इत्यमरः । अस्य स्वगुरोः हृद्गतं हृदि अन्तःकरणे निरूढं अरुचेः स्वशास्त्रे रुच्यभावस्य मूलदोषं कारणभूतं दोषं अचिन्तयत् । अस्य सच्छास्त्रे रुच्यनुत्पादे निदानभूतो दोषः क इति स्वमनसि विचारितवान् । 'चिति स्मृत्यां' इत्यतो लङ् परस्मैपदम् । क इव भिषगिव । 'भिषग्वैद्यश्चिकित्सकः' इत्यमरः । यथा कस्यचित् पुरुषस्य रोगचिकित्सां कुर्वन् वैद्यः रोगिणः अन्नादौ अरुचिहेतुं दोषं विचारयेत् आधिर्वा व्याध्यादिर्वा इति तद्वत् अस्यापि सच्छास्त्रे अरुचिः किं निबन्धना स्वभावतो दुष्टबुद्धित्वाद्वा उपाधितो वा इति अचिन्तयत् इति भावः । स्थेयसः इति पदस्य अरुचेः इत्यस्य विशेषणत्वे स्थेयस्याः इति स्यात् । अरुचेः इत्यस्य स्त्रीलिङ्गत्वात् । अतः उक्त एव प्रकारो युक्त इति ॥ ३४ ॥

दक्षपक्षविहृतेन ताडयन् भीषयन् समधिकस्वरश्रिया ।
हंसराट् कलिमलं निराकरोदेकदृष्टिमिव मानसाद्गुरोः ॥ ३५ ॥

भावप्रकाशिका – एकदृष्टिमिव काकमिव रूपिणमैक्यज्ञानमिव च । मानसान्मनसः सरश्श्रेष्ठाच्च ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – दक्षेति ॥ दक्षपक्षस्य शोभनसिद्धान्तस्य विहृतेन युक्तिकथनात्मकलीलया ताडयन् निराकुर्वन् । समधिको यः स्वरो व्याख्यास्वरः तस्य श्रिया भीषयन् । हंसराट् परमहंसश्रेष्ठः श्रीमध्वो गुरोः अच्युतप्रज्ञस्य मानसात् मनसः । 'हृन्मानसं मन' इत्यमरः । कलिमलं कलिदोषम् । कल्यावेशनिमित्तकं सच्छास्त्रारुचिकारणीभूतं बुद्धिदोषमित्यर्थः । दक्षपक्षविहृतेन शोभनपतत्रविहारेण ताडयन्, समधिकस्वरया भीषयन् हंसराट् राजहंसाख्यपक्षिविशेषः गुरोः महतो मानसात् मानससरसः । एका दृष्टिः यस्य तं काकमिव निराकरोत् निराचक्रे ॥ ३५ ॥

मन्दोपकारिणी – दक्षेति ॥ हंसराट् हंसानां परमहंसानां राट् श्रेष्ठः श्रीमध्वाचार्यः । गुरोः अच्युतप्रेक्षस्य मानसात् मनसः कलिमलं कलेः मलं कल्यावेशनिमित्तं सच्छास्त्रे

रुच्यभावहेतुं बुद्धिदोषं निराकरोत् निष्कासितवान् । किं कुर्वन् । दक्षपक्षविहृतेन दक्षश्चासौ पक्षश्च दृढसिद्धान्तः तस्य विहृतेन विहारेण लीलया सिद्धान्तोक्तयुक्तिकथनेन इत्यर्थः । ताडयन् तदुक्तं खण्डयन् समधिकस्वरश्रिया समधिकः अत्यन्तं अधिकः अच्युतप्रेक्षशब्दापेक्षया अत्युत्तमश्चासौ स्वरः शब्दश्च स एव श्रीः सम्पत् तया अत्युच्चध्वनिना इत्यर्थः । भीषयन् विपक्षे बाधकभयं प्रदर्शयन् दृढसदुक्तिभिः तदुक्तपक्षं खण्डयित्वा विपक्षे बाधकं प्रदर्श्य गुरुमनसि विद्यमानं सच्छास्त्ररुचिं परिहृतवान् इति भावः । कः कमिव । हंसराट् हंसपक्षी एकदृष्टिं एका दृष्टिः चक्षुः यस्य स तथोक्तः तं काकाख्यपक्षिणं दक्षपक्षविहृतेन दक्षयोः पक्षयोः पत्रयोः विहरणेन ताडयन् ताडनं कुर्वन् समाधिकस्वरश्रिया काकापेक्षया अधिकशब्देन भीषयन् भयं जनयन् मानसात् मानसाख्यसरोवरात् इव यथा निर्गमयेत् तद्वत् इति भावः । 'काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः चिरजीवी चैकदृष्टिः' इत्यमरः ॥ ३५ ॥

निष्कलङ्कमिव चन्द्रमण्डलं पुण्डरीकमिव फुल्लतां गतम् ।
वारि शारदमिव प्रसादवच्चित्तमच्युतमतेर्भृशं बभौ ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – निष्कलङ्कमिति ॥ अच्युतमतेः अच्युतप्रज्ञस्य चित्तम् । निर्गतः कलङ्को यस्मात् तादृशं चन्द्रमण्डलमिव फुल्लतां विकासभावं गतं पुण्डरीकमिव कमलमिव । 'पुण्डरीकं सिताम्भोज'मित्यमरः । प्रसादवत् नैर्मल्ययुक्तं शारदं शरदि भवं वारीव भृशं अत्यर्थं बभौ ॥ ३६ ॥

मन्दोपकारिणी – निष्कलङ्कमिति ॥ अच्युतमतेः अच्युतप्रेक्षस्य चित्तं मनः भृशं अत्यन्तं बभौ उल्ललास । 'भा दीप्तौ' इत्यतो लिट् परस्मैपदं बभौ बभतुः बभुः । किमिव निष्कलङ्कं निर्गतः कलङ्कः श्यामरूपदोषः यस्मात् तत् 'कलङ्कोऽङ्कापवादयोः' इत्यमरः । चन्द्रमण्डलमिव चन्द्रस्य मण्डलं बिम्बमिव 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः । पुनः किमिव फुल्लतां फुल्लस्य भावः फुल्लता तां विकासतां गतं प्राप्तं विकसितं इत्यर्थः । पुण्डरीकमिव कमलमिव । 'पुण्डरीकं सिताम्भोजं' इत्यमरः । पुनः किमिव प्रसादवत् प्रसादः प्रसन्नता निर्मलत्वं इत्यर्थः अस्यास्तीति प्रसादवत् शारदं शरदः ऋतोः सम्बन्धि शारदं वारि उदकमिव । मध्वाचार्योपदेशेन अच्युतप्रेक्षबुद्धिः शुद्धा बभूव इति भावः ॥३६॥

आननन्द स हि मध्वशास्त्रमाकर्णयन्कुसमयाग्रही पुरा ।
मोहपीतलवणोदको मुहुः प्राक् पिपासुरमृतं पिबन्निव ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – आननन्देति ॥ पुरा कुसमये मायिनः कुत्सितसिद्धान्ते यः आग्रहः, अयं सत्सिद्धान्त इति पक्षपातः सोऽस्यास्तीति तादृशः । पश्चात् मध्वशास्त्र-माकर्णयन् सोऽच्युतप्रज्ञः पिपासुः प्राक्पिपासित अत एव मुहुर्मोहेनाज्ञानेन पीतं लवणोदकं येन तादृशः । लवणोदकमित्यविज्ञाय पीतलवणजल इत्यर्थः । पश्चादमृतं पिबन्निवाननन्द । पुरा तत्त्वबुभुत्सुः सन् मायिसमय एव तत्त्वावेदक इति मत्वा तच्छ्रवणादिना प्रवृद्धमिथ्याज्ञानः पश्चात् तन्निवर्तकं मध्वशास्त्रमाकर्णयन् सन् अच्युतप्रज्ञः पिपासुः पीतलवणजलः पश्चादमृतं पिबन्निव आननन्देति भावः ॥ ३७ ॥

मन्दोपकारिणी – आननन्देति ॥ पुरा मध्वशास्त्रश्रवणात्पूर्वं कुसमयाग्रही कुत्सितश्चासौ समयः मायिसिद्धान्तः तस्मिन् आग्रहः पक्षपातः अस्यास्तीति । अनन्तरं मध्वशास्त्रं मध्वसिद्धान्तं आकर्णयन् शृण्वन् सः अच्युतप्रेक्षः आननन्द सन्तुतोष । 'टु नदि समृद्धौ' लिट् परस्मैपदं ननन्द ननन्दतुः ननन्दुः । क इव ? पिपासुः पातुमिच्छावान् पिपासितः प्राक् मुहुः भृशं मोहपीतलवणोदकः मोहेन अज्ञानेन इदं लवणोदकं इति अविज्ञाय पीतं लवणं क्षारं उदकं जलं येन सः पश्चात् अमृतं मधुरोदकं पिबन् पुरुष इव । यथा कश्चित् पूर्वं पिपासितः सन् लवणोदकं इति अविज्ञाय लवणोदकं पीतवान् पश्चात् मधुरोदकं पीत्वा सन्तुष्यति तद्वत् अच्युतप्रेक्षः पुरा तत्त्वं बुभुत्सुः मायिशास्त्रमेव तत्त्वावगमकं ज्ञात्वा तच्छास्त्रं श्रुत्वा व्याख्याय च प्रवृद्धमिथ्याज्ञानः सन् पश्चात् सर्वमिथ्याज्ञाननिवर्तक-मध्वशास्त्रं शृण्वन् सन्तुतोष इति भावः ॥ ३७ ॥

विस्तृतान्तरवियत्पदौ यती आस्यतां सुसमयप्रकाशनात् ।
तौ यथा विधुरवी अहो अहोरात्रमप्युरुतमो नृमोहकम् ॥ ३८ ॥

भावप्रकाशिका – सुसमयप्रकाशनात् सुशास्त्रव्याख्यानात् सुकालोदयाच्च ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – विस्तृतेति ॥ विस्तृतमन्तरं ज्ञानं यस्य स पूर्णप्रज्ञः । स एव वियद्गगनं तदेव पदं आश्रयो ययोः तौ यती लिकुचाह्वयजाच्युतप्रज्ञाख्यौ यती । अहश्च

रात्रिश्च अहोरात्रं निरन्तरमहोरात्रेऽपीत्यर्थः । शोभनश्चासौ समयश्च सुसमयः श्रीमध्वशास्त्रं तस्य प्रकाशनं प्रकटनं तस्मात् । तद्व्याख्यानादिति यावत् । नृणां मोहकं उरुतमो महदज्ञानम् । वियत्पदौ वियदाश्रयौ विधुरवी सुकाले प्रकाशनात् अहोरात्रं उर्वन्धकारं यथा, तथा आस्यतां निराकुरुताम् । अहो आश्चर्यम् । अनयोः भाग्यं इति भावः ॥ ३८ ॥

मन्दोपकारिणी – विस्तृतेति ॥ यती ज्येष्ठयत्यच्युतप्रेक्षश्चेत्युभौ सन्यासिनौ । विस्तृतान्तरवियत्पदौ विस्तृतं बहुविषयकं आन्तरं अन्तरेण मनसा जन्यं ज्ञानं यस्य सः पूर्णप्रज्ञाचार्यः स एव वियत् आकाशः स एव पदं स्थानं आश्रयः ययोः तौ विस्तृतान्तरवियत्पदौ 'वियद्विष्णुपदं' इत्यमरः । मध्वाकाशमाश्रितौ सन्तौ अहोरात्रमपि सुसमयप्रकाशनात् शोभनमध्वशास्त्रस्य विचारात् नृमोहकं पुरुषमोहकं तत्त्वज्ञानप्रतिबन्धकं उरु बहुलं तमः मिथ्याज्ञानं आस्यतां निराकुरुताम् । 'अस निरसने' लङ् परस्मैपदं आस्यत् आस्यतां आस्यन् । कौ इव विधुरवी यथा चन्द्रसूर्यौ आकाशं आश्रित्य सुसमयप्रकाशनात् सुसमये शोभनशरदादिकाले प्रकाशनात् अहोरात्रं अहोरात्रसम्बन्धि नृमोहकं नृणां प्रवृत्तिप्रतिबन्धकं उरुतमः गाढान्धकारं निराकुरुतां तद्वत् ज्येष्ठयत्यच्युतप्रेक्षौ मध्वाचार्यं आश्रित्य अहोरात्रमपि मध्वशास्त्रविचारं कृत्वा स्वाज्ञानं परिहृतवन्तौ इति भावः । अहो आश्चर्यं मध्वभाष्यमाहात्म्यम् ॥ ३८ ॥

सज्जनान् सह महादरेण नॄन् पापिनां प्रकृतितोऽप्रियाकृति ।
दारुणाघगणदारणं स्म स ग्राहयत्यपि सुदर्शनद्वयम् ॥ ३९ ॥

भावप्रकाशिका – महादरेण महाबहुमानेन शङ्खेन च । सुदर्शनं सच्छास्त्रं चक्रं च ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – सज्जनानिति ॥ स श्रीमध्वः । सज्जनान् तत्त्वज्ञानयोग्यान् नॄन् पुरुषान् । पापमेषामस्तीति तेषां प्रकृतितः स्वभावतोऽप्रियाऽऽकृतिः स्वरूपं यस्य तादृशम् । पापिनां एतत् शास्त्रं, सुदर्शनचक्रं चेति द्वयमपि स्वभावतो दुःसहं हि । दारुणानि यानि अघानि पापानि तेषां गणस्य समूहस्य दारणं विदारकं सुदर्शनद्वयमपि । शोभनं दर्शनं शास्त्रं, सुदर्शनचक्रं च इति तयोर्द्वयमपि महादरेण महाशङ्खेन च ग्राहयति स्म ग्राहयामास ॥ ३९ ॥

मन्दोपकारिणी – सज्जनानिति ॥ स श्रीमध्वाचार्यः सज्जनान् तत्त्वज्ञानयोग्यान् नॄन् पुरुषान् । सुदर्शनद्वयमपि शोभनं च तत् दर्शनं च इति व्युत्पत्त्या सुदर्शनशब्देन शास्त्रं चक्रं चोच्यते । सुदर्शनं च सुदर्शनं च सुदर्शने तयोः द्वयं स्वशास्त्रं चक्रं च इत्युभयमपि ग्राहयति स्म अग्राहयत् । स्म अतीते । 'गतिबुद्धी'त्यादिना द्विकर्मकत्वम् । कथं महादरेण सह महान् पूज्यश्चासौ दरः शङ्खश्च महादरः तेन साकम् । कथंभूतं सुदर्शनद्वयं पापिनां पापिष्ठानां प्रकृतितः स्वभावात् अप्रियाकृति प्रिया प्रीतिविषया न भवतीति अप्रिया अप्रिया आकृतिः स्वरूपं यस्य तत् । तथोक्तं तत् दुर्जनानां सच्छास्त्रं सुदर्शनचक्रं च इति द्वयं स्वभावतो दुःसहं हि । पुनः कीदृशं दारुणाघगणदारणं दारुणानि भयङ्कराणि च तानि अघानि दुष्कृतानि च दारुणाघानि दारुणाघानां गणः समूहः तं दारयतीति नाशयतीति दारुणाघगणदारणम् । अयं भावः तत्त्वज्ञानयोग्यानां जनानां भुजयोः तप्ताभ्यां शङ्खचक्राभ्यां चिन्हं कृत्वा विष्णुदीक्षां कारयित्वा तेभ्यः आदरेण सह स्वशास्त्रं उपदिदेश इति भावः । अनेन तप्तचक्रशङ्खधारणरूपविष्णुदीक्षारहितानां स्वशास्त्रोपदेशो न कार्य इति सूच्यते ॥ ३९ ॥

नन्वनन्यशरणात्मनां सतां सिद्धिविघ्नमुखदोषभेषजम् ।
ऐच्छदच्छलदयोदयादयं रूप्यपीठपुरगः कदाचन ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – नन्विति ॥ अयं श्रीमध्वः कदाचन रूप्यपीठपुरगः सन् । न विद्यते छलं व्याजं यस्याः सा अच्छला निर्व्याजा या दया सज्जनविषयकृपा तस्य उदयात् प्रादुर्भावात् । अन्यच्च तत् शरणं च, न विद्यतेऽन्यशरणमन्यरक्षको यस्य तादृश आत्मा मनो येषां तेषाम् । न विद्यतेऽन्यशरणं येषां तेऽनन्यशरणाः, अनन्यशरणा इत्यात्मा मनो येषां तेषामिति वा । श्रीमध्वाचार्य एव शरणं न अन्य इति मनसा युक्तानामित्यर्थः । सतां सत्पुरुषाणां, सिद्धेः मोक्षसिद्धेः यो विघ्नः स एव मुखं मुख्यं येषां ते तादृशा ये दोषाः तेषां भेषजम् औषधम् ऐच्छत् । सतां मोक्षविघ्नादिदोषप्रतीकारत्वेन श्रीकृष्णप्रतिष्ठां करिष्यामीत्यैच्छदिति भावः ॥ ४० ॥

मन्दोपकारिणी – नन्विति ॥ रूप्यपीठपुरगः रूप्यपीठाख्ये पुरे गच्छति तिष्ठतीति रूप्यपीठपुरगः अयं श्रीमध्वाचार्यः । कदाचन कस्मिंश्चित्काले अनन्यशरणात्मनां शरणं

चासौ आत्मा च शरणात्मा रक्षकजीव इत्यर्थः 'शरणं गृहरक्षित्रोः' इत्यमरः । न विद्यते अन्यः अपरः शरणात्मा येषां ते अनन्यशरणात्मानः तेषां स्वात्मानं विना रक्षकरहितानाम् । सतां मुक्तियोग्यानां विषये अच्छलदयोदयात् अच्छला व्याजरहिता च सा दया च तस्याः उदयात् प्रादुर्भावात् । सिद्धिविघ्नमुखदोषभेषजं सिद्धेः मुक्तेः विघ्नः प्रतिबन्धकं अज्ञानं तदेव मुखं आदिः येषां ते सिद्धिविघ्नमुखाः ते च ते दोषाः कामकर्मादयः तेषां भेषजं औषधं ऐच्छत् अपेक्षितवान् । 'इषु इच्छायाम्' इत्यतो लङ् परस्मैपदं ऐच्छत् ऐच्छतां ऐच्छन् । रजतपीठपुरे विद्यमानः श्रीमध्वाचार्यः कदाचित् मुक्तियोग्यान् जनान् मुक्तिप्रतिबन्धकाविद्याकामकर्मादिना सच्छास्त्रे विमुखान् दृष्ट्वा तदुपरि दयां कृत्वा तत्प्रतिबन्धकनिवर्तनाय श्रीकृष्णप्रतिमाप्रतिष्ठां करिष्यामि इति ऐच्छत् इति भावः । अनेन मुक्तियोग्यानां कलौ युगे सच्छास्त्रश्रवणादिविषये विघ्ननिवृत्तिद्वारा मोक्षसाधनसिद्ध्यर्थं रजतपीठपुरगतश्रीकृष्णप्रतिमासन्दर्शनं आवश्यकं इति उक्तं भवति ॥ ४० ॥

गोपिकाप्रणयिनः श्रियः पतेराकृतिं दशमतिः शिलामयीम् ।
शिष्यकैस्त्रिचतुरैर्जलाशये शोधयन्निह ततो व्यगाहयत् ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – गोपिकेति ॥ दश पूर्णा मतिः ज्ञानं यस्य स श्रीपूर्णप्रज्ञः । गोपिकाप्रणयिनः गोपिकानां वल्लभस्य श्रियः पतेः भर्तुः श्रीकृष्णस्य शिलामयीं शिलात्मिकां आकृतिं प्रतिकृतिं जलाशये तटाके त्रयश्च चत्वारश्च त्रिचतुरास्तैः शिष्यकैः शोधयन् मलक्षालनं कुर्वन् कारयंश्च । ततः शोधनानन्तरं इह तटाके व्यगाहयत् । अवगाहयामास । 'गाहू विलोडने' लङ् । अभ्यषिञ्चदिति भावः ॥ ४१ ॥

मन्दोपकारिणी – गोपिकेति ॥ दशमतिः पूर्णप्रज्ञाचार्यः । गोपिकाप्रणयिनः गोपिकानां गोपस्त्रीणां प्रणयी वल्लभः तस्य । श्रियः पतेः अलुक् समासोऽयं समासाभावे पत्युरिति स्यात् लक्ष्मीपतेः इत्यर्थः । श्रीकृष्णस्य शिलामयीं शिलायाः इयं शिलामयी तां शिलानिर्मितां आकृतिं प्रतिमां जलाशये जलाधारे मध्वसरोवरनामतटाके इत्यर्थः । 'जलाशयो जलाधारः' इत्यमरः । त्रिचतुरैः त्रयो वा चत्वारो वा त्रिचतुराः तैः शिष्यकैः छात्रैः शोधयन् प्रतिमां प्रक्षालयन् ततः शोधनानन्तरं इह मध्वसरोवरे व्यगाहयत् स्नापितवान् अभ्यषिञ्चत् इति भावः । 'गाहू विलोडने' इत्यतः लङ् परस्मैपदं अगाहयत् अगाहयतां

अगाहयन् । अत्र किल कथां कथयन्ति । 'भूतभविष्यद्वर्तमानज्ञानी श्रीमध्वाचार्यः श्रीकृष्णप्रतिमां रजतपीठपुरे प्रतिष्ठापयिष्यामीति विचिन्त्य कदाचित् समुद्रे स्नात्वा तत्तीरे जपादि कुर्वन् आसीत् । तस्मिन् समये द्वीपान्तरात् काचन नौः आगत्य तीरं अप्राप्यैव किञ्चित् दूरे जले एव स्थिता नैव चचाल । ततो महता प्रयत्नेनापि नावि अचालितायां सत्यां तैः कर्णधारादिभिः प्रार्थितः मध्वः स्वाभिमुखतः स्ववस्त्रवायुना नावं तीरं प्रापयामास । ततः सन्तुष्टैः नाविकादिभिः हे भिक्षो ! त्वं अपेक्षितं गृहाण इति प्रार्थितः सन् नावि स्थितां गोपीचन्दनगोलिकां गृहीत्वा रजतपीठपुरं एत्य मध्वसरोवरे गोपीचन्दनगोलिकामध्यस्थां श्रीकृष्णप्रतिमां शिष्यैः क्षालयित्वा स्वयं अभ्यषिञ्चत्' इति ॥ ४१ ॥

स्पर्शनाद्भगवतोऽतिपावनात् सन्निधानपदतां गतां हरेः ।
त्रिंशदुद्यतनरैः सुदुर्धरां लीलयाऽनयदिमामसौ मठम् ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – स्पर्शनादिति ॥ अतिपावनात् अतिपवित्रात् स्पर्शनात् अवगाहनसमये स्वकरस्पर्शात् भगवतो हरेः श्रीकृष्णस्य सन्निधानस्य पदमास्पदं तस्य भावः तत्ता तां गताम् । अत एव त्रिंशत् त्रिंशत्संख्याका य उद्यतनराः प्रतिमां उद्धर्तुं उद्यताः पुरुषाः तैः सुदुर्धरां सुतरां धर्तुं अशक्यां इमां प्रतिमां स्वयमेव लीलया अनायासेन मठं अनयत् । 'मठश्छात्रादिनिलयः' इत्यमरः ॥ ४२ ॥

मन्दोपकारिणी – स्पर्शनादिति ॥ असौ श्रीमध्वाचार्यः । भगवतः भगः माहात्म्यं अस्यास्तीति भगवान् 'भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु' इत्यमरः तस्य महात्मनः स्वस्य । अतिपावनात् अत्यन्तपवित्रात् स्पर्शनात् स्नापनसमये स्वकरस्पर्शात् हरेः श्रीकृष्णस्य सन्निधानपदतां सन्निधानस्य पदं विषयः तस्य भावः तत्ता तां सन्निधानविषयत्वं गतां प्राप्ताम् । महत्तममध्वाचार्यकरस्पर्शेन तस्यां प्रतिमायां श्रीकृष्णसान्निध्यमभूत् । 'अर्चकस्य तपोयोगात्' इत्युक्तेः इति भावः । सन्निधानं नाम स्वसामर्थ्यव्यञ्जनम् । विश्वंभरस्य कृष्णस्य तत्र सन्निहितत्वादेव त्रिंशदुद्यतनरैः उद्धर्तुं यत्नवन्तः उद्यताः उद्युक्ताः ते च ते नराश्च त्रिंशत्सङ्ख्याकाश्च ते उद्यतनराश्च इति तथोक्ताः । तैः सुदुर्धरां उद्धर्तुं अशक्यां इमां श्रीकृष्णप्रतिमां स्वयं एक एव लीलया अनायासेन मठं स्ववासस्थानं प्रति अनयत् नीतवान् । 'णीञ् प्रापणे' लङ् परस्मैपदं अनयत् अनयतां अनयन् ॥ ४२ ॥

मन्दहासमृदुसुन्दराननं नन्दनन्दनमतीन्द्रियाकृतिम् ।
सुन्दरं स इह सन्यधापयद्वन्द्यमाकृतिशुचिप्रतिष्ठया ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – मन्दहासेति ॥ स श्रीमध्वः । मन्दो हासो यस्मिन् तत् । मृदु सुन्दराननं यस्य तम् । 'मन्दहासहसितेन्दु'मिति क्वचित्पाठः । अतीन्द्रिया प्राकृतेन्द्रियागोचरा आकृतिः स्वरूपं यस्य तम् । सुन्दरं वन्द्यं ब्रह्मादिस्तुत्यं नन्दनन्दनं नन्दगोपपुत्रं श्रीकृष्णम् । आकृतेः प्रतिमायाः या शुचिप्रतिष्ठा शोभनप्रतिष्ठाविधानं तया इह अस्यां प्रतिमायां सन्यधापयत् सन्निहितं कारयामास ॥ ४३ ॥

मन्दोपकारिणी – मन्दहासेति ॥ स श्रीमध्वाचार्यः । मन्दहासमृदुसुन्दराननं मन्दः ईषत् हासः हसनं यस्मिन् तत् मन्दहासं मृदु कोमलं च तत् सुन्दरं च तत् आननं मुखं च मृदुसुन्दराननम् । मन्दहासं मृदसुन्दराननं यस्य स तथोक्तः तम् । अतीन्द्रियाकृतिं अतीन्द्रिया प्राकृतेन्द्रियागोचरा आकृतिः स्वरूपं यस्य स तथोक्तः तम् । सुन्दरं मनोहरं वन्द्यं नम्यं स्तुत्यं च नन्दनन्दनं नन्दगोपस्य पुत्रं श्रीकृष्णम् । आकृतिशुचिप्रतिष्ठया आकृतेः प्रतिमायाः शुचिः साङ्गत्वेन निर्मला प्रतिष्ठा स्थापनाविधानं तया सह श्रीकृष्णप्रतिमायां सन्यधापयत् सन्निहितं कारितवान् । 'डु धाञ् धारणपोषणयोः' इति णिजन्तात् धातोः लङ् परस्मैपदं अधापयत् अधापयतां अधापयन् ॥ ४३ ॥

मानिनोऽपि हि वशीचकार यो दैवतप्रतिभयाऽऽत्मनः खलः ।
यायजूकगुणमात्मनः स्मरन् यो जराघटितगोत्र उच्यते ॥ ४४ ॥

भावप्रकाशिका – दैवतप्रतिभया दैवतलब्धप्रज्ञया रुद्राख्यदेववरजप्रज्ञया च । जराघटितगोत्रो जरासम्बद्धगोत्रो मरडित्ताय इत्यपभ्रष्टभाषा जरासन्धश्च ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – मानिन इति ॥ कलापकमिदम् । 'कलापकं चतुर्भिः स्या'दित्युक्तेः । स्वतेजसा स्वसामर्थ्येन विश्वस्य समस्तजगतः विस्मयं आश्चर्यं करोतीति तादृशः । अत एव जनैः पुनर्मुहुर्वन्द्यमानौ चरणौ पादौ यस्य तादृशः । चित्रो यो दिग्विजयः सर्वदेशस्थवादिविजयः तेन कीर्त्या प्रशस्या कीर्तिरस्यास्तीति तादृशः । निजा आत्मीयाः प्रजा अनुदिनं प्रतिदिनं मोदयन् तत्त्वोपदेशादिना सन्तोषयन् । वासुदेवदयितः

श्रीकृष्णप्रियो महिष्ठा महती धीः यस्य स श्रीपूर्णप्रज्ञः । यः खलः आत्मनः स्वस्य दैवतात् लब्धा प्रतिभा प्रज्ञा दैवतप्रतिभा तया । मान एषामस्तीति मानिनः तान् अपि इत्यर्थः । वशीचकार । यायजूकगुणं यष्ट्रत्वाख्यगुणमात्मनः स्वस्य स्मरन् । अस्मिन्नधिवासहोमे स्वस्यैव योग्यतामन्यस्य तदभावञ्च स्मरन्नित्यर्थः । जराघटित इति गोत्रं नाम यस्य तादृशः। 'गोत्रं क्षेत्रेऽन्वये चित्रे सम्भाव्ये बोधवर्त्मनोः । वने नाम्नि च गोत्रोऽद्रौ गोत्राभुवि गवां गणे' इति हेमचन्द्रः । उच्यते । जराघटितगोत्र इत्यस्य मोरडित्ताय इत्यपभ्रष्टसंज्ञा ॥ ४४ ॥

मन्दोपकारिणी – मानिन इति ॥ अमुं, कं यः खलः 'क्रूरे नीचेऽधमे खले' इति विश्वः । आत्मनः स्वस्य दैवतप्रतिभया देवतायाः इयं दैवता दैवता च सा प्रतिभा च तया स्वोपास्यदेवताप्रसादलब्धप्रज्ञया । मानिनोऽपि मानः अभिमानः येषां अस्तीति मानिनः । प्रबलानपि वशीचकार जित्वा स्ववशीचकार । यश्च यायजूकगुणं यायजूकः इज्याशीलः समर्पकयज्ञकर्ता इत्यर्थः । तस्य गुणः तं यष्ट्रत्वाख्यं गुणं आत्मनः एव स्वस्यैव स्मरन् अहमेव सम्यक् यष्टा नान्यः इति अनुसन्धानवान् । यश्च जराघटितगोत्रः जराघटितं गोत्रं नाम यस्य स तथोक्तः उच्यते अभिधीयते तं निरस्य इति अन्वयः ॥ ४४ ॥

आत्मनः प्रियतमक्रतोरमुं पापपूरुषमवेक्ष्य घातुकम् ।
तं निरस्य जनमप्यथाहितं सर्वभूधरसमर्थपूर्वकम् ॥ ४५ ॥

भावप्रकाशिका – प्रियतम· उपाध्यायसुतः युधिष्ठिरश्च । भूधरो राजा । समर्थौ पूर्वपश्चिमपक्षाधिपौ । भूधरसमर्था राजश्रेष्ठाश्च ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – आत्मन इति ॥ अमुं पापपुरुषं आत्मनः स्वस्य प्रियतमस्य पूर्वाश्रमे स्ववेदपाठकसुतस्य यः क्रतुस्तस्य घातुकं विघ्नकर्तारम् । अहमेव कुलश्रेष्ठत्वात् यजनकर्मणि योग्यः । अयं तु अकुलीनत्वात् याजनीयो न भवति इत्यादि कथनपूर्वकं स्वोपाध्यायसुतेन क्रियमाणयज्ञस्य विघ्नकर्तारमित्यर्थः । अवेत्य ज्ञात्वा तं जराघटितगोत्रजं, अथ ततोऽन्यमहितममित्रं जनं तत्पक्षीयजनमपि । भूधरो राजा बालकन्यापुराधिपः, स च समर्थौ पूर्वपक्षाधिप, पश्चिमपक्षाधिपौ तौ च सर्वे समस्तजनाश्च । सर्वभूधरसमर्थाः पूर्वका यथा भवति तथा सर्वसमक्षमित्यर्थः । निरस्य निरुत्तरं कृत्वा अयाजयत् इति उत्तरत्रान्वयः ॥ ४५ ॥

मन्दोपकारिणी – आत्मन इति ॥ किं कृत्वा अमुं पापपूरुषं पापमस्यास्तीति पापः 'अर्शादिभ्योऽच्' पापश्चासौ पूरुषश्च कश्चनवादी तम् । आत्मनः स्वस्य प्रियतमक्रतोः प्रियतमस्य प्रीतिविषयस्य उपाध्यायपुत्रस्य क्रतोः यज्ञस्य घातुकं विघ्नकर्तारं अवेक्ष्य दृष्ट्वा । सर्वभूधरसमर्थपूर्वकं भूधरो राजा समर्थः कश्चन समर्थनामा पुरुषः भूधरश्च समर्थश्च भूधरसमर्थौ सर्वे समस्तजनाश्च भूधरसमर्थौ च सर्वभूधरसमर्थाः ते एव पूर्वे यथा स्युः तथा क्रियाविशेषणं इदं भूधरादिसर्वजनतासमक्षं इति यावत् । तं वादिनं निरस्य निरुत्तरीकृत्य इत्यर्थः । यद्वा सर्वश्च भूधरश्च सर्वभूधरौ तन्नामानौ समर्थौ यज्ञादिकर्मकाण्डनिपुणौ वादिनौ पूर्वौ यस्य स तथोक्तः । तं इति जनविशेषणं अहितं शत्रुभूतं ततोऽन्यं जनमपि अथ तथा निरस्य । 'द्विड्विपक्षाहितामित्रः' इत्यमरः ॥ ४५ ॥

विश्वविस्मयकरः स्वतेजसा वन्द्यमानचरणः पुनर्जनैः ।
चित्रदिग्विजयकीर्त्यकीर्तिमान् मोदयन्ननुदिनं निजाः प्रजाः ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – ४४ श्लोकार्थेन सह व्याख्यातं इदम् ॥ ४६ ॥

मन्दोपकारिणी – विश्वेति ॥ कथंभूतः महिष्ठधीः । स्वतेजसा स्वस्य सामर्थ्येन विश्वविस्मयकरः विश्वेषां सर्वेषां जनानां विस्मयं आश्चर्यं करोतीति तथोक्तः । पुनः तथा जनैः वन्द्यमानचरणः वन्द्यमानौ नम्यमानौ चरणौ पादौ यस्य स तथोक्तः । पुनः कथंभूतः? चित्रदिग्विजयकीर्त्यकीर्तिमान् चित्राः विविधाश्च ताः दिशश्च चित्रदिशां विजयः तेन निमित्तेन कीर्त्या कीर्तनीया कीर्तिः यशः अस्यास्तीति तथोक्तः । सकलदिक्पण्डितान् पराभूय सम्पादितकीर्तियुक्तः अनुदिनं प्रतिदिनं निजाः प्रजाः स्वीयजनान् मोदयन् सुखयन् ॥ ४६ ॥

वासुदेवदयितो महिष्ठधीर्वासुदेवमथ साध्वयाजयत् ।
धर्मसूनुमिव धार्मिकं पुरा भीममूर्तिरयमेव भूसुरम् ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – वासुदेव इति ॥ वासुदेवदयितो महिष्ठधीः श्रीपूर्णप्रज्ञः । वासुदेवं तन्नामकं स्वोपाध्यायसुतं धार्मिकं भूसुरं ब्राह्मणम् । स्वतेजसा स्वबलेन विश्वविस्मयकरः । अत एव जनैः वन्द्यमानचरणः चित्रदिग्विजयकीर्त्यकीर्तिमान् अनुदिनं

निजाः प्रजाः मोदयन् वासुदेवदयितः श्रीकृष्णप्रियो भीम इति मूर्तिः स्वरूपं यस्य स भीममूर्तिः अयमेव श्रीमध्व एव । यः खल आत्मनो यायजूकगुणं शिवप्रीत्यर्थं नरमेधेन यष्ट्रत्वाख्यगुणं स्मरन् सन् राज्ञो विहिंस्य शिवमिष्ट्वा तेन यष्ट्रत्वं स्वस्यार्थयन् सन्निति भावः। आत्मनो दैवतप्रतिभया रुद्रादिदेवानां वरदाननिमित्तया प्रज्ञया मानिनोऽपि प्रबलानपि राज्ञो वशीचकार । यः खलो जराघटितगोत्रो जरासन्धनामा उच्यते । पापपूरुषममुं जरासन्धमात्मनः स्वस्य प्रियतमो यः क्रतू राजसूययागस्तस्य घातकमवेत्य तं निरस्य संहृत्य । अथ सर्वभूधरसमर्थपूर्वकं सर्वराजश्रेष्ठपूर्वकमहितं जनमपि निरस्य विजित्य पुरा धर्मसूनुमिव युधिष्ठिरमिव साधु सम्यक् यथा भवति तथा अयाजयत् इति श्लोकचतुष्टयस्यैकान्वयः ॥ ४७ ॥

मन्दोपकारिणी – वासुदेव इति ॥ चतुर्णां कुलकमिदम् । अथ श्रीकृष्ण-प्रतिष्ठापनानन्तरं वासुदेवदयितः श्रीकृष्णस्य प्रियः महिष्ठधीः अतिशयेन महती महिष्ठा पूर्णा धीः प्रज्ञा यस्य स तथोक्तः मध्वः । वासुदेवं तन्नामानं स्वोपाध्यायपुत्रं धार्मिकं धर्मिष्ठं भूसुरं ब्राह्मणं साधु सम्यक् पुरा अयाजयत् यज्ञकर्तारं अकरोत् । गतिबुद्धीत्यादिना वासुदेवस्य कर्मत्वम् । कः कमिव भीममूर्तिः भीमस्वरूपः अयमेव मध्वः धर्मसूनुमिव युधिष्ठिरमिव धर्मराजपक्षे तु यः खलोऽऽत्मनः दैवतप्रतिभया रुद्रादिवरदाननिमित्तया प्रज्ञया मानिनोऽपि प्रबलानपि राज्ञः वशीचकार आत्मनः यायजूकगुणं स्मरन् पूर्व एवार्थः यः जराघटितगोत्रः जरासन्धनामा उच्यते व्यवह्रियते 'गोत्रं तु नाम च' इत्यमरः । अमुं पापपुरुषं आत्मनः प्रियतमक्रतोः प्रियतमस्य धर्मराजस्य क्रतोः राजसूययागस्य घातुकं प्रतिबन्धकं अवेक्ष्य ज्ञात्वा तं निरस्य हत्वा तदनन्तरं सर्वभूधरसमर्थपूर्वकं सर्वेषां भूधराणां भूपालानां समर्थाः श्रेष्ठाः सर्वभूधरसमर्थाः ते पूर्वे आदयो यस्य स तथोक्तः तम् । अहितं शत्रुभूतं जरासन्धव्यतिरिक्तं अन्यं जनं च निरस्य इत्यर्थः । अन्यपदानि स्पष्टार्थानि भीमसेनपरतया पूर्ववत् योज्यानि ॥ ४४-४७ ॥

याज्यया समुचितानुवाक्यया सप्रवर्ग्यविभवैरभिष्टवैः ।
विश्ववेत्तुरनुजोऽत्र होतृतां प्राप्य दैवततती रतोषयत् ॥ ४८ ॥

भावप्रकाशिका – अध्वर्युप्रैषानन्तरा प्रणवान्ता याज्या । पूर्वभाविनी ऋगनुवाक्या । वषट्कारान्ता याज्यमहावीरप्रस्तोतृसामादयः प्रवर्ग्यविभवाः । अनवरतमुच्यमानाः प्रणवान्ता ''ब्रह्मजज्ञानं प्रथमं पुरुस्तादि''याद्या ऋचोऽभिष्टवाः ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – याज्ययेति ॥ विश्ववेत्तुः श्रीपूर्णप्रज्ञस्यानुजोऽत्र यज्ञे होतृतां प्राप्य । समुचितानुवाक्या पूर्वभाविनी ऋग्यस्यास्तया समुचितानुवाक्ययुतयेत्यर्थः । याज्यया, अध्वर्युप्रैषानन्तरा प्रणवान्ता याज्या तथा । सप्रवर्ग्यविभवैः वषट्कारान्तैः, याज्यमहावीरप्रस्तोतृसामादिभिः सहितैः, अभिष्टवैः च अनवरतमुच्यमानप्रणवान्तैः । 'ब्रह्मजज्ञान'मित्याद्या ऋचोऽभीष्टवाः तैः च दैवततीः देवसमूहान् अतोषयत् ॥ ४८ ॥

मन्दोपकारिणी – याज्ययेति ॥ विश्ववेत्तुः विश्वं यज्ञादिकर्मकलापं वेत्ति जानातीति विश्ववेत्ता तस्य सर्वज्ञस्य पूर्णप्रज्ञाचार्यस्य । अनुजः कनिष्ठभ्राता 'जयन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः' इत्यमरः । अत्र अस्मिन् यज्ञे होतृतां होतुर्भावः होतृता तां होतृनामकऋत्वित्त्वं प्राप्य । समुचितानुवाक्यया समुचितं योग्यं अनुवाक्यं अनुसंज्ञिका वाक् यस्याः सा समुचितानुवाक्या तया याज्ययां याज्यनाम्न्या वाचा । अनुब्रूहीति अध्वर्युप्रेषणानन्तरं होत्रा पठ्यमाना प्रणवान्ता ऋक् याज्या यजेत्यनन्तरं वौषडित्यन्तं पठ्यमाना ऋक् अनुवाक् । सप्रवर्ग्यविभवैः प्रवर्ग्यशब्देन निरन्तरं उच्यमानाः प्रणवान्ता ऋचः उच्यन्ते तेषां विभवेन विविधप्रकारेण सहितैः अभिष्टवैः ऋग्विशेषैश्च दैवततीः दैवतानां देवानां ततीः समूहान् 'वृन्दारका दैवतानि पुंसि वा देवतास्त्रियां' इत्यमरः अतोषयत् सन्तोषयामास । 'तुष प्रीतौ' इत्यतो लङ् परस्मैपदम् ॥ ४८ ॥

स प्रयुज्य निशिता निशातधीर्वैश्वदेववरशास्त्रसन्ततीः ।
राक्षसासुरनिरासकृत् सुरान् वीरवर्य इव भागमापयत् ॥ ४९ ॥

भावप्रकाशिका – विश्वदेवाग्निमारुतमरुत्वतीयश्रेष्ठा विश्वदेवसम्बन्धिनीस्तत्तन्मन्त्र सम्बन्धेनास्त्ररूपा आयुधसन्ततीश्च ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – स प्रयुज्येति ॥ निशाता निशिता शिक्षितेति यावत् धीः यस्य स श्रीमध्वानुजः । निशिताः वीर्यवतीः । विश्वे च देवाश्च अग्निमारुतमरुत्वन्तस्तेषां

सम्बन्धीनि वैश्वदेवानि तानि च तानि वरशास्त्राणि च तत्तन्मन्त्रसम्बन्धेनोत्तमास्त्ररूपा ऋचश्च तेषां सन्ततीः समूहान् प्रयुज्य । राक्षसाश्च असुराश्च तेषां निरासं करोतीति तादृशः सन् । यज्ञविघ्नकरराक्षसासुरनिरासकरस्सन्नित्यर्थः । सुरान् देवान् भागं हविर्भागं वीरवर्य इव वीर्यश्रेष्ठ इव आपयत् प्रापयामास । यथा कश्चिद्वीरश्रेष्ठः न्यायमार्गे स्थितः शस्त्रसन्ततीः प्रयुज्य अन्यायेन धनादिभागमिच्छतो दुष्टान् निरस्य तद्भागार्हान् भागं आपयेत् तद्वत् इति भावः ॥ ४९ ॥

मन्दोपकारिणी – स इति ॥ निशाता धीः बुद्धिः यस्य स तथोक्तः सः मध्वानुजः निशिताः वीर्यवतीः वैश्वदेववरशस्त्रसन्ततीः विश्वेषां देवानां सम्बन्धीनि वैश्वदेवानि वराणि च तानि शस्त्राणि च यज्ञे शंसनीयऋगात्मकमन्त्रविशेषाश्च वरशस्त्राणि वैश्वदेवानि च तानि वरशस्त्राणि च तेषां सन्ततीः समूहान् प्रयुज्य जस्वा । राक्षसासुरनिरासकृत् राक्षसाः रात्रिचराश्च असुराः दैत्याश्च राक्षसासुराः तेषां निरासं निवारणं करोतीति राक्षसासुर-निरासकृत् 'असुरा दैत्यदैतेयाः' इत्यमरः । सुरान् देवान् भागं हविर्भागं आपयत् प्रापयामास । 'आप्लृ व्याप्तौ' इत्यतो णिजन्तात् लङ् परस्मैपदम् । क इव वीरवर्य इव कश्चिद्वीरश्रेष्ठः यथा शस्त्रसन्ततीः प्रयुज्य अन्यायेन भागमिच्छतो दुष्टान् निरस्य न्यायमार्गस्थितान् पुरुषान् तद्भागान् प्रापयेत् तद्वत् मध्वानुजोऽपि स्वायोग्यहविर्भागं आहर्तुं आगतान् राक्षसादीन् ऋङ्मन्त्रजपेन दूरीकृत्य स्वयोग्यहविर्भागं स्वीकर्तुं आगतान् देवान् तद्भागं प्रापयामास इति भावः ॥ ४९ ॥

वायुना त्रिरपि पूर्वपायिना सर्वदैवतजिता तरस्विना ।
योऽपरोक्षवपुषाऽप्यपेक्षितः कोऽत्र वर्णयति तं महाक्रतुम् ॥ ५० ॥

भावप्रकाशिका – ''देवा वै सोमस्य राज्ञोग्रवेगे(वेये) न समपादयन्नहं प्रथमं पिबेयमहं प्रथमं पिबेयमित्येवाकामयन्त ते सम्पादयंस्ततोऽब्रुवन् । हन्ताहिमया समयो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति तथेति आजिमयुस्तेषामाजिं यातानामभिसृष्टानां वायुर्मुखं प्रथमः प्रत्यपद्यताथेन्द्रो मित्रावरुणावथाश्विनौ सोऽवेदिन्द्रो वायुमुद्वेजयमिति तमनु । परापतत् सह नावथोज्जेयावेति स नेत्यब्रवीदहमेवोज्जेष्यामीति तृतीयमथोज्जायावेति नेति हैवाब्रवीदह-मेवोज्जेष्यामीति तुरीयमथोज्जायावेति तथेति तं तुरीयेत्यार्जतत्तुरीयभागिन्द्रोऽभवत्त्रि-भाग्वायुरित्यैतरेयब्राह्मणे । अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु । त्वं हि पूर्वपा असि । देवा दिधिषे पूर्वपेयमि''त्यादिश्रुतिसिद्धं तत् ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – वायुनेति ॥ त्रिरपि त्रिवारमपि । पूर्वं पातुं शीलमस्येति पूर्वपायी तेन । वेगेन सर्वान् देवान् विजित्य प्रथमत एव सोमं पीतवतेत्यर्थः । सर्वाणि दैवतानि जयतीति तेन । वेगेन सर्वदेवान् जितवेत्यर्थः । तरो वेगोऽस्यास्तीति तेन । 'तरसी बलरंहसी'ति वैजयन्ती । वायुना यः क्रतुः, अपरोक्षं सर्वप्रत्यक्षगोचरं वपुः शरीरं यस्य तेनापि श्रीमध्वरूपेणापीत्यर्थः । अपेक्षितो निष्पन्नो भवेदित्यपेक्षितः । अत्र भुवि तं महाक्रतुं को वर्णयति? न कोऽपि तद्वर्णनसमर्थ इत्यर्थः । वायोः त्रिरपि पूर्वपायित्वञ्च– 'देवा वै सोमस्य राज्ञो देवा दिधिषे पूर्वपेय'मित्यादिश्रुतिसिद्धम् ॥ ५० ॥

मन्दोपकारिणी – वायुनेति ॥ तरस्विना वेगवता सर्वदैवतजिता सर्वाणि च तानि दैवतानि च सर्वदैवतानि जितवता । त्रिरपि त्रिवारमपि पूर्वपायिना सर्वदेवापेक्षया प्रथमं पीतवता वायुना । यः क्रतुः यज्ञः अपरोक्षवपुषाऽपि अपरोक्षं चक्षुगोचरं च तत् वपुः शरीरं च तेनापि अपेक्षितः अयं यज्ञः सम्पूर्णो भवेदिति अपेक्षितः । तं महाक्रतुं अत्र इह लोके कः वर्णयति वर्णयेत् । न कोऽपि स्तोतुं समर्थः इत्यर्थः । पूर्वं देवाः अहं सोमं प्रथमं पिबेयं अहं सोमं प्रथमं पिबेयं इति एवं विवादं कृत्वा ततः युद्धेऽस्मान् यः जेष्यति सः प्रथमं सोमं पास्यतीति निश्चित्य युद्धमकुर्वन् । तदा वायुः वेगेन सर्वान् देवान् पराभूय स्वयमेव त्रिवार-मपि प्रथममेव सोमं अपिबत् । यः एतादृशमहिमा सः वायुः मध्वरूपेण सर्वप्रत्यक्षगोचरः सन् य यज्ञं साङ्गं निष्पादितवान् तं साक्षात् वायुनिष्पन्नयज्ञं इह लोके कः स्तोतुं समर्थः इति भावः । वायोः त्रिवारं पूर्वपायित्वं च देवा वै सोमस्य राज्ञ इत्यादि ऐतरेयब्राह्मणे अग्रं पिबाम मधूनां सुतं वायो दिविष्टिष्वित्यादिमन्त्रवर्णे च प्रसिद्धम् ॥ ५० ॥

ब्रह्मवेदननिविष्टचेतसां कर्म तत्र करणान्तरं भवेत् ।
ज्ञापयन्निति परात्मवेदकः कर्म धर्ममपि स ह्यचीकरत् ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – ब्रह्मेति ॥ ब्रह्मणो गुणपूर्णस्य श्रीहरेः वेदने ज्ञाने निविष्टं निरतं चेतश्चित्तं येषां तेषां ब्रह्मजिज्ञासूनामिति भावः । तत्र ब्रह्मज्ञाने कर्म, अन्यत्करणं करणान्तरं साधनान्तरमित्यर्थः । भवेत् । जिज्ञासुनानु ष्ठितं श्रवणादिकं यथा ज्ञानसाधनं भवेत्तद्वदेव जिज्ञासुना स्वर्गादिफलकामवर्जितेन अनुष्ठितं कर्मापि ज्ञानसाधनं भवेदिति ज्ञापयन् परात्मनः श्रीहरेर्वेदको बोधकः परमात्मज्ञापने प्रवृत्त इति भावः । सः

श्रीमध्वाचार्यः कर्मापि भगवद्विषयकं यज्ञादिकर्मापि धर्मं मुमुक्षुधर्मं अचीकरत् कारयामास हि ॥ ५१ ॥

मन्दोपकारिणी – ब्रह्मेति ॥ ब्रह्मवेदननिविष्टचेतसां ब्रह्मणः परब्रह्मणः वेदने ज्ञाने निविष्टानि निरतानि चेतांसि चित्तानि येषां ते ब्रह्मवेदननिविष्टचेतसः तेषां ब्रह्मजिज्ञासूनां इत्यर्थः । तत्र ब्रह्मज्ञाने कर्म यज्ञादिकर्म करणान्तरं साधनान्तरं भवेत् । यथा ब्रह्मजिज्ञासूनां श्रवणादिकं ज्ञानसाधनं भवेत् तथा तेषां स्वर्गादिफलकामनावर्जितं श्रीविष्णुप्रीत्यर्थमेव अनुष्ठितं यज्ञादिकर्मापि ज्ञानसाधनं भवेत् इति ज्ञापयन् अधिकारिणां आदेशयन् सः मध्वाचार्यः स्वयं परमात्मवेदकः परमात्मनः विष्णोः वेदकः बोधकः परतत्त्वज्ञापनरूपधर्मार्थप्रवृत्तोऽपि इति भावः । कर्मधर्ममपि भगवद्विषयं यज्ञादिकर्माख्यं धर्ममपि अचीकरत् कारयामास । 'डु कृञ् करणे' इत्यतः णिजंताल्लुङ् परस्मैपदं अचीकरत् अचीकरतां अचीकरन् । यद्यपि मध्वः ज्ञानोपदेशायैव अवतीर्णः तथापि ब्रह्मज्ञानार्थिनां निष्कामं यज्ञादिकर्मापि ब्रह्मज्ञानसाधनं अतः अवश्यं कर्म कर्तव्यमिति ज्ञापनाय यज्ञं कारयामास इति भावः ॥ ५१ ॥

यानि यानि चरितानि यानि यानीरितानि च मनोहराण्यहो ।
तानि तानि च वितानचेतसो विश्वविस्मयकराणि भान्ति हि ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – यानीति ॥ वितानं विस्तृतं चेतो यस्य तस्य पूर्णप्रज्ञस्य । यानि यानि चरितानि कर्माणि मनोहराणि यानि यानीरितानि च वचनानि च, तानि तानि विश्वविस्मयकराणि विश्वस्य समस्तजगतो विस्मयकराणि आश्चर्यकराणि सन्ति, भान्ति हि शोभन्ते हि । अहो ! ॥ ५२ ॥

मन्दोपकारिणी – यानीति ॥ वितानचेतसः वितानं विस्तृतं चेतः हृदयं यस्य सः वितानचेताः 'क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके' इत्यमरः तस्य श्रीपूर्णप्रज्ञाचार्यस्य । यानि यानि चरितानि कर्माणि तथा मनोहराणि सुखजनकानि यानि यानि ईरितानि अभिलपनरूपवचनानि अभूवन् तानि तानि चरितानि ईरितानि च । विश्वविस्मयकराणि विश्वस्य सर्वजनस्य विस्मयं आश्चर्यं कुर्वन्तीति विश्वविस्मयकराणि एतादृशानि भान्ति शोभन्ते । हि प्रसिद्धम् । अहो वाचा कर्मणा च विश्वरञ्जनं आश्चर्यम् । 'भा दीप्तौ' इत्यतो लट् परस्मैपदं भाति भातः भान्ति ॥ ५२ ॥

सरस्वतीवृत्तिकरीः शरीरिणामतीत्य बह्वीः समतीतगोत्रकः ।
पुरेव कृष्णप्रियमापदश्रमं पृथुप्रबोधः पुनरुत्तमाश्रमम् ॥ ५३ ॥

भावप्रकाशिका – सरस्वतीः गोदावर्यादिनदीः स्नानपानादिना वृत्तिकरीः स्वर्गादिदानेन प्रवृत्तिकरीर्वाचोऽप्यतीत्य तासां सर्वासां विष्णुविषयत्वसाधनेन मोक्षप्रतिपादनेन । समतीतगोत्रकः समतीतविन्ध्यादिः समतीतवैश्वामित्रादिगोत्रकर्मा च ॥ ५३ ॥

इति नाराणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिाख्यटीकायां नवमः सर्गः ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – सरस्वतीरिति ॥ पृथुः पूर्णः प्रबोधो यस्य स श्रीमध्वः । शरीरमेषामस्तीति तेषां पुरुषाणां वृत्तिं स्नानपानादिना जीवनं कुर्वन्तीति वृत्तिकर्यस्ताः । 'वृत्तिर्वर्तनजीवने' इति वैजयन्ती । बह्वीः सरस्वतीगोदावर्यादिनदीरतीत्य । समतीता गोत्राः सह्यविन्ध्यादिपर्वता येन तादृशः सन् पुरेव पूर्वमिव कृष्णप्रियं श्रीवेदव्यासप्रियमुत्तमाश्रमं श्रेष्ठबदरिकाश्रमं न, विद्यते श्रमो यथा भवति तथाऽश्रमं पुनरापत् प्राप । यद्वा पृथुप्रबोधः । शरीरिणां वृत्तिकरीः स्वर्गादिदानेन प्रवृत्तिकरीः सरस्वतीर्वाचोऽतीत्य । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादीनामापाततः स्वर्गादिविषयकप्रतीतिमुत्पाद्य तत्र प्रवृत्तिकारिणां वचसां विष्णुविषयत्वसमर्थनेन मोक्षपरतां प्रतिपाद्येति भावः । समतीतं गोत्रं विश्वामित्रादि गोत्रविहिताचारविशेषो येन तादृशः सन् । कृष्णप्रियं भगवतःप्रियम् । 'यत्याश्रमे तुरीये वै प्रीतिर्मम गरीयसी' इति वचनान् । उत्तमाश्रमं यत्याश्रमं पुरा ब्रह्मचर्याश्रमानन्तरं यथा प्राप तद्वत् बदरिकाश्रमं प्रापेति भावः । अत्र वंशस्थवृत्तम् । 'जतौ तु वंशस्थमुदीरितं जरा'विति लक्षणात् ॥ ५३ ॥

मन्दोपकारिणी – सरस्वतीरिति ॥ पृथुप्रबोधः पृथु बृहन् प्रबोधः ज्ञानं यस्य स तथोक्तः मध्वाचार्यः । पुनः द्वितीयवारमपि कृष्णप्रियं वेदव्यासस्य प्रीतिविषयं उत्तमाश्रमं उत्तमश्चासौ आश्रमश्च उत्तमाश्रमः सर्वपुण्याश्रमाधिकं बदरिकाश्रमं अश्रमं श्रमरहितं यथा भवति तथा आयासाभावेनेति यावत् आपत् आप । 'आप्लृ व्याप्तौ' इत्यतो लङ् परस्मैपदं आपत् आपतां आपन् । किं कृत्वा शरीरिणां प्राणिनां 'प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः' इत्यमरः । वृत्तिकरीः स्नानपानादिना वृत्तिं शरीरस्थितिं कुर्वन्तीति

वृत्तिकर्यः ताः वह्नीः बहुलाः सरस्वतीः कृष्णवेणीगोदावर्यादिनदीः अतीत्य अतिक्रम्य । 'कूलंकषा निर्झरिणी रोधो वक्रा सरस्वती' इत्यमरः । कथंभूतः समतीतगोत्रकः समतीताः लङ्घिताः गोत्राः सह्यविन्ध्यादिपर्वताः येन स तथोक्तः । 'अद्रिगोत्रगिरिग्रावाचल-शैलशिलोच्चयाः' इत्यमरः । कथमिव । पुरेव भाष्यादिकरणात्पूर्वं यथा बदरिकाश्रमं प्राप तद्वत् इति भावः । पुनः कथमिव । पुरेव यथा ब्रह्मचर्याश्रमानन्तरं उत्तमाश्रमं यत्याश्रमं प्राप तद्वत् । किं कृत्वा । शरीरिणां पुरुषाणां वृत्तिकरीः स्वर्गादिप्रतिपादनेन कर्मणि प्रवृत्तिकरीः सरस्वतीः वाचः । 'गीर्वाग्वाणी सरस्वती' इत्यमरः । अतीत्य अतिक्रम्य । ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यादीनां आपाततः स्वर्गादिविषयत्वप्रतीतिं उत्पाद्य यज्ञादिकर्मणि प्रवृत्तिजनकानां वचसां विष्णुविषयत्वसमर्थनेन मोक्षपरत्वं प्रतिपाद्येति भावः । कथंभूतः । समतीतगोत्रकः समतीतं वर्जितं गोत्रकं स्वकुलाचारविशेषः येन स तथोक्तः यतेः स्वकुलाचारस्य अकर्तव्यत्वात् इति भावः । कथंभूतम् । उत्तमाश्रमं कृष्णप्रियं वसुदेवसुतस्य श्रीकृष्णस्य प्रियं 'यत्याश्रमे तुरीये वै प्रीतिः मम गरीयसी' इति भगवद्वचनात् । यत्याश्रमः श्रीकृष्णप्रिय इति प्रसिद्धमेव । 'वदन्ति वंशस्थविलं जतौ जरौ' इत्युक्तेः वंशस्थविलं वृत्तम् ॥ ५३ ॥

सहभोगमनन्यलभ्यमस्मै हनुमद्रूपवते ददौ पुरा हि ।
अनवेक्ष्य परं स्वभीष्टकर्त्रे प्रतिदातुं हरिरैधयत्तमेव ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – सहभोगमिति ॥ हरिः पुरा रामावतारे हनूमद्रूपमस्यास्तीति तस्मै । अस्मै श्रीमध्वाय अन्येन लभ्यो न भवतीत्यनन्यलभ्यस्तम् । सह भुज्यतेऽत्रेति सहभोगः तं सहभोगनामकं विरिञ्चिलोकस्वामिभावं ददौ हि । इदानीं पुनः सुष्ठु यदभीष्टं वेदान्तशास्त्रभाष्यकरणेन विवरणाद्यात्मकाभीष्टं तस्य कर्त्रे । प्रतिदातुं अन्यत् अनवेक्ष्य अदृष्ट्वा तमेव पूर्वदत्तं सहभोगमेवैधयद्वर्धयामास । सातिशयमकरोदिति भावः । अत्र 'विषमे ससजा गुरू यदि स्युः सभरायश्च युजीह चन्द्रिका से'ति लक्षणाच्चन्द्रिकावृत्तम् ॥ ५४ ॥

मन्दोपकारिणी – सहभोगमिति ॥ हरिः वेदव्यासः । हि यस्मात् पुरा रामावतारे हनुमद्रूपवते अस्मै श्रीमध्वाय अनन्यलभ्यं अन्येन लब्धुं शक्यः अन्यलभ्यः न अन्यलभ्यः अनन्यलभ्यः तं सहभोगं तन्नामकं विरिंचिपदं ददौ दत्तवान् । अतः कारणात् इदानीं पुनः

स्वभीष्टकर्ते सुष्ठु सम्यक् अभीष्टस्य वेदान्तशास्त्रविचारणात्मकाभीष्टस्य कर्त्रे अस्मै श्रीमध्वाय प्रतिदातुं परं सहभोगात् अन्यद्वस्तु अनवेक्ष्य अदृष्ट्वा तमेव पूर्वं दत्तसहभोगमेव ऐधयत् अभिवर्धितवान् सातिशयमकरोत् । श्रीमध्वाचार्यः वेदव्यासाज्ञया वेदादिनिर्णायकब्रह्म-सूत्रादिव्याख्यानरूपं ग्रन्थं कृत्वा पुनः बदरिकाश्रमं प्राप्य वेदव्यासं प्रति स्वकृतभाष्य-करणरूपसेवां समर्पयामास । ततः सन्तुष्टो भगवान् वेदव्यासः अन्यासाध्यस्वकार्यकर्त्रे श्रीमध्वाय फलत्वेन रामावतारे हनुमद्रूपाय अस्मै दत्तमेव सहभोगं अतिशयितभोगयुक्तं चकार । तदतिरिक्तस्य फलस्य तद्योग्यस्य अभावात् इति भावः । 'एध वृद्धौ' इत्यतो णिजन्तात् लङ् परस्मैपदं ऐधयत् ऐधयतां ऐधयन् । 'विषमे ससजागुरू यदि स्युः सभरायश्च युजीह चन्द्रिका सा' इत्युक्तेः चन्द्रिकावृत्तं मालभारिणी इति उच्यते ॥ ५४ ॥

प्रणम्य गुरुमादरादथ नियोगतो योग्यतः स तस्य जगतां हितं विदधतो गतः सानुगः ।
महिष्ठहृदयो महामहिमसिन्धुरानन्दतो निजैरभिगतोऽनमद्रजतपीठवासं हरिम् ॥५५॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते श्रीसुमध्वविजये महाकाव्ये आनन्दाङ्के नवमः सर्गः ॥

पदार्थदीपिकोद्बोधिका – प्रणम्येति ॥ महिष्ठं महत् हृदयं ज्ञानं यस्य स श्रीमध्वः । महान् यो महिमा तेन सिन्धुरिव सिन्धुः पूर्ण इत्यर्थः । गुरुं श्रीवेदव्यासं आदरात् प्रणम्य । अथ जगतां हितं विदधतः कुर्वतः तस्य श्रीवेदव्यासस्य । योग्यतः स्वेन कर्तुं योग्यान्नियोगतः नियोगात् आज्ञया इत्यर्थः । सानुगः सपरिवारः सन् गतः बदरिकाश्रमे श्रीव्यासं नत्वा तदाज्ञया ततो निवृत्तः सपरिवारः पुनरपि रजतपीठपुरं गतः सन् इति भावः । आनन्दतः सन्तोषात् निजैः स्वभक्तैः अभिगतः सन् रजतपीठे वासो यस्य तं श्रीहरिं अनमत् । 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुरि'ति वचनात् पृथ्वीवृत्तम् ॥ ५५ ॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ
पदार्थदीपिकोद्बोधिकायां नवमः सर्गः ॥

मन्दोपकारिणी – प्रणम्येति ॥ महामहिमसिन्धुः महान्तश्च ते महिमानश्च महामहिमानः तैः सिन्धुः सर्वपूज्यमाहात्म्यसागरः । महिष्ठहृदयः महिष्ठं अतिशयेन महत् सर्वविषयकं हृदयं मनः यस्य स तथोक्तः सः मध्वः । अथ पुनरपि जगतां हितं विदधतः कुर्वतः । तस्य वेदव्यासस्य योग्यतः स्वेन कर्तुं योग्यात् नियोगतः 'त्वं पुनः भूमिं गत्वा सच्छास्त्रोपदेशेन सज्जनान् उद्धर' इत्येवंरूपात् नियोगात् आज्ञाया इत्यर्थः । गुरुं वेदव्यासं आदरात् प्रणम्य बदरिकाश्रमात् गतः निर्गतः सानुगः अनुगैः परिवारैः शिष्यैः सहितस्सन् रजतपीठपुरं गतः प्राप्तवान् सन् निजैः रजतपीठस्थैः स्वभक्तैः आनन्दतः सन्तेषात् अभिगतः आभिमुख्येन प्राप्तस्सन् रजतपीठवासं रजतपीठे वासो यस्य सः तं हरिं अनन्तेश्वरं अनमत् नमस्कृतवान् । 'णमु प्रह्वत्वे' शब्दे चेत्यतो लङ् परस्मैपदं अनमत् अनमतां अनमन् । 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इत्युक्तेः पृथ्वीवृत्तम् ॥ ५५ ॥

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां नवमः सर्गः ॥ ९ ॥

दशमः सर्गः

सपदि समस्कुरुत भृशं माधवगुणसाधकोऽथ मध्वरविः ।
भृगुकुलतिलकस्थानं तापकरः पापपान्थानाम् ॥ १ ॥

भावप्रकाशिका — समस्कुरुत 'सम्परिभ्यां करोतौ भूषण' इति सुडागमः । माधवः श्रीकान्तो वसन्तोत्तरभागश्च । भृगुकुलतिलकस्थानं परशुरामक्षेत्रं शुक्रक्षेत्रं वृषभराशिं च ॥ १ ॥

पदार्थदीपिकोद्बोधिका – सपदीति ॥ अथ मायाः लक्ष्म्याः धवस्य भर्तुः माधवस्य ये गुणा ज्ञानानन्दादयः तेषां साधकः प्रतिपादकः । पापाः पापिष्ठाः 'अर्शाद्यच्' कुवादिनः त एव पान्थाः अध्वगाः तेषां तापकरो वादेन सन्तापकारी मध्वरविः मध्वाख्यभानुः । सपदि भृगोः कुलस्य गोत्रस्य तिलक इव श्रीपरशुरामः तस्य स्थानं देशम् । परशुराम-सृष्टतौलवमण्डलं इत्यर्थः । भृशं सम्यक् समस्कुरुत अलञ्चक्रे । सम्पूर्वात् कृञो लङ् सम्परिभ्यां इति सुट् ।

माधवस्य वसन्तस्य गुणा धर्मभूता बकुलाशोकचम्पकादिविकासः कोकिलकूजितादयश्च तेषां साधकः स्वप्रकाशेन सम्पादकः । 'चैत्रादिमासौ मधुमाधवौ द्वौ' इति हलः । पापा उलूकादिक्रूरप्राणिनः ते च पान्थाश्च तेषां तापकरो रविः । भृगुकुलतिलकस्य शुक्रस्य स्थानं वृषभराशिं यथा स्वावस्थानेन अलङ्कुर्यात् तद्वत् इति भावः । आर्यावृत्तम् । 'यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्ये'त्युक्तेः ॥ १ ॥

मन्दोपकारिणी — सपदीति ॥ अथ रजतपीठपुरं प्रति आगमनानन्तरं मध्वरविः मध्वाख्यसूर्यः । 'तपनः सविता रविः' इत्यमरः । सपदि शीघ्रं 'द्राङ्मंक्षु सपदि द्रुतं' इत्यमरः । भृगुकुलतिलकस्थानं भृगोः भृगुऋषेः कुलस्य तिलकः तिलकसदृशः परशुरामः तस्य स्थानं तत्सृष्टं चोलमण्डलाख्यं देशम् । भृशं सम्यक् समस्कुरुत अलञ्चक्रे । 'सम्पर्युपेभ्यः करोतौ भूषणे' इति सुडागमः । 'डु कृञ् करणे' इत्यतो लङात्मनेपदं समस्कुरुत समस्कुर्वातां समस्कुर्वत । कथंभूतः । माधवगुणसाधकः मायाः लक्ष्म्याः धवस्य भर्तुः नारायणस्य गुणानां ज्ञानानन्दादीनां साधकः प्रतिपादकः । 'इन्दिरा लोकमाता मा'

इत्यमरः । 'धवः प्रियः पतिर्भर्ता' इति च । पुनः कथंभूतः । पापपान्थानां पापाः मायावादिप्रभृतिपापिनः एव पान्थाः पथिकाः तेषां 'अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकः' इत्यमरः । तापकरः तापं सन्तापं करोतीति तापकरः । श्रीमध्वाचार्यः बदरिकाश्रमात् रजतपीठपुरं प्राप्य ततः शीघ्रमेव मार्गे विद्यमानमायावादिप्रभृतिदुर्वादिनः शास्त्रेण नारायणस्य ज्ञानानन्दाद्यनन्तगुणवत्त्वं प्रतिपादयन् पराजित्य चोलमण्डलं प्राप इति भावः । तत्र दृष्टान्तः रविः । कथम् ? माधवगुणसाधकः माधवः वसन्तर्तुभागः वैशाखमासः 'मधुश्च माधवश्च वासन्तिकावृतू' इति श्रुतेः । 'वैशाखे माधवो राधः' इत्यमरः । एकदेशेन समग्रः वसन्तर्तुः गृह्यते । तस्य वसन्ततोः गुणाः बकुलचम्पकमल्लिकादिनानाकुसुममनोहरत्वं कोकिलकूजितवत्ता चेत्यादयः तेषां साधकः । सूर्यप्रकाशेन हि वसन्ते कुसुमोत्पत्त्यादिः भवति । तापकरः मार्गस्थानां जनानां सन्तापकरश्च एतादृशः सूर्यः यथा भृगुकुलोत्पन्नस्य शुक्रस्य स्थानं वृषभराशिं स्वावस्थानेन अलङ्कुर्यात् तद्वत् इति भावः । आर्यावृत्तं 'यस्याः प्रथमे पादे द्वादशमात्राः तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या' इत्युक्तेः ॥ १ ॥

दशमतिशिष्यः कश्चित् शुभजनतायै कुतूहलनतायै ।
विविधसुवृत्तं वाक्यं काव्यमिवोचे सनायकस्तवकम् ॥ २ ॥

भावप्रकाशिका — सुवृत्तानि आर्यागीत्यादिकानि सुचरितानि च । नायकः काव्यप्रतिपाद्यगुणः स्वामी च ॥ २ ॥

पदार्थदीपिकोद्बोधिका – दशेति ॥ कश्चित् दशमतेः श्रीपूर्णप्रज्ञस्य शिष्यः । कुतूहलेन बदरिकाश्रमगमनादिकं श्रुत्वा विस्तरेण श्रोतुं कुतूहलेन नतायै नम्रायै । जनानां समूहो जनता शुभा सती या जनता तस्यै । विविधानि नानाविधानि सुवृत्तानि श्रीमध्वचरित्राणि यस्मिन् प्रतिपादकत्वेन तत् । आर्यातोटकादिनानावृत्तयुक्तं सुवृत्तं काव्यमिव । नायकः स्वामी श्रीमध्वः तस्य स्तवेन स्तुत्या सहितं सनायकस्तवकम् । स्वार्थे कः । काव्यमपि काव्यनायकस्तवसहितम् । वाक्यं, काव्यमिवोचे । वृत्तं गीतिः 'आर्या प्रथमार्धसमं यस्या अपरार्धमाह तां गीतिम्' इत्युक्तेः ॥ २ ॥

मन्दोपकारिणी — दशेति ॥ कश्चित् दशमतिशिष्यः दशमतेः पूर्णप्रज्ञाचार्यस्य शिष्यः । कुतूहलनतायै कुतूहलेन सन्तोषातिशयेन नतायै नम्रीभूतायै । शुभजनतायै जनानां समूहः जनता शुभा च सा जनता च शुभजनता तस्यै । वाक्यं ऊचे अवोचत् । कथंभूतं वाक्यम् । विविधसुवृत्तं विविधानि शोभनानि वृत्तानि चरित्राणि यस्मिन् तत् तथोक्तम् । श्रीमध्वस्य नानाचरित्रप्रतिपादकं इत्यर्थः । पुनः कथंभूतम् । सनायकस्तवकं नायकस्य स्वामिनः मध्वाचार्यस्य स्तवकं स्तवमेव स्तवकं स्तोत्रम् । स्वार्थे कप्रत्ययः। नायकस्तवकेन सहितं सनायकस्तवकम् । कथमिव काव्यमिव गद्यपद्यात्मकप्रबन्धमिव । कथंभूतं काव्यम् । विविधसुवृत्तं विविधानि अनेकप्रकाराणि सुवृत्तानि आर्यागीतितोटकपृथिवीत्यादिपद्यानि यस्मिन् तत्तथोक्तम् । 'वृत्तं पद्ये चरित्रे' इत्यमरः । पुनः कथंभूतम् ? सनायकस्तवकं काव्यनायकस्तोत्रसहितम् । चोलमण्डले तद्देशस्थाः जनाः मध्वाचार्यस्य बदरिकाश्रमं प्रति गमनागमनादिमाहात्म्यं श्रुत्वा अत्यन्ताश्चर्ययुक्तास्सन्तः तन्माहात्म्यं विस्तारेण श्रोतुकामाः केचन मध्वाचार्यशिष्यं अपृच्छन् । स शिष्यः अत्यन्तौत्सुक्ययुक्तेभ्यः तेभ्यः अनेकविधचरित्रप्रतिपादकं स्तुतिपरं वाक्यं प्रोवाच । यथा लोके काव्यं कथयन्ति तद्वत् इति भावः । 'वच परिभाषण' इत्यतो लिडात्मनेपदं ऊचे ऊचाते ऊचिरे । वृत्तं तु गीतिः 'आर्या प्रथमार्धसमं यस्या अपरार्धमीरिता गीतिः' इत्युक्तेः ॥ २ ॥

भुवनाद्भुतमध्वचेष्टितं न वदेमापि सुरायुषा वयम् ।
सकलं खलु किन्तु किञ्चिदप्यथ शुश्रूषुजनाय वर्ण्यते ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – भुवनेति ॥ वयं सुरायुषापि भुवनेषु अद्भुतं आश्चर्यं यन्मध्वचेष्टितं श्रीमध्वाचार्यचरित्रं सकलं समस्तं न वदेम खलु । देवानां आयुषापि सर्वं वक्तुं असमर्था इति भावः । तर्हि नोच्यतां इत्याशङ्क्य परिहरति किन्त्विति । किन्त्वथापि शुश्रूषुजनाय श्रोतुमिच्छवे जनाय किञ्चिदपि अल्पं वा वर्ण्यते । सुन्दरीवृत्तम् । 'अयुजोर्यदि सौ जगौ लगौ समयो स्भौ रलगाश्च सुन्दरी'त्युक्तेः ॥ ३ ॥

मन्दोपकारिणी — किमवोचदित्यतः स्वाहंकारं तावत् परिहरति ॥ **भुवनेति** ॥ वयं अहं च यूयं च अन्ये च इति वयं मदादयः सर्वेऽपीत्यर्थः । भुवनाद्भुतमध्वचेष्टितं सर्वलोकेषु अत्यद्भुतं मध्वस्य चेष्टितं चरित्रं सुरायुषापि देवानां आयुष्येणापि देवमानेन

शतवत्सरकालेनापि इत्यर्थः । सकलं समस्तं न वदेम खलु वक्तुं न समर्थाः हि । मध्वाचार्यचरित्राणां अपरिमितत्वात् बहुकालेनापि सर्वं वक्तुं अशक्ताः भवाम इति भावः । 'वद व्यक्तायां वाचि' लिङ् परस्मैपदं वदेयं वदेव वदेम । तर्हि नोच्यते किम् ? इत्याशङ्कां परिहरति ॥ किं त्वित्यादिना । अथ यद्यपि न शक्यं किं त्वित्यस्य तथापि इत्यर्थः । तथापि शुश्रूषुजनाय श्रोतुं इच्छावान् शुश्रूषुः स चासौ जनः तस्मै किंचिदपि अल्पं च 'किंचिदीषन्मनागल्पे' इत्यमरः वर्ण्यते उच्यते । 'वर्ण स्तुतौ' लडात्मनेपदं वर्ण्यते वर्ण्येते वर्ण्यन्ते । वृत्तं तु 'विषमे ससजा गुरुः समे सभरालोऽथ गुरुर्वियोगिनी (सुन्दरी)' इत्युक्तेः सुन्दरीवृत्तम् ॥ ३ ॥

क्वचिदीश्वरदेवमेष भूपं खननं पान्थजनं विधापयन्तम् ।
स्वमपि प्रतिचोदयन्तमूचे क्रियया नोऽकुशलान् प्रबोधयेति ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – क्वचिदिति ॥ एषः क्वचित् कुत्रचित् देशविशेषे पान्थजनैः पथिकैः खननं खननव्यापारं विधापयन्तं कारयन्तम् । स्वमपि आत्मानमपि प्रतिचोदयन्तं भवद्भिरपि खननं कर्तव्यमिति सपरिवारं प्रतिचोदयन्तं ईश्वरदेवं तन्नामकं भूपम् । न कुशला अकुशलाः तान् । खननविषये चातुर्यरहितानित्यर्थः । नोऽस्मान् क्रियया प्रबोधय ज्ञापय । त्वमेव किञ्चित् खननं कृत्वैवं क्रियतामित्यस्मान् प्रदर्शय इत्यूचे । चन्द्रिकावृत्तम् । 'विषमे ससजा गुरू यदि स्युः सभरा यश्च युजीह चन्द्रिका सा' इत्युक्तेः ॥ ४ ॥

मन्दोपकारिणी — इदानीं मध्वचरित्राणि क्रमेण अनुवदति यथामति ॥ **क्वचिदिति** ॥ एषः मध्वाचार्यः । क्वचित् देशविशेषे पान्थजनं पान्थश्चासौ जनश्च तं मार्गस्थजनं खननं कुद्दालैः करणैः भूमिविदारणं विधापयन्तं स्वमपि स्वात्मानमपि प्रतिचोदयन्तं भवद्भिरपि खननं क्रियतां इति प्रेरयन्तं ईश्वरदेवं ईश्वरदेवनामानं भूपं प्रति ऊचे । किमिति ? हे राजन् त्वं, अकुशलान् खननविषये चातुर्यरहितान् नः अस्मान् क्रियया खननरूपक्रियया प्रबोधय ज्ञापय इति ऊचे इत्यन्वयः । 'बुध अवगमे' इत्यतो णिजन्तात् लोट् बोधय बोधयतं बोधयत । बदरिकाश्रमगमनकाले कस्मिंश्चित् देशे ईश्वरदेवाख्यो राजा मार्गस्थैः विष्टिगृहीतैः जनैः भूमिं खनयित्वा तटाकादिकं कारयन् अभूत् । तन्मार्गे श्रीमध्वाचार्ये गतवति सति एवं मध्वाचार्यमपि विष्ट्या गृहीत्वा राजा त्वमपि खननं कुरु इति अब्रवीत् । एवं राज्ञोक्तो

मध्वः खननप्रकारं अजानतः अस्मान् कुद्दालं गृहीत्वा किञ्चित् खननं कृत्वा एवं भवद्भिरपि खननं क्रियतां इति अस्माकं खननप्रकारं प्रदर्शय इति ऊचे इति भावः । चन्द्रिकावृत्तं 'विषमे ससजा गुरू यदि स्युः सभरा यश्च युजीह चन्द्रिका सा' इत्युक्तेः ॥ ४ ॥

प्रकारं प्रकटीकर्तुमारभ्य विरराम नो ।
महीयोमतिमाहात्म्याद्वैवश्येन खनन् खलः ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – प्रकारमिति ॥ खलः ईश्वरदेवः प्रकारं खननप्रकारं प्रकटीकर्तुं स्वयं क्रियया स्पष्टीकर्तुमारभ्य । महीयसी अतिमहती मतिः यस्य स श्रीपूर्णप्रज्ञः तस्य माहात्म्यात् सामर्थ्यात् । विवशस्य परवशस्य भावो वैवश्यं तेन खनन् सन् न विरराम। रमु क्रीडायां लिट् । 'व्याङ्परिभ्य' इति परस्मैपदम् । पथ्यावक्त्रवृत्तम् । 'युजश्चतुर्थतोजेन पथ्यावक्त्रं प्रकीर्तितमि'त्युक्तेः ॥ ५ ॥

मन्दोपकारिणी — प्रकारमिति ॥ खलः नीचः 'क्रूरे नीचेऽधमे खले' इत्यमरः ईश्वरदेवः । प्रकारं खननप्रकारं प्रकटीकर्तुं क्रियया ज्ञापयितुं आरभ्य आरम्भं कृत्वा । महीयोमतिमाहात्म्यात् अतिशयेन महती महीयसी पूर्णा मतिः प्रज्ञा यस्य तस्य माहात्म्यात् महिम्नः । वैवश्येन विवशस्य भावो वैवश्यं तेन परवशत्वेन इत्यर्थः । खनन् खननक्रियां कुर्वन् नो विरराम न समापितवान् । खननप्रकारं दर्शय इत्युक्तो राजा तत्प्रकारं ज्ञापयितुं स्वयं कुद्दालं गृहीत्वा खनन् मध्वाचार्यमहिम्ना परवशस्सन् सायंकालपर्यन्तं खननं न तत्याज इति भावः । विपूर्वात् 'रमु क्रीडायां' लिट् रराम रेमतुः रेमुः । पथ्यावक्त्रं वृत्तं 'वक्त्रं नाद्यन्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् । युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं' इति तल्लक्षणात् ॥ ५ ॥

नानेनेनानेनानेनोनूनेन ननु नुन्नाः ।
नानाना नो नूनं नानेनानूननाऽनुन्नः ॥ ६ ॥

भावप्रकाशिका — न । अनेनेन । अनेन । अनेनोनूनेन । ननु । नुन्नाः । नानानाः । नो । नूनम् । नानेनानूनना । अनुन्नः । इति पदच्छेदः । कथमिदं महीयोमतिमाहात्म्यात्सम्भवतीत्याशङ्क्योच्यते । अनेन ननु नानानाः न नुन्नाः नो । अनेन

प्राणांशेन ननु नानाप्राणिनः न प्रेरिता नो । अनाः प्राणास्तत्सम्बन्धित्वादानाः प्राणिनः । कीदृग्भूतेन अनेनोनूनेन अनेनाश्चायमनूनश्चेति । नूनं प्रायः कुतः । नानेनानूनना नानेनेषु नानेश्वरेषु ब्रह्मरुद्रादिषु अनूनना । पूर्णपुरुषः अनेनाप्रेरितः ॥६॥

पदार्थदीपिकोद्बोधिका – महीयोमतिमहात्म्यमुपपादयति– **नेत्यादिना** ॥ न । अनेनेन । अनेन । अनेनोनूनेन । ननु । नुन्नाः । नानानाः । नो । नूनं नानेनानूनना । अनुन्नः । इति पदच्छेदः । अनेनोनूनेन, न विद्यते एनः पापं यस्य सोऽनेनाः निर्दोषः इति यावत् । अनूनो गुणादिभिः नूनो न भवति इति अनूनः अनेनाश्चासावनूनश्चेत्यनेनोनूनः तेन। अनेनेन, अनानां प्राणानां इनः स्वामी तेन । अनेन श्रीमध्वरूपिणा मुख्यप्राणेन । नानानाः अनाः प्राणाः तत्सम्बन्धित्वात् आनाः प्राणिनः नानाविधाश्च ते आनाश्च नानानाः । यद्वा, अनाः प्राणा येषां सन्तीत्यनाः । अर्शादित्वान्मत्वर्थेऽच्, नानाविधाश्च तेऽनाः प्राणिनश्चेति नानाना इति वा । नूनं प्रायः न नुन्नाः न प्रेरिता नो ननु न विद्यन्ते खलु । तर्हि भगवानप्यनेन प्रेरितः किमित्यत आह– नानेति ॥ नानेनानूनना, नानाविधाश्च ते इनाः स्वामिनश्च नानेनाः तारतम्येन नानाविधाः सर्वजीवानाम् ईश्वराः ब्रह्मादयः तेष्वनूनः नूनो न भवति, पूर्णः स चासौ ना पुरुषश्च, अनूनना पूर्णपुरुषः श्रीनारायणः । अनुन्नोऽनेनाप्रेरितः । अत एव प्रायःशब्दार्थकं नूनमिति पदमुक्तमिति भावः । एकाक्षरमुपगीतिवृत्तम् 'आर्यापरार्धतुल्ये दलद्वये प्राहुरुपगीतिमि'त्युक्तेः ॥ ६ ॥

मन्दोपकारिणी — महीयोमतिमाहात्म्यादित्युक्तं मध्वमाहात्म्यमेव आह ॥ **नेत्यादि-श्लोकाभ्याम्** ॥ न । अनेन । अनेनेन । अनेनोनूनेन । ननु । नुन्नाः । नानानाः । नो । नूनं नानेनानूनना । अनुन्नः इति पदच्छेदः । अन्वयस्तु अनेनोनूनेन अनेनेन नानानाः न नुन्ना इति नो ननु । नानेनानूनना नूनं अनुन्नः। अस्यार्थः । अनेनोनूनेन न विद्यते एनः पापं यस्य स अनेनाः निर्दोषः 'कलुषं वृजिनैनोघं' इत्यमरः ऊनोऽधमो न भवतीति अनूनः सर्वजीवोत्तमः इत्यर्थः । अनेनाश्चासौ अनूनश्च अनेनोनूनः तेन । अनेनेन अनानां प्राणानां इनः ईशिता तेन 'भर्तेन्द्र इन ईशिता' इति विश्वः । मुख्यप्राणावतारेण इत्यर्थः । अनेन मध्वाचार्येण नानानाः अनस्य प्राणस्य इमे आनाः प्राणिनः नानाविधाश्च ते आनाश्च नानानाः अनेकप्रकाराः चेतनाः न नुन्ना इति न प्रेरिताः इति । नो ननु नैव किन्तु प्रेरिता एव इति भावः । 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः । सर्वेऽपि चेतनाः

वायुप्रेरिता इति । अस्य अपवादमाह नानेति ॥ नानेनानूनना नानाश्च ते इनाश्च नानेनाः तारतम्योपेताः सर्वजीवानां ईश्वराः ब्रह्मादयाः तेषु अनूनः पूर्णश्चासौ ना पुरुषश्च नानेनानूनना लक्ष्मीपतिः 'ना नरौ नर इति रूपाणि' वायुना नूनं निश्चयेन अनुन्नः प्रेरितो न भवतीति अर्थः । 'नूनं तर्केऽर्थनिश्चये' इत्यमरः । एकाक्षरमुपगीतिवृत्तं 'आर्यापरार्धतुल्ये दलद्वये प्राहुरुपगीतिं' इति तल्लक्षणात् ॥ ६ ॥

यमशेषभवप्रभवः स्मरतामसुखाब्धिरपैति न चित्रमिदम् ।
मरुतीदृशि भान्ति हि यत्स्तवने यमशेषभवप्रभवः स्म रताः ॥ ७ ॥

भावप्रकाशिका — यं स्मरतामशेषसंसारप्रभवोऽसुखाब्धिरपैति । यत्स्तवने च रता यमानन्तरुद्रसमर्था भान्ति स्म ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – यमिति ॥ यं श्रीमुख्यप्राणं स्मरतां सतां, भवे संसारे प्रभवतीति भवप्रभवः संसारे विद्यमान इत्यर्थः । अशेषश्चासौ भवप्रभवश्च । सुखविरुद्धं असुखं दुःखं तदेव अब्धिः अपैति अपगच्छति । इण् गतौ लट् । किञ्च यत्स्तवनं यस्य स्तुतिः तस्मिन् रता निरताः, यमश्च शेषश्च भवो रुद्रः स च यमशेषभवाः ते च ते प्रभवा ईश्वराश्च । जगतामिति शेषः । भान्ति स्म । ईदृशि एतादृशमहागुणे मरुति श्रीमुख्यवायौ इदं 'वैवश्येन खनन् खलो नोपररामे'तीदं चित्रं आश्चर्यं न भवति । यमशेषभवादि जगत्प्रभूणामपि तदधीनत्वादिति भावः । तोटकवृत्तम् 'यदि तोटकमब्धिसकारयुत'मिति तल्लक्षणात् ॥ ७ ॥

मन्दोपकारिणी — यमिति ॥ यं मुख्यप्राणं स्मरतां सज्जनानां अशेषभवप्रभवः भवे संसारे प्रभवः प्रकर्षेण जायमानः भवप्रभवः 'भवः संसारसम्प्राप्तिश्रेयःसंकरजन्मसु' इति विश्वः । अशेषश्चासौ भवप्रभवश्च इति तथोक्तः । असुखाब्धिः दुःखसमुद्रः अपैति अपगच्छति नश्यति इत्यर्थः । 'अप पूर्वात् इण् गतौ' इत्यतो लट् परस्मैपदं एति इतः यन्ति । किञ्च यमशेषभवप्रभवः यमः यमधर्मः शेषः सर्पराजः भवः रुद्रः ते च ते प्रभवः जगदीश्वराश्च इति तथोक्ताः । यत्स्तवने यस्य वायोः स्तुतौ रताः भान्ति स्म शोभन्ते हि । 'भा दीप्तौ' लट् परस्मैपदं भाति भातः भान्ति । ईदृशि एतादृशमाहात्म्यवति मरुति मुख्यप्राणांशभूते मध्वे इदं विवशत्वेन खननोपरमाभावः चित्रं न आश्चर्यं न भवति ।

वायुरूपस्य यस्य मध्वस्य स्मरणेन अशेषसंसारदुःखनिवृत्तिः । जगन्नियामकाः शेषरुद्रादयः सर्वदा वायोः स्तोत्रं कुर्वन्ति। येन मुख्यप्राणेन रमाब्रह्माद्युत्तमं लक्ष्मीपतिं विना अनेकविधाः सर्वेऽपि चेतनाः प्रेरिता एव प्रवर्तन्ते । एवं महामहिमवतः मध्वस्य राज्ञो विवशत्वेन खननोपरत्यभावकरणं आश्चर्यं न । जगत्प्रभूणां शेषरुद्रादीनामपि तदधीनत्वात् इति श्लोकद्वयस्य अभिप्रायः । तोटकवृत्तं 'वद तोटकमब्धिसकारयुतं' इति तल्लक्षणात् ॥७॥

सञ्चरन्नश्चनीयः कदाचिद्विभुर्विष्णुपद्यास्तटं वैष्णवाग्रेसरः ।
प्रापदाप्तैर्निजैरेष शिष्यैर्वृतस्त्यक्तविश्वप्लवं शात्रवातङ्कतः ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – सञ्चरन्निति ॥ सञ्चरन् तत्र तत्र पर्यटन् अश्चनीयः पूज्यः । विष्णोः भक्ताः वैष्णवाः तेषु अग्रेसरः श्रेष्ठः विभुः सर्वसमर्थः । आप्तैः निजैः शिष्यैः वृतः एषः श्रीमध्वः । कदाचित् शात्रवाणां शत्रूणां आतङ्कतो भयात् त्यक्ताः त्याजिता विश्वप्लवाः समस्तनावो यस्मिन् तादृशं विष्णुपद्याः गङ्गायाः तटं तीरं प्रापत् जगाम । स्रग्विणीवृत्तम् । 'कीर्तितैषा चतूरेफिका स्रग्विणी'त्युक्तेः ॥ ८ ॥

मन्दोपकारिणी — चरित्रान्तरं कथयतीत्याह ॥ **सञ्चरन्निति** ॥ सञ्चरन् उत्तरदिशं प्रति मार्गे गच्छन् अश्चनीयः मार्गस्थैः जनैः पूज्यः वैष्णवाग्रेसरः विष्णोः इमे वैष्णवाः विष्णुभक्ताः तेषां अग्रेसरः श्रेष्ठः विभुः ज्ञानपूर्णः निजैः आत्मीयैः आप्तैः सहागतैः प्रियैर्वा शिष्यैः छात्रैः वृतः युक्तः एषः मध्वः कदाचित् कस्मिंश्चिद्दिने विष्णुपद्याः भागीरथ्याः 'गङ्गा विष्णुपदी' इत्यमरः तटं तीरं प्रापत् प्राप्तवान् । किंभूतम् । शात्रवातङ्कतः शात्रवः शत्रवः तेषां आतङ्कतः शङ्कया भयादिति यावत् । त्यक्तविश्वप्लवं विश्वे सर्वे च ते प्लवाः नावश्च विश्वप्लवाः त्यक्ताः विश्वप्लवाः यस्मिन् तत् तथोक्तम् । 'आप्लृ व्याप्तौ' इत्यतो लुङ् परस्मैपदम् । 'कीर्तितैषा चतूरेफिका स्रग्विणी' इत्युक्तेः स्रग्विणीवृत्तम् ॥ ८ ॥

इमान्स्वस्वपूर्वाश्रयानात्मवाक्यात् सलीलं दयालुः स मूलाश्रयात्मा ।
निषेद्धूननादृत्य चानन्यलंङ्घ्यां तदाऽत्याययत् तां नदीं संसृतिं वा ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – इमानिति ॥ दयालुः दयाशीलो मूलाश्रयः सर्वेषां मूलाश्रयभूत आत्मा स्वरूपं यस्य तादृशः सः श्रीमध्वः । तदा, आत्मवाक्यात् स्ववाक्यात्

स्वस्मात् स्वस्मात्पूर्वः स्वस्वपूर्वः स आश्रयो येषां तान् इमान् स्वशिष्यान् । अन्यङ्चा न भवतीति अनन्यङ्चा ताम् । नावा विना अन्येन लङ्घयितुं अशक्यामित्यर्थः। तां नदीं गङ्गां निषेद्धून् 'न गन्तव्यं न गन्तव्य'मिति निवारयतः पुरुषान् अनादृत्य अगणय्य संसृतिं वा संसारमिव लीलया सहितं यथा भवति तथा सलीलं अत्याययत् तारयामास । 'अय गतौ' णिजन्ताल्लङ् । सर्वेषां मूलाश्रयत्वेन अग्रतो यान्तं श्रीमध्वं तद्वचनात् एको जग्राह । तमपि अन्यः तमपि अन्यः इति स्वस्वपूर्वाश्रयात् शिष्यान् क्रमेण, स्वोत्तमभक्तियुक्तान्, स्वयं निषेद्धून् मोक्षविरोधिनः कामक्रोधादीन् अनादृत्य यथा संसारात् तारयति तद्वत् तारयामासेति भावः । भुजङ्गप्रयातं वृत्तम् । 'भुजङ्गप्रयातं चतुर्भिर्यकारैः' इत्युक्तेः ॥ ९ ॥

मन्दोपकारिणी — इमानिति ॥ तदा प्लवरहितकाले दयालुः कृपावान् मूलाश्रयात्मा मूलः सर्वेषां शिष्याणां मूलः आदिभूतः आश्रयात्मा आश्रयभूतस्वरूपः सः श्रीमध्वाचार्यः । आत्मवाक्यात् आत्मनः स्वस्य वाक्यात् वचनतः स्वस्वपूर्वाश्रयान् स्वस्मात् स्वस्मात् पूर्वः पुरतो विद्यमानः पुरुषः आश्रयो एषां ते तथोक्ताः तान् इमान् स्वशिष्यान् । अनन्यलङ्घ्यां अन्यलङ्घ्या न भवतीति अनन्यलङ्घ्या तां नावा विना अन्येन पूरुषेण लङ्घितुं अशक्यां तां नदीं गङ्गाम् । सलीलं लीलया सहितं यथा भवति तथा अनायासेन इत्यर्थः । अत्याययत् तारयामास । अति पूर्वात् 'अय गतौ' इत्यतो णिजंतात् लङ् परस्मैपदं अत्याययत् अत्याययतां अत्याययन् । किं कृत्वा निषेद्धून् न गन्तव्यमिति निवारयतः पुरुषान् अनादृत्य च अलक्षीकृत्य च श्रीमध्वः उत्तरदिशं प्रति गच्छन् मार्गे कदाचित् शत्रुभयात् प्लवरहितगङ्गातीरं प्राप्य प्रथमतः नदीं प्रविश्य यान्तमात्मानं एको गृह्णातु तं च अपरः तमपि अन्यः इति सर्वेऽपि पूर्वपूर्वगन्तुः पृष्ठभागं आश्रयन्तु इत्येवं स्ववचनात् तं एकः शिष्यो जग्राह तं च अन्यः तमपि अपरः इत्येवं स्वस्वपूर्वगन्त्राश्रितान् सर्वान् शिष्यान् अनन्यलङ्घ्यां नदीं तारयामास इति भावः । किं इव संसृतिं वा संसारमिव । 'वा विकल्पोपमानयोः' इत्यमरः । स्वस्वपूर्वाश्रयान् क्रमेण स्वस्वोत्तमभक्तियुतान् इति यावत् । सज्ज्ञनान् स्वयं निषेद्धून् मोक्षविरोधिनः कामक्रोधादीन् अनादृत्य यथा तारयति तथेति भावः । 'भुजङ्गप्रयातं चतुर्भिर्यकारैः' इति तल्लक्षणात् भुजङ्गप्रयातं वृत्तम् ॥ ९ ॥

वारयत वारयत वैरिसुहृदोऽमून् मारयत मारयत पारगमनात् प्राक् ।
आपतत आलपत इत्यवदद्रुचैः स त्वरकराजपुरुषानुचितवाचा ॥ १० ॥

पदार्थदीपिकोद्बोधिका – वारयतेति ॥ सः श्रीमध्वः । वैरिसुहृदोऽस्मद्वैरिप्रियानमून् वारयत वारयत निवारयन्तु निवारयन्तु । पारगमनात् तीरगमनात् प्राक् मारयत मारयत । उभयत्रापि सम्भ्रमे द्विरुक्तिः । इत्यालपतो भाषमाणानापततोऽभित आपततः त्वरकाणां तुरुष्काणां राजा त्वरकराजः तस्य पुरुषान् भटान् उचितवाचा तान् प्रवक्तुमुचितया वाचा । तुरुष्कभाषयेत्यर्थः । उच्चैरित्यवदत् । इन्दुवदनावृत्तम् । 'इन्दुवदना भजसनैः सगुरु-युग्मैरि'त्युक्तेः ॥ १० ॥

मन्दोपकारिणी — वारयतेति ॥ सः मध्वः । त्वरकराजपुरुषान् त्वरकाणां तुरुष्काणां राजपुरुषान् प्रति उचितवाचा तुरुष्काणां योग्यभाषया इत्यर्थः । उच्चैः उच्चध्वनिना इति वक्ष्यमाणरीत्या अवदत् अवोचत् । 'वद व्यक्तायां वाचि' लङ् परस्मै-पदम् । किंभूतान् वैरिसुहृदः वैरिणां शत्रूणां सुहृदः मित्राणि अमून् बाहुभ्यामेव गङ्गां तरतः पुरुषान् वारयत वारयत न गन्तव्यमिति निवारयत । एवं उक्ते सत्यपि अविगणय्य निर्भयेन आगच्छमानान् मध्वादीन् पारगमनात् अस्मत्तीरस्य प्राप्तेः प्राक् पूर्वमेव मारयत मारयत घातयत घातयत । उभयत्र संभ्रमात् द्विरुक्तिः । इति इत्थं आलपतः भाषमाणान् तथा आपततः स्वाभिमुखतः जले पततः । 'वृञ् वरणे' इत्यतो णिजन्तात् लोट् परस्मैपदं वारय वारयतं वारयत । 'मृञ् प्राणत्यागे' इत्यतो णिजन्तात् लोट् परस्मैपदं मारय मारयतं मारयत । इन्दुवदनावृत्तं 'इन्दुवदना भजसनैः सगुरुयुग्मैः' इति तल्लक्षणात् ॥ १० ॥

न जडा जले पतत साहसादहो न भयं हि वो बहुतयाऽबहोर्जनात् ।
भवतां पतिं क्षितिपतिं दिदृक्षवः प्रतियाम केन कलहं चिकीर्षथ ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ हे जडाः ! विवेकशून्याः ! यूयं साहसात् जले न पतत । अहो आश्चर्यम् । भवतां अविवेकितेति भावः । कुत इत्यत आह— नेति । वो युष्माकं बहुतया अस्मदपेक्षया बहुत्वेन अबहोः युष्मदपेक्षया अल्पसंख्याकात् जनात् भयं न हि । इतश्च जले न पततेत्याह— भवतामिति । वयं भवतां पतिं स्वामिनं क्षितिपतिं राजानं दिदृक्षवो द्रष्टुमिच्छवःसन्तः प्रतियाम प्रत्यागच्छाम । तस्मात्केन केन कारणेन कलहं चिकीर्षथ कर्तुमिच्छथ । इत्यवदत् इत्यन्वयः । मञ्जुभाषिणीवृत्तम् । 'सजसा जगौ भवति मञ्जुभाषिणी'त्युक्तेः ॥ ११ ॥

मन्दोपकारिणी — नेति ॥ हे जडाः विवेकरहिताः राजपुरुषाः ! यूयं साहसात् बलात्कारात् जले उदके न पतत न प्रविशत । अहो आश्चर्यं ! भवतां अविवेकित्वम् । कुतः । हि यस्मात् वः युष्माकं बहुतया अस्मदपेक्षया भवतां बहुत्वात् इत्यर्थः । अबहोः युष्मदपेक्षया अल्पात् जनात् अस्मज्जनात् भयं नास्ति अतो न पतत इत्यर्थः । इतश्च जले न पतत । वयं भवतां पतिं स्वामिनं क्षितिपतिं क्षितेः पतिं पालकं राजानं दिदृक्षवः द्रष्टुं इच्छन्तः सन्तः प्रतियाम प्रत्यागच्छाम । तस्मात् केन प्रकारेण कलहं विरोधं चिकीर्षथ कर्तुमिच्छथ इति अवदत् इति अन्वयः । 'या प्रापणे' लोट् परस्मैपदं यानि याव याम । 'डु कृञ् करणे' सन्नन्तात् लट् । 'सजसा जगौ च यदि मञ्जुभाषिणी' इति तल्लक्षणात् मञ्जुभाषिणी वृत्तम् ॥ ११ ॥

वचसेत्यनेन स परान् न्यरुणद् भुजगान्नरेन्द्र इव मन्त्रबलात् ।
उदतारयत्परिजनं मृतिभीसरितश्च देवसरितश्च समम् ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – वचसेति ॥ सः श्रीमध्वः । इत्येवमुक्तेन अनेन वचसा परान् द्विषतः । नरेन्द्रः कश्चिद्गारुडिगः । नरेन्द्रो विषवैद्यश्चेत्यभिधानम् । मन्त्रबलात् मन्त्र-सामर्थ्यात् भुजगानिव सर्पानिव न्यरुणत् रुरोध । 'रुधिर् आवरणे' लङ् । परिजनं स्वसेवकजनं मृतिश्च भीश्च मृतिभियौ तुरुष्केभ्यो मरणभयौ त एव सरित्तस्याः । देवसरितः गङ्गायाश्च समं युगपत् उदतारयत् उत्तारयामास । प्रमिताक्षरावृत्तं 'प्रमिताक्षरा सजससैः कथिता' इत्युक्तेः ॥ १२ ॥

मन्दोपकारिणी — वचसेति ॥ सः मध्वः । इति पूर्वोक्तेन अनेन वचसा परान् शत्रून् 'परोऽरिः परमात्मा च केवले परमेऽव्ययः' इति भास्करः । न्यरुणत् निरोधितवान् । कः कानिव ? नरेन्द्रः गारुडः पुरुषः 'नरेन्द्रो विषवैद्यश्च' इत्यभिधानम् । मन्त्रबलात् मन्त्रसामर्थ्यात् भुजगान् सर्पान् इव तथा परिजनं स्वसेवकजनं मृतिभीसरितः मरणभय-रूपनद्याः देवसरितः भागीरथ्याश्च समं युगपत् उदतारयत् उत्तारयामास । जिघांसूनां आगच्छमाननां शत्रूणां मध्ववचनेन रोधे सति शिष्याः भयं त्यक्त्वा नदीं अतरन् इति भावः । 'रुधिर् आवरणे' लङ् परस्मैपदं अरुणत् अरुन्धां अरुन्धन् । 'तॄ प्लवन तरणयोः' णिजन्तात् लङ् अतारयत् अतारयतां अतारयन् । 'प्रमिताक्षरा सजससैः कथिता' इति प्रमिताक्षरावृत्तम् ॥ १२ ॥

निर्विकारचरितोऽपि परीतः क्रूरकिङ्करसहस्रतयेन ।
स व्रजन्नुदलसज्जगदीशः सिंहराडिव सृगालसमूहे ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – निर्विकारेति ॥ सः जगदीशः श्रीमध्वः । क्रूरं यत्किङ्करसहस्रतयं तुरुष्कराजभृत्यसहस्रं तेन परीतोऽपि परिवृतोऽपि निर्विकारं चरितं व्यापारो यस्य तादृशः सन् व्रजन् गच्छन् सन् । सृगालसमूहे सृगालवृन्दे सिंहराडिव उदलसत् शुशुभे । स्वागतावृत्तम् । 'स्वागता रनभगैर्गुरुणा च' इत्युक्तेः ॥ १३ ॥

मन्दोपकारिणी — निर्विकारेति ॥ जगदीशः जगन्नियामकः सः मध्वः । क्रूरकिङ्करसहस्रतयेन किङ्कराणां राजभृत्यानां तुरुष्काणां सहस्रतयम् । क्रूरं भयंकरं च तत् किंकरसहस्रतयं च तेन । परीतोऽपि परितः आवृतोऽपि निर्विकारचरितः निर्विकारं भयकम्पादिविकाररहितं चरितं कर्म यस्य स तथोक्तः सन् व्रजन् गच्छन् उदलसत् शुशुभे । 'उत् पूर्वकात् लस श्लेषणक्रीडनयोः' इत्यतः लङ् परस्मैपदम् । क इव ? सृगालसमूहे सृगालानां जम्बुकानां समूहे मध्ये 'सृगालवञ्चकक्रोष्टृ' इत्यमरः सिंहराडिव मृगेन्द्रश्रेष्ठ इव । स्वागतावृत्तं 'स्वागता रनभगैर्गुरुणा च' इति ॥ १३ ॥

अप्रकम्प्यवपुषं सुरासुरैः सिंहसंहननमेनमुन्नतम् ।
प्राप्तमात्मनगरान्तिकं नृपः प्रेक्ष्य सौधशिखरे स्थितोऽब्रवीत् ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – अप्रकम्प्येति ॥ सौधशिखरे सौधोपरिभागे स्थितो नृपः तुरुष्कराजः । सुरासुरैः अप्रकम्प्यं अधृष्यं वपुर्यस्य तं सिंहसंहननं वराङ्गरूपोपेतम् । 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः । उन्नतं प्रांशुमेनं श्रीमध्वं आत्मनो नगरान्तिकं नगरसमीपं प्राप्तं प्रेक्ष्य इत्यब्रवीत् । रथोद्धतावृत्तं 'रात्परैर्नरलगै रथोद्धता' इत्युक्तेः ॥ १४ ॥

मन्दोपकारिणी — अप्रकम्प्येति ॥ सौधशिखरे सौधस्य राजसदनस्य 'सौधोऽस्त्री राजसदनम्' इत्यमरः शिखरे उपरिभागे स्थितः विद्यमानः नृपः तुरुष्कराजः । सुरासुरैः सुराश्च असुराश्च तैः । अप्रकम्प्यवपुषं अप्रकम्प्यं चालयितुं अशक्यं वपुः शरीरं यस्य सः तम् । सिंहसंहननं वराङ्गरूपयुक्तं अतिसुन्दरं इत्यर्थः । 'वराङ्गरूपोपेतो यः सिंहसंहननो

हि सः' इत्यमरः । उन्नतं दीर्घदेहं एनं मध्वं आत्मनगरान्तिकं आत्मनः स्वस्य नगरस्य पट्टणस्य अन्तिकं समीपं 'उपकण्ठान्तिकाभ्यर्णः' इत्यमरः । प्राप्तं आगतं प्रेक्ष्य दृष्ट्वा अब्रवीत् । 'ब्रूञ् व्यक्तायां वाचि' लङ् परस्मैपदं अब्रवीत् अब्रूतां अब्रुवन् । 'रान्नराविह रथोद्धता लगौ' इति रथोद्धतावृत्तम् ॥ १४ ॥

रिपुनृपप्रणिधिप्रतिशङ्कया पथिकपाटनकर्मणि दीक्षितैः ।
सुमुख मे परुषैः पुरुषैः कथं यमभटैरिव नासि विहिंसितः ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – रिपुनृपेति ॥ हे सुमुख! रिपुश्चासौ नृपश्च तस्य प्रणिधयो गूढपुरुषा इति या प्रतिशङ्का अशङ्का तया । 'प्रणिधिर्गूढपुरुष' इत्यमरः । पथिकानां पान्थानां पाटनकर्मणि हिंसनकर्मणि दीक्षितैः तदेकनिरतैः यमभटैरिव परुषैः क्रूरैः मे पुरुषैः भटैः कथं विहिंसितः संहतो नासि । द्रुतविलम्बितवृत्तं 'द्रुतविलम्बितमाह नभौ भराविति'त्युक्तेः ॥ १५ ॥

मन्दोपकारिणी — रिपुनृपेति ॥ हे सुमुख सु प्रसन्नं मुखं यस्य स तथोक्तः तस्य सम्बुद्धिः । रिपुनृपप्रणिधिप्रतिशङ्कया रिपुश्चासौ नृपश्च तस्य प्रणिधियः गूढपुरुषाः इति प्रतिशङ्कया । पथिकपाटनकर्मणि दीक्षितैः पथिकानां मार्गस्थजनानां पाटनं हिंसा तद्रूपं च तत् कर्म च तत्र दीक्षितैः तदेकनिरतैः । यमभटैरिव यमदूतैरिव परुषैः निर्दयैः मे पुरुषैः भृत्यैः त्वं विहिंसितः हतः कथं नासि न भवसि । मम शत्रुभूतराज्ञः गूढपुरुषाः एते इति शङ्कया मार्गे आगच्छमानजनवधनिरतैः मम भृत्यैः कथं न हतोऽसीति भावः । 'अस भुवि' लट् परस्मैपदं असि स्थः स्थ । 'द्रुतविलम्बितमाह नभौ भरौ' इति तल्लक्षणात् द्रुतविलम्बितं वृत्तम् ॥ १५ ॥

अप्लवदेवनदीतरणं ते हन्त कथं च चिकीर्षसि किं त्वम् ।
तं निगदन्तमिति प्रभृतीह स्माह महापुरुषोत्तमदासः ॥ १६ ॥

पदार्थदीपिकोद्बोधिका – अप्लवेति ॥ ते तव, न विद्यते प्लवो नावो यस्याः सा च सा देवनदी च तस्याः तरणं लङ्घनं कथं केन प्रकारेण? हन्त! प्लवरहितगङ्गातरणं आश्चर्यमिति भावः । त्वं किञ्च किं वा चिकीर्षसि? इतः परं किं कर्तुमिच्छसि? इत्यब्रवीदिति

पूर्वेणान्वयः । महांश्चासौ पुरुषोत्तमदासश्च स श्रीमध्वः । इह, इति प्रभृतिः आदिः यस्य तदितिप्रभृति इत्यादिवाक्यमित्यर्थः । निगदन्तं तं नृपतिं तद्भाषया इत्याद्यं चित्रं वाक्यं आह स्म इत्युत्तरश्लोकेनान्वयः । दोधकवृत्तं 'दोधकमिच्छति भत्रितयाद्गाविति्युक्तेः ॥ १६ ॥

मन्दोपकारिणी — अप्लवेति ॥ हे सुमुख प्रसन्नवदन ! ते तव अप्लवदेवनदीतरणं न विद्यन्ते प्लवः नावो यस्यां सा अप्लवा च सा देवनदी गङ्गा च तस्याः तरणं उल्लङ्घनं कथं केन प्रकारेण ? हन्त ! प्लवं विहाय गङ्गातरणं आश्चर्यं इति भावः । त्वं किञ्च किं वा चिकीर्षसि ? इतः किं वा कर्तुं इच्छसि ? इत्यादि अब्रवीत् इति पूर्वेण अन्वयः । 'डु कृञ् करणे' सन्नन्तात् लट् परस्मैपदं चिकीर्षसि चिकीर्षथः चिकीर्षथ । महापुरुषोत्तमदासः महांश्चासौ पुरुषोत्तमः तस्य हरेः दासः श्रीमध्वाचार्यः । इतिप्रभृति एवं आदिवाक्यं निगदन्तं ब्रुवन्तं तं तुरुष्कराजं प्रति इह तुरुष्कसभायां तद्भाषया तुरुष्कराजस्य भाषया इत्याद्यं एवमाद्यं चित्रवाक्यं आश्चर्यकरवाक्यं आह स्म अब्रवीत् इति उत्तरश्लोकस्थेन अन्वयः । स्म अतीते । दोधकवृत्तं 'दोधकमिच्छति भत्रितयाद्गौ' ॥ १६ ॥

योऽसौ देवो विश्वदीपः प्रदीप्तः कुर्मः सर्वं तत्परानुग्रहेण ।
यामस्तावत् तूर्णमाशामुदीचीमित्याद्यं तद्भाषया चित्रवाक्यम् ॥ १७ ॥

भावप्रकाशिका – किं ललाटे इति पृष्टो राज्ञा करेण गदां भवन्तो बिभ्रन्ति वयं ललाटे इत्यूचे इत्याद्यशब्दार्थः ।

पदार्थदीपिकोद्बोधिका – य इति ॥ विश्वं दीपयति प्रकाशयति इति विश्वदीपः । विश्वप्रकाशको योऽसौ देवः प्रदीप्तः प्रकाशमानः । सर्वं अशेषं कर्म तत्परानुग्रहः तस्य परमानुग्रहः तेन कुर्मः । कथं अप्लवदेवनदीतरणं इत्यादेरिदमुत्तरम् । तावत् तूर्णं उदीचीं आशां उत्तरां दिशं यामो गच्छामः । किं चिकीर्षसि इत्यस्योत्तरमेतत् । इति आद्यं यस्य तदित्याद्यं चित्रवाक्यं तद्भाषया आह स्म । शालिनीवृत्तम् । 'मस्तौ गौ चेच्छालिनी वेद लोकै'रित्युक्तेः ॥ १७ ॥

मन्दोपकारिणी — य इति ॥ यः विश्वदीपः जगतः प्रकाशकः असौ सूर्यस्थितः देवः नारायणः प्रदीप्तः प्रकाशमानो वर्तते । तत्परानुग्रहेण तस्य परमात्मनः परेण उत्तमेन

अतिशयितेन अनुग्रहेण सर्वं अन्यासाध्यनदीतरणादिसमस्तं कर्म वयं कुर्मः । 'डु कृञ् करणे' लट् परस्मैपदं करोमि कुर्वः कुर्मः । अप्लवदेवनदीतरणं ते कथं इत्यस्य इदं उत्तरं उक्त्वा किं चिकीर्षसि इत्यस्य उत्तरमाह ॥ याम इति । वयं तावत् प्रथमं तूर्णं सत्वरं 'सत्वरं चपलं तूर्णं' इत्यमरः उदीचीं उत्तरां आशां दिशं 'आशा दिगभिलाषयोः' इत्यमरः यामः गच्छामः । 'या प्रापणे' लट् परस्मैपदं यामि यावः यामः । इत्याद्यं आह स्म इति पूर्वेणान्वयः । शालिनीवृत्तं 'शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः' ॥ १७ ॥

गाम्भीर्यं धृतिमुरुवीर्यमार्यभावं तेजोऽग्र्यं गिरमपि देशकालयुक्ताम् ।
राजाऽस्य स्फुटमुपलभ्य विस्मितोऽस्मै राज्यार्धं सपदि समर्पयाम्बभूव ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – गाम्भीर्यमिति ॥ राजा श्रीमध्वस्य गाम्भीर्यं धृतिं धैर्यं, उरुवीर्यं उत्कृष्टसामर्थ्यं, आर्यभावं, पूज्यतां, विद्वत्तां वा, अग्र्यं तेजः, देशश्च कालश्च ताभ्यां युक्तां योग्यामित्यर्थः । गिरमपि स्फुटं सम्यक् उपलभ्य प्राप्य श्रुत्वा दृष्ट्वा च इत्यर्थः । विस्मितः सन् सपदि अस्मै श्रीमध्वाय राज्यार्धं राज्यस्य अर्धभागं समर्पयाम्बभूव । प्रहर्षिणीवृत्तं 'आशाभिर्मनजरगाः प्रहर्षिणीयमि'त्युक्तेः ॥ १८ ॥

मन्दोपकारिणी — गाम्भीर्यमिति ॥ राजा तुरुष्कराजः । अस्य मध्वाचार्यस्य गाम्भीर्यं गम्भीरत्वं धृतिं धैर्यं उरुवीर्यं उत्कृष्टपौरुषं च आर्यभावं पूज्यत्वं विद्वत्तां वा अग्र्यं श्रेष्ठं तेजः ब्रह्मवर्चः, देशकालयुक्तां देशश्च कालश्च तयोः युक्तां उचितां गिरमपि वाक्यमपि 'गीर्वाग्वाणी सरस्वती' इत्यमरः । स्फुटं स्पष्टं उपलभ्य प्राप्य दृष्ट्वा श्रुत्वा च इति भावः । विस्मितः आश्चर्ययुक्तः सन् सपदि तत्क्षण एव 'सद्यः सपदि तत्क्षणे' इत्यमरः अस्मै श्रीमध्वाय राज्यार्धं राज्यस्य अर्धं 'पुंस्यर्धोऽर्धं समेंऽशके' इत्यमरः समर्पयांबभूव दत्तवान् । समर्पयाम् इत्येतत् आम् प्रत्ययान्तं अव्ययम् । 'त्र्याशाभिर्मनजरगाः प्रहर्षणीयम्' ॥ १८ ॥

दण्डार्हबुद्धिविषयो नृपपूरुषाणां राज्यार्हबुद्धिविषयोऽभवदित्थमेषः ।
नीतिं प्रकाशयितुमेव विपत्सु कार्यां गन्तुं प्रभुः प्रसभतोऽपि तथा व्यधात्सः ॥१९॥

पदार्थदीपिकोद्बोधिका – दण्डेति ॥ नृपपूरुषाणां नृपभटानां दण्डार्हो दण्डनयोग्य इति या बुद्धिः तस्या विषय एष श्रीमध्वः । इत्थं नृपस्य राज्यार्ह इति बुद्धिः तस्या

विषयोऽभवत् । स प्रसभतो बलाद्धन्तुं प्रभुरपि समर्थोऽपि प्रसभतो गन्तुमशक्तानां विपत्सु आपत्सु कार्यां नीतिं तत्तद्देशकालात्मशक्त्याद्यनुसारेण प्रवृत्तिप्रकारं दर्शयितुमेव तथा व्यधात् चकार । यथा राजा राजपुरुषाश्च परितुष्टा भवेयुः तथा कृतवानिति भावः । वसन्ततिलकावृत्तं 'उक्ता वसन्ततिलका तभजा जगौ गः' इत्युक्तेः ॥ १९ ॥

मन्दोपकारिणी — दण्डेति ॥ नृपपूरुषाणां नृपस्य भृत्यानां दण्डार्हबुद्धिविषयः दण्डस्य हिंसारूपस्य अर्हः योग्य इति बुद्धेः विषयः गोचरः । 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे वने' इति वैजयन्ती । एषः श्रीमध्वाचार्यः इत्थं पूर्वोक्तप्रकारेण राज्यार्हबुद्धिविषयः अयं मध्वः राज्यस्य अर्हः योग्य इति बुद्धेः विषयः अभवत् । ननु स्वस्य यतित्वात् राजानं तृणीकृत्य गन्तुं समर्थत्वात् निषिद्धतुरुष्कभाषया राजसम्भाषणं कुतः कृतवान् मध्वः इत्यतः आह ॥ **नीतिमिति** ॥ सः मध्वाचार्यः प्रसभतः बलात्कारात् गन्तुं प्रभुरपि समर्थोऽपि असमर्थानां विपत्सु आपत्सु कार्यां कर्तुं योग्यां नीतिं तद्देशकालात्मशक्त्याद्यनुसारेण प्रवृत्तिप्रकारं प्रकाशयितुमेव तथा तुरुष्कभाषणादिप्रकारं व्यधात् चक्रे । 'वि पूर्वात् डु धाञ् धातोः' लुङ् परस्मैपदं अधात् अधातां अधुः । 'उक्ता वसन्ततिलका तभजा जगौ गः' इत्युक्तेः वसन्ततिलकावृत्तम् ॥ १९ ॥

कदाचिच्चोराणां निकरमवलोक्याभिपतता-
मवस्थाप्य स्वीयान् करगपटपिण्डार्थमतिकृत् ।
चरन्नेतेष्वेतानथ मिथ इहाघातयदहो
विभुः सम्मोह्य प्राग्विजय इव संशप्तकगणान् ॥ २० ॥

भावप्रकाशिका — करतलगतपटपिण्डं कनकमिति विचिन्त्य हन्तुकामा मध्वं, परस्परं जघ्नुः ॥ २० ॥

पदार्थदीपिकोद्बोधिका – कदाचिदिति ॥ विभुः श्रीमध्वः । कदाचित् अभिपततां चोराणां निकरं समूहमवलोक्य स्वीयान् स्वकीयान् सर्वान् अवस्थाप्य एकत्र स्थापयित्वा । स्वयमेकं पटं पिण्डीकृत्य गृहीत्वा करं हस्तं गच्छतीति करगः स चासौ पटश्च तस्य पिण्डे या अर्थमतिः धनमतिः तां करोतीति तादृशः सन् । एतेषु चोरेषु मध्ये चरन्नितस्ततः पर्यटन् एतान् संमोह्य मोहयित्वा प्राक्पूर्वं भारतयुद्ध इत्यर्थः । विजयः अर्जुनः

'बीभत्सुर्विजयः पार्थः सव्यसाची धनञ्जय' इति भारतोक्तेः । संशप्तकगणानिव मिथः परस्परमघातयत् । 'हन हिंसागत्योः' णिजन्ताल्लङ् । शिखरिणीवृत्तं 'रसै रुद्रैः छिन्ना यमनसभलागः शिखरिणी'त्युक्तेः ॥ २० ॥

मन्दोपकारिणी — इदानीं चरितान्तरं कथयतीत्याह ॥ **कदाचित् इति** ॥ विभुः समर्थः मध्वः । कदाचित् अभिपततां स्वात्मानं प्रति अभिमुखं आगच्छमानानां चोराणां तस्कराणां निकरं समूहं 'स्तोमौघनिकरव्रातवारसङ्घातसंचयाः' इत्यमरः । अवलोक्य दृष्ट्वा स्वीयान् शिष्यान् एकत्र स्थले अवस्थाप्य । स्वयं एकं काषायपटं पिण्डीकृत्य गृहीत्वा करगपटपिण्डार्थमतिकृत् करे पाणौ गच्छतीति करगः स चासौ पटः वस्त्रं च तस्मिन् पिण्डभूतपटे इति यावत् । अर्थ इति धनं एतत् इति मतिं बुद्धिं करोतीति कृत् उत्पादयन् सन् । एतेषु चोरेषु तस्करनिकरमध्ये एव चरन् इतस्ततः संचरन् एतान् चोरान् संमोह्य मोहयित्वा मिथः परस्परं अघातयत् घातयामास । कः कानिव प्राक् कौरवपाण्डवयुद्धकाले विजयः अर्जुनः संशप्तकगणान् दैत्यसमूहानिव । यथा अर्जुनः तेषु संमोहनास्त्रं प्रयुज्य परस्परं अर्जुनबुद्धिं उत्पादयित्वा तान् अघातयत् तथा मध्वः प्रावरणकषायवस्त्रं पिण्डीकृत्य स्वहस्ते गृहीत्वा चोरमध्ये इतस्ततः पर्यटन् वस्त्रपिण्डे धनमेतत् इति बुद्धिं तेषां उत्पाद्य इदं धनं अहमेव गृहीष्यामि इति धनाशया परस्परं सर्वांश्च चोरान् अघातयत् इति भावः । 'हन हिंसागत्योः' लङ् परस्मैपदं अघातयत् अघातयतां अघातयन् । 'रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति शिखरिणीवृत्तम् ॥ २० ॥

अन्यत्र च चोरान् धन्यप्रवरोऽसौ शूरान् शतसङ्ख्यान् प्राप्तान् स्वजिघांसून् ।
एकेन तु शिष्येणाकृष्टकुठारान् निस्ताडितयूथ्यानद्रावयत द्राक् ॥ २१ ॥

भावप्रकाशिका — अन्यत्र 'दस्यूनवाप्तानवलोक्य सोऽब्रवीत् को मेऽस्ति शिष्यो विभयो जवीत्यलम् । अभ्यासवांस्तूर्णमुपेन्द्रतीर्थस्तत्तेजसा क्रूरचमूं प्रभोऽभ्ययात् ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – अन्यत्रेति ॥ असौ धन्यप्रवरः श्रीमध्वः । अन्यत्र च शतं संख्या येषां तान् शूरान् स्वस्य जिघांसून् प्राप्तान् आगतान् । एकेन शिष्येण उपेन्द्रतीर्थाख्येन आकृष्टा कुठाराः परशवो येभ्यः तान् । तेनैव शिष्येण यूथे भवो यूथ्यः निस्ताडितो नितरां ताडितो यूथ्यो येषां तान् चोरान् द्राक् अद्रावयत् द्रावयामास । मणिमालावृत्तं 'त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैरि'त्युक्तेः ॥ २१ ॥

मन्दोपकारिणी — अन्यत्रेति ॥ धन्यप्रवरः 'निरपेक्ष्यगुणैः पूर्णो धन्य इत्यभीधीयते' इत्युक्तेः धन्यानां श्रेष्ठः असौ मध्वः । अन्यत्र इतोऽन्यत्रापि स्थले च शतसङ्ख्यान् शतं सङ्ख्या येषां तान् शूरान् पराक्रमिणः स्वजिघांसून् स्वं स्वात्मानं हन्तुं इच्छन्तीति स्वजिघांसवः तान् प्राप्तान् आगतान् चोरान् द्राक् झटिति 'द्राङ् मङ्क्षु सपदिद्रुते' इत्यमरः अद्रावयत द्रावयामास । 'द्रु गतौ' णिजन्ताल्लङ् आत्मनेपदम् । किं भूतान् एकेन तु एकेनैव शिष्येण उपेन्द्रतीर्थाख्येन इति संप्रदायः । आकृष्टकुठारान् आकृष्टः बलात् अपहृतः कुठारः परशुः येषां ते आकृष्टकुठाराः तान् । 'द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः' इत्यमरः । निस्ताडितयूथ्यान् तेनैव शिष्येण तेनैव कुठारेण नितरां ताडितो यूथ्यः यूथे भवः कश्चनचोरश्रेष्ठः येषां तान् । 'त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रै' इति मणिमालावृत्तम् ॥ २१ ॥

कचिच्छिलाच्छटाभ्रमादमुं ससङ्घमत्यजन् ।
अवेक्ष्य दस्यवः पुनः कुतूहलात् तमानमन् ॥ २२ ॥

भावप्रकाशिका — अपरत्र च 'अचलास्तिष्ठतेत्युक्त्वा शिष्यान् दस्यूनवश्चयत् । मध्वस्तेऽपि गताः पश्चात्तत्र नैक्षन्त कञ्चन ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – कचिदिति ॥ कचित् अन्यत्र दस्यवः, ससंघं शिष्यसमूहसहितं अमुं मध्वं दृष्ट्वा शिलानां छटेति भ्रमात् । 'सटाच्छटाभिन्नघनेन बिभ्रते'त्यादिप्रयोगात् छटाशब्दः समूहार्थे प्रसिद्धः । एते शिलासमूहा न मनुष्या इति भ्रान्तेरित्यर्थः । ससङ्घममुमत्यजन् । पुनः पश्चात् अवेक्ष्य कुतूहलात् कौतुकात् तं श्रीमध्वं आनमन् । प्रमाणिकावृत्तं 'प्रमाणिका जरौ लगौ' इत्युक्तेः ॥ २२ ॥

मन्दोपकारिणी — कचिदिति ॥ कचित् अन्यत्र स्थले दस्यवः चोराः पूर्वं सशिष्यं मध्वं दृष्ट्वा शिलाच्छटाभ्रमात् एते शिलानां पाषाणानां छटा समूह एव न मनुष्यव्यूहः इति भ्रमात् भ्रान्त्या 'छटा समूहपरयोः' इति विश्वः ससंघं शिष्यसमूहेन सहितं अमुं मध्वं अत्यजन् परित्यक्तवन्तः । 'त्यज विसर्गे' लङ् परस्मैपदम् । पुनः पश्चात् ससंघं अमुं गच्छन्तं अवेक्ष्य दृष्ट्वा कुतूहलात् आश्चर्येण तं मध्वं आनमन् । नमतेः लङ् परस्मैपदम् । कुत्रचित् सशिष्यो मध्वः शिलासमूहत्वेन चोरदृष्टिविषयो भूत्वा पश्चात् मनुष्यत्वेन तैः दृष्टः

तादृशमाहात्म्यं दृष्ट्वा ते नेमुः इति भावः । 'प्रमाणिका जरौ लगौ' इति प्रमाणिकावृत्तम् ॥ २२ ॥

सत्योच्छेदे सेच्छायातं व्याघ्राकारं दैत्यव्याघ्रम् ।
प्रालेयाद्रेः प्रान्ते प्राज्ञः पाणेर्लीलालेशेनास्यत् ॥ २३ ॥

भावप्रकाशिका — मध्वं दुर्विषहं मत्वा देवं सङ्गृह्य चाग्रतः । आयान्तं सत्यतीर्थार्यं जिघांसुर्व्याघ्र आपतत् ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – सत्येति ॥ प्राज्ञः सर्वज्ञः श्रीमध्वः । प्रालेयाद्रेः हिमाचलस्य । 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका चाथे'त्यमरः । प्रान्ते समीपे सत्यस्य सत्यतीर्थस्योच्छेदे संहारे । देवं सङ्गृह्याग्रतो गच्छतः सत्यतीर्थस्य हिंसायामिति यावत् । इच्छया सहितं सेच्छं आयातं आगमनं यस्य तम् । व्याघ्रस्याकार इवाकारो यस्य तं दैत्यव्याघ्रं दैत्यश्रेष्ठम् । 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूल-नागाद्याः पुंसि श्रेष्ठार्थवाचका' इत्यमरः । पाणेर्हस्तस्य लीलाया लेशेन एकदेशेन । पाणिना किञ्चित् ताडनमात्रेणेत्यर्थः । आस्यत् निराचक्रे । असु क्षेपणे लङ् । तथोक्तं – 'मध्वं दुर्विषहं मत्वा देवं सङ्गृह्य चाग्रतः । प्रयान्तं सत्यतीर्थार्यं जिघांसुः व्याघ्र आपतत्' इति । विद्युन्मालावृत्तं 'मो मो गो गो विद्युन्माले'त्युक्तेः ॥ २३ ॥

मन्दोपकारिणी — सत्येति ॥ प्राज्ञः श्रीमध्वः । प्रालेयाद्रेः हिमवत्पर्वतस्य प्रान्ते समीपे सत्योच्छेदे सत्यस्य सत्यतीर्थस्य उच्छेदे हिंसायां तादर्थ्ये सप्तमी हन्तुं सेच्छायातं इच्छया सहितं सेच्छं तादृशं आयातं आगमनं यस्य सः । स्वेच्छायातमिति पाठे स्वस्य इच्छया आगमनवन्तं इत्यर्थः । देवं गृहीत्वा पुरतो गच्छतः सत्यतीर्थस्य हिंसेच्छया आगतं इति भावः । व्याघ्राकारं शार्दूलस्य आकारो देहो यस्य सः तं 'शार्दूलद्वीपिनौ व्याघ्रे' इत्यमरः । दैत्यव्याघ्रं दैत्यश्रेष्ठं पाणेः करस्य लीलालेशेन लीलायाः 'लीलाविलासक्रिययोः' इत्यमरः लेशेन लवेन 'लवलेशकणाणवः' इत्यमरः । पाणिना किंचित् ताडनमात्रेणेति भावः । आस्यत् निराकरोत् । 'असु क्षेपणे' लङ् परस्मैपदं आस्यत् आस्यतां आस्यन् । 'मध्वं दुर्विषहं मत्वा देवं सङ्गृह्य चाग्रतः । आयान्तं सत्यतीर्थार्यं जिघांसुः व्याघ्र आपतत्' इति ऐतिह्यम् । वृत्तं तु विद्युन्माला 'मो मो गो गो विद्युन्माला' इति ॥ २३ ॥

प्राप स नारायणतः शुद्धशिलात्मप्रतिमाः ।
यासु स पद्मासहितो दोष्यहितः सन्निहितः ॥ २४ ॥

भावप्रकाशिका — तीर्थं स्वपार्श्वभूमिं च मोक्तुं नेच्छति सन्मतौ । त्वत्स्नानाम्बुनि गङ्गा स्याच्छिलास्वास्वहमित्यदात् ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – प्रापेति ॥ स श्रीमध्वः । बदरिकाश्रमं प्राप्य नारायणतः शुद्धाः पवित्रा याः शिलात्मप्रतिमाः शिला आत्मा स्वरूपं यासां ताः शिलात्मानः ताश्च ताः प्रतिमाश्च ताः प्राप लेभे । यासु प्रतिमासु, दोषः भगवद्द्वेषादिदोषः एषामस्तीति दोषिणः तेषां अहितः स श्रीनारायण एव पद्मासहितः रमया सहितः सन्निहितः । माणवकवृत्तं 'भात्तलगामाणवकमि'त्युक्तेः ॥ २४ ॥

मन्दोपकारिणी – प्रापेति ॥ सः एतादृशमहिमा मध्वः । शिष्यान् मनुष्यगोचरे बदरिकाश्रमे संस्थाप्य मनुष्यागोचरबदरिकाश्रमं प्राप्य तत्र नारायणतः धर्मपुत्रात् नारायणात् हरेः शुद्धशिलात्मप्रतिमाः शुद्धाः पवित्राः शिलाः सिकताख्यसूक्ष्मपाषाणाः शुद्धाश्च ताः शिलाश्च आत्मा स्वरूपं यासां ताः शुद्धशिलात्मानः ताश्च ताः प्रतिमाश्च इति विग्रहः । ताः तथा च सैकतमुष्टित्वप्रसिद्धियुक्ता प्राप लब्धवान् । प्रपूर्वकात् 'आप्लृ व्याप्तौ' लिट् परस्मैपदम् । कीदृश्यः प्रतिमाः यासु शिलामयप्रतिमासु पद्मासहितः लक्ष्म्या युक्तः स नारायण एव सन्निहितो वर्तते तादृशाः इत्यर्थः । दोष्यहितः दोषिणां विष्णुवैष्णवद्वेष-विशेषवतां अहितः अप्रियः । यद्यपि नारायणदत्ताः शिलाप्रतिमाः लक्ष्मीनारायणेन सन्निहितत्वात् लक्ष्मीनारायणसंज्ञका एव । तथापि वेदव्यासेन दापितत्वात् वेदव्यासप्रतिमा इत्युच्यन्ते । अतः न विरोधः । ताश्च शिलाः अष्टसङ्ख्याकाः ज्ञेयाः तच्चोक्तं वायुपुराणे मध्वावतारे । 'इष्ट्वा व्यासाश्रमं गच्छन् मुख्यप्रेष्यो यतो मरुत् । प्रणिपत्य महान् मध्वो व्यासं निजगुरुं परम् ॥ विज्ञापयामास भूमौ स्वव्यापृतसुदुष्करम् । निशम्य तस्य वाक्यानि व्यासः सर्वान्तरात्मकः ॥ स्वाधिष्ठानान् परं चाष्टौ ग्रावाणः कृपया ददौ' इति स्वाधिष्ठानान् स्वस्वरूपलक्ष्मीनारायणसन्निहितान् ग्रावाणः ग्राव्णः पाषाणान् ददौ दापितवान् इति प्रमाणार्थः । अथवा नारायणतः नारायणावतारात् वेदव्यासात् शुद्धशिलात्मप्रतिमाः प्राप । यासु दोष्यहितः नारायणरूपव्यास एव पद्मासहितः सन्निहितोऽस्तीति व्याख्येयम् ।

वेदव्यासस्य ऋषित्वप्रसिद्धया भगवदनवतारत्वभ्रान्तिं परिहर्तुं नारायणतः पद्मासहित इति वेदव्यासस्य विशेषणद्वयं उक्तम् । एवं लोकप्रसिद्धिः प्रमाणं च अनुकूलं भवति । वृत्तं तु माणवकं 'माणवकम् भात्तलगा' इति ॥ २४ ॥

पाराशर्यः परतत्त्वप्रसिद्धयै तात्पर्यार्थं परमं भारतस्य ।
व्यक्तं वक्तुं नियुनक्ति स्म साक्षादेनं धन्यं भुवने मन्यमानः ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – पाराशर्य इति ॥ पराशरस्य अपत्यं पुमान् श्रीव्यासः । भुवने जगत्येनं श्रीमध्वं साक्षान्मुख्यतो धन्यं मन्यमानः सन् जानन् सन्, परतत्त्वस्य भगवत्स्वरूपस्य प्रसिद्धयै सम्यग्ज्ञानाय । भारतस्य महाभारतस्य परमं तात्पर्यार्थं तात्पर्यसिद्धार्थं व्यक्तं स्पष्टं यथा भवति तथा वक्तुं एनं श्रीमध्वं नियुनक्ति स्म न्ययोजयत् । युजिर् योगे लट् । वातोर्मीवृत्तं 'वातोर्मीयं गदिता म्भौ तगौ ग' इत्युक्तेः ॥ २५ ॥

मन्दोपकारिणी – पाराशर्य इति ॥ एवं अष्टशिलारूपप्रतिमादानानन्तरं पाराशर्यः पराशरर्षेः अपत्यं वेदव्यासः । परतत्त्वप्रसिद्धयै परस्य परमात्मनः तत्त्वस्य अबाधितस्वरूपस्य प्रसिद्धयै सम्यग्ज्ञापनाय मुक्तियोग्यानां भगवत्स्वरूपज्ञानार्थम् । भारतस्य महाभारतस्य परमं मुख्यं स्वाभिप्रेतं तात्पर्यार्थं तात्पर्यरूपं अर्थं अभिधेयं व्यक्तं स्पष्टं यथा भवति तथा वक्तुं कथयितुं एनं मध्वाचार्यं नियुनक्ति स्म न्ययोजयत् आज्ञापितवान् । निपूर्वात् 'युजिर् योगे' लट् परस्मैपदं नियुनक्ति नियुङ्क्तः नियुञ्जन्ति' । कथंभूतः भुवने एनं मध्वं साक्षात् मुख्यतः धन्यं निरपेक्षगुणपूर्णं मन्यमानः जानन् । 'निरपेक्षगुणैः पूर्णो धन्य इत्यभिधीयते' इत्युक्तेः । वृत्तं तु वातोर्मी 'वातोर्मीयं गदिता म्भौ तगौ गः' ॥ २५ ॥

तीर्थेषु तीर्थेषु च सौख्यतीर्थः क्षेत्रेषु च क्षेत्रविदां वरिष्ठः ।
गोविन्दमावन्य सहानुगोऽगाद् गङ्गां पुनस्तुङ्गतरङ्गमालाम् ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – तीर्थेष्विति ॥ क्षेत्राणि विदन्तीति क्षेत्रविदः तेषां क्षेत्रपरिज्ञानवतां मध्ये वरिष्ठः । सुखमेव सौख्यं सौख्यकरं तीर्थं शास्त्रं यस्मात् सः श्रीमध्वः । तीर्थेषु पवित्रेषु । 'तीर्थं मन्त्र्याद्युपाध्यायशास्त्रेष्वम्भसि पावने ।

पात्रापायावतारेष्वि'ति वैजयन्ती । तीर्थेषु च क्षेत्रेषु च गोविन्दं श्रीहरिं आवन्द्य सहानुगः सशिष्यः सन् पुनः, तुङ्गाः उन्नताः तरङ्गमालाः तरङ्गपंक्तयो यस्याम् । तां गङ्गां अगात् । 'इण् गतौ' लुङ् । इन्द्रवज्रावृत्तम् 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इत्युक्तेः ॥ २६ ॥

मन्दोपकारिणी – तीर्थेष्विति ॥ एवं आज्ञप्तः सौख्यतीर्थः आनन्दतीर्थः पुनः आगमनसमये तीर्थेषु पवित्रेषु तीर्थेषु ऋषिजुष्टजलाशयेषु । 'निपानागमयोः तीर्थमृषिजुष्टजले गुरौ' इत्यमरः । क्षेत्रेषु च प्रसिद्धस्थानेषु कुरुक्षेत्रादिषु पुण्यस्थानेषु इत्यर्थः । 'क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः' इति विश्वः । विद्यमानं गोविन्दं नारायणं आवन्द्य सम्यक् नत्वा स्तुत्वा च सहानुगः अनुगैः शिष्यैः सहितः सन् पुनः भूयः तुङ्गतरङ्गमालां तुङ्गा उन्नताश्च ते तरङ्गाः ऊर्मयश्च 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः तेषां माला पङ्क्तिः यस्याः तथोक्ता तां 'माला तून्नतभूर्माला पङ्क्तौ पुष्पादिदामनि' इति भास्करः । गङ्गां अगात् प्राप्तवान् । 'इण् गतौ' लुङ् परस्मैपदं अगात् अगातां अगुः । किंभूतः क्षेत्रविदां क्षेत्रं विदन्ति जानन्तीति क्षेत्रविदः । क्षेत्रज्ञाः जीवात्मानः तेषां मध्ये वरिष्ठः श्रेष्ठः सर्वजीवोत्तम इति भावः । 'क्षेत्रज्ञ आत्मा पुरुषः' इत्यमरः । मध्वः वेदव्यासाज्ञां गृहीत्वा पुनः परावृत्तिकाले तत्र तीर्थेषु क्षेत्रेषु च विद्यमानं नारायणं सेवमानः सन् पुनः भागीरथीनदीं प्राप इति भावः । इन्द्रवज्रावृत्तं 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' ॥ २६ ॥

प्लवैरपेतामवलोक्य सिन्धुं सरोजबन्धुं च तदाऽऽप्तसिन्धुम् ।
तटे निषण्णानधिकं विषण्णान् निरीक्ष्य शिष्यानतरत्स एताम् ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – प्लवैरिति ॥ सः श्रीमध्वः । तदा सिन्धुं गङ्गां प्लवैः नौभिः अपेतां रहितां अवलोक्य सरोजबन्धुं च पद्मबन्धुं सूर्यं च । आप्तः प्राप्तः सिन्धुः समुद्रो येन' तम् । अस्तङ्गतमिति यावत् । 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरित् स्त्रियामि'त्यमरः । अवलोक्य अधिकं यथा भवति तथा विषण्णान् भीतान् तटे गङ्गातीरे निषण्णान् शिष्यान् निरीक्ष्यैतां गङ्गां अतरत् । उपेन्द्रवज्रावृत्तं 'उपेन्द्रवज्रा जतजास्ततो गौ' इत्युक्तेः ॥ २७ ॥

मन्दोपकारिणी – प्लवैरिति ॥ सः मध्वः । एतां गङ्गां अतरत् लङ्घितवान् । किं कृत्वा ? तदा स्वागमनकाले सिन्धुं भागीरथीनदीं 'सिन्धुः समुद्रे नद्यां च' इति विश्वः । प्लवैः नौभिः अपेतां रहितां अवलोक्य दृष्ट्वा । सरोजबन्धुं सरोजानां पद्मानां बन्धुः सुहृत्

सूर्यः तं आप्तसिन्धुं आप्तः प्राप्तः सिन्धुः समुद्रः येन स तथोक्तः तं अस्तंगतं इत्यर्थः अवलोक्य दृष्ट्वा । अधिकं यथा भवति तथा विषण्णान् उद्वेगयुक्तान् तटे गङ्गातीरे निषण्णान् उपविष्टान् शिष्यान् निरीक्ष्य दृष्ट्वा तथा प्लवरहितां गङ्गां दृष्ट्वा सायंकाले जाते सति इतःपरं किं कुर्म इति विषादं प्राप्य तीरे उपविष्टान् शिष्यान् दृष्ट्वा स्वयं एक एव जलस्तंभनं कृत्वा अनार्द्रवासाः सन् गङ्गां लङ्घितवान् इति भावः। जलस्तंभनं तु वारिसंस्तंभयोगादिति अणुमध्वविजयोक्तं ज्ञेयम् । 'तॄ प्लवनतरणयोः' इत्यतो लङ् परस्मैपदम् । उपेन्द्रवज्रावृत्तं 'उपेन्द्रवज्रा जतजास्ततो गौ' इत्युक्तेः ॥ २७ ॥

न वानरेन्द्रस्य विलङ्घिताब्धेः न वा नरेन्द्रस्य विहर्तुरस्याम् ।
इमेऽस्मरंस्तद्वपुषोऽन्यथाऽस्य शक्तस्य शङ्कचेत विपत् कथं तैः ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ इमे श्रीमध्वशिष्याः । विलङ्घितोऽब्धिः येन तस्य वानरेन्द्रस्य कपिश्रेष्ठस्य हनुमतो नास्मरन् । अधीगर्थदयेति कर्मणि षष्ठी । अस्यां गङ्गायां विहर्तुः नरेन्द्रस्य राज्ञो भीमसेनस्य वा नास्मरन् । अन्यथा तीर्णाब्धिं हनुमन्तं वा कौमारे गङ्गायां विरहन्तं भीमसेनं वा अस्मरंश्चेत् । हनुमदादितनुरेव श्रीमुख्यप्राणो मध्वनामा प्रादुर्बभूवेति श्रुतं अस्मरंश्चेदिति भावः । तर्हि तद्वपुषः पूर्वं हनुमदादिस्वरूपवतश्शक्तस्य गङ्गातरणे समर्थस्य अस्य श्रीमध्वस्य विपत् तैः शिष्यैः कथं शङ्कचेत । शकि शङ्कायां लिट्। तत्स्मरणाभावादस्य विपदमाशङ्किर इति भावः । उपजातिवृत्तं 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति लक्षणात् । इतः परं चतुर्दशश्लोकेषूपजातिवृत्तम् ॥ २८ ॥

मन्दोपकारिणी – ननु समुद्रादिलङ्घनसमर्थहनुमदादिस्वरूपे मध्वाचार्ये स्थिते सति शिष्याणां विषादः कथमित्यत आह ॥ **नेति** ॥ इमे मध्वाचार्यशिष्याः । विलङ्घिताब्धेः तीर्णः समुद्रो येन तस्य वानरेन्द्रस्य मर्कटानां इन्द्रस्य 'मर्कटो वानरः कीशः' इत्यमरः हनूमतः हनुमन्तं इत्यर्थः नास्मरन् न स्मृतवन्तः । अस्यां गङ्गायां विहर्तुः कौमारावस्थायां बाहुभ्यां परं पारं प्रति तरणरूपजलक्रीडां कुर्वतः नरेन्द्रस्य वा नराणां मनुष्याणां श्रेष्ठस्य भीमसेनस्य वा इत्यर्थः नास्मरन् । हनुमदादिरूप एव श्रीमुख्यप्राणः मध्वनामा प्रादुर्बभूव इति पूर्वं श्रुतं तदा नास्मरन् इति भावः । 'स्मृ स्मरणे' लङ् परस्मैपदम् । अन्यथा

पूर्वश्रुतस्य स्मरणसत्वे तद्वपुषः तस्य हनुमदादेः वपुः तद्वपुः तस्य हनुमदादिस्वरूपस्य शक्तस्य गङ्गातरणे समर्थस्य अस्य श्रीमध्वस्य विपत् गङ्गातरणाशक्तिः तैः शिष्यैः कथं शङ्क्येत संभाव्येत न कथमपीत्यर्थः । अतः स्मरणाभावादेव अस्य असमर्थत्वशङ्कया शिष्याणां विषाद इति भावः । 'शकि शङ्कायां कर्मणि विधिलिङ् शङ्क्येत शङ्क्येयातां शङ्क्येरन् । वानरेन्द्रस्य नरेन्द्रस्य इत्यत्र अधीगर्थदयेशां कर्मणीति कर्मणि षष्ठी । इमं श्लोकमारभ्य चतुर्दशश्लोकाः इन्द्रोपेन्द्रवज्रावृत्तलक्षणोपेतपादवत्तया उपजातयः इत्युच्यन्ते । 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयौ उपजातयस्ताः' इति लक्षणात् इदं आद्यपादेन्द्र-वज्रोपजातिवृत्तम् ॥ २८ ॥

जगत्प्रदीपायितगोगणाढ्ये दिवाकरे मध्वदिवाकरे च ।
अव्यक्तरूपे श्रियमत्यजन् द्राक् सहाम्बुजैस्तन्नयनाम्बुजानि ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – जगदिति ॥ प्रदीपवत् आचरन्तीति प्रदीपायिताः जगतां लोकानां प्रदीपायिता ये गोगणा रश्मिसमूहाः तैः आढ्यः सम्पन्नः तस्मिन् दिवाकरे सूर्येऽव्यक्तं रूपं यस्य तस्मिन् । अस्तमिते सतीत्यर्थः जगत्प्रदीपायितगोगणाढ्ये जगत्प्रदीपायितवाक्समूहसम्पन्ने मध्वदिवाकरे च मध्वाख्यसूर्ये च अव्यक्तरूपे सति चक्षुरविषये सति । तेषां शिष्याणां नयनानि अम्बुजानि इव तानि । अम्बुजैः पद्मैः सह द्राक्छ्रियं कान्तिं अत्यजन् । त्यज हानौ लङ् । अयं भावः रवौ अस्तङ्गते सति मध्वं अदृष्ट्वा विजने तटे बिभ्यतां शिष्याणां नेत्रकान्तिः अपगमदिति ॥ २९ ॥

मन्दोपकारिणी – जगदिति ॥ जगत्प्रदीपायितगोगणाढ्ये जगतां लोकानां प्रदीपायिताः प्रदीपवत् आचरन्तीति जगत्प्रकाशा इति यावत् ते च ते गावः रश्मयश्च तेषां गणः समूहः तेन आढ्ये सम्पन्ने दिवाकरे सूर्ये 'द्वादशात्मा दिवाकरः' इत्यमरः अव्यक्तरूपे सति अव्यक्तं आच्छादितं रूपं स्वरूपं यस्य तस्मिन् अस्तं गते सति इत्यर्थः । तथा जगत्प्रदीपायितगोगणाढ्ये जगतां लोकानां प्रदीपायिताः गावो वाचश्च तासां गणः तेन आढ्ये सतां परापरतत्त्वबोधकवाक्यसमूहयुक्ते इत्यर्थः । मध्वदिवाकरे च मध्वाख्यसूर्ये च अव्यक्तरूपे अदृश्यमाने सति । 'गौर्नाकि वृषभे चन्द्रे वाग्भूदिग्धेनुषु स्त्रियाम् । द्वयोस्तु रश्मिदृग्बाणस्वर्गवज्राम्बुलोमसु' इति रत्नमाला । तन्नयनाम्बुजानि तेषां शिष्याणां

नयनान्येव कमलानि । अम्बुजैः प्रसिद्धसरोजैः सह द्राक् शीघ्रं श्रियं शोभां अत्यजन् व्यसृजन् । अयं भावः सूर्येऽस्तं गते मध्वाचार्यं अदृष्ट्वा जनरहिते तटे भयं प्राप्नवतां शिष्याणां नेत्रविकासोऽपगमत् । 'त्यज विसर्गे लट् परस्मैपदम्' । तृतीयपादेन्द्र-वज्रोपजातिः ॥ २९ ॥

पदं पशोर्वा विनतातनूजस्तीर्त्वा नदीं तावददीनसत्वः ।
अनार्द्रवासाः सकुतूहलार्द्रैर्नृदेवभूदेवमुखैर्ववन्दे ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – पदमिति ॥ अदीनं सम्पूर्णं सत्वं बलं यस्य सः श्रीमध्वः । तां नदीं गङ्गां विनतातनूजो गरुडः पशोः गोः पदं वा पदमिव तावत् शीघ्रं तीर्त्वा । अनार्द्रं वासो वस्त्रं यस्य तादृशः सन् । नावा विनापि तां महानदीं तीर्त्वा अनार्द्रवसनः सन् इत्यर्थः । अत एव कुतूहलार्द्रैः कुतूहलपूर्णैः नृदेवा भूपा भूदेवा विप्राः ते मुखा मुख्या येषां तैः जनैः ववन्दे वन्दितोऽभूत् ॥ ३० ॥

मन्दोपकारिणी – पदमिति ॥ अदीनसत्वः अदीनं सम्पूर्णं सत्वं बलं यस्य सः मध्वः । नदीं गङ्गां विनतातनूजः विनतायाः कश्यपपत्न्याः तनूजः पुत्रः 'गरुडः तार्क्ष्यो वैनतेयः खगेश्वरः' इत्यमरः । पशोः गवादिपशोः पदं वा पदपरिमितविस्तृतं जलमिव तावत् आदौ तीर्त्वा उल्लङ्घ्य । अनेन आयासाभावः सूचितः । अनार्द्रवासाः आर्द्रं न भवतीति अनार्द्रं वासः कौपीनादिवस्त्रं यस्य तथोक्तस्सन् 'वस्त्रमाच्छादनं वासः' इत्यमरः । कुतूहलार्द्रैः आश्चर्येण आर्द्रैः युक्तैः नृदेवभूदेवमुखैः नृदेवः राजा भूदेवाः द्विजाः त एव मुखानि प्रधानाः येषां तैः परतीरस्थैः जनैः ववन्दे नमस्कृतोऽभूत् । नावा विनापि नदीं तीर्त्वा अनार्द्रवस्त्रं मध्वं दृष्ट्वा परतीरस्थराजादयः महाश्चर्येण नमश्चक्रुः इति भावः ॥३०॥

भीतैररातेरतिमात्रमत्र नतारकैरप्यथ तारकैः सः ।
स्वतेजसा विस्मितभूपनुन्नैः प्लवेन शिष्यान् निरतारयत् ताम् ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – भीतैरिति ॥ अथ स श्रीमध्वः । अत्र गङ्गातटे अरातेः शत्रोः अतिमात्रं अत्यन्तं भीतैः । अत एव तारका न भवन्तीति नतारकास्तैः । नैकधेत्यादिवन्न समासोऽयम् । स्वतेजसा प्लवादिरहितनदीतरणेऽपि अनार्द्रवस्त्रत्वादि

स्वसामर्थ्येन तद्दर्शनेनेत्यर्थः । विस्मितभूपनुन्नैः विस्मितनृपप्रेरितैः तारकैः दाशैः । कर्तरि तृतीया । प्लवेन करणे तृतीया । शिष्यांस्तां गङ्गां निरतारयत् तारयामास ॥ ३१ ॥

मन्दोपकारिणी – भीतैरिति ॥ अथ जननमस्कारग्रहणानन्तरं सः मध्वः । अत्र स्वाधिष्ठितगङ्गातीरे अरातेः शत्रोः 'अभिघाति परारातिः' इत्यमरः अतिमात्रं अत्यन्तं भीतैः भयं प्राप्तैः अत एव नतारकैः नञ् समासोऽयं अतारकैः । जनान् नदीं अनुत्तारयद्भिः अपि तारकैः प्लवोपजीविभिः दाशैः प्लवेन नावा शिष्यान् तां नदीं निरतारयत् तारयामास । किंभूतैः ? स्वतेजसा प्लवादिरहितनदीतरणेऽपि अनार्द्रवस्त्रत्वादि-सामर्थ्येन तद्दर्शनेनेति यावत् । विस्मितभूपनुन्नैः आश्चर्ययुक्तराजप्रेरितैः नावादि विना नदीतरणेऽपि अनार्द्रवस्त्रादिमहिमानं दृष्ट्वा विस्मितो राजा शत्रुभयात् कमपि अतारयद्भिः दाशैः मध्वशिष्यान् अतारयत् इति भावः । तारकैः इति कर्तरि तृतीया । प्लवेनेति करणे तृतीयेति ज्ञेयम् । आद्यपादे इन्द्रवज्रोपजातिः ॥ ३१ ॥

विशङ्कटं स्वस्तटनीतटं ते दीपप्रदीप्तं जनताभिपूर्णम् ।
सञ्चोदयत्पण्डितमण्डलाढ्यं नाथावलोकोत्कहृदोऽभ्यपश्यन् ॥ ३२ ॥

भावप्रकाशिका — जनता जनसमूहः । 'ग्रामजनबन्धुभ्यस्तलि'ति तल् ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – विशङ्कटमिति ॥ नाथस्य श्रीमध्वस्य अवलोकेन दर्शनेन । दर्शने इति वा उत्कं उत्कण्ठायुक्तं हृत् मनो येषां तादृशाः ते शिष्याः । विशङ्कटं विस्तीर्णम् दीपप्रदीप्तं दीपेन प्रकाशमानं जनानां समूहो जनता तयाभिपूर्णं सञ्चोदयन्तो विप्रतिपन्नप्रमेयं वेदार्थं वा पृच्छन्तो ये पण्डिता विद्वांसः तेषां यन्मण्डलं समूहः तेन आढ्यं निबिडं स्वः स्वर्गस्य तटिनी नदी गङ्गा तस्याः तटं अभ्यपश्यन् ॥ ३२ ॥

मन्दोपकारिणी – विशङ्कटमिति ॥ नाथावलोकोत्कहृदः नाथस्य स्वस्वामिनः मध्वाचार्यस्य अवलोके दर्शने उत्कं उत्कण्ठायुक्तं हृत् मनो येषां ते । कदा नु अस्मत् स्वामिनं मध्वं चक्षुषा ईक्ष्याम इति औत्सुक्ययुक्ता इति भावः । 'रागे त्वलब्धविषये वेदना महती तु या । संशोषणं तु गात्राणां तां उत्कण्ठां विदुः बुधाः' इत्यभिधानम् । एतादृशाः ते शिष्याः नदीं तीर्त्वा विशङ्कटं विशालं 'विशङ्कटं पृथु बृहद्विशालं' इत्यमरः दीपप्रदीप्तं

दीपेन प्रकाशमानम् । जनताभिपूर्णम् जनसमूहेन सर्वत्र पूर्णं सङ्कुलम् । संचोदयत्पण्डितमण्डलाढ्यं संचोदयन्तः विप्रतिपन्नं प्रमेयं वा वेदार्थं वा पृच्छन्तः ते च ते पण्डिताश्च तेषां मण्डलेन समूहेन आढ्यं स्वस्तटिनीतटं 'स्वरव्ययं स्वर्गनाकत्रिदिवस्त्रिदशालयाः' इत्यमरः स्वर्गस्य तटिनी नदी 'तटिनी ह्रादिनी धुनी' इत्यमरः स्वर्नदी गङ्गा तस्याः तटं अभ्यपश्यन् दृष्टवन्तः । अभिपूर्वो 'दृशिर् प्रेक्षणे लङ्' परस्मैपदम्। आद्यपादोपेन्द्रवज्रोपजातिः ॥ ३२ ॥

आम्नायमाम्नायविदां विदग्धं सभावभेदं प्रवदन्तमत्र।
दैव्यां सभायामिव पद्मयोनिं प्रैक्षन्त साक्षात् सुखतीर्थमेते ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – आम्नायमिति ॥ एते श्रीमध्वशिष्याः अत्र गङ्गातटे आम्नायविदां वेदविदां विदग्धं चतुरम् । भावभेदेन अभिप्रायविशेषेण सहितं यथा भवति तथा सभावभेदं आम्नायं वेदं प्रवदन्तं व्याचक्षाणं सुखतीर्थं श्रीमध्वम् । देवानां सम्बन्धिनी दैवी तस्यां सभायां, पद्मं योनिः कारणं यस्य तं इव साक्षात् प्रत्यक्षत ऐक्षन्त ददृशुः ॥ ३३ ॥

मन्दोपकारिणी – आम्नायमिति ॥ एते शिष्याः अत्र गङ्गातटस्थपण्डितमण्डले सुखतीर्थं आनन्दतीर्थं साक्षात् प्रत्यक्षतः प्रैक्षन्त दृष्टवन्तः । 'साक्षात्प्रत्यक्षतुल्ययोः' इत्यमरः । किं भूतम् ? आम्नायविदां वेदार्थज्ञानिनां 'श्रुतिः स्त्री वेद आम्नायः' इत्यमरः तेषां मध्ये विदग्धं निपुणम् । सभावभेदं भावोऽभिप्रायः तस्य भेदेन विशेषेण सहितं यथा तथा 'भावः सत्ता स्वभावे' इत्यमरः आम्नायं वेदं प्रवदन्तं व्याचक्षाणम् । कमिव ? दैव्यां देवसम्बन्धिन्यां सभायां पद्मयोनिं इव विरिञ्चिमिव । धाताब्जयोनिः इत्यमरः । प्रपूर्व 'ईक्ष दर्शनाङ्कनयोः' लङ् आत्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त ॥ ३३ ॥

प्राप्तस्ततो हस्तिनराजधानीं मासानुवासेह स वासयोग्यान्।
मठान्तरेऽनन्तगुणान्तरः सन्नेकान्तदेशे सरितोऽसमीपे ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – प्राप्त इति ॥ ततः हस्तिनाया च सा राजधानी नगरी तां प्राप्तः सः श्रीमध्वः । सरितः गङ्गायाः समीपो न भवतीत्यसमीपस्तस्मिन् ! एान्तश्चासौ

देशश्च तस्मिन् । मठान्तरे मठान्तरस्तस्मिन् । अनन्तस्य तटतस्य श्रीहरेः ये गुणाः तेषु अन्तरं मनो यस्य तादृशः सन् वासयोग्यान् मासान् उवास । चातुर्मासानुवासेति भावः ॥ ३४ ॥

मन्दोपकारिणी – प्राप्त इति ॥ ततः तस्मात् गङ्गातटात् हस्तिनराजधानीं तन्नामकपुरीं प्राप्तः गतः सः मध्वः सरितः गङ्गानद्याः असमीपे किञ्चिद्दूरे एकान्तदेशे जनरहितप्रदेशे मठान्तरे कस्मिंश्चिन्मठविशेषे वासयोग्यान् चातुर्मास्यानुष्ठानवासस्य योग्यान् मासान् इह वर्षाकाले उवास । वर्षाकाले चातुर्मास्यव्रतसिद्ध्यर्थं उवास इति भावः । कथं भूतस्सन् ? अनन्तगुणान्तरस्सन् अनन्तस्य विष्णोः गुणेषु अन्तरं मनः यस्य । 'वस निवासे' लिट् परस्मैपदं उवास ऊषतुः ऊषुः ॥ ३४ ॥

भित्त्वा भुवं देवनदी जगाम शाखाविशेषेण निषेवितुं तम् ।
वाणी च यत्प्रेष्यतया कृतार्था शिवादिवन्द्या न तदत्र चित्रम् ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – भित्त्वेति ॥ देवनदी गङ्गा तं श्रीमध्वं निषेवितुं शाखाविशेषेण शाखाप्रभेदेन भुवं भित्वा जगाम । यस्माच्छिवादिवन्द्या वाणी सरस्वती च यत्प्रेष्यतया यस्य श्रीमध्वस्य प्रेष्यतया दासीत्वेन कृतोऽर्थः प्रयोजनं यया तादृशी कृतकृत्या । तस्मादत्र श्रीमध्वे तत्, गङ्गा तं सिषेव इत्येतत् चित्रं आश्चर्यं न ॥ ३५ ॥

मन्दोपकारिणी – भित्त्वेति ॥ देवनदी भागीरथी तं मध्वं निषेवितुं सेवितुं शाखाविशेषेण मध्वाधिष्ठितमठसमीपे कस्यचित् वृक्षविशेषस्य शाखाविशेषेण उपलक्षितां भुवं भूमिं भित्वा विदार्य जगाम ययौ । 'गम्लृ गतौ' लिट् परस्मैपदं जगाम जग्मतुः जग्मुः । अत्र मध्वाचार्ये तत् ''गङ्गा सिषेवे इति एतत्'' चित्रं आश्चर्यं न न भवति । कुतः ? शिवादिवन्द्या शिवः रुद्रः आदिः येषां तैः देवैः वन्द्या नमस्कार्या । वाणी ब्रह्मणः स्त्री सरस्वती च यत्प्रेष्यतया यस्य मध्वस्य प्रेष्यायाः भावः प्रेष्यता तया परिचारकत्वेन 'नियोज्यकिङ्करप्रेष्यभुजिष्यपरिचारकाः' इत्यमरः कृतार्था कृतः सम्पादितो अर्थः पुरुषार्थो यया सा तथोक्ता सती वर्तते इति । गङ्गापेक्षया अत्युत्तमरुद्रादिसेव्या सरस्वती च यस्य मध्वरूपस्य वायोः सेवां कृत्वा कृतकृत्या आस्ते तस्य मध्वस्य सेवां कर्तुं गङ्गायाः गमनं नाश्चर्यमिति भावः । अन्त्यपादोपेन्द्रवज्रोपजातिः ॥ ३५ ॥

गुरुप्रबर्हस्य पदारविन्दं विदूरतः सा प्रणनाम मूर्ता ।
औदार्यसौन्दर्यतनुं तनुं तामालक्ष्य शिष्यैरतिविस्मितं तैः ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – गुर्विति ॥ मूर्ता प्राकृतदृष्टिगोचररूपा सा गङ्गा । गुरुप्रबर्हस्य गुरुश्रेष्ठस्य श्रीमध्वस्य पदारविन्दं विदूरतः प्रणनाम । तैः शिष्यैः औदार्यञ्च सौन्दर्यञ्च तयोः तनुं मूर्तिभूतां तां गङ्गासम्बन्धिनीं तनुं स्वरूपं आलक्ष्य दृष्ट्वा अतिविस्मितं अत्यन्तं विस्मयः प्राप्तः ॥ ३६ ॥

मन्दोपकारिणी – गुरुप्रबर्हस्येति ॥ सा भागीरथी मूर्ता सती मनुष्यदृष्टिविषये स्त्रीरूपा सती । गुरुप्रबर्हस्य गुरुश्रेष्ठस्य 'प्रबर्होऽनुत्तमोत्तमः' इत्यमरः श्रीमध्वस्य पदारविन्दं चरणं अरविन्दमिव विदूरतः किञ्चिद्दूरे प्रणनाम नमस्कृतवती । प्र पूर्वात् 'णमु प्रह्वत्वे' शब्दे चेत्यतः लिट् परस्मैपदम् । तदा तैः शिष्यैः औदार्यसौन्दर्यतनुं औदार्यं उदारत्वं महत्वं 'उदारो दातृमहतोः' इत्यमरः सौन्दर्यं सुन्दरत्वं च औदार्यसौन्दर्ये तनुः स्वरूपं यस्याः तां अतिसौन्दर्योपेतां इति भावः । तनुं मूर्तां तां स्त्रियं विग्रहवतीं गङ्गामिति यावत् । आलक्ष्य दृष्ट्वा अतिविस्मितं आश्चर्यं प्राप्तम् । पूर्वार्धेपेन्द्रवज्रोपजातिः ॥ ३६ ॥

तेनोपयातेन कदाचनाथ वाराणसीं पापनिवारणेन ।
अवादि वाणी बलिनः स्वशिष्यान् विलोक्य लीलावसरेऽवलिप्तान् ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – तेनेति ॥ अथ चातुर्मास्यावसानानन्तरं कदाचित् वारणासीं काशीं उपयातेन पापानां निवारणं निवारकस्तेन । तेन श्रीमध्वेन लीलावसरे क्रीडासमयेऽवलिप्तान् दृप्तान् । बलमेषामस्तीति बलिनः तान् स्वशिष्यान् विलोक्य इति वक्ष्यमाणप्रकारेण वाणी वाक् अवादि उक्ता ॥ ३७ ॥

मन्दोपकारिणी – तेनेति ॥ अथ चातुर्मास्यव्रतसमाप्त्यनन्तरं कदाचन पापनिवारणेन पापानां निरासेन निमित्तेन वाराणशीं काशीपुरीं उपयातेन प्राप्तेन पापानां निवारणं येन सः तेन पापहारकेण इत्यर्थः । तेन श्रीमध्वेन वाणी वाक्यं अवादि उक्ता । 'वद व्यक्तायां वाचि' इत्यतः कर्मणि लुङ् आत्मनेपदं अवादि अवादिषातां अवादिषत । किं कृत्वा ? लीलावसरे लीलायाः क्रीडायाः अवसरे काले अवलिप्तान् दृप्तान् बलिनः बलिष्ठान्

स्वशिष्यान् विलोक्य । चातुर्मास्यसमाप्त्यनन्तरं काशीक्षेत्रं गत्वा तत्र क्रीडासमये वयं बलवन्त इति गर्वयुक्तशिष्यान् दृष्ट्वा तेषां गर्वपरिहाराय मध्वः वक्ष्यमाणवाक्यं अवोचत् इति भावः । उत्तरार्धेपीन्द्रवज्रोपजातिः ॥ ३७ ॥

नियुद्धसिद्धयै युगपद्धि वीरम्मन्या भवन्तोऽभिपतन्तु मां द्राक् ।
समस्तशक्तिं न युनक्ति यः स्वामत्रास्मदाज्ञां स निराकरोति ॥ ३८ ॥

भावप्रकाशिका — वीरम्मन्या 'आत्ममाने खश्चे'ति खश् । 'अरुर्द्विषदजन्तस्य मुमि'ति मुम् ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – नियुद्धेति ॥ आत्मनो वीरान् मन्यन्त इति वीरम्मन्याः । 'आत्ममाने खश्चे'ति खश् । खित्वादरुर्द्विषदजन्तस्य मुमिति मुमागमः । भवन्तो नियुद्ध-सिद्धयै बाहुयुद्धसिद्धयै । 'नियुद्धं बाहुयुद्धं स्यादि'त्यमरः । द्राक् मां अभिपतन्तु । योऽत्र मया सह नियुद्धे स्वां आत्मीयां समस्तशक्तिं न युनक्ति न नियोजयति सोऽस्माकमाज्ञां अस्मदाज्ञां निराकरोति उल्लङ्घयति । नियुद्धे यो मयि समस्तां शक्तिं न नियोजयति तस्य मदाज्ञोल्लङ्घनदोषः स्यादिति भावः ॥ ३८ ॥

मन्दोपकारिणी – किमवोचत् इत्यत आह ॥ **नियुद्धेति** ॥ हे वीरम्मन्याः स्वान् वीरान् मन्यमानाः । आत्ममाने खश् चेति खश् प्रत्ययः । अरुर्द्विषदजंतस्य मुमिति मुमागमः । भवन्तः युगपदि एकदा एव मिलिता एव इति भावः । नियुद्धसिद्धयै द्वन्द्वयुद्धस्य सिद्धयै साधनाय द्राक् शीघ्रं मां अभि मां प्रति पतन्तु आयान्तु । यः अत्र मया सह नियुद्धे स्वां स्वात्मीयां समस्तशक्तिं न युनक्ति न प्रयोजयति सः अस्मदाज्ञां निराकरोति उल्लङ्घयति । हे शिष्याः ! वयमेव बलवन्त इति गर्ववन्तो यूयं सर्वेऽपि युगपदेव मया सह द्वन्द्वयुद्धं कुरुत । तस्मिन् समये भवतां सर्वशक्तिं मयि प्रयोजयत । अन्यथा मदाज्ञोल्लङ्घनदोषो भवतां भवेदेव इति शिष्याणां शपथं स्थापितवान् इति भावः । 'पत्लृ पतने' लोट् परस्मैपदं पततु पततां पतन्तु । नियरोति निर् पूर्वात् 'डु कृञ् करणे' लट् परस्मैपदम् । प्रथमतृतीयपादोपेन्द्रवज्रोपजातिः ॥ ३८ ॥

इतीरयन् पञ्चदशैष यूनः प्राप्तान् प्रयुद्धान् युगपन्निपात्य ।
उत्थीयतां यस्य समर्थता स्यादिति ब्रुवाणोऽशनकैर्जहास ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ एषः श्रीमध्वः । इति पूर्वोक्तप्रकारेण ईरयन् युगपत् प्राप्तान् प्रकर्षेण स्वसमस्तशक्त्या युध्यन्तीति प्रयुद्धास्तान् । प्रकृष्टयुद्धं कुर्वत इत्यर्थः । 'आदिकर्मणि क्तः कर्तरि चे'ति कर्तरि क्तः । ईषत् नियुद्धे गुर्वाज्ञोल्लङ्घनदोषभयात् स्वसमस्तशक्त्या नियुद्धं कुर्वत इति भावः । पञ्चाधिका दश पञ्चदश तान् यूनो युगपन्निपात्य। यस्य समर्थता उत्थातुं सामर्थ्यं स्यात् तेन उत्थीयतामिति ब्रुवाणः सन् शनकैः जहास । हस् हसने लिट् ॥ ३९ ॥

मन्दोपकारिणी – इतीति ॥ एषः मध्वः । इति पूर्वोक्तप्रकारेण ईरयन् वदन् युगपत् प्राप्तान् प्रयुद्धान् प्रकर्षयुद्धान् युद्धं कुर्वतः । आदिकर्मणि क्तः कर्तरि च इति कर्तरि क्त प्रत्ययः । ईषत् युद्धकरणे गुर्वाज्ञोल्लङ्घनभयेन स्वसर्वशक्त्या नियुद्धं कुर्वत इति भावः । पञ्चदश पञ्चदशसङ्ख्यान् यूनः तरुणान् 'वयस्यस्तरुणो युवा' इत्यमरः शिष्यान् निपात्य भूमौ पातयित्वा भवन्मध्ये यस्य समर्थता उत्थातुं सामर्थ्यं स्यात् तेन उत्थीयतां स उत्तिष्ठतु इति भावः । इति ब्रुवाणस्सन् अशनकैः उच्चैर्ध्वनिना जहास हसितवान् । 'उत्पूर्वकात् ष्ठा गति निवृत्तौ इत्यतः भावे लोट् आत्मनेपदं अत्र प्रथमपुरुषैकवचनमेव । भावस्यैकत्वात् इति ज्ञेयम् । 'हस हसने' लिट् परस्मैपदं जहास जहसतुः जहसुः । प्रथमतृतीय-पादोपेन्द्रवज्रोपजातिः ॥ ३९ ॥

सौमेरवं गौरवमावहन्ति तवाङ्गमङ्गाङ्गुलयश्च नोऽङ्गे ।
पुरा विनश्याम इतो दयालो स्वामिन् विमुञ्चेत्यवदंस्तदा ते ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – सौमेरवमिति ॥ तदा ते शिष्याः । अङ्ग! नाथ! श्रीमध्व! तवाङ्गं हस्तादिकं अङ्गुलयश्च प्रत्येकं नोऽस्माकमङ्गे शरीरे । सुमेरोः सम्बन्धि सौमेरवं गौरवं गुरुत्वं आवहन्ति । इतः अस्मात् कारणात् विनश्यामः पुरा नष्टाः स्म । 'नश् अदर्शने' लट् । 'यावत्पुरानिपातयोर्लडि'ति लट् प्रत्ययः । हे स्वामिन्! विमुञ्च इति अवदन् ॥४०॥

मन्दोपकारिणी – सौमेरवमिति ॥ तदा उत्थीयतां इति मध्वोक्तिसमये ते शिष्याः इति वक्ष्यमाणप्रकारेण अवदन् । कथम् ? हे अङ्ग ! 'प्रियस्य सम्बोधनेऽङ्ग' इत्यमरः । तवाङ्गं हस्ताद्यवयवः अङ्गुष्ठाद्यङ्गुलयश्च नः अस्माकं अङ्गे शरीरे 'अङ्गे शरीरे अङ्गमात्रान्तिकोपायप्रतीकेषु अप्रधानके' इति विश्वः । सौमेरवं 'मेरुस्सुमेरुर्हेमाद्रिः' इत्यमरः सुमेरोः सम्बन्धि सौमेरवं मेरुपर्वतसदृशं इत्यर्थः । गौरवं गुरुत्वं आवहन्ति प्राप्नुवन्ति । इतः अस्मात् कारणात् वयं विनश्यामः पुरा नष्टाः स्म । 'यावत्पुरानिपातयोः लट्' इति लट् । हे दयालो कृपालो स्वामिन् अस्मान् विमुञ्च इति अवदन् इति सम्बन्धः । तव एकैकः अङ्गुल्याद्यवयवः मेरुतुल्यभारः तादृशावयवपातेन क्लेशितान् नः मुञ्च इति अवदन् इति भावः । आङ्पूर्वको 'वह प्रापणे' लट् परस्मैपदम् । 'नश् अदर्शने' लट् परस्मैपदम् नश्यामि नश्यावः नश्यामः । 'मुच्लृ मोक्षणे लोट् परस्मैपदं मुञ्च मुञ्चतं मुञ्चत । द्वितीय-तृतीयपादोपेन्द्रवज्रोपजातिः ॥ ४० ॥

तेनाथ मुक्तैरतिविस्मयस्तैरवाप्यनालोच्य हि तत्स्वरूपम् ।
यद्भ्रूविजृम्भेण सशम्भुशक्रं जगत् समस्तं नियतं निकामम् ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – तेनेति ॥ अथ स्वामिन्! विमुञ्चेति प्रार्थनानन्तरं तेन श्रीमध्वेन मुक्तैः तैः शिष्यैः तत्स्वरूपं श्रीमध्वस्य स्वरूपं अनालोच्य हि सम्यगविचार्यैव । 'हिर्हेतावववधारण' इत्यमरः । अतिविस्मयः अवापि सम्प्राप्तः । सम्यक् तत् स्वरूपविचारे सति नैतावन्मात्रेण विस्मयो युज्यत इति भावः । तथा हि यद्भ्रूविजृम्भेण यस्य श्रीमध्वस्य भ्रूविलासेन सशम्भुशक्रं शम्भुशक्राभ्यां सहितं समस्तं जगत् नितरां कामो यथा भवति तथा। यथेच्छमित्यर्थः । नियतं हि प्रेरितं हि । एवंभूतस्य पञ्चदशयूनां निपातनं न चित्रमिति भावः ॥ ४१ ॥

मन्दोपकारिणी – तेनेति ॥ अथ मुञ्च इति प्रार्थनानन्तरं तेन श्रीमध्वेन मुक्तैः तैः शिष्यैः अतिविस्मयः अत्याश्चर्यं अवापि अवाप्तम् । किं कृत्वा तत्स्वरूपं तस्य मध्वस्य स्वरूपं अनालोच्य हि सम्यक् अविचार्यैव 'हिर्हेतावववधारणे' इत्यमरः । सम्यक् स्वरूपविचारे सति न एतावन्मात्रेण विस्मयो युज्यते इति भावः । तथा हि यद्भ्रूविजृम्भेण यस्य मध्वस्य भ्रुवोः विजृम्भेण विलासेन सशर्वशक्रं शर्वेन्द्रसहितं समस्तं जगत् निकामं

यथेच्छं नियतं प्रेरितम् । रुद्रादिसर्वजगन्नियामकस्य पञ्चदशपुरुषाणां नियमनं न चित्रं इति भावः । अव पूर्वात् 'आप्लृ व्याप्तौ' कर्मणि लुङ् आत्मनेपदं आपि आप्सातां आप्सत । द्वितीयचतुर्थपादोपेन्द्रवज्रोपजातिः ॥ ४१ ॥

सदाक्ष्यमाक्षिप्तसमस्तपक्षको यतिः प्रभुं कोऽप्यमरावतीपदः ।
जिगीषया ज्ञानसहायकर्मणः प्रसाध्यतां साधनतेत्युदाहरत् ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – सदाक्ष्यमिति ॥ दक्षस्य चतुरस्य भावो दाक्ष्यं तेन सहितं यथा भवति तथा सदाक्ष्यम् । आक्षिप्ता निराकृताः समस्तपक्षाः सर्ववादिनां सिद्धान्ता येन तादृशः । अमरावतीत्यमरेन्द्रपुरीति यत्पदं नाम यस्य सोऽमरेन्द्रपुर्याख्य इत्यर्थः । कोऽपि कश्चन यतिः सन्यासी जिगीषया जेतुमिच्छया प्रभुं श्रीमध्वं प्रति ज्ञानं सहायो यस्य तच्च तत्कर्म च तस्य, साधनता पुरुषार्थसाधनत्वं प्रसाध्यताम् । ज्ञानिकृतमेव कर्माक्षय पुरुषार्थमोक्षसाधनं इति प्रसङ्गादभिहिते सति तदेव सम्यग् प्रसाध्यतामित्युदाहरदिति भावः । राध साध संसिद्धौ कर्मणि लोट् ॥ ४२ ॥

मन्दोपकारिणी – सदाक्ष्यमिति ॥ अमरावतीपदः अमरावती इन्द्रपुरी इति पदं नाम यस्य सः कोऽपि कश्चन यतिः मायिसन्यासी जिगीषया जेतुं इच्छया प्रभुं समर्थं श्रीमध्वं प्रति उदाहरत् अब्रवीत् । किमिति ? हे मध्वाचार्य ! त्वया ज्ञानसहायकर्मणः ज्ञानं सहायः सहकारी यस्य तत् तच्च तत्कर्म च इति तथोक्तं तस्य साधनता पुरुषार्थसाधनत्वं प्रसाध्यतां उपपाद्यतां इति । किंभूतः ? सदाक्ष्यं दक्षस्य भावो दाक्ष्यं तेन चातुर्येण सहितं यथा भवति तथा । आक्षिप्तसमस्तपक्षकः समस्ताश्च ते पक्षाश्च आक्षिप्ताः निराकृताः समस्तसिद्धान्ताः येन सः चातुर्येण निरस्तसर्ववादिसिद्धान्त इति भावः । 'प्र पूर्वात् साध संसिद्धौ इत्यतः कर्मणि लोट् आत्मनेपदं साध्यतां साध्येतां साध्यन्ताम्' । उत् आङ् पूर्वात् 'हृञ् हरणे' इत्यतः लङ् परस्मैपदम् । वंशस्थवृत्तं 'वदन्ति वंशस्थमिदं जतौ जरौ' ॥ ४२ ॥

संसाधितार्थे भगवत्ययुक्तिवित्प्रच्छ स ज्ञानपदार्थमुग्रधीः ।
ज्ञातः स ते ज्ञान्यसि चेन्न चेन्न सः प्रश्नो घटेतेति निराकृतैष तम् ॥ ४३ ॥

भावप्रकाशिका — ज्ञानपदार्थं पृच्छन्तं प्रति भगवानूचे– त्वं येन केनचिज्ज्ञानेन सहितो न वा । 'ज्ञान्यस्मि' इति वदसि चेज्ज्ञानाङ्गीकारिणा त्वया स ज्ञानपदार्थो ज्ञात एव । नेति वदसि चेत् सर्वज्ञानरहितस्य तव प्रश्नशब्दानां तद्विषयाणां चार्थानामज्ञानात् प्रश्न एव न घटेत ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – समिति ॥ भगवति श्रीमध्वे संसाधितार्थे सति सम्यक्साधितः संसाधितोऽर्थो ज्ञानसहायकर्मणः पुरुषार्थसाधनत्वाख्यं तत्पृष्टं प्रमेयं येन तस्मिन्सति । युक्तिविन्न भवतीत्ययुक्तिवित्, श्रीमध्वसाधितार्थे निराकरणयुक्तिं अजानन् उग्रधीः सः यतिः । ज्ञानपदार्थं ज्ञानमिति पदस्य वाच्यं पप्रच्छ । एष श्रीमध्वः त्वं ज्ञान्यसि चेत्, स ज्ञानपदार्थः ते त्वया ज्ञातः । न चेत्सः प्रश्नो ज्ञानपदार्थः क इति प्रश्नो न घटते न युज्यते । घट परिवर्तने लट् । इति तं यतिं निराकृत निराचक्रे । अयं भावः ज्ञानपदार्थं पृच्छंस्त्वं येन केनापि ज्ञानेन युक्तोऽसि न वा । आद्ये ज्ञानवता त्वया तत्पदार्थो ज्ञात एव, ततश्च सिद्धविषयोऽयं प्रश्नः स्यात् । एवञ्च तवोन्मत्तसाम्यं स्यात् । द्वितीये ज्ञानमात्र-रहितस्य प्रश्नः शब्दानां तद्विषयाणामर्थानाञ्च परिज्ञानाभावान्न घटते । ज्ञानमात्रा-भावाङ्गीकारस्य ज्ञानाविनाभूतप्रश्नस्य च परस्परविरुद्धत्वादिति ॥ ४३ ॥

मन्दोपकारिणी – समिति ॥ भगवति ज्ञानादिपूर्णे श्रीमध्वे संसाधितार्थे सति सम्यक् साधितः युक्तिभिः प्रतिपादितः अर्थः प्रमेयविषयो येन तस्मिन् । ज्ञानसहकृतकर्मणः पुरुषार्थसाधनत्वरूपे स्वपृष्टे प्रमेये उपपादिते सतीति भावः । अयुक्तिवित् युक्तिं जानातीति युक्तिवित् स न भवतीति अयुक्तिवित् श्रीमध्वाचार्येण साधिते अर्थे निराकरण-युक्तिस्फूर्तिरहितः उग्रधीः क्रूरबुद्धिः सः इन्द्रपुर्याख्यः मायी ज्ञानपदार्थं ज्ञानमित्यस्य पदस्य अर्थं अभिधेयं पप्रच्छ । ज्ञानं इति एतत् पदस्य कोऽर्थः इति मध्वं प्रति प्रश्नं चकार इति भावः । 'पृच्छ ज्ञीप्सायां' वाचीत्यतो लिट् परस्मैपदम् । एषः एवं पृष्टो मध्वः तं इन्द्रपुर्याख्यमायिनं इति इत्थं निराकृत निराकरोत् । कथं हे वादिन् ! यदि ज्ञानी यत्किञ्चित् ज्ञानवान् असि भवसि चेत् सः ज्ञानपदस्य अर्थः ते त्वया ज्ञात एव । न चेत् यत्किञ्चित् वस्तुज्ञानवान् न असि न भवसि चेत् सः त्वया कृतः प्रश्नः न घटेत न सम्भवति इति । अयं भावः ज्ञानपदार्थः क इति पृच्छन् त्वं यत्किञ्चित् ज्ञानेन युक्तोऽसि न वा । आद्ये जानतैव त्वया ज्ञानपदार्थस्य ज्ञातत्वात् प्रश्नस्य सिद्धार्थतालक्षणो दोषः

प्रसज्येत । द्वितीयप्रश्ने शब्दस्य तदर्थस्य च ज्ञानाभावात् ज्ञानमात्ररहितस्य तव प्रश्नो न घटते । ज्ञानमात्राभावाङ्गीकारस्य ज्ञानाविनाभूतप्रश्नस्य च परस्परविरुद्धत्वात् इति । 'अस भुवि' लट् परस्मैपदं असि स्थः स्थ । 'घट चेष्टायां लिङ् आत्मनेपदं घटेत घटेयातां घटेरन्' । निर् आङ् पूर्वात् 'डु कृञ् करणे' लुङ् आत्मनेपदं अकृत अकृषातां अकृषत । इन्द्रवंशावृत्तं 'स्यादिन्द्रवंशा यदि ततजैरसंयुतैः' ॥ ४३ ॥

विततितमतमोऽन्तं साधयन्त्या नितान्तं
सदसि सदसि रेजे व्याख्यया व्यासशिष्यः ।
सकलसमयिहस्ताम्भोजबन्धाभिनन्दी
शरदि शरदि चन्द्रश्चन्द्रिकासम्पदेव ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – विततेति ॥ व्यासशिष्यः श्रीमध्वः । सदसि सदसि सर्वसभासु । अत्यन्तं विततं विततितमं तादृशं यत्तमोऽज्ञानं तस्यान्तं नाशं नितान्तमत्यन्तं साधयन्त्या व्याख्यया । चन्द्रः शरदि शरदि, विततितमतमोऽन्तं अतितरां व्याप्तान्धकारनाशं साधयन्त्या चन्द्रिकासम्पदेव कौमुदीसम्पदेव समयाः सिद्धान्ता येषां सन्तीति समयिनः, सकलाः समस्ता ये समयिनः सर्वशास्त्राभिज्ञाः तेषां हस्ताम्भोजबन्धः हस्ता अम्भोजानीव तेषां बन्धोऽञ्जलिबन्धः तमभिनन्दतीति तादृशः । तेन अभिनन्दितुं शीलमस्यास्तीति वा । चन्द्रोऽपि स्वोदयेनाम्भोजमुकुलीभावाभिनन्दी । रेजे । मालिनीवृत्तं 'ननमयययुतेयं मालिनी भोगिलोकैरि'त्युक्तेः ॥ ४४ ॥

मन्दोपकारिणी – विततेति ॥ व्यासशिष्यः मध्वः । सदसि सदसि वीप्सायां द्विर्भावः सर्वविद्वत्सभासु व्याख्यया वेदव्याख्यानेन रेजे शुशुभे । किंभूतया विततितमतमोन्तं अतिशयेन विततं व्याप्तं विततितमं तच्च तत् तमः अज्ञानं तस्य अन्तं नाशं 'अन्तो नाशो द्वयोर्मृत्युः' इत्यमरः नितान्तं अत्यन्तं साधयन्त्या कुर्वन्त्या । कथंभूतः सकलसमयि-हस्ताम्भोजबन्धाभिनन्दी सकलाश्च ते समयिनः सिद्धान्ताभिज्ञाश्च तेषां हस्ताम्भोजबन्धः हस्ता एव अम्भोजानि तेषां बन्धः अञ्जलिबन्धः तं अभिनन्दति अनुमोदति इति तथोक्तः । सकलपण्डितमण्डले मध्वेन व्याख्याते सति व्याख्यानकौशलं दृष्ट्वा सर्वे विद्वांसः अञ्जलिं बबन्धुः इति भावः । कः कयेव रेजे । चन्द्रः शरदि शरदि सर्वशरदृतुषु

चन्द्रिकासम्पदेव कौमुदीलक्षणसम्पदेव । चन्द्रिकापि विततमसः अन्धकारस्य अन्तं साधयन्ती । चन्द्रोऽपि स्वोदयेन अम्भोजमुकुलीभावं अभिनन्दति अनुमोदति इति । 'राजृ दीप्तौ' लिट् आत्मनेपदं रेजे रेजाते रेजिरे । मालिनीवृत्तं 'ननमयययुतेयं मालिनी भोगिलोकैः' ॥ ४४ ॥

जननं समये समये जगतः प्रथिते समये समयेदमिते ।
सनिरासमयेऽसमये स्थितियुक्स्ववभासमयेऽसमयेष्टधिया ॥ ४५ ॥

भावप्रकाशिका — असमये अये इष्टधिया जगतो जननं वर्तते । अये दैवे ब्रह्मणि वर्तमानया स्वेच्छाविषयया बुद्ध्या जगतो जननं न तु मायया । समये समये काले काले । समये वेदान्तशास्त्रे प्रथिते न त्ववाच्ये । इदं समया इते अस्य चेतनजातस्य समीपे गते न त्वनेनैक्यवति । 'अभितः परित' इत्यादिना द्वितीया न केवलं जननं सनिरासं ससंहारं स्थितियुक् च । स्ववभासमये स्वच्छज्ञानमये न त्वशुद्धे ब्रह्मणि । असमया असदृशया ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – जननमिति ॥ जननं समये समये जगतः प्रथिते समये समया इदं इते सनिरासं अये असमये स्थितियुक् स्ववभासमये असमया इष्टधिया इति पदच्छेदः । सा व्याख्या इत्यादीन् परमान् उत्तमानर्थान् प्रकामं सम्यक् प्रकाशयामासेति तृतीयश्लोकेन वक्ष्यमाणेनान्वयः । सा व्याख्या समये वेदान्तशास्त्रे प्रथिते मुख्यतया सर्वशब्दवाच्यतया प्रसिद्धे । न तु अवाच्यतयेति भावः । इदं चेतनजातं समया समीपे । 'अभितः परितः' इत्यादिना द्वितीया । इते प्राप्ते । न तु तेन ऐक्यमापन्न इति भावः । न विद्यते समयः कालो यस्य सोऽसमयस्तस्मिन् । कालकृतविनाशादिविकाररहित इत्यर्थः । शोभनश्चासौ अवभासः ज्ञानञ्च स्ववभासः स्वच्छज्ञानं तद्रूपः स्ववभासमयस्तस्मिन् ताद्रूप्यार्थे मयट् स्वच्छज्ञानस्वरूपे । न त्वशुद्धे शबलब्रह्मणीति भावः । अये दैवे परब्रह्मणि । 'अयः शुभावहो विधिरि'त्यमरः । असमया एवंभूते परब्रह्मणि वर्तमानयाऽसमयाऽसदृशया इष्टधिया स्वेच्छाविषयया बुद्ध्या न तु माययेत्यर्थः । समये समये काले काले, निरासेन संहारेण सहितं सनिरासं, स्थित्या पालनेन युक् स्थितियुक् जगतो लोकस्य सृष्टिः प्रवर्तते । इत्यादीन् परमानुत्तमानर्थान् प्रकामं सम्यक् प्रकाशयामास इति उत्तरेणान्वयः । तोटकवृत्तं लक्षणं तूक्तम् ॥ ४५ ॥

मन्दोपकारिणी – ग्रन्थाख्यायकमर्थं प्रतिपादयामास इत्याह जननमित्यादिभिः त्रिभिः श्लोकैः । जननं समये समये जगतः प्रथिते समये समया इदं इते सनिरासं अये असमये स्थितियुक् स्ववभासमये असमया इष्टधिया इति पदच्छेदः । समये प्रथिते इदं समया इते असमये स्ववभासमये अये विद्यमानया इति शेषः । असमया इष्टधिया समये समये जगतः सनिरासं स्थितियुक् जननं भवति इत्यन्वयः । अर्थस्तु समये वेदान्तशास्त्रे प्रथिते मुख्यतः सर्वशब्दवाच्यतया प्रसिद्धे न तु अवाच्ये इति भावः । 'समयाः शपथाचारकालसिद्धान्त संविदः' इत्यमरः । इदं प्रमाणप्रसिद्धं चेतनजातं समया समीपे इते प्राप्ते 'अभितः परितः समयानिकषाहाप्रतियोगेऽपि' इत्यादिना इदमिति द्वितीया । एवं च अस्य चेतनसमुदायस्य समीपे विद्यमाने न तु तेन ऐक्यमापन्ने इति भावः । असमये समयः कालः तेन तत्कृतविकारो लक्ष्यते कालकृतविकाररहिते इत्यर्थः । विनाशरहिते इति भावः । स्ववभासमये सु स्वच्छः अवभासः ज्ञानं मयः स्वरूपं यस्य सः तस्मिन् केवलज्ञानरूपे अये दैवे परब्रह्मणि 'अयः शुभावहो विधिः' इत्यमरः एतादृशे ब्रह्मणि विद्यमानया असमया असदृशया इष्टधिया स्वेच्छाविषयया बुद्ध्या न तु माययेति भावः । समये समये काले काले जगतः सनिरासं संहारेण सहितं, स्थितियुक् स्थित्या पालनेन युक्तं जननं सृष्टिः भवतीति शेषः । वेदादिसर्वशब्दमुख्यवाच्यस्य सकलचेतनसमुदायात् अत्यन्तभिन्नस्य कदापि नाश-रहितस्य ज्ञानरूपस्य परब्रह्मणः सकाशात् जगतः तत्तत्कालविशेषे सृष्टिस्थितिसंहारादिः भवतीति भावः । तोटकवृत्तम् ॥ ४५ ॥

वर्तस्वाध्यधि सर्वं दीव्येदं सोऽनिशं स्वतन्त्रो विष्णुः ।
उज्जासय दुष्टानां संस्कुरु साधून् गुणाभिपूर्णोऽप्यगुणः ॥ ४६ ॥

भावप्रकाशिका — वर्तस्वेत्यादौ 'समुच्चयेऽन्यतरस्यामि'ति हिस्वयोः समुच्चयार्थत्वम् । अध्यधीत्यत्र 'उपर्यध्यधसः सामीप्य' इति द्विर्वचनम् । द्वितीया च 'उभसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते' इति । अनेन जगता दीव्यति च । 'दिवः कर्म चे'ति कर्मत्वं करणस्य । 'जासिनिप्रहणनाटक्राथपिषां हिंसाया'मिति कर्मणि षष्ठी च । दुष्टानुज्जासयति च ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – वर्तस्वेति ॥ सा व्याख्या । स्वतन्त्रः स विष्णुः सर्वं सर्वस्य जगतोऽध्यधि, अत्यन्तसमीपे हृदयगुहायां वर्तस्व वर्तते । अत्र समुच्चयेऽन्यतरस्यां इति लोट्। 'उपर्यध्यधसः सामीप्य' इति सामीप्यार्थेऽधिशब्दस्य द्विरुक्तिः । तद्योगे 'उभसर्वतसोः कार्याधिगुपर्यादिषु त्रिष्वित्यादिना सर्वशब्दस्य द्वितीया । इदं अनेन जगता अनिशं सदा दीव्य दीव्यति क्रीडत इत्यर्थः । अत्र 'दिवः कर्म चे'ति करणस्य कर्मत्वम् । दुष्टानां दुष्टान् असुरान् उज्जासय । उज्जासयति हन्तीत्यर्थः । जसु हिंसायां इति धातुः । तेषां हननञ्च तमसि प्रक्षेपणमेव । अत्र 'जासिनिप्रहणननाट' इत्यादिना दुष्टानां इति कर्मणि षष्ठी । साधून् मोक्षयोग्यान् संस्कुरु संस्कुरुते निर्दुष्टान् करोतीत्यर्थः । गुणाभिपूर्णोऽपि आनन्दादिगुणसम्पूर्णोऽपि अगुणः न विद्यन्ते गुणाः सत्वरजस्तमांसि यस्य तादृशः । इत्याद्यर्थान् प्रकाशयामासेति सम्बन्धः । अत्र विरोधाभासालङ्कारः ॥४६॥

मन्दोपकारिणी – वर्तस्वेति ॥ स्वतन्त्रः सः विष्णुः । इदं सर्वं अस्य सर्वस्य जगतः अध्यधि अत्यन्तसमीपे हृदयगुहायामिति यावत् अनिशं वर्तस्व वर्तते । अत्र समुच्चयेऽन्यतरस्यां इति क्रियासमुच्चये लोट् । 'उपर्यध्यधसः सामीप्य इति सामीप्यार्थे अधिशब्दस्य द्विरुक्तिः' द्विरुक्ताधिशब्दसम्बन्धादेव च इदं सर्वमिति द्वितीयान्तप्रयोगः उभसर्वतसोरिति द्वितीया । 'वृतु वर्तने मध्यमपुरुषैकवचने लोट् परस्मैपदं वर्तस्व वर्तेथां वर्तध्वम्' । इदं अनेन जगता दीव्य दीव्यति क्रीडते इत्यर्थः । 'दिवु क्रीडेत्यादि लोट् परस्मैपदं दीव्य दीव्यतं दीव्यत' । अत्र च दिवः कर्म च इति सूत्रेण करणस्य कर्मत्वम् । दुष्टानां दुष्टान् संकरादीन् उज्जासय उज्जासयति हन्तीत्यर्थः । उत्पूर्वकात् 'जसु हिंसायां' स्वार्थे णिजन्तात् लोट् परस्मैपदं जासय जासयतं जासयत' । 'दुष्टानां हननं नाम तमसि प्रवेश एव' इति जासिनिप्रहणेत्यादिना दुष्टानां इति कर्मणि षष्ठी । साधून् मोक्षयोग्यान् संस्कुरु संस्कुरुते निर्दुष्टान् करोतीत्यर्थः । अविद्याबन्धरहितान् करोतीति भावः । 'सम्पूर्वात् डु कृञ् करणे लोट् परस्मैपदं कुरु कुरुतं कुरुत' । गुणाभिपूर्णोऽपि अगुणः सत्वादिगुणरहितः । आर्यावृत्तं 'आर्या प्राग्दलमन्तेऽधिकगुरुतादृग्परार्धमार्या गीतिः' ॥ ४६ ॥

असमोत्तमो मतोऽसौ श्रियःपतिर्विश्वतो विभिन्नात्मा ।
परमान् प्रकाममर्थान् प्रकाशयामास सेत्यादीन् ॥ ४७ ॥

भावप्रकाशिका — सा व्याख्या प्रकाशयामास ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – असमोत्तम इति ॥ सा व्याख्या । असौ श्रियःपतिः समश्च उत्तमश्च समोत्तमौ न विद्येते समोत्तमौ यस्य तादृशः समाधिकरहित इत्यर्थः । विश्वतः सर्वस्मात् विभिन्नात्मा विभिन्नः अत्यन्तविलक्षणः आत्मा स्वरूपं यस्य तादृशो । मतो ज्ञातः । सर्वदा सदागमैः इति भावः । इति आदिः येषां तान् परमान् उत्तमान् अर्थान् प्रकामं सम्यग्यथा भवति तथा प्रकाशयामास । कासृ दीप्तौ लिट् । चपलावृत्तं 'दलयोर्द्वितीयतुल्यौ गुणौ जतारौ तु अत्र चपला' इत्युक्तेः ॥ ४७ ॥

मन्दोपकारिणी – असमेति ॥ असौ श्रियःपतिः हरिः असमोत्तमः न विद्यते समः सदृशः उत्तमः अधिकश्च यस्मात् । विश्वतः सर्वस्मात् जगतः विभिन्नात्मा विभिन्नः अत्यन्तविलक्षणः आत्मा स्वभावो यस्य सः । 'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि' इति भास्करः । मतः सर्वदा सदागमैः ज्ञातः इत्यर्थः । इत्यादीन् एवमादीन् परमान् उत्तमान् अर्थान् प्रतिपाद्यान् प्रकामं अत्यन्तं सा व्याख्या प्रकाशयामास प्रकटीचकार । 'अस भुवि' लिट् परस्मैपदं चपलावृत्तम् । उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ४७ ॥

समानया यानमास मायया ततयाऽयमा ।
नयासना नास या न यातनाललनाऽतया ॥ ४८ ॥

भावप्रकाशिका — या मायया अनमा आस मायावाद्यभिमतया मायया जगन्मिथ्यात्वसाधिकया नमनरहिताऽभूत् । गुणगुण्यादीनां भेदे सम्बन्धापेक्षयाऽनवस्था । अभेदे गुणादिमात्रं गुण्यादिमात्रं वा । भेदाभेदे स्वव्याहतिरिति तेषां खण्डने परेषामनुयोग एव । तस्मान्मायामय एवेति तत्पक्षे मायापालिते नमन्ति ह्यपरे । समानया 'इन्द्रो मायाभिः पुरुरूप ईयते' इति मानाभाससहितया । इयं व्याख्या गुणगुण्यादिभावं विशेषाङ्गीकारेणैवाभेदेन घटयित्वा मायाशब्दस्य च 'मायेति भगवत्प्रज्ञे'त्यादिना विषयान्तरं प्रदर्श्य तन्मायां वन्ध्याकुमारीसमानां करोति । ततया व्याप्तया अयमा अद्वन्द्वा । नयासना नास न । 'विषयस्तद्विचारश्च हेतूदाहृतिसंशयाः । पक्षौ प्रयोजनं चैव नयोऽष्टाङ्गः प्रकीर्तित' इति प्रसिद्धो नय आसनं यस्यास्सा नयासना नास न न बभूवेति न । सा

व्याख्या अर्थान् प्रकाशयामास । अतया तद्विरुद्धया दुःशास्त्रव्याख्यया यातना भवति । अललना ललनं विलासः सुखं तद्रहिता । नियमेनान्धतमसक्लेश इत्यर्थः । अथवा मायया अङ्गीक्रियमाणया यातना ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – समानयेति ॥ समानया या अनमा आस मायया ततया अयमा नयासना न आस या न यातना अललना अतया इति पदच्छेदः । या व्याख्या समानया मानैः प्रमाणैः सहिता समाना तया । 'इन्द्रो मायाभिः पुरुरूप ईयते । मायामात्रमिदं द्वैतं अद्वैतं परमार्थत' इत्यादिमानाभाससहितयेत्यर्थः । ततया व्याप्तया मायया जगन्मिथ्यात्वसाधिकया मायिशास्त्रात्मिकया मायया । अनमा न विद्यते नमो नम्रता यस्याः सा अनमा । निराकर्तुमशक्या आसेति भावः । इत्थं हि मायिनो माया । गुणादीनां गुण्यादिभिर्भेदोऽभेदो भेदाभेदो वा । आद्ये भेदपरम्परयाऽनवस्था स्यात् । द्वितीये गुण्यादिमात्रं वा गुणादिमात्रं वा विशिष्यते । तृतीये पूर्वोक्तदूषणं व्याहतिश्चाधिकेति । किञ्च 'मायामात्रं इन्द्रो मायाभिरि'त्यादिवचनैश्च सर्वस्यापि भेदादिप्रपञ्चस्य मायामयत्वमेव न कस्यापि वास्तवत्वं इत्यादिमानाभास असहितया मायया नमा आसेत्यर्थः । तथा हि न-तावद्गुणगुण्यादीनां वास्तवत्वे भेदादिविकल्पदोषावकाशः । गुणादीनां गुण्यादिभिः अभेदाङ्गीकारेण अनवस्थाभावात् । न चैवं अन्यतरमात्रावशेषप्रसङ्गः । अयं गुणी । अयमस्य गुणोऽयमवयवी । अयमस्यावयव 'इत्यादिभेदव्यवहारस्य च विशेषबलेनाङ्गीकारात् अयावद्द्रव्यभाविगुणानुसारेण भेदाभेदयोरप्यङ्गीकारादिति । 'मायामात्रमि'त्यादिषु मायाशब्दस्य भगवत्प्रज्ञावाचकत्वेन तदभिमतसदसद्विलक्षणार्थत्वाभावादिति । पुनः कथंभूता व्याख्येत्यत आह– अयमेति । अयमा न विद्यते यमं द्वन्द्वं यस्या सा अयमा । 'द्वन्द्वं द्वितयं यमं यमलमि'ति हलः । असदृशेत्यर्थः । या व्याख्या नयासना नये न्यायः । युक्तिरित्यर्थः । आसनमाश्रयो यस्याः सा नयासना नासेति न बभूवेति न । आसैवेत्यर्थः । 'विषयस्तद्विचारश्च हेतूदाहृतिसंशयाः। पक्षौ प्रयोजनश्चेति नयोऽष्टाङ्गप्रकीर्तित' इत्यष्टाङ्गो नयः । इयं व्याख्या तु तदाश्रिता बभूवेत्यर्थः । अतया तद्विरुद्धा असा तया अतया व्याख्यया अललना न विद्यते ललनं विलासो यस्याः साऽललना । 'लल विलास' इति धातोर्नियमेन सुखरहितेति यावत् । यातना अन्धन्तमः क्लेशो भवतीति सम्बन्धः । 'यातना तीव्रवेदने'त्यमरः । अथवा तयेति पदच्छेदः । तया मायया अङ्गीकृतया यातना तीव्रवेदना भवति । अन्धन्तमसि यद्दुःखं तद्भवतीत्यर्थः । विपुलावृत्तम् । 'यस्यां लः सप्तमे युग्मे सा युग्मा विपुला मते'त्युक्तेः ॥ ४८ ॥

मन्दोपकारिणी – इदानीं मध्वकृतव्याख्यानं स्तौति ॥ **समानयेति** ॥ समानया या अनमा आस मायया ततया अयमा नयासना न आस या न यातना अललना अतया इति पदच्छेदः । या समानया ततया मायया अनमा आस अयमा या च नयासना नासेति न अतया अललना यातना भवति इति अन्वयः । अर्थस्तु या व्याख्या समानया मानैः 'इन्द्रो मायाभिः' 'मायामात्रमिदं द्वैतं' इत्यादि मानाभासैः सहितया ततया व्याप्तया मायया जगन्मिथ्यात्वसाधिकया मायिशास्त्रात्मिकया मायया मायिशास्त्रेणेति भावः । अनमा नमः नमनं निराकरणं तेन रहिता निराकर्तुं अशक्येति यावत् आस बभूव । अयमा युग्मजरहिता असदृशेति भावः । 'यमो दण्डधरे ध्वांक्षे समये युग्मजेऽपि च' इति विश्वः । या च व्याख्या नयासना नयः अष्टाङ्गनयः 'नयोऽष्टाङ्गः प्रकीर्तिते' इत्युक्तेः आसनं पीठं यस्याः इयं व्याख्या अष्टाङ्गनयोपेतेति भावः । नासेति न न बभूव इति न किन्तु बभूव इति भावः । अतया तद्विरुद्धया व्याख्यया तद्विरुद्धा असा तया अतयेति विग्रहः । असा अते अताः इति रूपाणि । अललना ललनं विकासः हर्षः इति यावत् 'लल विकासे इति धातोः' तेन रहिता सर्वथा सुखरहितेति भावः । यातना अन्धंतमः क्लेशो भवति । अनेन मध्वकृतव्याख्यानस्य सुखसाधनत्वं उक्तं भवति । सर्वतो भद्रयुग्मं विपुलावृत्तं 'यस्यां लःसप्तमे युग्मे सा युग्मविपुला मतेति लक्षणात्' ॥ ४८ ॥

प्राज्ञो राज्ञां त्रिदिवपदवीं कौरवं क्षेत्रमाप्तः
सस्माराथ स्वविहृतिपतद्धस्तियुद्धोत्सवानाम् ।
सत्यात्माद्यैरिह परिवृतो भाविमारीचदृग्भिः
विस्मेरैः स्वैर्निजनृपतनूहेतिदृष्ट्याऽतितुष्टैः ॥ ४९ ॥

भावप्रकाशिका — 'तपस्विवत्स्थितं डांभं ज्ञात्वा मारीचमभ्यधात् । मध्वः परीक्षया चैनं ते विष्णुद्वेषिणं विदुः । यौधोऽत्र राजाहमितीरितो गुरुं तवायुधं केति जगाद सत्यवाक् । खातेऽमुनोक्ते कुतले महागदां दृष्ट्वाऽऽप्तवाचं श्रद्दधुर्गुरुं हि ते । (यौधोऽत्र राजा त्वमितीरितेऽमुना ममायुधं केति जगाद सत्यवागि'ति) पूर्वार्धे पाठान्तरम् ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – **प्राज्ञ इति** ॥ अथ राज्ञां भारतयुद्धे हतानां राज्ञां त्रिदिवपदवीं त्रिदिवस्य पदवी मार्गस्तां स्वर्गमार्गभूतमित्यर्थः । कुरुणा कुर्वाख्यभूपेन कृतं

कौरवं क्षेत्रं आप्तः प्राप्तः । निजा स्वकीया या नृपतनूः नृपशरीरं भीमशरीरं तस्य हेतिः आयुधं गदा तस्या दृष्टिर्दर्शनं तया अतितुष्टैः । अत एव विस्मेरैः विस्मयशीलैः भाविमारीचं भविष्यन्मारीचं दृष्टवन्त इति भाविमारीचदृशस्तैः । सत्यात्मा सत्यतीर्थ आद्यो येषां तैः स्वैः स्वशिष्यैः परिवृतः प्राज्ञः श्रीमध्वः । इह कुरुक्षेत्रे स्वस्य या विहृतिर्युद्धक्रीडा तया पतन्तो ये हस्तिनो गजास्तैर्यानि युद्धानि तान्येवोत्सवास्तेषां स्वविहृतिपदद्धस्तियुद्धोत्सवानां सस्मार। 'अधीगर्थयदेशां कर्मणी'ति षष्ठी । अहं अस्मिंस्थले गजैः सह युद्धविनोदमन्वभूवमित्यस्मरदिति भावः । तपस्विवत् स्थितं डाम्भं ज्ञात्वा मारीचमभ्यधात् । मध्वः परीक्षया च एनं ते विष्णुद्वेषिणं विदुः इति वचनात् । योधोऽत्र राजाहमितीरितेऽमुना तवायुधं केति जगाद सत्यवाक् । खातेऽमुनोक्ते कुतले महागदां दृष्ट्वा च वाचं श्रद्दधुर्गुरुं हि त'इति चोक्तमैतिह्यम् । अत्र सत्यवाक्सत्यतीर्थः । कुतले भूतल इत्यर्थः । मन्दाक्रान्तावृत्तं 'मन्दाक्रान्ता जलधिषडगैम्भौ नतौ ताद्गुरू चे'दित्युक्तेः ॥ ४९ ॥

मन्दोपकारिणी – प्राज्ञ इति ॥ अथ कदाचित् राज्ञां नृपाणां त्रिदिवपदवीं स्वर्गमार्गभूतं कुरुक्षेत्रे कौरवपाण्डवयुद्धे हतानां स्वर्गस्य जातत्वात् इति भावः । 'पन्थानः पदवी सृतिः' इत्यमरः । एतादृशं कौरवं कुरुसम्बन्धि क्षेत्रं पुण्यस्थानं आप्तः प्राप्तः प्राज्ञः मध्वः इह कुरुक्षेत्रे स्वविहृतिपतद्धस्तियुद्धोत्सवानां युद्धे स्वस्य भीमरूपस्य विहृत्या क्रीडया पतन्तश्च ते हस्तिनः गजाश्च तैस्सह युद्धोत्सवानां युद्धाख्यविनोदान् सस्मार स्मृतवान् । भीमावतारे अस्मिन् स्थले अहं गजैस्सह युद्धलक्षणलीलां अन्वभूवं इति । किंभूतः सत्यात्माद्यैः सत्यतीर्थ आद्यो येषां तैः स्वैः शिष्यैः परिवृतः । कथंभूतैः निजनृपतनूहेतिदृष्ट्या नृपस्य तनूः शरीरं 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः निजा स्वकीया च सा नृपतनूश्च तस्याः हेतिः स्वकीयगदारूपं आयुधं तस्य दृष्ट्या दर्शनेन अतितुष्टैः सन्तुष्टैः अत एव विस्मेरैः आश्चर्ययुक्तैश्च अस्मिंस्थले भीमजन्मनि मया गदायुद्धं कृतं मदीया गदा इयं इत्युक्त्वा भूतले विद्यमानां प्रदर्शितवान् । तेन सत्यतीर्थादयः अतिसन्तुष्टास्सन्तः आश्चर्यं चक्रुरिति ऐतिह्यम् । पुनः किंभूतैः भाविमारीचदृग्भिः भावी चासौ मारीचः तन्नामकराक्षसः तं पश्यन्तीति तैः । तत्रैव स्थले दम्भेन तपः कुर्वन्तं कञ्चन दृष्ट्वा श्रीमध्वः शिष्यान् प्रति अयं भविष्यत्काले जायमानो मारीचः इत्यवोचत् । ततः ते तं परीक्ष्य विष्णुद्वेषित्वेन निश्चितवन्तः । अनेन मध्वस्य त्रिकालदर्शित्वरूपमाहत्म्यं प्रकटितम् । तदुक्तं तपस्वीवत्स्थितं डाम्भं ज्ञात्वा मारीचमभ्ययात् । मध्वः परीक्षया चैनं तद्विष्णुद्वेषिणं विदुरिति ।

अधीगर्थदयेशां कर्मणीत्यनेन युद्धोत्सवानां इति कर्मणि षष्ठी । 'मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मं' इत्युक्तेः ॥ ४९ ॥

विप्रात्मेशः क्षणार्थं कृतनतिरशितिश्रीहृषीकेशदेशे
स्पष्टं दृष्टोऽप्यदृष्टः सपदि विहितवान् विस्मयं देहभाजाम् ।
स्वप्ने स्वप्रेरितान्यस्थलगनिजनरोपाहृतैर्भक्ष्यभोज्यैः
प्राज्यैः प्राभोजयत् स्वं गुरुमखिलगुरुं वेदयन् वेदबन्धुम् ॥ ५० ॥

भावप्रकाशिका — अन्यत्र 'ततोऽयमायाति तमर्चयेति स्थानाधिकारी जटिनं त्रिशूलिनम् । स्वप्ने ब्रुवाणं त्रिरवेक्ष्य दूरतः प्रायादुदन्तं च जगाद विस्मितः' ॥ स० ॥

पदार्थदीपिकोद्बोधिका – विप्रेति ॥ हृषीकेशदेशः तन्नामकक्षेत्रं तस्मिन् । विप्रस्यात्मा स्वरूपं यस्य स विप्रात्मा ब्राह्मणस्वरूपः सन् क्षणार्थं भिक्षाक्षणार्थं कृता नतिः नमस्कारो येन सः । शितिः नीला न भवतीत्यशितिः शुभ्रा श्रीः कान्तिर्यस्य सः । 'शितिर्धवल-मेचकौ' इत्यभिधानम् । ईशो रुद्रः स्पष्टं सम्यग्दृष्टोऽपि सपदि तत्क्षणात् अदृष्टः सन् । देहभाजां प्राणिनां विस्मयं आश्चर्यं विहितवान् कृतवान् सन् । स्वप्ने स्वप्नावस्थायां स्वप्रेरितः स्वेन प्रेरितः स चासावन्यस्थलगश्च अन्यस्थलं हृषीकेशक्षेत्रादन्यत् किञ्चित् शैवस्थानं तद्गः स चासौ निजश्शैवस्थानाधिकारी स्वभक्तः स चासौ नरश्च स्वप्रेरितान्यस्थलगनिजनरः तेन उपाहृतानि हृषीकेशक्षेत्रं प्रत्यनीतानि तैः प्राज्यैः बहुलैः भक्ष्याणि च भोज्यानि च तैः । अखिलगुरुं अत एव वेदबन्धुं श्रीमध्वाचार्यं स्वमात्मीयं 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन' इत्यमरः । गुरुं वेदयन् सन् तं श्रीमध्वं प्राभोजयत् । 'ततोऽयमायाति तमर्चयेति स्थानाधिकारी जटिनं त्रिशूलिनम् । स्वप्ने ब्रुवाणं त्रिरवेक्ष्य दूरतः प्रायादुदन्तश्च जगाद विस्मित' इति च उक्तं ऐतिह्यम् । अत्र स्रग्धरावृत्तं 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमि'त्युक्तेः ॥ ५० ॥

मन्दोपकारिणी – विप्रेति ॥ हृषीकेशदेशे तन्नामकक्षेत्रे विप्रात्मा ब्राह्मणरूपस्सन् क्षणार्थं भिक्षादानलक्षणसेवार्थं । 'कालविशेषोत्सवयोः क्षणः' इत्यमरः । कृतनतिः कृता नतिः येन सः अशितिश्रीः शितिः श्यामा न भवतीति धवलेत्यर्थः श्रीः शरीरकान्तिः यस्य सः 'शितिर्धवलमेचकौ' इत्यमरः, ईशः रुद्रः 'शम्भुरीशः पशुपतिः' इत्यमरः । स्पष्टं

दृष्टोऽपि जनैः सपदि तत्क्षण एव अदृष्टः अदर्शनं गतः सन् देहभाजां देहं भजन्तीति तेषां जनानां विस्मयं आश्चर्यं विहितवान् कृतवान् सन् । स्वप्ने स्वप्नावस्थायां स्वप्रेरितान्यस्थलगनिजनरोपाहृतैः स्वेन रुद्रेण प्रेरितः अन्यच्च तत्स्थलं च तस्मिन् तिष्ठतीति अन्यस्थलगः निजः स्वभक्तश्चासौ नरः पुरुषश्च निजनरः अन्यस्थलगश्चासौ निजनरश्च स्वप्रेरितश्चासौ अन्यस्थलगनिजनरश्च तेन उपाहृतैः आनीतैः प्राज्यैः बहुलैः भक्ष्यभोज्यैः भक्ष्यैः विशेषैः भोज्यैः अन्नाद्यैश्चेत्यर्थः तं मध्वं प्राभोजयत् भोजयामास । किं कुर्वन् अखिलगुरुं अखिलजीवानां गुरुं वेदबन्धुं अभिप्रेतार्थवर्णनेन सुहृदं श्रीमध्वं स्वं आत्मीयं 'आत्मीये स्वो धनेऽस्त्रियां' इत्यमरः गुरुं वेदयन् ज्ञापयन् । अयं भावः कदाचित् मध्वः हृषीकेशक्षेत्रं प्राप्तवान् । तत्र महादेवः शुभ्रवर्णः ब्राह्मणरूपी भूत्वा स्पष्टं जनैः प्रत्यक्षतया दृष्टस्सन् मध्वं प्राप्य नमस्कृत्वा, हे मध्वाचार्य ! श्वः अहं तुभ्यं भिक्षां दास्यामि । भवता सा भिक्षा स्वीकार्या । भवान् मयि भिक्षास्वीकरणविषये अनुग्रहं करोतु । तुभ्यं नमस्करोमि । इत्येवं सर्वजनसमक्षं नमस्कारपूर्वकं भिक्षार्थं निमन्त्र्य तत्क्षण एव सर्वेषां अदृश्यो बभूव । तेन जनानां आश्चर्यं बभूव । अनन्तरं स रुद्रः हृषीकेशक्षेत्रात् अन्यत्र स्थले स्थितशेषदेवालयाधिकारिणं कञ्चन शिवभक्तं रात्रौ स्वप्नावस्थायां जटाधारी त्रिशूली सन् अखिलगुरुः विशेषतो मम गुरुः श्रीमध्वः हृषीकेशक्षेत्रे अस्ति । तं भिक्षादानाद्यैः अर्चय इति प्रेरयामास । एवं रुद्रप्रेरितः रुद्रभक्तः देवालयाधिकारी प्रचुरं भक्ष्यभोज्यादिकं कारयित्वा हृषीकेशदेशं प्रति उपाहृत्य तैः श्रीमध्वं प्राभोजयत् भोजयामास इति । इदं रुद्रकारितं इत्येतत् स्वप्नद्रष्टुः देवालयाधिकारिणः वचनेन प्रतीयते । 'भुज पालनाभ्यवहारयोः' णिजन्तात् लङ् परस्मैपदम् । स्रग्धरावृत्तम् 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्'॥ ५० ॥

अवाप्तवान् पुनरिषुपातमस्मरद्रमापतिं स परशुराममादरात् ।
स राजकेल्युरुकदलीसहस्रकं तदाऽऽददभ्यवहृतिदत्तमुत्तमम् ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – अवाप्तवानिति ॥ स श्रीमध्वः पुनःइषुपातं तन्नामकक्षेत्रं अवाप्तवान् तत्क्षेत्राधिपतिं रमापतिं श्रीपतिं परशुरामं आदरात् अस्मरत् । स श्रीमध्वः तदा तत्क्षेत्रस्थितिकालेऽत्तेर्भिक्षाया अवसितिः अवसानं अत्त्यवसितिः तस्यां दत्तमुत्तमं राजकेल्यो राजकेल्याख्या उरुकदल्यः उत्कृष्टकदलीफलपक्वानि तेषां सहस्रकम् । यद्वा राज्ञा

इषुपाताधिपतिना केल्या क्रीडया परीक्षार्थं दत्तमुरुकदलीसहस्रकं राजकेल्युरुकदलीसहस्रकं, अस्मिन्पक्षे दत्तमिति मध्यमपदलोपीसमासः । आदत् जघास । रुचिरावृत्तं 'जभौ सजौ ग्विति रुचिरा चतुराग्रहैरि'त्युक्तैः ॥ ५१ ॥

मन्दोपकारिणी – अवाप्तवानिति ॥ सः मध्वः पुनः अनन्तरं इषुपातं तन्नामकक्षेत्रं अवाप्तवान् सन् तत्क्षेत्राधिपतिं रमापतिं परशुरामं आदरात् भक्त्या अस्मरत् स्मृतवान् । 'स्मृ स्मरणे' लङ् परस्मैपदम्' । तदा तत्क्षेत्रस्थितिकाले सः मध्वः अभ्यवहृतिदत्तं अभ्यवहृतये भक्षणार्थं दत्तं उत्तमं अतिस्वादुरसं राजकेल्युरुकदलीसहस्रकं राजकेल्याख्याः उर्व्यश्च स्थूलाश्च ताः कदल्यः रम्भाफलानि च तासां सहस्रकं आदत् जघास । इषुपात-क्षेत्राधिपतिना भिक्षार्थं निमन्त्र्य भोजनकाले परीक्षार्थं राजकदलीनामकस्थूलरम्भाफल-सहस्रं दत्तं च तत् मध्वाचार्यः भक्षितवान् इति भावः । 'अद भक्षणे' लङ् परस्मैपदं आदत् आत्तां आदन्' । जभौ सजौ गिति रुचिरा चतुर्ग्रहैः' इति रुचिरावृत्तम् ॥ ५१ ॥

स शङ्करपदद्विजोपहृतमाप्य गोवाख्यगां गरिष्ठकदलीलसद्दशशतीचतुष्कं चरन् ।
पयः कलशपञ्चकत्रिकयुगाभिपूर्णं पपावदृष्टगतिरप्यभून्नृपनृमण्डलैरुद्यतैः ॥ ५२ ॥

भावप्रकाशिका — पञ्चकत्रिकं पञ्चदशकं तद्युगं त्रिंशत् । 'देवैः समं रहसि देवगृहे प्रवृत्तो राज्ञा कवाटविवृतौ प्रसभोदितोऽसौ । ऊचेऽधुना व्रजसि चेदिह नश्यसीति राजाथ विस्मितमना व्यवृणोत्कवाटम् । रक्तेक्षणं पुरुषसिंहमवेक्षमाणः सद्यो भयान्निजपुरोहित-माह्वयत्सः । क्षन्तव्यमित्यसकृदानमति द्विजोऽसौ षण्मासमायुरददान्नृपतेर्दयालुः । राज्ञार्थि-तोऽत्र वसतावखिलांश्च शिष्यान् प्रस्थाप्य वायुवदभूदखिलैरदृश्यः । षष्ठेऽथ मासि परचक्रपराक्रमेण राजा सराज्यनगरो विवशो ननाश' ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ स श्रीमध्वः गोवेत्याख्या यस्याः सा गोवाख्या सा च सा गौः भूमिश्च तामाप । तत्र शङ्कर इति पदं नाम यस्य स शङ्करपदस्तादृशो यो द्विजस्तेनोपहृतं दत्तं, गरिष्ठातिस्थूला याः कदल्यः कदलीफलपक्वानि तेषां लसन्ती या दशशती दशानां शतानां समाहारो दशशती तस्याः सहस्रं तस्याश्चतुष्कम् । चतुः सहस्रमित्यर्थः । चरन् भक्षयन् सन् । चरगतिभक्षणयोरिति धातुः । कलशानां घटानां पञ्चकानि तेषां त्रिकं पञ्चदशेत्यर्थः । तस्य युगं युगलं त्रिंशदित्यर्थः । तस्मिन्नभिपूर्णं

परिपूर्णं पयः क्षीरं पपौ । उद्यतैः युक्तैः नृपनृमण्डलैः नृपभटसमूहैः अदृष्टा गतिर्यस्य तदृशः सन्नप्यभूत् । एवमस्य सामर्थ्यं श्रुत्वानेनात्रैवस्थातव्यमिति मन्वानो राजा गमननिरोधार्थं भटान् आदिशत् । तदा तैरदृष्टोऽयं जगामेति भावः । इदमत्रैतिह्यम्– 'देवैः समं रहसि देवगृहे प्रवृत्तो राज्ञा कवाटविवृतौ प्रसभोदितोऽसौ । ऊचेऽधुना व्रजसि चेदिह नश्यसीति राजाथ विस्मितमना व्यशृणोत्कवाटम् ॥ रक्तेक्षणं पुरुषसिंहमवेक्षमाणः सद्यो भयान्निजपुरोहितमाह्वयत्सः । क्षन्तव्यमित्यसकृदानमति द्विजेन्द्रे षण्मासमायुरददन्न-पतेर्दयालुः ॥ राज्ञां स्थितोऽत्र वसतावखिलांश्च शिष्यान् प्रस्थाप्य वायुवदगादखिलैरदृष्टः ॥ षष्ठे च मासि परचक्रपराक्रमेण राजा सराज्यनगरो विवशो ननाश' इति । पृथ्वीवृत्तम् 'जसौ जसयलावसुग्रहयतिश्च पृथ्वी गुरुरि'त्युक्तेः ॥ ५२ ॥

मन्दोपकारिणी – स इति ॥ सः मध्वः गोवाख्यगां गोवा इत्याख्या यस्याः सा च सा गौः भूश्च तां 'भूवाग्वारिषु गौर्मता' इति विश्वः आप्य प्राप्य । तत्र देशे शङ्करपद-द्विजोपहृतं शङ्कर इति पदं नाम यस्य स चासौ द्विजश्च तेन उपहृतं दत्तं गरिष्ठकदलील-सदृशशतीचतुष्कं दशानां शतानां समाहारः दशशती सहस्रं इत्यर्थः । लसती च सा दशशती च । गरिष्ठाश्च ताः कदल्यश्च तासां लसदृशशती तस्याः चतुष्कं इति विग्रहः । गरिष्ठानां कदलीफलानां लसत्याः स्वादुरसोपेतायाः दशशत्याः सहस्रस्य चतुष्कं चतुष्टयं अतिस्थूलस्वादुरसोपेतचतुस्सहस्रसङ्ख्याककदलीफलानि इति भावः । चरन् भक्षयन् सन् कलशपञ्चकत्रिकयुगाभिपूर्णं पञ्चकानां त्रिकं तस्य युगं पञ्चकत्रिकयुगं कलशानां पञ्चकत्रिकयुगं तस्मिन् अभिपूर्णं कुम्भपञ्चकत्रिकस्य पञ्चदशस्य युगं युग्मं त्रिंशत् तस्मिन् परिपूर्णं इत्यर्थः त्रिंशत्सङ्ख्याककुम्भपूर्णं इति भावः । 'युग्मं कृतादिषु' इत्यमरः । पयः दुग्धं 'क्षीरं पयः समं' इत्यमरः पपौ । 'पा पाने' लिट् परस्मैपदं पपौ पपतुः पपुः' । ततः उद्यतैः ग्रामाद्बहिर्गमननिरोधार्थं सन्नद्धैः नृपनृमण्डलैः नृपस्य तद्देशस्थराज्ञः नरः पुरुषाः 'ना नरौ नरः' इति रूपाणि तेषां मण्डलैः समूहैः अदृष्टगतिरपि अदृष्टा गतिः गमनं यस्य सः तथा अभूत् । अयं भावः-तद्देशस्थो राजा श्रीमध्वाचार्यस्य सहस्रचतुष्ट-यकदलीफलभक्षणं त्रिंशत् घटपूर्णक्षीरपानरूपसामर्थ्यं श्रुत्वा एतादृशेन अनेन मध्वेन अत्रैव स्थातव्यमिति बुद्धचा गमननिरोधार्थं तत्रस्थभटान् आज्ञापयामास । तदा तैः राजभटैः अदृष्टस्सन्नेव जगाम इति भावः । जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' पृथ्वीवृत्तम् ॥ ५२ ॥

अयमेव गोविषयतोऽपि कुत्रचित् सदसि जनतार्थितो जवात्।
पुष्पमुत फलमहो विदधे जनसुप्तिदानुपमगानसम्पदा ॥ ५३ ॥

भावप्रकाशिका — गोविषयस्य पशुपे इत्यपभ्रष्टभाषा । 'दिव्यगेयविदग्धोऽसौ सर्वज्ञ इति याचितः । विद्वद्भिरत्र कृतवान् गानशास्त्रं सुदुर्लभम्' ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – अयमिति ॥ अयं श्रीमध्वाचार्यः गोविषयतोऽपि गोविषयेऽपि । सार्वविभक्तिकत्वात्तसेरत्र सप्तम्यर्थः । गोविषयस्य 'पशुपे' इत्यपभ्रष्टभाषा । तत्र कुत्रचित् सदसि जनतार्थितो गानं कर्तव्यमिति जनसमूहेन अर्थितः सन् । जनानां सुप्तिः सुषुप्तिः तां ददातीति जनसुप्तिदा जनसुखदेति यावत् । तादृशी या अनुपमगान-सम्पदासदृशगानमेव सम्पत्तया जवात् शीघ्रात् पुष्पमुत फलञ्च विदधे । अनुपमगानेन पूगादौ आशु पुष्पफले विदध इति भावः । अहो आश्चर्यम् । उद्वतावृत्तं 'चरमयोः सजसजगा द्वितीये नसजगास्तृतीये भनजलगाश्चेदुद्वते'त्युक्तेः ॥ ५३ ॥

मन्दोपकारिणी – अयमिति ॥ अयमेव श्रीमध्वाचार्यः गोविषयतः सप्तम्यर्थे तसिः गोविषये तन्नामकग्रामेऽपि कुत्रचित् सदसि सभायां जनतार्थितः जनसमूहेन अर्थितस्सन् । जनसुप्तिदानुपमगानसम्पदा जनानां नृणां सुप्तिं निद्रां ददातीति । अनुपमा न विद्यते उपमा दृष्टान्तः यस्याः सा । गानं गायनमेव सम्पत् । जनसुप्तिदा च सा गानसम्पच्च इति तथोक्ता। तया जवात् शीघ्रं पुष्पं फलं उत फलमपि 'उताप्यर्थविकल्पयोः' इति विश्वः विदधे अकरोत् । अहो आश्चर्यम् । 'वि पूर्वो डु धाञ्' धारणपोषणयोः लिट् आत्मनेपदं दधे दधाते दधिरे । अयं भावः कस्मिंश्चित् ग्रामविशेषे मध्वाचार्यमाहात्म्यं श्रुत्वा ग्रामस्थ-जनसमूहैः सर्वथापि अजातपुष्पफलेषु पूगादिवृक्षेषु फलपुष्पजननार्थं प्रार्थितस्सन् मध्वः जनानां निद्राजनकगायनं कृत्वा पूगादिवृक्षेषु पुष्पाणि फलानि च उत्पादयामास । तेन तत्रत्यजनानां आश्चर्यमभूत् इति भावः । उद्वतावृत्तं 'प्रथमे सजौ यदि सजौ च नसजगुरु-काण्यनन्तरम् । यद्यथा भनजलगाः स्युरथो सजसा जगौ च भवतीयमुद्वता' ॥ ५३ ॥

धन्योऽमह्यत नाकिनामहितहृद्भाणस्समोऽजस्य यो
मध्वो ध्वस्तदुरागमोऽग्र्यहिमगुश्रीः काममायामहृत्।
विष्णुं विश्वजयप्रदं स हि नमन् सेव्यं सुसौख्यं मुदा
दाक्ष्याच्छ्रीधरमामयादिविरही योगी सुहृत् सर्वदा ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – धन्य इति ॥ धन्यो निरपेक्षस्सर्वगुणसम्पूर्णः । 'निरपेक्षो गुणैः पूर्णो धन्य इत्यभिधीयत' इत्यभिधानम् । नाकिनां देवानां अहिताः शत्रवोऽसुरास्तेषां हृत् हृदयं तस्य बाणः शल्यः । अजस्य ब्रह्मणः समः । 'निर्विशेषो ब्रह्मा वे'ति वचनात् । ध्वस्तो निराकृतो दुरागमो दुष्टशास्त्रं येन तादृशः । हिमाश्शीता गावः किरणा यस्य स हिमगुः अग्र्यः पूर्णो हिमगुश्चन्द्रस्तस्य श्रीरिव श्रीः कान्तिः यस्य तादृशः । विश्वजयप्रदं सर्वेषां जयप्रदं सेव्यं सेवनीयम् । शोभनं सौख्यं सुखं यस्य तं श्रीधरं लक्ष्मीकान्तमिति यावत् । विष्णुं मुदा प्रीत्या भक्त्येति यावत् । दक्षस्य चतुरस्य भावो दाक्ष्यं तस्मात् । अष्टाङ्गविशिष्टत्वाख्यचातुर्येणेति भावः । साक्षादिति पाठे साक्षात्प्रत्यक्षमित्यर्थः । नमन् । सर्वतीर्थक्षेत्रेषु विष्णुमेव नमन्निति भावः । आमयो रोग आदिर्यस्य क्लेशस्य आमयादिः तस्य विरहो वियोगोऽस्यास्तीति तादृशः । योगो भक्त्यादियोगोऽस्यास्तीति योगी । सर्वदा सुहृद्भगवतः सुहृत् । काममिच्छा यथा भवति तथा कामं अत्यन्तमित्यर्थः । आयामो विस्तारोऽस्यास्तीत्यायामि हृच्चित्तं यस्य स आयामिहृत् । सर्वज्ञेति यावत् । यो मध्वः सोऽमह्यत अपूज्यत । मह पूजायां कर्मणि लङ् । शार्दूलविक्रीडितवृत्तम् । लक्षणं तूक्तम् ॥ ५४ ॥

मन्दोपकारिणी – धन्य इति ॥ धन्यः निरपेक्षगुणपूर्णः । नाकिनां नाकः स्वर्गो एषां अस्तीति 'स्वरव्ययं स्वर्गनाकः' इत्यमरः तेषां अहितहृद्घाणः द्वेषिणां दैत्यानां हृदः हृदयस्य बाणः शत्रुहृदयशल्य इति भावः । 'द्विट्विपक्षाहितामित्रः' इत्यमरः । अजस्य चतुर्मुखस्य समः । न विशेषो ब्रह्मवाय्वोरिति वचनात् । ध्वस्तदुरागमः । निराकृतं दुःशास्त्रं येन सः । अग्र्या हिमगुश्रीः हिमाः गावः किरणाः यस्य सः हिमगुः अग्र्यः श्रेष्ठः षोडशकलापरिपूर्ण इत्यर्थः । स चासौ हिमगुः चन्द्रः तस्य श्रीः कान्तिरिव कान्तिः यस्य सः चन्द्रवत्सौम्यकान्तिरित्यर्थः । कामं अतितराम् । आयामहृत् विशालं चित्तं यस्य सः सर्वज्ञ इति यावत् । 'दैर्घ्यमायाम आरोहः परिणाहो विशालता' इत्यमरः । यः मध्वः इत्यादिगुणविशिष्टः अस्ति स लोके अमह्यत हि अपूज्यत खलु । 'मह पूजायां' कर्मणि लङ् आत्मनेपदं अमह्यत अमह्येतां अमह्यन्त । किंभूतः विश्वजयप्रदं सर्वेषां जयं उत्कर्षं प्रददातीति तम् । सेव्यं सेवितुं योग्यम् । सुसौख्यं अत्युत्कृष्टं सुखं यस्य सः तम् । श्रीधरं लक्ष्म्याः धरं आधारं लक्ष्मीकान्तम् । एवंभूतं विष्णुं मुदा प्रीत्या भक्त्या इति यावत् । दाक्ष्यात् दक्षस्य भावः चातुर्यं तस्मात् अष्टाङ्गविशिष्टचातुर्येण इति भावः । नमन् सर्वतीर्थेषु

क्षेत्रेषु च विद्यमानं विष्णुमेव नमस्कुर्वन् इति भावः । आमयादिविरही 'रोगव्याधिगदामयाः' इत्यमरः आमया एव आदिः यस्य सः नानाक्लेशाः तस्य विरहः अभावो अस्यास्तीति । योगी योगः ध्यानं अस्यास्तीति योगी । सर्वदा विष्णुध्यानवान् इति भावः । 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । सुहृत् भगवतो विष्णोः अतिप्रीतिविषयः । अयं भावः यः मध्वः धन्यः दैत्यानां हृदयशल्यः चतुर्मुखसमः सर्वदुश्शास्त्रनिरासकः चन्द्रवत् शान्तरूपः सर्वज्ञः सर्वक्लेशरहितः सर्वदा विष्णुध्यानवान् भगवतः अतिप्रियश्च सः एतादृशगुणवान् मध्वाचार्यः सुखरूपं सर्वसेव्यं सर्वेषां हितकरं लक्ष्मीकान्तं परमप्रीत्या सर्वतीर्थक्षेत्रादिपुण्यस्थलेषु साष्टाङ्गं नमस्कुर्वन् सर्वदेशे सर्वजनैः सम्यक् पूजितोऽभूत् इति । 'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्' ॥ ५४ ॥

इति भुवनविभूषणस्य भूयांस्यविगणितानि कृतान्तराणि हन्त ।
श्रवणमननकीर्तनैरभीष्टं प्रतिददतीत्यमराः प्रकीर्तयन्ति ॥ ५५ ॥

पदार्थदीपिकोद्बोधिका – एवं 'भुवनाद्भुतमध्वचेष्टितमि'ति श्लोके, 'अथ शुश्रूषुजनाय वर्ण्यत' इति श्रीमध्वकथावर्णनं प्रतिज्ञाय 'क्वचिदीश्वरदेवमेष भूपं' इत्यादिश्लोकैः अनुवर्ण्येदानीं दशमतिशिष्य उपसंहरति–

इतीति ॥ भुवनस्य लोकस्य विभूषणं अलङ्कारभूतः तस्य श्रीमध्वस्य, इति एवं-विधानि। इतिशब्दः प्रकारवाचकः । 'इति हेतुप्रकारणप्रकरादिसमाप्तिष्वि'त्यमरः । भूयांसि भूरीणि अविगणितानि असंख्यातानि । अन्यानि कृतानि कृतान्तराणि । नपुंसके भावे क्त इति क्तः । अस्माभिः इदानीं उक्तेभ्योऽप्यन्यानि कर्मान्तराणीत्यर्थः । श्रवणं गुरुमुखाच्छास्त्रतः श्रवणं तस्य मननं मनसा ध्यानं तच्च कीर्तनं वाचाकथनं तच्च, तैरभीष्टं प्रतिददति । प्रयच्छन्तीत्यमरा देवाः प्रकीर्तयन्ति । हन्त हर्षे । पुष्पिताग्रावृत्तं 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रे'त्युक्तेः ॥ ५५ ॥

मन्दोपकारिणी – एवं 'भुवनाद्भुतमध्वचेष्टितमि'त्यादिना श्रीमध्वाचार्यकथावर्णनं प्रतिज्ञाय 'क्वचिदीश्वरदेवमेष भूपं' इत्यादिश्लोकैः श्रीमध्वचरित्राणि यथाशक्ति यथामति किंचित् अनुवर्ण्य योग्यानां श्रोतॄणां मध्वचरितश्रवणादौ रुचिं जनयन् उपसंहरति दशमति शिष्यः ॥ इतीति ॥ भुवनविभूषणस्य भुवनस्य जगतः अलङ्कारभूतस्य श्रीमध्वाचार्यस्य ।

इति एवं प्रकाराणि । इतिशब्दः प्रकारवचनः । अविगणितानि केनापि न सङ्ख्यातानि भूयांसि भूरीणि कृतान्तराणि इदानीं मदुक्तेभ्यः चरित्रेभ्यः अन्यानि चरित्राणि । श्रवणमननकीर्तनैः श्रवणं श्रोत्रेणाकर्णनं मननं मनसा चिन्तनं कीर्तनं वाचा उच्चारणं एभिः त्रिभिः साधनैः अधिकारिणां अभीष्टं ऐहिकामुष्मिकफलं प्रतिददति प्रयच्छन्ति । इति इत्थं अमराः देवाः प्रकीर्तयन्ति कथयन्ति । हन्त हर्षे । प्रति पूर्वक 'डु दाञ् दाने' लट् परस्मैपदं ददाति दत्तः ददति । 'कीर्त संकीर्तने' लट् परस्मैपदम् । अयुजिनयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति पुष्पिताग्रावृत्तम् ॥ ५५ ॥

इति विविधगोधारावारैर्विशारदवारिदो हरिपदरतो विद्याविद्युत्प्रदीपितदिङ्मुखः ।
भवभयमहाघर्मोत्तप्तं सदङ्घ्रिपमण्डलं सफलसुमनः सान्द्रानन्दं व्यधादविपल्लवम् ॥५६॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते सुमध्वविजये महाकाव्ये आनन्दाङ्के दशमः सर्गः ॥

भावप्रकाशिका — सफलमसुमनः सफलसुचित्तं फलपुष्पसहितं च । अविपल्लवं विपदो लवेनापि रहितमविगतपल्लवं च ॥ ५६ ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां दशमः सर्गः ॥ १० ॥

पदार्थदीपिकोद्बोधिका – दशमतिशिष्य इत्यादिनोक्तं उपसंहरति काव्यकारः —

इतीति ॥ हरेः पदं पादस्तस्मिन् रतो निरतः । विद्या एव विद्युतस्तटितस्ताभिः प्रदीपितानि प्रकाशितानि दिङ्मुखानि येन तादृशः । विशारदो विद्वानेव वारिदो विशारदवारिदो विद्वन्मेघः मध्वाख्यमेघ इत्यर्थः । भवस्य संसारस्य भयं तदेव महाघर्मो महोष्णं तेनोत्तप्तं सन्तप्तं भवभयमहाघर्मोत्तप्तम् । सन्तः सज्जना एवांघ्रिपा वृक्षास्तेषां मण्डलं समूहं सदङ्घ्रिपमण्डलम् । विविधा नानाविधा ये गोधारावारा वचनधारा समूहास्तैः । सन्तोषयित्वेति शेषः । फलं ज्ञानविशेषादिरूपं फलं तच्च, सुमनश्शोभनमनस्तच्च फलसुमनसी ताभ्यां सहितं सफलसुमनः । अत एव सान्द्रः सम्पूर्ण आनन्दो यस्य तादृशं विपदो लव एकदेशो विपल्लवः । न विद्यते विपल्लवो यस्य तादृशं व्यधाच्चाकार । वारिदो

विष्णुपदरतो विद्युत्प्रदीपितदिङ्मुखः सन्, धर्मोत्तप्तमंघ्रिपमण्डलं जलधारावारैरभिषिच्य पुष्पफलयुक्तमविपल्लवमविगतपल्लवम् । सपल्लवमित्यर्थः । यथा कुर्यात्तद्वदिति भावः । अत्र श्लेषानुप्राणितो रूपकालङ्कारः । हरिणीवृत्तं 'नसमरसलगैः षड्वेदैर्हयैर्हरिणी मते'त्युक्तेः ॥ ५६ ॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां दशमः सर्गः ॥

मन्दोपकारिणी – इदानीं ''दशमतिशिष्यः कश्चित्'' इत्यादिना उक्तं उपसंहरति नारायणपण्डिताचार्यः **इतीति** ॥ विशारदवारिदः विशारदः विद्वान् दशमतिशिष्यः स एव वारिदः मेघः । 'तटित्वान्वारिदोऽम्बुभृत्' इत्यमरः । सदङ्घ्रिपमण्डलं सन्तः सज्जना एव अङ्घ्रिपाः वृक्षाः तेषां मण्डलं समूहम् । 'विटपी पादपस्तरुः' इत्यमरः सज्जनाख्यवृक्षसमूहं इत्यर्थः । इति पूर्वोक्तप्रकारेण विविधगोधारावारैः विविधाश्च ताः गावश्च नानाप्रकार-वचनलक्षणजलानि इत्यर्थः तासां धाराः आसाराः 'धारासम्पात आसारः' इत्यमरः तासां वारैः समूहैः 'वारसङ्घातसञ्चयाः' इत्यमरः वचनलक्षणजलवर्षेण इत्यर्थः । सन्तोषयित्वा इति शेषः । सफलसुमनः फलेन ज्ञानभक्त्यादिविशेषफलेन सहितं सफलं सुमनः शोभनं मनः चित्तं यस्य तत् । सफलं सुमनो यस्य तत् । सान्द्रानन्दं सान्द्रः घनः पूर्णः आनन्दः सन्तोषो यस्य तत् तथोक्तं सम्पूर्णसुखमित्यर्थः । अविपल्लवं विपदः विपत्तयः तासां लवः लेशः विपल्लवः न विद्यते विपल्लवो यस्य तत् । व्यधात् अकरोत् । वृक्षपक्षे सफलसुमनः फलैः सुमनोभिः पुष्पैश्च सहितं इत्यर्थः 'स्त्रियः सुमनसः पुष्पं' इत्यमरः । अविपल्लवं विगताः पल्लवाः किसलयाः यस्य तत् विपल्लवं न भवतीत्यपल्लवमिति यावत् 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः' इति न्यायात् । किंभूतः विशारदवारिदः हरिपदरतः हरेः विष्णोः पदे चरणे रतः। मेघस्तु हरिपदे आकाशे रतः विद्यमानः 'वियद्विष्णुपदं' इत्यमरः । पुनः विद्याविद्युत्प्रदीपितदिङ्मुखः विद्यैव वेदादिविद्यैव विद्युत् तडित् 'तडित्सौदामिनी विद्युत्' इत्यमरः विद्याविद्युता प्रदीपितं प्रकाशितं दिशां मुखं येन सः यथा तडिता दिशः प्रकाशन्ते तथा विद्ययापि प्रकाशन्ते इति ज्ञेयम् । कथंभूतं सदङ्घ्रिपमण्डलं भवभयमहाघर्मोत्तप्तं भवः संसारः तस्य भयं भवभयम् । 'भवः संसारसम्प्राप्तिश्रेयःशङ्करजन्मसु' इति विश्वः । महान् बहुलश्चासौ घर्मः आतपः उष्णो वा भवभयमेव महाघर्मः तेन उत्तप्तं संतप्तं 'घर्मः स्यादातपे

ग्रीष्मे उष्णस्वेदांभसोरपि' इति विश्वः । यथा कश्चिन्मेघः आकाशाश्रितस्सन् तडिद्भिः दिशः प्रकाशयन् आतपतप्तं वृक्षसमूहं जलधाराभिः अभिवर्ष्य पल्लवयुक्तं पुष्पफलयुक्तं च करोति तद्वत् अयं दशमतिशिष्यः हरिचरणारविन्दं आश्रितः स्वविद्यया सर्वा दिशः शोभयन् । संसारक्लेशसंतप्तं सज्जनससूहं श्रीमध्वाचार्यचरित्रवर्णनेन सन्तोषयित्वा शोभन-चित्तयुक्तं ज्ञानभक्त्यादिविशेषयुक्तं तथा क्लेशलेशेनापि रहितं पूर्णसुखयुक्तं च व्यधात् इति भावः । 'वि पूर्वात् डु धाञ्' धातोः लुङ् परस्मैपदं अधात् अधातां अधुः । हरिणीवृत्तं 'नसमरसलागः षड्वेदैर्हयैर्हरिणी मता' इति तल्लक्षणात् ॥ ५६ ॥

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां दशमः सर्गः ॥ १० ॥

एकादशः सर्गः

प्रचुरान्तरप्रवचनं फणिराडुपशुश्रुवान्ससनकादिमुनिः ।
गगनेऽल्पदृष्टवपुरत्र जनैस्त्वरितं निलीनरुचिराप पदम् ॥ १ ॥

भावप्रकाशिका – विचन्द्रायां क्षपायां तु चन्द्रिकाभ्रमिणो जनाः ।
शेषस्य तेजस्यथ तं यान्तं मध्वो व्यदर्शयत् ॥ १ ॥

पदार्थदीपिकोद्बोधिका – प्रचुरान्तरेति ॥ अत्र रूप्यपीठपुरे । जनैः भूमिष्ठैर्जनैः गगने व्योम्नि अल्पं किञ्चित् दृष्टं वपुः यस्य तादृशः । ससनकादिमुनिः सनकादिमुनिसहितः फणिराट् सर्पराट् शेषः । प्रचुरं पूर्णं अन्तरं ज्ञानं यस्य तस्य प्रवचनं व्याख्यानं उपशुश्रुवान् श्रुतवान् सन् । त्वरितं शीघ्रं यथा भवति तथा निलीना अदृष्टा रुचिः कान्तिः यस्य तादृशः सन् पदं निजस्थानं आप । 'विचन्द्रायां क्षपायां तु चन्द्रिकाभ्रमिणो जनाः । शेषस्य तेजस्यथ तं यान्तं मध्वो ह्यदर्शयदि'त्यैतिह्यम् । अस्मिन् सर्गे प्रायः प्रमिताक्षरावृत्तम् । 'प्रमिताक्षरा सजससैर्गदिते'त्युक्तेः ॥ १ ॥

मन्दोपकारिणी – प्रचुरेति ॥ ससनकादिमुनिः सनक एव आदिः येषां ते सनकादयः सनकादयश्च ते मुनयश्च सनकादिमुनयः तैः सहितः ससनकादिमुनिः । फणिराट् फणिनां सर्पाणां राट् राजा शेषः 'कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी' इत्यमरः । प्रचुरान्तरप्रवचनं प्रचुरं पूर्णं अन्तरं मनः यस्य सः प्रचुरान्तरः प्रचुरान्तरस्य पूर्णप्रज्ञाचार्यस्य प्रवचनं ब्रह्मसूत्रभाष्यव्याख्यानं उपशुश्रुवान् सन् । अत्र भूमौ जनैः भूमिष्ठमनुष्यैः गगने अन्तरिक्षे 'नभोऽन्तरिक्षं गगनं' इत्यमरः । अल्पदृष्टवपुः अल्पं किञ्चित् दृष्टं दृग्विषयीभूतं वपुः शरीरं यस्य सः तथोक्तस्सन् । त्वरितं शीघ्रेण 'जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतं' इत्यमरः । निलीनरुचिः निलीना तत्क्षण एव अदृष्टा रुचिः कान्तिः यस्य स तथोक्तस्सन् 'प्रभारुग्रुचिस्त्विड् भा भाश्छविद्युतिदीप्तयः' इत्यमरः । पदं निजस्थानं 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । आप । 'आप्लृ व्याप्तौ' इत्यतो लिट् परस्मैपदम् । कदाचित् मध्वाचार्ये ब्रह्मसूत्रव्याख्यानं कुर्वति सति शेषदेवः सनकादिमुनिभिस्सह आगत्य अन्तरिक्ष एव स्थित्वा मध्वव्याख्यानं श्रुत्वा गमनसमये

भूमिष्ठश्रोतृजनैः किंचित् दृष्टः सन् तत्क्षण एव अदृष्टः सन् स्वस्थानं जगाम इति भावः । अत्र इदं ऐतिह्यम् ''चन्द्राभावसमये तस्मिन् व्याख्यानस्थले व्याख्यानार्थं आगतस्य शेषस्य शुभ्रायां कान्तौ व्याप्तायां कुत इदानीं चन्द्रिकेति आश्चर्यं कुर्वाणान् भूमिष्ठजनान् प्रति नेयं चन्द्रिका किंतु शेषकान्तिरिति वदन् मध्वः गच्छन्तं शेषं प्रदर्शयामास इति । अस्मिन् सर्गे प्रायः प्रमिताक्षरावृत्तं 'प्रमिताक्षरा सजससैः कथिता' इति तल्लक्षणात् ॥ १ ॥

अतिचित्रधाम्नि निजधाम्नि रतं ससहस्रमस्तकमनन्तममुम् ।
मुनयोऽभिवाद्य विनयाभरणाः वरमन्वयुञ्जत तदर्थमिमम् ॥ २ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ विनय एव आभरणं येषां तादृशा मुनयः सनकादयः । अतिचित्रं धाम तेजो यस्य तस्मिन् । निजधाम्नि स्वकीयमन्दिरे रतं अवस्थितम् । 'धामनी गृहतेजसी'त्यमरः । सहस्रसंख्याकानि च तानि मस्तकानि च तैः सहितं अमुं अनन्तं शेषं अभिवाद्य अभिवन्द्य इमं वक्ष्यमाणं वरं उत्तमं अर्थं तदा अन्वयुञ्जत अपृच्छन् ॥ २ ॥

मन्दोपकारिणी – अतीति ॥ गृहं प्रति गमनानन्तरं विनयाभरणाः विनय एव आभरणं भूषणं येषां ते तथोक्ताः । मुनयः सनकादयः अतिचित्रधाम्नि अतिचित्रं आश्चर्यं धाम तेजः यस्य तत् अतिचित्रधाम तस्मिन् । निजधाम्नि निजं आत्मीयं च तत् धाम गृहं च निजधाम 'धामनी गृहतेजसि' इत्यभिधानं तस्मिन् रतं विद्यमानं ससहस्रमस्तकं सहस्रं च तानि मस्तकानि शिरांसि सहस्रमस्तकानि 'मूर्धा ना मस्तकोऽस्त्रियां' इत्यमरः, सहस्रमस्तकैः सहितः ससहस्रमस्तकः सहस्रफण इति यावत् । तं अमुं अनन्तं शेषं 'शेषोऽनन्तो वासुकिस्तु' इत्यमरः । अभिवाद्य नमस्कृत्य इमं वक्ष्यमाणं वरं वरणीयं अवश्यं श्रवणीयं इति यावत् । तदर्थं तस्य मध्वशास्त्रस्य अर्थं प्रष्टव्यप्रमेयं अन्वयुञ्जत अपृच्छन् । 'अनुपूर्वात् युजिर् योगे इत्यतो लङ् आत्मनेपदम्' ॥ २ ॥

भगवत्तमस्य विपुलप्रमतेः समयं मनोहरतमं जगति ।
महितं भवद्भिरपि लोकपते पठतां मुहुः फलमुदेष्यति किम् ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – भगवदिति ॥ हे लोकपते शेष ! जगति अत्यन्तं मनोहरं मनोहरतमं भवद्भिरपि महितं पूजितम् । अतिशयेन भगवान् भगवत्तमः तस्य । षड्गुणवतां

उत्तमस्य इत्यर्थः । विपुला पूर्णा प्रमतिः यस्य तस्य श्रीमध्वस्य समयं शास्त्रं मुहुः पठतां किं फलं उदेष्यति सेत्स्यति । 'इण् गतौ' लृट् । इत्यन्वयुञ्जत इति सम्बन्धः ॥ ३ ॥

मन्दोपकारिणी – भगवदिति ॥ हे लोकपते लोकस्य नागलोकस्य पते स्वामिन् शेष ! जगति लोके मनोहरतमं अतिशयेन मनोहरं मनोहरतमम् । भवद्भिरपि लोके ज्ञानिश्रेष्ठत्वेन प्रसिद्धैः युष्माभिरपि महितं पूजितम् । भगवत्तमस्य अतिशयेन भगवान् भगवत्तमः तस्य । अतिशयितैश्वर्यादिगुणसम्पन्नस्य । विपुलप्रमतेः विपुला पृथुला पूर्णेति यावत् प्रमतिः प्रज्ञा यस्य स तथोक्तः तस्य पूर्णप्रज्ञाचार्यस्य 'विपुलः पृथुलेऽगाधे' इति विश्वः । समयं ब्रह्मसूत्रभाष्यादिशास्त्रं 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । मुहुः पुनः पठतां अर्थज्ञानपूर्वकं पाठं कुर्वतां श्रोतॄणां किं कीदृशं फलं उदेष्यति सेत्स्यति । 'उत्पूर्वकात् 'इण् गताविति यतो लृट् परस्मैपदं एष्यति एष्यतः एष्यन्ति' ॥ ३ ॥

अधिकारिणां फलमलं विदुषां भवति प्रवृत्तिरतिवीर्यवती ।
इति तत्फलं सफलसंकथनो भगवान्प्रपञ्चयतु भूरिदयः ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – अधिकारिणामिति ॥ अधिकारो एषां अस्ति इति अधिकारिणः तेषां अपि । श्रीमध्वशास्त्रश्रवणपठनादौ अधिकारिणां अपि इत्यर्थः । फलं श्रवणपाठादिजन्यं फलं अलं सम्यक् विदुषां जानतां सतां प्रवृत्तिः श्रीमध्वशास्त्र-श्रवणादिरूपा क्रिया । अतिवीर्यं महाफलं अस्याः अस्ति इति अतिवीर्यवती भवति । ज्ञानपूर्वकं कृतस्य कर्मणः फलाधिक्यसद्भावादिति भावः । इति तस्मात् हेतोः अस्माकं तत्फलज्ञानपूर्वकप्रवृत्यर्थं सफलं सत्यं सङ्कथनं सम्भाषणं यस्य तादृशो, भूरिः भूयसी दया यस्य तादृशो भगवान् भवान् तत्फलं श्रीमध्वशास्त्रश्रवणपाठादिजन्यं फलं प्रपञ्चयतु विस्तरेण ब्रवीतु । इति अन्वयुञ्जत इति पूर्वेण सम्बन्धः ॥ ४ ॥

मन्दोपकारिणी – किमर्थं फलप्रश्न इत्यत आह ॥ **अधिकारिणां इति** ॥ यस्मात् फलं मध्वशास्त्रश्रवणपाठादिजन्यं फलं अलं सम्यक् विदुषां जानतां अधिकारिणां अधिकारो येषां अस्तीति अधिकारिणः तेषां मध्वशास्त्रश्रवणादौ योग्यतावतां जनानां प्रवृत्तिः शास्त्रश्रवणादौ प्रवृत्तिः अतिवीर्यवती अतिवीर्यं अस्याः अस्तीति महाफलवती भवति । ज्ञानपूर्वकं कृतस्य कर्मणः फलाधिक्यसद्भावात् इति भावः । इति तस्मात् हेतोः

सफलसंकथनः सफलं फलेन सहितं संकथनं सम्भाषणं यस्य स तथोक्तः । भूरिदयः बहुदयालुः उपदेशकरणे त्वद्दयाव्यतिरेकेण अन्यनिमित्तस्य अभावात् इति भावः । भगवान् ज्ञानादिगुणवान् भवान् तत्फलं श्रीमध्वशास्त्रश्रवणपाठादेः फलं प्रपञ्चयतु विस्तरेण ब्रवीतु । इति अन्वयुञ्जत इति सम्बन्धः । प्रपूर्वात् 'पचि विस्तारवचने' इत्यस्माद्धातोः लोट् परस्मैपदं प्रपञ्चयतु प्रपञ्चयतां प्रपञ्चयन्तु' ॥ ४ ॥

इति तैरुदीरितमुदारमतिर्वचनं निशम्य स जगाद गिरम् ।
शृणुतादरेण महनीयतमं महनीयपादसमयस्य फलम् ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ उदारमतिः उत्तममतिः स शेषः । तैः मुनिभिः उदीरितं उक्तं वचनं निशम्य । महनीयतमं पूज्यतमम् । महनीयः पूज्यः पादः स्वरूपं यस्य तस्य श्रीमध्वस्य समयः शास्त्रं तस्य फलं श्रवणादिजन्यं फलं आदरेण भक्त्या शृणुतेति गिरं जगाद ॥ ५ ॥

मन्दोपकारिणी – इतीति ॥ उदारमतिः उदारा उत्कृष्टा मतिः यस्य स तथोक्तः शेषः । तैः सनकादिभिः इति पूर्वोक्तप्रकारेण उदीरितं वचनं निशम्य आकर्ण्य गिरं प्रत्युत्तररूपां वाचं जगाद अब्रवीत् । गद व्यक्तायां वाचीत्यतो लिट् परस्मैपदं जगाद जगदतुः जगदुः । किमिति जगाद- हे मुनयः ! यूयं महनीयतमं अतिशयेन महनीयं अतिपूज्यं महनीयपादसमयस्य महनीयः पूज्यः पादः स्वरूपं यस्य सः महनीयपादः । 'उत्तमानां स्वरूपन्तु पादशब्देन भण्यते' इत्यभिधानम् । तस्य मध्वाचार्यस्य समयस्य शास्त्रस्य फलं श्रवणादिजन्यं फलं आदरेण भक्त्या 'आदरो भजनं भक्तिः' इत्युक्तेः शृणुत आकर्णयत । 'श्रु श्रवणे' इत्यतो धातोः लोट् परस्मैपदं शृणु शृणुतं शृणुत ॥ ५ ॥

त्रिदिवादि लभ्यमपि नास्य फलं कथितं कृषेरिव पलालकुलम् ।
स्वफलं तु मुक्तिपदमुक्तिपदं शुकशारदादिपरमार्थविदाम् ॥ ६ ॥

भावप्रकाशिका – 'शब्दयोनिरि'त्यारभ्य 'श्यामावदाताः शतपत्रलोचनाः' इत्यादि शुकोक्तिः । 'धानापूपा मांसकामाः सदा पायसकर्दमाः' इत्यादि शारदोक्तिः ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – त्रिदिवादीति ॥ त्रिदिवः स्वर्गः आदिः यस्य तत् त्रिदिवादि। लभ्यमपि सुलभमप्यस्य श्रीमध्वशास्त्रस्य फलं मुख्यफलं कृषेः कर्षकव्यापारस्य पलालकुलमिव शुष्कतृणसमूह इव न कथितं ज्ञानिभिर्न प्रोक्तम् । स्वफलं तु स्वस्य मुख्यफलं तु शुकः शुकमुनिः, स च शारदा सरस्वती त आदी येषां तादृशाः, ते च ते परमार्थविदश्च, परम उत्तमो योऽर्थो भगवांस्तं विदन्तीति तेषाम् । शुकशारदादि-परतत्त्वज्ञानिनामित्यर्थः । उक्तिपदं प्रशंसारूपवचनास्पदम् । तैः स्तुत्यमिति भावः । मुक्तिपदं मोक्षस्थानम् । तत्र 'न वर्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः। न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः' इत्यादिशुकोक्तिः । 'धानापूपा मांसह्रदः सदा पायसकर्दमाः' इति शारदोक्तिः ॥ ६ ॥

मन्दोपकारिणी – त्रिदिवेति ॥ त्रिदिवादि त्रिदिवः स्वर्गः आदिः यस्य तत् त्रिदिवादि। लभ्यमपि मध्वशास्त्रश्रवणेन सुलभमपि अस्य मध्वशास्त्रस्य फलं मुख्यफलं न कथितम् । किमिव कृषेः कर्षणव्यापारसिद्धस्य क्षेत्रस्य पलालकुलमिव पलालस्य निष्फलस्य व्रीह्यादितृणस्य कुलं समूहमिव 'पलालोऽस्त्री स निष्फलः' इत्यमरः । यद्यपि मध्वशास्त्रश्रवणादिना स्वर्गादिफलं भवति तथापि तत् मुख्यं फलं न भवति पलालस्य कृषिफलत्वेऽपि मुख्यफलत्वाभावात् इति भावः । तर्हि मुख्यं फलं किमित्यत आह स्वेति ॥ स्वफलं स्वस्य मध्वशास्त्रस्य फलं तु मुख्यं फलं मुक्तिपदं मुक्तेः मोक्षस्य पदं स्थानं कथंभूतं शुकशारदादिपरमार्थविदां शुकः शुकाचार्यः शारदा सरस्वती शुकश्च शारदा च शुकशारदे ते आदी येषां ते शुकशारदादयः परमः सर्वोत्तमश्चासौ अर्थश्च परमार्थः परतत्त्वं परमार्थं विदन्तीति परमार्थविदः शुकशारदादयश्च ते परमार्थविदश्च तेषां उक्तिपदं उक्तीनां वचनानां पदं आस्पदं शुकादिभिः स्तुत्यं इत्यर्थः । भागवतादौ शुकादिभिः मुक्तेः स्तुतत्वात् इति भावः ॥ ६ ॥

परमागमार्थवरशास्त्रमिदं भजताममानवकलारचितम् ।
व्रजतामहो परमवैष्णवतां रतये स्वलोकमजितो दिशति ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – परमेति ॥ मानवो मनुष्यो न भवतीति इति अमानवः श्रीमुख्यवायुः तस्य या कला अंशः श्रीमध्वमुनिः तेन रचितं कृतं इदं परमा उत्तमा ये

आगमाः वेदादयः तेषां अर्थाः येन शास्त्रेण तत्परमागमार्थं, तादृशं यद्वरशास्त्रं उत्तमशास्त्रं भजतां श्रवणमननादि कुर्वताम् । अत एव विष्णोः भक्ता वैष्णवा परमवैष्णवो मुख्यवैष्णवस्तस्य भावस्तत्ता तां व्रजतां सतां रतये क्रीडाया अजितः श्रीकृष्णः स्वलोको वैकुण्ठः तं दिशति ददाति । अहो विस्मये ॥ ७ ॥

मन्दोपकारिणी – परमेति ॥ अजितः नारायणः अमानवकलारचितं मानवः मनुष्यः न भवतीति अमानवः देव इत्यर्थः । मुख्यवायुः तस्य कलया अंशभूतेन मध्वाचार्येण रचितं कृतं इदं परमागमार्थवरशास्त्रं परमाश्च ते आगमाः वेदादिसदागमाश्च परमागमाः तेषां अर्थः यस्मिन् तत् परमागमार्थं वेदाद्यर्थभूतं इत्यर्थः । तच्च तत् वरशास्त्रं उत्तमशास्त्रं च परमागमार्थवरशास्त्रम् । भजतां श्रवणमननादिना सेवमानानां परमवैष्णवतां विष्णोः इमे वैष्णवाः विष्णुभक्ताः परमाः उत्तमाश्च ते वैष्णवाश्च परमवैष्णवाः परमवैष्णवानां भावः परमवैष्णवता तां व्रजतां प्राप्तवतां सज्जनानां रतये क्रीडायै स्वलोकं स्वस्य स्वात्मनः लोकं वैकुण्ठं लोकं दिशति ददाति । 'दिश अतिसर्जने' इत्यतो लट् परस्मैपदम् । अहो आश्चर्यम् । मध्वशास्त्रश्रवणादिना वैकुण्ठाख्यमहाफलप्राप्तिः भवतीति वेदाद्यर्थरूपं मध्वशास्त्रं पठतां शृण्वतां व्याकुर्वतां च परमवैष्णवानां भगवान् लक्ष्मीपतिः वैकुण्ठलोकं दिशतीति भावः । अनेन मध्वशास्त्रश्रवणादेः किं फलमित्यस्य प्रश्नस्य वैकुण्ठलोकप्राप्तिः फलं इत्युत्तरं उक्तं भवति ॥ ७ ॥

ननु तत्र विश्वविभवैकपदं प्रतिभाति पूर्णपुरुषस्य पुरी ।
उपलभ्यते यदुपमानपदं प्रतिबिम्बमेव मणिवप्रगतम् ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – भगवल्लोके कोऽस्त्यतिशयः इति अपेक्षायामाह –

नन्वित्यादिना ॥ तत्र भगवल्लोके विश्वे समस्ता ये विभवा ऐश्वर्याणि तेषां एकं मुख्यं यत्पदं आस्पदम् । 'धनं हिरण्यञ्च वसु विभव' इति हलः । 'पदं व्यवसितत्राणस्थानलक्ष्मां घ्रिवस्तुष्वि'त्यमरः । पूर्णपुरुषस्य श्रीहरेः पुरी परिभाति ननु लसति हि । मण्यात्मको वप्रः प्रकारः तं गतं प्राप्तं प्रतिबिम्बमेव यदुपमानपदं यस्याः उपमानस्थानं उपलभ्यते ज्ञायते । मणिमयवप्रगतं प्रतिबिम्बमेव तस्याः पुर्या उपमानभावं भजते नान्यदिति भावः ॥ ८ ॥

मन्दोपकारिणी – भगवल्लोके कः अतिशयः अस्ति येन तस्य महाफलत्वं इत्यतः वैकुण्ठगतातिशयं वर्णयति शेष इत्याह- **नन्वित्यादिना** ॥ उत्तरग्रन्थेन समग्रेण । तत्र वैकुण्ठलोके विश्वविभवैकपदं विश्वानि सर्वाणि च तानि विभवानि ऐश्वर्याणि च विश्वविभवानि सकलशोभातिशया इति यावत्, तेषां एकं मुख्यं पदं स्थानं 'एके मुख्यान्यकेवलाः' इत्यमरः । पूर्णपुरुषस्य पूर्णस्य सकलगुणपूर्णस्य पुरुषस्य हरेः । पुरी नगरी 'पूः स्त्री पुरी नगर्यौ वा पत्तनं' इत्यमरः प्रतिभाति ननु शोभते हि । प्रति पूर्वात् 'भा दीप्तौ' इत्यतो लट् परस्मैपदं भाति भातः भान्ति' । कथंभूता पुरीत्यत आह- मणीति ॥ मणिवप्रगतं मणिमयश्चासौ वप्रः प्राकारश्च मणिवप्रः 'वप्रः प्राकाररोधसोः' इत्यमरः । तत्र गतं विद्यमानं रत्नखचितप्राकारे प्रतिफलितं विष्णुपुर्याः प्रतिबिम्बमेव यदुपमानपदं यस्याः पुर्याः उपमानपदं उपमानस्य सादृश्यस्य पदं स्थानं कविभिः उपलभ्यते हि । भगवत्पुर्याः रत्नप्राकारे प्रतिफलितप्रतिबिम्बं विना अन्यत्सदृशं वस्तु नास्तीति भावः । उपपूर्वात् 'डु लभष् प्राप्तौ' इत्यतः कर्मणि लडात्मनेपदम्' ॥ ८ ॥

सितसौधसन्ततिरुचा स्फुरिता परितोऽरुणाश्मगृहपंक्तिरुचिः ।
इह मच्छरीरवलये लसितामनुयाति मूर्तिमसुरासुहृतः ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – सितेति ॥ परितः सिता शुभ्राः ये सौधाः प्रासादाः तेषां सन्ततिः समूहः तस्याः रुक् कान्तिः तया स्फुरिता लसिता । अरुणानि रक्तानि यान्यश्मानि पद्मरागमणयः तन्मयानि यानि गृहाणि मन्दिराणि तेषां या पङ्क्तिः तस्याः रुचिः कान्तिः । इह अस्मिन्, मम शरीरमेव वलयो मण्डलं तस्मिन् मच्छरीरात्मक-शय्यामण्डल इत्यर्थः । इह मच्छरीरवलय इति शेषवाक्यम् । तथा च शेषात्मकशय्यामध्य इति यावत् । लसितां शोभमानां असुरासून् असुरप्राणान् हृतवान्निति असुरासुहृत् तस्य श्रीहरेः मूर्तिः अनुयाति विडम्बते । शुभ्रे मच्छरीरवलय उद्यदादित्यवर्णस्य श्रीहरेर्मूर्तिर्यथा शोभते तद्वत् सितसौधसन्ततिमध्यगतारुणाश्मगृहपङ्क्तिः शोभत इति भावः ॥ ९ ॥

मन्दोपकारिणी – सितेति ॥ परितः गृहबहिर्भागे समंतात् सितसौधसन्ततिरुचा सुधानाम लेपनद्रव्यविशेषः 'सुधा लेपोऽमृतं स्नुही' इत्यमरः । तथा च सुधया लेपनद्रव्येण लिप्ताः सौधाः प्राकाराः तेषां संततिः समूहः तस्याः रुक् कान्तिः सिता शुभ्रवर्णा च सा

सौधसंततिरुक् च तया स्फुरिता लसिता । अरुणाश्मगृहपङ्क्तिरुचिः अरुणाः रक्तवर्णाश्च ते अश्मानः पाषाणाश्च अरुणाश्मभिः पद्मरागमणिभिः इत्यर्थः । निर्मितानि च तानि गृहाणि च तेषां पङ्क्तिः आवलिः तस्याः रुचिः कान्तिः 'स्युः प्रभारुग्रुचिस्त्विड् भा' इत्यमरः । इह अस्मिन् मच्छरीरवलये मम शरीरं मच्छरीरं तस्य वलये मण्डले मच्छरीरात्मकशय्यायां इत्यर्थः । लसितां शोभमानां असुरासुहृतः असुराणां दैत्यानां असून् प्राणान् 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः । हरति अपहरतीति असुरासुहृत् । दान्तपाठे तु असुराणां सुहृत् मित्रं न भवतीति असुरासुहृत् शत्रुः तस्य विष्णोः मूर्तिं तनुं अनुयाति अनुकरोति । अनु पूर्वात् 'या प्रापणे' इत्यतो लट् परस्मैपदं याति यातः यान्ति । अयं भावः भगवत्पुर्यां रक्तवर्णपद्मरागमणिनिर्मितानि गृहाणि सन्ति तत्परितः शुभ्रवर्णचूर्णलिप्ताः प्राकारास्सन्ति । शुभ्रप्राकारमध्यगतरक्तवर्णगृहपङ्क्तिः धवलमच्छरीरमध्ये विद्यमानोद्यदादित्यवर्णहरिमूर्तिवत् भाति । यद्वा सितसौधसन्ततिरुचेत्यस्य अयमर्थः सिताः स्फटिकमणिनिर्मितत्वेन शुभ्राः सौधाः राजसदनानि गृहविशेषा इत्यर्थः । 'सौधोऽस्त्री राजसदनं' इत्यमरः । तेषां सन्ततिरुचेति । ततश्च परितः स्फटिकनिर्मितगृहाणि तदन्तः पद्मरागमणिनिर्मितगृहाणि सन्तीत्यर्थः । सम्पद्यते अन्यत् सर्वं पूर्ववदेव भवति ॥ ९ ॥

शबला वलीकघटितस्फटिकद्युतिभिर्हरिन्मणिमयी वलभी ।
प्रतिसद्म भाति यमुना मिलिता सितसौरसैन्धवपयोभिरिव॥ १० ॥

भावप्रकाशिका – आच्छादनं स्याद्वलभी गृहाणां गोपानसी दारु च वक्रसंस्थम् । नीध्रं वलीकं पटलान्तमाहुः कपोतपालीं च विटङ्कसंज्ञाम् इति । 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य चे'ति पूर्वपदवृद्धिः । सौरसैन्धवपयोभिः ॥ १० ॥

पदार्थदीपिकोद्बोधिका – शबलेति ॥ वलीकघटितस्फटिकद्युतिभिः वलीके गृहाच्छादनाग्रे । 'नीध्रं वलीकं पटलान्तमाहुरि'ति हलः । 'वलीकनीध्रे पटल' इत्यमरश्च । पटलमिति गृहाच्छादनमुच्यते । 'पटलं छदिरि'त्यमरः । तथा च गृहाच्छादनभूतफलकादीनामग्रभागे घटिता याः स्फटिकद्युतयः स्फटिकानां कान्तयः ताभिः शबला मिश्रा हरिन्मणिमयी इन्द्रनीलरत्नमयी वलभी गृहाणां आच्छादनम् । 'आच्छादनं स्याद्वलभी गृहाणामि'ति हलः । 'वलभीच्छादने वक्रदारुणी'त्यमरश्च । सद्म सद्म प्रति प्रतिसद्म

प्रतिमन्दिरं सुरसिन्धोः गङ्गायाः सम्बन्धीनि सौरसैन्धवानि तानि च तानि पयांसि च । सितानि श्वेतानि च तानि सौरसैन्धवपयांसि च, तैः मिलिता यमुनेव यमुनानदीव भाति शोभते । सौरसैन्धवेति 'हृद्भगसिन्ध्वन्तेभ्यः पूर्वपदस्य चे'त्युभयपदवृद्धिः । सौभाग्यं सौहार्दं इतिवत् ॥ १० ॥

मन्दोपकारिणी – शबलेति ॥ वलीकघटितस्फटिकद्युतिभिः अत्र वलीकशब्देन पटलप्रान्तभाग उच्यते पटलशब्देन तु आच्छादनमुच्यते 'वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिः' इत्यमरः । तथा च वलीके आच्छादनाग्रे गृहाच्छादनभूतपटलप्रान्तभागे इति यावत् । घटितानां खचितानां स्फटिकानां स्फटिकनामकशुभ्रमणीनां द्युतिभिः कान्तिभिः शबला कर्बुरा मिश्रितेति यावत् 'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे' इत्यमरः । हरिन्मणिमयी इन्द्रनीलरत्नखचिता वलभी गृहाणां आच्छादनं 'आच्छादनन्तु वलभी गृहाणां' इति हलायुधः । 'गोपानसी तु वलभी छादने वक्रदारुणि' इत्यमरः । प्रतिसद्म सद्मप्रति प्रतिसद्म इति अव्ययसमासः । सर्वगृहेषु इत्यर्थः । 'गृहं गेहोदवसितं वेश्म सद्म निकेतनं' इत्यमरः । भाति शोभते । का इव ? सितसौरसैन्धवपयोभिः सुरसिन्धुः देवनदी गङ्गा 'सिन्धुर्ना सरितस्त्रियां' इत्यमरः । सुरसिन्धोः सम्बन्धीनि सौरसैन्धवानि तानि च तानि पयांसि जलानि सितानि शुभ्राणि च तानि सौरसैन्धवपयांसि च तथोक्तानि तैः । मिलिता सङ्गता यमुना तन्नामकनदीव यथा सितासितयोः गङ्गायमुनयोः सङ्गमः शोभते तद्वत् शुभ्रस्फटिकखचितगृहाच्छादनप्रान्तभागनीलमणिखचितगृहाच्छादनयोः सङ्गमः शुशुभे इति भावः सौरसैन्धव इत्यत्र 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इति उभयथा पदवृद्धिः सौभाग्यं इतिवत् ॥ १० ॥

यदि नाभविष्यदिह विभ्रमतानियमो जनस्य निलयावलिषु ।
विकटा विटङ्ककृतपत्रिततिः कृतकेत्यवैक्ष्यत कथञ्चन नो ॥ ११ ॥

भावप्रकाशिका – विकटा श्रेष्ठा च ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – यदीति ॥ इह वैकुण्ठे । जनस्य यदि विगतो भ्रमो भ्रान्तिज्ञानं येषां ते विभ्रमाः तेषां भावो विभ्रमता तस्या नियमो नाभविष्यत् । तर्हि निलयावलयो मन्दिरपङ्क्तयस्तासु विकटा श्रेष्ठा दर्शनीया इत्यर्थः । विटङ्के कपोतपाटिकायां

कृता रचिता या पत्रिततिः पक्षिसमूहः 'कपोतपाटिकायां तु विटङ्कं पुन्नपुंसकमि'त्यमरः । कृतकेति कृत्रिमेति कथञ्चन नो अवैक्ष्यत ।' लिङ् निमित्ते लृङ् क्रियातिपत्ताविति लृङ् । अयं भावः- वैकुण्ठे वर्तमानजनानां यदि विभ्रमतानियमो भ्रान्तिराहित्यनियमो न स्यात् तर्हि विटङ्ककृतपत्रिततिं पश्यतां तेषां कृत्रिमत्वप्रतीतिः न स्यात् । किन्तु अकृत्रिमा एते पक्षिण इति प्रतीतिः भवेत् । अस्ति च अत्र विगतभ्रान्तित्वनियमः । मुक्तानां भ्रान्तिलेशस्यापि असम्भवात् । तस्मात् विटङ्ककृतपत्रिततिं दृष्ट्वा कृतकत्वेनैव व्यज्ञासिषुरिति ॥ ११ ॥

मन्दोपकारिणी – यदीति ॥ इह वैकुण्ठे जनस्य मुक्तजनस्य यदि विभ्रमतानियमः विगतः भ्रमः भ्रान्तिः येभ्यः ते विभ्रमाः विभ्रमाणां भावो विभ्रमता तस्याः नियमः सर्वथा भ्रान्त्यभाव इत्यर्थः । नाभविष्यत् । यदि मुक्तानां नियमेन भ्रान्तिः नास्तीति न स्यात् इति यावत् । तर्हि निलयावलिषु निलयानां गृहाणां आवलिषु पङ्क्तिषु विकटा सुन्दरा दर्शनीया 'विकटः सुन्दरः प्रोक्तः' इति विश्वः । विटङ्ककृतपत्रिततिः विटङ्केषु पक्षिगृहेषु कृतानां पतत्रिणां पक्षिणां ततिः समूहः 'पतत्रिपत्रिपतगः' इत्यमरः विटङ्ककृता च सा पत्रिततिश्च विटङ्ककृतपत्रिततिः । कृतकेति कृत्रिमेति मुक्तैः कथञ्चन केन प्रकारेणापि नो अवैक्ष्यत नैव ज्ञायेत । 'अवपूर्वात् ईक्ष दर्शनाङ्कनयोः इत्यतः कर्मणि लङ् आत्मनेपदं अवैक्ष्यत अवैक्ष्येतां अवैक्ष्यन्त' । अयं भावः- वैकुण्ठगृहेषु कपोतपालिकाख्यस्थलविशेषे काष्ठादिविकाराः कृत्रिमाः दर्शनीयाः पक्षिणः स्थापितास्सन्ति । ते च स्वाभाविकपक्षिवत् उत्पतिष्यन्तीव दृश्यन्ते तथापि तादृशपक्षिणः पश्यतां मुक्तानां अकृत्रिमत्वभ्रान्तिः न भवति । अज्ञानलेशस्यापि असम्भवात् । अन्यथा मुक्तत्वव्याहतेः । किन्तु कृत्रिमा एते पक्षिणः इत्येव प्रतीतिः भवति । अनेन कृत्रिमा अपि अकृत्रिमसदृशास्सन्ति भ्रान्तिजनकेऽपि तादृशे वस्तुनि मुक्तानां सर्वथा भ्रान्तिः नास्ति इति च एवंरूपः अतिशयः वैकुण्ठे उक्तो भवति ॥ ११ ॥

विविधस्तुलोपगतचित्रपटीसुवितानलम्बिमणिदामगणः ।
शरणान्तरेष्वधिकपूरणतः प्रचकास्ति विभ्रम इवावगलन् ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – विविध इति ॥ विविधः नानावर्णः तुलायां मन्दिरान्तस्थतुलायां उपगतं सम्बद्धं यत् चित्रपटीसुवितानं चित्रपटात्मकशोभनवितानं

तस्माल्लम्बी लम्बमानो यो मणिदामगणो मणिमालासमूहः । शरणान्तरेषु मन्दिरान्तः प्रदेशेषु अधिकपूरणतः अतिपूर्णताया अवगलन् स्रवन् विभ्रम इव कान्तिरिव प्रचकास्ति शोभते ॥ १२[1] ॥

मन्दोपकारिणी – विविध इति ॥ विविधः नानावर्णः । तुलोपगतचित्र-पटीसुवितानलम्बिमणिदामगणः तुला मन्दिरान्तः स्तम्भद्वयोपरि तिर्यक् स्थापितः गृहाच्छादनभूतफलकाद्याधारः वृक्षशिलारूपः पदार्थः तुलासु मन्दिरान्तर्गततुलासु उपगता सम्बद्धचित्रपटी चित्रा नानावर्णा पटी पटः वस्त्रं तदात्मकं सु शोभनं वितानं तस्मात् लम्बी अधोमुखत्वेन वर्तमानः मणीनां दामानि मालाः तेषां गणः समूहः प्रचकास्ति शोभते । 'चकासृ दीप्तौ' इत्यतः लट् परस्मैपदं चकास्ति चकास्तः चकासति' । चित्रा च सा पटी च चित्रपटी । तुलासु उपगता तुलोपगता । तुलोपगता च सा चित्रपटी च चित्रपट्यात्मकं च तत् सुवितानं च चित्रपटीसुवितानम् । वितानात् लम्बी वितानलम्बी मणीनां दामानि मणिदामानि मणिदाम्नां गणः वितानलम्बी चासौ मणिदामगणश्च इति विग्रहः । 'अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि' इत्यमरः । अन्तरेषु अन्तःस्थितप्रदेशेषु 'अन्तरमवकाशावधी' इत्यमरः । अधिकपूरणतः अतिपूर्णत्वात् अवगलन् विभ्रम इव कान्तिरिव 'विभ्रमः संशये भ्रान्तौ शोभायां च' इति वैजयन्ती । अयं भावः- 'गृहान्तः विचित्रवस्त्रात्मकवितानानि तुलासम्बद्धानि प्रसारितानि वर्तन्ते । तेषु रत्नमालाः अधोलम्ब-मानाः सन्ति । तासु अधोलम्बमानासु रत्नमालासु एवं उत्प्रेक्षा– 'गृहान्तः सर्वत्र कान्तीनां व्याप्तत्वात् पुनः प्रदेशाभावात् अतिरिच्यमानाः कान्तयः अधः स्रवन्तीव' इति ॥ १२ ॥

विमलाकृतिः प्रकृतिरेव महामणिहेममय्यखिलवस्तुमयी ।
इह सम्भवेत्सकलकान्तिरसः कथितोऽधिकोक्तिभिरतः कविभिः ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – 'ननु तत्र विश्वविभवैकपदमि' त्यादिनोक्तं नासम्भावितमित्याह–**विमलाकृतिरिति** ॥ इह वैकुण्ठे विमला आकृतिः स्वरूपं यस्याः तादृशी प्रकृतिरेव रमैव । यतो महामणयश्च हेमानि च तेषां स्वरूपा महामणिहेममयी । किं बहुना ? अखिलानि यानि वस्तूनि तदात्मिकाऽखिलवस्तुमयी । अतः कविभिः अधिका

आपाततः अत्युक्तितया प्रतीयमाना या उक्तयो वचांसि ताभिः कथितः सकलानां समस्तपदार्थानां कान्तिरसः शोभातिशयः । सकलवस्तुनिष्ठत्वेनोच्यमानः शोभातिशय इत्यर्थः । सम्भवेत् घटत एव । मणिहेमाद्यखिलवस्तूनां निर्दोषकान्तिरूपरमात्मकत्वात् नासम्भावितं किमपीति भावः ॥ १३ ॥

मन्दोपकारिणी – 'ननु तत्र विश्वविभवैकपदं' इत्यादिनोक्तं नासम्भावितमित्याह - **विमलेति** ॥ यतः इह भगवत्पुर्यां विमलाकृतिः विमला निर्दोषा आकृतिः स्वरूपं यस्याः सा विमलाकृतिः । प्रकृतिरेव महालक्ष्मीरेव महामणिहेममयी मणयः रत्नानि च हेम सुवर्णं च मणिहेमानि 'हिरण्यं हेमहाटकं' इत्यमरः, महान्ति अमूल्यानि च तानि मणिहेमानि च मणिहेमस्वरूपा मणिहेममयी । किं बहुना ? अखिलवस्तुमयी अतः कविभिः काव्यकारैः अधिकोक्तिभिः अधिकाश्च ताः उक्तयश्च अधिकोक्तयः आपाततः अत्युक्ततया प्रतीयमान-वचनानि ताभिः कथितः उच्यमानः सकलकान्तिरसः कान्तीनां रसः अतिशयः कान्तिरसः शोभातिशयः सकलश्चासौ कान्तिरसश्च तथोक्तः सम्भवेत् घटत एव । गृहमणिसुवर्णाद्य-खिलपदार्थानां निर्दोषातिसुन्दरकान्तिरमास्वरूपत्वात् अत्र उच्यमानः शोभातिशयः कोऽप्यसम्भावितः न भवतीति भावः ॥ १३ ॥

तदनादिकालमितमुक्तिरतेरगणेयशम्भुमुखसङ्गततेः ।
नगरैर्महापुरमसंहतिमल्लसति प्रभोरयमहो महिमा ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – तदिति ॥ न विद्यते आदिः यस्य सोऽनादिः स चासौ कालश्च तम् । 'कालाध्वनोरि'ति द्वितीया । अनादिकाल इत्यर्थः । इता प्राप्ता मुक्तिरतिः मुक्तिसुखं यया तादृशी तस्याः । अगण्या अगणिता ये शम्भुमुखसङ्गाः शम्भुः ब्रह्मा रुद्रो वा मुखं प्रधानो येषां देवानां ते शम्भुमुखाः तेषां सङ्गास्तेषां ततिः पङ्क्तिस्तस्याः । 'शम्भुर्धातृहरार्हत्स्वि'ति वैजयन्ती । नगरैः पुरैः संहतेरभावोऽसंहतिः सा अस्यास्तीति असंहतिमत् । सम्बाधरहितमित्यर्थः । तत् महापुरं महानगरं लसति । अयं संहत्यभावः, अनादितः प्रतिकल्पं मुक्तानां अनन्तानां ब्रह्मरुद्रादीनां नगरसमूहैः पूरणेऽपि तस्मिन्नगरे संहत्यभाव इत्यर्थः । प्रभोः श्रीनारायणस्य महिमा सामर्थ्यम् । अहो एतदाश्चर्यम् ॥ १४ ॥

मन्दोपकारिणी – तदिति ॥ अनादिकालं अनादिश्चासौ कालश्च तं 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया अनादिकालतः । इतमुक्तिरतेः मुक्तेः मोक्षस्य रतिः सुखं मुक्तिरतिः इता प्राप्ता मुक्तिरतिः यया सा तथोक्ता तस्याः । अनादिकालात् मोक्षसुखं अनुभवन्त्या इत्यर्थः । अगणेयशम्भुमुखसंघतेतेः शम्भुः चतुर्मुखः 'शम्भू ब्रह्म त्रिलोचनौ' इत्यमरः, स एव मुखं आदिः येषां ते शम्भुमुखाः गरुडशेषादयः तेषां सङ्घः समूहः तस्य ततिः पङ्क्तिः । गणयितुं शक्या गणेया 'गणनीये तु गणेयं संख्याते गणितमथ समं सर्वम्' इत्यमरः, न गणेया अगणेया । अगणेया च सा शम्भुमुखसङ्घततिश्च तस्याः । नगरैः पट्टणैः असंहतिमत् संहतिः सान्द्रसम्बन्धः न संहतिः असंहतिः अस्यास्तीति असंहतिमत् । तत् वैकुण्ठाख्यं महापुरं महच्च तत्पुरं च उत्तमनगरं लसति राजते' । 'लस दीप्तौ' इत्यतो लट् परस्मैपदम्' । अयं अनन्तजनैः पूरितेऽपि नगरे सङ्कुलत्वाभावः प्रभोः विष्णोः महिमा माहात्म्यं अहो आश्चर्यम् । अनादिकालतः प्रतिकल्पं मुक्ताः ब्रह्मशेषगरुडादिजीवगणाः अनन्ताः तत्र सन्ति तेषां पृथक् नगराणि सन्ति । एवं च अनन्तकालीनानन्तब्रह्मादिनगरसमूहैः पूर्णेऽपि नगरे निरवकाशत्वलक्षणसंहत्यभावोऽस्ति, 'अवकाशवन्तो दिव्यत्वात् पूर्यन्ते न कदाचन' इति वचनादिदं च विष्णोः सामर्थ्यं अत्याश्चर्यं इति भावः ॥ १४ ॥

भवनं विभाति भुवनैकपतेर्भुवनत्रयाद्भुतगणातिशयि ।
वरमन्दिरप्रकरमध्यगतं द्विजमण्डलस्थशशिमण्डलवत् ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – भवनमिति ॥ भुवनानां लोकानां त्रयं, तस्य ये अद्भुतगुणाः तान् अतिशयितुं शीलमस्येति तादृशम् । भुवनत्रयगतसर्वैश्वर्यगुणाति-शयिष्णिवत्यर्थः । वरमन्दिराणि उत्तममन्दिराणि तेषां ये प्रकराः समूहाः तेषां यन्मध्यं तत् गतं प्राप्तम् । भुवनानां एकपतिर्मुख्यपतिः तस्य श्रीहरेः भवनं मन्दिरम् । द्विजमण्डले नक्षत्रसमूहे तिष्ठतीति तादृशं यच्छशिमण्डलं चन्द्रबिम्बं तद्वत् विभाति शोभते ॥ १५ ॥

मन्दोपकारिणी – भवनमिति ॥ भुवनत्रयाद्भुतगणातिशयि भुवनानां त्रयं तत्र विद्यमानाश्च ते अद्भुतगणाः आश्चर्यसमूहाश्च 'विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवं' इत्यमरः, तान् अतिशेते इति भुवनत्रयाद्भुतगणातिशयि अलौकिकसर्वाश्चर्योपेतं इत्यर्थः ।

वरमन्दिरप्रकरमध्यगतं वराणि श्रेष्ठानि च तानि मन्दिराणि तेषां प्रकरः समूहः तस्य मध्ये गतं विद्यमानं 'पूगो वितानं प्रकरः' इत्यमरः । भुवनैकपतेः भुवनानां सर्वलोकानां एकपतेः मुख्यनाथस्य हरेः भवनं मन्दिरं विभाति शोभते । किमिव द्विजमण्डलस्थशशिमण्डलवत् द्विजानां नक्षत्राणां मण्डलं समूहः तस्मिन् तिष्ठतीति द्विजमण्डलस्थं शशिनः चन्द्रस्य मण्डलं बिम्बं शशिमण्डलं द्विजमण्डलस्थं च तत् शशिमण्डलं च शशिमण्डलमिव शशिमण्डलवत् । अत्र द्विजशब्दस्य नक्षत्रवाचकत्वं 'द्विजराजः शशधर' इति चन्द्रस्य द्विजराजत्वोक्तेः अवगम्यते । यथा नक्षत्रसमूहमध्ये सर्वमनोहरं चन्द्रमण्डलं शोभते तद्वत् परितो विद्यमानप्रकाशमानमन्दिरसमूहमध्ये अत्यपूर्वं विष्णोर्भवनं देदीप्यते इति भावः ॥ १५ ॥

स्वयमिन्दिरैव पतिमानकरी गृहकर्म यत्र कुरुते सुतराम् ।
अपि किङ्करीदशशतीमहिता श्रियमत्र वर्णयति वेश्मनि कः॥ १६ ॥

पदार्थदीपिकोद्बोधिका – स्वयमिति ॥ यत्र भगवन्मन्दिरे । पत्युः स्वभर्तुः मानः सम्भावना तं करोतीति तादृशी इन्दिरा स्वयमेव किङ्करीणां दासीनां दशशत्या सहस्रेण महितापि सम्पूजितापि सुतरां अत्यन्तं गृहकर्म सम्मार्जनलेपनादिगृहकृत्यं कुरुते । अत्र एतादृशे वेश्मनि श्रियं शोभां को वर्णयति ? न कोऽपीत्यर्थः ॥ १६ ॥

मन्दोपकारिणी – स्वयमिति ॥ यत्र भगवन्मन्दिरे । पतिमानकरी पत्युः भर्तुः नारायणस्य मानं पूजां कुर्वती इन्दिरा लक्ष्मीः स्वयमेव सुतरां अतिशयेन गृहकर्म गृहस्य कर्म संमार्जनलेपादिकृत्यं कुरुते करोति । कथंभूता किंकरीदशशतीमहिता किंकरीणां दासीनां दशशत्या सहस्रेण महितापि पूजितापि अत्र वेश्मनि गृहे श्रियं शोभां कः को वा वर्णयति वर्णयितुं समर्थः न कोऽपि इत्यर्थः । बहुदासीसेवितापि रमा स्वयं पतिशुश्रूषणे रता सती दासीव गृहसंमार्जनलेपादिगृहकृत्यं करोति इति । एतत् शोभातिशयं को वर्णयेत् इति भावः । अनेन स्त्रियाः पतिशुश्रूषणं आवश्यकमित्युक्तं भवति । 'डु कृञ् करणे' इत्यतो लट् आत्मनेपदं कुरुते कुर्वाते कुर्वते । 'वर्ण स्तुतौ' इत्यतो लट् परस्मैपदम् ॥ १६ ॥

कमलापतिः कमलयाऽमलया कमनीयया कमललोचनया ।
अमृताहिराजमृदुभोगगतः स्वरतोऽपि तत्र रमते परमः ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – कमलेति ॥ परमः सर्वोत्तमः कमलापतिः श्रीपतिः स्वेन रतः स्वरतः तथापि तत्र उक्तगुणविशिष्टे स्वमन्दिरे । अमृतो मुक्तो यः अहिराजः सर्पराजः शय्यात्मकः शेषः तस्य यो मृदुभोगो मृदुशरीरं तं गतः प्राप्तः सन् । 'अहेः शरीरं भोगः स्यादि'ति हलः । न विद्यते मलं दुःखस्पृष्टत्वादिदोषा यस्याः तया, कमनीयया मनोहरया, कमलवत् लोचने यस्याः तया, कमलया रमया रमते ॥ १७ ॥

मन्दोपकारिणी – कमलेति ॥ परमः सर्वोत्तमः कमलापतिः कमलायाः लक्ष्म्याः पतिः भर्ता 'कमला श्रीर्हरिप्रिया' इत्यमरः । स्वरतोऽपि स्वेनैव रतोऽपि रममाणोऽपि तत्र पूर्वोक्तगुणविशिष्टे अतिसुन्दरे मन्दिरे । अमृताहिराजमृदुभोगगतः अहीनां सर्पाणां राजा अहिराजः शेषः 'भुजङ्गोऽहिर्भुजङ्गमः' इत्यमरः, अमृतः मुक्तश्चासौ अहिराजश्च अमृताहिराजः तस्य मृदुः कोमलश्चासौ भोगः देहश्च तस्मिन् गतः मुक्तशेषशरीरात्मक-शय्यागतस्सन् 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः । अमलया निर्दोषया कमनीयया मनोहरया कमललोचनया कमलवत् लोचने यस्याः सा तथोक्ता तया कमलया श्रीदेव्या रमते क्रीडते । 'रमु क्रीडायामित्यतो लडात्मनेपदं रमते रमेते रमन्ते' ॥ १७ ॥

तरुणप्रभाकरसहस्ररुचं कनकाम्बरं मणिमयाभरणम् ।
हसिताननेन्दुमरविन्ददृशं तमरीन्द्रधारिणमनुस्मरत ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – तरुणेति ॥ तरुणाः उद्यन्तो ये प्रभाकराः सूर्याः तेषां यत्सहस्रं तस्य रुगिव रुक् दीप्तिः यस्य तम् । कनकवर्णं अम्बरं यस्य तम् । पीताम्बर-मित्यर्थः । मणिमयानि रत्नमयानि आभरणानि यस्य तम् । आननमेवेन्दुः, हसितो मन्दस्मितोपेतः आननेन्दुः यस्य तम् । अरविन्दवत् दृशौ यस्य तम् । अरीन्द्रं चक्रश्रेष्ठं धर्तुं शीलमस्येति तं श्रीहरिं अनुस्मरत चिन्तयत । इदं सनकादीन् प्रति शेषवचनम् ॥ १८ ॥

मन्दोपकारिणी – तरुणेति ॥ हे सनकादयः यूयं अरीन्द्रधारिणं अरीन्द्रं सुदर्शनचक्रं धारयति धत्ते इति अरीन्द्रधारी तं अरीन्द्रधारिणं 'अरिः पुमांश्चक्रवाके रिपौ चक्रे तु न

द्वयोः' इत्यमरः । तं परमात्मानं अनुस्मरत अनुचिन्तयत । 'स्मृ स्मरणे' इत्यतो लोट् परस्मैपदं स्मर स्मरतं स्मरत । कथंभूतं तरुणप्रभाकरसहस्ररुचं तरुणाः उद्यन्तश्च ते प्रभाकराः 'तरुणः स्यान्नवे यूनि' इति विश्वः । 'प्रभाकरविभाकराः' इत्यमरः । तरुणप्रभाकराणां सहस्रवत् रुक् कान्तिः यस्य सः तरुणप्रभाकरसहस्ररुक् तं उद्यदादित्यसहस्रसदृशवर्णम् । पुनः कीदृशं कनकाम्बरं कनकवत् अम्बरं वस्त्रं यस्य स तथोक्तः तं पीताम्बरधारिणं 'अम्बरं व्योम्नि वाससि' इत्यमरः । पुनः किंभूतं मणिमयाभरणं मणिमयानि नवरत्नखचितानि आभरणानि यस्य सः तम् । हसिताननेन्दुं हसितः मन्दस्मितोपेतः आननेन्दुः मुखचन्द्रः यस्य स तथोक्तः तम् । अरविन्ददृशं अरविन्दवत् कमलवत् दृशौ चक्षुषी यस्य स तथोक्तः तम् ॥ १८ ॥

गणयेद्रमाऽस्य न गुणानखिलांश्चतुराननश्चतुरवागपि नो ।
न वयं सहस्रवदना अपि तानपरोदितानतिवदेम पुनः ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – गणयेदिति ॥ रमा अस्य भगवतो गुणान् अखिलान् सर्वानपि न गणयेत् । गण संख्याने लिङ् । सर्वगुणान् गणयितुं अशक्तेति भावः । चतुरा वाक्यस्य तादृशः, चत्वारि आननानि यस्य स चतुराननो ब्रह्मापि नो गणयेत् । सहस्रं वदनानि येषां तादृशा वयमप्यखिलान् न गणयामः । पुनरपि अथापि अपरैरन्यैश्शङ्करादिभिरुदितान् प्रोक्तान् गुणान् अतिवदेम अतिशयेन वदेम ॥ १९ ॥

मन्दोपकारिणी – गणयेदिति ॥ रमा लक्ष्मीः अस्य पूर्वोक्तगुणविशिष्टस्य भगवतः गुणान् अखिलान् निःशेषान् न गणयेत् गणयितुं न शक्ता इत्यर्थः । चतुरवाक् चतुरा पाटवयुक्ता वाक् वागिन्द्रियं यस्य सः वाग्मी अपि इत्यर्थः । चतुराननः चत्वारि आननानि मुखानि यस्य सः चतुर्मुखोऽपि नो गणयेत् । सहस्रवदनाः सहस्राणि वदनानि मुखानि येषां ते तथोक्ताः । वयमपि अखिलान् न गणयामः । 'गण संख्याने' इत्यतः विधिलिङ् परस्मैपदं गणयेत् गणयेतां गणयेयुः । पुनः अथापि अपरोदितान् अपरैः शुकाचार्यादिभिः उदितान् भागवतादौ कथितान् गुणान् अतिवदेम अतिशयेन वदेम । शुकाद्युक्तगुणानेव शुकाद्यपेक्षया अतिशयत्वेन वर्णयामः इत्येव विशेष इति भावः । 'वद व्यक्तायां' वाचीत्यतो लिङ् परस्मैपदं वदेयं वदेव वदेम ॥ १९ ॥

विधयो विहङ्गपतयोऽगणिता रमणीयुताश्च फणिपेन्द्रमुखाः ।
परयोगभूरिसुखभोगमिता अवलोक्य तं दधति मोदरसम् ॥ २० ॥

पदार्थदीपिकोद्बोधिका – विधय इति ॥ परे सर्वविलक्षणे भगवति योगो मनोयोगः तेन ध्यानेनेति यावत् । भूरिसुखभोगो भूरि स्वयोग्यतया पूर्णं यत्सुखं तस्य भोगोऽनुभवं इताः प्राप्ताः । अथवा परमयोग उत्तमभक्त्याख्योपायः तेन भूरिसुखभोगं मोक्षे पूर्णानन्दानुभवं इताः प्राप्ताः । अगणिता असंख्याता विधयो ब्रह्माणः, अगणिता विहंगपतयः पक्षिपतयो गरुडाः, फणिनो नागान् पातीति फणिपः शेषः स च इन्द्रश्च तौ मुखे मुख्यौ येषां तादृशाः तैः सहिता देवाः, रमणीयुता स्वस्वभार्यायुक्ताः सन्तः भगवन्तं अवलोक्य मोदरसं सन्तोषसारं भगवद्दर्शनजनितं उत्तममानन्दं दधाति धारयन्ति ॥ २० ॥

मन्दोपकारिणी – विधय इति । अगणिताः असङ्ख्याताः विधयः चतुर्मुखाः 'विधाता विश्वसृड् विधिः' इत्यमरः । अगणिताः विहङ्गपतयः विहङ्गानां पक्षिणां 'खगे विहङ्ग विहगाः' इत्यमरः, पतयः ईश्वराः गरुडाः 'वैनतेयः खगेश्वरः' इत्यमरः । अगणिताः फणिपेन्द्रमुखाः फणिपाः शेषदेवाश्च इन्द्राश्च फणिपेन्द्राः एते मुखानि आद्याः येषां ते फणिपेन्द्रमुखाः तैः सहिताः देवाः रमणीयुताः रमणीभिः युताः सहितास्सन्तः तं भगवन्तं अवलोक्य, मोदरसं मोदस्य सन्तोषस्य रसः सारः तं 'रसः सारो वरः श्रेष्ठः' इत्यभिधानम् । भगवद्दर्शनात् जातं उत्तमानन्दं दधति प्राप्नुवन्ति अनुभवन्तीति यावत् । 'डुधाञ् धारणपोषणयोः' इति धातोः लट् परस्मैपदं दधाति धत्तः दधति । कथंभूताः परयोगभूरिसुखभोगं परे भगवति नारायणे 'परोऽरिपरमात्मनोः' इत्यमरः योगेन मनोयोगेन ध्यानेनेति यावत् । भूरिसुखभोगं भूरि पूर्णं च तत् सुखं च तस्य भोगः अनुभवः तं इताः प्राप्ताः मुक्ताः असङ्ख्यातब्रह्मादिगणाः स्वस्वभार्यासहिताः स्वयोग्यपूर्णसुखं अनुभवन्तस्सन्तः भगवन्तं दृष्ट्वा सन्तोषातिशयं प्राप्नुवन्ति इति भावः ॥ २० ॥

सचतुर्भुजा वनजपत्रदृशो वरवेषिणोऽत्र सपिशङ्गपटाः ।
अरुणप्रभाश्च तरुणाभ्ररुचो विचरन्ति नाथरुचयः पुरुषाः ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – सचतुर्भुजा इति ॥ चत्वारश्च ते भुजाश्च तैः सहिताः । वने जले जातं वनजं पद्मं तस्य यत्पत्रं दलं तद्वद्दृशौ दृष्टी येषां तादृशाः । 'जीवनं भुवनं

वनमि'त्यमरः । वर उत्तमो यो वेषोऽलङ्कारः स एषामस्तीति वरवेषिणः, पिशङ्गपटः पीताम्बरं तेन सहिताः, अरुणा रक्ता प्रभा येषां तादृशाः । केचिदुद्यदादित्यवर्णा इत्यर्थः । तरुणं यदभ्रं मेघो नीलमेघः तद्वत् रुचयो येषां तादृशाः, केचन नीलमेघश्यामा इत्यर्थः । अत एव नाथस्य सर्वमुक्ताधिपस्य श्रीहरेः रुगिव रुग्येषां तादृशा भगवत्सारूप्यं प्राप्ता इति भावः । ते मुक्ताः पुरुषाः विचरन्ति । यथा सुखमितस्ततः पर्यटन्ति । सचतुर्भुजेत्यादि-विशेषणैः नाथरुचित्वं तेषां उपपादितम् । चतुर्भुजत्वादिरूपेणैव हरिसारूप्यं तेषां न तु सर्वसाम्येनेति ॥ २१ ॥

मन्दोपकारिणी – सचतुर्भुजा इति ॥ अत्र वैकुण्ठे । नाथरुचयः नाथस्य सर्वमुक्ताधिपस्य विष्णोः रुचिरिव रुचिः कान्तिः येषां ते तथोक्ताः भगवत्सदृशाः इत्यर्थः । भगवत्सारूप्यं प्राप्ताः इति भावः । पुरुषाः मुक्ताः विचरन्ति यथासुखं इतस्ततः पर्यटन्ति । 'चर गतिभक्षणयोः' इति धातोः लट् परस्मैपदम् । मुक्तानां केन धर्मेण भगवत्सारूप्यं इत्यत उच्यते-''सचतुर्भुजाः'' इत्यादिविशेषणैः । सचतुर्भुजाः चत्वारश्च ते भुजाश्च तैः सहिताः । पुनः कथंभूताः वनजपत्रदृशः वने जले जायत इति वनजं कमलं 'जीवनं भुवनं वनं' इत्यमरः, तस्य पत्रं पर्णं तद्वत् दृशौ नेत्रे येषां ते वनजपत्रदृशः । पुनः कथंभूताः वरवेषिणः वराः वेषाः भूषणानि येषां सन्तीति उत्तमालङ्कारवन्तः इत्यर्थः । 'वेशो नेपथ्यभूषणे' इत्यमरः । वेषवेशयोः पर्यायः । पुनः कथंभूताः सपिशङ्गपटाः पिशङ्गाः पीतवर्णाश्च ते पटाः वस्त्राणि च पिशङ्गपटैः सहिताः सपिशङ्गपटाः पीताम्बरयुताः इत्यर्थः । तत्र केचन अरुणप्रभाः अरुणस्य उद्यदादित्यस्य प्रभेव प्रभा कान्तिः येषां ते अरुणप्रभाः 'अरुणो भास्करेऽपि स्यात्' इत्यमरः । केचन तरुणाभ्ररुचः तरुणानां नवानां नीलवर्णानां इति यावत्, 'तरुणः स्यान्नवे यूनि' इति विश्वः । अभ्राणां मेघानां रुचिरिव कान्तिरिव रुक् येषां ते तरुणाभ्ररुचः 'अभ्रं मेघो वारिवाहः' इत्यमरः । एवंभूतत्वेन भगवत्साम्यं मुक्तानां न तु सर्वप्रकारेण साम्यं इति भावः ॥ २१ ॥

भगवत्समीपमुपयातवतां प्रमदो न केवलमलब्धतुलः ।
अपि तस्य लोकमतिलोकगुणं भजतां सुदुर्लभमभूरिशुभैः ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – भगवदिति ॥ केवलं भगवत्समीपं हरिसमीपं उपयातवतां प्राप्तवतां प्रमदः आनन्दः अलब्धा तुला साम्यं येन तादृशः असदृश इत्यर्थः । न केवलं भगवत्सामीप्यं भजतामेवानन्दोऽसदृशः, किन्त्वतिक्रान्ता लोकगुणा ब्रह्मादिलोकगुणा येन तम् । न विद्यते भूरिशुभं बहुसुकृतं येषां तैः । सुदुर्लभं प्राप्तुं अशक्यम्, हरेः लोकं भजतामपि आनन्दोऽतुलः । 'एवं सचतुर्भुजाः' 'भगवत्समीपमि'ति च श्लोकद्वयेनोक्तानां सारूप्य, सालोक्यसामीप्यलक्षणत्रिविधमोक्षिणामपि आनन्दः स्वस्वयोग्यतानुसारेण पूर्णः करकः, पूर्णो घटः, पूर्णः शरावः इतिवदिति भावः । सायुज्यभाजां तु पूर्णानन्दत्वं कैमुत्यन्यायसिद्धम् ॥ २२ ॥

मन्दोपकारिणी – भगवदिति ॥ केवलं भगवत्समीपं भगवतः विष्णोः समीपं सामीप्यं उपयातवतां प्राप्तानां प्रमदः आनन्दः 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः । अलब्धतुलः अलब्धा अप्राप्ता तुला साम्यं येन सोऽलब्धतुलः असदृशः इति न । न केवलं भगवत्सामीप्यं प्राप्तानामेव आनन्दः असदृशः इत्यर्थः । अपि किन्तु अतिलोकगुणं लोकानां सत्यलोकादिलोकानां गुणान् अतिक्रम्य वर्तमानं तस्य हरेः लोकं वैकुण्ठं भजतां प्राप्तानां पुरुषाणामपि आनन्दः अलब्धतुलः । किंभूतं लोकं अभूरिशुभैः अभूरि अल्पं शुभं पुण्यं येषां ते अभूरिशुभाः तैः पुरुषैः सुदुर्लभं अत्यन्तं अप्राप्यम् । 'सचतुर्भुजा' इत्यादि श्लोकाभ्यां सालोक्यसामीप्यसारूप्यलक्षणत्रिविधमोक्षवन्तः उक्ताः त्रिविधानामपि आनन्दः स्वस्वयोग्यतानुसारेण पूर्ण एवेति ज्ञातव्यम् । पूर्णो घटः पूर्णः शराव इत्यादिवत् इति भावः । सायुज्यमुक्तिं प्राप्तानां तु पूर्णानन्दत्वं कैमुत्यन्यायेन सिद्धमिति नोक्तम् ॥ २२ ॥

न भवन्ति यत्र मृतिजन्मजरास्त्रिविधं भयं किमुत दुःखगणः ।
अपरं च किञ्चिदशुभं न भवेन्न गुणादि तत्प्रभवमूलमपि ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ यत्र यस्मिन् वैकुण्ठे । मृतिः मरणं जन्म उत्पत्तिः जरा च मृतिजन्मजरा न भवन्ति । तिस्रो विधाः प्रकारा यस्य तादृशं आध्यात्मिकं आधिभौतिकं आधिदैविकं च इति त्रिविधमित्यर्थः । भयं न भवति । दुःखगणो अन्यदुःखगणो न भवतीति किमुत, न भवत्येवेति भावः । अपरं च किञ्चित् अशुभं अमङ्गलं न भवेत् । तस्य मृतिजन्मादेः प्रभव उत्पत्तिः तस्य मूलं कारणभूतं तत्प्रभवमूलं,

गुणाः सत्वरजस्तमांस्यादयो यस्य तादृशं गुणादि । सत्वादिगुणत्रयं वा । आदिशब्दसङ्गृहीतः कश्चिददृष्टविशेषो वा न । मृत्यादेः कारणाभावात्कार्यं मृत्यादिकं च न भवतीति भावः । एवंभूतं लोकं भजतामिति पूर्वेण सम्बन्धः । यत्र मृतिजन्मजरा न भवन्ति तत्रानन्तसुखैः सुखमनुभूयत इत्युत्तरत्र वा सम्बन्धः ॥ २३ ॥

मन्दोपकारिणी – नेति ॥ यत्र यस्मिन् लोके मृतिजन्मजराः मृतिः मरणं जन्म उत्पत्तिः जरा वृद्धत्वं मृतिश्च जन्म च जरा चेति द्वन्द्वसमासः । एताः न भवन्ति। त्रिविधमपि आध्यात्मिकं आधिभौतिकं आधिदैविकं च इति त्रिविधं तिस्रो विधाः प्रकाराः यस्मिन् तत् त्रिविधं भयं न भवति । दुःखगणः दुःखानां समूहः किमुत न भवतीति किमु वक्तव्यं न भवत्येव इति भावः । अपरं च पूर्वोक्तादन्यच्च किंचिदशुभं मात्सर्यादिदूषणं न भवेत् । तत्प्रभवमूलं तस्य मृत्यादेः प्रभवस्य उत्पत्तेः मूलं आदिकारणं गुणाद्यपि सत्वरजस्तमोगुणाः आदयो यस्य तत् गुणादि आदिशब्देन अदृष्टविशेषो गृह्यते न, मृत्यादिकारणाभावात् मृत्यादिकं न भवतीति भावः । यत्र मृत्यादिकं नास्ति तादृशं लोकं भजतां इति पूर्वेण अन्वयः । एतादृशे लोके सुखमनुभूयते इति उत्तरश्लोकेनापि अन्वयः ॥ २३ ॥

अनुभूयते सुखमनन्तसखैः सकलैरलम्मतिपदं सततम् ।
अपि तारतम्यसहितैः स्वगुरुप्रवणैः परस्परमुरुप्रणयैः ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – अन्विति ॥ तारतम्यसहितैरपि सुखादिविषये तारतम्ययुक्तैरपि परस्परं उरुः महान् प्रणयः स्नेहो येषां तैः । मत्सरवर्जितैः इति भावः । स्वगुरुषु स्वोत्तमेषु प्रवणैः विनयवद्भिः स्वोत्तमेषु भक्तिमद्भिः इत्यर्थः । 'अन्येऽपि स्वात्मनो मुख्या क्रमाद्गुरव ईरिता' इति वचनात् । अनन्तस्य श्रीहरेः सखायः अनन्तसखाः तैः । 'राजाहःसखिभ्यष्टजि'ति टच् । सकलैः सारूप्यादिचतुर्विधमोक्षिभिः सततं अलं सम्यक्, मतिपदं बुद्धेः विषयभूतं सुखं स्वरूपसुखं अनुभूयते ॥ २४ ॥

मन्दोपकारिणी – अनुभूयत इति ॥ अनन्तसखैः अनन्तस्य विष्णोः सखायः अनन्तसखाः तैः । 'राजाहः सखिभ्यः टच्' । सकलैः सालोक्यसामीप्यसारूप्यसायुज्य लक्षणचतुर्विधमोक्षवद्भिः पुरुषैः सततं निरन्तरं अलम्मतिपदं अलंमतिः अलंबुद्धिः तस्याः

पदं विषयीभूतं सुखं अनुभूयते । 'अनुपूर्वकभूधातोः कर्मणि लट् आत्मनेपदम्' । किंभूतैः तारतम्यसहितैरपि सुखादिविषये तारतम्येन नीचोच्चभावेन युक्तैरपि परस्परं अन्योन्यं उरुप्रणयैः उरुः उत्कृष्टः प्रणयः स्नेहः येषां ते तथोक्ताः तैः मत्सरवर्जितैरिति भावः । स्वगुरुप्रवणैः स्वेषां गुरवः उत्तमाः स्वगुरवः स्वगुरुषु प्रवणैः नम्रैः भक्तिमद्भिः इत्यर्थः । 'अन्येऽपि स्वात्मनो मुख्याः क्रमाद्गुरव ईरिताः' इत्युक्तेः ॥ २४ ॥

अतिसुन्दराः सुरभयः पुरुषा हरिचन्दनेन नवचन्द्ररुचा ।
चलचारुचामरधरानुचरा विचरन्ति नित्यतरुणा इह ते ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ अतिसुन्दरा अतिसुरूपिणः, नवो नूतनः पूर्वपक्षोदित इत्यर्थः । यश्चन्द्रः तस्य रुगिव रुक् कान्तिः यस्य तेन हरिचन्दनेन अङ्गलेपभूतश्रीचन्दनेन सुरभयः सुगन्धिनः । चलानि यानि चारुचामराणि मनोहरचामराणि धारयन्तीति चलचारुचामरधराः तादृशा अनुचरा भृत्या येषां तादृशाः । नित्यतरुणा नित्ययुवानः । जरावर्जिता इत्यर्थः । ते उक्तलक्षणाः पुरुषा मुक्तपुरुषा इह उक्तलक्षणे भगवल्लोके विचरन्ति ॥ २५ ॥

मन्दोपकारिणी – अतीति ॥ ते पूर्वोक्तलक्षणाः पुरुषाः इह उक्तलक्षणे भगवल्लोके विचरन्ति इतस्ततः सञ्चरन्ति । कथंभूताः अतिसुन्दराः अत्यन्तसुरूपिणः नवचन्द्ररुचा नवः नूतनः उदित इति यावत्, स चासौ चन्द्रः नवचन्द्रः नवचन्द्रस्य रुगिव कान्तिरिव रुक् यस्य तत् नवचन्द्ररुक् तेन रक्तवर्णेन इत्यर्थः । हरिचन्दनेन हरिचन्दनाख्येन अङ्गरागेण सुरभयः सुगन्धिनः परिमलोपेतसुगन्धलेपनेन सुगन्धवन्तः इति भावः । चलचारुचामरचरानुचराः चारूणि मनोहराणि च तानि चामराणि च, चलानि च तानि चारुचामराणि च चमरीमृगलांगूलश्वेतकेशात्मकवस्तूनि चामरशब्दवाच्यानि इति ज्ञेयम् । धरन्तीति धराः चलचारुचामराणां धराः एतादृशाः अनुचराः दासाः येषां ते तथोक्ताः । अनुचरैः चामरैः वीज्यमाना इति भावः । नित्यतरुणाः नित्यं युवान एव सर्वथा जरादिवर्जिता इति भावः । 'वयस्यस्तरुणो युवा' इत्यमरः ॥ २५ ॥

सविलासलास्यपरितुष्टदृशो मृदुगीतवाद्यमुदितश्रवणाः ।
अनुरञ्जयन्ति नवकञ्जदृशो रमणा अमी स्वरमणीस्तरुणीः॥ २६ ॥

पदार्थदीपिकोद्बोधिका – सविलासेति ॥ विलासेन सहितं सविलासं यल्लास्यं नृत्त्यं तेन परितुष्टा दृशो लोचनानि येषां तादृशाः, सविलासलास्यदर्शनेन परितुष्टदृश इत्यर्थः । मृदुगीतं मनोहरगानं तच्च वाद्यं च ताभ्यां मुदितानि श्रवणानि श्रोत्रेन्द्रियाणि येषां तादृशाः । मृदुगीतवाद्यश्रवणेन मुदितश्रवणेन्द्रिया इत्यर्थः । अमी वैकुण्ठस्था रमणा भर्तारो नवकञ्जं नूतनकमलं तद्वत् दृशो लोचनानि यासां तादृशीः तरुणीः तरुणवयसि स्थिता स्वरमणीः स्वभार्या अनुरञ्जयन्ति । तदिच्छानुसारप्रवृत्त्या स्वेषु अनुरागयुक्ताः कुर्वन्ति ॥ २६ ॥

मन्दोपकारिणी – सविलासेति ॥ सविलासलास्यपरितुष्टदृशः विलासः नर्तनसमये क्रियमाणः हस्ताद्यङ्गविक्षेपः तेन सहितं सविलासं तच्च तत् लास्यं नर्तनं च 'लास्यं नृत्यं च नर्तनं' इत्यमरः, सविलासलास्येन परितुष्टाः दृशः अक्षीणि येषां ते तथोक्ताः । स्वस्वस्त्रीणां विलाससहितनर्तनदर्शनेन हर्षितनयनाः, मृदुगीतवाद्यमुदितश्रवणाः मृदूनि कर्णयोः अकठोराणि गीतानि गानानि वाद्यानि मुरजादिवादित्राणि । गीतानि च वाद्यानि च गीतवाद्यानि मृदूनि च तानि गीतवाद्यानि च तैः । मुदितानि संतुष्टानि श्रवणानि श्रोत्रेन्द्रियाणि येषां ते तथोक्ताः । अकठोरगायनवाद्यध्वनिश्रवणेन श्रोत्रेन्द्रियसुखवन्तः इत्यर्थः । 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः । अमी रमणाः पतयः नवकञ्जदृशः नवं नूतनं विकसितं च तत् कञ्जं कमलं च नवकञ्जवत् दृशः लोचनानि यासां ताः तथोक्ताः । तरुणीः तरुणवयसि स्थिताः स्वरमणीः स्वेषां भार्याः अनुरञ्जयन्ति तदिच्छानुसारेण प्रवृत्त्या स्वस्मिन् अनुरागयुक्ताः कुर्वन्ति । 'अनुपूर्वकात् रञ्ज रागे' इत्यतो लट् परस्मैपदम् ॥ २६ ॥

परिणायकानुपवनाभिमुखाननु निःसरन्ति हरिणीनयनाः ।
विमलाद्विमानवलयाच्छनकैः शशिमण्डलादिव रुचो रुचिराः॥ २७ ॥

पदार्थदीपिकोद्बोधिका – परिणायकानिति ॥ हरिणीनयनना: एणीनयनवत् नयनानि यासां तादृश्यः, हरिणीनयनवत् आयतलोचना इत्यर्थः । नार्य उपवनस्याभिमुखान् गन्तुं

उद्यतान् परिणायकान् स्वपतीन् विमलात् निर्मलात् विमानवलयात् विमानमण्डलात् शनकैः शशिमण्डलात् चन्द्रमण्डलात् रुचिराः शोभमाना रुचय इव कान्तय इव अनु निस्सरन्ति अनुगच्छन्ति । उद्यत् शशिमण्डलात् यथा रुचो निर्गच्छन्ति एवं विमानमण्डलात् नार्यो निर्गच्छन्तीति भावः । शनकैः इति तासां गतिस्वभावकथनम् ॥ २७ ॥

मन्दोपकारिणी – पूर्वश्लोके नायकान् अनुवर्ण्य इदानीं नायिकाः वर्णयति ॥ **परिणायकानिति** ॥ हरिणीनयनाः हरिणीनां नयनवत् नयने यासां ताः तथोक्ताः । नार्यः हरिणीनयनवत् विस्तृतलोचनाः इत्यर्थः । 'मृगे कुरङ्गवातायुहरिणाजिनयोनयः' इत्यमरः । उपवनाभिमुखान् वनक्रीडां कर्तुं उपवनं उद्यानवनं गन्तुं अभिमुखान् उद्यतान् परिणायकान् स्वपतीन् अनु अनुसृत्य विमलात् निर्मलात् प्रकाशमानात् विमानवलयात् विमानानां व्योमयानानां वलयात् मण्डलात् शनकैः निःसरन्ति निर्गच्छन्ति । शनकैः इति स्त्रीणां गतिस्वभावोक्तिः । का इव शशिमण्डलात् शशिनः चन्द्रस्य मण्डलात् रुचिराः शोभमानाः रुचय इव कान्तय इव उद्यत् चन्द्रमण्डलात् यथा कान्तयः निर्गच्छन्ति एवं विमानमण्डलात् नार्यः निर्गच्छन्तीति भावः । विमानानां चन्द्रसाम्योक्त्या स्त्रीणां रुचिसाम्योक्त्या उभयोरपि अतिकान्तिमत्वं उक्तं भवति । 'निर्पूर्वात् सृ गतौ' इत्यतो लट् परस्मैपदम् ॥ २७ ॥

अरुणाश्मवर्णतनवस्तनवः शुभहारसन्निभरुचोऽत्र पराः ।
हरिनीलनीलरुचयोऽप्यपराः प्रकटीभवन्ति विविधाभरणाः ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – अरुणेति ॥ काश्चन अरुणाश्मानः पद्मरागमणेः वर्ण इव वर्णो यासां तादृश्यः तनवो देहा यासां तादृश्यः । अपरा अन्याः, शुभहारस्य शोभनहारस्य सन्निभा समाना रुक् कान्तिः यासां तादृश्यः शुभ्रकान्तय इत्यर्थः । अपरा अन्याः हरिनीलवत् इन्द्रनीलवत् नीलरुचिः नीलकान्तिः यासां तादृश्यः । विविधानि आभरणानि यासां तादृश्यः तनवो नार्योऽत्र अस्मिंल्लोके प्रकटीभवन्ति विमानान्निर्गमनानन्तरं प्रकाशन्ते ॥ २८ ॥

मन्दोपकारिणी – अरुणेति ॥ तनवः नार्यः अत्र वैकुण्ठपुरे प्रकटीभवन्ति विमानवलयात् निर्गमानन्तरं प्रकाशन्ते । कथंभूताः काश्चन अरुणाश्मवर्णतनवः अरुणाः रक्तवर्णाश्च ते अश्मानः पाषाणाश्च अरुणाश्मानः पद्मरागमणयः इत्यर्थः । अरुणाश्मवत्

वर्णः कान्तिः यासां ताः अरुणाश्मवर्णाः तनवः देहाः यासां ताः तथोक्ताः । पराः अन्याः शुभहारसन्निभरुचः शुभाः निर्मलाश्च ते हाराश्च मुक्तामालाः इत्यर्थः । शुभहारैः संन्निभा सदृशा रुक् कान्तिः यासां ताः तथोक्ताः । अपराः काश्चन हरिनीलनीलरुचयः हरिनीलवत् इन्द्रनीलमणिवत् नीला रुचिः कान्तिः यासां ताः तथोक्ताः । सर्वा अपि ताः स्त्रियः विविधाभरणाः विविधानि अनेकप्रकाराणि आभरणानि अलङ्काराः यासां ताः तथोक्ताः ॥ २८ ॥

सुचिरद्युतीर्दधति सूक्ष्मतरं स्वयमम्बरं च खलु बिभ्रति याः ।
शुकनिस्वना ध्रुवमिमा अपराः सुपयोधरा जलधरावलयः ॥ २९ ॥

भावप्रकाशिका – अन्या असुचिरद्युतीर्विद्युतो दधति । अम्बरं च स्वयं न दधति किन्त्वम्बरेण धार्यन्ते दुन्दुभिस्वनाश्चेति । सुपयोधराः सुकुचाः सुजलधराश्च । 'व्यष्टवर्षा तु या योषिच्छ्यामा जलधरावलि'रिति । जलधरावलित्वं चात्र गुणतो न कालतः ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – सुचिरेति ॥ याः नार्यः सुचिराः चिरकालस्थायिन्यो द्युतयः कान्तयः ताः दधति वहन्ति । मेघावलयश्च सुचिरद्युतीः दधति । सूक्ष्माम्बरं सूक्ष्मवस्त्रं बिभ्रति । मेघावलयस्त्वम्बरेण धार्यन्ते । याः शुकस्य निस्वन इव निस्वनो यासां तादृश्यः । शुकध्वनिवत्कोमलध्वनय इत्यर्थः । मेघावलयो गम्भीरस्वनाः । शोभनौ पयोधरौ स्तनौ यासां ताः सुपयोधरा इमा जलधरावलयः, व्यष्टवर्षा नार्यः । 'व्यष्टवर्षा तु या योषिच्छ्यामा जलधरावलिरि'त्यभिधानम् । अपराः जलधरावलिनामभाग्भ्योमेघजालेभ्योऽन्याः । व्यष्टवर्षा नार्यश्च जलधरावलय इत्युच्यन्ते । मेघावलयश्च जलधरावलय इत्युच्यन्ते । एवं नामसाम्येऽप्युक्तरीत्या विरुद्धधर्मवत्वादिमा नार्यो मेघजलेभ्यो विलक्षणाः ध्रुवं नात्र संशयोऽस्ति ॥ २९ ॥

मन्दोपकारिणी – सुचिरेति ॥ याः नार्यः सुचिरद्युतीः सुचिराः अतिस्थायिन्यश्च ताः द्युतयः कान्तयश्च सुचिरद्युतयः ताः दधति वहन्ति । मेघावलयस्तु क्षणिकप्रभाः विद्युतः दधति । 'डु धाञ्' धारणपोषणयोः इत्यतो लट् परस्मैपदं दधाति धत्तः दधति । याश्च नार्यः स्वयमेव सूक्ष्मतरं अतिशयेन सूक्ष्मं सूक्ष्मतरं अम्बरं वस्त्रं बिभ्रति खलु धरन्ति खलु । 'डु भृञ् धारणपोषणयोः इत्यतः लट् परस्मैपदं बिभर्ति बिभृतः बिभ्रति' । मेघावलयस्तु

अम्बरशब्दवाच्येनैव आकाशेन धार्यन्ते हि 'अम्बरं व्योम्नि वाससि' इत्यमरः । याश्च इमाः शुकनिस्वनाः शुकस्य निस्वनवत् निस्वनाः श्राव्यस्वराः यासां ताः तथोक्ताः । मेघावलयस्तु कठेरध्वनयः 'नादनिस्वाननिस्वनाः' इत्यमरः । याश्च सुपयोधराः शोभमानौ पयोधरौ कुचौ यासां ताः सुपयोधराः 'वक्षोजौ च पयोधरौ' इत्यमरः । मेघावलयस्तु धरन्तीति धराः सुपयसां शोभनजलानां धराः धारकाः याः एतादृशाः ताः इमाः नार्यः अपराः प्रसिद्धजलधरावलिशब्दवाच्येभ्यः मेघसमूहेभ्यः विलक्षणाः । जलधरावलयः ध्रुवं निश्चयेन भवन्ति । अयं भावः 'द्व्यष्टवर्षातु या योषित् श्यामा जलधरावलिः' इत्यभिधानात् । षोडशवत्सराः नार्यः जलधरावलयः इत्युच्यन्ते । मेघसमूहा अपि जलधरावलयः इत्युच्यन्ते । जलधराणां मेघानां आवलयः इति निर्वचनात् ततश्च जलधरावलिशब्दवाच्यानां एतासां नारीणां मेघसमूहानां च पूर्वोक्तप्रकारेण विलक्षणत्वात् इमा नार्यः प्रसिद्धजलधरावलिभ्यः विलक्षणाः जलधरावलयो भवन्तीति ॥ २९ ॥

समतीतविद्रुमभुवां सुदृशां पदपल्लवाग्र्यनखरक्तरुचीः ।
परभागतः स्फटिककुट्टिमभूः प्रकटीकरोति न पुरा प्रकटाः ॥ ३० ॥

भावप्रकाशिका – परभागो गुणान्तरसम्बन्धाद्गुणोत्कर्षः यया श्वेतसिचये कौसुम्भतन्तुतत्या ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – समतीतेति ॥ स्फटिकेन कुट्टिमा अवनद्धा सा च सा भूश्च स्फटिककुट्टिमभूः, समतीता अतिक्रान्ता विद्रुमभुवो विद्रुमबद्धभूमयो याभिः तासाम् । सुदृशां शोभननयनानां नारीणां पुरा विद्रुमावनद्धस्थलातिक्रमात्पूर्वं न प्रकटा अस्पष्टाः, पदानि पादाः पल्लवा इव किसलया इव पदपल्लवाः तेषां अग्र्यनखा उत्तमनखाः तेषां रक्तरुचयो रक्तकान्तयः परभागतः वर्णान्तरसंयोगात् प्रकटीकरोति स्पष्टीकरोति । अयं भावः विद्रुमस्थलसञ्चारावसरे नखानां विद्रुमस्य च समानकान्तित्वात् नखकान्तिः विविच्य न ज्ञाता स्फटिकसञ्चारे नखकान्तिः अतिस्पष्टाऽभूदिति ॥ ३० ॥

मन्दोपकारिणी – समतीतेति ॥ स्फटिककुट्टिमभूः स्फटिकैः स्फटिकमणिभिः कुट्टिमा निबद्धा भूः भूमिश्च स्फटिकखचितभूमिः 'कुट्टिमोऽस्त्री निबद्धा भूः' इत्यमरः । समतीतविद्रुमभुवां समतीताः सम्यक् अतिक्रान्ताः विद्रुमाणां प्रवालानां भुवः

विद्रुमखचितभूमयः याभिः ताः तथोक्ताः तासां 'मुक्ताथ विद्रुमः पुंसि प्रवालं पुंनपुंसकं' इत्यमरः । सुदृशां शोभना दृक् दर्शनं यासां ताः तासां नारीणां पदपल्लवाग्रयनखरक्तरुचीः पदान्येव पल्लवाः किसलयानि 'पल्लवोऽस्त्री किसलयं' इत्यमरः, अग्र्याः श्रेष्ठाश्च ते नखाश्च अग्र्यनखाः पदपल्लवानां अग्र्यनखाः तेषां रक्ताश्च ताः रुचयः कान्तयश्च पदपल्लवाग्र्य-नखरक्तरुचयः ताः । परभागतः वर्णान्तरसंयोगात् प्रकटीकरोति व्यक्तीकरोति । कथंभूताः नखरुचीः पुरा विद्रुमस्थलातिक्रमात् पूर्वं अप्रकटाः अस्पष्टाः अनभिव्यक्ताः । अयं भावः वैकुण्ठे विद्रुमभूमयः सन्ति । तत्र नारीणां विद्रुमभूमिषु संचारकाले पादनखानां विद्रुमाणां च रक्तत्वेन समकान्तित्वात् नखकान्तिः विविच्य न ज्ञाता विद्रुमभूमिं परित्यज्य स्फटिकभूमिषु संचारकाले पुनः नखकान्तिः अतिस्पष्टाऽभूदिति ॥ ३० ॥

हरिणीदृशां सुवसनानि बृहत्सुनितम्बबिम्बरुचिरोरुरुचा ।
शबलद्युतीनि मदनस्य जगज्जयवैजयन्त्य इति निश्चिनुमः ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – हरिणीति ॥ बृहत् महद्यत् सुनितम्बबिम्बं सु शोभनं नितम्बस्य स्त्रीकट्याः पश्चाद्भागस्य बिम्बं मण्डलं तस्य रुचिरा मनोहरा या उरुरुक् उत्कृष्टकान्तिः तया शबला मिश्रा द्युतिः कान्तिः येषां तादृशानि । योषिन्नितम्बसम्बन्धात् नितरां शोभमानानीति भावः । हरिणीनां मृगीणां दृश इव दृशो दृष्टयो यासां तासां निवसनानि वस्त्राणि मदनस्य कामस्य जगज्जयः स्त्रीजगद्विजयः तस्य वैजयन्त्यो लक्षणभूताः पताका इति निश्चिनुमो निश्चयं कुर्मः । 'वैजयन्ती पताकायां जयन्त्यां केशवस्रजी' त्यभिधानम् ॥ ३१ ॥

मन्दोपकारिणी – हरिणीति ॥ हरिणीदृशां हरिणीनां मृगीणां दृश इव दृशो नयनानि यासां ताः तथा तासां हरिणीदृशां सुवसनानि वस्त्राणि 'वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकं' इत्यमरः । मदनस्य मन्मथस्य 'मदनो मन्मथो मारः' इत्यमरः । जगज्जयवैजयन्त्यः जगतः जये विजये वैजयन्त्यः लक्षणभूताः पताकाः इति निश्चिनुमः निश्चयं कुर्मः । 'निपूर्वात् चिञ् चयने इत्यतो लट् परस्मैपदं चिनोमि चिनुवः चिनुमः । 'वैजयन्ती पताकायां जयन्त्यां केशवस्रजि' इत्यभिधानम् । कथंभूतानि वसनानि बृहत्सुनितम्बबिम्बरुचिरोरुरुचा बृहतः स्थूलस्य शोभनस्य नितम्बयोः बिम्बस्य मण्डलस्य

'पश्चान्नितम्बः स्त्रीकट्याः' इत्यमरः रुचिरया शोभनया उर्व्या बहुलया रुचा कान्त्या । शबलद्युतीनि शबला मिश्रिता द्युतिः येषां तानि तथोक्तानि । योषिन्नितम्बसम्बन्धात् वस्त्राणि नितरां शोभमानानि इत्यर्थः । स्त्रीनितम्बसम्बद्धवस्त्रदर्शने सति सर्वे पुरुषाः कामेन जिताः भवन्तीति भावः ॥ ३१ ॥

करपल्लवैस्तरलितैर्ललितैरसकृत्क्वणत्कनककङ्कणकैः ।
नवरोमराजिवलिवल्गुमृदुप्रतनूदरैरतिमनाक्तरलैः ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – करेति ॥ 'तरुणा भवन्त्यथ निवृत्तमुखा' इत्यन्तं कलापकमेतत् । तत्रेत्थमन्वयः — अथ तासु विमानान्निर्गतासु नारीषु प्रगतासु गच्छन्तीषु सतीषु, रणितैः क्वणद्भिः रशनाः काञ्च्यो मणिनूपुराः मणिखचितमञ्जीराः तैः । 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः । 'मञ्जीरो नूपुरोऽस्त्रियामि'ति च । इमं विलासं स्वगमनविलासं अनुवीक्षितुं द्रष्टुं गदिता इवोक्ता इव तरुणा युवानो भर्तारः, निवृत्तानि मुखानि येषां तादृशाः भवन्ति पुरा ननु । 'यावत्पुरा निपातयोर्लडि'ति लट् । पुरस्ताद्गच्छन्तो युवान आवृत्य पश्चात् ददृशुः इति भावः ।

तरलितैः चलितैः ललितैः कोमलैः असकृत् निरन्तरं क्वणन्ति रणन्ति कनककङ्कणानि स्वर्णात्मककरभूषणानि येषां तैः । 'कङ्कणं करभूषणमि'त्यमरः । कराः पल्लवा इव तैरुपलक्षितासु । एवं सर्वत्र । 'इत्थंभूतलक्षणे' इति तृतीया । अतिमनाक् अत्यल्पं तरलैः चञ्चलैः पादचारेण गमनावसरे किञ्चिच्चञ्चलैरिति भावः । 'किञ्चिदीषन्मनागल्प' इत्यमरः । नवा नूतना या रोमराजयो रोमपङ्क्तयस्ताश्च वलयश्च ताभिः वल्गूनि भद्राणि मृदुप्रतनूदराणि तैः । नवरोमराजिवल्गुत्वं, मृदुत्वं, प्रतनुत्वञ्चोदरविशेषणानि । तेश्चोपलक्षितासु नारीषु गच्छन्तीषु निवृत्तमुखा भवन्ति पुरेत्यन्वयः ॥ ३२ ॥

मन्दोपकारिणी – करेति ॥ 'तरुणा भवन्त्यथनिवृत्तमुखाः' इत्यन्तं अन्त्यकुलकमेतत् । प्रथमं अन्वयप्रकारस्तु— अथ विमानादवरोहणानन्तरं तासु नारीषु प्रगतासु, पतिषु पुरतो गच्छत्सु सत्सु तत्पश्चात् गच्छतीषु सतीषु तरुणाः युवानः पतयः निवृत्तमुखाः निवृत्तानि पश्चाद्भागाभिमुखानि मुखानि आननानि येषां ते तथोक्ताः भवन्ति । पुरस्ताद्गच्छन्तो युवानः मुखं आवृत्य पश्चात् ददृशुः इति भावः । कथंभूता इव

तदागमनसमये रणितैः ध्वनिं कुर्वद्भिः रशनामणिनूपुरैः रशनाः कांच्यश्च मणिभिः रत्नैः खचिताः नूपुराः मञ्जीराश्च रशनामणिनूपुराः तैः । 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः, 'मञ्जीरो नूपुरोऽस्त्रियां' इति च । नूपुरो नाम पादभूषणं रशनानां क्षुद्रघण्टिकाघटितत्वेन रणितत्वं ज्ञेयम् । गदिता इव उदिता इव । किं कर्तुं, इमं तनुविलासं तनूनां शरीराणां विलासं गमनसमये कृतशृङ्गाररसं अनुवीक्षितुं द्रष्टुं पुरतो गच्छन्तः तरुणाः पश्चादागच्छन्तीनां स्त्रीणां गतिविलासं द्रष्टुं क्वणन्नूपुरादिशब्दैः आहूता इव आवृत्य पश्चात् ददृशुरिति भावः । कथं भूतासु स्त्रीषु, तरलितैः चलितैः ललितैः कोमलैः 'सुकुमारोऽङ्गविन्यासे मसृणे ललितं स्मृतं' इत्यभिधानम् । असकृत् निरन्तरं क्वणत्कनककङ्कणकैः कनकानां सुवर्णानां कङ्कणानि करभूषणानि कनककङ्कणानि क्वणन्ति रणन्ति कनककङ्कणानि येषां ते तथोक्ताः 'कङ्कणं करभूषणं' इत्यमरः । स्वार्थे कप्रत्ययः । एवंभूतैः करपल्लवैः पाणिकिसलयैः उपलक्षितासु पुनः कथंभूतासु नवरोमराजिवलिवल्गुमृदुप्रतनूदरैः नवानि नूतनानि सूक्ष्माणि कोमलानि इति यावत्, नवानि च तानि रोमाणि तनूरुहाणि च 'तनूरुहं रोम लोम' इत्यमरः नवरोम्णां राजिः पङ्क्तिः नवरोमराजिः 'राजिः स्यात् पङ्क्तिरेखयोः' इति विश्वः, नवरोमराजिश्च वलयश्च त्रिवलिनामकरेखाविशेषाश्च नवरोमराजिवलयः \नवरोमराजिवलिभिः वल्गूनि मनोहराणि नवरोमराजिवल्लिवल्गूनि 'वल्गु छागे मनोज्ञे च' इति विश्वः, नवरोमराजिवलिवल्गूनि च तानि मृदूनि कोमलानि च तानि प्रतनूनि अतिसूक्ष्माणि च तानि उदराणि च नवरोमराजिवलिवल्गुमृदुप्रतनूदराणि तैः उदरैः । नाभेः उपरि ऊर्ध्वरेखाकारसूक्ष्मरोमपङ्क्तिः रोमराजिः, वलयः तिस्रः, तत्रैव तिर्यक् रेखाविशेषः एवंभूतैः उदरैः उपलक्षितासु । कथंभूतैः उदरैः अतिमनाक् अत्यल्पं तरलैः पादचारेण गमनावसरे किञ्चित् चलैः इति भावः ॥३२॥

कुचकुम्भपूर्णतरकान्तिसुधारसशेषबिन्दुविसरच्छविभिः ।
वरहारराजिभिरुतानुपदं प्रतिलोडिताभिरशनैरुरसि ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – कुचकुम्भेति ॥ कुचाः कुम्भा इव तेषु पूर्णतर अतिपूर्णो यः कान्तिसुधारसः कान्त्याख्यसुधाजलं तस्य यः शेषः तस्य बिन्दवः तेषां विसरः प्रसारः तस्य छविरिव छविः कान्तिः यासां ताभिः कुचाख्यकुम्भान् कान्त्याख्यसुधामयजलेन पूरयित्वा पुनरप्यवशिष्टस्य कान्तिसुधाजलस्य बिन्दूनां प्रसरवत् प्रकाशमानाभिरिति भावः ।

पदे पदे अनुपदं प्रतिपदं उरसि अशनैः जवेन परिलोडिताभिः गतिवशात् चलिताभिः । वरहारा उत उत्तमहाराः तेषां राजयः समूहाः ताभिरुतोपलक्षितासु तास्वित्यादि पूर्ववदन्वयः ॥ ३३ ॥

मन्दोपकारिणी – कुचकुम्भेति ॥ पुनः कथंभूतासु अनुपदं उरसि वक्षसि 'उरो वत्सं च वक्षश्च' इत्यमरः । अशनैः जवेन प्रतिलोडिताभिः गतिवशात् चलिताभिः । वरहार-राजिभिः उत वराः हाराः मुक्तावल्यः तेषां राजिभिश्च उपलक्षितासु । कथंभूताभिः वरहारराजिभिः कुचकुम्भपूर्णतरकान्तिसुधारसशेषबिन्दुविसरच्छविभिः कुचाः स्तना एव कुम्भाः कलशाः तेषु पूर्णतराः अतिशयेन पूर्णाः कान्तय एव सुधारसाः अमृतजलानि कुचकुम्भपूर्णतराश्च ते कान्तिसुधारसाश्च तथा तेषां शेषः तस्य बिन्दूनां विसरः समूहः 'सन्दोहविसरव्रजाः' इत्यमरः, 'पीयूषं अमृतं सुधा' इत्यमरः, । यद्वा विसरः प्रसरः विसर्पणमिति यावत् तद्वत् छविः कान्तिः यासां ताः तथोक्ताः ताभिः 'भाश्छविद्युति-दीप्तयः' इत्यमरः । कुचाख्यघटेषु कान्त्याख्यसुधामयजलेन अत्यन्तपूरितेषु सत्सु पुनः अवशिष्टस्यापि तत्रैव निक्षिप्तस्य अवकाशाभावोन उद्रिच्य बहिः निर्गतस्य कान्तिसुधाजलस्य बिन्दूनां समूहवत् प्रकाशमानाभिरिति भावः ॥ ३३ ॥

अपि लीलया कुवलयोल्लसितैरपरैः करैः सहचरीनिहितैः ।
वदनैः शुचिस्मितकटाक्षरसैश्चलकुण्डलोल्लसितगण्डयुगैः ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – अपीति ॥ लीलया विनोदेन कुवलयैः उत्पलपुष्पैः उल्लसिताः शोभमानाः तैः करैः । 'स्यादुत्पलं कुवलयमि'त्यमरः । क्रीडार्थं गृहीतकुवलययुक्तदक्षिणकरैरित्यर्थः । सहचरीषु किङ्करीषु निहितैः निक्षिप्तैः अपरैः करैः वामकरैः च उपलक्षितासु । चलंति गतिवशात् चलन्ति यानि कुण्डलानि ताटङ्कानि तैः उल्लसितानि गण्डयुगानि कपोलयुगानि येषां तैः । शुचीनि स्मितानि कटाक्षरसाश्च येषां तानि शुचिस्मितकटाक्षरसानि तैः वदनैः उपलक्षितासु । शुचिस्मितानि कटाक्षरसाश्च तैः उपलक्षितास्विति वा । तास्वित्यादि पूर्ववदन्वयः ॥ ३४ ॥

मन्दोपकारिणी – अपीति ॥ पुनः कथंभूतासु लीलया क्रीडानिमित्तेन कुवलयोल्ल-सितैः क्रीडार्थं गृहीतैः कुवलयैः उत्पलैः 'स्यादुत्पलं कुवलयं' इत्यमरः । उल्लसितैः

शोभमानैः करैः दक्षिणहस्तैः 'बलिहस्तांशवः कराः' इत्यमरः । सहचरीनिहितैः सहचरीषु सखीषु निहितैः सखिस्कन्धेषु स्थापितैः । अपरैः दक्षिणकरेभ्योऽन्यैः करैः वामकरैरपि उपलक्षितासु । पुनः कथंभूतासु चलकुण्डलोल्लसितगण्डयुगैः चलानि गतिवशात् चञ्चलानि च तानि कुण्डलानि कर्णभूषणानि च गण्डानां कपोलानां युगानि युग्मानि गण्डयुगानि युगं युग्मे कृतादिषु' इत्यमरः । चलकुण्डलैः उल्लसितानि शोभितानि गण्डयुगानि येषां तानि तथोक्तानि तैः । शुचिस्मितकटाक्षरसैः शुचीनि निर्मलानि च तानि स्मितानि मन्दहासाश्च शुचिस्मितानि कटाक्षस्य अपाङ्गदर्शनस्य रसाः साराः कटाक्षरसाः 'अपाङ्गनेत्रयोरन्तः कटाक्षोऽपाङ्गदर्शने' इत्यमरः । शुचिस्मितानि च कटाक्षरसाश्च येषु तानि शुचिस्मितकटाक्षरसनानि तैः वदनैः मुखैः उपलक्षितासु ॥ ३४ ॥

प्रगतासु तासु रणितैरशनामणिनूपुरैरिव तदा गदिताः ।
अनुवीक्षितुं तनुविलासमिमं तरुणा भवन्त्यथ निवृत्तमुखाः॥ ३५ ॥

भावप्रकाशिका – करपल्लवादिभिः प्रगतासु इत्थंभूतलक्षणे तृतीया ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – प्रगतास्विति ॥ श्लोकोऽयं 'करपल्लवैरि'ति श्लोकव्याख्यानावसरे व्याख्यातः ॥ ३६ ॥

मन्दोपकारिणी – एतादृशासु नारीषु प्रगतासु सतीषु तरुणाः निवृत्तमुखा भवन्ति इति अन्वयः ॥ ३५ ॥

अनुपालिताः स्वदयितैर्दयिताः कथमप्युपेत्य कुचभारनताः ।
शनकैः पुनस्तदवलम्बबलात्किल ता विशन्ति परमोपवनम्॥ ३६ ॥

भावप्रकाशिका – किल अपरमार्थे ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – अन्विति ॥ स्वासां दयितास्तैः स्वभर्तृभिः अनुपालिताः प्रतीक्षिताः, कुचानां ये भाराः तैः नता नम्रा दयिता नार्यः कथमपि स्तनजघनभारात् चलितुं अशक्ताः सत्यः कथञ्चिदुपेत्य स्वभर्तृसमीपं प्राप्य पुनः पश्चात् तेषां अवलम्ब

आश्रय एव बलं तस्मात् शनकैः परमं उत्तमं यदुपवनं विशंति । किल इति अपरमार्थे । वस्तुतः श्रमादिदोषाभावेऽपि तत्र तत्प्रदर्शनं विडम्बनमात्रमेवेति भावः ॥ ३६ ॥

मन्दोपकारिणी – अन्विति ॥ स्वदयितैः स्वासां दयितैः भर्तृभिः अनुपालिताः कदानु इमा नार्यः आगमिष्यन्तीति प्रतीक्षिताः । कुचभारनताः कुचानां स्तनानां भारेण नताः प्रह्वीभूताः दयिताः नार्यः कथमपि कथंचित् महता प्रयासेनेति यावत्, उपेत्य पतिसामीप्यं प्राप्य पुनः पश्चात् तदवलम्बबलात् तेषां पतीनां अवलम्बः आश्रयः तस्य बलात् किल । शनकैः मन्दं ताः परमोपवनं परमं उत्तमं उपवनं उद्यानं विशन्ति प्रविशन्ति । स्तनभारनतत्वेन पतिभिस्सह शीघ्रं गन्तुं अशक्ताः पुरतो गच्छद्भिः स्वपतिभिः प्रतीक्षिता नार्यः पतिसामीप्यं प्राप्य तदनन्तरं पतिहस्तान् अवलम्ब्य शनैः शृङ्गारवनं प्रविशन्तीति भावः । किल इति अपरमार्थे । तत्र श्रमादिदोषाभावात् श्रमादिप्रदर्शनं तु लोकविडम्बनमिति ज्ञातव्यम् ॥ ३६ ॥

हसितप्रसूननिकरोरुभरप्रणमत्सुवर्णमणिसर्वतरून् ।
उपगूहयन्नमृतसिन्धुसखः पवनो न कस्य सुखमेधयति ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – हसितेति ॥ हसितानि विकसितानि यानि प्रसूनानि तेषां निकरस्य समूहस्य उरुभरेणोत्कृष्टभारेण प्रणमन्तो नम्रीभावं भजन्तो ये सुवर्णमणिसर्वतरवः सुवर्णमया मणिमयाश्च ये सर्वतरवः तान् उपगूहयन् आश्लिषन् । अनेन पवनस्य सौरभ्यमुक्तम् । अमृतमयौ च तौ सिन्धू समुद्रौ च तयोः सखामृतसिंधुसखः । 'राजाहः-सखिभ्यष्टजि'ति टच् अनेन शैत्यमुक्तं भवति । एवंविधः पवनः कस्य सुखं नैधयति? सर्वेषामपि सुखं एधयत्येव । तत्र सुधासमुद्रौ स्त इत्यत्र 'अरश्च वैण्यश्च सुधासमुद्रौ तत्रैव सर्वाभिमतप्रदौ द्वौ' । 'अरश्च च वैण्यश्चार्णवौ ब्रह्मलोक' इति प्रमाणम् ॥ ३७ ॥

मन्दोपकारिणी – हसितेति ॥ हसितप्रसूननिकरोरुभरप्रणमत्सुवर्णमणिसर्वतरून् प्रसूनानां पुष्पाणां निकराः समूहाः प्रसूननिकराः हसिताश्च ते प्रसूननिकराश्च हसित-प्रसूननिकराः उरुः अतिशयश्चासौ भरः भारश्च उरुभरः 'भरोऽतिशयभारयोः' इत्यमरः, हसितप्रसूननिकराणां उरुभरः तेन प्रणमन्तः नम्रीभावं भजन्तः सुवर्णं च मणयश्च सुवर्णमणयः सुवर्णमणीनां सर्वतरवः सुवर्णमणिमयवृक्षाः इत्यर्थः। हसितप्रसूननिकरोरु-भरप्रणमन्तश्च ते सुवर्णमणिसर्वतरवश्चेति तथोक्ताः तान् । उपगूहयन् आश्लिष्यन् पुष्पपरिमलं

दधान इति यावत् । अनेन पवनस्य सौरभं उक्तम् । अमृतसिन्धुसखः अमृतस्य सुधायाः सिन्धू समुद्रौ अमृतसिन्ध्वोः सखा अमृतसिन्धुसखः अमृतसिन्धूपरि संचरन्निति यावत् । अनेन पवनस्य शैत्यं उक्तं भवति । एवं सुरभिः शीतः पवनः मन्दवायुः कस्य प्राणिनः सुखं नैधयति न वर्धयति । सर्वेषामपि सुखं एधयत्येव । 'एध वृद्धौ' इत्यतो णिजन्तात् लट् परस्मैपदम्' । ब्रह्मलोके सुधासमुद्रौ वर्तेते 'अरश्च हि वैण्यश्चार्णवौ ब्रह्मलोके' इति श्रुतेः । अरश्च वैण्यश्च सुधासमुद्रौ तत्रैव सर्वाभिमतप्रदौ द्वौ इति स्मृतिप्रमाणाच्च ॥ ३७ ॥

उपचारनन्दनमिदं द्युवनं नियमेन नन्दयति यन्न जनम् ।
परमेव नन्दनमुपेन्द्रवनं सकलं सदा यदभिनन्दयति ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – श्लोकस्यास्य व्याख्या लिखितपुस्तके न दृश्यते ॥ ३८ ॥

मन्दोपकारिणी – उपचारेति ॥ इदं द्युवनं द्योः स्वर्गस्य वनं 'सुरलोको द्यो दिवौ द्वे' इत्यमरः । उपचारनन्दनं उपचारतः अमुख्यतः नन्दनं नन्दननामकं कुतः, यत् यस्मात् इदं द्युवनं जनं सर्वजनं नियमेन न नन्दयति न सुखयति । उपेन्द्रवनं उपेन्द्रस्य विष्णोः वनं वैकुण्ठगतं वनं परमेव मुख्यमेव नन्दनं नन्दननामकं कुतः, यत् यस्मात् इदं सकलं जनं सदा अभिनन्दयति । 'टु नदि समृद्धौ इत्यतो लट् परस्मैपदम्' । अयं श्लोकः प्रक्षिप्त इत्याहुः अत एव पूर्वटीकाकारैः न व्याख्यातः ॥ ३८ ॥

वरपारिभद्रकसुकल्पतरुव्रजपारिजातहरिचन्दनवत् ।
सहितं समादिपदताननगैः परिभूषयन्ति तदहो ऋतवः ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – वरेति ॥ ऋतवो वरा उत्तमा पारिभद्रकाः 'शक्रपादपः पारिभद्रकः' इत्यमरः ते च सुकल्पतरवः शोभनकल्पवृक्षाः तेषां ये व्रजाः समूहाः ते च पारिजाताश्च हरिचन्दनाश्च तेऽस्मिन् सन्तीति तादृशम् । पुनश्च 'समि'ति पदमादिपदं येषां तादृशा तानगा तानवृक्षाश्च तैः । सन्तानाख्यैः वृक्षैः इति यावत् । सहितं तद्वनं परिभूषयन्ति । अहो आश्चर्यम् । भूष अलङ्कार इति धातुः ॥ ३९ ॥

मन्दोपकारिणी – वरेति ॥ वरपारिभद्रकसुकल्पतरुव्रजपारिजातहरिचन्दनवत् वराः उत्तमाश्च ते पारिभद्रकाः तन्नामकवृक्षाश्च वरपारिभद्रकाः 'शक्रपादपः पारिभद्रकः'

इत्यमरः, पारिभद्रकः कश्चन देवतरुः ज्ञेयः, शोभनाश्च ते कल्पतरवः कल्पवृक्षाश्च तथोक्ताः, वरपारिभद्रकाश्च सुकल्पतरवश्च तेषां व्रजः समूहः वरपारिभद्रकसुकल्पतरुव्रजश्च पारिजाताः पारिजाताख्यवृक्षाश्च हरिचन्दनाः हरिचन्दनाख्यवृक्षाश्च तथोक्ताः, एते अस्मिन् सन्तीति वरपारिभद्रकसुकल्पकतरुव्रजपारिजातहरिचन्दनवत् । समादिपदताननगैः समिति आदिपदं प्रथमपदं येषां ते समादिपदाः समादिपदाश्च ते तानाश्च समादिपदताना: सन्तानाः इत्यर्थः सन्तानाख्याश्च ते नगाः वृक्षाश्च तथोक्ताः तैः । 'शैलवृक्षौ नगावगौ' इत्यमरः । सहितं एते पञ्चापि देववृक्षाः । तदुक्तं अमरकोशे 'पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्' । अमरकोशे मन्दारशब्देन पारिभद्रो ग्राह्यः, 'पारिभद्रो निम्बतरुर्मन्दारः पारिजातकः' इत्यमरकोशोक्तेः । मन्दारस्तु सुरद्रुमे पारिभद्रेऽर्कपर्णे च इति विश्वोक्तेश्च । एवं वृक्षसमूहोपेतं तत् वनं ऋतवः वसन्तादयः षट् ऋतवः परिभूषयन्ति अलं कुर्वन्ति । अहो वैकुण्ठवनं सर्वर्तुष्वपि नियमेन स्वस्वकालोचितफलपुष्पादिभिः अलंकृतमेवेति भावः । 'परिपूर्वात् भूष अलङ्करणे इत्यतः लट् परस्मैपदम्' ॥ ३९ ॥

स्मितमाधवीकुसुमरम्यतरौ नवचम्पकादिकुसुमोल्लसितौ ।
मधुमाधवौ मधुपगीर्मधुरौ मधुजित्प्रियान्प्रमदमानयतः ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – स्मितेति ॥ स्मितानि विकसितानि यानि माधवीकुसुमानि तै रम्यतरौ मनोहरौ । चम्पकाः चम्पकवृक्षा आदयो येषां तेषां कुसुमानि, नवानि यानि चम्पकादिकुसुमानि तैः उल्लसितौ शोभितौ । अत एव मधुपगीः मधू भ्रमरस्वरमनोहरौ मधुमाधवौ चैत्रवैशाखमासौ । 'स्याच्चैत्रे चैत्रिको मधुः वैशाखे माधवो राध' इत्यमरः । मधुं जितवानिति मधुजित् मधुसूदनः तस्य प्रियान् भक्तान् प्रमदं सुखमानयतः प्रापयतः ॥४०॥

मन्दोपकारिणी – भोगं क्रमेण प्रपञ्चयति ॥ **स्मितेत्यादिना** ॥ मधुमाधवौ मधुः चैत्रः माधवः वैशाखः मधुश्च माधवश्च मधुमाधवौ 'स्याच्चैत्रे चैत्रिको मधुः वैशाखे माधवो राधः' इत्यमरः । मासद्वयं वसन्तर्तुः मधुश्च माधवश्च वसन्तर्तुः इति श्रुतेः । मधुजित्प्रियान् मधुनामकं दैत्यं जयतीति मधुजित् मधुसूदनः तस्य प्रियान् भक्तान् प्रमदं सुखं 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः । आनयतः 'णीञ् प्रापणे' इत्यस्मात् लट् परस्मैपदं आनयति

आनयतः आनयन्ति' । 'चैत्रवसन्तमधुद्रुमदैत्यविशेषेषु पुंसि मधुशब्दः' इति रत्नमाला । कथंभूतौ मधुमाधवौ स्मितमाधवीकुसुमरम्यतरौ माधवीनां माधवीवृक्षाणां कुसुमानि पुष्पाणि स्मितानि विकसितानि च तानि माधवीकुसुमानि च तैः रम्यतरौ अतिशयेन रम्यौ अतिमनोहरौ इत्यर्थः । पुनः कथंभूतौ नवचम्पकादिकुसुमोल्लसितौ चम्पकं चम्पकपुष्पं आदिः येषां तानि चम्पकादीनि । चम्पकादीनि च तानि कुसुमानि पुष्पाणि च । नवानि च तानि चम्पकादिकुसुमानि च तैः उल्लसितौ शोभमानौ अत एव मधुपगीर्मधुरौ मधुपानां भ्रमराणां गीर्भिः स्वरैः मधुरौ मनोहरौ 'मधुरं रसवत्स्वादुप्रियेषु' इति विश्वः ॥ ४० ॥

नवमल्लिकास्रजमभीष्टतमः शुचिसम्भवां प्रणयिनीशिरसि ।
कलयन् स्वयं न कुशलेति किल प्रतिघट्टयत्युरुकुचावुरसा ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – नवमल्लिकेति ॥ अभीष्टतमः पतिः । शुचौ ज्येष्ठमासे सम्भवः उत्पत्तिः यस्याः ताम् । 'ज्येष्ठे शुक्लः शुचिस्त्वयमि'त्यमरः । नवा नूतना या मल्लिकास्रक् मल्लिकामाला ताम् । न कुशलेति, त्वं शिरसि सम्यक् मालां बद्धुं न जानासीति उक्त्वा किल स्वयं प्रणयिनीशिरसि भार्याशिरसि कलयन् अभिमुखं स्थित्वा बध्नन् सन् । उरसा निजवक्षसा । 'उरो वत्सं च वक्षश्चे'त्यमरः । उरुकुचौ तस्या उरुस्तनौ प्रतिघट्टयति दृढं ताडयति । घट्ट चलने इति धातुः । अयं भावः । नवमल्लिकामालां कबर्यां बद्धुं उद्यतां रमणीं प्रेक्ष्यमाणः प्रियः त्वं न जानासि इत्युक्त्वा स्रजं आदाय तस्या अभिमुखं स्थित्वा स्वयं तत्कबर्यां बाहुभ्यां अबध्नात् । तद्व्याजेन उरुकुचौ प्रतिघट्टयतीति ॥ ४१ ॥

मन्दोपकारिणी – नवेति ॥ अभीष्टतमः अतिशयेन अभीष्टः अभीष्टतमः पतिः । शुचिसम्भवां शुचौ ग्रीष्मर्तौ ज्येष्ठाषाढमासयोः इति यावत्, सम्भवां जातां 'शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते ग्रीष्मे हुतवहेऽपि स्यात्' इति विश्वः । नवमल्लिकास्रजं नवा नूतना च सा मल्लिकानां पुष्पाणां स्रक् माला च नवमल्लिकास्रक् ताम् । न कुशलेति किल ''हे रमणि त्वं शिरसि मालां सम्यक् बद्धुं न जानासीति'' स्वप्रणयिनीं प्रत्युक्त्वा किल । प्रणयिनीशिरसि प्रणयिन्याः प्रियायाः शिरसि कबर्यां इति यावत् । कलयन् बध्नन् उरसा स्ववक्षसा 'उरस्तु वक्षसि श्रेष्ठः' इति रत्नमाला । उरुकुचौ उरू स्थूलौ च तौ

कुचौ। प्रतिघट्टयति दृढं ताडयति 'घट्ट ताडने इत्यतो लट् परस्मैपदम्' । अयं भावः मल्लिकाकुसुममालां कबर्यां बद्धुं उद्यतां रमणीं प्रेक्ष्य रमणः ''हे रमणि त्वं बद्धुं न वेत्सि'' इति वदन् मालां आदाय तस्याः अभिमुखं स्थित्वा स्वतः कबर्यां स्वहस्ताभ्यां बध्नन् बन्धनव्याजेन स्ववक्षसा तस्याः स्थूलकुचौ आश्लिषतीति ॥ ४१ ॥

मधुरस्वरास्ततपतत्रततिप्रकटान्तपंक्तिधृतनेत्ररुचः।
शिखिनोऽनुयान्ति हि सहस्रदृशं जलदर्तुलक्ष्मनिजनृत्तमहे ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – मधुरेति ॥ मधुरो मनोहरः स्वरः केकाध्वनिर्येषां तादृशाः । तता विस्तृता या पतत्रततयो बर्हसमूहाः तासां प्रकटाः स्पष्टा अन्ता अग्रभागा यासां ताः प्रकटान्ताः तादृश्यो याः पङ्क्तय आवलयः तासु धृताः नेत्ररुचयो नेत्रकान्तयो यैः तादृशा शिखिनो मयूराः । 'केकी शिखी शिखण्डी'ति हलः । जलं ददातीति जलदः सचासौ ऋतुश्च जलदर्तुः वर्षर्तुः तस्य लक्ष्म लक्षणभूतं यत् निजनृत्तं स्वकीयनर्तनं तदेव मह उत्सवः तस्मिन् । सहस्रं दृशो दृष्टयो यस्य तं इन्द्रं अनुयान्ति हि अनुकुर्वन्ति हि । वर्षाकाले मेघध्वनिं श्रुत्वा मयूरा नृत्यन्तीति प्रसिद्धम् । नृत्ते बर्हाणां विस्तृतत्वात् तदग्रे नयनसदृशानि बहूनि वर्तुलानि प्रकटीभवन्ति । तैः सहस्रदृशं इन्द्रं अनुयान्ति इति भावः ॥ ४२ ॥

मन्दोपकारिणी – मधुरेति ॥ मधुरस्वराः मधुरः श्रोत्रेन्द्रियप्रियः स्वरः ध्वनिः येषां ते मधुरस्वराः । शिखिनः मयूराः 'शिखावलः शिखी केकी' इत्यमरः । जलदर्तुलक्ष्म-निजनृत्तमहे जलं ददातीति जलदः स चासौ ऋतुश्च जलदर्तोः वर्षर्तोः लक्ष्म लक्षणं चिह्नं 'चिह्नं लक्ष्म च लक्षणं' इत्यमरः, निजं च तत् नृत्तं नर्तनं च जलदर्तुलक्ष्म च तत् निजनृत्तं च तदात्मकश्चासौ महः उत्सवश्च जलदर्तुलक्ष्मनिजनृत्तमहः तस्मिन् 'मह उद्धव उत्सवः' इत्यमरः । सहस्रदृशं सहस्रं दृशः चक्षूंषि यस्य स तथोक्तः तम् । सहस्राक्षं इन्द्रं अनुयान्ति हि अनुकुर्वन्ति हि । कथंभूतास्सन्तः, ततपतत्रततिप्रकटान्तपङ्क्तिधृतनेत्ररुचः ततानि विस्तृतानि छत्रायितानि इति यावत्, पतत्राणि पक्षाः बर्हाणि 'गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहं' इत्यमरः, ततानि च तानि पतत्राणि च तेषां ततयः समूहाः तासु प्रकटाः प्रकटं दृश्यमानाः, अन्तानां बर्हाग्रे विद्यमानानां वर्तुलाकाराणां पङ्क्तयः आवलयः अन्तपङ्क्तयः ततपतत्रततिप्रकटाश्च ता अन्तपङ्क्तयश्च तासु धृता नेत्राणां रुक् कान्तिः यैः ते

तथोक्तास्सन्तः । अयं भावः वर्षर्तौ मेघध्वनिं श्रुत्वा मयूराः मधुरस्वरं कुर्वन्तः सन्तः नृत्यन्तीति सिद्धं मयूरनर्तनं वर्षर्तोः लक्षणम् । नर्तनसमये च बर्हाणि आविष्कुर्वन्ति । तदग्रेषु नयनसदृशानि वर्तुलानि प्रकटीभवन्ति । तैश्च सहस्रनेत्र इव प्रतीयन्ते इति ॥ ४२ ॥

शरदोल्लसत्कुवलयेक्षणया विकचारविन्दरुचिराननया ।
प्रियया च शोभनशुकस्वनया रमते जनो मुखरहंसकया ॥ ४३ ॥

भावप्रकाशिका – कुवलयवदीक्षणमरविन्दवद्रुचिराननम् । शुकवच्छोभनस्वरः । हंसकं चरणाभरणं प्रियायाः । शरदस्तु कुवलयमेव ईक्षणमरविन्दमेव रुचिराननं शोभनशुकस्वर एव स्वरः मुखराः श्वेतच्छदाः ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – शरदेति ॥ जनो मुक्तजनः । उल्लसत् कुवलयं शोभमानोत्पलमेव ईक्षणं चक्षुः यस्याः तया । विकचानि विकसितानि यानि अरविन्दानि पद्मानि तान्येव रुचिराननं मनोहरमुखं यस्याः तया । शोभना ये शुकाः तेषां स्वन एव स्वनो ध्वनिः यस्याः तया । शोभनः शुकस्वनो यस्याः तयेति वा । मुखराः कूजन्तो हंसका हंसा यस्यः तया । स्वार्थे कः । शरदा शरदृतुना । उल्लसत्कुवलयेक्षणया, शोभनोत्पलसदृशेक्षणया, विकचारविन्दरुचिराननया विकसितारविन्दवद्रुचिराननया, शोभनशुकस्वनया शोभनशुकस्वनवत्स्वनयुक्तया, मुखरहंसकया कणन् पादकटकया । 'हंसकः पादकटक' इत्यमरः । प्रियया भार्यया च रमते ॥ ४३ ॥

मन्दोपकारिणी – शरदेति ॥ जनः मुक्तजनः । शरदा शरदर्तुना प्रियया स्वरमण्या च रमते क्रीडति । 'रमु क्रीडायां इत्यतो लट् आत्मनेपदं रमते रमेते रमन्ते' । कथंभूतया शरदा, उल्लसत्कुवलयेक्षणया उल्लसन्ति विकसितानि च तानि कुवलयानि उत्पलानि च तान्येव ईक्षणानि चक्षूंषि यस्याः सा तथोक्ता तया 'स्यादुत्पलं कुवलयं' इत्यमरः । विकचारविन्दरुचिराननया विकचानि च तानि अरविन्दानि पद्मानि च तान्येव रुचिरं मनोहरं आननं मुखं यस्याः सा तथोक्ता तया । शोभनशुकस्वनया शोभनः श्राव्यः शुकानां कीराणां शुकपक्षिणां स्वन एव स्वनो यस्याः सा तथोक्ता तया 'कीरशुकौ समौ' इत्यमरः । मुखरहंसकया मुखराः कूजन्तः हंसाः हंसपक्षिणः यस्यां सा तथोक्ता तया । स्वार्थे कप्रत्ययः । 'हंसास्तु स्वेतगरुतः' इत्यमरः । कथंभूतया प्रियया च

उल्लसत्कुवलयेक्षणया उल्लसत् कुवलयवत् ईक्षणं यस्याः सा तया विकचारविन्दरुचिराननया विकचारविन्दवत् रुचिरं आननं यस्याः सा तया । शोभनशुकस्वनया शुकस्य स्वनवत् स्वनो यस्याः सा तया । मुखरहंसकया मुखरः क्वणन् हंसकः पादकटकः यस्याः सा तया 'हंसकः पादकटकः' इत्यमरः ॥ ४३ ॥

अभिनन्दयन् हिमऋतुं सुसखा स्फटिकाचलच्छलहिमाधिकृतम् ।
फलिनीकुलं कुसुमयञ्छिशिरो हसतीव फुल्लनवकुन्दरुचा ॥ ४४ ॥

भावप्रकाशिका – हिमऋतुः 'ऋत्यकः' इति प्रकृतिभावः । सुसखा 'राजाहः सखिभ्यष्टजि'ति टचो 'न पूजनादि'त्यपवादः ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – अभीति ॥ स्फटिकात्मकश्चासौ अचलः पर्वतश्च स्फटिकाचलः स इति छलं, व्याजः, तच्च तत् हिमश्च तेन अधिकृतं व्याप्तम् । स्फटिक-पर्वतवत् प्रतीयमानहिमेन व्याप्तं इत्यर्थः । हिमऋतुं हेमन्तऋतुम् । 'ऋत्यक' इति प्रकृतिभावान्न गुणः । अभिनन्दयन् सुसखा हिमर्तोः शोभनसखा । 'न पूजनादि'ति निषेधान्न टच् । फलिनीनां कुलं समूहम् । फलिनी 'गजगे'ति प्रसिद्धः कश्चन गुल्मविशेषः । 'प्रियंगु फलिनी श्यामे'ति हलः । कुसुमयन् पुष्पितं कुर्वन् शिशिरः शिशिरऋतुः । फुल्लानि विकसितानि नवकुन्दानि नूतनकुन्दकुसुमानि तेषां रुक् कान्तिः तया हसतीव अस्ति । कुन्दकुसुमानां धवलत्वेन हासोऽपि धवल इति कविसमयत्वात् धवलकुन्दकुसुमविकासं दृष्ट्वा हास इत्युत्प्रेक्षेति भावः । अनेन श्लोकेन ऋतुद्वयं वर्णितं भवति ॥ ४४ ॥

मन्दोपकारिणी – अभिनन्दयन्निति ॥ फलिनीकुलं फलिनी नाम कश्चिद्गुल्मविशेषः फलिन्याः कुलं समूहम् । कुसुमयन् पुष्पितं कुर्वन् शिशिरः शिशिरऋतुः । फुल्लनवकुन्दरुचा फुल्लानि विकसितानि च तानि नवानि नूतनानि च तानि कुन्दानि कुन्दपुष्पाणि च तेषां रुचा कान्त्या हसतीव हासं करोतीव कुन्दपुष्पाणां धवलत्वात् धवलहासयोः साम्यात् धवलकुन्दपुष्पविकासं दृष्ट्वा हास इत्युत्प्रेक्षेति भावः । अनेन शिशिरऋतुकार्यं वेत्तव्यम् । कथंभूतः शिशिरः स्फटिकाचलच्छलहिमाधिकृतं स्फटिकः स्फटिकमयश्चासौ अचलः पर्वतश्च 'अचलशैलशिलोच्चयाः' इत्यमरः, तस्य छलेन व्याजेन 'छलन्तु छलिते व्याजे' इति

विश्वः, स्फटिकाचलवत् शुभ्रेणेति भावः । हिमेन नीहारेण अधिकृतं व्याप्तं 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमं' इत्यमरः । अनेन स्फटिकाचलवत् शुभ्रबहुहिमवत्वं हिमऋतोः लक्षणं उक्तं भवति । एतादृशं हिमऋतुं अभिनन्दयन् सुखयन् । पुनः कथंभूतः सुसखा हिमर्तोः अत्यन्तं सुहृत् तत्कार्यहिमकरणे सहकारित्वात् इति भावः । अनेन हिमर्तुशिशिरर्तुद्वयकार्यं उक्तं वेत्तव्यम् । हिमऋतुरित्यत्र ऋत्यक इति पाक्षिकः प्रकृतिभावः । सुसखेत्यत्र 'राजाहः सखिभ्यष्टच्' इत्यस्य 'न पूजनात्' इति अपवादात् न टच् इति ज्ञातव्यम् ॥ ४४ ॥

हिमशीतवर्षपरितापपुरस्सरदोषमूलमिह नर्तुगणः ।
प्रियमेव साधयति नित्यमहो स विमुक्तिमानिति विमुक्तिमताम् ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – हिमेति ॥ इह भगवल्लोके ऋतुगणः वसन्तादिऋतुसमूहः । हिमं तुषारः, शीतं वर्षं, परितापश्च ते पुरस्सरा आद्या येषां ते च ते दोषाश्च तेषां मूलं कारणभूतम् । 'तुषारस्तुहिनं हिमं' इत्यमरः । न भवति, किन्तु विमुक्तिः एषां अस्तीति तेषां नित्यं प्रियमेव सुखमेव साधयति । इत्यस्माद्धेतोः स ऋतुगणो विमुक्तिमान् मोक्षवान् निर्दोषत्वादिति भावः । अहो एवं आश्चर्यवान् अयं लोक इति भावः ॥ ४५ ॥

मन्दोपकारिणी – हिमेति ॥ इह वैकुण्ठे ऋतुगणः षड्तूनां समूहः । विमुक्तिमतां विमुक्तिः मोक्षो येषां अस्तीति विमुक्तिमन्तः तेषां मुक्तानां हिमशीतवर्षपरितापपुरस्सरदोषमूलं हिमं तुषारः 'तुषारस्तुहिनं हिमं' इत्यमरः, शीतं शीतगुणः, वर्षं वृष्टिः, परितापः आतपबाधा । हिमं च शीतं च वर्षं च परितापश्च हिमशीतवर्षपरितापाः एते एव पुरस्सराः आदयो येषां ते तथोक्ताः । एवंभूताश्च ते दोषाश्च तेषां मूलं कारणं न भवति । ऋतुगणः स्वस्वकार्यहिमादिकारी न भवति इत्यर्थः । किन्तु नित्यं प्रियमेव साधयति करोति । 'राध साध संसिद्धौ इत्यतो लट् परस्मैपदम्' । इति अस्मात् कारणात् सः ऋतुगणः विमुक्तिमान् निर्दोषत्वात् इति भावः । अहो आश्चर्यं भगवल्लोकमाहात्म्यम् ॥ ४५ ॥

अमृतस्रगुत्तमफलप्रसवानमृताय तत्र जनताऽर्पयति ।
उपभोक्तुमप्यविधिबन्धवशा प्रकृतिं प्रयाति सकलोऽपि सदा ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – अमृतेति ॥ तत्र वैकुण्ठलोके । जनानां समूहो जनता, विधिरेव बन्धो विधिबन्धः तस्य वशा अधीना तादृशी न भवतीति अविधिबन्धवशा । एवं कुर्यादिति श्रौतस्मार्तविधिनामकबन्धस्य वशेऽवर्तमानापीत्यर्थः । उपभोक्तुं आत्मन उपभोगाय अमृतञ्च स्रजो मालाः ताश्च उत्तमफलानि च प्रसवाः पुष्पाणि च तान् । 'प्रसवः पुष्पफलयोरपत्ये गर्भमोचन' इति हेमचन्द्रः । अमृताय नित्यमुक्ताय हरये अर्पयति समर्पयति । ऋ गतौ । अमृतादिकं सर्वमपि हरये समर्प्योपभुङ्क्ष इत्यर्थः । तस्य मुक्तजनस्य तदुपपन्नमेव । तथा हि सकलोऽपि सर्वोऽपि जनः सदा प्रकृतिं स्वभावं प्रयाति अनुवर्तते । भगवति सर्वसमर्पणस्य तत्स्वभावत्वात् अद्यापि तथा वर्तत इति भावः । अत्रार्थान्तरन्यासालङ्कारः ॥ ४६ ॥

मन्दोपकारिणी – अमृतेति ॥ तत्र वैकुण्ठे जनता जनानां समूहो जनता । अविधिबन्धवशापि एवं कर्म कुर्यादेवेति श्रौतस्मार्तकर्मनिर्बन्धो विधिः तेन बन्धः बन्धनं तस्य वशा अधीना विधिबन्धवशा सा न भवतीति अविधिबन्धवशा । कर्माद्यकरणे प्रत्यवायरहितापि इति भावः । उपभोक्तुं आत्मनः उपभोगार्थं अमृतस्रगुत्तमफलप्रसवान् अमृतं च स्रक् माला च उत्तमफलानि च प्रसवाः पुष्पाणि च तथोक्ताः तान् 'स्यादपत्ये फले पुष्पे प्रसवो गर्भमोचने' इत्यमरः । अमृताय नित्यमुक्ताय हरये अर्पयति समर्पयति । 'ऋ गताविति यतो णिजन्ताल्लट् परस्मैपदम्' । मुक्तो जनः, कर्म कर्तव्यमेवेति निर्बन्धाभावेऽपि अमृतादिकं सर्वं स्वभोग्यं हरये समर्प्यैव भुङ्क्ष इत्यर्थः । इदं तत्स्वभाव इत्याह-प्रकृतिमिति ॥ सकलोऽपि सर्वजनोऽपि सदा प्रकृतिं स्वभावं प्रयाति अनुवर्तते । भगवति सर्वसमर्पणस्य मुक्तस्वभावत्वात् तत्सर्वं युज्यते इति भावः ॥ ४६ ॥

प्रमदातिरेकमुपयातवता प्रमदागणेन चरतोपवने ।
उपगीयते स्म मधुरं मधुजिच्चरितं सकान्ततातिना सततम् ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – प्रमदेति ॥ प्रमदस्य सुखस्य अतिरेकं आधिक्यं उपयातवता प्राप्तवता । उपवने आरामे । 'आरामः स्यादुपवनमि'त्यमरः । चरता सकान्ततातिना

भर्तृसमूहसहितेन स्वस्वभर्तृसहितेन इति यावत् । प्रमदागणेन, सन्ततं निरन्तरं मधुजिच्चरितं श्रीहरिचरितं मधुरं श्रोत्रमनोहरं यथा भवति तथा उपगीयते स्म ॥ ४७ ॥

मन्दोपकारिणी – प्रमदेति ॥ प्रमदातिरेकं प्रमदस्य सुखस्य अतिरेकं आधिक्यं उपयातवता उपवने शृङ्गारवने चरता सकान्ततितिना कान्तानां पतीनां ततिः समूहः तया सहितेन प्रमदागणेन स्त्रीणां समूहेन 'प्रमदा मानिनी कान्ता' इत्यमरः । सततं निरन्तरं मधुजिच्चरितं मधुं जयतीति मधुजित् तस्य हरेः चरितं चरित्रं मधुरं श्रोत्रसुखं यथा स्यात् तथा उपगीयते स्म । 'गै शब्दे इत्यतः कर्मणि लट् आत्मनेपदम्' । स्त्रीसमूहः स्वस्वपतिभिस्सह वने सञ्चरन् सन् सुखोद्रेकात् हरिचरितं नित्यं गायति इति भावः ॥४७॥

ललना ललन्त्यभिवरं प्रवरा ललिता लुनन्ति कुसुमानि पराः ।
इतराः स्रजो विरचयन्ति पतीननुरञ्जयन्ति न हि काश्चन नो ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – ललना इति ॥ प्रवरा उत्तमा ललना नार्यो वरं वरमभि अभिवरम् । स्वस्वभर्त्राभिमुख्येन इत्यर्थः । ललन्ति नृत्यन्ति । लल ईप्सायां लट् । ललिता अतिकोमलाः परा अन्याः कुसुमानि लुनन्ति । लूञ् छेदने लट् । इतराः स्रजो मालाः विरचयन्ति । रच प्रतियत्ने । काश्चन पतीन् न अनुरञ्जयन्तीति नो न सुखयन्तीति नो सर्वाश्च स्वस्वपतिसेवया तान् सुखयन्त्येव ॥ ४८ ॥

मन्दोपकारिणी – ललना इति ॥ प्रवराः उत्तमाः ललनाः नार्यः 'ललना च नितम्बिनी' इत्यमरः । अभिवरं वरान् पतीन् अभीति अभिवरं स्वभर्त्राभिमुख्येन इत्यर्थः । ललन्ति नृत्यन्ति । 'लल विलासे इति धातोः लट् परस्मैपदम्' । ललिताः अतिकोमलाः पराः अन्याः नार्यः कुसुमानि पुष्पाणि लुनन्ति छिन्दन्ति । 'लूञ् छेदने इत्यतो लट् परस्मैपदम्' । इतराः अन्याः स्त्रियः स्रजः मालाः विरचयन्ति बध्नन्ति । काश्चन काः अपि स्त्रियः पतीन् नो अनुरञ्जयन्ति इति न किन्तु अनुरञ्जयन्त्येव इत्यर्थः । 'रञ्ज् रागे लट् परस्मैपदम्' ॥ ४८ ॥

वनलीलया विविधया मुदितास्तरुणा घनस्तननतास्तरुणीः ।
सुलतालयेषु परिरभ्य रतिं वदनारविन्दमधुपा दधति ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – वनेति ॥ विविधया नानाविधया वनलीलया वनक्रीडया मुदिताः सन्तुष्टाः तरुणा युवानः सु शोभना ये लतालया लतागृहाणि तेषु घनौ निबिडौ यौ स्तनौ ताभ्यां नता नम्रास्ताः तरुणीः परिरभ्य वदनमेव अरविन्दं तस्य यत् मधु तत् पिबन्तीति तादृशा । अधरसुधां पिबन्तःसन्तो रतिं रतिक्रीडां दधति कुर्वन्ति ॥ ४९ ॥

मन्दोपकारिणी – वनेति ॥ विविधया नानाविधया वनलीलया वनक्रीडया मुदिताः सन्तुष्टाः तरुणाः युवानः पुरुषाः सुलतालयेषु शोभनेषु लतानां वल्लीनां आलयेषु गृहेषु 'वल्ली तु व्रततिर्लता' इत्यमरः । घनस्तननताः घनाः निबिडाश्च ते स्तनाः कुचाश्च घनस्तनाः तैः नताः प्रह्वाः तरुणीः युवतीः परिरभ्य आलिङ्गच रतिं सुरतक्रीडां दधति कुर्वन्ति । कथंभूताः तरुणाः, वदनारविन्दमधुपाः तरुणीनां वदनान्येव अरविन्दानि पद्मानि वदनारविन्दानि तेषां मधु पुष्परसं मकरन्दं इत्यर्थः, पिबन्तीति वदनारविन्दमधुपाः 'मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसेऽपि च' इति विश्वः । तरुणाः वनेषु स्त्रीभिः सह तत्र संचारेण नानाविधक्रीडां कृत्वा लतागृहेषु स्तनभारनताः तरुणीः आलिङ्गच मुखचुम्बनं कुर्वन्तः सन्तः सुरतक्रीडां कुर्वन्तीति भावः । 'डु धाञ् धारणपोषणयोरिति धातोः लट् परस्मैपदं दधाति धत्तः दधति' ॥ ४९ ॥

रसिकाः सुधाप्सु सरसीषु ततो रुतनूपुरानुकृतसारसकाः ।
विहरन्ति साकमवगाह्य धवैर्जलमड्डुकोत्सवहसद्वदनाः ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – रसिका इति ॥ ततो वनक्रीडानन्तरं रुतानि क्वणंति यानि नूपुराणि पादभूषणानि तैः अनुकृता विडम्बिताः सारसकाः सारसाख्यपक्षिविशेषा याभिः ताः । 'सारसा जलकुक्कुटा' इत्यमरः । रसिका विलासिन्यो धवैः पतिभिः साकं सुधात्मिका आपो यासु तासु सरसीषु । 'कासारः सरसी सर' इत्यमरः । अवगाह्य अवतीर्य जलमेव मड्डुको मद्दलविशेषः तस्य य उत्सवः ताडनोत्सवः तेन हसन्ति हासयुक्तानि वदनानि यासां तादृश्यः सत्यः । 'वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झरा' इत्यमरः । विहरन्ति क्रीडन्ति ॥ ५० ॥

मन्दोपकारिणी – रसिका इति ॥ रसिकाः विलासिन्यो नार्यः । ततः पूर्वोक्तप्रकारेण वनक्रीडानन्तरम् । रुतनूपुरानुकृतसारसकाः रुताः क्वणन्तश्च ते नूपुराः मञ्जीराः

पादभूषणानि 'मञ्जीरो नूपुरोऽस्त्रियां' इत्यमरः तैः अनुकृताः विडम्बिताः सारसाः जलकुक्कुटाख्यपक्षिविशेषाः याभिः ताः तथोक्ताः । 'सारसा जलकुक्कुटाः' इत्यभिधानम् । एवंभूताः सत्यः धवैः पतिभिः 'धवः प्रियः पतिर्भर्ता' इत्यमरः । साकं सह 'साकं सत्रा समं सह' इत्यमरः । सुधाप्सु सुधाः अमृतमयाः आपः जलानि यासु तासु सुधाप्सु समासान्तविधेः अनित्यत्वात् सुधाप्सु इति साधु । सरसीषु सरस्सु 'कासारः सरसी सरः' इत्यमरः । अवगाह्य प्रविश्य विहरन्ति क्रीडन्ति । 'वि पूर्वात् हृञ् हरणे इत्यतो लट् परस्मैपदम्' । कथंभूताः सत्यः जलमङ्डुकोत्सवहसद्वदनाः जलेषु मङ्डुकः हस्ताभ्यां ताडनं तल्लक्षणे उत्सवे हसन्ति हासयुक्तानि वदनानि यासां ताः तथोक्ताः । वनक्रीडानन्तरं नार्यः ध्वनिविशेषकारिभिः सारसपक्षिभिरिव प्रतीयमाननूपुराख्यपादभूषणैः युताः सत्यः पतिभिः सह सरोवरसमीपं गत्वा अमृतमयोदकेषु सरोवरेषु प्रविश्य हस्ताभ्यां जलताडनं कृत्वा हसन्त्यः सत्यः क्रीडन्ति इति भावः ॥ ५० ॥

विविधा विधाय विहृतीः सलिले विकटेषु विद्रुमतटेषु गताः ।
सुरभिं सुवर्णमथ वर्णकमाददते सखीकरगतं महिलाः ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – विविधा इति ॥ महिला नार्यः सलिले विविधा विहृतीः क्रीडा विधाय । अथ जलविहारानन्तरं विकटेषु श्रेष्ठेषु । विशालेष्विति वा । 'विशङ्कटं विशालं स्यात्करालं विकटं तथे'ति हलः । विद्रुमतटेषु विद्रुमावबद्धतीरेषु गताः स्थिताः सत्यः, सखीकरगतं सखीहस्तस्थितं सुरभिं शोभनपरिमलाढ्यं सु शोभनो वर्णो यस्य तं वर्णकं अङ्गरागम् । 'वर्णको विलेपने मलयजे नटे चे'ति हेमचन्द्रः । आददते प्रतिगृह्णन्ति । डु दाञ् दाने लट् ॥ ५१ ॥

मन्दोपकारिणी – विविधा इति ॥ महिलाः 'वनिता महिला' इत्यमरः सलिले जले विविधाः विचित्राः विहृतीः क्रीडाः विधाय कृत्वा अथ जलक्रीडानन्तरं विकटेषु सुन्दरेषु 'विकटः सुन्दरे प्रोक्तः' इत्यमरः, विद्रुमतटेषु प्रवालानां तटेषु विद्रुमखचिततीरेषु इत्यर्थः । 'प्रवालं विद्रुमोऽस्त्रियां' इत्यमरः । गताः स्थिताः सत्यः सखीकरगतं सखीनां सहचरीणां करेषु गतं विद्यमानं सुरभिं घ्राणतर्पणं घ्राणेन्द्रियप्रियपरिमलोपेतं इति भावः । 'सुरभिर्घ्राणतर्पणं' इत्यमरः, । सुवर्णं शोभनः वर्णः कान्तिः यस्य सः तथोक्तः तं 'वर्णो

द्विजादौ शुक्लादौ' इत्यमरः । वर्णकं शरीरविलेपनद्रव्यं अङ्गरागं 'गात्रानुलेपनी वर्ती वर्णकोऽस्त्री विलेपनं' इत्यमरः । आददते प्रतिगृह्णन्ति 'आङ् पूर्वात् दद दाने इत्यतो लट् आत्मनेपदं आदत्ते आददाते आददते' जलक्रीडानन्तरं तीरमागत्य शरीरं अङ्गरागेण विलेपयन्ति नार्यः इति भावः ॥ ५१ ॥

जघनांशुकैरवयवाभरणैः कुचकुंकुमैश्च कचमाल्यवरैः ।
नयनाञ्जनैरपि मिथोऽब्जदृशां घटितैरलंकृतिरलं क्रियते ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – जघनेति ॥ मिथः परस्परं घटितैः सम्बद्धैः अब्जदृशां पद्मलोचनानां नारीणां जघनांशुकैः जघनानि च अंशुकानि अम्बराणि तैः । अवयवा हस्तपादादयः आभरणानि कटकनूपुरादीनि च तैः । कुचाश्च कुङ्कुमानि च तैः । कचाः केशबन्धाः ते च माल्यवराणि माल्यश्रेष्ठानि तैः । नयनानि च अञ्जनानि च तैरप्यलं सम्यक् अलङ्कृतिः अलङ्कारः क्रियते । जघनादिसम्बन्धात् अंशुकादीनां अंशुकादिसम्बन्धात् जघनादीनां एवं मिथोऽलङ्कारोऽभूदिति भावः ॥ ५२ ॥

मन्दोपकारिणी – जघनेति ॥ मिथः अन्योन्यं परस्परं इत्यर्थः । घटितैः सम्बद्धैः अब्जदृशां अब्जवत् कमलवत् दृशौ लोचने यासां ताः अब्जदृशः तासां स्त्रीणां जघनांशुकैः जघनानि च अंशुकानि च तैः इति द्वन्द्वः, जघनैः कटिपुरोभागैः 'पश्चान्नितम्बः स्त्री कट्याः क्लीबेतु जघनं पुरः' इत्यमरः, कटिभिः इत्यर्थः अंशुकैः वस्त्रैः 'वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकं' इत्यमरः । अवयवाभरणैः अवयवैः कर्णहस्ताद्यवयवैः आभरणैः कुण्डलकटकाद्यैः तत्तद्योग्यभूषणैः अवायवाश्च आभरणानि च इति विग्रहः । कुचकुङ्कमैः कुचैः स्तनैः कुङ्कुमैः कुङ्कुमाख्यलेपनद्रव्यैः कचमाल्यवरैः कचैः केशैः माल्यवरैः पुष्पमालोत्तमैः 'माल्यं मालास्रजौ मूर्ध्नि' इत्यमरः, कचाश्च माल्यवराणि च इति विग्रहः । नयनाञ्जनैरपि नयनैः लोचनैः अञ्जनैः कज्जलैः अलं सम्यक् अलङ्कृतिः अलङ्करणं क्रियते जघनाद्यवयवसम्बन्धात् वस्त्रादीनां वस्त्राभरणादिसम्बन्धात् जघनादीनां इति परस्परालङ्कारोऽभूत् इति भावः ॥ ५२ ॥

तनुमध्यमा निजगृहाणि गताः सममात्मनामसुसमैरसमैः ।
अमृतं पिबन्त्यसुलभं भविभिश्चषकैर्महारजतरत्नमयैः ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – तन्विति ॥ निजगृहाणि स्वकीयगृहाणि गताः प्राप्ताः तनु कृशं मध्यमं मध्यमप्रदेशो यासां ताः तनुमध्यमा नार्यः । समा न भवन्तीति असमाः तैः उत्तमैः इत्यर्थः । नार्यपेक्षया भर्तुः उत्तमत्वादिति भावः । आत्मनां असुभिः प्राणैः समा असुसमाः तैः पतिभिः समं साकम् । महारजतं सुवर्णम् । 'महारजतकाञ्चन' इत्यमरः । रत्नानि च तेषां स्वरूपाणि महारजतरत्नमयानि तैश्चषकैः पानपात्रैः । 'चषकोऽस्त्री पानपात्रमि'त्यमरः । भवः संसार एषां अस्तीति भविनः संसारिणः तैः असुलभं अलभ्यं अमृतं पिबन्ति ॥ ५३ ॥

मन्दोपकारिणी – तन्विति ॥ तनुमध्यमाः तनु कृशं मध्यमं यासां ताः तथोक्ताः 'मध्यमं चावलग्नं च' इत्यमरः । 'तनुः काये कृशेऽल्पेऽपि' इति विश्वः । नार्यः निजगृहाणि निजानि च तानि गृहाणि मन्दिराणि च निजगृहाणि गताः प्राप्तवत्यः सत्यः असमैः समा न भवन्तीति असमाः तैः स्वापेक्षया उत्तमैः, भार्यापेक्षया भर्तुः उत्तमत्वात् इति भावः । आत्मनां स्वासां असुसमैः असुभिः प्राणैः समैः प्राणप्रियैः इत्यर्थः । 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः । पतिभिः समं सह महारजतरत्नमयैः महारजतं काञ्चनं च रत्नानि च तदात्मकानि महारजतरत्नमयानि तैः रत्नखचितसुवर्णात्मकैः इत्यर्थः । 'महारजतकाञ्चने' इत्यमरः । चषकैः पानपात्रैः 'चषकोऽस्त्री पानपात्रं' इत्यमरः । अमृतं पिबन्ति 'पा पाने इत्यतो लट् परस्मैपदम्' कथंभूतं अमृतं, भविभिः भवः संसारो एषां अस्तीति भविनः तैः संसारिभिः 'भवः ससारसम्प्राप्तिः' इति विश्वः । असुलभं सुलभं न भवतीति असुलभं अलभ्यं इत्यर्थः । नार्यः नानाविधक्रीडानन्तरं गृहमुपेत्य पतिभिः सह अमृतं पिबन्ति इति भावः ॥ ५३ ॥

मृदुकम्रशय्यमनुरागवतां मणिमञ्चमञ्चितदृशोऽवसरे ।
पतिचोदिता अधिरुहन्ति शनैः विनयो हि भूषयति सर्वरसम् ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – मृद्विति ॥ अञ्चिताः पूजिता दृशो दृष्टयो यासां तादृश्यः । शोभनदृश इत्यर्थः । नार्यः, अनुरागः स्नेह एषां अस्तीति तेषां भर्तॄणाम् । मृद्वी कम्रशय्या मनोहरशय्या यस्मिंस्तं, मणिमयो मञ्चः तं अवसरे सुरतक्रीडार्थं मञ्चारोहणावसरे प्राप्तेपतिचोदिता मञ्चारोहणाय स्वरमणैः प्रेरिताः सत्यः शनैः अधिरुहन्ति । शनैरिति

विनयो दर्शितः । स चाधिकगुण इत्याह– विनयो हीति । हि यतो विनयः शृङ्गारादिसर्वरसं भूषयति । शृङ्गारादिसर्वरसानां विनय एव भूषणमिति भावः । अर्थान्तरन्यासालङ्कारः ॥ ५४ ॥

मन्दोपकारिणी – मृद्विति ॥ अञ्चितदृशः अञ्चिताः कज्जलेन अलङ्कृताः दृशः नेत्राणि यासां ताः तथोक्ताः नार्यः अनुरागवतां अनुरागः सुखेच्छा येषां अस्तीति अनुरागवन्तः तेषां भर्तॄणां मृदुकम्रशय्यं मृद्वी कोमला कम्रा मनोहरा शय्या कशिपुः आस्तरणं इति यावत्, यस्मिन् सः मृदुकम्रशय्यः तं 'कान्तं च कमनं कम्रं कमनीयं मनोरमं' इति धनञ्जयः । मणिमञ्चं मणिमयश्चासौ मञ्चश्च तं शयनं 'मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः' इत्यमरः । अवसरे सम्भोगावसरे पतिचोदिताः मञ्चारोहणाय पतिभिः स्वरमणैः चोदिताः त्वं मञ्चं अधिरोह इति प्रेरिताः अपि शनैः मन्दं अधिरुहन्ति उपरि गच्छन्ति । 'अधि पूर्वात् रुह बीजजन्मनि प्रादुर्भावे च इत्यस्मात् लट् परस्मैपदम् । रोहति रुहतः रुहन्ति' । शनैः इत्यनेन नयो दर्शितः स च सर्वाधिकगुण एव इत्याह विनय इति ॥ विनयो हि सर्वरसं सर्वश्चासौ रसः शृङ्गारादिरसश्च तं 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः । भूषयति अलङ्करोति सर्वशृङ्गारादिरसानां विनय एव भूषणं इति भावः । 'भूष अलङ्करणे इत्यतो लट् परस्मैपदम्' ॥ ५४ ॥

अभिकान्तमुन्नमितकान्तकुचा किल बध्नती सकुसुमां कबरीम् ।
सुमुखी सुलक्ष्यभुजमूलवलिः परिरभ्यते प्रणयिनाऽतिरसात् ॥ ५५ ॥

पदार्थदीपिकोद्बोधिका – अभीति ॥ कान्तं अभि अभिकान्तं कान्ताभिमुख्येनेत्यर्थः । स्थिता, उन्नमितौ उर्ध्वीकृतौ कान्तकुचौ मनोहरस्तनौ यया तादृशी, शोभनानि कुसुमानि यस्यां तां कबरीं केशपाशं बध्नती बन्धनं कुर्वन्ती किल । किल इत्यपरमार्थे । पुष्पैः सह, कबरीबन्धव्याजेन अभिकान्तं कुचोन्नमनं भुजमूलवलिप्रदर्शनञ्च गूढाभिप्रायः । भुजयोः मूले भुजमूले तयोः वलयः, सुलक्ष्याः सम्यक् परिदृश्यमाना भुजमूलवलयो यस्याः तादृशी भुजाभ्यां स्वकबरीबन्धनसमये स्पष्टतया परिदृश्यमानकक्षमूलरेखा सतीत्यर्थः । सुमुखी नारी प्रणयिना भर्त्राऽतिरसात् अतिरागात् । 'रसो रागे विषे वीर्य' इति वैजयन्ती । परिरभ्यते आलिङ्गचते ॥ ५५ ॥

मन्दोपकारिणी – अभीति ॥ सकुसुमां कुसुमैः प्रसूनैः सहितां 'प्रसूनं कुसुमं सुमं' इत्यमरः कबरीं केशवेशं बध्नती किल बन्धनव्याजवतीति भावः । अभिकान्तं कान्तं अभि अभिकान्तं पत्युः अभिमुखेन स्थिता सती उन्नमितकान्तकुचा उन्नमितौ ऊर्ध्वमुखीकृतौ कान्तौ मनोहरौ कुचौ स्तनौ यया सा तथोक्ता । सुलक्ष्यभुजमूलवलिः कराभ्यां स्वकबरीबन्धनसमये सु स्पष्टं लक्ष्या पत्या दृश्यमाना भुजयोः बाह्वोः मूले कक्षौ तयोः वलिः रेखा यस्याः सा तथोक्ता 'बाहुमूले उभे कक्षौ' इत्यमरः । परिरभ्यते आश्लिष्यते । 'परि पूर्वात् रभ राभस्ये इत्यतः कर्मणि लडात्मनेपदम्' । किल इत्यनेन नार्याः कबरीबन्धने तात्पर्यं नास्ति किन्तु पुष्पमालया सह कबरीबन्धनव्याजेन पत्युरभिमुखेन उन्नमितमनोहरकुचप्रदर्शने कक्षमूलरेखाप्रदर्शने च तात्पर्यं सूचितं भवति । तत्प्रदर्शनस्य पत्युः कामोद्रेककारणत्वात् अत एव अतिरागादालिङ्गनम् ॥ ५५ ॥

पृथुवृत्ततुङ्गकठिनोरसिजद्वयवारितायतनिजान्तरयोः ।
भुजयोर्युगेन रमणो रमणीं परिरभ्य कोऽत्र रमयेन्न सुखी ॥ ५६ ॥

पदार्थदीपिकोद्बोधिका – पृथ्विति । अत्र भगवल्लोके । सुखी रमणो भर्ता पृथू स्थूलौ, वृतौ वर्तुलौ, तुङ्गौ उन्नतौ, कठिनौ च उरसिजौ स्तनौ तयोः द्वयं तेन वारितं पूरितं आयतं निजान्तरं विस्तीर्णस्वकीयमध्यं ययोः तयोः भुजयोः हस्तयोः युगेन परिरभ्य रमणीं भार्यां को न सुखयेत् न रमयेत् । सर्वोऽपि रमयत्येवेत्यर्थः । ययोः भुजयोः आयतं अन्तरं मध्यं वक्षः पृथुवृत्ततुङ्गकठिनस्तनद्वयेन पूरितं ताभ्यां भुजाभ्यां परिरभ्य सर्वोऽपि रमणो रमणीं रमयेदिति भावः ॥ ५६ ॥

मन्दोपकारिणी – पृथ्विति ॥ अत्र भगवल्लोके सुखी सुखमस्यास्तीति सुखी, कः को वा रमणः पतिः रमणीं भार्यां न रमयेत् न सुखयेत् सर्वोऽपि रमयेदेव । किं कृत्वा पृथुवृत्ततुङ्गकठिणोरसिजद्वयवारितायतनिजान्तरयोः पृथु स्थूलौ वृत्तौ वर्तुलौ 'वर्तुलं निस्तुलं वृत्तं' इत्यमरः, तुङ्गौ उन्नतौ कठिनौ निबिडौ उरसिजौ वक्षोजौ स्तनौ । पृथू च तौ वृत्तौ च तौ तुङ्गौ च तौ कठिणौ च तौ उरसिजौ च इति कर्मधारयः, तयोः द्वयं तेन वारितं निवारितं निजं च तत् अन्तरं भुजयोः मध्यं च निजान्तरम् । आयतं विस्तीर्णं च तत् निजान्तरं च आयतनिजान्तरं विस्तीर्णवक्षः इत्यर्थः, द्वयवारितं आयतनिजान्तरं ययोः तौ

तथोक्तौ तयोः 'अन्तरन्तु परीधाने भेदे रन्ध्रावकाशयोः आत्मान्तर्धिविनात्मीयबहिर्मध्याव-धिष्वपि' इति विश्वः । भुजयोः युगेन परिरभ्य आलिङ्गचेति भुजाभ्यां स्त्रियः आलिङ्गने कृते स्तनयोः स्थूलत्वात् उन्नतत्वात् कठिनत्वात् पतिवक्षसः स्त्रीवक्षसश्च सम्यक् संश्लेषो न भवतीति भावः । स्तनसौन्दर्यं वर्णितं भवति । 'रमु क्रीडायां लिङ् परस्मैपदम्' ॥ ५६ ॥

स्मितफुल्लमुल्लसितचिल्लिलसन्मणिकुण्डलं मृदुकटाक्षपटु ।
निभृतो निरीक्ष्य सुचिरं सुतनोः प्रतिचुम्बति प्रियतमो वदनम्॥ ५७ ॥

पदार्थदीपिकोद्बोधिका – स्मितेति ॥ प्रियतमः पतिः । स्मितफुल्लं स्मितेन विकसितम् । उल्लसितौ चिल्लिनावस्य स्त इत्युल्लसितचिल्लि । उल्लसितगण्डस्थल-युक्तमित्यर्थः । लसती मणिकुण्डले ताटङ्के यस्य तत् लसन्मणिकुण्डलं, मृदुः कोमलो यः कटाक्षः तेन पटु चतुरं, सुतनोः प्रियायाः वदनं निभृत एकाग्रचित्तः सन् सुचिरं निरीक्ष्य प्रतिचुम्बति । चुबि वक्त्रसंयोगे लट् ॥ ५७ ॥

मन्दोपकारिणी – स्मितेति ॥ प्रियतमः अतिशयेन प्रियः प्रियतमः पतिः स्मितफुल्लं स्मितेन मन्दहासेन फुल्लं विकसितं उल्लसितचिल्लि उल्लसितौ प्रकाशमानौ चिल्ली कपोलौ यस्मिन् तथोक्तम् । लसन्मणिकुण्डलं लसती देदीप्यमाने मणिकुण्डले मणिखचितकुण्डले यस्मिन् तत् तथोक्तम् । मृदुकटाक्षपटु मृदुः कोमलः शान्त इत्यर्थः, कटाक्षः अपाङ्गदर्शनं मृदुश्चासौ कटाक्षश्च तस्मिन् पटु चतुरं 'अपाङ्को नेत्रयोः अन्तः कटाक्षोऽपाङ्गदर्शने' इत्यमरः । सुतनोः प्रियायाः वदनं निभृतः एकाग्रचित्तस्सन् सुचिरं बहुकालं निरीक्ष्य अवलोक्य प्रतिचुम्बति 'चुबि वक्त्रसंयोगे इत्यतो लट् परस्मैपदम्' ॥ ५७ ॥

नतमुन्नमय्य मुखचन्द्रमसं परिरम्भसम्भृतमुदा सुदृशः ।
उपरम्यते न तरुणेन चिरं मधुराधरामृतरसं पिबता ॥ ५८ ॥

पदार्थदीपिकोद्बोधिका – नतमिति ॥ शोभने दृशौ यस्याः तस्याः परिरम्भेण आलिङ्गनेन सम्भृता सम्पूर्णा मुत् सन्तोषो यस्य तेन तरुणेन नतं ह्रियाऽवनतं मुखचन्द्रमसं उन्नमय्य उद्धृत्य । मधुरो योऽधरामृतरसः अधरोष्ठामृतरसः तम् । 'ओष्ठाधरौ तु रदनच्छदावि'त्यमरः । पिबता सता चिरं नोपरम्यते न विरम्यते ॥ ५८ ॥

मन्दोपकारिणी – नतमिति ॥ सुदृशः सुलोचनायाः स्त्रियाः परिरम्भसम्भृतमुदा परिरम्भेण आलिङ्गनेन संभृता पूर्णा मुत् सन्तोषः यस्य सः परिरम्भसम्भृतमुत् तेन 'परिरम्भः परिष्वङ्गः संश्लेष उपगूहनं' इत्यमरः । तरुणेन रमणेन नतं लज्जया किञ्चित् अवाङ्मुखं मुखचन्द्रमसं मुखमेव चन्द्रमाः चन्द्रः तं 'हिमांशुश्चन्द्रमाश्चन्द्रः' इत्यमरः । उन्नमय्य स्वकरेण उद्धृत्य मधुराधरामृतरसं अधरः अधरोष्ठः 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः, तस्मिन् विद्यमानश्चासौ अमृतरसश्च मधुरः स्वादुश्चासौ अधरामृतरसश्च इति तथोक्तः तम् । मधुररसवत् स्वादु प्रियं इत्यर्थः । पिबता पानं कुर्वता चिरं बहुकालं नोपरम्यते न विरम्यते । 'उपपूर्वात् रमु क्रीडायां इत्यतो भावे लट्' ॥५८॥

सुरतोत्सवोत्सुकतया त्वरयन् करपल्लवं निवसनग्रहणे ।
कररुद्धमायतदृशः सहसा त्वरयत्यथ द्विगुणमिष्टतमः ॥ ५९ ॥

पदार्थदीपिकोद्बोधिका – अस्य व्याख्या लिखितपुस्तके न दृश्यते ॥ ५९ ॥

मन्दोपकारिणी – सुरतेति ॥ अथ सुरतकाले इष्टतमः अतिशयेन इष्टः इष्टतमः पतिः सुरतोत्सवोत्सुकतया सुरतोत्सवे रतिलक्षणोत्सवे उत्सुकः उत्कण्ठावान् उत्सुकस्य भावः उत्सुकता तया । औत्सुक्येन इत्यर्थः । निवसनग्रहणे निवसनस्य भार्यायाः नितम्बपरिवीतवस्त्रस्य ग्रहणे नितम्बात् अपसारयितुं स्वीकारे करपल्लवं पाणिलक्षणकिसलयं त्वरयन् वेगयुक्तं कुर्वन् सन् । आयतदृशः आयते विशाले दृशौ नेत्रे यस्याः सा आयतदृक् तस्याः । कररुद्धं करेण निरुद्धं करपल्लवं सहसा बलेन 'सहो बले ज्योतिषि मार्गशीर्षे' इति विश्वः । द्विगुणं द्वौ गुणौ यस्मिन् कर्मणि यथा स्यात् तथेति क्रियाविशेषणम् । पूर्ववेगापेक्षया द्विगुणितवेगेन इत्यर्थः । त्वरयति वेगयुक्तं करोति । 'त्रि त्वरा सम्भ्रमे णिजन्तात् लट् परस्मैपदम्' ॥ ५९ ॥

रभसावपातितपृथूरसिजः परिरभ्य तत्क्षणवियाततरः ।
मणितादिसौरतवितानपटू रमयत्यमून् युवतिसङ्ग उत ॥ ६० ॥

पदार्थदीपिकोद्बोधिका – रभसेति ॥ रभसा सम्भ्रमेण अवपातितौ अवनामितौ पृथूरसिजौ बृहत्कुचौ येन तादृशः । स चासौ क्षणश्च तत्क्षणः तस्मिन् वियाततरः

अतिधृष्टः 'वियातो धृष्ट उच्यत' इति हलः । रतिकालेऽतिधृष्ट इत्यर्थः । 'पराक्रमः परिभवे वैयात्यं सुरतेष्वपि' इत्युक्तेः । सुरते वैयात्यं गुण एव । मणितं रतिकालिकध्वनिविशेषः । 'मणितं रतिकूजितं इत्यमरः । तदादिर्यस्य स मणितादिः तादृशो यः सौरतः सुरतसम्बन्धी व्यापारः तस्य वितानो विस्तारः तस्मिन् पटुः चतुरः युवतिसङ्घ उत नारीसमूहोऽपि अमून् रमणान् परिरभ्य आलिङ्ग्य रमयति । अनेन रमणीकर्तृकं उपरिसुरतं वेदितव्यम् ॥ ६० ॥

मन्दोपकारिणी – रभसेति ॥ रभसा संरम्भेण रागोद्रेकेण इति यावत् । यद्वा रभसा हर्षेण 'रभसो वेगहर्षयोः' इति विश्वः । अवपातितपृथूरसिजः अवपातितौ अधोमुखीकृतौ पृथू स्थूलौ उरसिजौ स्तनौ येन स तथोक्तः । परिरभ्य आश्लिष्य । तत्क्षणवियाततरः अतिशयेन वियातः वियाततरः अतिधृष्टः 'धृष्टे धृष्णुर्वियातश्च' इत्यमरः, तत्क्षणे स्वकर्तृकक्रीडाकाले वियाततरः तत्क्षणवियाततरः । मणितादिसौरतवितानपटुः रतिकाले जायमानः ध्वनिविशेषः मणितशब्देन उच्यते 'मणितं रतिकूजितं' इत्यमरः । मणितं आदिः यस्य सः मणितादिः सुरतस्य क्रीडायाः सम्बन्धी व्यापारः सौरतः मणितादिश्चासौ सौरतश्च मणितादिसौरतः तस्य विताने विस्तारे पटुः चतुरः 'क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके' इत्यमरः । एवंभूतः युवितिसङ्घ उत तरुणीगणोऽपि अमून् स्वरमणान् रमयति क्रीडयति । अनेन श्लोकेन रमणीकर्तृक उपरिसुरतलक्षणक्रीडाविशेषो वर्णितः इति ज्ञातव्यम् ॥ ६० ॥

अतिलौकिकान् रमयतो रमणान् रमयन्त्यलौकिकगुणा ललनाः ।
अनुरूपरूपमतिलोकसुखं तदलौकिकं निधुवनं लसति ॥ ६१ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ अलौकिका इतरलोकविलक्षणा गुणा यासां ता ललनाः नार्यः । लोकेषु इतरलोकेषु वर्तमाना लौकिकाः पुरुषाः तान् अतिक्रम्य वर्तमाना अतिलौकिकाः तान् रमयत आत्मनं रमयतः रमणान् पतीन् रमयन्ति । अनुरूपं परस्परमनुकूलं रूपं स्वरूपं यस्य तादृशम् । लोकानां इतरलोकानां सुखं तदतिक्रम्य वर्तमानं अतिलोकसुखम् । अलौकिकं स्वयञ्च लोकविलक्षणं निधुवनं रतिक्रीडा 'संवेशनं निधुवनं सम्प्रयोगो रहो रतिरि'ति हलः । लसति शोभते ॥ ६१ ॥

मन्दोपकारिणी – अतीति ॥ अलौकिकगुणाः अलौकिकाः इतरलोकविलक्षणाः गुणाः यासां ताः तथोक्ताः ललनाः नार्यः, अतिलौकिकान् भगवदितरलोके विद्यमानाः लौकिकाः तद्भिन्नाः अतिलौकिकाः तान् रमयतः स्वाः रमयतः रमणान् पतीन् रमयन्ति । स्त्रीपुरुषाः अन्योन्यं रमयन्तीति भावः । अनुरूपरूपं परस्परं अनुकूलभूतम् । अतिलोक-सुखं अतिलोकं वैकुण्ठेतरलोकसुखं अतिक्रम्य विद्यमानं सुखं यस्मिन् तत् तथोक्तं अलौकिकं स्वयं च लोकविलक्षणं तत् निधुवनं मैथुनमित्यर्थः लसति शोभते 'लस श्लेषणक्रीडनयोः, दीप्तौ इत्यतो लट् परस्मैपदं' 'मैथुनं निधुवनं रतं' इत्यमरः ॥ ६१ ॥

न रतिः श्रमादिखचिता नियमाद्विरहव्यथाऽपि न वधूवरयोः ।
प्रतिकामिनीप्रणयतः कलहो न समस्तदोषरहिते हि पदे ॥ ६२ ॥

पदार्थदीपिकोद्बोधिका – अलौकिकत्वमेव स्पष्टयति – ॥ **नेति** ॥ समस्तदोषरहिते पदे भगवल्लोके, रती रमणम् । श्रम आदिः यस्य तेन खचिता सम्बद्धा सहचरिता, श्रमेण तज्जन्यस्वेददौर्गन्ध्याशुद्ध्यादिना युक्तेत्यर्थः । नियमात् नियतेः न नास्ति । तत्र रतेः श्रमादिरहितत्वाभावो नियमादेव इति भावः । वधूवरयोः दम्पत्योः विरहव्यथापि परस्परवियोगनिमित्तक्लेशोऽपि न । प्रतिकामिनीप्रणयतः सपत्नीस्नेहात् पतिः सपत्नीप्रणयवान् वर्तत इति कोपेन प्रेमकलहोऽपि न न सम्भवति । एवं उक्तलक्षणदोषराहित्यमेवालौकिकत्वे कारणं हीत्यनेन सिद्धम् ॥ ६२ ॥

मन्दोपकारिणी – अलौकिकत्वमेव स्पष्टयति ॥ **नेति** ॥ समस्तदोषरहिते समस्ताश्च ते दोषाश्च तैः रहिते पदे स्थाने भगवल्लोके इत्यर्थः 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः रतिः सुरतरूपक्रीडा श्रमादिखचिता श्रमः आयासः आदिः येषां ते श्रमादयः आदिपदात्तज्जन्यस्वेददौर्गन्ध्यादि ग्राह्यम् । श्रमादिभिः दोषैः खचिता सम्बद्धा नियमात् सर्वथा न भवति । वधूवरयोः वधू भार्या च वरः पतिश्च वधूवरौ तयोः दम्पत्योः 'क्षेत्रं कलत्रं च वधूः' इत्यमरः विरहव्यथापि न । प्रतिकामिनीप्रणयतः प्रतिकामिन्यां सपत्न्यां प्रणयतः पत्युः पक्षपातात् कलहः पतिः सपत्नीस्नेहं करोतीति कोपेन कलहोऽपि न भवति । इदमुक्तं प्रमेयं श्रुत्यादिसिद्धं इत्याह हिशब्देन ॥ ६२ ॥

सुखसंविदात्मकतया वपुषां सुरभित्वमेव बहिरन्तरपि ।
हरिधाम्नि दम्पतिगणस्य ततो ननु मान्यतेऽपि मुनिभिः सुरतम् ॥ ६३ ॥

पदार्थदीपिकोद्बोधिका – दोषराहित्यं श्रुत्यादिप्रसिद्धमित्याह–**सुखेति** ॥ हरिधाम्नि हरिलोके दम्पतिगणस्य वधूवरसमूहस्य वपुषां, सुखञ्च संवित् ज्ञानञ्च, त आत्मा स्वरूपं यस्य तस्य भावस्तत्ता तया । अप्राकृतत्वादिति भावः । बहिरन्तरपि सुरभित्वमेव सुगन्धित्वमेव ततो ननु तस्माद्धि । सुरतं मुक्तसुरतं मुनिभिः अपि मान्यते श्लाघ्यते ॥६३॥

मन्दोपकारिणी – सुखेति ॥ हरिधाम्नि हरेः धाम्नि स्थाने वैकुण्ठे 'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः । दम्पतिगणस्य जाया च पतिश्च दम्पती 'दम्पती जम्पती जायापती भार्यापती च तौ' इत्यमरः दम्पत्योः गणः समूहः तस्य वपुषां शरीराणां बहिरन्तरपि सुरभित्वमेव सुगन्धित्वमेव 'सुरभिर्घ्राणतर्पणः' इत्यमरः । कुतः सुखसंविदात्मकतया सुखं च संवित् ज्ञानं च 'प्रेक्षोपलब्धिश्चित्संवित्' इत्यमरः सुखसंविदोः आत्मा स्वरूपं येषां तानि तथोक्तानि तेषां भावः सुखसंविदात्मकता तया अप्राकृतस्वरूपत्वात् इति भावः । ततः तस्मात्कारणात् सुरतं मुक्तरतिः मुनिभिरपि ज्ञानिभिः ब्रह्मादिभिरपि मान्यते ननु श्लाघ्यते हि 'मान पूजायां इत्यतः कर्मणि लट् आत्मनेपदम्' ॥ ६३ ॥

श्रुणुताप्यलोकविषयं विषयं सकलस्य मुक्तनिकरस्य दृशाम् ।
वपुरिन्दिरापतिरमन्दरसं ननु सुन्दरं प्रकटयत्यनिशम् ॥ ६४ ॥

पदार्थदीपिकोद्बोधिका – श्रृणुतेति ॥ सकलस्य समस्तस्य मुक्तनिकरस्य मुक्तसमूहस्य दृशां, लोकानां इतरलोकानां विषयो गोचरो न भवति इति अलोकविषयः तम् । भगवल्लोकेतरलोकस्थजनानामगोचरं इत्यर्थः । विषयमपि गोचरमपि आदरेण श्रृणुत । कोऽसौ सकलमुक्तनिकरदृशां गोचरः पदार्थ इत्यत आह– इन्दिरापतिरिति । इन्दिरापतिः, अमन्दः परिपूर्णो रसो बलवीर्याद्यनन्तगुणनिकरो यस्य तादृशं सुन्दरं मनोहरं वपुः अनिशं सदा प्रकटयति ननु । कटे वर्षावरणयोः लट् । 'शृङ्गारादौ बले वीर्ये गुणे रागे द्रवे रस' इत्यमरः ॥ ६४ ॥

मन्दोपकारिणी – शृणुतेति ॥ सकलस्य सर्वस्य मुक्तनिकरस्य मुक्तानां वृन्दस्य दृशां नयनानां विषयमपि गोचरमपि शृणुत आकर्णयत 'श्रु श्रवणे इत्यतः लोट् परस्मैपदं शृणु शृणुतं शृणुत' कथंभूतम् । अलोकविषयं लोकानां इतरलोकानां विषयः चक्षुरिन्द्रियगोचरः स न भवतीति अलोकविषयः तं 'विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च' इति विश्वः संसारिणां नयनागोचरं मुक्तनिकरस्यैव चक्षुर्विषयं आदरेण शृणुत इति भावः मुक्तनिकर-दृग्विषयभूतं किमित्यपेक्षेयामाह इन्दिरायाः लक्ष्म्याः पतिः नारायणः अमन्दरसं अमन्दः परिपूर्णः रसः शृङ्गारबलवीर्याद्यनन्तगुणसमुदायो यस्य तत् तथोक्तं 'शृङ्गारादौ बले वीर्ये गुणे रागे द्रवे रसः' इत्यमरः सुन्दरं दर्शनीयं वपुः स्वदेहं अनिशं सततं प्रकटयति ननु स्पष्टं दर्शयत्येव 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः । अनेन भगवद्रूपमेव सदा मुक्तनिकरचक्षुविषयभूतं वस्तु इत्युक्तं भवति । प्रपूर्वकात् कटी गतौ इत्यतो णिजन्ताल्लट् परस्मैपदम्' ॥ ६४ ॥

मणिराजिराजितमहामुकुटं शितिकान्तकुन्तलसहस्रतयम् ।
अलिकार्धचन्द्रविलसत्तिलकं श्रवणोल्लसन्मकरकुण्डलयुक् ॥ ६५ ॥

पदार्थदीपिकोद्बोधिका – कीदृशं तद्वपुरित्यतो 'नवभानुभा' इत्यतः प्राक्तनैः श्लोकैर्वर्णयति — **मणिराजीत्यादिना** ॥ मणीनां रत्नानां राजिभिः समूहै राजितं प्रकाशितं महामुकुटं महाकिरीटं यस्य तादृशम् । शितयो नीला ये कान्तकुन्तलाः मनोहरालकाः तेषां सहस्रतयं सहस्रं यस्य तादृशम् । 'संख्याया अवयवे तयबि'ति सहस्रशब्दात्तयप् प्रत्ययः । अलिकं ललाटमेवार्धचन्द्रः तस्मिन् विलसत् तिलकं यस्य तादृशम् । श्रवणयोः कर्णयोः उल्लसती मकरकुण्डले मकराकारकुण्डले ताभ्यां युनक्तीति युक् युक्तमित्यर्थः । तादृशं वपुः प्रकटयतीति सर्वत्र पूर्वेणान्वयः ॥ ६५ ॥

मन्दोपकारिणी – मणीति ॥ कथंभूतं भगवद्रूपं इत्यत आह ॥ मणिराजीत्यादिना ॥ नवभानुभेत्यन्तेन श्लोकसमुदायेन । मणिराजिराजितमहामुकुटं मणीनां रत्नानां राजिः पङ्क्तिः तया राजितं शोभितं महत् अनर्घ्यं मुकुटं किरीटं यस्य तत् तथोक्तं 'मण्डनं चाथ मुकुटं किरीटं पुन्नपुंसकं' इत्यमरः शितिकान्तकुन्तलसहस्रतयं शित्या नीलकान्त्या 'शिती धवलमेचकः' इति 'कालश्यामलमेचकाः' इति च अमरः । कान्तं मनोहरं कुन्तलानां

शिरोरुहाणां सहस्रं यस्य तत्तथोक्तं 'चिकुरः कुन्तलो वालः' इत्यमरः अलिकार्धचन्द्र-विलसत्तिलकं अलिकं ललाटमेव अर्धचन्द्रः अर्धचन्द्राकारललाटं इत्यर्थः 'ललाटमलिकं गोधिः' इत्यमरः तस्मिन् विलसत् शोभमानं तिलकं रक्तद्रवद्रव्यकृतः पुण्ड्रः यस्य तत् तथोक्तम् । श्रवणोल्लसन्मकरकुण्डलयुक् श्रवणयोः श्रोत्रयोः 'श्रुतिः स्त्री श्रवणं श्रव' इत्यमरः उल्लसती विराजिते च ते मकरकुण्डले च ताभ्यां युक् युक्तम् ॥ ६५ ॥

परिपूर्णचन्द्रपरिहासिमुखं जलजायताक्षमरुणोष्टपुटम् ।
हसितावलोकललितैरतुलैरभिनन्दयत्प्रणतमात्मजनम् ॥ ६६ ॥

पदार्थदीपिकोद्बोधिका – परीति ॥ परिपूर्णो यश्चन्द्रस्तं परिहसितुं अपहसितुं शीलं अस्येति तादृशं मुखं यस्य तादृशम् । परिपूर्णचन्द्रादपि अतिकान्तिमत् इत्यर्थः । जलजवत् पद्मवत् आयते अक्षिणी यस्य तादृशम् । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षजि'ति षच् । अरुणमोष्ठपुटं यस्य तादृशम् । न विद्यते तुला उपमा येषां तैः । हसितेन मन्दहासेन युक्ता अवलोका निरीक्षणानि हसितावलोकाः त एव तेषामिति वा ललितानि विलासाः तैः प्रणतमात्मनो जनं भक्तजनं इत्यर्थः । अभिनन्दयत् सन्तोषयत् वपुरित्यादि पूर्ववत् ॥६६॥

मन्दोपकारिणी – परीति ॥ पुनः कथंभूतं, परिपूर्णचन्द्रपरिहासिमुखं परिपूर्णः षोडशकलापूर्णश्चासौ चन्द्रश्च तं परिहसति अपहसतीति परिहासि तादृशं मुखं यस्य तत् तथोक्तम् । जलजायताक्षं जलजवत् कमलवत् आयते विस्तृते अक्षिणी यस्य तत् तथोक्तम् । अरुणोष्ठपुटं अरुणं लोहितं ओष्ठयोः रदनच्छदयोः पुटं यस्य तत् तथोक्तम् । अतुलैः न विद्यते तुला उपमा येषां तानि अतुलानि असदृशानि इत्यर्थः तैः । हसितावलोकललितैः हसितेन मन्दहासेन युक्ताश्च ते अवलोकाः अवलोकनानि च त एव ललितानि विलासाः तैः । प्रणतं स्वस्मिन् नम्रं आत्मजनं आत्मनः स्वस्य जनं भक्तजनं अभिनन्दयत् सुखयत् ॥ ६६ ॥

नवकम्बुकण्ठमहिमांशुमहोमहिमोपलेन्द्रवरहारधरम् ।
रमणीयरत्नगणविद्धलसद्वलयाङ्गुलीयकवराङ्गदवत् ॥ ६७ ॥

पदार्थदीपिकोद्बोधिका – नवेति ॥ नवो नूतनो यः कम्बुः शङ्खः तद्वत् कण्ठो यस्य तादृशम् । तद्वत् रेखात्रययुक्तमित्यर्थः । अहिमा उष्णा अंशवः यस्य सः अहिमांशुः आदित्यः तस्य महस्तेजः तद्वत् महिमा तेजः यस्य सः अहिमांशुमहोमहिमा, स चासौ उपलेन्द्रो रत्नराजः कौस्तुभः स च वरहारश्च तौ धारयतीति तादृशम् । रमणीयानां रत्नानां गणेन विद्धानि खचितानि लसन्ति च तानि वलयांगुलीयकवराङ्गदानि वलयाश्च अङ्गुलीयकानि च वराङ्गदानि च अस्य सन्तीति तादृशं वपुः इत्यादि पूर्ववदन्वयः ॥ ६७ ॥

मन्दोपकारिणी – नवेति ॥ पुनः कथंभूतं, नवकम्बुकण्ठं नवः नूतनः 'नवीनो नूतनो नवः' इत्यमरः कम्बुः शङ्खः 'कम्बुर्ना वलये शङ्खे' इत्यमरः कण्ठो गलः 'कण्ठो गलोऽथ ग्रीवायां' इत्यमरः नवश्चासौ कम्बुश्च नवकम्बुः नवकम्बुवत् कण्ठो यस्य तत् तथोक्तं 'कम्बुग्रीवा त्रिरेखा सा' इत्यमरः शङ्खवत् त्रिरेखोपेतकण्ठयुतं इति भावः । अहिमांशुमहोमहिमोपलेन्द्रवरहारधरं हिमाः शीताः न भवन्तीति अहिमाः अंशवः किरणाः यस्य सः अहिमांशुः सूर्यः 'किरणोऽस्रमयूखांशुः' इत्यमरः तस्य महः कान्तिः 'कान्त्युत्सवौ तु महसि' इति रत्नमाला अहिमांशुमहोवत् महिमा कान्तिः यस्य स तथा । उपलेन्द्रः रत्नशिलानां इन्द्रः श्रेष्ठः कौस्तुभमणिः अहिमांशुमहोमहिमा च असौ उपलेन्द्रश्च इति तथोक्तः स च वरहारः उत्तममुक्तावली च धरतीति धरं तयोः धरं धारकं कौस्तुभरत्नोत्तमहारौ दधत् इत्यर्थः 'हारो मुक्तावली' इत्यमरः रमणीयरत्नगणविद्धलसद्वलयाङ्गुलीयकवराङ्गदवत् रमणीयानि मनोहराणि च तानि रत्नानि च तेषां गणः तेन विद्धानि खचितानि लसद्वलयं शोभमानकरभूषणं 'कटकं वलयोऽस्त्रियां' इत्यमरः अङ्गुलीयकं अङ्गलीभूषणं वराङ्गदं उत्तमकेयूरं बाहुभूषणं 'केयूरमङ्गदं तुल्ये' इत्यमरः लसद्वलये च अङ्गुलीयकानि च वराङ्गदे च लसद्वलयाङ्गुलीयकवराङ्गदानि विद्धानि च तानि वराङ्गदानि च। तानि अस्य सन्तीति तथोक्तम् ॥ ६७ ॥

रविचक्ररुक्प्रकरचक्रकरं विधुबिम्बकम्बु मधुराम्बुरुहम् ।
ज्वलनज्वलद्वदमुदारधनुः पृथुवृत्तहस्तमतिताम्रतलम् ॥ ६८ ॥

पदार्थदीपिकोद्बोधिका – रवीति ॥ रविचक्रं रविसमूहः तद्वत् रुक्प्रकरः तेजःसमूहः यस्य तत् रविचक्ररुक्प्रकरं तादृशं चक्रं सुदर्शनं करे यस्य तादृशम् । रविनिकरतेजोवत्

तेजोयुक्तचक्रधरमित्यर्थः । विधुबिम्बवत् कम्बुः शङ्खो यस्य तादृशम् । चन्द्रमण्डलवत् धवल पाञ्चजन्यधरमित्यर्थः । 'कम्बुर्ना वलये शङ्ख' इत्यमरः । मधुरं मनोहरं अम्बुरुहं पद्मं यस्य तादृशम् । ज्वलनवत् अग्निवत् ज्वलन्ती गदा कौमोदकी यस्य तादृशम् । उदारं उत्तमं धनुः शार्ङ्गं यस्य तादृशम् । पृथवो दीर्घा पुष्टा इत्यर्थः वृत्ता वर्तुला हस्ता यस्य तादृशम् । अतिताम्राणि तलानि हस्ततलानि यस्य तादृशं वपुः इत्यादि पूर्ववदन्वयः ॥ ६८ ॥

मन्दोपकारिणी – रवीति ॥ पुनः कथंभूतं, रविचक्ररुक्प्रकरचक्रकरं रवीणां सूर्याणां चक्रः समूहः 'चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः' इति विश्वः रुचां कान्तीनां प्रकरः समूहः रुक्प्रकरः 'पूगो वितानं प्रकरः' इत्यमरः रविचक्रवत् रुक्प्रकरो यस्य तत् रविचक्ररुक्प्रकरं तच्च तत् चक्रं सुदर्शनवक्रं च तत् करे हस्ते यस्य तत् तथोक्तं अनेकसूर्यकान्तिसदृशकान्तियुक्तचक्रधारिणम् । विंधुबिम्बकम्बु विधोः चन्द्रस्य बिम्बवत् मण्डलवत् विद्यमानः कम्बुः शङ्खः यस्य तत् चन्द्रमण्डलवत् धवलपाञ्चजन्यशङ्खधरं इत्यर्थः 'शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनं' इत्यमरः । मधुराम्बुरुहं मधुरं सुन्दरं अम्बुरुहं पद्मं यस्य तत् । ज्वलनज्वलद्वदं ज्वलनवत् अग्निवत् ज्वलन्ती प्रकाशमाना गदा कौमोदकी यस्य तत् तथोक्तं 'कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्' इत्यमरः 'कौमोदकी गदा खड्गः' इत्यमरः । उदारधनुः उदारं महद्धनुः शार्ङ्गाख्यचापः यस्य तत् तथोक्तम् । पृथुवृत्तहस्तं पृथू स्थूलौ पुष्टौ इति यावत् वृत्तौ वर्तुलौ हस्तौ यस्य तत् तथोक्तम् । कथंभूतं हस्तं अतिताम्रतलं अतिताम्रे अतिरक्ते तले यस्य तत् तथोक्तं 'ताम्रं शुल्बेऽरुणेऽन्यवत्' इति विश्वः । अनेन चक्रशङ्खगदापद्मयुक्तचतुर्भुजयुक्तरूपं इदमुक्तं भवति ॥ ६८ ॥

वरपीवरांसमधिराजदुरोमणिमण्टपाग्र्यविलसत्कमलम् ।
सजगद्विसप्तकतनूदरकं शुभनाभिकञ्जगतकालिनुतम् ॥ ६९ ॥

पदार्थदीपिकोद्बोधिका – वरेति ॥ वरौ श्रेष्ठौ पीवरांसौ पुष्टस्कन्धौ यस्य तादृशम् । 'स्कन्धो भुजशिरोंऽसोऽस्त्री'त्यमरः । अधिकं राजद्विराजमानं अधिराजत् तत् च तदुरश्च तदेव मणिमण्टपाग्र्यो रत्नमयमण्टपश्रेष्ठः तस्मिन् विलसन्ती कमला रमा यस्य तादृशम् । जगतां लोकानां यद्विसप्तकं चतुर्दश तेन सहितं सजगद्विसप्तकं तादृशं तनूदरं सूक्ष्मजठरं यस्य तादृशम् । बहुव्रीहौ कः । शुभो यो नाभिः तस्य यत्कञ्जं कमलं, तत् गतः प्राप्तः कः चतुर्मुखः स एव अलिः भ्रमरः तेन नुतं स्तुतं वपुः इत्यादि पूर्ववदन्वयः ॥ ६९ ॥

मन्दोपकारिणी – वरेति ॥ पुनः कथंभूतं, वरपीवरांसं वरौ पीवरौ पुष्टौ अंसौ स्कन्धौ यस्य तत् तथोक्तं 'पीने तु स्थूलपीवरौ' इत्यमरः । 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इत्यमरः । अधिराजदुरोमणिमण्टपाग्र्यविलसत्कमलं अधिराजत् शोभमानं च तत् उरो वक्षश्च 'उरो वत्सं च वक्षश्च' इत्यमरः मण्टपेषु अग्र्यं श्रेष्ठं मण्टपाग्र्यं मणिखचितं च तत् मण्टपाग्र्यं च मणिमण्टपाग्र्यं अधिराजदुर एव मणिमण्टपाग्र्यं तस्मिन् विलसन्ती कमला लक्ष्मीः यस्मिन् तत् । सजगद्विसप्तकतनूदरकं जगतः द्विसप्तकं जगद्विसप्तकेन सहितं सजगद्विसप्तकं तनु सूक्ष्मं च तत् उदरं जठरं च तनूदरं सजगद्विसप्तकं तनूदरं यस्य तत् तथोक्तम् । शुभनाभिकञ्जगतकालिनुतं नाभिरेव कञ्जं पद्मं शुभं च तत् नाभिकञ्जं च तस्मिन् गतः विद्यमानश्चासौ कः ब्रह्मा च 'कः प्रजापतिरुद्दिष्टः' क एव अलिः भ्रमरः तेन नुतं स्तुतं 'षट्पदभ्रमरालयः' इत्यमरः ॥ ६९ ॥

अतिकान्तकाञ्चिपदकाञ्चिमिलत्तपनीयभङ्गरुचिपिङ्गपटम् ।
वरहस्तिहस्तसदृशोरुयुगं क्रमवृत्तचारुतरजङ्घमुत ॥ ७० ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ अतिकान्तं अतिमनोहरं काञ्चिपदं काञ्चिस्थानं कटिप्रदेशः तस्य या कान्तिः तया मिलन् सम्बध्यमानः तपनीयभङ्गरुचिपिङ्गपटः तपनीयभङ्गस्य स्वर्णच्छेदस्य रुचिवत् कान्तिवत् पिङ्गः पीतः पटो यस्य तादृशम् । 'ङ्याप्पोः संज्ञा छन्दसोर्बहुलमिति संज्ञायां विकल्पेन पुंवद्भावविधाना'त्काञ्चिपद'मित्यत्र पुंवद्भावः । 'काञ्चीपदं कलत्रं जघनं श्रोणी'ति हलः । वर उत्तमो यो हस्तिहस्तः तस्य सदृशौ उरू तयोः युगं युगलं यस्य तादृशम् । क्रमेण वृत्ते वर्तुले ईषत्कृश इति यावत् । तादृशे चारुतरजङ्घे यस्य तादृशं चारुतरजङ्घम् । उत वपुः इत्यादि पूर्ववदन्वयः ॥ ७० ॥

मन्दोपकारिणी – अतीति ॥ पुनः कथंभूतं, अतिकान्तकाञ्चिपदकाञ्चि-मिलत्तपनीयभङ्गरुचिपिङ्गपटं अतिकान्ते अतिमनोहरे कांच्याः मेखलायाः पदे स्थाने कटिप्रदेशे विद्यमानया कांच्या मिलत् संयुक्तम् । तपनीयस्य सुवर्णस्य भङ्गः छेदः छिन्नखण्डः तस्य रुचिवत् कान्तिवत् पिङ्गः पीतवर्णः पटः वस्त्रं यस्य तत् तथोक्तं कटिप्रदेशे पीताम्बरं तदुपरि काञ्ची वर्तते इति ज्ञेयं 'हिरण्यं हेमहाटकं तपनीयं शातकुम्भं' इत्यमरः । वरहस्तिहस्तसदृशोरुयुगं वरहस्तिनः उत्तमगजस्य 'दन्तीवलो हस्ती' इत्यमरः

हस्तः शुण्डादण्डः तेन सदृशं ऊर्वोः सक्थ्नोः युगं युगलं यस्य तत् तथोक्तं 'सक्थि क्लीबे पुमानूरुः' इत्यमरः ऊरुर्नाम जानूपरितनः कटेः अधस्थभागः गजशुण्डावत् क्रमात् पीनवृत्तोरुद्वययुक्तं इति भावः । क्रमवृत्तचारुतरजङ्घमुत अतिशयेन चारुणी चारुतरे अतिसुन्दरे ते च ते जङ्घे च क्रमेण वृत्ते वर्तुले चारुतरजङ्घे यस्य तत्तथोक्तं च ॥ ७० ॥

वरनूपुरं परमरुक्प्रपदं नवविद्रुमद्युतिनखावलिमत् ।
अरिवारिजध्वजकलङ्कलसत्पदपांसुपावितजगत्त्रितयम् ॥ ७१ ॥

पदार्थदीपिकोद्बोधिका – वरेति ॥ वरे नूपुरे पादभूषणे यस्य तादृशम् । परमा रुक् कान्तिः ययोस्ते परमरुची तादृशे प्रपदे पादाग्रे यस्य तादृशं 'पादाग्रं प्रपदमि'त्यमरः । नवो यो विद्रुमः तस्य द्युतिरिव द्युतिः कान्तिः येषां तादृशा नखा यासां ता अङ्गुलयः ता अस्मिन् सन्तीति तादृशम् । अरिः चक्रं वारिजं पद्मं ध्वजश्च तेषां ये कलङ्का लाञ्छनानि तैः लसती शोभमाने पदे पादौ तयोः पांसवः तैः पावितं पवित्रीकृतं जगत्त्रितयं त्रैलोक्यं येन तादृशम् । 'कलङ्काङ्कौ लाञ्छनं च' इत्यमरः । वपुरित्यादि पूर्ववत् ॥ ७१ ॥

मन्दोपकारिणी – वरेति ॥ पुनः कथं भूतं वरनूपुरं वरः उत्तमः नूपुरः पादभूषणं यस्य तत् तथोक्तम् । परमरुक्प्रपदं परमा रुक् कान्तिः ययोः परमरुची प्रपदे पादाग्रे यस्य तत् तथोक्तम् । नवविद्रुमद्युतिनखावलिमत् नवाश्च ते विद्रुमाः प्रवालाश्च नवविद्रुमवत् द्युतिः लोहितकान्तिः येषां ते नवविद्रुमद्युतयः ते च ते नखाः कररुहाश्च नखानां आवलिः पङ्क्तिः अस्यास्तीति तत्तथोक्तम् । अरिवारिजध्वजकलङ्कलसत्पदपांसुपावितजगत्त्रितयं अरिः चक्रं च वारिजं पद्मं च ध्वजश्च अरिवारिजध्वजाः तेषां कलङ्काः रेखारूपलांछनानि 'कलङ्काङ्कौ लांछनं च' इत्यमरः, तैः लसती शोभमाने च ते पदे चरणे च तयोः पांसुभिः धूलिभिः पावितं पवित्रीकृतं जगतां त्रितयं येन तत् तथोक्तम् । 'रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयोरजः' इत्यमरः ॥ ७१ ॥

निखिलागमावगमितैरमितैः सुखसंविदादिभिरनन्तगुणैः ।
प्रपदादिकान्तसकलावयवाकृतिभिः सदैक्यवददोषलवम् ॥ ७२ ॥

भावप्रकाशिका – सुखबोधावेव सौरभसुरूपगुणाश्चास्य । 'सदेहः सुखगन्धश्च ज्ञानभाः सत्पराक्रम' सति श्रुतेः ॥ ७२ ॥

पदार्थदीपिकोद्बोधिका – निखिलेति ॥ निखिला य आगमा वेदाः तैः अवगमिता ज्ञाता उदिता इति यावत् तैः । अमितैः प्रत्येकं अपरिमितैः । सुखं च संवित् च त आदी येषां तैः अनन्तगुणैः । प्रपदं पादाग्रं आदिः येषां ते प्रपदादयः । कं शिरः अन्तं अवसानं येषां ते कान्ताः ते च ते सकलावयवाश्च प्रपदादिकान्तसकलावयवाः ते च आकृतयः सकलजीवगतसकलप्रादुर्भावगतस्वरूपाणि ताश्च ताभिः । सदा ऐक्यं अस्यास्तीति ऐक्यवत् । ज्ञानानन्दाद्यनन्तगुणैः करचरणादिसकलावयवैः प्रादुर्भावादिगतस्वरूपैश्च सदा भेदरहितमिति भावः । 'देहदेहीविभागश्च न क्वचित्परमेश्वरे । गुणैस्तद्वद्विभागो वा नेहनाने'ति स्मृतिश्रुतिसिद्धमेतत् । न विद्यते दोषलवः दौषैकदेशो यस्य तादृशम् । दोषैकदेशेनापि रहितमित्यर्थः । वपुरित्यादि पूर्ववदन्वयः ॥ ७२ ॥

मन्दोपकारिणी – निखिलेति ॥ पुनः कथंभूतं निखिलागमावगमितैः निखिलाः अशेषाश्च ते आगमाः वेदादिसच्छास्त्राणि च 'आगमस्त्वागते शास्त्रे' इत्यमरः, तैः अवगमितैः प्रतिपादितैः । अमितैः प्रत्येकं अनन्तैः । सुखसंविदादिभिः सुखं च संवित् ज्ञानं च सुखसंविदौ ते आदी येषां ते सुखसंविदादयः तैः । अनन्तगुणैः अनन्ताश्च ते गुणश्च तैः । प्रपदादिकान्तसकलावयवाकृतिभिः प्रपदं पादाग्रं आदिः येषां ते प्रपदादयः कं शिरः अन्तं चरमं येषां ते कान्ताः प्रपदादयश्च ते कान्ताश्च प्रपदादिकान्ताः 'मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोम्बुनोः' इत्यमरः, सकलाश्च ते अवयवाश्च तथोक्ताः प्रपदादि-कान्ताश्च ते सकलावयवाश्च तथोक्ताः तैः पादाग्रमारभ्य शिरःपर्यन्तैः सर्वावयवैश्च प्रपदादिभिः कान्तैः मनोहरैः सकलावयवैः इति वा आकृतिभिः अवतारैश्च सदा ऐक्यवत् ऐक्यं अस्यास्तीति ऐक्यवत् अत्यन्ताभिन्नं सकलवेदोक्तैः ज्ञानानन्दाद्यनन्तगुणैः हस्तपादाद्यवयवैः अनन्तावतारैश्च सदा अत्यन्ताभिन्नं, इति भावः । अदोषलवं दोषाणां अज्ञानपारतन्त्र्यादिदोषाणां लवः लेशः दोषलवः । न विद्यते दोषलवोऽपि यस्य तत् तथोक्तम् । 'लवलेशकणाणवः' इत्यमरः ॥ ७२ ॥

अधिकारिणां गुणविशेषवशाद्विपदाद्यनन्तचरणान्ततया ।
अतिभासितं घनगुणापघनैरितरैश्च तत्तदुचितै रुचिरैः ॥ ७३ ॥

पदार्थदीपिकोद्बोधिका – अधिकारिणामिति ॥ अधिकारिणां मनुष्यादिब्रह्मान्तानां भगवदुपासनाधिकारिणां गुणेषु ज्ञानभक्त्यादिगुणेषु विशेषवशात् तारतम्यविशेषवशात्, द्वे पदे, यस्य तद्विपदं रूपं तदादिर्यस्य तद्विपदादि । अनन्ताश्चरणा यस्य तदनन्तचरणं रूपं, तदन्ते यस्य तदनन्तचरणान्तम् । द्विपदादि च तत् अनन्तचरणान्तश्च तस्य भावः तत्ता तया । द्विपदं रूपमारभ्यानन्तचरणरूपावसानतयेत्यर्थः । ये द्विपदरूपदर्शनाधिकारिणः तान् प्रति द्विपदतयाऽतिभासितं, एवमुत्तरोत्तरं ये ये यद्यद्रूपदर्शनाधिकारिणः तान् तान् प्रति तथा तथावभासितम् । न केवलं द्विपदादित्वमेव रूपाणां किन्त्वितरैः पादातिरिक्तैः, घनाः प्रत्येकं परिपूर्णा गुणा ज्ञानानन्दाद्यनन्तगुणास्तदात्मका अपघनाः शिरोनयनाद्यवयवाः तैः अपि तस्य तस्योदितास्तत्तदुदितास्तैः द्विपदादितत्तद्रूपाणामुदितैः रुचिरैर्मनोहरैरव-यवैरवभासितम् । अत्र तत्तदुचितैरिति तारतम्यस्थितानां तत्तदधिकारिणां द्रष्टुमुचितैरेक-शिराद्यवयवैश्च अवभासितं इति वा । एतादृशं वपुरित्यादि पूर्ववदन्वयः ॥ ७३ ॥

मन्दोपकारिणी – अधिकारिणामिति ॥ पुनः कथंभूतं अधिकारिणां मनुष्यादिब्रह्मान्तानां भगवद्रूपोपासकानां गुणविशेषवशात् गुणाः ज्ञानभक्त्यादयः, तेषु विशेषः तारतम्यं तस्य वशात् योग्यतातारतम्यवशात् वा द्विपदाद्यनन्तचरणान्ततया द्वे पदे चरणे यस्य तत् द्विपदं तत् आदि येषां तानि । द्विपदादीनि अनन्तचरणान्तानि अनन्तचरणं अन्ते येषां तानि अनन्तचरणान्तानि । द्विपदादीनि अनन्तचरणान्तानि रूपाणि यस्य वपुषः तत् द्विपाद्यनन्तचरणान्तं तस्य भावः तत्ता तया । अतिभासितं प्रतिभातम् । तथा तत्तदुचितैः तानि च तानि च तत्तानि तेषां द्विपदाद्यनन्तपादान्तरूपाणां उचितैः योग्यैः रुचिरैः सुन्दरैः द्विपदाद्यनन्तपादावसानरूपेषु यद्यद्रूपे यावत् यावत् अवयवैः सौन्दर्यं भवति तावत् तावद्भिः इति भावः । इतरैः पादातिरिक्तैः घनगुणापघनैः घनाः परिपूर्णाः गुणाः ज्ञानानन्दादयः घनगुणात्मकाश्च ते अपघनाः शिरोनयनाद्यवयवाः तैरपि अतिभासितं प्रतीतं 'अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरं' इत्यमरः । अयं भावः । ये द्विपादरूपदर्शनाधिकारिणः तान् प्रति द्विपादतया तथा तद्रूपोचितैः एकशीर्षद्विहस्ताद्य-वयवैश्च प्रतिभासितम् ।। एवं उत्तरोत्तरं ये ये यावत् यावत् पादयुक्तरूपदर्शनाधिकारिणः तान्

तान् प्रति तावत् तावत् पादैः तादृशरूपोचितशिरःपाण्याद्यवयवैश्च प्रतिभासितं एवं अनन्तचरणरूपदर्शनाधिकारिणः प्रति अनन्तचरणैः अनन्तशिरःपाण्याद्यवयवैश्च प्रतीयमानं इति ॥ ७३ ॥

नवभानुभाः कनककान्ति परं वरहारहारि हरिनीलहरित्।
शबलप्रभादिविविधद्युतिमत्सुखबोधसौरभसुरूपगुणम् ॥ ७४ ॥

पदार्थदीपिकोद्बोधिका – नवेति ॥ नवभानोः उद्यद्भानोः भास इव भासः दीप्तयो यस्य तत् नवभानुभाः । परं अन्यत् । 'परं रूपान्यमुख्येषु परोऽरिपरमात्मनोरि' त्यभिधानम्। कनकवत् सुवर्णवत् कान्तिः यस्य तत् कनककान्ति । वरहार उत्तमहारः तद्वत् हारि मनोहरम् । 'हृद्यं हारि मनोहरञ्च रुचिरमि'ति हलः । अन्यत् हरिनील इन्द्रनीलमणिः तद्वत् हरित् नीलम् । अपरं, शबला च सा प्रभा च सा आदिः यासां ता शबलप्रभादयः तादृशा या विविधद्युतयो नानाकान्तयः ता अस्य सन्तीति । अन्यत् सुखञ्च बोधश्च सुखबोधौ तदात्मकाः सौरभसुरूपगुणाः सौरभं परिमलः तच्च, सुरूपं गुणाश्च यस्य तादृशं रूपमिह वैकुण्ठे मोक्षिणो मुक्तानानन्दयतीत्युत्तरश्लोकेन सम्बन्धः । एतादृशं वपुः प्रकटयतीति पूर्ववद्वाऽन्वयः ॥ ७४ ॥

मन्दोपकारिणी – नवेति ॥ पुनः कथंभूतं, नवभानुभाः नवः नूतनश्चासौ भानुः सूर्यश्च नवभानुः उद्यदादित्यः स इव भाः दीप्तिः यस्य तत् तथोक्तं 'भाश्छविद्युतिदीप्तयः' इत्यमरः । भानुभाः भानुभासी भानुभांसी इति रूपाणि । परं अन्यत् रूपं 'परं दूरान्यपरमं' इति हलायुधः । कनककान्ति सुवर्णवत् कान्तिः पीतवर्णो यस्य तत् तथोक्तम्। परं अन्यत् रूपम् वरहारहारि वरहारवत् मुक्ताहारवत् हारि मनोहारि शुभ्रवर्णं इत्यर्थः । परं अन्यत् रूपं हरिनीलहरित् इन्द्रनीलवत् हरित् नीलकान्ति । अपरं रूपं शबलप्रभादिविविधद्युतिमत् शबला कर्बुरा च सा प्रभा च शबलप्रभा वर्णान्तरमिश्रकान्तिः इत्यर्थः 'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे' इत्यमरः शबलप्रभा आदिः यासां ताः शबलप्रभादयः आदिपदेन कपिलहरितौ ग्राह्यौ । विविधाश्च ताः द्युतयः कान्तयश्च । शबलप्रभादयः विविधयद्युतयः अस्य सन्तीति तत् तथोक्तम् । सुखबोधसौरभसुरूपगुणं सुरूपं शोभनदेहश्च गुणाः तद्धर्माश्च सुरूपगुणाः सुखबोधाः आनन्दज्ञानात्मकाः सौरभाः

परिमलात्मकाः सुरूपगुणाः यस्य तत् तथोक्तं तादृशं अतिसुन्दरं वपुः मुक्तानां नित्यं दर्शयतीति पूर्वश्लोकेनान्वयः । आदिकुलकमेतत् ॥ ७४ ॥

आश्चर्यरत्नेष्वधिकं जगत्त्रयेऽप्याश्चर्यमाश्चर्यमहो मुहुर्मुहुः ।
सौन्दर्यसारैकरसं रमापते रूपं सदानन्दयतीह मोक्षिणः ॥ ७५ ॥

पदार्थदीपिकोद्बोधिका – आश्चर्येति ॥ जगतां त्रयं जगत्त्रयं तस्मिन् । आश्चर्येषु अद्भुतेषु वस्तुषु रत्नानि श्रेष्ठानि तेषु । 'रत्नं स्वजातिश्रेष्ठेऽपी'त्यमरः । अधिकं अत्यन्तं आश्चर्यं अद्भुतम् । मुहुर्मुहुः पुनःपुनः दर्शनेऽप्याश्चर्यं महदाश्चर्यम् । सौन्दर्येण साराः श्रेष्ठास्तेष्वेकरसं परमसुन्दरं रमापते रूपं स्वरूपमिह मोक्षे मोक्षिणः समानन्दयति । अहो अद्भुतम् । यद्वा जगत्त्रय आश्चर्यरत्नेष्वपि अधिकमाश्चर्यम् । आश्चर्यं महः तेजो यस्य तदाश्चर्यमहः सौन्दर्यसारैकरसं रमापते रूपं मोक्षिणः आनन्दयतीति । इन्द्रवशावृत्तम् । 'स्याच्चेन्द्रवंशा यदि तौजरौ तदा' इत्युक्तेः ॥ ७५ ॥

मन्दोपकारिणी – आश्चर्येति ॥ जगत्त्रये लोकत्रये आश्चर्यरत्नेष्वपि अद्भतश्रेष्ठेष्वपि मध्ये 'रत्नं श्रेष्ठे मणिष्वपि' इति विश्वः । अधिकं अत्यन्तं आश्चर्यं मुहुर्मुहुः पुनःपुनः दर्शनेऽपि अहो आश्चर्यमाश्चर्यं महदाश्चर्यकरम् । पुनःपुनः दर्शनेऽपि प्रतिक्षणं अभिनवत्वेन प्रतीयमानत्वात् इति भावः । सौन्दर्यसारैकरसं सौन्दर्येण सारेषु उत्तमेषु मध्येऽपि एकरसं एकः केवलः रसः सौन्दर्यरसः यस्य तत् परमसुन्दरं तत् । पूर्वोक्तगुणोपेतं रमापतेः लक्ष्मीपतेः रूपं रह वैकुण्ठे मोक्षिणः मोक्षो येषां अस्तीति मोक्षिणः तान् मुक्तान् जनान् सदा आनन्दयति सुखयति । इन्द्रवंशावृत्तम् 'स्याचेन्द्रवंशा यदि तौ जरौ तदा' ॥ ७५ ॥

इज्यते यज्ञशीलैः स यज्ञः प्राज्ञमध्ये परः प्रोच्यतेऽन्यैः ।
गीयते गेयकीर्तिः सुगीतैर्विध्यबद्धैः सदाऽऽनन्दसान्द्रैः ॥ ७६ ॥

पदार्थदीपिकोद्बोधिका – इज्यत इति ॥ इज्यत इति । याति जानातीति वा यज्ञः, तन्नामकः स भगवान् विधिना विधिनिषेधशास्त्रेण अबद्धा विध्यबद्धाः तैः सदानन्दो निर्दुष्टानन्दस्तेन सान्द्रैः पूर्णैः । यज्ञेषु शीलमेषां ते यज्ञशीलाः तैः । पूर्वं यज्ञकर्माणि प्राचुर्येण कृतवद्भिः इत्यर्थः । यज्ञा राजसूयाश्वमेधादयः । इज्यते । अन्यैः पूर्वं प्रवचननिरतैः

पुरुषैः प्राज्ञमध्ये विद्वन्मध्ये परः सर्वोत्तमः प्रोच्यते । व्याख्यां कुर्वद्भिः सर्वोत्तमत्वेन समर्थ्यत इति भावः । गेया कीर्तिः यस्य स श्रीहरिः । सु शोभनं गीतं गानविद्या येषां तैः गीयते । किमेते प्रत्यवायपरिहारार्थमेवं कुर्वन्ति, आनन्दातिशयार्थं वेत्याशङ्कायां क्रमेणोभयमपि परिहर्तुं 'विध्यबद्धैः' 'सदानन्दसान्द्रै'रित्युक्तम् । विधिबद्धत्वाभावात् न प्रत्यवाय-परिहारार्थम् । आनन्दपूर्णत्वात् न आनन्दातिशयार्थं च इति भावः ॥ ७६ ॥

मन्दोपकारिणी – इज्यत इति ॥ यज्ञशीलैः ये मुक्तैः पूर्वं यज्ञकर्माधिकारिणः कर्माणि प्राचुर्येण अनुष्ठितवन्तः तैः यज्ञानुष्ठानस्वभावैः मुक्तैः पुरुषैः यज्ञः विष्णुः 'यज्ञो विष्णुर्देवता' इति श्रुतिः । इज्यते यशः पूज्यते 'यज देवपूजासङ्गतिकरणदानेषु इति धातोः कर्मणि लट् आत्मनेपदम्' । अन्यैः कैश्चन पुरुषैः ये प्राक् व्याख्यानरताः तैः प्रवचनशीलैः मुक्तैः प्राज्ञमध्ये प्राज्ञानां विदुषां मध्ये सः विष्णुः परः सर्वोत्तमः प्रोच्यते व्याख्यायते । व्याख्यातृभिः सर्वोत्तमत्वेन समर्थ्यते इति भावः । 'प्र पूर्वात् वच परिभाषणे इत्यतः कर्मणि लट् आत्मनेपदम्' । सुगीतैः शोभनं गीतं गानं येषां ते सुगीताः 'गीतं गानं इमे समे' इत्यमरः । पूर्वं ये गायनशीलाः तैः मुक्तैः गेयकीर्तिः गेये गातुं योग्या कीर्तिः यस्य सः विष्णुः गीयते गायनेन स्तूयते । 'गै शब्द इत्यतः कर्मणि लट् आत्मनेपदम्' । कथंभूतैः मुक्तैः विध्यबद्धैः कर्मानुष्ठाननियमेन अबद्धैः रहितैः प्रत्यवायपरिहारार्थत्वेन अवश्यं कर्म कर्तव्यमेव इत्येवंरूपविधिबन्धरहितैः इति भावः । पुनः कथंभूतैः सदानन्दसान्द्रैः सता निर्दोषेण वृद्धिह्रासरहितेन आनन्देन सान्द्रैः पूर्णैः इति । एतेन मुक्तानां यज्ञादिकर्मकरणं प्रत्यवायपरिहारार्थमिति न विधिबन्धशून्यत्वात् किन्तु आनन्दोद्रेकादेव । नापि आनन्दातिशयार्थं आनन्दपरिपूर्णत्वात् इत्युक्तं भवति ॥ ७६ ॥

वैकुण्ठे ते श्रीविशेषा जनानामत्याश्चर्यं चित्तवाचामभूमिः ।
वैकुण्ठेते श्रीविशेषाजनानामुक्तश्लाघ्ये युक्तमेतादृशत्वम् ॥ ७७ ॥

भावप्रकाशिका – वैकुण्ठे वर्तमानानां जनानां श्रीविशेषाश्चित्तवाचामगोचराः । वैकुण्ठेन प्राप्ते । लक्ष्मीगरुडानन्तब्रह्मादिभिः शक्रादिनानाविशिष्टजनैश्च श्लाघ्ये तत्र युक्तमेवं विधत्वम् ॥ ७७ ॥

पदार्थदीपिकोद्बोधिका – वैकुण्ठ इति ॥ वैकुण्ठे जनानामुक्ता श्रीविशेषाः शोभाविशेषा ऐश्वर्यविशेषा वा अत्याश्चर्यं अतिचित्रं चित्तानि च वाचश्च तासां, इतरेषां चित्तवाचां च अभूमिः आस्पदं न भवति । 'भूमिः क्षितौ स्थानमात्र' इत्यभिधानम् । तथा हि वैकुण्ठेन श्रीहरिणा इते प्राप्ते तत्सन्निहित इति यावत् । 'वैकुण्ठा-विन्द्रकेशवा'वित्यभिधानम् । श्रीः लक्ष्मीः विः पक्षी गरुडः शेषः अजः चतुर्मुखः श्रीविशेषाजाः ते च ते नानामुक्ताः च तैः श्लाध्ये श्लाघनीये वैकुण्ठलोक एतादृशत्वं एवं विधत्वं युक्तं उपपन्नम् । असम्भावितं न भवतीति भावः । शालिनीवृत्तम् । 'मस्तौ गौ चेच्छालिनी वेद लोकैरि'त्युक्तेः ॥ ७७ ॥

मन्दोपकारिणी – वैकुण्ठ इति ॥ वैकुण्ठे वैकुण्ठलोके जनानां ते पूर्वोक्ताः श्रीविशेषाः श्रियः शोभायाः विशेषाः 'श्रीर्वेषरचना शोभा' इति विश्वः, संपद्विशेषा वा 'सम्पत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः । अत्याश्चर्यं अतिचित्रं चित्तवाचां चित्तानि मनांसि वाचः वागिन्द्रियाणि च तासां अभूमिः भूमिः स्थानं न भवतीति अभूमिः मनसा स्मर्तुं वाचा व्याहर्तुं च गोचरा न भवन्तीति भावः । 'भूमिः क्षितौ स्थानमात्रे' इति हलायुधः । वैकुण्ठे एतादृशमाहात्म्यं युक्तमेव इत्याह- ॥ वैकुण्ठेति ॥ वैकुण्ठेते श्रीविशेषा-जनानामुक्तश्लाध्य इति पदच्छेदः । वैकुण्ठेते वैकुण्ठो नारायणः 'वैकुण्ठो विष्टरश्रवाः' इत्यमरः तेन प्रत्यक्षभूतेन इते युक्तेन सन्निहिते श्रीविशेषाजनानामुक्तश्लाघ्ये श्रीः लक्ष्मीश्च विः पक्षी गरुडश्च 'विः पक्षिपरमात्मनोः' इत्यमरः शेषः शेषदेवश्च अजो ब्रह्मा च श्रीविशेषाजाः नानाविधाश्च ते मुक्ताश्च श्रीविशेषाजाश्च ते नानामुक्ताश्च तैः श्लाघ्ये प्रशंसनीये अस्मिन् भगवल्लोके एतादृशत्वं पूर्वोक्तगुणवत्वं युक्तमेव न असम्भावितं इति भावः । 'मस्तौ गौ चेच्छालिनी वेद लोकैः' इत्युक्तेः शालिनीवृत्तम् ॥ ७७ ॥

यं यं सुखी कामयतेऽर्थमत्र सङ्कल्पमात्रात् सकलोऽपि स स्यात् ।
इत्येव वेदा अपि वेदयन्ति मुक्तिं ततः को विभवातिरेकः ॥ ७८ ॥

भावप्रकाशिका – ''स यदि पितृलोककामो भवति सङ्कल्पादेव पितरः समुत्तिष्ठन्ती'' ति । स यदि स्त्रीलोककाम इत्याद्युक्त्वा 'यं यमर्थमभिकामो भवति । सोऽस्य सङ्कल्पादेव भवति यं यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठती'त्यादयो वेदाः ॥ ७८ ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायामेकादशः सर्गः ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – यं यमिति ॥ सुखं अस्यास्तीति सुखी मुक्तः । स हि निर्दुःखपरमानन्दत्वात्सुखीत्युच्यते । अत्र वैकुण्ठे यं यं अर्थ्यत इत्यर्थः, तं विषयादिकं कामयते इच्छति । सः सः सकलो विषयः केवलं सङ्कल्पः सङ्कल्पमात्रं तस्मात् स्यात् । वेदा अपि 'स यदि पितृलोककामो भवति सङ्कल्पादेव अस्य पितरः समुत्तिष्ठंति । स यदि मातृलोककामो भवति सङ्कल्पादेव अस्य मातरः समुत्तिष्ठन्ति । स यदि स्त्रीलोककामो भवति सङ्कल्पादेव अस्य स्त्रियः समुत्तिष्ठन्ति' । इत्याद्युक्त्या मुक्तिं मोक्षं वेदयन्ति ज्ञापयन्ति प्रतिपादयन्तीत्यर्थः । ततः सङ्कल्पमात्रसुलभार्थयुक्तमुक्तेः अन्यः विभवातिरेको विभवातिशयः कः? न कोऽपीत्यर्थः । इन्द्रवज्रावृत्तम् ॥ ७८ ॥

मन्दोपकारिणी – यं यमिति ॥ सुखी सुखं अस्यास्तीति सुखी निर्दुःखपरमानन्द-स्वरूपत्वात् सुखीत्युच्यते । अत्र वैकुण्ठे यं यं अर्थं अर्थ्यमानत्वात् अपेक्षणीयविषयं कामयते इच्छति । 'कमु कान्तौ इत्यतः लट् आत्मनेपदम्' । सः सकलः सर्वोऽपि विषयः संकल्पमात्रात् इदं अनुभविष्यामीति केवलं सङ्कल्पादेव न तु प्रयत्नादिति भावः । स्यात् सिध्येत् 'अस् भुवीत्यतो लिङ् परस्मैपदं स्यात् स्यातां स्युः' । वेदा अपि स यदि पितृलोककामो भवति सङ्कल्पादेव अस्य पितरः समुत्तिष्ठन्ति इत्यादयो वेदा अपि मुक्तिं मोक्षं इत्येव एवमेव सङ्कल्पमात्रसुलभार्थं मुक्तानामेव वेदयन्ति । 'विद ज्ञाने इत्यतो णिजंताल्लट् परस्मैपदम्' । ततः तस्याः सङ्कल्पमात्रसुलभार्थयुक्तायाः मुक्तेः अन्यः विभवातिरेकः ऐश्वर्यस्य अतिशयः कः न कोऽपीत्यर्थः अनायासलभ्यदुःखासम्भिन्न-सुखानुभवस्यैव पुरुषार्थत्वात् वैकुण्ठे तदतिरिक्तस्य अभावात् तस्य च सत्वात् इति भावः 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति वचनात् इन्द्रवज्रावृत्तम् ॥ ७८ ॥

महानन्दतीर्थस्य ये भाष्यभावं मनोवाग्भिरावर्तयन्ते स्वशक्त्या ।
सुराद्या नरान्ता मुकुन्दप्रसादादिमं मोक्षमेते भजन्ते सदेति॥ ७९ ॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते सुमध्वविजये महाकाव्ये आनन्दाङ्के एकादशः सर्गः ॥

पदार्थदीपिकोद्बोधिका – महानन्देति ॥ सुरा आद्या येषां तादृशा । नरा अन्तेऽवसाने येषां तादृशा येऽधिकारिणः ते महान् य आनन्दतीर्थः तस्य भाष्यभावं भाष्यार्थं, मनांसि च वाचश्च ताभिः स्वशक्त्या आवर्तयन्ते श्रवणमननव्याख्यारूपां आवृत्तिं कुर्वन्ति । एते मुकुन्दप्रसादात् भगवदनुग्रहात् इमं मोक्षं सदा भजन्ते प्राप्नुवन्ति । सदा इत्यपुनरावृत्तिः उच्यते । इतिशब्देन 'इति तैरुदीरितमुदारमतिरि'त्यादिशेषवाक्यपरिसमाप्तिर्द्योत्यते । इति हेतुप्रकरणप्रकारादिसमाप्तिष्वि'त्यमरः । भुजङ्गप्रयातं वृत्तम् । 'भुजङ्गप्रयातं चतुर्भिर्यकारैः' इत्युक्तेः ॥ ७९ ॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ
पदार्थदीपिकोद्बोधिकायां एकादशः सर्गः ॥

मन्दोपकारिणी – महानन्देति ॥ सुराद्याः सुराः आदयो येषां ते सुराद्याः । नरान्ताः नराः मनुष्याः अन्ताः चरमाः येषां ते नरान्ताः 'पुंस्यादिपूर्वपौरस्त्यप्रथमाद्याग्रिमास्त्रिषु' इत्यमरः । 'अन्तो जघन्यं चरममंत्यपाश्चात्यपश्चिमम्' इत्यमरः । ये अधिकारिणः महानन्दतीर्थस्य महान् सर्वजीवोत्तमश्चासौ आनन्दतीर्थश्च तस्य भाष्यभावं भाष्यस्य मध्वकृतश्रीमद्ब्रह्मसूत्रभाष्यस्य भावं अभिप्रायं अभिप्रेतार्थं इत्यर्थः । 'भावोऽभिप्राय आशयः' इत्यभिधानम् । मनोवाग्भिः मनांसि च वाचः वागिन्द्रियाणि च तैः मनोवाग्भिः स्वशक्त्या स्वेषां शक्त्या सामर्थ्येन आवर्तयन्ते श्रवणमननव्याख्यानरूपां आवृत्तिं कुर्वन्ति श्रवणाधिकारिणः गुरूणां समीपे असकृत् श्रवणम् । श्रुतस्य युक्तायुक्तचिन्तनरूपविमर्शाधिकारिणः असकृत् मननम् । सच्छिष्येषु उपदेशरूपव्याख्यानशक्तिमन्तः असकृत् व्याख्यानं कुर्वन्तीति भावः । एते मुकुन्दप्रसादात् मुकुन्दस्य मोक्षप्रदस्य वासुदेवस्य अनुग्रहात् इमं पूर्वोक्तप्रकारेण उपपादितलक्षणं मोक्षं सदा सर्वदा भजन्ते सेवन्ते । सदेत्यनेन अपुनरावृत्तिः उच्यते 'भज सेवायां इत्यतो लट् आत्मनेपदम्' । 'आङ् पूर्वात् वृतु वर्तते इत्यतो णिजन्तात् लट् आत्मनेपदम्' । 'इति तैरुदीरितमुदारमतिर्वचनं निशम्य स जगाद गिरं' इत्यनेन अन्वयः । इति गिरं शेषदेवः जगाद इति योजना 'भुजङ्गप्रयातं चतर्भिर्यकारैः' इति वचनात् भुजङ्गप्रयातं वृत्तम् ॥ ७९ ॥

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां
मन्दोपकारिण्यां एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः

तत्रानन्तस्वान्तवेदान्तिसिंहे मुख्यव्याख्यानिस्वने जृम्भमाणे ।
सद्यो माद्यद्वादिदन्तीन्द्रभीमे भेजे क्षोभो मायिगोमायुयूथैः ॥ १ ॥

पदार्थदीपिकोद्बोधिका – तत्रेति ॥ मुख्यव्याख्या उत्तमव्याख्यानं तद्रूपो निस्वनः ध्वनिः यस्य तस्मिन् । सद्यो व्याख्यानिस्वनमात्रश्रवणकाल एव माद्यन्तो विद्वत्ताभिमानेन मदभावं प्राप्ता वादिन एव दन्तीन्द्रा गजश्रेष्ठाः तेषां भीमे भयङ्करे । अनन्तं स्वान्तं मनो यस्य सः अनन्तस्वान्तः श्रीपूर्णप्रज्ञः । वेदान्तोऽस्यास्तीति वेदान्ती वेदान्तशास्त्राभिज्ञ इति भावः । अनन्तस्वान्तश्चासौ वेदान्ती च स एव सिंहः तस्मिन् । तत्र रजतपीठे जृम्भमाणे शोभमाने सति । 'जृम्भणं जृम्भितोत्फुल्लविवृद्धेषु विचेष्टित' इत्यभिधानम् । मायिन एव गोमायवः सृगालाः तेषां यूथैः समूहैः क्षोभो भयात् चपलत्वं भवेत् तद्वन्मध्वव्याख्यानिनादश्रवणमात्राद्भीता मायिनः चपलत्वं भेजुः इति भावः । सर्गेऽस्मिन् प्रायः शालिनीवृत्तम् । लक्षणं तूक्तम् ॥ १ ॥

मन्दोपकारिणी – श्रीगुरुभ्यो नमः ॥ **तत्रेति** ॥ मुख्यव्याख्यानिःस्वने मुख्या उत्तमा च सा व्याख्या प्रवचनं च मुख्यव्याख्या सैव निस्वनः ध्वनिः यस्य सः तथोक्तः तस्मिन् । व्याख्यानरूपनादयुक्ते । इत्यर्थः 'नादनिस्वाननिस्वनाः' इत्यमरः । सद्यः तत्क्षणे व्याख्यानश्रवणमात्र एव माद्यद्वादिदन्तीन्द्रभीमे दन्तीनां गजानां इन्द्राः श्रेष्ठाः दन्तीन्द्राः 'दन्ती दन्तावलो हस्ती' इत्यमरः वादिन एव दन्तीन्द्राः तथोक्ताः माद्यन्तः पाण्डित्याभिमानेन मत्तत्वं भजन्तः ते च ते वादिदन्तीन्द्राश्च तेषां भीमे भयङ्करे 'घोरं भीमं भयानकं' इत्यमरः विद्वत्ताभिमानेन गर्वयुक्तानामपि व्याख्यानशब्दश्रवणमात्रेण भयङ्करे इति भावः । अनन्तस्वान्तवेदान्तिसिंहे अनन्तं अनन्तविषयकं स्वान्तं मनो यस्य सः तथोक्तः 'स्वान्तं हृन्मानसं मनः' इत्यमरः । वेदानां अन्तो निर्णयो येभ्यः ते वेदान्ताः वेदनिर्णायकशास्त्राणि वेदान्ताः अस्य सन्तीति वेदान्ती वेदान्तशास्त्राभिज्ञः इति भावः । अनन्तस्वान्तः पूर्णप्रज्ञाचार्याख्यः वेदान्ती च अनन्तस्वान्तवेदान्ती स एव सिंहः मृगेन्द्रः अनन्तस्वान्तवेदान्तिसिंहः तस्मिन् । तत्र रजतपीठपुरे जृम्भमाणे शोभमाने सति मायिगोमायुयूथैः मायिनः मायावादिन एव गोमायवः शृगालाः तेषां यूथानि वृन्दानि तैः

'गोमायुर्मृगधूर्तकः' इत्यमरः क्षोभः भयात् चपलत्वं भेजे प्राप्तः 'भज सेवायां' इत्यतः कर्मणि लिट् आत्मनेपदं भेजे भेजाते भेजिरे, । यथा शृगालाः सिंहगर्जनं श्रुत्वा भयात् चपला भवन्ति तथा मध्वाचार्यव्याख्यानशब्दश्रवणमात्रात् भीताः मायावादिनः दुश्चित्तत्वं प्रापुरिति भावः । सर्गसमाप्तिपर्यन्तं प्रायः शालिनीवृत्तं 'मस्तौ गौ चेच्छालिनी वेद लोकैः' इति तल्लक्षणात् ॥ १ ॥

सम्भूयामी चोलजद्वीपिपुर्योः पार्श्वे पापा मन्त्रयामासुरुग्राः ।
सासूया भूभूषणे वायुदेवे मूढा यद्वद्धार्तराष्ट्रान्तिके प्राक् ॥ २ ॥

भावप्रकाशिका – चोलजः पद्मतीर्थो नाम । 'यो गुप्तपटलोक्तायां भैरवीचक्रसङ्गतौ । साङ्कर्यां परविद्यायां महावाग्म्यसतां गुरुः' । द्वीपी पुण्डरीकपुरी ॥ २ ॥

पदार्थदीपिकोद्बोधिका – सम्भूयेति ॥ पापा उग्रा अमी मायिनः । चोलजः पद्मतीर्थः द्वीपिपुरिः पुण्डरीकमुनिः तयोः । द्वीपिशब्दः पुण्डरीकपर्यायः । 'व्याघ्रो द्वीपी पुण्डरीकस्तरक्षुरि'ति हलायुधः । पार्श्वे समीपे सम्भूय मिलित्वा भुवो भूषणमिव भूषणः तस्मिन् । वायुश्चासौ देवश्च तस्मिन् श्रीमध्वनाम्नि वायुदेवे सासूया मात्सर्योपेताः सन्तः । प्राक् पूर्वं मूढा राजपुत्रादयः धृतराष्ट्रस्यापत्यं पुमान् धार्तराष्ट्रो दुर्योधनः तस्य अन्तिके समीपे यद्वत् वायुदेवे भीमसेने सासूया मन्त्रयामासुः तद्वत् मन्त्रयामासुः । मत्रि गुप्तभाषणे लिट् ॥ २ ॥

मन्दोपकारिणी – सम्भूयेति ॥ पापाः पापं एषां अस्तीति पापाः अर्शाद्यजन्तः पापस्वरूपाः उग्राः क्रूराः अमी मायिनः चोलजद्वीपिपुर्योः चोलजः चोलदेशे जातः पद्मतीर्थः द्वीपिपुरिः पुण्डरीकपुरिः 'व्याघ्रोऽपि पुण्डरीको ना' इत्यमरः ' शार्दूलद्वीपिनौ व्याघ्रः' इत्यमरः चोलजश्च द्वीपिपुरिश्च तयोः पार्श्वे समीपे सम्भूय मिलित्वा मन्त्रयामासुः विचारयामासुः मन्त्रयां ''आम्'' प्रत्ययान्तं अव्ययम् । 'अस् भुवि' इत्यतो लिट् परस्मैपदं आस आसतुः आसुः । कथंभूताः भूभूषणे भुवः भूमेः भूषणभूते वायुदेवे श्रीमध्वाख्यवायुदेवे सासूयाः असूयया उपेताः 'असूया नाम गुणेषु दोषारोपः' 'असूया तु दोषारोपो गुणेष्वपि' इत्यमरः के इव प्राक् पूर्वं भीमावतारे मूढाः अज्ञाः 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः' इत्यमरः राजपुत्राः धार्तराष्ट्रान्तिके धृतराष्ट्रस्य अपत्यं पुमान् धार्तराष्ट्रो दुर्योधनः तस्य अन्तिके समीपे यद्वत् यथा येन प्रकारेण मन्त्रयामासुः तद्वत् तेऽपि भूभूषणे वायुदेवे सासूयाः ॥ २ ॥

सन्मात्सर्यं बद्धुमूचेऽशुभानां वाचाऽलोलं कोपि गांधारकस्य ।
मध्ये तेषां नीचनीत्या समानो वाचालोऽलं कोऽपि गान्धारकस्य ॥ ३ ॥

भावप्रकाशिका – अशुभानां धारकस्य चोलजस्य अलोलं स्थिरं कोपि कोपविशिष्टं सज्जनेषु मात्सर्यं बद्धुं गामूचे । कोऽप्यलं वाचालः शकुनेः समानः ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – सदिति ॥ सन्मात्सर्यं, बद्धुं ऊचे, अशुभानां, वाचा, अलोलं, कोपि, गान्धारकस्य, मध्ये, तेषां, नीचनीत्या, समानः, वाचालः, अलं, कः, अपि, गान्धारकस्य इति च्छेदः । तेषां मिलितानां मायिनां मध्ये अलं अतितरां वाचालो बहुभाषी । 'आलजाटजौ बहुभाषिणी'त्यालच् । नीचनीत्या कुत्सितनीत्या गान्धारकस्य शकुनेः समानः कोऽपि कश्चित् । वाचा स्ववचनेनाशुभानां दुष्टपुरुषाणां धारकस्य आश्रयभूतस्य पद्मतीर्थाख्यमायिभिक्षोः कोपोऽस्यास्तीति कोपि कोपविशिष्टं, सत्सु मात्सर्यं अलोलः स्थिरो यथा भवति तथा अलोलं वाचा स्ववचनेन बद्धुं उत्पादयितुं गां वाचं ऊचे ॥ ३ ॥

मन्दोपकारिणी – सदिति ॥ द्वितीयपादे वाचा अलोलं कोपि गां धारकस्य इति, चतुर्थपादे वाचालः अलं कः अपि गान्धारकस्य इति पदच्छेदः । तेषां मिलितानां मायावादिनां मध्ये अलं अतितरां वाचालः बहुभाषी 'स्याज्जल्पकस्तु वाचालो वाचाटो बहुगर्ह्यवाक्' इत्यमरः कोऽपि यःकश्चित्पुरुषः अशुभानां पापानां असज्जनानां वा धारकस्य आश्रयस्य असच्छ्रेष्ठस्य इत्यर्थः पद्मतीर्थस्य कोपि कोपः क्रोधः अस्यास्तीति कोपि कोपसहितं सन्मात्सर्यं सत्सु सज्जनेषु मात्सर्यं मत्सरत्वं अलोलं लोलं चञ्चलं न भवतीति अलोलं 'चलं लोलं चलाचलं' इत्यमरः स्थिरं यथा भवति तथा इत्यर्थः वाचा स्ववचनेन बद्धुं उत्पादयितुं गां वाचं ऊचे अब्रवीत् । 'वच परिभाषणे' इत्यतो लिट् आत्मनेपदं ऊचे ऊचाते ऊचिरे' । 'भूवाग्वारिषु गौर्मता' इति विश्वः । कथंभूतः नीचनीत्या नीचः च असौ नीतिश्च नीचनीतिः तया गान्धारकस्य शकुनेः दुर्योधनमातुलस्य समानः सदृशः मिलितेषु मायिषु मध्ये कश्चन पापिष्ठः पद्मतीर्थस्य मध्वाचार्ये कोपः मात्सर्यं च यथा स्यात् तथा वचनं उवाच इति भावः ॥ ३ ॥

एकं तत्त्वं वष्टि मायामयीयं वाक्यैः प्राच्यैरप्यवाच्यं विधत्ते ।
पूर्वाऽपूर्वा हन्त दौर्घट्यभूषा चित्रं चित्रं दर्शनाचार्यनीतिः ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – एकमिति ॥ पूर्वा पुरातनी अपूर्वा दुर्लभा दुर्घटस्य भावो दौर्घट्यं तद्भूषा अलङ्कारो यस्याः तादृशी । अत एव मायाया विकारभूता मायामयी मायाविलासमूलेत्यर्थः । इयं दर्शनाचार्यनीतिः दर्शनाचार्यस्य अस्मच्छास्त्राचार्यस्य शङ्करस्य नीतिः शास्त्रं चित्रं चित्रमत्याश्चर्यम् । इयं नीतिः तत्त्वं ब्रह्माक्यं वस्तु, एकं अद्वितीयं निर्विशेषं च वष्टि ब्रूते । वश कान्तौ लट् । प्रतिपादयति इत्यर्थः । तथापि प्राच्यैः पुरातनैर्वाक्यैः वेदवचनैः । 'यतो वाचो निवर्तन्त' इत्यादिभिः अवाच्यमपि विधत्ते । हन्त हर्षे । तत्त्वं ब्रह्माख्यं वस्त्वद्वितीयं निर्विशेषं 'सत्यं ज्ञानमि'त्यादिरूपेण समर्थ्यापि तद्ब्रह्म अवाच्यं इति च ब्रूते । तस्माद्दौर्घट्यं अस्य भूषणं इत्यर्थः ॥ ४ ॥

मन्दोपकारिणी – किमवोचत् इत्यत आह ॥ **एकमिति** ॥ मायामयी विश्वस्य मायोपादनकत्वप्रतिपादिका इयं दर्शनाचार्यनीतिः दर्शनस्य मायिशास्त्रस्य आचार्यस्य प्रवर्तकस्य शङ्कराचार्यस्य नीतिः शास्त्रं चित्रं चित्रमत्याश्चर्यं यथा स्यात् तथा तत्त्वं ब्रह्माख्यं वस्तु एकं अद्वितीयं निर्विशेषं वष्टि इच्छति ब्रूते इत्यर्थः 'वश कान्तौ कान्तिः इच्छा अस्मात् धातोः लट् परस्मैपदं वष्टि उष्टः उशन्ति' । तथा प्राच्यैः पुरातनैः वाक्यैः 'यतो वाचो निवर्तन्ते' इत्यादिभिः वेदवचनैः अवाच्यमपि विधत्ते प्रतिपादयति 'वि पूर्वात् डु धाञ् धारणपोषणयोः इत्यतो लट् आत्मनेपदं धत्ते दधाते दधते' । कथंभूता नीतिः पूर्वा पुरातनी अपूर्वा दुर्लभा दौर्घट्यभूषा दुर्घटत्वं भूषा अलङ्कारः यस्याः सा तथोक्ता ब्रह्म सत्यं ज्ञानं इत्यादिना प्रतिपाद्य पुनः अवाच्यं इति ब्रूते अतः एतदुभयं दुर्घटं तस्मात् दुर्घटत्वभूषात्वं युक्तं इति भावः । हन्त हर्षः 'हन्त हर्षेऽनुकम्पायां' इत्यमरः ॥ ४ ॥

मर्त्यामर्त्यामर्त्यविद्विट्पुरोगं विश्वं दृश्यं विप्रचण्डालपूर्वम् ।
भेदापेतं भेदि मानैः समानैः साधीयः कः साधयेत्तामलब्ध्वा॥ ५ ॥

भावप्रकाशिका – 'साधीयः द्विवचनविभज्योपपदे तरबीयसुनावि'तीयसुन् । 'अन्तिकबाढयोर्नेदसाधावि'ति बाढशब्दस्य साधादेशः ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – मर्त्येति ॥ समानैः । 'जगत्प्रवाहः सत्योऽयं पञ्चभेदसमन्वितः'', ''सत्यं भिदा सत्यं भिदा सत्यं भिदा'', ''पञ्चभेदा इमे सत्याः सर्वावस्थासु सर्वशः'', इत्यादिभेदप्रतिपादकवेदादिप्रमाणसहितैः मानैः प्रत्यक्षादिप्रमाणैः । भेदो अस्यास्तीति भेदि, भेदविशिष्टतया प्रसिद्धम् । समानैः प्रत्यक्षादिप्रमाणसहितैः मानैः भेदप्रतिपादकवेदादिप्रमाणैः भेदीति वा योजना । मर्त्या मनुजाः अमर्त्या देवाः अमर्त्यविद्विषो देवद्विषो दैत्याः ते पुरोगाः पुरःसरा यस्य तादृशं दृश्यं प्रतीयमानं, विप्राश्च चण्डालाश्च पूर्वे यस्य तादृशं विश्वं जगत् भेदापेतं भेदरहितं इति को विद्वान् तां अस्मद्दर्शनाचार्यनीतिं अलब्ध्वा साधीयः दृढतरं यथा भवति तथा साधयेत् । न कोऽपीत्यर्थः । अत्र साधीय इति दृढार्थस्य बाढशब्दस्य 'अन्तिकबाढयोर्नेदसाधौ' इति साधादेश ईयसुन् प्रत्ययश्च । प्रत्यक्षादिप्रमाणैः भेदस्यैव प्रतीयमानत्वात् तद्विरुद्धसर्वाभेदसमर्थनं अस्मद्दर्शनाचार्योक्तनीतिं विना न शक्यमिति भावः ॥ ५ ॥

मन्दोपकारिणी – मर्त्येति ॥ तां अस्मद्दर्शनाचार्यनीतिं अलब्ध्वा अप्राप्य श्रवणादिकं अकृत्वा इति यावत् । कः य: कोऽपि विद्वान् मर्त्यामर्त्यामर्त्यविद्विट्पुरोगं मर्त्याः मनुष्याः 'मनुष्या मानुषा मर्त्याः' इत्यमरः अमर्त्याः देवाः 'अमर्त्या अमृतान्धसः' इत्यमरः अमर्त्यविद्विषः अमर्त्यानां देवानां विद्विषः शत्रवः दैत्याः 'पूर्वदेवाः सुरद्विषः' इत्यमरः मर्त्याश्च अमर्त्याश्च अमर्त्यविद्विषश्च एते पुरोगाः आदयो यस्य तत् तथोक्तं विप्रचण्डालपूर्वं विप्राः ब्राह्मणाः चण्डालाः श्वपचाः 'निषादः श्वपचश्चान्तेवासिचण्डालपुल्कसाः' इत्यमरः एते पूर्वे यस्य तत् तथोक्तं, दृश्यं प्रतीयमानं विश्वं अनेकविधं प्रपञ्चं भेदापेतं भेदेन अपेतं रहितं साधीयः दृढतरं साधयेत् समर्थयेत् । साधीय इत्यत्र दृढार्थस्य बाढशब्दस्य अतिबाढ्ये 'अन्तिकबाढयोर्नेदसाधौ' इति सूत्रेण साधादेश ईयसुन् प्रत्ययश्च 'राधसाध संसिद्धावित्यतो लिङ् परस्मैपदम्' । कथंभूतं विश्वं समानैः मानैः प्रत्यक्षादिप्रमाणैः सहितैः मानैः प्रमाणैः 'जगत्प्रवाहः सत्योऽयं' 'सत्यं भिदा सत्यं भिदा' 'पञ्चभेदाः इमे नित्याः' इत्यादिभेदप्रतिपादकवेदादिप्रमाणैः भेदि भेदोऽस्यास्तीति भेदि भेदवत्तया प्रसिद्धं प्रत्यक्षादिप्रमाणैः जगति भेदस्यैव प्रतीयमानत्वात् तद्विरुद्धं सर्वाभेदसमर्थनं अस्मद्दर्शनाचार्योक्तनीतिं विना न शक्यं इति भावः ॥ ५ ॥

सत्यं सत्यं व्यावहार्यं विधत्ते सर्वं मोहे सर्वनिर्वाहिणी सा।
ज्ञाने जाते दग्धवस्त्रप्रतीतं पक्वे तस्मिंस्तप्तलोहाप्तवार्वत् ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – सत्यमिति ॥ सा दर्शनाचार्यनीतिः । मोहेऽज्ञाने सति । अज्ञानदशायां सत्यामित्यर्थः । सत्यं पारमार्थिकसत्यतया प्रतीयमानं सर्वं, व्यवहारविषयो व्यावहार्यम् । व्यावहारिकमित्यर्थः । सत्यं विधत्ते ब्रूते । 'सन् घटः सन् पट' इत्यादि प्रत्यक्षस्य विमतं सत्यं अर्थक्रियाकारित्वात् यन्न सत्यं न तदर्थक्रियाकारि यथा शुक्तिरजतं, न तथाचेदं तस्मात् न तथेत्याद्यनुमानस्य, 'विश्वं सत्यं मघवाना' इत्याद्यागमस्य च तत्सत्यत्वप्रतिपादकस्य व्यावहारिकसत्यताविषयत्वं विधत्त इति भावः । तस्मात्सा नीतिः सर्वनिर्वाहिणी सर्वस्यापि प्रमाणजातस्य निर्वाहिणी परस्पराविरोधेन विषयस्य व्यवस्था कल्पिकेत्यर्थः । तथा हि 'सन् घट' इत्यस्य सत्यत्वविषयप्रमाणस्य व्यावहारिकसत्यत्वं विषयः । विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्याद्यनुमानानां 'नेह नानास्ति किञ्चन' इत्याद्यागमनाञ्च ब्रह्मातिरिक्तप्रपञ्चमिथ्यात्वपराणां परमार्थतः सत्वनिषेधो विषय इति भिन्नविषयत्वव्युत्पादनेन परस्परविरोधपरिहारात् सर्वनिर्वाहिणीत्युच्यते । वस्तुतो विचार्यमाणे विश्वं कथंभूतमित्यपेक्षायामाह– ज्ञान इत्यादि । ज्ञाने 'नेह नानास्ति किञ्चने' त्याद्यागमजनितापरोक्षज्ञाने सति, दग्धवस्त्रप्रतीतं दग्धं यद्वस्त्रं तद्वत्प्रतीतं ज्ञातम् । दग्धवस्त्रं पश्यतो यथा भस्मैवेदं न वस्त्रमिति दृढनिश्चये सत्यपि चूर्णभावपर्यन्तं आतानवितानात्मकप्रतीतिः अनिवार्या, तद्वद्विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यादि अनुमानैः नेह नानेत्याद्यागमैश्च परोक्षतो ब्रह्मातिरेकेण प्रपञ्चमिथ्यात्वनिश्चये सत्यपि सर्वात्मनाविद्यास्तमयपर्यन्तं 'सन् घट' इत्यादिप्रतीतिः अनिवार्या । तस्माद्दग्धवस्त्रप्रतीतं इदम् । तस्मिन् 'विमतं मिथ्या दृश्यत्वात् इत्याद्यनुमानैः नेह नानास्ति किञ्चने' त्याद्यागमैश्चोत्पादिते ज्ञाने पक्के सति परिपक्के सति । अपरोक्षत्वं गते सतीति यावत् । तप्तं यल्लोहं तदाप्तं यद्वाः जलं तद्वत् तप्तलोहाप्तवार्वत् भवतीति सम्बन्धः । तप्तलोहस्थं वारि यथा लोहान्न पृथग्प्रतीयते । एवं जीवजडात्मकप्रपञ्चमिथ्यात्वलक्षण ब्रह्मात्मैक्यज्ञाने परिपक्के सति ब्रह्मातिरेकेण न किञ्चित्प्रतीयत इति भावः । अयमत्रान्वयप्रकारः मोहे सति सर्वं सत्यं व्यावहार्यं सत्यं विधत्ते इति यस्मात्सा सर्वनिर्वाहिणी । ज्ञाने जाते सति दग्धवस्त्रप्रतीतं सर्वं तस्मिन् पक्के सति तप्तलोहाप्तवार्वत् भवति इति ॥ ६ ॥

मन्दोपकारिणी – सत्यमिति ॥ दर्शनाचार्यनीतिः मोहे अज्ञाने सति अज्ञानावस्थायां इत्यर्थः । सत्यं पारमार्थिकसत्यतया प्रतीयमानं सर्वं विश्वं व्यावहार्यं सत्यं व्यावहारिकं सत्यं विधत्ते ब्रूते तस्मात् सा दर्शनाचार्यनीतिः सर्वनिर्वाहिणी सर्वस्य प्रत्यक्षादिप्रमाणजातस्य निर्वाहिणी परस्पराविरोधेन विषयव्यवस्थाकल्पिका इत्यर्थः । विरोधपरिहारेण निर्वाह-प्रकारस्तु सन् घटः सन् पटः इति विमतं प्रत्यक्षं सत्यं अर्थकारित्वात् इत्याद्यनुमानं 'विश्वं सत्यं मघवा' इत्याद्यागमश्च जगतः सत्यत्वं प्रतिपादयति, 'विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवत्' इत्याद्यनुमानं 'नेह नानास्ति किञ्चन' इत्याद्यागमश्च ब्रह्मातिरिक्तस्य सर्वस्य प्रपञ्चस्य मिथ्यात्वं प्रतिपादयति, एवं प्राप्तं उभयप्रमाणस्य परस्परविरोधं अस्मत् दर्शनाचार्यनीतिः परिहरति । कथं, जगत्सत्यत्वग्राहिप्रमाणजातस्य व्यावहारिकसत्यत्वं विषयः मिथ्यात्वप्रतिपादकप्रमाणजातस्य परमार्थतः सत्यतानिषेधो विषयः एवं भिन्नविषयकत्वव्युत्पादनेन परस्परविरोधपरिहारात् सर्वनिर्बाहिणी इत्युच्यते इति वस्तुतो विचार्यमाणे विश्वं कीदृशं इत्यत आह-ज्ञाने इति । ज्ञाने नेह नानास्ति किञ्चन इत्यादि प्रमाणैः ब्रह्मातिरिक्तं सर्वं मिथ्या इति परोक्षज्ञाने जाते निश्चिते सति विश्वं दग्धवस्त्रप्रतीतं दग्धं अग्नौ दग्धं वस्त्रमिव प्रतीतं दग्धवस्त्रं पश्यतः पटत्वाभावनिश्चये सत्यपि चूर्णीभाव पर्यन्तं जायमाना पटाकारप्रतीतिः यथा अनिवार्या तथा प्रमाणैः ब्रह्मातिरेकेण प्रपञ्चमिथ्यात्वनिश्चये सत्यपि सर्वात्मना अविद्यानिवृत्तिपर्यन्तं 'सन् पटः' इत्यादि सत्त्वप्रतीतिः अनिवार्यैव । तस्मात् दग्धवस्त्रप्रतीतमिदं, तस्मिन् प्रमाणेन जातमिथ्यात्वज्ञाने पक्के सति अपरोक्षे सतीति यावत् । इदं विश्वं तप्तलोहाप्तवार्वत् तप्तं अग्निना संतप्तं च तत् लोहं च तप्तलोहं आप्तं प्राप्तं च तत् वाः वारि च तद्वत् पृथङ् न प्रतीयते जीवजडात्मकप्रपञ्चमिथ्यात्वलक्षणब्रह्मात्मैक्यज्ञाने परिपक्के सति ब्रह्मातिरेकेण न किञ्चित् प्रतीयते इति भावः ॥ ६ ॥

ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे नैर्गुण्यस्थे साम्प्रतं नाथभूताः ।
आक्रन्दं मे हन्त शृण्वन्तु सोऽयं हा हा मायावाद उत्सादमेति ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – ज्ञानीति ॥ ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे ज्ञानिश्रेष्ठः तन्नामकः कश्चन मायिप्रवरः स एव श्रेष्ठ उत्तमो यस्मिन् तादृशो विज्ञानिनां वर्गः । ज्ञानिश्रेष्ठश्चासौ विज्ञानिवर्गश्च तस्मिन् । निर्गता गुणा यस्मात् तत् निर्गुणं तस्य भावो नैर्गुण्यं

निर्गुणब्रह्मभावः तस्मिन् स्थितो नैर्गुण्यस्थः तस्मिन् सति निर्गुणब्रह्मतादात्म्यलक्षणमुक्तिं गते सति । साम्प्रतं इदानीं नाथभूताः अस्माकं स्वामिभूताः सर्वे भवन्तो मे मम आक्रन्दं आक्रोशं शृण्वन्तु । सोऽयं मायावादो मायाकल्पितं सर्वमिति वादः उत्सादं नाशमेति गच्छति । हा! हा! कष्टं कष्टम् ॥ ७ ॥

मन्दोपकारिणी – ज्ञानिश्रेष्ठेति ॥ ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे ज्ञानिश्रेष्ठो नाम कश्चित् मायावादिश्रेष्ठः ज्ञानिश्रेष्ठ एव श्रेष्ठः उत्तमो यस्मिन् सः, स च विज्ञानिनां विदुषां वर्गः समूहश्च अनयोः समाहारः तस्मिन् 'वृन्दभेदाः समैर्वर्गः सङ्घसार्थौ तु जन्तुभिः' इत्यमरः नैर्गुण्यस्थे नैर्गुण्ये निर्गुणभावब्रह्मलक्षणमुक्तौ तिष्ठतीति नैर्गुण्यस्थः तस्मिन् सति ज्ञनिश्रेष्ठप्रभृतिज्ञानिसमुदाये मुक्तिं गते सतीति यावत्, सांप्रतं अधुना 'अधुना सांप्रतं तथा' इत्यमरः नाथभूताः अस्माकं स्वामिनः भवन्तः मे मम आक्रन्दं आक्रोशं शृण्वन्तु आकर्णयन्तु । हन्त 'श्रु श्रवणे' इत्यतो लोट् परस्मैपदं शृणोतु शृणुतां शृण्वन्तु । आक्रोशः किं विषयः इत्यत आह-हा हेति ॥ सोऽयं पूर्वोक्तः अयं मायावादः मायाशास्त्रं उत्सादं नाशं एति प्राप्नोति हाहा कष्टं प्राप्तं 'इण् गतौ' इत्यतः लट् परस्मैपदं एति इतः यन्ति । विषादार्थकस्य हाशब्दस्य क्लेशात् द्विरुक्तिः 'हा विषादश्रमार्तिषु' इत्यमरः ॥ ७ ॥

भ्रष्टा भाट्टा न प्रभाकृत्प्रभाऽभूत् त्रस्ता माहायानिकाद्याश्च यत्र ।
दुर्गं मायावादसत्रं दिधक्षुर्नोपेक्ष्या नस्तत्त्ववादाग्निजिह्वा ॥ ८ ॥

भावप्रकाशिका – भाट्टा भाट्टानुव्रता वनपरिचयरहिताः । अर्कप्रभा । अविरलतरुमत्त्वात् । माहायानिका बौद्धा महायनसम्बन्धिनश्च ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – भ्रष्टा इति ॥ यत्र मायावादाख्यवने । भट्टेन भट्टाचार्येण प्रोक्तं भाट्टं तस्मिन्निपुणा भाट्टा भाट्टशास्त्रकुशला मीमांसका इत्यर्थः । भ्रष्टा निरुत्तरीकृताः । यथा वनपरिचयरहिता भट्टशिष्याःछत्रपुस्तकादिमन्तो मार्गवशाद्वनं प्रविश्य भ्रष्टा भवेयुः तद्वदिति श्लेषाभिप्रायः । यत्र पूर्वोक्तवने प्रभाकृत्प्रभा प्रभाकृतः प्रभाकराख्यवादिनः प्रभा सामर्थ्यं नाभूत् । सोऽपि निराकर्तुं अशक्त इति भावः । किञ्च यत्र भास्कराख्यवादिनोऽपि सामर्थ्यं नाभूत् इति च व्याख्येयम् । अविरलद्रुमे वने यथा सूर्यप्रकाशो न भवति तद्वदिति श्लेषाभिप्रायः । यत्र पूर्वोक्तवने माहायानिका बौद्धा आद्या येषां तादृशाः त्रस्ताः । न

मायावादिप्रत्यर्थिभावं भजन्त इति भावः । वनेषु यथा महारथशकटादिमन्तस्त्रस्ताः स्युरेवं इति श्लेषाभिप्रायः । दुर्गं दुर्गमं मायावादसत्रं मायावादाख्यश्च तत् सत्रं वनश्च, 'सत्रमाच्छादने यज्ञे सदादाने वनेऽपि चे'त्यमरः । दग्धुं इच्छुः दिधक्षुः तत्त्वमिति वादः सर्वं सत्यमिति वादः, स एवाग्निः तस्य जिह्वा ज्वाला । 'जिह्वावाग्रसनार्चिष्वि'ति वैजयन्ती । नो अस्माकं उपेक्ष्या उपेक्षितुं योग्या न भवति । तन्निरासे प्रयतितव्यमेव इति भावः ॥८॥

मन्दोपकारिणी – भ्रष्टा इति ॥ दुर्गं दुर्गमार्गं मायावादसत्रं मायावादः मायावादशास्त्राख्यं सत्रं वनं 'सत्रमाच्छादने यज्ञे सदादाने वनेष्वपि' इत्यमरः दिधक्षुः दग्धुमिच्छुः तत्त्ववादाग्निजिह्वा तत्त्ववादः तत्त्ववादाख्यशास्त्रं स एव अग्निजिह्वा अग्नेर्ज्वाला नः अस्माकं उपेक्ष्या उपेक्षितुं योग्या न, न भवति तन्निरासे प्रयतितव्यमेवेति भावः । कथंभूतं मायावादसत्रं यत्र मायावादशास्त्रे भाट्टाः भट्टशास्त्राभिज्ञाः भ्रष्टाः निरुत्तरीकृताः तथा वने रक्षकरहिताः भाट्टाः भट्टशिष्याः छत्रपुस्तकभारवाहकाः मार्गवशात् गन्तुं अशक्ये वने प्रविश्य भ्रष्टाः उद्विग्नाः स्युः तद्वदिति श्लेषाभिप्रायः । पुनः कथंभूतं यत्र प्रभाकृत्प्रभा प्रभाकृतः प्रभाकराख्यवादिनः प्रभा सामर्थ्यं नाभूत् प्रभाकरोऽपि निराकर्तुं न शक्तः इति भावः । यथा निबिडच्छायाद्रुमवने प्रभाकृत्प्रभा प्रभाकरस्य सूर्यस्य प्रभा प्रकाशो न भवति तथेति श्लेषाभिप्रायः । यत्र माहायानिकाद्याश्च माहायानिकाः बौद्धाः आद्याः येषां ते तथोक्ताः, बौद्धादिवादिनः त्रस्ताः भीताः मायावादिनः प्रतिपक्षिणो नाभवन् इति भावः । यथा दुर्गमारण्ये माहायानिकाद्याः महान्ति यानानि रथशकटादीनि वाहनानि येषां ते महायानिका एव माहायानिकाः ते एव आद्याः येषां ते तथोक्ताः पुरुषाः त्रस्ताः उद्विग्नाः रथशकटादिवाहनानां वृक्षषण्डपाषाणादिमयेऽरण्ये प्रवेष्टुं अशक्यत्वात् । एवमेव अत्रापीति श्लेषाभिप्रायः 'यानं गतौ वाहने च' इति विश्वः ॥ ८ ॥

यं यं प्रापद्भूरिचित्तः प्रदेशं तस्मात्तस्मादागतेरन्तरायः ।
प्रत्यज्ञायि व्यक्तमार्येण सोऽपि प्राप्तोत्पार्श्वं हा वयं भाग्यहीनाः ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – यं यमति ॥ भूरि पूर्णं चित्तं यस्य स श्रीपूर्णप्रज्ञः यं यं प्रदेशं प्रापत् जगाम । आप्लृ व्याप्तौ लुङ् । आर्येण सज्जनेन पद्मतीर्थेन 'आर्यौ सज्जनसंविदावि'ति हेमचन्द्रः । तस्मात्तस्मात् प्रदेशादागतेरागमनस्यान्तरायो विघ्नो व्यक्तं स्पष्टं

यथा भवति तथा प्रत्यज्ञायि प्रतिज्ञा कृता । सोऽपि श्रीमध्वोऽपि पार्श्वं अस्मत्समीपं प्राप्नोत् प्राप । हा! कष्टं वयं भाग्यहीनाः । अयमार्यः किं करोतु वयमेव भाग्यहीना इत्यर्थः । अयं भावः श्रीमध्वाचार्यस्य बदरिकाश्रमादागमनं श्रीमद्भाष्यनिर्माणञ्च गोदावरीतटे सर्ववादि निराकरणञ्च श्रुत्वा पुनः गोदावरीमतीत्य रजतपीठपुरं प्रत्यागच्छतीति च वार्तां श्रुत्वा, क्षुभ्यतो बिभ्यतश्च मायिनो दृष्ट्वा पद्मतीर्थेनेत्थं प्रतिज्ञा कृता । भूरिचित्त इदानीं यस्मिन् देशे तिष्ठति तस्माद्देशादितः परमिमं देशं प्रत्यागमनं निरोत्स्यामीति । पुनश्च समीपमागतं श्रुत्वाऽथ तत आगमनविघ्नं करोमीति । पुनःपुनरेवं तस्माद्देशादागतेरन्तरायप्रतिज्ञा कृता । तथाप्यसौ समीपमागतः तदस्मद्दौर्भाग्यमिति ॥ ९ ॥

मन्दोपकारिणी – यं यं इति ॥ भूरिचित्तः भूरि पूर्णं चित्तं मनो यस्य सः तथोक्तः पूर्णप्रज्ञाचार्यः यं यं प्रदेशं स्थलविशेषं प्रापत् प्राप्तवान् 'प्रपूर्वात् आप्लृ व्याप्तौ' इत्यतः लुङ् परस्मैपदं आपत् आपतां आपन् । आर्येण पद्मतीर्थेन तस्मात्तस्मात् तस्मात्प्रदेशादागतेः मध्वाचार्यागमनस्य अन्तरायः विघ्नः 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः व्यक्तं सर्वसमक्षं प्रत्यज्ञायि प्रतिज्ञातः । सोऽपि मध्वोऽपि पार्श्वं अस्मत् समीपं प्राप्नोत् प्राप्तवान् 'आप्लृ व्याप्तौ' लङ् परस्मैपदं आप्नोत् आप्नुतां आप्नुवन् । वयं भाग्यहीनाः भाग्येन अदृष्टेन हीनाः हा कष्टम् । अयं भावः श्रीमध्वाचार्यस्य बदरिकाश्रमादागमनानन्तरं श्रीमद्भाष्यनिर्माणञ्च गोदावरीतीरे सर्ववादिनिराकरणञ्च श्रुत्वा पुनः गोदावरीमतिक्रम्य रजतपीठपुरं प्रत्यागमिष्यतीति च वार्तां श्रुत्वा क्षुभ्यतो बिभ्यतश्च मायिनो दृष्ट्वा पद्मतीर्थेन इत्थं प्रतिज्ञां कृत्वा, कथंमध्वाचार्यः इदानीं यस्मिन् देशे तिष्ठति तस्मात् देशात् परं अस्मद्देशं प्रत्यागमनं निरोत्स्यामीति पुनः तद्देशं अतीत्य समीपमागतं श्रुत्वा तस्य ततः आगमनविघ्नं करिष्यामीति प्रतिज्ञां कृत्वा पुनः पुनः एवमेव तस्मात् तस्मात् आगमननिरोधविषये प्रतिज्ञां कृत्वा सोऽपि अस्मत् समीपं आगत एव तस्मात् वयं असमर्थत्वात् निर्भाग्याः इति 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः 'प्रतिपूर्वात् ज्ञा अवबोधने' इत्यतः कर्मणि लुङ् परस्मैपदं अज्ञायि अज्ञायिषातां अज्ञायिषत ॥ ९ ॥

प्रश्नः पृष्टुः खण्ड्यते तेन नूनं युक्तां युक्तिं वक्ति चासावखण्ड्याम् ।
वादिव्रातं लज्जयेन्नो विशेषादाक्षेप्तेति श्रूयते किं नु कुर्मः ॥ १० ॥

पदार्थदीपिकोद्बोधिका – प्रश्न इति ॥ तेन श्रीमध्वाचार्येण पृष्ट आक्षिप्तः प्रश्नः खण्ड्यते निराक्रियते । नूनं निश्चये । 'नूनं तर्केऽवधारण' इत्यमरः । असौ श्रीमध्वाचार्यो युक्तां उपपन्नां अखण्ड्यां युक्तिं वक्ति च । अत एव वादिव्रातो निरुत्तरीकृतवादिसमूहस्तं लज्जयेत् । लज्जायुक्तं कुर्यात् । ओलस्जी व्रीडायां लिङ् । नोऽस्माकं विशेषादाक्षेप्ता निराकर्तेति श्रूयते । किं नु कुर्मः एतत्प्रतीकारं किं वा कुर्मः ॥ १० ॥

मन्दोपकारिणी – प्रश्न इति ॥ तेन मध्वाचार्येण प्रष्टुः प्रमेयं पृच्छतः वादिनः प्रश्नः पृच्छा 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः खण्ड्यते प्रत्युत्तरदानेन परिहियते । नूनं निश्चयः 'नूनं तर्के विनिश्चये' इत्यमरः । 'खडि भेदने इत्यस्मात् कर्मणि लट् परस्मैपदं खण्ड्यते खण्ड्येते खण्ड्यन्ते । असौ मध्वाचार्यः युक्तां उपपन्नां युक्तिं वक्ति च 'वच परिभाषणे' इत्यतो लट् परस्मैपदं वक्ति वक्तः इति । वच् धातोः सर्वत्र वचनद्वयमेव न तु बहुवचनमिति ज्ञेयम् । असौ एवं प्रकारेण वादिव्रातं वादिस्तोमं 'स्तामौघनिकरव्रातः' इत्यमरः लज्जयेत् निरुत्तरीकृतं वादिसमूहं लज्जया युक्तं कुर्यात् 'ओलस्जी व्रीडायां इत्यतो णिजन्तात् लिङ् परस्मैपदम् । वादिष्वपि मध्ये नः अस्मान् मायावादिनः विशेषात् विशेषाकारेण आक्षेप्ता निराकर्तेति च श्रूयते अस्माभिः अत्र किंनु किं वा तत्प्रतीकारं कुर्मः 'क्षिपृ प्रेरणे' इत्यतः आङ् पूर्वात् कर्तरि लुट् परस्मैपदं क्षेप्ता क्षेप्तारौ क्षेप्तारः' 'श्रु श्रवणे इत्यतः' कर्मणि लट् आत्मनेपदं श्रूयते श्रूयेते श्रूयन्ते' ॥ १० ॥

प्राच्यं शास्त्रं यत्सपादं तु लक्षं वाक्येनैकेनाक्षिपद्धर्षतीर्थः ।
इत्थं पान्थैर्वर्णितं शृण्वतः प्राग्युष्मान्प्रापदूयमानं मनो मे ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – प्राच्यमिति ॥ हर्षतीर्थो हर्षकरं तीर्थं शास्त्रं यस्मात् सः श्रीमदानन्दतीर्थः । प्राच्यं पुरातनं सपादं पादसहितं लक्षं लक्षसङ्ख्याकं यच्छास्त्रं तदेकेन वाक्येन अक्षिपत् । निराचक्र इत्यर्थः । इत्थं प्राक् पान्थैः पथिकैः वर्णितं शृण्वतो मे मम मनो दूयमानं सत् वो युष्माकं प्रापत् । सपादलक्ष्यपरिमितमस्मच्छास्त्रमाक्षेप्तुं पद्मतीर्थादय एव समर्था इति दूरस्थान् युष्मान् मे मनो जगाम इति भावः ॥ ११ ॥

मन्दोपकारिणी – प्राच्यमिति ॥ प्राच्यं पुरातनं सपादं लक्षं पादेन लक्षचतुर्थांशेन पञ्चविंशत्सहस्रेणाधिकेन सहितं सपादं 'पादा रश्म्यङ्घ्रितुर्यांशाश्चन्द्रान्यर्कास्तमोनुदः'

इत्यमरः लक्षं लक्षसङ्ख्याकग्रन्थोपेतं यच्छास्त्रं अभूत् तच्छास्त्रं हर्षतीर्थः आनन्दतीर्थः एकेन वाक्येन आक्षिपत् निराकृतवान् 'क्षिप प्रेरणे इत्यतो लङ् परस्मैपदम् । इत्थं एवं प्राक् पूर्वं पान्थैः पथिकैः मार्गे गच्छद्भिः पुरुषैः 'पान्थः पथिकः' इत्यमरः वर्णितं उदितं वचनं शृण्वतः आकर्णयतः मे मम मनः दूयमानं सत् संतप्तं सत् युष्मान् प्रापत् प्राप्नोत् 'आप्लृ व्याप्तौ इत्यतो लुङ् परस्मैपदं' सपादलक्षपरिमितं अस्मच्छास्त्रं आक्षिपन्तं तमिमं मध्वं आक्षेप्तुं पद्मतीर्था एव समर्था इति दूरस्थान् युष्मान् मे मनः अगमत् इति भावः ॥ ११ ॥

वेदव्यासो न्वेष वेदो नु मूर्तो दिव्या मूर्तिर्यस्य सा सुस्मितस्य ।
तद्द्रष्टृणां चेति वाणीकृपाणी नूनं मायापक्षमूलं छिनत्ति ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – वेदव्यास इति ॥ शोभनं स्मितं यस्य तस्य श्रीमध्वस्य सा मूर्तिः तनुः दिव्या अलौकिकी । अतः स एष श्रीमध्वाचार्यो वेदव्यासो नुः ? वेदव्यासो वा ? मूर्तः मूर्तिमान् वेदो नु ? वेदो वा । 'प्रश्ने विकल्पे नुस्विच्चे'ति वैजयन्ती । इति तत् द्रष्टृणां श्रीमध्वाचार्यं दृष्टवतां जनानां वाणीकृपाणी वचनखड्गलता मायावादिनः पक्षः सिद्धान्तो मायापक्षः तस्य मूलं छिनत्ति खण्डयति ॥ १२ ॥

मन्दोपकारिणी – वेदव्यास इति ॥ सुस्मितस्य शोभनं स्मितं ईषत् हासः यस्य सः तथोक्तः तस्य मध्वस्य सा मूर्तिः तनुः दिव्या सलक्षणा । अस्तीति अध्याहारः । तद्द्रष्टृणां तादृशं मध्वाचार्यं पश्यन्तीति तत्द्रष्टारः । तेषां मध्वाचार्यं दृष्टवतां जनानां एषः मध्वाचार्यः वेदव्यासो नु वेदव्यासो वा, मूर्तः मूर्तिमान् वेदो नु वेदो वा, 'नु पृच्छायां विकल्पे च' इत्यमरः इति एवंरूपा वाणीकृपाणी वाणी वाग्रूपा कृपाणी खड्गं नूनं निश्चयेन मायापक्षमूलं मायापक्षस्य मायावादसिद्धान्तस्य मूलं आश्रयं छिनत्ति खण्डयति 'छिदिर् द्वैधीकरणे इत्यतो लट् परस्मैपदं छिनत्ति छिन्तः छिन्दन्ति, । अयं भावः महापण्डितं लोकविलक्षणसुन्दराकारवन्तं मध्वाचार्यं दृष्ट्वा अयं साक्षात् वेदव्यासो वा शरीरधारी वेदो वा इति जनाः वदन्ति । एवं तन्माहात्म्यप्रशंसापरया जनवाचा अन्ये जनाः सर्वेऽपि अस्मच्छास्त्रं अनादृत्य मध्वशास्त्र एव प्रवीणाः भवेयुः । तेन अस्मच्छास्त्रं अप्रकाशितं भवेत् । खड्गेन वृक्षमूलच्छेदे वृक्षस्य अभिवृद्ध्यभाववदिति मे प्रतिभातीति ॥ १२ ॥

अक्लिष्टं तत्सूत्रभाष्यं बलीयोमानोपेतं का क्षतिर्नस्तथा चेत् ।
आस्माकाः केऽप्येवमुक्त्वा विलज्जा लज्जासिन्धौ दुःसहेऽमज्जयन्नः ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – अक्लिष्टमिति ॥ तेन कृतं सूत्रभाष्यं तत्सूत्रभाष्यं अक्लिष्टं ऋजुमार्गेण सूत्रार्थवर्णनपरं बलीयांसि यानि मानानि प्रमाणानि तैरुपेतम् । स्वोक्तार्थे बलवत्प्रमाणसहितं इति भावः । इति केचिद्वदन्ति । तथा चेन्नः का क्षतिः? का हानिः ? अस्तु नाम तत्तथा । विगता लज्जा येषां ते विलज्जाः । अस्माकं सम्बन्धिन आस्माका अस्मद्यूथ्या इत्यर्थः । केऽपि केचिदेवं तद्भाष्यप्रशंसारूपं वाक्यमुक्त्वा नोऽस्मान् दुःसहेऽसह्ये लज्जासिन्धावमज्जयन् । टु मज्ज शुद्धौ लङ् । अस्मद्यूथ्यानां केषाञ्चित् तत्प्रशंसारूपं वाक्यं श्रुत्वा वयमतितरां लज्जिता वर्तामह इति भावः ॥ १३ ॥

मन्दोपकारिणी – अक्लिष्टमिति ॥ तत् मध्वाचार्यकृतं सूत्रभाष्यं सूत्राणां भाष्यं अक्लिष्टं ऋजुमार्गेण सूत्रार्थवर्णनपरं तथा बलीयोमानोपेतं बलीयांसि प्रबलानि च तानि मानानि श्रुत्यादिप्रमाणानि च बलीयोमानानि तैः उपेतं स्वोक्तार्थे प्रबलप्रमाणसहितं इति केचिद्वदन्ति । आस्माकाः अस्मद्यूथ्याः केऽपि केचित् विलज्जाः विगता लज्जा ह्रीः येभ्यस्ते तथोक्ताः ह्रीरहिताः सन्तः चेत् यदि मध्वभाष्यं तथा पूर्वोक्तप्रकारं स्यात् तर्हि नः अस्माकं का क्षतिः का हानिः तत्तथास्तु एवं इत्थं मध्वभाष्यप्रशंसारूपं वाक्यं 'इवेत्थमर्थयोरेवं' इत्यमरः उक्त्वा अभिधाय नः अस्मान् दुःसहे सोढुमशक्ये लज्जासिन्धौ ह्रीसमुद्रे 'मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः' इत्यमरः अमज्जयन् मग्नानकुर्वन् 'टु मस्जो शुद्धौ इत्यतः णिजन्तात् लङ् परस्मैपदं' अस्मद्यूथ्यानामेव केषाञ्चित् मध्वभाष्यप्रशंसारूपं वाक्यं श्रुत्वा वयं अतितरां लज्जिता वर्तामहे इति भावः ॥ १३ ॥

तस्य व्याप्तैः शिष्यजालैस्तु गौणैः संसत्सिन्धौ शङ्खचक्रादिभृद्भिः ।
मा गृह्येरन् विश्वसत्वान्तराणि क्षेमाप्त्यै नस्तत्र नीतिं विधत्त ॥ १४ ॥

भावप्रकाशिका – जालं समूहः जलचरबन्धकं च । गौणा माधुर्यवाग्मित्वादि-गुणसम्बन्धिनस्तन्तुकृताश्च । शङ्खचक्रं शङ्खानां कम्बूनां मण्डलं च ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – तस्येति ॥ गुणानां सम्बन्धीनि गौणानि तैः माधुर्यादि गुणवद्भिः इत्यर्थः । व्याप्तैः सर्वदेशेषु विततैः । शङ्खश्च चक्रञ्च त आदिनि येषां तानि बिभ्रतीति तादृशैः पाञ्चजन्यसुदर्शनादिभगवल्लाञ्छनयुक्तैः इत्यर्थः । तस्य श्रीमध्वाचार्यस्य शिष्यजालैः शिष्यसमूहैः संसत्सिन्धौ सभासमुद्रे तत्र तत्र सभास्थानाख्यसमुद्र इत्यर्थः । विश्वानि यानि सत्वानि प्राणिनः तेषां नराणामिति यावत् । अन्तराणि मनांसि । 'द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुष्वि'त्यमरः । यथा मा गृह्येरन् न वशीक्रियेरन् तथा तत्र नीतिं उपायं नोऽस्माकं क्षेमाप्त्यै क्षेमप्राप्तयै अस्माच्छास्त्रादिरक्षासिद्धय इत्यर्थः । प्राप्तपरिपालनं हि क्षेममित्युच्यते विधत्त कुरुत । श्लेषार्थे तु गौणैः तन्तुमयैः व्याप्तैः जले प्रसृतैः शङ्खचक्रादिभृद्भिः कम्बुसमूहादिनानाजलचरचारिमद्भिर्जालैः जलचरबन्धनैः । 'जालं समूह आनायो गवाक्षक्षारकावपी'त्यमरः । सिन्धौ समुद्रे विश्वसत्वान्तराणि नानाप्राणि-विशेषानिवेति । मा गृह्येरन् इत्यत्र न माङ् अतो लिङ् ॥ १४ ॥

मन्दोपकारिणी – तस्येति ॥ गौणैः गुणानां सम्बन्धिभिः मधुरवचनसौजन्यादि-गुणवद्भिः व्याप्तैः सर्वदेशेषु पूरितैः शङ्खचक्रादिभृद्भिः शङ्खः पाञ्चजन्यश्च चक्रं सुदर्शनं च शङ्खचक्रे ते आदिनि येषां तानि गदादिलाञ्छनानि बिभ्रतीति शङ्खचक्रादिभृतः तैः । शरीरे शङ्खचक्रादिविष्णुलाञ्छनधारिभिः तस्य श्रीमध्वाचार्यस्य शिष्यजालैः शिष्याः एव जालानि आनायाः जलजन्तुग्राहकाः 'आनायः पुंसि जालं स्यात्' इत्यमरः तैः शिष्यजालैः । संसत्सिन्धौ संसदःसभास्थानान्येव सिन्धुः समुद्रः तस्मिन् तत्तद्देशगतसभास्थानाख्यसमुद्रे 'सभासमितिसंसदः' इत्यमरः विश्वसत्वान्तराणि विश्वानि च तानि सत्त्वानि जन्तवश्च विश्वसत्त्वानि तेषां अन्तराणि मनांसि मा गृह्येरन् यथा मा वशीक्रियेरन् वशीकृतानि न भवेयुः इति यावत् तथा तत्र अवशीकरणविषये नीतिं उपायं विधत्त कुरुत । किमर्थं- नः अस्माकं क्षेमाप्त्यै क्षेमस्य अस्मच्छास्त्रसंरक्षणस्य आप्त्यै सिद्धये प्राप्तपरिपालनं हि क्षेम इत्युच्यते मध्वाचार्यशिष्याः शङ्खचक्रादिलाञ्छनं धृत्वा तत्तद्देशान् प्रति गत्वा तत्सभास्थानगतान् सर्वमनुष्यान् प्रति मध्वभाष्यगुणान् मधुरवचनैः प्रतिपाद्य तेषां स्वशास्त्रे यथा रुचिं नोत्पादयेयुः तथा उपायं कुरुत । तेन अस्मच्छास्त्रसंरक्षणं भवेत् इति भावः । गौणैः गुणाः तन्तवः तैः अन्वितैः व्याप्तैः प्रसारितैः शङ्खचक्रादिभृद्भिः शङ्खानां कम्बूनां चक्रः समूहः 'चक्रो गणे चक्रवाकः' इति विश्वः शङ्खसमूह एव आदिः येषां ते शङ्खचक्रादयः नानामत्स्यादिजलचराः तान् बिभ्रति गृह्णन्तीति शङ्खचक्रादिभृतः तैः

शङ्खमीनमकरादिग्राहिभिः जालैः आनायैः जलचरजन्तुबन्धनैः इत्यर्थः । सिन्धौ समुद्रे विश्वसत्त्वान्तराणि विश्वानि च तानि सत्त्वान्तराणि जलजन्तुविशेषाश्च तानीव इति श्लेषार्थः । तानि यथा वशीकृतानि भवन्ति तथा मा गृह्णेरन् इति वैधर्म्यदृष्टान्तः 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च' इत्यमरः, 'वि पूर्वात् डु धाञ् धारणपोषणयोः इति धातोः लोट् परस्मैपदं धेहि धत्तं धत्त' 'ग्रह उपादाने इत्यतः कर्मणि लिङ् आत्मनेपदं गृह्णेत गृह्णेयातां गृह्णेरन्' ॥ १४ ॥

गौणैस्तर्कैर्गौणवाक्याभिगुप्तैर्गौणीं बुद्धिं वर्धयन्ते नृणां ते ।
हंसानां नो वाग्विघातप्रवीणाः सिन्धुं भूयोवारिवर्षैरिवाब्दाः॥ १५ ॥

पदार्थदीपिकोद्बोधिका – गौणैरिति ॥ हंसानां परमहंसाश्रमिणां नोऽस्माकं वाचां ब्रह्मणो निर्गुणत्वप्रतिपादकवाक्यानां विघातो निराकरणं तस्मिन् प्रवीणा दक्षाः ते श्रीमध्वशिष्याः । गुणानां प्रतिपादकानि गौणानि तादृशानि यानि वाक्यानि 'मय्यनन्तगुणेऽनन्ते', ''अथ कस्मादुच्यते ब्रह्मेति'', ''बृहन्तोऽह्यस्मिन् गुणाः'' इत्यादीनि भगवतोऽनन्तगुणत्वसम्पादकवाक्यानि तैः अभिगुप्तै रक्षितैः । गुणानां प्रतिपादका गौणाः तैः ब्रह्मणः सगुणत्वसाधकैः इत्यर्थः । तर्कैः ब्रह्म सगुणं भवितुमर्हति वस्तुत्वात् घटवदित्यादि अनुमानैः इत्यर्थः । नृणां पुरुषाणां गौणीं ब्रह्मणः सगुणत्वविषयिणीं बुद्धिम् । अपो जलानि ददति इति अब्दा मेघाः ते च हंसानां हंसपक्षिणां वाग्विघातप्रवीणा नो न हि सति वर्षे हंसरवः श्रूयते । भूयांसि बहुलानि च तानि वारीणि च तेषां वर्षैः 'वर्षोऽस्त्री भारताद्यब्दवृष्टिषु प्रावृषि स्त्रियां' इत्यभिधानम् । सिन्धुमिव समुद्रमिव नदीमिवेति वा वर्धयन्ते । न चात्र वस्तुत्वानुमानस्य कश्चित्क्षुद्रोपद्रवः 'मय्यनन्तगुणे' 'अथ कस्मादुच्यते' इत्यादि अनन्तगुणत्वोपपादकागमानुग्रहीतत्वादिति भावेन गौणवाक्याभिगुप्तैः इत्युक्तम् ॥ १५ ॥

मन्दोपकारिणी – गौणैरिति ॥ ते मध्वाचार्यशिष्याः गौणवाक्याभिगुप्तैः गौणानि ब्रह्मगुणप्रतिपादकानि च तानि वाक्यानि च तैः अभिगुप्तैः अनुगृहीतैः 'मय्यनन्तगुणेऽनन्ते' 'अथ कस्मादुच्यते ब्रह्मेति' 'बृहन्तो ह्यस्मिन् गुणाः' इत्यादिवचनानि भगवतोऽनन्तगुणत्वसाधकानीति ज्ञेयम् । गौणैः गुणानां सम्बन्धिनो गौणाः तैः ब्रह्मणः

सगुणत्वसाधकैः तर्कैः अनुमानैः, ''ब्रह्म सगुणं भवितुमर्हति वस्तुत्वात् घटवत्'' इत्याद्यनुमानानि ब्रह्मणः सगुणत्वसाधकानि ''मय्यनन्तगुणेऽनन्ते'' इत्याद्यागमानुगृहीतत्वेन प्रबलानीति ज्ञेयम् । नृणां पुरुषाणां गौर्णीं ब्रह्मणः सगुणत्वविषयिणीं बुद्धिं मतिं वर्धयन्ते अभिवर्धयन्ते 'वृधु वर्धने इति धातोः लट् आत्मनेपदं' कथंभूताः ते, हंसानां योगिनां नः अस्माकं वाग्विघातप्रवीणाः वाचां ब्रह्मणो निर्गुणत्वसाधकानां उक्तीनां विघाते निराकरणे प्रवीणाः निपुणाः 'प्रवीणो निपुणोऽभिज्ञः' इत्यमरः । के कमिव अब्दाः मेघाः 'अब्दौ जीमूतवत्सरौ' इत्यमरः । भूयोवारिवर्षैः भूयांसि बहूनि च तानि वारीणि उदकानि च भूयोवारीणि तेषां वर्षैः वृष्टिभिः सिन्धुमिव समुद्रमिव मेघा अपि हंसानां हंसपक्षिणां वाग्विघातप्रवीणाः मेघगर्जितैः हंसशब्दानां परिभूयमानत्वात् इति भावः ॥ १५ ॥

बाहुल्येन ह्येतदुक्त्वा खलु द्रागेते विश्वं व्याप्नुवन्ति प्रकामम् ।
अस्मिन्नस्मद्दर्शनापायकाले यद्वल्लोकापायकाले लयापः ॥ १६ ॥

भावप्रकाशिका – उक्त्वा खलु न वक्तव्यम् । 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वे'ति ॥ १६ ॥

पदार्थदीपिकोद्बोधिका – बाहुल्येनेति ॥ एतत् विपक्षोत्कर्षकथनपरं वाक्यं बाहुल्येन विस्तरेणोक्त्वा खलु न वक्तव्यं हि । 'अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वे'ति प्रतिषेधवाचिनः खलुशब्दप्रयोगे क्त्वाप्रत्ययः । एतद्बाहुल्येन उक्त्वा प्रयोजनाभावात् न वक्तव्यमिति भावः । अस्मिन् वर्तमानतया सन्निहिते अस्माकं दर्शनं शास्त्रं अस्मद्दर्शनं तस्य अपायस्य परिक्षयस्य काल एते तत्त्ववादिनो, द्राक् शीघ्रं विश्वं जगल्लोकापायकाले लोकक्षयकाले प्रलयकाल इत्यर्थः । लयापः प्रलयजलानि यद्वत् तद्वत् प्रकामः प्रकृष्ट इच्छा यथा भवति तथा प्रकामं व्याप्नुवन्ति ॥ १६ ॥

मन्दोपकारिणी – बाहुल्येनेति ॥ एतत् विपक्षोत्कर्षकथनपरं वचनं बाहुल्येन विस्तरेण उक्त्वा खलु न वक्तव्यं हि 'निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु' इत्यमरात् खलुशब्दो निषेधवचनः । 'अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति प्रतिषेधवाचिनः खलुशब्दस्य योगे क्त्वाप्रत्ययः । प्रयोजनाभावात् किं बहुवचनेन इति भावः । फलितार्थस्तु अयं- अस्मिन् वर्तमानतया सन्निहिते अस्मद्दर्शनापायकाले अस्माकं दर्शनस्य शास्त्रस्य

अपायः क्षयः तस्य काले एते तत्त्ववादिनो मध्वाचार्यशिष्याः द्राक् झटिति प्रकामं स्वेच्छया विश्वं जगत् व्याप्नुवन्ति सर्वदेशेषु ते एव भवन्ति 'वि पूर्वात् आप्लृ व्याप्तौ' इत्यतः लट् परस्मैपदं आप्नोति आप्नुतः आप्नुवन्ति । कथमिव लोकापायकाले लोकानां भुवनानां अपायकाले क्षयकाले कल्पान्ते इत्यर्थः । लयापः लयस्य प्रलयस्य आपः जलानि यद्वत् यथा विश्वं व्याप्नुवन्ति तथेति भावः ॥ १६ ॥

आकर्ण्येत्थं तस्य वाणीमथान्यो मानी तेषां मानिनां चित्तवेत्ता ।
स्वानां चेतो नन्दयन् मन्दचेता धृष्टामुच्चैर्वाचमाचष्ट कष्टः ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – आकर्ण्येति ॥ अथेत्थं तस्य वाणीं आकर्ण्य मानोऽभिमान एषां अस्तीति मानिनः तेषां पद्मतीर्थादीनां चित्तवेत्ता अभिप्रायवेत्ता मानी स्वयञ्च वैदुष्यादिमानी सन् मन्दं स्वल्पं चेतो बुद्धिर्यस्य सोऽन्यः कष्टः तन्नामकः कश्चिन्मायी स्वानां स्वयूथ्यानां चेतः, जातावेकवचनं चेतांसि इति यावत् । नन्दयन् सन् धृष्टां धैर्योपेतां वाचमुच्चैः आचष्ट उवाच । 'चक्षिङ् व्यक्तायां वाचि' लङ् ॥ १७ ॥

मन्दोपकारिणी – आकर्ण्येति ॥ अथ तस्य एवं वादिनः पुरुषस्य इत्थं पूर्वोक्तप्रकारां वाणीं वाचं आकर्ण्य निशम्य मानिनां मानः अभिमानः एषां अस्तीति मानिनः तेषां मानिनां पद्मतीर्थादीनां चित्तवेत्ता चित्तस्य हृदयस्य अभिप्रायस्य इति यावत् । वेत्ता ज्ञाता मानी स्वयं चाभिमानवान् अन्यः कश्चित् कष्टः दुष्टः स्वानां स्वकीयानां स्वयूथ्यानां इति यावत् । 'आत्मीये स्वोऽस्त्रियां धने' इत्यमरः । चेतः जातौ एकवचनं चेतांसि इत्यर्थः । नन्दयन् सुखयन् मन्दचेताः मन्दं अल्पं चेतः चित्तं यस्य सः तथोक्तः तादृशः सन् धृष्टां धाष्टर्योपेतां वाचं वाणीं उच्चैः उच्चध्वनिना आचष्ट अवोचत् 'आङ् पूर्वात् चक्षिङ् व्यक्तायां वाचीति धातोः लङ् आत्मनेपदं अचष्ट अचक्षातां अचक्षत' ॥ १७ ॥

तेजःशङ्कामात्रतो यद्विलीनं धिग्भीरूणां मानसं मानहीनम् ।
एकान्तेन प्राप्ततेजोविलीनं स्थेयो यस्माद्भाति हैयङ्गवीनम् ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – तेज इति ॥ यत् मानसं, तेजोऽस्तीति शङ्का तेजःशङ्का, केवलं तेजःशङ्का तेजःशङ्कामात्रं तस्मात् । प्रतिवादिनः सामर्थ्यातिशयो वर्तत इति

शङ्कामात्रत एव इत्यर्थः विलीनं द्रवीभूतं भवति भयशीलं भवतीत्यर्थः । भीरूणां अधीराणां मानहीनं अभिमानरहितं तन्मानसं मनो धिक् । यस्मात् भीरूणां मानसात् एकान्तेन नियमेन प्राप्तं सम्बद्धं यत्तेजोऽग्निस्तेन विलीनं द्रवीभूतं हैयङ्गवीनं नूतनघृतम् । 'तत्तु हैयङ्गवीनं यत् ह्योगोदोहोद्भवं घृतमि'त्यमरः । स्थेयोऽतिस्थिरं भाति प्रकाशते । अयं भावः हैयङ्गवीनं अपि सम्यगग्न्यादितेजःसम्बन्धे सत्येव विलीयते न तु तेजःशब्दमात्रेण । भीरूणां मनस्तु विपक्षशब्दमात्रश्रवणाद्बिभेति । तस्माद्धैयङ्गवीनादपि भीरूणां मानसमतिचपलमिति । स्थेय इत्यत्र 'प्रियस्थिरे'त्यादिना स्थिरशब्दस्य स्थः । द्विवचनेत्यादिना ईयसुन्प्रत्ययश्च ॥ १८ ॥

मन्दोपकारिणी – तेज इति ॥ यत् मानसं अन्तःकरणं तेजःशङ्कामात्रतः तेजसः अग्न्यादेः शङ्कामात्रतः अस्तीति ज्ञानादेव न तु तेजःसम्बन्धात् विलीनं द्रवीभूतं भीतमिति यावत् भवति 'ली द्रवीकरणे इति धातोः' भीरूणां अधीराणां 'अधीरे कातरः त्रस्तौ भीरुभीरुकभीलुकाः' इत्यमरः मानहीनं अभिमानेन शून्यं तत् मानसं मनः धिक् निंदितं 'धिक् निर्भर्त्सननिन्दयोः' इत्यमरः । कुतः- यस्मात् एकान्तेन नियमेन प्राप्ततेजोविलीनं प्राप्तं सम्बद्धं च तत् तेजः अग्न्यादितेजश्च तेन विलीनं द्रवीभूतं हैयङ्गवीनं नूतनं घृतं 'तत्तु हैयङ्गवीनं यद् ह्योगोदोहोद्भवं घृतं' इत्यमरः स्थेयः भीरूणां मानसापेक्षया स्थिरतरं भाति प्रतीयते अतो धिक् इत्यर्थः । अयं भावः हैयङ्गवीनमपि सम्यक् अग्न्यादितेजःसम्बन्धसत्वे एव द्रवीभूतं भवति न तु तेजःशब्दश्रवणमात्रेण । भीरूणां भवतां मनस्तु शब्दश्रवणमात्रेण बिभेति तस्मात् भवतां मानसं हैयङ्गवीनापेक्षया अतिचपलं इत्यतो धिक् इति 'भा दीप्तौ इत्यतो लट् परस्मैपदं भाति भातः भान्ति' ॥ १८ ॥

येषां विद्या शाङ्करी शङ्करी नो देवादीनां बाध्यतां साधयन्ती ।
शौक्रीवालं लज्जयेदेवपूज्यं तेषामेषां सन्निधौ को विषादः ॥ १९ ॥

भावप्रकाशिका – बाध्यतां बाधज्ञानगम्यतां बाध्यतां च ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – येषामिति ॥ नः अस्माकं शं सुखं करोतीति शङ्करी, देवा आदयो येषां तेषां मनुष्यतिर्यगादीनां बाध्यतां बाधज्ञानगोचरताम् । अनिर्वाच्यतां इत्यर्थः । साधयन्ती ब्रह्मैकमेव अबाध्यमन्यत्सर्वं ब्रह्मापरोक्षज्ञानेन बाध्यत इति हि मायिना स्वशास्त्रे

समर्थितम् । या शाङ्करी विद्या देवपूज्यं बृहस्पतिं शौक्रीव शुक्रसम्बन्धिनीव । देवदेवानुगादीनां पीड्यतां साधयन्ती कृत्यप्रयोगादिरूपा शुक्रविद्या देवगुरुं देवादीनां पीड्यताभावविधानाक्षमं यथा लज्जयेत् । तद्वल्लज्जयेत् । देवगुरुविद्यापि न शङ्करविद्यासदृशीत्यर्थः । सा शङ्कराचार्यसम्बन्धिनी विद्या, तत्कृत शारीरकभाष्यादि-रूपशास्त्रं येषां पद्मतीर्थादीनां अस्ति तेषामेषां पद्मतीर्थादीनां सन्निधौ अस्माकं को विषादः ? किं भयम्? ॥ १९ ॥

मन्दोपकारिणी – येषामिति ॥ येषां पद्मतीर्थादीनां शाङ्करी शङ्करस्य इयं शाङ्करी शङ्कराचार्यसम्बन्धिनी विद्या वर्तते तेषां एषां पद्मतीर्थादीनां सन्निधौ सन्निकर्षे 'सन्निधिः सन्निकर्षणं' इत्यमरः । को विषादः अस्माकं का भीतिः । कथंभूता विद्या नः अस्माकं शङ्करी शं सुखं करोतीति शङ्करी, पुनः कथंभूता देवादीनां देवमानवदानवादीनां बाध्यतां बाधकज्ञानगोचरतां साधयन्ती ब्रह्मैक्यमेव अबाध्यं तदन्यत् सर्वं ब्रह्मापरोक्षज्ञानेन बाध्यते इति हि मायिना स्वशास्त्रे समर्थितं या शाङ्करी विद्या देवपूज्यं बृहस्पतिं लज्जयेत् अपहसेत् देवगुरुबृहस्पतिविद्यापि न शङ्कराचार्यविद्यासदृशीति भावः । केन देवादीनां देवदेवानुगादीनां बाध्यतां पीड्यतां साधयन्ती कुर्वन्ती, शौक्री शुक्रस्य इयं शौक्री शुक्राचार्यसम्बन्धिनी विद्या कृत्याप्रयोगादिरूपा आभिचारिकविद्येव सा यथा देवपूज्यं बृहस्पतिं लज्जयेत् तिरस्कुर्यात् देवदेवानुगादीनां बाध्यताविधानक्षमत्वात् तथा इयमपि विद्या इति । 'इव यद्वा यथा शब्दाः उपमानार्थवाचकाः' इत्यभिधानम् ॥ १९ ॥

यद्यद्वैतं कर्कशैर्गौणतर्कै रुद्धं साध्यं नैव भात्यस्तु तावत् ।
षट्कर्मज्ञैर्दिव्यमन्त्रौषधाढ्यैरेतैर्गुप्तान् नो न जेता हि कोऽपि ॥ २० ॥

भावप्रकाशिका – पालनवशीकरणस्तम्भनविद्वेषणोच्चाटनमारणानि षट्कर्माणि ॥२०॥

पदार्थदीपिकोद्बोधिका – यदिति ॥ कर्कशैः निराकर्तुं अशक्यैर्गुणानां सम्बन्धिनो गौणाः तादृशा ये तर्का अनुमानानि तैः । ब्रह्म सगुणं भवितुमर्हति वस्तुत्वात् घटवत् इत्यादिभिः ब्रह्मणः सगुणत्वसाधकानुमानैः इत्यर्थः । रुद्धं प्रतिरुद्धमद्वैतं ऐक्यं यदि साध्यं साधयितुं शक्यमिति नैव भाति नैव प्रकाशते । विपक्षतर्काणामतिप्रबलत्वादद्वैत समर्थनमशक्यमित्यस्मद्यूथ्यानां प्रतीयते यदीत्यर्थः । अस्तु तावत् तत्तथास्तु ।

तर्ह्यद्वैतसमर्थनाभावेऽस्माकं पराजयः स्यादिति चेन्नैवमाशंक्यम् । षट्कर्मज्ञैः षट् च तानि कर्माणि च तानि जानन्तीति तैः पालनवशीकरणस्तम्भनविद्वेषणोच्चाटन- मारणलक्षणषट्-कर्मज्ञैरित्यर्थः । दिव्यानि यानि मन्त्रौषधानि मन्त्राश्चौषधानि च तैराढ्यैः सम्पन्नैरेतैः पद्मतीर्थाद्यैः गुप्तान् रक्षितान् नोऽस्मान् विजेता कश्चिन्न हि ॥ २० ॥

मन्दोपकारिणी – यदीति ॥ कर्कशैः निराकर्तुमशक्यैः गौणतर्कैः गौणैः सगुणत्वसाधकैः तर्कैः अनुमानैः रुद्धं प्रतिरुद्धं अद्वैतं साध्यं साधयितुं शक्यं इति यदि नैव भाति न प्रतीयते अस्मद्यूथ्यानामेव इति शेषः । तर्हि अस्तु तावत् तथैव तिष्ठतु 'अस् भुवीति धातोः' लोट् परस्मैपदं अस्तु-स्तात् स्ताम् सन्तु । अद्वैतसमर्थनाभावे अस्माकं पराजयः स्यात् इति चेत् नैवं शंक्यम् । षट्कर्मज्ञैः षट् च तानि कर्माणि च षट्कर्माणि तानि जानन्तीति षट्कर्मज्ञाः तैः पालनवशीकरणस्तंभनविद्वेषणोच्चाटनमारणाख्यानि षट्कर्माणि पुनः दिव्यमन्त्रौषधाढ्यैः मन्त्राश्च औषधानि च मन्त्रौषधानि दिव्यानि वीर्यवन्ति च तानि मन्त्रौषधानि च तैः दिव्यमन्त्रौषधैः आढ्यैः सम्पन्नैः इत्यर्थः । एतैः पद्मतीर्थादिभिः गुप्तान् संरक्षितान् 'दिव्यमन्त्रौषधाद्यैः' इति पाठे एतैः पद्मतीर्थादिभिः कर्तृभिः दिव्यमन्त्रौषधाद्यैः करणैः गुप्तान् इत्यर्थः । नः अस्मान् कोऽपि कश्चिदपि जेता पराभवकर्ता न हि नास्ति खलु 'जि जये' इत्यस्मात् धातोः लुट् परस्मैपदं जेता जेतारौ जेतारः' ॥ २० ॥

यद्यप्येवं न ह्युपेक्ष्यो विपक्षः किन्तु प्राप्तो नाधुनाऽऽक्रन्दकालः ।
अप्यद्वन्द्वस्वात्मबोधप्रतीतैराचार्यैर्यच्छङ्क्यते शङ्कराद्यैः ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – यद्यपीति ॥ यद्यपि एवं षट्कर्मज्ञैरेतैर्गुप्तानस्मान् कश्चिद्विजेता न । तथापि विपक्षो विरुद्धसिद्धान्त उपेक्ष्यः उपेक्षार्हो न हि । यथाशक्ति नानोपायैः तन्निराकरणे प्रयत्नः कर्तव्य एव । तर्हि विपक्षो नोपेक्ष्यश्चेत् ''आदाक्रन्दं मे हन्त शृण्वन्त्वि'त्यादि वदन् तेजःशङ्कामात्रतो यद्विलीनमि'त्यादिना किमित्याक्षिप्यत इत्याशङ्क्य परिहरति – किन्त्वित्यादिना ॥ किन्तु तथाप्यधुना इदानीं अतिसमर्थानां पद्मतीर्थादीनां उज्जीवनकाल इत्यर्थः । आक्रन्दकालो न प्राप्तः । तस्मात् तद्दर्शने आक्रन्दं कुर्वन्नाक्षिप्यत इति भावः । विपक्षः कुतो नोपेक्ष्यत इत्यपेक्षायामाह– अपीत्यादि ॥ भेदसमर्थनदक्षो

विपक्षः अद्वन्द्वस्वात्मबोधप्रतीतैर्न विद्यते द्वन्द्वं सदृशं यस्य सोऽद्वन्द्व उत्तमस्तादृशो यः स्वात्मबोधः शोभनात्मज्ञानं जीवब्रह्मैक्यज्ञानमिति यावत् । तेन प्रतीतैः ख्यातैः । 'प्रतीतः प्रथिते ख्यात' इत्यभिधानम् । शङ्कराद्यैराचार्यैर्यद्यस्माच्छङ्कचते । अद्वैतज्ञानवत्त्वेन प्रसिद्धैः शङ्कराचार्यप्रभृतिभिरपि विपक्षो निराकर्तुं शक्यते न वा इति शङ्कचते तस्मात्प्रबलत्वाद्विपक्षो नोपेक्ष्यत इत्यर्थः । यद्वा अद्वन्द्वस्वात्मबोधप्रतीतैरित्यस्य अद्वन्द्वो द्वितीयरहितो विगलिताशेषभेदादिप्रपञ्चस्तस्य स्वात्मनः शुद्धस्य निर्गुणात्मनो बोधेन प्रतीतैः इति वार्थः । तथा हि मायिनो निर्गुणसगुणभेदेन ब्रह्मद्वैविध्यमङ्गीकुर्वन्ति । तत्र विगलिताशेषभेदादिप्रपञ्चं निर्विशेषब्रह्मैव शुद्धं, तदपरोक्षज्ञानमेव मोक्षसाधनमिति चाहुः । अथवा अद्वन्द्वोऽसदृशः स्वः स्वतन्त्र आत्मा स्वामी श्रीहरिस्तस्य बोधो यस्य स श्रीपूर्णप्रज्ञाचार्यः प्रतीतैः प्रसिद्धैः शङ्कराद्यैः आचार्यैः यद्यस्मात् शङ्कचते जेतुं शक्यते वा न वा इति शङ्कचते । तस्मात्प्रबलत्वाद्विपक्षो मध्वाचार्यो नोपेक्ष्य इति । अद्वन्द्वः स्वात्मबोधः प्रतीतैरिति पदविभागेनास्मिन्पक्षेऽन्वयः ॥ २१ ॥

मन्दोपकारिणी – यद्यपीति ॥ यद्यपि एवं पूर्वोक्तप्रकारेण अस्मान् विजेता कोऽपि न भवेत् । तथापि विपक्षः विरुद्धसिद्धान्तः उपेक्ष्यः उपेक्षां कर्तुं अर्हः न हि, यथाशक्ति नानोपायैः निराकरणे यत्नः कर्तव्य इति भावः । ननु तर्हि विपक्षो नोपेक्ष्यश्चेत् 'आक्रन्दं मे हन्त शृण्वन्तु' इति आक्रन्दं कुर्वन् पुरुषः 'तेजःशङ्कामात्रतो यद्विलीनं' इत्यादिना किमित्याक्षिप्यत इति आशङ्कां परिहरति-किंत्विति ॥ किन्तु तथापि अधुना इदानीं आक्रन्दकालः आक्रन्दस्य आक्रोशस्य कालः न प्राप्तः तस्मात् आक्रन्दं कुर्वन् पुरुषः निन्द्यत इति विपक्षो नोपेक्ष्य इत्यनेन यथाशक्ति विपक्षनिराकरणे यत्नः कार्य इत्युक्तम् । तत्कुतः सर्वथा निराकरणे एव प्रयत्नः किं न स्यात् इत्यत आह-अपीति ॥ विपक्षः अद्वन्द्वस्वात्मबोधप्रतीतैः अद्वन्द्वः असदृशः सु शोभनः आत्मनः ब्रह्मणः बोधः ऐक्यज्ञानं अद्वन्द्वश्चासौ स्वात्मबोधश्च उत्तमब्रह्मैक्यज्ञानं इति भावः । तेन प्रतीतैः प्रख्यातैः 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः' इत्यमरः शङ्कराद्यैः शङ्कराचार्यमुख्यैः आचार्यैरपि यत् यस्मात् शङ्कचते अद्वैतज्ञानित्वेन प्रसिद्धैः शङ्कराचार्यप्रभृतिभिरपि भेदसमर्थनदक्षो विपक्षः निराकर्तुं शक्यते न वा इति सन्दिह्यते तस्मात् प्राबल्यात् विपक्षनिराकरणे यथाशक्ति यत्नः कार्य इत्युक्तं इति भावः । 'शकि शङ्कायां' इति धातोः कर्मणि लट् आत्मनेपदं शङ्कचते शङ्कचेते शङ्कचन्ते' ॥ २१ ॥

पारम्पर्येणागतं तत्त्वशास्त्रं हन्तोत्सन्नं नूतनेनेत्युदीर्य ।
तेषां दोषा वर्णनीया विदग्धैः सन्तोऽसन्तो वाऽपि मध्यस्थलोके ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – पारम्पर्येणेति ॥ विदग्धैः चतुरैः अस्मदीयैः पुरुषैः मध्यस्थः तेषु च अस्मासु च उदासीनो यो लोको जनः तस्मिन् । तेषां श्रीमध्वादीनां च सन्तो विद्यमाना असन्तोऽविद्यमाना वा दोषा नूतनेनेदानीन्तनेन तेन श्रीमध्वेन पारम्पर्येणानादितः परम्परयेत्यर्थः । आगतं तत्त्वशास्त्रं अद्वैतलक्षणतत्त्वनिर्णयाख्यं यच्छास्त्रं शङ्कराचार्यशास्त्रमुत्सन्नं नाशितम् । हन्त इत्युदीर्य पूर्वं एवं उक्त्वा वर्णनीया पश्चात्तद्दोषा वर्णनीयाः तर्हि मध्यस्थानां तेषां तेषु अनादरो अस्मासु आदरश्च भवेदिति भावः ॥२२॥

मन्दोपकारिणी – यथाशक्तियत्नप्रकारं दर्शयति **पारम्पर्येणेति** ॥ विदग्धैः चतुरैः अस्मदीयैः पुरुषैः मध्यस्थलोके मध्यस्थः उदासीनश्चासौ लोकश्च जनश्च मध्यस्थलोकः तस्मिन् 'लोकस्तु भुवने जने' इत्यमरः अस्मासु च परेषु च उदासीनजने तेषां मध्वादीनां सन्तो वा विद्यमाना वा असन्तोऽपि अविद्यमाना अपि वा दोषाः दूषणानि वर्णनीयाः कथनीयाः । किं कृत्वा नूतनेन नवीनेन मध्वेन, पारम्पर्येण अनादिपरम्परया आगतं प्राप्तं तत्त्वशास्त्रं तत्त्वस्य अद्वैतरूपतत्त्वस्य शास्त्रं अद्वैतनिर्णायकशाङ्करशास्त्रं इति यावत् । उत्सन्नं नाशितं हन्त विषादः । इतिशब्दः आद्यर्थकः एवमादि 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः । उदीर्य कथयित्वा एवं पूर्वं उक्त्वा पश्चात्तद्दोषवर्णनेन मध्यस्थानां तेषु अनादरो भवेत् इति भावः ॥ २२ ॥

स्वाभिप्रायो ब्रह्मवत् स्यादवाच्यो मायाशक्त्या सर्वनिर्वाहसिद्धिः ।
इत्थं नीत्या शास्त्रनीत्येव बाध्यः सर्वो लोकः स्वात्मनो यः परः स्यात् ॥ २३ ॥

भावप्रकाशिका – परः शत्रुरन्यश्च ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – स्वाभिप्राय इति ॥ यस्मात् मायाशक्त्या छद्मसामर्थ्येन सर्वनिर्वाहः परवशीकरणास्मदुत्कर्षाद्यखिलनिर्वाहः तस्य सिद्धिः । तस्मात्तेषां श्रीमध्वादीनां दोषान् वदद्भिः भवद्भिः अस्मदीयैः स्वाभिप्रायोऽस्मानेव भजध्वं न तान् इत्यादिरूपात्माभिपायः ब्रह्मवत् अवाच्यः स्यात् । यथा ब्रह्म अस्मन्मतेऽवाच्यं तद्वदिति

भावः । इत्थमेवं नीत्या उपायेन यदा स्वात्मनः परः प्रतिकूलः स्यात्, स सर्वोऽपि लोकः शास्त्रनीत्या इव स्वशास्त्रयुक्त्येव बाध्यः स्यात् । यथा शास्त्रयुक्त्या स्वप्रतिकूलवादिजनो बाध्यो निराकर्तव्यः तद्वदिति भावः ॥ २३ ॥

मन्दोपकारिणी – स्वाभिप्राय इति ॥ मध्वादीनां दोषान् वदद्भिः अस्मदीयैः स्वाभिप्रायः स्वेषां आत्मनां अभिप्रायः अस्मानेव भजध्वं न तान् इत्यादिरूप आशयः 'अभिप्रायश्छन्द आशयः' इत्यमरः । ब्रह्मवत् निर्गुणब्रह्मवत् अवाच्यः वक्तुं अनर्हः स्यात् यथा अस्मन्मते ब्रह्म अवाच्यं तद्वत् न वक्तव्य इति भावः । कुतः यस्मात् मायाशक्त्या मायायाः छद्मनः शक्त्या सामर्थ्येन सर्वनिर्वाहसिद्धिः सर्वस्य परवशीकरणास्मदुत्कर्षाद्यखिलस्य निर्वाहः घटनं तस्य सिद्धिः भवेत् अतः इत्यर्थः । इत्थं एवं नीत्या उपायेन स्वात्मनः स्वस्य यः जनः परः शत्रुः प्रतिकूल इति यावत् 'परः स्यादुत्तमानात्मवैरिदूरेषु केवले परमव्ययमिच्छन्ति' इति विश्वः, स्यात् भवेत् सः सर्वोऽपि लोकः बाध्यः निराकर्तव्यः । कयेव शास्त्रनीत्येव शास्त्रयुक्त्या यथा स्वप्रतिकूलवादिजनः निराकार्यः तथेति भावः ॥ २३ ॥

ग्रामे ग्रामे वार्यतां माननैषां पूर्वं पूर्वं सामपूर्वैरुपायैः ।
सम्प्राप्तानां मानभङ्गाय कार्यं ग्रन्थाकर्षाद्युद्यतैरस्मदीयैः ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – ग्राम इति ॥ ग्रामे ग्रामे वीप्सायां द्विर्वचनं प्रतिग्रामं इत्यर्थः । एषां तत्त्ववादिनां साम पूर्वं येषां तैः सामदानभेददण्डाख्यैरित्यर्थः । उपायैः पूर्वं पूर्वं ग्रामप्रवेशात्पूर्वमेव मानना सम्भावना वार्यताम् । आगमननमस्कारभिक्षाप्रदानादिसम्भावनं न कर्तव्यमिति निवार्यतां इत्यर्थः । सम्प्राप्तानां येन केनाप्युपायेन ग्रामं प्राप्तानां तेषां मानभङ्गोऽभिमानखण्डनं तस्मै उद्यतैः सन्नद्धैः अस्मदीयैः ग्रान्थाकर्षो ग्रन्थानामाकर्षणमादिः यस्य तादृशं ग्रन्थाकर्षणदण्डखण्डनताडनादिकमित्यर्थः । कार्यम् ॥ २४ ॥

मन्दोपकारिणी – ग्रामेति ॥ ग्रामे ग्रामे वीप्सायां द्विर्वचनं प्रतिग्रामं इत्यर्थः । एषां तत्त्ववादिनां सामपूर्वैः साम पूर्वं आदि येषां ते सामपूर्वाः तैः उपायैः सामभेददानदण्डाख्यैः चतुर्भिः उपायैः इत्यर्थः । साम सान्त्ववचनं, भेदः परस्परविरोधोत्पादनं, दानं द्रव्यदानं, दण्डः शरीरद्रव्यदण्डनादि एवं चत्वारः उपायाः ज्ञेयाः । पूर्वं पूर्वं ग्रामप्रवेशात् पूर्वमेव

मानना अभ्यागमननमनभिक्षाप्रदानादिरूपा सम्भावना वार्यतां निवार्यतां इत्यर्थः । 'वृञ् वरणे इति धातोः कर्मणि लोट् आत्मनेपदं वार्यतां वार्येतां वार्यन्तां' सम्प्राप्तानां येन केनाप्युपायेन ग्रामं प्रविष्टानां तेषां मानभङ्गाय मानस्य अभिमानस्य भङ्गाय खण्डनाय उद्यतैः सन्नद्धैः अस्मदीयैः पुरुषैः ग्रन्थाकर्षादि ग्रन्थस्य पुस्तकस्य आकर्षः अपहरणं तदेव आदि यस्य तत् ग्रन्थाकर्षादि । आदिशब्देन दण्डखण्डनताडनादिकं ग्राह्यं, कार्यं कर्तव्यम् ॥ २४ ॥

इत्याद्येते कार्यमालोच्य काले चक्रुर्वक्राश्चक्रिभक्तप्रतीपम् ।
योग्या मङ्क्तुं तेऽन्यथा स्युः कथं वा दुःखोग्राम्भस्यन्धतामिस्रसिन्धौ ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – इत्यादीति ॥ वक्रा वक्रबुद्धय एते मायिनः काले तस्मिन्काले । इति आदिर्यस्य तदित्यादि 'पारम्पर्येणागतं' 'स्वाभिप्रायो ब्रह्मवत्स्यात्' 'ग्रामे ग्रामे वार्यतामि'ति श्लोकत्रयेण कर्तव्यतयोक्तं कार्यं आलोच्य पुनरपि विचार्य । चक्रं अस्यास्तीति चक्री श्रीकृष्णः तस्य भक्तस्य मध्वस्य प्रतीपं विरोधं दोषवर्णनसम्भावना-निवारणादिकं चक्रुः । अन्यथा तत्प्रतीपकरणाभावे ते मायिनः दुःखमेवोग्राम्भो यस्मिंस्तस्मिन्नन्धतामिस्रमेव सिन्धुः तस्मिन् मङ्क्तुं मज्जनाय कथं वा योग्याः स्युः ? तमोयोग्यानां तेषां तमसि मज्जनं तावदावश्यकम् । तच्च श्रीहरिमुख्यप्राणद्वैषैकसाध्यम् । 'द्वेषाद्दते न हि हरौ तमसि प्रवेशः प्राणे चे'त्युक्तेः तत् प्रतीपकरणं तेषां युक्तमिति भावः ॥ २५ ॥

मन्दोपकारिणी – इत्यादीति ॥ वक्राः कुटिलबुद्धयः एते मायिनः काले रूप्यपीठे व्याख्यानादुत्कर्षेण मध्वाचार्यस्थितिकाले । इत्यादि इति पूर्वोक्तं आदि यस्य तत् इत्यादि । कार्यं कर्तव्यं आलोच्य पुनरपि विचार्य, चक्रिभक्तप्रतीपं चक्रं सुदर्शनचक्रं अस्यास्तीति चक्री चक्रिणः चक्रधारिणः श्रीकृष्णस्य भक्तस्य मध्वाचार्यस्य प्रतीपं दोषवर्णनबहुमान-निवारणादिरूपं विरोधं चक्रुः कृतवन्तः । 'डु कृञ् करणे इति धातोः लिट् परस्मैपदम्' । अन्यथा प्रतीपकरणाभावे ते मायिनः दुःखोग्राम्भसि उग्रं असह्यं च तत् अम्भः उदकं च उग्राम्भः दुःखमेव उग्राम्भो यस्मिन् स तथोक्तः तस्मिन् दुःखाख्योग्रजलोपेते अन्धतामिस्रसिन्धौ अन्धतामिस्राख्यश्चासौ सिन्धुः समुद्रश्च तस्मिन् मंक्तुं मज्जनाय

अधःप्रवेशनाय कथं वा योग्याः स्युः भवेयुः । तमोयोग्यानां तेषां तमसि पतनं तावदवश्यम्। तच्च हरिमुख्यप्राणद्वेषेणैव साध्यमिति श्रुत्यादौ निश्चितं तस्मात् मध्वाख्यमुख्यप्राणद्वेषकरणं तेषां एव युक्तं इति भावः । 'अस् भुवीति धातोः विधिलिङ् परस्मैपदम्' ॥ २५ ॥

व्रत्याकारं वासुदेवद्विषं तं प्राज्ञंमन्यं पुण्डरीकाभिधानम् ।
वादव्याजात्क्षेपकामाः कुमन्त्राश्चक्रुर्यत्नं रूप्यपीठालयेऽमी ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – व्रत्याकारमिति ॥ रूप्यपीठालये रूप्यपीठालयस्थदेवतालये मिलिता इति शेषः । वक्रा वक्रबुद्धयः ते अमी मायिनः कुमन्त्रात् कुत्सितालोचनात् वाद इति व्याजस्तेनाक्षेपाय निराकरणाय काम इच्छा येषां तादृशास्सन्तः । वादं कुर्म इति श्रीमध्वनिराकरणकामास्सन्त इत्यर्थः । व्रतिनो यतेराकारो वेषो यस्य तं वासुदेवद्विषं प्राज्ञमात्मानं मन्यत इति प्राज्ञंमन्यस्तम् । 'आत्ममाने खश्' इति खशि मुमागमः । तं प्रसिद्धं पुण्डरीक इत्यभिधानं नाम यस्य तं पुण्डरीकपुर्याख्यं इत्यर्थः । यत्नं वादाय सन्नद्धं चक्रुः ॥ २६ ॥

मन्दोपकारिणी – व्रत्याकारमिति ॥ रूप्यपीठालये रजतपीठपुरे मिलिता इति शेषः । कुमन्त्राः कुत्सितः मन्त्रः गुप्तवादः गौप्यविचारः येषां ते कुमन्त्राः 'पापकुत्सेषदर्थे कुः' इत्यमरः 'वेदभेदे गुप्तवादे मन्त्रः' इति च । अमी मायिनः वादव्याजात् स्वाभिप्रेताच्छादनेन आकारान्तरप्रदर्शनं व्याजः छद्मेत्यर्थः । 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः । वादस्य वादकथया व्याजः वादं कुर्मः इति छद्म तस्मात् ''ल्यब्लोपनिमित्ता पञ्चमी'' वादं निमित्तीकृत्येर्थः । क्षेपकामाः क्षेपं मध्वाचार्यनिराकरणं कामयन्त इति कामाः सन्तः व्रत्याकारं व्रतिनः यतेः आकारः काषायकौपीनदण्डधारित्वरूपवेषः यस्य स तथोक्तः तं वासुदेवद्विषं वासुदेवस्य विष्णोः द्विट् द्वेषी तं प्राज्ञम्मन्यं अहमेव प्राज्ञः पण्डित इत्यभिमन्यमानं तं प्रसिद्धं पुण्डरीकाभिधानं पुण्डरीकपुरिनामकं वादिनं यत्नं यत्नवन्तं वादार्थसन्नद्धं चक्रुः ॥ २६ ॥

यद्वत् सिंहं ग्रामसिंहोऽशुचीच्छुः हंसं काको यद्वदेवैकदृष्टिः ।
यद्वन्मायी भूरिमायुस्तरक्षुं तद्वद्विद्वद्वर्यमाह्वास्त मूढः ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – यद्वदिति ॥ मूढः पुण्डरीकपुरी । विद्वद्वर्यं विद्वच्छ्रेष्ठं श्रीमध्वाचार्यं अशुचौ अपवित्रे विष्ठादाविच्छा यस्य स तथा ग्रामसिंहः शुनकः सिंहं यद्वत् । अयमपि अशुचीच्छुः वेदादिप्रमाणविरुद्धत्वादशुचावात्मनो ब्रह्मतादात्म्येऽनुसन्धानवत्वात् । एका दृष्टिर्यस्य स तथा काको हंसं यद्वत् । अयमप्येकदृष्टिः ब्रह्मैकमेव सत्यं अन्यत् सर्वं मिथ्येति दर्शनात् । माया छद्म अस्यास्तीति मायी भूरिमायुः सृगालः । 'स्त्रियां शिवा भूरिमायुर्गोमायुर्मृगधूर्तक' इत्यमरः । तरक्षुं शार्दूलं यद्वत् । 'शार्दूलद्वीपिनौ व्याघ्रो तरक्षुस्तु मृगादन' इत्यमरः । अयमपि मायी सर्वप्रपञ्चोपादानत्वेनेश्वराश्रिता प्रामाणिकमायाया अभ्युपगमात् । तद्वदाह्वास्त । स्पर्धायां आङ् इत्याङ् पूर्वाध्वयतेरात्मनेपदम् ॥ २७ ॥

मन्दोपकारिणी – यद्वदिति ॥ मूढः मध्वमाहात्म्याज्ञानी 'अज्ञे मूढयथाजात मूर्खवैदेहबालिशाः' इत्यमरः । पुण्डरीकपुरिः विद्वद्वर्यं विदुषां पण्डितानां वर्यं श्रेष्ठं श्रीमध्वाचार्यं तद्वत् तथा आह्वास्त स्पर्धया वादाय आहूतवान् । स्पर्धायां आङ् इत्याङ् पूर्वात् ह्वेञ् स्पर्धयां शब्दे च इत्यतो धातोः लुङ् आत्मनेपदं आह्वास्त आह्वासातां आह्वासत' कथमिवाह्वास्त- अशुचीच्छुः अशुचिं अपवित्रं उच्छिष्टादिकं इच्छति कामयते इति अशुचीच्छुः ग्रामसिंहः सारमेयः सिंहं मृगेन्द्रं यद्वत् यथा । अयमपि मायी अशुचीच्छुः वेदादिप्रमाणविरुद्धत्वेन अशुचेः ब्रह्मात्म्यैक्यस्य कामनात् । पुनः कथमिव, एकदृष्टिः एका दृष्टिः चक्षुरिन्द्रियं यस्य स तथोक्तः काकः हंसं यद्वत् अयमपि एकदृष्टिः ब्रह्मात्मैक्यमेव सत्यं अन्यत्सर्वं मिथ्येति ज्ञानवान् । पुनः कथमिव मायी छद्मवान् भूरिमायुः शृगालः तरक्षुं शार्दूलं तद्वत् आह्वास्त 'शार्दूलद्वीपिनौ व्याघ्रौ तरक्षुस्तु मृगादनः' इत्यमरः । अयमपि मायी सर्वप्रपञ्चारोपोपादानेश्वराश्रिताप्रामाणिकमायाभ्युपगमात् तद्वदिति अन्वयः ॥ २७ ॥

अप्यल्पोऽसौ न ह्युपेक्षाम्बभूवे लोलात्मेवादक्षपक्षः पतङ्गः ।
मध्वेनाहो दुस्तरेण स्वभावात् तेजोराजीराजितेनाग्निनेव ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – अपीति ॥ पतङ्ग इव शलभ इव लोलः चञ्चल आत्मा मनो यस्य स तथा । अदक्षः पक्षो यस्य सः अदक्षपक्षः शलभो यथा आशुगमने असमर्थपतत्रवान् इत्यर्थः । तद्वत् स्वपक्षसमर्थने परपक्षनिराकरणे चासमर्थपक्षः । अत एव अल्पोऽप्यसौ पुण्डरीकपुरिः, स्वभावान्मन्त्रौषधतपोवेदविद्याजनितसामर्थ्यमनपेक्ष्य केवलस्व-रूपसामर्थ्यादेव दुस्तरेणात्येतुं अशक्येन मध्वेन तेजोराजिस्तेजःसमूहस्तया राजित उद्भासितः तेन अग्निना इव नोपेक्षाम्बभूवे नोपेक्षितः । अग्निमभिपतन्नल्पोऽपि पतङ्गः यथाग्निना नोपेक्ष्यते किन्तु दह्यत एव । एवं असौ अपि मध्वेन नाल्प इत्युपेक्षित इति भावः ॥ २८ ॥

मन्दोपकारिणी – अपीति ॥ पतङ्ग इव शलभनामककीटविशेष इव 'पतङ्गः शलभः सूर्ये' इति विश्वः । लोलात्मा लोलः चञ्चलः आत्मा स्वभावो यस्य स तथोक्तः 'लोलश्चञ्चलतृष्णयोः' इति विश्वः । 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु' इति च । शलभो यथा अदक्षपक्षः अदक्षौ दभ्रौ पक्षौ पतत्रे यस्य स तथोक्तः तद्वदयमपि अदक्षपक्षः अदक्षः स्वपक्षसमर्थने वा परनिराकरणे वा असमर्थः पक्षः सिद्धान्तो यस्य स तथोक्तः । अत एव अल्पोऽपि नीचोऽपि असौ पुण्डरीकपुरिः मध्वेन मध्वाचार्येण नोपेक्षाम्बभूवे नोपेक्षितो हि अहो आश्चर्यम् । कथंभूतेन मध्वेन स्वभावात् मन्त्रौषधतपो-विद्यादिजनितसामर्थ्यं अनपेक्ष्य केवलं स्वरूपसामर्थ्यादेव दुस्तरेण पराजेतुं अशक्येन । कः केनेव पतङ्गः तेजोराशीराजितेन तेजसां राशिः समूहः तेन राजितेन अग्निनेव अग्नौ पतन् अल्पोऽपि पतङ्गः यथा अग्निना नोपेक्ष्यते किन्तु दह्यत एव तथा असावपि अस्य इति नोपेक्षित इति भावः ॥ २८ ॥

मानैर्मान्यैर्भासमानोऽसमानैराक्षिप्यैनं स्वं मतं साधयित्वा ।
प्रीत्यै विष्णोरुत्तमप्रीतितीर्थो वेदव्याख्यां वेदवेदी चकार ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – मानैरिति ॥ न विद्यते समानं सदृशं प्रमाणं येषां तानि असमानानि तैः प्रबलैः इत्यर्थः । अत एव मान्यैः मानैः वेदादिप्रमाणैः भासमानः विवक्षितार्थे वेदादिप्रबलप्रमाणोदाहरणेन शोभमान इत्यर्थः । वेदं वेत्तीत्ति वेदवेदी वेदज्ञ इत्यर्थः । उत्तमश्चासौ प्रीतितीर्थ आनन्दतीर्थश्च उत्तमप्रीतितीर्थ एनं स्वप्रत्यर्थिभूतं मायिनं

आक्षिप्य निराकृत्य पुनः स्वं स्वकीयं मतं सिद्धान्तं साधयित्वा पुनश्च विष्णोः प्रीत्यै वेदव्याख्यां चकार ॥ २९ ॥

मन्दोपकारिणी – मानैरिति ॥ असमानैः न विद्यते समानं सदृशं येषां तानि असमानानि प्रबलानि इत्यर्थः तैः । मान्यैः सर्वेषां प्रमाणत्वेन अङ्गीकारार्हैः मानैः वेदादिप्रमाणैः भासमानः विवक्षितार्थवेदादिप्रबलप्रमाणोदाहरणेन शोभमानः वेदवेदी वेदं वेदार्थं वेत्तीति वेदवेदी उत्तमप्रीतितीर्थः उत्तमश्चासौ प्रीतितीर्थः आनन्दतीर्थश्चेति तथोक्तः । एनं प्रत्यर्थिभूतं पुण्डरीकपुरिं आक्षिप्य निराकृत्य पुनः स्वं स्वकीयं मतं सिद्धान्तं साधयित्वा पुनश्च विष्णोः प्रीत्यै वेदव्याख्यां वेदस्य व्याख्यां प्रवचनं चकार कृतवान् । पुण्डरीकपुरिणा सह वादकथायां तदुक्तसिद्धान्तं वेदादिप्रबलप्रमाणैः निरस्य तं निरुत्तरीकृत्य ततः स्वकीयसिद्धान्तं समर्थ्य पराजितस्य गमनानन्तरं पुनरपि विष्णुप्रीत्यर्थं वेदव्याख्यानं चकार आनन्दतीर्थाचार्यः इति भावः ॥ २९ ॥

आम्नायं ये पेठुराम्नायपूर्वं प्राप्ता विप्रास्तत्र कौतूहलेन ।
पर्यासीनास्तावदाचार्यवर्यं प्रेक्ष्यं प्रेक्षाञ्चक्रिरेऽनेकसंख्याः ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – आम्नायमिति ॥ ये आम्नायोऽनन्यथापाठः पूर्वः पुरस्सरो यथा भवति तथा आम्नायपूर्वं स्वरवर्णादीनां अन्यथापाठराहित्येन सहितं सत्सम्प्रदाय-पूर्वकमिति यावत् । आम्नायं वेदं पेठुः पठितवन्तः । पठ पठने लिट् । तावत्तदा वेदव्याख्यानसमय इत्यर्थः । तत्र कौतूहलं कौतुकं तेन प्राप्ता अनेका भूयसी सङ्ख्या येषां ते तथोक्तास्ते विप्रवर्याः पर्यासीनाः परित उपविष्टाः सन्तः प्रेक्ष्यं दर्शनीयं आचार्यवर्यं प्रेक्षांचक्रिरे ददृशुः ॥ ३० ॥

मन्दोपकारिणी – आम्नायमिति ॥ ये विप्राः ब्राह्मणाः आम्नायं वेदं 'श्रुति स्त्री वेद आम्नायः' इत्यमरः । आम्नायपूर्वं आम्नायाः स्वरवर्णादीनां विपरीतपाठराहित्यं 'आम्नायोऽनन्यथापाठः' इत्यमरः, अन्यथापाठराहित्यपूर्वकं यथा भवति तथा क्रिया-विशेषणं एतत् । वेदाध्येतृसम्प्रदायपूर्वकं इति यावत् । पेठुः अधीतवन्तः 'पठ व्यक्तायां वाचीत्यतो लिट् परस्मैदम्' । अनेकसङ्ख्याः अनेका बह्वी सङ्ख्या येषां ते तथोक्ताः ते विप्राः तावत् तदा वेदव्याख्यानसमये तत्र रूप्यपीठे कौतूहलेन कौतुकेन प्राप्ताः समागताः

सन्तः पर्यासीनाः परितः आचार्यस्य समीपे समन्ततः आसीनाः उपविष्टाः सन्तः 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः । प्रेक्ष्यं दर्शनीयं सुन्दरं इत्यर्थः । आचार्यवर्यं आचार्याः वेदव्याख्यातारः 'मन्त्रव्याख्याकृदाचार्यः' इत्यमरः तेषां वर्यं श्रेष्ठं श्रीमदानन्दतीर्थाचार्यं प्रेक्षाञ्चक्रिरे दृष्टवन्तः । वेदोच्चारणादिश्रवणविषये सावधाना बभूवुः इति भावः ॥ ३० ॥

उक्ताङ्गेभ्यः कादिकान् व्यञ्जयन्तं तत्तन्मात्राव्यञ्जनादौ प्रवीणम् ।
तिस्रोऽवस्थास्तद्गुणैर्भावयन्तं देवा दृष्ट्वा व्यस्मरन् देवदेवम् ॥ ३१ ॥

भावप्रकाशिका – उक्ताङ्गेभ्यः कादिकान् 'अकुहविसर्जनीयानां कण्ठ' इत्याद्युक्तस्थानेभ्यः ककारादीन्, 'ब्रह्मा शिरसि, ललाटे रुद्र' इत्याद्युक्ताङ्गेभ्यो ब्रह्मादिकान् व्यञ्जयन्तम् । तत्तन्मात्राव्यञ्जनादौ कादीनामुचितमात्रानुकूल्येन व्यञ्जने अपरुषव्यक्तत्वे च । आदिशब्दात्''एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम् । यथा व्याघ्री हरेत्पोतं दंष्ट्राभ्यां न तु पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्' इति च । अपरुषव्यक्तत्वे शब्दतन्मात्रादिसृष्टौ भूतादिसृष्टौ च । किं बहुना तिस्रोऽवस्थास्तद्गुणैः पश्यन्ती मध्यमा वैखरीति शब्दस्फोरणसमये तिस्रोऽवस्थास्तत्तद्देवताध्यानात्मकैर्गुणैः । 'तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं चक्रे करणविशदां वैखरीं च प्रपद्ये' इति च । सृष्टिस्थितिसंहारावस्थास्तद्गुणैस्सत्वादिभिश्च ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – उक्तेति ॥ देवा, उक्तानि यान्याङ्गानि तेभ्यः । 'अकुहविसर्जनीयानां कण्ठ' इत्यादिना ककारादिवर्णोच्चारणस्थानत्वेनोक्तकण्ठाद्यङ्गेभ्य इत्यर्थः । कः ककार आदिर्येषां ते यथा तान् वर्णान् व्यञ्जयन्तमुच्चारयन्तं तत्तन्मात्राव्यञ्जनादौ तेषां तेषां मात्रास्तत्तन्मात्रास्तासां व्यञ्जनमुच्चारणं तदादिर्यस्य स तथोक्तस्तस्मिन्। ककारादि तत्तद्वर्णानामुचितैकद्व्यादिमात्राव्यञ्जने आदिशब्देन व्यक्तत्वेन अपरुषत्वेन चोच्चारणे चेत्यर्थः । प्रवीणं चतुरम् । तथोक्तं 'एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनन्त्वर्धमात्रक'मिति । व्यक्तत्वेनापरुषत्वेनोच्चारणप्रकारश्च सदृष्टान्त उच्यते– 'यथा व्याघ्री हरेत्पोतं दंष्ट्राभ्यां न तु पीडयेत् । भीता

पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्' । एवञ्चायमभिप्रायः— अर्धमात्रत्वेन ककारादि-हलामुच्चारणसमये तेषां स्थानत्वेनोक्तकण्ठताल्वाद्यंगेभ्य उच्चारणे ककारादीनां यथासम्भवं ह्रस्वदीर्घप्लुतात्मिकाकारादिस्वरशिरस्कत्वेनोच्चारणे तत्रापि व्यक्तत्वेनापरुषत्वेन चोच्चारणे चतुरमिति । तिस्रोऽवस्थाः पश्यन्ती मध्यमा वैखरी नाम तिस्रोऽवस्थास्तासां गुणास्तद्गुणा-स्तैस्तासां पृथग्पृथगुक्तदेवताध्यानात्मकैरित्यर्थः । भावयन्तं उत्पादयन्तं पश्यन्त्यादीनामुक्त-देवताध्यानाख्यगुणयुक्तत्वेन पश्यन्त्याद्यवस्थाश्चोत्पादयन्तमिति भावः । वेदव्याख्यानसमय एवंभूतं श्रीमध्वाचार्यं दृष्ट्वा उक्ताङ्गेभ्यः — ''ब्रह्मा शिरसि, ललाटे रुद्रः,'' 'चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत मुखादिन्द्रश्चाग्निश्चे'त्यादि श्रुतिभिर्ब्रह्माद्युत्पत्तिस्थान-त्वेनोक्तशिर आद्यङ्गेभ्यः कादिकान् ब्रह्मादीन् व्यञ्जयन्तं सृजन्तं तत्तन्मात्राव्यञ्जनादौ आकाशादिभूतानां तत्तन्मात्रागुणभूतशब्दादिसृष्टौ । आदिशब्देन आकाशादिपञ्चभूतसृष्टौ च प्रवीणम् । तिस्रोऽवस्थाः सृष्टिस्थितिसंहारलक्षणास्तिस्रोऽवस्थाः तत्तद्गुणैः सृष्ट्यादावङ्गभूतैः सत्वादिगुणैर्भावयन्तमुद्भावयन्तं देवदेवं श्रीनारायणं व्यस्मरन् ॥ ३१ ॥

मन्दोपकारिणी – उक्तेति ॥ उक्ताङ्गेभ्यः 'अकुहविसर्जनीयानां कण्ठः' इत्यादि लक्षणग्रन्थे ककारादिवर्णाभिव्यक्तिस्थानत्वेन उक्तानि च तानि अङ्गानि च कण्ठताल्वाद्यवयवाश्च उक्ताङ्गानि तेभ्यः 'अङ्गं प्रतीकोऽवयवः' इत्यमरः । कादिकान् ककारः आदिः येषां ते कादिकाः तान् वर्णान् व्यञ्जयन्तं उच्चारणेन व्यक्तीकुर्वन्तं तत्तन्मात्राव्यञ्जनादौ ते ते च ते मात्राः वर्णाः तेषां वर्णानां समुचितैकमात्रादिमात्राणां व्यञ्जनं व्यक्तीकरणमेव आदि मुख्यं आदिशब्देन वर्णानां स्पष्टत्वेनोच्चारणं अपौरुषेयत्वेनोच्चारणं ग्राह्यं तस्मिन् प्रवीणं निपुणं 'प्रवीणे निपुणाभिज्ञः' इत्यमरः । एकमात्रादिलक्षणं चोक्तं 'एकमात्रो भवेत्ह्रस्वो द्विमात्रो दीर्घ उच्यते । प्लुतो भवेत्त्रिमात्रस्तु व्यञ्जनं त्वर्धमात्रकं' इति । अपौरुषेयत्वेनोच्चारणं नाम वर्णानां यथा पीडा न स्यात् तथोच्चारणं तत्प्रकारश्च सदृष्टान्त उक्तः 'यथा व्याघ्री हरेत्पोतं दंष्ट्राभ्यां न तु पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्' इति । अयं भावः अर्धमात्रत्वेन ककारादिहकारान्तोच्चारणसमये तेषां स्थानत्वे क्लृप्ततालवाद्यङ्गेभ्यः उच्चारणे ककारादिवर्णानां, यथासम्भवं एकमात्रादिसंज्ञिकह्रस्वदीर्घप्लुतात्मकोदात्तानुदात्तादिस्वरशिर-स्कत्वेन उच्चारणे तत्रापि व्यक्तेन अपौरुषेयत्वेन चोच्चारणे चतुरमिति । तथा शब्दरूपस्य उच्चारणसमये पश्यन्ती मध्यमा वैखरीनामिकाः तिस्रः अवस्थाः भवन्ति 'तां पश्यन्तीं

प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं चक्रे करणविशदां वैखरीं च प्रपद्ये' इति उक्तत्वात् । तथा च ताः तिस्रोऽवस्थाः तद्गुणैः तासां पश्यन्त्याद्यवस्थादेवतानां गुणैः पृथक्पृथगुक्त-ध्यानाख्यगुणैः भावयन्तं अवस्थादेवताध्यानपूर्वकं उत्पादयन्तं इत्यर्थः । वेदव्याख्यानसमये एतादृशं मध्वाचार्यं दृष्ट्वा देवाः देवदेवं देवानां देवं स्तुत्यं नारायणं व्यस्मरन् चिन्तितवन्तः । सदृशदर्शनात् सदृशस्मरणस्य उचितत्वात् कथं मध्वाचार्यनारायणयोः सादृश्यं, कथंभूतं देवदेवं उक्ताङ्गेभ्यः 'ब्रह्मा शिरसि ललाटे रुद्रः चन्द्रमा मनसोजातः' इत्यादि श्रुतौ ब्रह्माद्युत्पत्तिस्थानत्वेनोक्तेभ्यः शिर आद्यङ्गेभ्यः कादिकान् कः ब्रह्मा आदिः येषां ते कादिकाः तान् ब्रह्मादिदेवान् 'कः स्यात् पितामहे ब्रघ्ने मारुते शमनेऽनले' इत्येकाक्षर-रत्नमाला । व्यञ्जयन्तं सृजन्तं तत्तन्मात्राव्यञ्जनादौ तेषां प्रसिद्धानां आकाशादि भूतानां तन्मात्राणां गुणभूतशब्दस्पर्शादीनां व्यञ्जनं सृष्टिः, आदिशब्देन आकाशादिभूतसृष्टिश्च तस्मिन् प्रवीणं, तिस्रोऽवस्थाः सृष्टिस्थितिसंहारलक्षणाः, तद्गुणैः तस्मिन् सृष्टयादौ अङ्गभूतैः प्रधानैः सत्वादिगुणैः भावयन्तं उत्पादयन्तं व्यस्मरन् 'स्मृ स्मरणे इति धातोः लङ् परस्मैपदम्' ॥ ३१ ॥

आदौ ह्रस्वत्वेन वत्सानुवृत्त्या मात्रापादौ वर्तयन् दृश्यमानः ।
कुर्वन्नन्याश्चाग्र्यरूपा विवृत्तीर्गोविन्दश्रीरास गोविन्दभक्तः ॥ ३२ ॥

भावप्रकाशिका – आदौ बाल्ये ह्रस्वत्वेन ह्रस्वरूपत्वेन पादौ वर्तयन् गच्छन् मात्रा दृश्यमानः चरणक्षमो मम शिशुरिति प्रीत्या गोवत्सानामनुवृत्त्या । अन्यगोपीश्च विगतवृत्त्यन्तराः कुर्वन् स्वलीलया हि गोविन्दः । 'आदिह्रस्वा वत्सानुसृतिरन्त्या वत्सानुसारिणी । पाकवत्युभयह्रस्वा दीर्घमध्या पिपीलिका । अर्धमात्रा वत्सानुसृतिस्तथा वत्सानुसारिणी । पाकवती पादोना पाकमात्रा पिपीलिके'ति शिक्षायाम् । स ईं महीं धुनिमेतो ररम्णात्सो उस्रातूनपारयत्स्वस्ति । त उत्स्राय धृतव्रता आदित्या इति एतासां निदर्शनम् । आदौ ह्रस्वत्वेन वत्सानुसृत्याख्यायां विवृत्तौ कालस्य मात्रापरिमाणस्य चतुरंशस्य द्वावंशौ वर्तयन् दृश्यमानोऽन्याः पाकवत्याद्याश्च विवृत्तीरग्र्यरूपाः कुर्वन् न चान्यथान्वयात् श्लेषस्य न्यायभङ्ग आशङ्कनीयः । रूपाः श्लेषस्य न्यायभङ्ग आशङ्कनेऽत्राहीनेन मूले विरहितपरिकर इत्यादिवत्सम्भवात् ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – आदाविति ॥ शब्दरूपविशेषो विवृत्तिः इत्युच्यते । तत्र आदिह्रस्वा विवृत्तिः वत्सानुसृतिः इत्युच्यते । अन्त्यह्रस्वा विवृत्तिः वत्सानुसारीणीत्युच्यते। आद्यन्तह्रस्वा पाकवती इत्युच्यते । तथा ह्युक्तं शिक्षायां— 'आदिह्रस्वाऽनुसृतिरन्त्या वत्सानुसारिणी । पाकवत्युभयह्रस्वा दीर्घमध्या पिपीलिके'ति । एवं च सति आदौ ह्रस्वत्वेन हेतुना वत्सानुसृत्यां वत्सानुसृत्याख्यायां विवृत्तौ मात्रापादौ मात्राया मात्राख्यपरिमाणवतः कालस्य पादौ चतुरंशवतः समुदायस्य द्वावंशौ वर्तयन्नुच्चारणेन वर्तयन् दृश्यमानो देवादिभिर्दृश्यमानः । अग्र्यं रूपं यासां ता अग्र्यरूपाः ताः अन्याश्च पाकवत्याद्या विवृत्तीश्च कुर्वन्नुच्चारणेन प्रकटीकुर्वन् गोविन्दभक्तः श्रीकृष्णभक्तः श्रीमध्वो गोविन्दस्य श्रीरिव श्रीः कान्तिः यस्य स गोविन्दश्रीः आस । गोविन्दश्च आदौ बाल्ये ह्रस्वत्वेन सूक्ष्मत्वेन हेतुना वत्सानुवृत्यां गोवत्सानामनुगमने गोवत्सपालकत्वेन तेषां अनुगमन इत्यर्थः । पादावंघ्री वर्तयञ्चालयन् । मात्रा यशोदया दृश्यमानः सञ्चारणक्षमोऽभून्मम शिशुरिति सन्तोषेण दृश्यमानः । अग्रचरूपा उत्तमरूपा अन्याश्च गोपाङ्गना विगता वृत्तिरन्यविषयकमनोवृत्तिर्ज्ञानं यासां ताः तथा ताः स्वलीलादर्शनासक्त्यां विषयान्तरास्मरणेन विगतवृत्यन्तरा इत्यर्थः वर्तयन् कुर्वंश्च आस ॥ ३२ ॥

मन्दोपकारिणी – आदाविति ॥ शब्दस्वरूपविशेषव्यक्तिः 'विवृत्तिः' इत्युच्यते। शब्दोच्चारणे अनेका विवृत्तयः सन्ति । 'आदिह्रस्वा विवृत्तिः वत्सानुवृत्तिः अन्त्यह्रस्वा विवृत्तिः वत्सानुसारिणीत्युच्यते । आद्यन्तह्रस्वा विवृत्तिः पाकवती इत्युच्यते दीर्घमध्या विवृत्तिः पिपीलिकेत्युच्यते । तथोक्तं शिक्षायां 'आदिह्रस्वा वत्सानुवृत्तिरन्त्या वत्सानुसारिणी पाकवत्युभयह्रस्वा दीर्घमध्या पिपीलिकेति' एवं च आदौ ह्रस्वत्वेन हेतुना वत्सानुवृत्त्या वत्सानुवृत्त्याख्यया विवृत्या मात्रापादौ मात्रा नाम ह्रस्ववर्णोच्चारणकालः सा पादचतुष्टयवती ततश्च मात्रायाः मात्राख्यपरिमाणवतः कालस्य पादौ द्वौ अंशौ वर्तयन् उच्चारणेन प्रदर्शयन् दृश्यमानः देवादिभिः दृश्यमानः अग्रचरूपाः श्रेष्ठरूपाः अन्याश्च अपराः विवृत्तीः पाकवतीपिपीलिकाख्याः विवृत्तीः कुर्वन् उच्चारणेन प्रकटयन् गोविन्दभक्तः गोविन्दस्य विष्णोः भक्तः श्रीमध्वाचार्यः गोविन्दश्रीः गोविन्दस्य यादवकृष्णस्य श्रीरिव श्रीः वेषरचना यस्य स तथोक्तः कृष्णसदृश इति भावः । आस बभूव 'अस् भुवीत्यतो लिट् परस्मैपदं आस आसतुः आसुः' 'श्रीर्वेषरचना शोभा' इत्यमरः । कथं गोविदसाम्यं-गोविन्दोऽपि आदौ बाल्ये ह्रस्वत्वेन हेतुना वत्सानुवृत्त्या वत्सानां तर्णकानां

'वत्सस्तर्णकपुत्रादौ' इति विश्वः अनुवृत्त्या पालनार्थं अनुगमनेन निमित्तेन मात्रापादौ इत्यत्र मात्रा पादौ इति पदद्वयं एवं च पादौ स्वाङ्घ्री वर्तयन् पादन्यासं कुर्वन् इति यावत् । मात्रा यशोदया दृश्यमानः अयं मम शिशुः इति सन्तोषेण दृश्यमानः तथा अग्रचरूपाः अन्याः यशोदायाः सकाशात् अपराश्च गोपाङ्गनाः विवृत्तीः विगता वृत्तिः अन्यविषयक-चक्षुर्वृत्तिव्यापारः याभ्यस्ताः विवृत्तयः ताः गोपाङ्गनानां कृष्णलीलादर्शनेन अन्यविषय-कव्यापारस्यापगतत्वात् इति भावः । कुर्वन् गोवत्सपालनार्थं वत्सानुगमनं कुर्वन् कृष्णः मात्रा यशोदया अन्याभिःगोपाङ्गनाभिश्च दृश्यमान इति भावः ॥ ३२ ॥

माङ्गल्याङ्गव्यक्तभावा त्रिलोकीं रङ्गारूढा विस्मयं प्रापयन्ती ।
कृष्णेवान्या मान्यविन्यासपादा रेजे माध्वी सुस्वरा वेदवाणी॥ ३३ ॥

भावप्रकाशिका – श्रेयस्करैः शिक्षाद्यङ्गैर्व्यक्ताभिप्राया । अवयवेषु स्पष्टविलासा च । अनुनासिकतया क्रियमाणा वर्धितमात्राः स्वरा रङ्गास्तैरारूढा स्वयंवरप्राङ्गणमारूढा च । स्वरा उदात्तादयश्च ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – माङ्गल्येति ॥ माङ्गल्यानि श्रेयस्कराणि यान्यङ्गानि शिक्षाद्यङ्गानि तैर्व्यक्तः भावोऽभिप्रायो यस्याः सा तथोक्ता । कृष्णा च माङ्गल्याङ्गेषु मङ्गलावयवेषु व्यक्तः स्पष्टो भावो विलासो यस्याः सा तथोक्ता । त्रिलोकीं विस्मयं प्रापयन्ती । कृष्णा च तादृशी । रङ्गारूढा अनुनासिकतया क्रियमाणाः वर्धिता मात्राः स्वराः रङ्गाः तैः आरूढा युक्ता रङ्गाख्यस्वरविशेषैर्विशिष्टेत्यर्थः । कृष्णा च स्वयं वरप्राङ्गणारूढा । मान्यः सम्भाव्यो विन्यासः समापनं येषां ते मान्यविन्यासास्तादृशाः पादा ऋचां पादा यस्याः सा मान्यविन्यासपादा ऋगुच्चारणसमये यस्य पादस्य यत्स्वरवर्णान्ततया विन्यासो भवेत्तथा तत्पादविन्यासयुक्तेत्यर्थः । कृष्णा च शोभनचरणन्यासयुक्तपादा । सु शोभनः स्वरः उदात्तानुदात्तादिस्वरो यस्याः सा सुस्वरा । कृष्णा च शुकहंसस्वरवत् सुस्वरा। मध्वस्य सम्बन्धिनी माध्वी वेदवाणी वेदवाक् अन्या कृष्णेव द्रौपदीव रेजे ॥३३॥

मन्दोपकारिणी – माङ्गल्येति ॥ माध्वी मध्वस्य इयं माध्वी मध्वाचार्येणोच्चार्यमाणा वेदवाणी वेदवाक् रेजे शुशुभे 'राजृ दीप्तौ इत्यतो लिट् आत्मनेपदं रेजे रेजाते रेजिरे'। कथंभूता वेदवाणी- माङ्गल्याङ्गव्यक्तभावा मङ्गलान्येव माङ्गल्यानि श्रेष्ठानि च तानि

अङ्गानि शिक्षाद्यङ्गानि च तैः व्यक्तः प्रकटितः भावः अभिप्रायः यस्याः सा तथोक्ता । पुनः कथंभूता त्रिलोकीं त्रयाणां लोकानां समाहारः त्रिलोकी तां विस्मयं आश्चर्यं प्रापयन्ती 'विस्मयोऽऽद्भुतमाश्चर्यं' इत्यमरः । पुनः कथंभूता रङ्गारूढा अनुनासिकतया क्रियमाणाः एकमात्रकद्विमात्रकाख्याः स्वरविशेषाः रङ्गाः तैः आरूढा विशिष्टा । पुनः कथंभूता मान्यविन्यासपादा मान्यः उचितः विन्यासः विरामः येषां ते मान्यविन्यासाः पादाः ऋक्पादाः यस्याः सा मान्यविन्यासपादा । पुनः सुस्वरा शोभनाः स्वराः उदात्तादिस्वराः यस्याः सा तथोक्ता । का इव रेजे अन्या कृष्णेव द्रौपदीव 'कृष्णा तु द्रौपदीनीलाहारक्रूरासु दृश्यते' इति विश्वः । कथंभूता कृष्णा- माङ्गल्याङ्गव्यक्तभावा माङ्गल्येषु सुन्दरेषु अङ्गेषु हस्ताद्यवयवेषु व्यक्तः स्पष्टः भावः विलासो यस्याः सा तथोक्ता। त्रिलोकीं विस्मयं प्रापयन्ती । रङ्गारूढा रङ्गं स्वयंवरमण्टपं आरूढा प्रविष्टा । मान्यविन्यासपादा मान्यः शोभमानः विन्यासः पादविक्षेपो ययोः तौ पादौ यस्याः सा तथोक्ता सुस्वरा शुकहंसवत् श्राव्यस्वरयुक्ता ॥ ३३ ॥

गाम्भीर्याद्यैर्युक्तमौदार्यकार्यैर्नानानादश्लाघ्यमुच्चारणं तत् ।
शिक्षाशिक्षालक्षणानां हि लक्ष्यं मान्यं मन्ये धन्यबुद्धेरतुल्यम् ॥ ३४ ॥

भावप्रकाशिका – शिक्षायां प्रतिपाद्यमानोच्चारणशिक्षया प्रकटितानां लक्षणानां लक्ष्यम् ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – गाम्भीर्येति ॥ औदार्यस्य कार्याणि औदार्यकार्याणि तैः औदार्यजन्यैः इत्यर्थः । गाम्भीर्यं आद्यं येषां धर्माणां तानि तथोक्तानि तैः युक्तम् । नाना प्रकारा नादाः नानानादाः तैः श्लाघ्यं प्रशस्यं शिक्षाशिक्षालक्षणानां शिक्षायाः शिक्षाख्याङ्गस्य शिक्षा उच्चारणशिक्षा तस्याः लक्षणानि तेषाम् । शिक्षाख्यवेदाङ्गभूतग्रन्थे प्रतिपाद्यमानयोच्चारणशिक्षया प्रकटितानां लक्षणानामित्यर्थः । लक्ष्यमुदाहरणभूतं अत एव मान्यं सुराद्यैरपि माननीयं धन्यबुद्धेः श्रीपूर्णप्रज्ञस्य तत् उच्चारणं वेदोच्चारणं अतुल्यं असदृशं मन्ये ॥ ३४ ॥

मन्दोपकारिणी – गाम्भीर्याद्यैरिति ॥ औदार्यकार्यैः उदारस्य महतः भावः औदार्यं महत्त्वं श्रेष्ठत्वं इति यावत् 'उदारो दातृमहतोः' इत्यमरः । तेन कार्यैः जन्यैः पुरुषाणां

महत्वेन हि शब्दोच्चारणे गाम्भीर्यादिगुणाः उत्पद्यन्ते इति भावः । गाम्भीर्याद्यैः गाम्भीर्यं आद्यं येषां ते गाम्भीर्याद्याः गुणाः तैः युक्तं नानानादश्लाघ्यं नानाप्रकाराश्च ते नादाः ध्वनयश्च तैः श्लाघ्यं प्रशंसनीयं पूर्वं मन्द्रध्वनिः पश्चात् उच्चध्वनिः इत्यादयः उच्चारणे नानाविधध्वनयः 'मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु' इत्यमरः । शिक्षाशिक्षालक्षणानां शिक्षायां शिक्षानामकवेदाङ्गभूतग्रन्थे प्रतिपाद्यमाना च सा शिक्षा च उच्चारण-विषयकानुशासनं तया प्रकटितानि च लक्षणानि च शिक्षाशिक्षालक्षणानि तेषां इति विग्रहः । लक्ष्यं उदाहरणभूतं अत एव मान्यं सुराद्यैरपि माननीयं धन्यबुद्धेः धन्या पूर्णा बुद्धिः यस्य स तथोक्तः श्रीमध्वाचार्यस्य तदुच्चारणं श्रुत्युच्चारणं अतुल्यं असदृशं अहं मन्ये जानामि 'मन ज्ञाने इति धातोः लट् आत्मनेपदं मन्ये मन्यावहे मन्यामहे' । शिक्षारूपवेदाङ्गे एवंरूपं उच्चारणं कुर्यात् इति उच्चारणलक्षणं विहितम् । तच्च यत्किञ्चिदुदाहरणविषयत्वेन ज्ञेयं तत्र शिक्षोक्तोच्चारणलक्षणस्य मध्वकृतवेदोच्चारणमेव मुख्योदाहरणं इति भावः ॥ ३४ ॥

काल्पीः कृप्तीर्व्यञ्जयञ्छान्दसीश्च व्यक्तं शाब्दं शास्त्रमुद्भाव्य भूयः ।
स व्याचख्यावुक्तनैरुक्तमार्गो ज्यायाञ्ज्योतिर्वेदिनां वेदमित्थम् ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – काल्पीरिति ॥ स श्रीमध्वः कल्पे कल्पाख्यवेदाङ्गग्रन्थे प्रतिपादिताः काल्प्यः ताः कृप्तीः वेदार्थनियमान् व्यञ्जयन् प्रकटयन् सन् । छन्दसः सम्बन्धिन्यः छान्दस्यः ताः च छन्दोनामके वेदाङ्गे कथिताश्चेत्यर्थः । कृप्तीः व्यञ्जयन् । शब्दानां सम्बन्धि शाब्दं शास्त्रं व्याकरणं भूयोऽञ्जसा । अव्ययानां अनेकार्थत्वात् भूतशब्द आञ्जस्येऽपि वर्तते । व्यक्तं यथा भवति तथा व्यक्तं उद्भाव्य तत्र तत्र प्रकृतशब्दस्य स्वोक्तार्थवाचकत्वेन प्रकटय्य उक्तः अभिहितः नैरुक्तः निरुक्ताख्यवेदाङ्गसम्बन्धी यो मार्गः वैदिकशब्दनिर्वचनप्रकारो येन स तथोक्तः । स न केवलं एवंभूत एव, ज्योतिः ज्योतिश्शास्त्रं विदन्तीति ज्योतिर्वेदिनः तेषां मध्ये ज्यायान् श्रेष्ठस्सन्, वेदाङ्गभूतज्योतिश्शास्त्राभिज्ञताञ्च प्रकटयन्नित्यर्थः । इत्थं उक्तवक्ष्यमाणप्रकारेण वेदं व्याचख्यौ । शिक्षादिषडङ्गानुसारेण वेदं व्याचख्याविति भावः ॥ ३५ ॥

मन्दोपकारिणी – काल्पीरिति ॥ सः मध्वाचार्यः इत्थं एवं प्रकारेण वेदं व्याचख्यौ व्याख्यातवान् 'वि आङ् पूर्वात् ख्या प्रकथने इति धातोः लिट् परस्मैपदं चख्यौ चख्यतुः

चख्युः' । किं कुर्वन् काल्पीः कल्पस्य इमाः काल्प्यः ताः कल्पाख्यवेदाङ्गप्रतिपादिताः क्लृप्तीः वेदार्थनियमान् व्यञ्जयन् प्रकटयन् छान्दसीः छन्दस इमाः छान्दस्यः ताः छान्दसीः छन्दोनामकवेदाङ्गे कथिताः क्लृप्तीश्च व्यञ्जयन्, पुनः किं कृत्वा शाब्दं शब्दानां इदं शाब्दं शब्दानां साधुत्वप्रतिपादकं शास्त्रं व्याकरणाख्यवेदाङ्गं भूयः बाहुल्येन सर्वशब्देषूक्तार्थवाचकत्वेनेति यावत् । उद्भाव्य प्रकटयित्वा कथंभूतः उक्तनैरुक्तमार्गः निरुक्तस्य अयं नैरुक्तः नैरुक्तश्चासौ मार्गश्च नैरुक्तमार्गः उक्तः प्रतिपादितः नैरुक्तमार्गः निरुक्ताख्यवेदाङ्गोक्तः शब्दनिर्वचनप्रकारः येन स तथोक्तः । पुनः कथंभूतः ज्योतिर्वेदिनां ज्योतिर्नामकवेदाङ्गं विदन्ति जानन्तीति ज्योतिर्वेदिनः तेषां ज्यायान् श्रेष्ठः एवं शिक्षादिषडङ्गानुसारेण वेदं व्याचख्यौ इति भावः ॥ ३५ ॥

श्रौते व्याख्योच्चारणे चारुणी ते मादृग्देही वर्णयेदस्य को नु ।
वागीशानैर्वाग्विहङ्गेशजीवैर्भूर्याश्चर्यैर्वर्णिते ये प्रणम्य ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – श्रौत इति ॥ मादृक् मत्सदृशो देही पुरुषः कोऽस्य श्रीमध्वस्य चारुणी मनोहरे श्रौते श्रुतिसम्बन्धिनी, व्याख्या च उच्चारणं च व्याख्योच्चारणे वर्णयेत् । न कोऽपि वर्णयितुं समर्थ इत्यर्थः । वर्ण स्तुतौ इति धातुः । कुतः येऽमुष्य व्याख्योच्चारणे वागीशानैः सर्ववचसां अभिमानिभिः भूरि बहु आश्चर्यं येषां तैः अतिविस्मययुक्तैः इत्यर्थः । वाग्विहङ्गेशजीवैः सरस्वतीगरुडबृहस्पतिभिः प्रणम्य श्रीमध्वं नत्वा वर्णिते स्तुते । 'जीव आङ्गीरसो वाचस्पतिरि'त्यमरः ॥ ३६ ॥

मन्दोपकारिणी – श्रौत इति ॥ मादृक् मत्सदृशः देही पुरुषः को नु को वा, चारुणी मनोहरे श्रौते श्रुतेः इमे श्रौते श्रुतिसम्बन्धिनी अस्य मध्वाचार्यस्य ते व्याख्योच्चारणे व्याख्या च उच्चारणं च व्याख्योच्चारणे वर्णयेत् स्तुवीत कोऽपि न समर्थ इत्यर्थः । 'वर्ण स्तुतौ इति धातोः लिङ् परस्मैपदम्' । कुतः ये अमुष्य व्याख्योच्चारणे वागीशानैः वाचां सर्ववाचां ईशानैः अभिमानिभिः भूर्याश्चर्यैः भूरि बहुलं आश्चर्यं विस्मयः येषां ते तथोक्ताः तैः वाग्विहङ्गेशजीवैः वाक् सरस्वतीदेवी विहङ्गेशः विहङ्गानां पक्षिणां 'खगे विहङ्गविहगविहङ्गमविहायसः' इत्यमरः ईशः स्वामी गरुडः जीवो बृहस्पतिः 'जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः' इत्यमरः । वाक् च विहङ्गेशश्च जीवश्च

वाग्विहङ्गेशजीवाः तैः प्रणम्य मध्वाचार्यं नत्वा वर्णिते स्तुते वागभिमानिभिः सरस्वत्यादि-भिरपि आश्चर्येणैव स्तूयमानत्वात् तादृशव्याख्योच्चारणस्तुतौ मनुष्यः अहं अल्पबुद्धिः न समर्थ इति भावः ॥ ३६ ॥

छन्दःसार्थं सार्थमत्रामुनेत्थं प्रोक्तं श्रुत्वा ब्राह्मणा ब्रह्मणेव ।
सर्वे सौम्या जिष्णुजिज्ञासयाऽमी प्राप्य प्रोचुश्चित्रकायाभिधानम् ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – छन्द इति ॥ सौम्याः सुप्रसन्नमुखमानसा अमी सर्वे ब्राह्मणा अत्र मिलिताशेषविद्वत्सभायां ब्रह्मणेव चतुर्मुखेनेव अमुना श्रीमध्वेन इत्थमुक्तप्रकारेण सार्थं अर्थसहितं यथा भवति तथा प्रोक्तं छन्दस्सार्थं वेदसमूहं श्रुत्वा जिष्णुजिज्ञासया श्रीमध्वपुण्डरीकयोः मध्ये जेता क इति ज्ञातुमिच्छया चित्रो नानावर्णः कायः देहो यस्य स चित्रकायो व्याघ्रः तस्य अभिधानं पुण्डरीक इति नाम यस्य स चित्रकायाभिधानः तम् । पुण्डरीकनामकं इति यावत् । 'व्याघ्रो द्वीपी पुण्डरीकस्तरक्षुः शार्दूलः स्याच्चित्रकायो मृगारिरिति हलः । प्राप्य स्थलान्तरवर्तिनं प्राप्य प्रोचुः ॥ ३७ ॥

मन्दोपकारिणी – छन्द इति ॥ सौम्याः प्रसन्नमुखमानसाः अमी सर्वे ब्राह्मणाः अत्र मिलिता शेषविद्वत्सभायां ब्रह्मणेव चतुर्मुखेनेव अमुना श्रीमध्वाचार्येण इत्थं पूर्वोक्तप्रकारेण सार्थं अर्थसहितं यथा भवति तथा प्रोक्तं व्याख्यातं छन्दःसार्थं छन्दसां वेदानां सार्थं समूहं 'सार्थो वणिक् समूहे स्यादपि सन्धानमात्रके' इति विश्वः । श्रुत्वा आकर्ण्य जिष्णु-जिज्ञासया जिष्णोः जयिनः जिज्ञासया ज्ञातुमिच्छया श्रीमध्वपुण्डरीकपुर्योः मध्ये जयी क इति इच्छया इत्यर्थः । चित्रकायाभिधानं चित्रकाय इति पुण्डरीकपुरि इति अभिधानं नाम यस्य स तथोक्तः 'व्याघ्रेऽपि पुण्डरीको ना' इत्यभिधानम् । चित्रकायशब्दस्यापि व्याघ्रवाचित्वात् पुण्डरीकपदस्थाने चित्रकायः इत्युक्तं तं पुण्डरीकपुरिं स्थलान्तरे विद्यमानं प्राप्य प्रोचुः बभाषिरे । 'वच परिभाषणे इत्यतो लिट् परस्मैपदम्' ॥ ३७ ॥

प्राज्यप्रज्ञः प्राज्यया प्रज्ञयाऽसौ हन्तावोचन्मन्त्रवर्णाभिधेयम् ।
तत्प्रत्यर्थी प्रार्थ्यते वक्तुमेतत् प्राज्ञास्माभिः श्रोतुकामैर्भवांश्च ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – प्राज्य इति ॥ असौ प्राज्या पूर्णा प्रज्ञा यस्य स तथोक्तः श्रीमध्वः प्राज्यया सम्पूर्णया प्रज्ञया मन्त्रवर्णो वेदः तस्य अभिधेयो अर्थः तं अवोचत् । हन्त हर्षे । हे प्राज्ञ! हे विद्वन्! तस्य श्रीमध्वस्य प्रत्यर्थी प्रतिवादितया विरोधी तत्प्रत्यर्थी भवांश्च श्रोतुं कामो येषां तैः त्वत्प्रवचनप्रकारं श्रोतुकामैः अस्माभिः एतत् मन्त्रवर्णाभिधेयं मन्त्रवर्णकथनं कर्तुं प्रार्थ्यते ॥ ३८ ॥

मन्दोपकारिणी – प्राज्येति ॥ असौ प्राज्यप्रज्ञः प्राज्या प्रचुरा पूर्णा प्रज्ञा यस्य स तथोक्तः 'प्रभूतं प्रचुरं प्राज्यं' इत्यमरः । श्रीपूर्णप्रज्ञाचार्यः प्राज्यया पूर्णया प्रज्ञया मन्त्रवर्णाभिधेयं मन्त्रवर्णस्य वेदस्य अभिधेयं अर्थं अवोचत् उक्तवान् । हन्त हर्षे । हे प्राज्ञ विद्वन् ! तत्प्रत्यर्थी तस्य मध्वाचार्यस्य परिपन्थी विरोधीति यावत् । भवांश्च भवानपि श्रोतुकामैः वेदस्य त्वत्कृतप्रवचनप्रकारं श्रोतुकामैः अस्माभिः एतत् मन्त्राभिधेयं वक्तुं प्रार्थ्यते याच्यते । मध्वाचार्यव्याख्यानं श्रुतम् । भवता वेदव्याख्यानं क्रियेत तत्प्रकारं श्रोष्याम इत्यूचुरिति भावः ॥ ३८ ॥

इत्युक्तस्तैरेष विस्तारिबुद्धेः प्राप्तुं साम्यं सम्प्रवृत्तो दुरात्मा ।
हास्योऽत्राभूद्वासुदेवप्रभार्थी यद्वत् पूर्वं पौण्ड्रको वासुदेवः ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ तैः विप्रैः इत्युक्तः । विस्तारिणी पूर्णा बुद्धिः यस्य स विस्तारिबुद्धिः श्रीमध्वः तस्य । साम्यं वेदव्याख्यानेन साम्यं प्राप्तुं सम्प्रवृत्तो दुरात्मा दुर्बुद्धिरेष पुण्डरीकपुरिनामा । अत्र संसदि पूर्वं वासुदेवस्य श्रीकृष्णस्य या प्रभा गरुडवाहनत्वश्रीवत्सधारित्वादिकान्तिस्तामर्थितुं शीलमस्येति तथोक्तः पुण्ड्रकस्यापत्यं पौण्ड्रकः । पुत्रिकापुत्रधर्मेण पुण्ड्रकपुत्र इत्युच्यते । वासुदेवो यद्वत् तद्वत् हास्यः परिहासविषयो अभूत् । अत्रोपमालङ्कारः ॥ ३९ ॥

मन्दोपकारिणी – इत्युक्त इति ॥ तैः विप्रैः इति पूर्वोक्तप्रकारेण उक्तः प्रार्थितः सन् विस्तारिबुद्धेः विस्तारः अस्या अस्तीति विस्तारिणी बुद्धिः यस्य स तथोक्तः । तस्य पूर्णप्रज्ञाचार्यस्य साम्यं वेदप्रवचने साम्यं समानत्वं प्राप्तुं सम्प्रवृत्तः प्रयत्नं कुर्वन् दुरात्मा दुष्टः आत्मा बुद्धिः यस्य स तथोक्तः 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु' इति विश्वः । एषः पुण्डरीकपुरिः अत्र सभायां हास्यः अपहासविषयः अभूत् । क इव पूर्वं कृष्णावतारे

वासुदेवप्रभार्थी वासुदेवस्य श्रीकृष्णस्य प्रभां साम्यं गरुडवाहनचतुर्भुजत्वादिरूपं अपेक्षते इति वासुदेवप्रभार्थी पौण्ड्रकः पौण्ड्रकाख्यः वासुदेवः यद्वत् यथा हास्योऽभूत् तथा इत्यर्थः ॥ ३९ ॥

आङादेशादुत्तरं रादिशब्दं श्रुत्वा नारेत्युक्तवन्तं पदं तम् ।
व्याख्यालौल्यादैतरेयादिसूक्ते पृथ्वीदेवा निन्दनीयं निनिन्दुः ॥ ४० ॥

भावप्रकाशिका – 'अग्निना रयिमश्नवदि'त्यत्र 'ना' इत्ययमाङादेशः । 'आङो नास्त्रिया'मिति सूत्रात् । तां संहितां श्रुत्वा अग्नीति पदं विभज्य नारेति पदमुक्तवन्तम् । अनधीतवानपि हि पुण्डरीकपूर्ननु शाब्दिकः कथमिदं वदेदिति ॥ अतिशङ्कि मा दशमतेर्हि किङ्करी सकलस्य चोदयति शारदागिरः ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – आङिति ॥ पृथ्वीदेवा ब्राह्मणाः । ऐतरेयाया ऐतरेयशाखाया आदिसूक्तं आदौ भवं सूक्तं प्रथमसूक्तं तस्मिन् 'अग्निमीळे पुरोहितमि' त्यस्मिन् सूक्त इत्यर्थः । तत्रापि 'अग्निना रयिमश्नवत्पोषमेव दिवेदिवे' इत्यस्मिन् अर्धर्चि श्रूयमाणात् आङादेशात् । आङ् इति तृतीयैकवचनम् । आङस्तृतीयैकवचनस्य आदेश आङादेशः, 'अग्निने'त्यत्र 'ना' इत्येतत् । तथा हि 'आङो नास्त्रियाम्' 'घेरुत्तरस्याङो 'ना' इत्ययमादेशो भवत्यस्त्रियामि'त्याङो 'ना' इत्यादेशविधानात् । एवं च अग्निनेत्यत्राङादेशभूत 'ने'त्यस्मादाङादेशादित्यर्थः । उत्तरं रादिशब्दं र आदिर्यस्य रादिः रादिश्चासौ शब्दश्च रादिशब्दस्तं संहितायां 'रयिमि'त्येतं रादिशब्दं श्रुत्वा, व्याख्यालौल्यमेतत्सूक्तव्याख्यानौत्कण्ठ्यं तस्मात् । अग्निमीळ इत्यादेः पदविभागसमये अग्निना रयिमित्यत्र, अग्नि इति पदं विभज्य पश्चात् नार इति पदं उक्तवन्तं अत एव निन्दनीयं तं निनिन्दुः । शाब्दिकोऽयं पुण्डरीकपुरी कथमेवं ब्रूयादिति न शङ्कनीयम् । दशमतिर्किंकर्या शारदया भ्रंशितगिरस्तथा वचनसम्भवात् । तथा ह्युक्तं– 'अनधीतवानिव हि पुण्डरीकपूर्ननु शाब्दिकः कथमिदं वदेदिति । अतिशङ्कि मा दशमतेर्हि किङ्करी सकलस्य चोदयति शारदागिरः' इति ॥ ४० ॥

मन्दोपकारिणी – आङादेशादिति ॥ पृथ्वीदेवाः भूदेवाः ब्राह्मणा इत्यर्थः 'विप्रश्च ब्राह्मणोऽसौ' इत्यमरः । तं पुण्डरीकपुरिं निनिन्दुः' निन्दितवन्तः ''णिदि कुत्सायां

इत्यतो लिट् परस्मैपदं निनिन्द निनिन्दतुः निनिन्दुः । कथंभूतं ऐतरेयादिसूक्ते ऐतरेयस्य ऋग्वेदस्य आदि आदिमं च तत् सूक्तं च तस्मिन् 'अग्निमीळे पुरोहितं' इति ऋग्वेदस्य प्रथमसूक्ते तत्रापि 'अग्निना रयिमश्नवत्' इत्यस्मिन् अर्धर्चि श्रूयमाणात् इति शेषः । आङादेशात् तृतीयैकवचनभूतस्य आङ्प्रत्ययस्य नादेशेन सिद्धात् अग्निना इत्यस्मात् शब्दात् उत्तरं परतो विद्यमानं रादिशब्दं रः रेफः आदिः यस्य सः रादिः रादिश्चासौ शब्दः रयिशब्दश्च रादिशब्दः तं संहितापाठकाले रयिं इत्येतं रादिशब्दं श्रुत्वा व्याख्यालौल्यात् व्याख्यायां एतत् सूक्तप्रवचने लौल्यात् सतृष्णत्वात् औत्कण्ट्यादिति यावत् 'लोलश्चलसतृष्णयोः' इत्यमरः । अग्निमीळे इत्यादेः पदविभागसमये अग्निना रयिं इत्यत्र अग्निना इति तृतीयान्तपदं विभज्य रयिं इति पदं भेत्तव्यं तथा विहितत्वात् तथा पदच्छेदप्रकारं विहाय अग्नीतिपदं विभज्य पश्चात् नारेति पदं उक्तवन्तं अत एव निन्दनीयं तं निनिन्दुः इति अन्वयः । शाब्दिकोऽयं पुण्डरीकः कथं एवं ब्रूयात् इति न शङ्कनीयं मध्वाचार्यकिङ्कर्या शारदया भ्रंशितवाचः तथोक्तिसंभवात् । तथा हि उक्तं 'अनधीतवानपि हि पुण्डरीकपूर्ननु शाब्दिकः कथमिदं वदेदिति । अतिशङ्कि मा दशमतेर्हि किङ्करी सकलस्य चोदयति शारदागिरः' इति ॥ ४० ॥

शार्दूलाख्यां प्राप्य सम्भावितः प्राक् लोके धूर्तो मायिगोमायुरेषः ।
वादिद्वीपिध्वंसिनं मध्वसिंहं प्राप्तो हीत्थं शब्दशेषो बभूव ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – शार्दूलेति ॥ धूर्तो विप्रलम्भकः एष मायिगोमायुः मायिसृगालः शार्दूलाख्यां शार्दूल इति संज्ञां प्राप्य प्राक् श्रीमध्वप्राप्तेः पूर्वं लोके सम्भावितो मानितः । तदानीं वादिनो दुर्वादिन एव द्वीपिनो व्याघ्राः तान् ध्वंसयितुं विजेतुं शीलमस्येति तथा तं मध्वसिंहं श्रीमध्वाख्यसिंहं प्राप्तः सन् इत्थं शब्देन शेषोऽवशेषो यस्य स तथा शब्दमात्रेण अवशिष्ट इत्यर्थः । बभूव । हि । कष्टमेतत् । अयमभिप्रायः— यथा कश्चित् शृगालो व्याघ्रोऽहं इत्युक्त्वा भीषयन् कदाचित् सिंहं प्राप्य तन्निनादमात्रेण पलायन् नायं व्याघ्रः अपि तु सृगाल एवेति निश्चितोऽपि नाममात्रेण शार्दूल इत्युच्यते न तु पूर्ववत् बहुमानविषयः, एवं अयं पुण्डरीकपुरी इत्यन्तं कालं लोके महाप्राज्ञोऽयमिति पूजितोऽपि तदा सर्वविद्वच्छ्रेष्ठं सर्वदुर्वादिभञ्जनं श्रीमध्वाचार्यं प्राप्य भग्नदर्पो भूत्वा पुण्डरीकपुरि इति नाममात्रेणावशिष्टोऽभूदिति ॥ ४१ ॥

मन्दोपकारिणी – शार्दूलेति ॥ धूर्तः विप्रलम्भकः एषः मायिगोमायुः मायी पुण्डरीकपुरिनामा गोमायुः शृगालः शार्दूलाख्यां शार्दूल इति संज्ञां प्राप्य प्राक् श्रीमध्वाचार्यप्राप्तेः पूर्वं लोके जनमध्ये सम्भावितः पूजितः सन् तदानीं वादिद्वीपिध्वंसिनं वादिनः दुर्वादिन एव द्वीपिनः शार्दूलाः तान् ध्वंसयति भञ्जयतीति वादिद्वीपिध्वंसी तं मध्वसिंहं श्रीमध्वाचार्याख्यसिंहं प्राप्तः सन् इत्थं पूर्वोक्तप्रकारेण शब्दशेषः शब्देन शार्दूल इति नाममात्रेण शेषः अवशिष्टः बभूव हि आश्चर्यमेतत् । अयं भावः यथा कश्चित् शृगालः व्याघ्रोऽहं इत्युक्त्वा लोकं भीषयन् सन् कदाचित् सिंहं प्राप्य तन्निनादमात्रेण पलायन् नायं व्याघ्रः अपि तु शृगाल एव इति निश्चितोऽपि नाममात्रेण शार्दूल इत्युच्यते न तु पूर्ववत् भयविषयः एवं अयं पुण्डरीकपुरिः इयन्तं कालं लोके महाप्राज्ञः अयं इति पूजितोऽपि तदा सर्वविद्वच्छ्रेष्ठं सर्वदुर्वादिभञ्जनं श्रीमध्वाचार्यं प्राप्य भग्नदर्पो भूत्वा पुण्डरीक इति नाममात्रेणावशिष्टो बभूव न तु पूर्ववत् प्राज्ञोऽयमिति पूजाविषयः इति ॥ ४१ ॥

कृष्णाभीष्टा शास्त्रविस्पष्टसंज्ञा या स्वीया श्रीः पालिता सद्द्विजेन ।
पद्माख्यासत्सैन्धवेनाहृतां तां शुश्रावाग्र्यानन्दतीर्थाख्यपार्थः ॥ ४२ ॥

भावप्रकाशिका – कृष्णाभीष्टा कृष्णस्य व्यासस्याभीष्टा कृष्णेवाभीष्टा च । शास्त्रमिति विस्पष्टसञ्ज्ञाऽस्याः शास्त्रे भारतादौ विस्पष्टसञ्ज्ञा च । सद्द्विजेन लिकुचशेखरेण शङ्करार्येण धौम्येन च ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – कृष्णेति ॥ अग्र्यानन्दतीर्थ इति उत्तमानन्दतीर्थ इत्याख्या यस्य सोऽग्र्यानन्दतीर्थाख्यः स चासौ पार्थो अर्जुनः च सः या कृष्णाभीष्टा कृष्णस्य श्रीवेदव्यासस्य अभीष्टा शास्त्रविस्पष्टसंज्ञा शास्त्रमिति विस्पष्टा प्रसिद्धा संज्ञा नाम यस्याः सा तथोक्ता सद्द्विजेन सतां निर्दोषेण द्विजेन लिकुचकुलशेखरेण शङ्करार्यनाम्ना विप्रेण पालिता रक्षिता या स्वीया स्वसम्बन्धिनी श्रीर्लोके स्वकीर्तिप्रततिहेतुभूता स्वकृतशास्त्रपुस्तकावलिः ताम् । पद्मतीर्थ इत्याख्या यस्य स पद्माख्यः स चासौ असत् सैन्धवश्च दुष्टजयद्रथश्च तेन हृतामपहृतां शुश्राव । स्वकीयशास्त्रात्मकं पुस्तकजातं लिकुचवंशोद्भवशङ्करार्यकरात्पद्मतीर्थेन हृतं शुश्रावेति भावः । पार्थो यथा जयद्रथेन हृतां द्रौपदीं शुश्राव तद्वदिति भावः । स च कृष्णाभीष्टा कृष्णस्याभीष्टा कृष्ण च साऽभीष्टा चेति वा । शास्त्रविस्पष्टसंज्ञा शास्त्रे भारते

प्रसिद्धसंज्ञा सद्विजेन धौम्येन पालिता, पार्थेषु मृगयां गतेषु धौम्येन पालिता हि । स्वीया स्वकीया श्रीः सम्पद्रूपा भार्या तां यथा पार्थः सैन्धवहृतां शुश्राव तद्वदिति भावः ॥४२॥

मन्दोपकारिणी – कृष्णेति ॥ अग्र्यानन्दतीर्थाख्यपार्थः अग्र्यः श्रेष्ठश्चासौ आनन्द-तीर्थाख्यश्च स एव पार्थः अर्जुनः तां श्रियं पद्माख्यासत्सैन्धवेन असत् दुष्टश्चासौ सैन्धवः जयद्रथश्च पद्मः पद्मतीर्थ इति आख्या यस्यासौ पद्माख्यश्चासौ असत् सैन्धवश्च तेन आहृतां अपहृतां शुश्राव श्रुतवान् । 'शृ श्रवणे इत्यतो लिट् परस्मैपदं शुश्राव शुश्रुवतुः शुश्रुवुः' । तां कां या कृष्णाभीष्टा कृष्णस्य वेदव्यासस्य अभीष्टा प्रिया शास्त्रविस्पष्टसंज्ञा शास्त्रं इति विस्पष्टा प्रसिद्धा संज्ञा नाम यस्याः सा तथोक्ता । सद्विजेन सच्चासौ द्विजश्च दोषरहितब्राह्मणः तेन सन् ज्ञानी 'सन् सुधीः कोविदो बुधः' इत्यमरः तादृशेन द्विजेनेति वा लिकुचकुलशेखरेण शङ्कराचार्यनाम्ना विप्रेण पालिता रक्षिता स्वीया स्वसम्बन्धिनी श्रीः लोके स्वकीर्तिहेतुभूता स्वप्रणीतशास्त्रपुस्तकावलिरूपा सम्पत् अभूत् तां इति सम्बन्धः । मध्वाचार्येण स्वकृतशास्त्रपुस्तकजातं लिकुचकुलोत्पन्नशङ्कराचार्यनामकब्राह्मणाधीनं कृत-मभूत् । अत्र पुण्डरीकस्य पराजये सति पद्मतीर्थः अपाहरत् इति रूप्यपीठस्थेन मध्वाचार्येण श्रुतं इति भावः । यथा अर्जुनः जयद्रथेन अपहृतां श्रियं शुश्राव तद्वत् इति भावः । या च कृष्णाभीष्टा यादवकृष्णस्य प्रीतिविषया शास्त्रविस्पष्टसंज्ञा शास्त्रे भारते विस्पष्टा प्रसिद्धा संज्ञा नाम यस्याः सा तथोक्ता । सद्विजेन सज्जनेन विप्रेण धौम्याचार्येण पालिता पार्थेषु सर्वेषु मृगयां गतेषु सत्सु धौम्येन रक्षिता हि एवं भूता स्वीया स्वकीया श्रीः भाग्याख्या सम्पत् अभूत् तां इति सम्बन्धः, 'सम्पत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः । व्यासार्जुनाग्निहरिकोकिलकाकशूद्रतामिस्रपक्षकलिनीलगुणेषु कृष्णः' इति भास्करः ॥४२॥

तूर्णं तीर्णादभ्रमार्गोऽथ सार्यः सम्प्राप्तोऽसौ गोगणैर्भीषयित्वा ।
संयम्यान्तर्यन्तृकामेन हास्यं सम्प्राप्तश्रीर्निर्जितं तं जहास ॥ ४३ ॥

भावप्रकाशिका – सार्यः सश्रेष्ठः । गोगणैर्वाग्गणैः शरगणैश्च । संयम्य निरुध्य बध्वा च । अन्तर्यन्तृकामेनान्तर्यामिणो वांछयाऽन्तःप्रेरकेण मन्मथेन च । श्रीर्जयश्रीः पाञ्चाली च ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – तूर्णमिति ॥ अथ पुस्तकाहरणश्रवणानन्तरं तूर्णं आशु तीर्णोऽतीतोऽदभ्रमार्गो बहुयोजनमार्गो येन स तथोक्तः सार्यः श्रेष्ठः यतिसहितोऽसौ श्रीमध्वः । तं पद्मतीर्थं सम्प्राप्तः सन् गोगणैः वचनसमूहैः भीषयित्वा संयम्य निरुध्य निरुत्तरीकृत्येत्यर्थः । सम्प्राप्तश्रीः सम्प्राप्तजयश्रीः सन् निर्जितं पराजितं पद्मतीर्थम् । अन्तर्यन्ता नियामकोऽन्तर्यामी तस्य काम इच्छा तेन एतत्सर्वं अन्तर्यामी वेदेति वचनेनेति भावः । हास्यं परिहासविषयं पद्मतीर्थं जहास । पार्थो यथा तूर्णं तीर्णादभ्रमार्गः सार्यः आर्येण ज्येष्ठेन भीमसेनेन सहितस्तं जयद्रथं प्राप्तवान् । अन्तर्यन्तृकामेन अन्तःप्रेरकेण कामेन मन्मथेन हास्यं परदारापहाराख्यकुकर्मणापहासविषयं तं जयद्रथं जहास तद्वदिति भावः ॥ ४३ ॥

मन्दोपकारिणी – तूर्णमिति ॥ अथ पुस्तकापहरणश्रवणानन्तरं तूर्णं आशु 'सत्वरं चपलं तूर्णमविलम्बितमाशु च' इत्यमरः तीर्णादभ्रमार्गः तीर्णः अतिक्रान्तः अदभ्रः बहुयोजनपरिमितः मार्गः येन स तथोक्तः 'अदभ्रं बहुलं बहु' इत्यमरः सार्यः आर्येण ज्येष्ठयतिना सहितः असौ श्रीमध्वाचार्यः तं प्राग्र्यवाटाख्यग्रामस्थं पद्मतीर्थं सम्प्राप्तः सन् गोगणैः गवां वाचां गणैः समूहैः भीषयित्वा भयं प्रापयित्वा संयम्य निरुध्य निरुत्तरीकृत्य सम्प्राप्तश्रीः सम्प्राप्ता सम्पादिता श्रीः जयसम्पत्तिः येन स तथोक्तः सन् निर्जितं पराजितं अन्तर्यन्तृकामेन अन्तर्यन्ता अन्तर्यामी तस्य कामेन अपेक्षया अन्तर्याम्यपेक्षया कृतत्वेन निमित्तेनेति यावत् हास्यं परिहासविषयं तं पद्मतीर्थं जहास अपहसितवान् । कस्मिंश्चित् विवादविषये एतत्सर्वं अन्तर्यामी वेद इति अन्तर्याम्यपेक्षया कृतत्वेन हेतुना स्वमतानभिमतनियम्यनियामकयोः उभयोः अङ्गीकारात् अपहासविषयं पद्मतीर्थं जहास इति भावः । 'हसे हसने इत्यतो लिट् परस्मैपदम्' । पार्थोऽपि द्रौपदीहरणश्रवणानन्तरं तूर्णं तीर्णादभ्रमार्गः सार्यः आर्येण श्रीभीमसेनेन सहितः सन् जयद्रथं प्राप्तः तं गोगणैः गवां बाणानां गणैः भीषयित्वा संयम्य पाशैः बध्वा संप्राप्तश्रीः सम्प्राप्ता जयद्रथादपनीता श्रीः द्रौपदी येन स तथोक्तः अन्तर्यन्तृकामेन अन्तर्यन्ता अन्तःप्रेरकः कामः मन्मथः तेन कामोद्रेकप्रयुक्तपरदारधर्षणाख्यकुत्सितकर्मणा निमित्तेनेति यावत् । हास्यं जयद्रथं यथा जहास तद्वत् इति भावः । 'गौर्बाणे वृषभे चन्द्रे वाग्भूदिग्धेनुषु स्त्रियाम् । द्वयोस्तु रश्मिदृग्बाणस्वर्गवश्चाम्बुलोमसु' इति रत्नमाला ॥ ४३ ॥

दुष्टात्माऽसौ भद्रमेकाकिनं यः क्षेप्तुं हेतुः सौख्यदाख्यं बभूव ।
हर्यंशोऽयं तं न चक्षाम भूयस्तोके सन्ने सूकरं केसरीव ॥ ४४ ॥

भावप्रकाशिका – योऽसौ पुरा भद्रं सज्जनं क्षेप्तुं हेतुः सौभद्रं च । सौख्यदाख्यं शङ्करार्यनामानं श्रवणेन स्वसुखकरनामानं च ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – दुष्टेति ॥ अयं हर्यंशो वाय्वंशः श्रीमध्वः । 'यमानिलेन्द्र-चन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वि'त्यमरः । योऽसौ दुष्टात्मा दुष्टबुद्धिः पद्मतीर्थः । भद्रं मनोवाक्कायकर्मभिः शोभनं एकाकिनं असहायं सन्तं सुखमेव सौख्यं तद्ददातीति सौख्यदः स इत्याख्या यस्य स तथा तम् । शङ्कराख्यमित्यर्थः । द्विजं क्षेप्तुं निराकर्तुं हेतुर्बभूव । तं पद्मतीर्थं तोके शिशौ सन्ने मृते सति केसरी सिंहः सूकरमिव भूयः पुनः न चक्षाम । तद्विषये क्षमावान्नाभूत् । सूकरेण सिंहं वञ्चयित्वा सिंहशिशौ नाशिते सति सिंहः सूकरं न क्षाम्यति किन्तु हन्त्येव । तद्वदयं मध्वोऽपि तं न चक्षाम इति भावः । श्लेषार्थे तु यं जयद्रथं एकाकिनं सौख्यदाख्यं स्वकीयानां युधिष्ठिरादीनां सुखप्रदनामानं सौभद्रं सुभद्रातनयं क्षेप्तुं हन्तुं हेतुर्बभूव । पद्मव्यूहद्वारि पाण्डवनिरोधात् तस्य तद्धेतुत्वम् । तं जयद्रथं हर्यंश इन्द्रांशोऽर्जुनः यथा भूयो मरणावधि न चक्षाम तद्वदिति । अत्रोपमालङ्कारः ॥ ४४ ॥

मन्दोपकारिणी – दुष्टेति ॥ हर्यंशः हरेः वायोः अंशः अयं श्रीमध्वाचार्यः तं पद्मतीर्थं भूयः पुनः न चक्षाम तद्विषये क्षमावान् नाभूत् इति भावः । तं कं दुष्टात्मा असौ भद्रं असौ भद्रं इति पदच्छेदः यः असौ दुष्टात्मा दुष्टः आत्मा बुद्धिः यस्य स तथोक्तः पद्मतीर्थः भद्रं मनोवाक्कायकर्मभिः शोभनं एकाकिनं सहायरहितं सौख्यदाख्यं सौख्यद इति शङ्कर इति आख्या यस्य स तथोक्तः तं द्विजं क्षेप्तुं निराकर्तुं हेतुः कारणं बभूव । यथा हर्यंशः हरेः इन्द्रस्य अंशः अवतारः अयं अर्जुनः तं जयद्रथं भूयः मरणपर्यन्तं न चक्षाम तद्वत् इति भावः । 'क्षमुष् सहने इत्यतो लिट् परस्मैपदं चक्षाम चक्षमतुः चक्षमुः' तं कं यः दुष्टात्मा जयद्रथः एकाकिनं सौख्यदाख्यं सौख्यं सुखं ददातीति सौख्यदा तादृशी आख्या संज्ञा यस्य स तथोक्तः तं अत्र सौभद्रं इति पदच्छेदः सुभद्रायाः अपत्यं पुमान् सौभद्रः तं सौभद्रं अभिमन्युं क्षेप्तुं हन्तुं हेतुः बभूव कौरवपाण्डवयुद्धे पद्मव्यूहद्वारि पाण्डवनिरोधात् तस्य तत् हननहेतुत्वं तोके अपत्ये 'स्तुक् तोकस्तनयश्च नन्दनः' इति प्राज्ञैः अपत्यं स्मृतं इति सन्ने

सति नाशिते सति केसरी सिंहः सूकरमिव वराहमृगमिव 'वराहः सूकरो धृष्टिः' इत्यमरः सूकरेण सिंहं वंचयित्वा सिंहशिशौ नाशिते सति सिंहः सूकरं यथा न क्षाम्यति किन्तु हन्त्येव तद्वत् अयं मध्वाचार्योऽपि तं न चक्षाम इति भावः 'चन्द्रे सूर्ये यमे विष्णौ वासवे ददुरे हये । मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृतः' इति धनञ्जयः ॥ ४४ ॥

तस्य त्रासात्पृष्ठतस्तिष्ठतोऽभूत् क्षेमापेक्षी यो जनः प्राग्जितोऽपि ।
मध्येऽन्येषां गोततीस्तत्प्रयुक्ताः सोऽद्यज्जिष्णुः पञ्चषैर्गोविशेषैः॥ ४५ ॥

भावप्रकाशिका – यो जनः पुण्डरीकपुरी द्रौण्यादिश्च । गोततीः पञ्चषैर्गो-विशेषैरद्यत् । तेन कृतस्योपन्यासस्यापशब्दार्थादिदोषप्रकटकैः पञ्चषैर्वाक्यैस्तमखण्डयत् । पुनः स्वयमुपन्यासं कृत्वा तमुपन्यासमखण्डयन्तं ससहायं तमप्यनुक्तिनामकनिग्रहस्थानं प्राप्तं चकार ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – तस्येति ॥ जिष्णुः जयशीलः स श्रीमध्वाचार्यः । प्राग्जितोऽपि पराजितोऽपि यो जनः पुण्डरीकपुर्याख्यो जन त्रासात् श्रीमध्वभयात् । 'दरत्रासश्च साध्वसं' इति हलः । पृष्ठतः पश्चाद्भागे तिष्ठतः तस्य पद्मतीर्थस्य क्षेममपेक्षत इति क्षेमापेक्ष्यभूत् । अन्येषां मध्ये तत्प्रयुक्तास्तेन पुण्डरीकपुर्याख्येन प्रयुक्ताः गोततीरुप-न्यासरूपवाक्ततीः । पञ्च च षट् च पञ्चषाः तैः गोविशेषैः तत्कृतोपन्यासस्य अपशब्दादिदोषप्रकाशैः वचनविशेषैः अद्यत् । अखण्डयत् । 'दो अवखण्डन' इति धातुः । स जिष्णुः पार्थो यथा प्राक् जितोऽपि यो जनो द्रौण्यादिजनत्रासादर्जुनभयात् पृष्ठतस्तिष्ठतः पार्थाभिमुख्यमप्राप्य द्रौण्यादीनां पृष्ठतो वर्तमानस्य तस्य जयद्रथस्य क्षेमापेक्षी मरणाभावापेक्षी अभूत् । अन्येषां मध्ये तत्प्रयुक्ताः तेन जयद्रथक्षेमापेक्षि दौण्यादिना प्रयुक्ता गोततीः शरततीः पञ्चषैः गोविशेषैः शरविषेषैः यद्वत् अखण्डयत् तद्वत् इति भावः ॥ ४५ ॥

मन्दोपकारिणी – तस्येति ॥ प्राक् पूर्वं जितोऽपि पराजितोऽपि यो जनः पुण्डरीकपुर्याख्यः तस्य त्रासात् श्रीमध्वाचार्यस्य भयात् 'दरत्रासौ भीतिर्भीः साध्वसं भयं' इत्यमरः पृष्ठतः पश्चाद्भागे तिष्ठतः स्थितस्य पद्मतीर्थस्य क्षेमापेक्षी क्षेमं प्राप्तप्रतिष्ठासंरक्षणं अपेक्षत इति क्षेमापेक्षी अभूत् । अषां मध्वशिष्याणां मध्ये तत्प्रयुक्ताः तेन पुण्डरीकपुरिणा

प्रयुक्ताः गोततीः गवां उपन्यासरूपाणां वाचां ततीः समुदायान् जिष्णुः जयशीलः सः मध्वाचार्यः पञ्चषैः पञ्च वा षड् वा पञ्चषाः तैः गोविशेषैः गवां वाचां विशेषैः तत्कृतस्योपन्यासस्य अपशब्दादिदोषप्रकाशैः इत्यर्थः अद्यत् अखण्डयत् 'दो अवखण्डने इति धातोः लङ् परस्मैपदं अद्यत् अद्यतां अद्यन्' पुण्डरीकपुरिः पूर्वं मध्वाचार्येण पराजितोऽपि मध्वभयात् पश्चादेव स्थितस्य पद्मतीर्थस्य सहायो भूत्वा मध्वजनेषु उपन्यासं चकार मध्वाचार्यः तदुपन्यासं निराचक्रे इति भावः । यथा जिष्णुः पार्थः प्राग्जितोऽपि पराजितोऽपि यो जनः अश्वत्थामादिः तस्य त्रासात् अर्जुनस्य भयात् पृष्ठतः पश्चाद्भागे तिष्ठतः पार्थाभिमुख्यं अप्राप्य अश्वात्थामादीनां पश्चाद्भागे वर्तमानस्य इत्यर्थः जयद्रथस्य क्षेमापेक्षी मरणाभावापेक्षी अभूत् अन्येषां मध्ये पाण्डवानां मध्ये तत्प्रयुक्ताः तेन जयद्रथक्षेमापेक्षिणा अश्वत्थामादिना प्रयुक्ताः क्षिप्ताः गोततीः गवां बाणानां ततीः समूहान् पञ्चषैः गोविशेषैः बाणविशेषैः अद्यत् अखण्डयत् तद्वत् इति भावः ॥ ४५ ॥

विष्णोर्भूयः शोभयद्भिः पदान्तं पारम्पर्येणेर्यमाणैरवार्यैः ।
गोव्रातैस्तं दारयित्वा न्यगृह्णात् कआख्यानं सिन्धुपं मध्वपार्थः ॥ ४६ ॥

भावप्रकाशिका – अत्र चायं प्रणीत आचार्यप्रियतमैः श्लोकः

'आनन्दतीर्थपार्थस्य भयादास्ते स पृष्ठतः ।
पुरतः स्थापयित्वाऽन्यान् पद्मतीर्थजयद्रथ' इति ।
'विष्णुमङ्गलदेशान्ते हृतां कबलिकां निजाम् ।
श्रुत्वा रजतपीठस्थ एकवाटं ययौ गुरुः ।
तत्रस्थं चोलजं दृष्ट्वा स्वशिष्यैस्तं रुरोध सः ।
त्वच्छास्त्रं साधयसि चेत् प्राश्निकानाह्वयेत्यसौ ।
मध्वस्तेनोदितः प्रोचेऽत्राह्वयेच्छसि चेदिति ।
कृतकृत्योऽस्मि मे शास्त्रं व्याप्तमित्युदितेऽमुना ।
प्रोचे मध्वो मम व्याप्तं त्रैलोक्ये शास्त्रमित्यमुम् ।
अन्तर्यामी हन्त वेद तवेदं शाठ्यभाषितम् ।
इति ब्रुवाणं तं प्रोचे मध्वः स्मितमुखाम्बुजः ।

व्याप्तं त्वय्येव मच्छास्त्रं किमुतान्यत्र बालिश ।
अन्तर्यामी नियम्यश्च त्वयैवाङ्गीकृताविति ।
मिलितेष्वथ सभ्येषु प्राश्निकेष्वभवत्कथा ।
तत्र माध्व उपन्यासो ग्रन्थो वादाह्वयोऽभवत्' ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – विष्णोरिति ॥ मध्वपार्थो भूयो विष्णोः पदान्तं पद्यत इति पदं स्वरूपं यस्य अन्तो निर्णयो यस्मात् तत् पदान्तं विष्णुस्वरूपनिर्णायकवेदवेदान्तादिकं शोभयद्भिः वेदादेः अपव्याख्यां निराकृत्य यथावद्व्याख्यानात्मकैः इत्यर्थः । पारम्पर्यं नैरन्तर्यं तेन ईर्यमाणैः उच्यमानैः अवार्यैः वाद्यन्तरेण अनिवार्यैः । गोव्राता उपन्यासरूपवचनसमूहाः तैः तं कञ्जतीर्थ इति आख्यानं नाम यस्य स कञ्जाख्यानः तं पद्मतीर्थनामकमित्यर्थः । सिन्धून् सिन्धुदेशान् पातीति सिन्धुपस्तम् । 'देशे नदविशेषेऽब्दौ सिन्धुर्ना सरिति स्त्रियामि'त्यमरः । जयद्रथं दारयित्वा निराकृत्य पराभाव्येत्यर्थः । न्यगृह्णात् निग्रहस्थानं प्राप्तं अकरोत् । स्वकृतं उपन्यासं अखण्डयित्वा तूष्णीस्थितं तं अनुक्त्याख्यनिग्रहस्थानं प्राप्तं चकारेति भावः । पार्थो यथा विष्णोः पदान्तं आकाशप्रदेशान्तं शोभयद्भिः पारम्पर्येण ईर्यमाणैः अवार्यैः गोव्रातैः शरसमूहैः तं सिन्धुपं दारयित्वा विदार्य न्यगृह्णात् जघान । तद्वदिति श्लेषाभिप्रायः ॥ ४६ ॥

मन्दोपकारिणी – विष्णोरिति ॥ मध्वपार्थः श्रीमध्वाचार्याख्यार्जुनः भूयः पद्मतीर्थसहायकारिपुण्डरीकनिराकरणानन्तरं पुनरपि विष्णोः परब्रह्मणः पदान्तं पद्यते गम्यते ज्ञायते इति पदं स्वरूपं तस्य अन्तो निर्णयो यस्मात् तत् तथोक्तं विष्णुस्वरूप-निर्णायकशास्त्रं इत्यर्थः शोभयद्भिः पारम्पर्येण नैरन्तर्येण अविच्छेदेनेति यावत् ईर्यमाणैः उच्यमानैः अवार्यैः निराकर्तुमशक्यैः गोव्रातैः गवां उपन्यासात्मकवचनानां व्रातैः समूहैः 'स्तोमौघनिकरव्रातवारसंघातसञ्चयाः' इत्यमरः तं कञ्जाख्यानं कञ्ज इति पद्मतीर्थ इति आख्यानं नाम यस्य स तथोक्तः तं सिन्धुपं जयद्रथं दारयित्वा निराकृत्य न्यगृह्णात् निग्रहस्थानयुक्तं अकरोत् । स्वकृतं उपन्यासं अखण्डयित्वा तूष्णीं स्थितं तं पद्मतीर्थं अनुक्त्याख्यनिग्रहस्थानयुक्तं अकरोत् इति भावः । पार्थः यथा विष्णोः पदान्तं विष्णुपदस्य आकाशस्य अन्तं प्रान्तप्रदेशं इत्यर्थः शोभयद्भिः पारम्पर्येण ईर्यमाणैः मुच्यमानैः अवार्यैः गोव्रातैः तं सिन्धुपं जयद्रथं दारयित्वा विदार्य न्यगृह्णात् तद्वत् इति

भावः 'निपूर्वात् ग्रह उपादाने इत्यतो लङ् परस्मैपदं अगृण्हात् अगृण्हीताम् अगृण्हन्' इति 'अन्तः प्रान्तेऽन्तिके नाशे स्वरूपैकान्तनिर्णये' इति विश्वः कृष्णाभीष्टेत्यारभ्योक्तः प्रमेयः नारायणपण्डिताचार्यैरेव सङ्गृह्य स्वकृतभावप्रकाशिकायां उक्तः 'विष्णुमङ्गलदेशान्ते हृतां कबलिकां निजाम् । श्रुत्वा रजतपीठस्थ एकं वाटं ययौ गुरुः ॥ तत्रापि चोलजं दृष्ट्वा स्वशिष्यैस्तं रुरोध सः' इत्यादिना ॥ ४६ ॥

आस्तामास्तामेष वो विश्वमोषो रे रे मायावादिचोरा द्रवेत ।
द्रष्टा द्रष्टा निग्रहीता ध्रुवं वः प्राप्तः कालो द्राग्गुहान्तं प्रवेष्टुम् ॥ ४७ ॥

भावप्रकाशिका – पुनरपि सभ्यैरभिहितावसरात्पूर्वं तेषु त्रस्तेषु विद्रुतेषु वादावसान-पद्यानां मध्वमहाजयमहामहकुतूहलिभिः सद्भिर्निगदितानामयमभिसन्धिः प्रपञ्च्यते 'द्रवत द्रवताशु मायिनः प्रविशध्वमतन्द्रिता गुहाः । कमलारमणाम्बराश्रयः समुदेत्यखिलज्ञभास्कर' इत्यास्तामित्यनेन । त्वदुक्तं सत्यं मिथ्यावेत्याद्युक्त्वा द्रष्टा द्रष्टा वो निग्रहीता ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – कृष्णाभीष्टेत्यादिश्लोकोक्तं प्रमेयं ग्रन्थकृता स्वयमेव सङ्गृह्याप्युक्तं भावप्रकाशिकायां विष्णुमङ्गलेत्यादिना – तदस्माभिः उदाह्रियते— 'विष्णु-मङ्गलदेशान्ते हृतां कबलिकां निजाम् । श्रुत्वा रजतपीठस्थ एकवाटं ययौ गुरुः । तत्रस्थं चोलजं दृष्ट्वा स्वशिष्यैः तं रुरोध सः । त्वच्छास्त्रं साधयसि चेत् प्राश्निकान् आह्वयेत्यसौ । मध्वः तेनोदितः प्रोचेऽत्राहयेच्छसि चेदिति । कृतकृत्योऽस्मि मे शास्त्रं व्याप्तं इत्युदितेऽमुना । प्रोचे मध्वो मम व्याप्तं त्रैलोक्ये शास्त्रमित्यमुम् । अन्तर्यामी हन्त वेद तवेदं शाठ्य-भाषितम् । इति ब्रुवाणं तं प्रोचे मध्वः स्मितमुखाम्बुजः । व्याप्तं त्वय्येव मच्छास्त्रं किमुतान्यत्र बालिश । अन्तर्यामी नियम्यश्च त्वयैवाङ्गीकृताविति । मिलितेष्वथ सभ्येषु प्राश्निकेष्वभवत्कथा । तत्र माध्व उपन्यासो ग्रन्थो वादाह्वयोऽभवत्' इति । पुनरपि वादस्य सभ्याभिहितावसरात्पूर्वं त्रस्तेषु चोलजातिषु विद्रुतेषु सत्सु वादावसाने सति श्रीमध्वमहाविजय महामहेन कुतूहलिभिः सद्भिर्निगदितानां वादाख्यप्रकरणान्तेऽभि-निवेशितानां— 'आनन्दतीर्थपुंसिंहो मायावादिदितेः सुतान् । विदार्य युक्तिनखरैरप्रतीपो विभासते । पलायध्वं पलायध्वं त्वरया मायिदानवाः । सर्वज्ञहरिरायाति तर्कागमदरारिधृक् । द्रवत द्रवताशु मायिनः प्रविशध्वमतन्द्रिता गुहाः । कमलारमणाम्बराश्रयः

समुदेत्यखिलज्ञभास्करः । नृहरिः सकलज्ञनामकः समुदैति हि मायिदानवान् प्रपलायनमत्र तत्क्षमं त्वरया वो वसतिर्गुहासु च । जयत्यानन्दतीर्थेष्टदेवता नरकेसरी । विपाटिताज्ञानतमः कपाटोऽत्युरुहुंकृतः । जयत्यमितपौरुषः स्वजनतेष्टचिन्तामणिस्त्वजेश मुखवन्दितो गुणगणार्णवः श्रीपतिः । सर्वज्ञसन्मुनीन्द्रोच्चसन्मनःपङ्कजालयः । अजितो जयतीशानो रमाबाहुलताश्रयः' । इति सप्तपद्यानामभिप्रायः प्रपञ्चयते नारायणार्यैः ।

तत्र द्रवत द्रवतेत्यस्य चाभिप्राय— आस्तामिति ॥ रे रे 'हीनसम्बोधने तु रे' इत्यमरः । कर इत्यव्ययम् । सम्भ्रमे द्विरुक्तिः । मायावादिचोरा मायाकल्पितं जगदिति वादिन एव चोरा वो युष्माकं एष विश्वमेषो भेदाद्यखिलप्रपञ्चस्य चौर्यं आस्तां आस्ताम् । तिष्ठतु तिष्ठतु । इतः परमलमिति भावः । सम्भ्रमे तात्पर्ये वा द्विरुक्तिः । तर्हि किमस्माभिः कार्यमिति चेत् तत्राह द्रवेतेति । द्रवेत पलायध्वम् । कुतः द्रष्टा द्रष्टा पश्यन् पश्यन् पुरुषो ध्रुवं निश्चयेन वो निग्रहीता निग्रहस्थानं प्राप्तान् करिष्यति इत्यर्थः । ग्रह उपादाने लुट् । युष्माभिः किमुक्तं चेदपि भवदुक्तं सत्यं मिथ्या वेति विकल्प्य सत्यं चेदपसिद्धान्तः मिथ्या चेद्भवदुक्तेः प्रमितत्वात् तन्मिथ्यात्वं प्रमाणविरुद्धमित्याद्युक्त्वा द्रष्टा वादी निरुत्तरान् कुर्यादित्यर्थः । तस्मात् युष्माकं द्राक् आशु गुहान्तो गुहाप्रदेशः तं प्रवेष्टुं कालः प्राप्तः । यथा कश्चित् चोरान् दृष्ट्वा एतत् चौर्यं आस्तां द्रष्टा द्रष्टा पुरुष वोऽयुष्मान् हन्ता, तस्मात् पलायध्वम् । द्राक् गुहां प्रविशतेति ब्रूयात् तद्वदिति भावः । एतेषां श्लोकानां 'इति निगदति मायावादिविद्वेषवेष' इति सर्गान्त्यश्लोकेन सम्बन्धः ॥ ४७ ॥

मन्दोपकारिणी – एवं पद्मतीर्थादिषु पराभूतेषु विद्रुतेषु सत्सु तत्र विद्यमानसज्जनाः मायावादिनः प्रति एवं आहुः इत्याह ॥ **आस्तां इति** ॥ रे इत्यव्ययं हीनसम्बोधने वर्तते 'हीनसम्बोधने तु रे' इत्यमरः रे रे मायावादिचोराः मायावादिनामकाः तस्कराः वः युष्माकं एव विश्वमोषः विश्वस्य भेदाद्यखिलप्रपञ्चस्य मोषः चौर्यं आस्तां आस्तां तिष्ठतु तिष्ठतु इतःपरं अलं इति भावः 'आस उपवेशने इति धातोः लोट् आत्मनेपदं आस्तां आसाताम् आसतां' तर्हि किं कार्यं इति चेत् यूयं द्रवेत पलायध्वं 'द्रु गतौ इति धातोः विधिलिङ् परस्मैपदं द्रवेः द्रवेतं द्रवेत' कुतः द्रष्टा द्रष्टा यः यः युष्मान् द्रक्ष्यति स सर्वोऽपि जनः वः युष्मान् ध्रुवं निश्चयेन 'ध्रुवं तु निश्चये तर्के' इति विश्वः निग्रहीता निग्रहस्थान-प्राप्तान् करिष्यति । तथा हि युष्माभिः किंचिदुक्तं चेत् तदा भवदुक्तं सत्यं मिथ्या वा इति

विकल्प्य सत्यं चेत् अपसिद्धान्तः मिथ्या चेत् भवदुक्तेः प्रमितत्वात् न मिथ्यात्वं प्रमाणाविरुद्धं सम्भवति इत्युक्त्वा द्रष्टा द्रष्टापुरुषः वः निरुत्तरान् कुर्यात् इत्यर्थः 'ग्रह उपादाने इत्यतो लुट् परस्मैपदं ग्रहीता ग्रहीतारौ ग्रहीतारः' तस्मात् युष्माकं द्राक् आशु गुहान्तं गुहायाः अन्तं मध्यदेशं प्रवेष्टुं प्रवेशं कर्तुं कालः प्राप्तः । यथा कश्चित् चोरान् दृष्ट्वैव एतत् चौर्यं अलं द्रष्टा द्रष्टा जनः वः हन्ता तस्मात् पलायध्वं द्राक् गुहायां प्रविशत इति ब्रूयात् तद्वत् इति भावः । एतेषां श्लोकानां सर्गान्तिमश्लोकेन अन्वयो ज्ञातव्यः ॥ ४७ ॥

तेजो विद्वच्चक्रचन्द्रस्य लीनं विध्वस्ताऽलं वादिनक्षत्रलक्ष्मीः ।
विश्वव्याप्तं यत्तु तद्दीप्तिमूलं युष्मत्प्रेष्ठं तन्निरस्तं तमश्च ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – इह गुहां प्रवेष्टुं काल इत्याह—

तेज इति ॥ विदुषां चक्रं समूहः तदेव चन्द्रः तस्य तेजः सामर्थ्यं लीनं निरस्तम् । दुर्विदुषां विद्यामदो निरस्त इति भावः । वादिन एव नक्षत्राणि तेषां लक्ष्मीः जयश्रीः अपि अलं विध्वस्ता निरस्ता कुवादिनां जयश्रीरपि नष्टेत्यर्थः । न केवलं एतावन्मात्रं किन्तु विश्वव्याप्तं लोकेव्याप्तं तयोः दीप्तिमूलं दीप्तिकारणं तद्दीप्तिमूलं, विद्वच्चक्रचन्द्रस्य वादिनक्षत्र शोभायाश्च कारणमित्यर्थः, युष्मत्प्रेष्ठं प्रत्यक्षादिप्रमाणसिद्धभेदादिप्रपञ्चचोराणां युष्माकं अतिप्रियं यत् तु तमोऽज्ञानं तच्च निरस्तम् । यदज्ञानमवलम्ब्य इयन्तं कालं विदुषां वादिनां च प्रसरो लोके तदज्ञानं नष्टम् । भवतां अतिप्रियश्च तत् अज्ञानम् । 'मायाशक्त्या सर्वनिर्वाहसिद्धिरिति सर्वनिर्वाहहेतुत्वाङ्गीकारात्तस्य । चन्द्रदीप्तेः नक्षत्रदीप्तेः च कारणं ध्वान्तं चोराणां अतिप्रियं, तमसि हि चोराः चोरयन्ति । तस्मिन् ध्वान्ते नष्टे सति यथा कश्चित् चोरान् वदेत् । हे चोराः! तमो नष्टं आशु द्रवतेति तद्वदिति भावः ॥ ४८ ॥

मन्दोपकारिणी – अयमेव गुहायां प्रवेष्टुं कालः इत्याह ॥ **तेज इति** ॥ विद्वच्चक्रचन्द्रस्य विदुषां पण्डितानां चक्रः समूहः 'चक्रो गणे चक्रवाके' इति विश्वः स एव चन्द्रः तस्य तेजः प्रकाशः लीनं तिरस्कृतं विदुषां विद्यामदो निरस्त इति भावः । वादिनक्षत्रलक्ष्मीः वादिनः कुवादिन एव नक्षत्राणि तेषां लक्ष्मीः शोभापि अलं सम्यक् विध्वस्ता नष्टा कुवादिनां जयश्रीरपि नष्टेति भावः । न केवलं एतावन्मात्रं किन्तु विश्वव्याप्तं विश्वस्मिन् लोके व्याप्तं तद्दीप्तिमूलं तयोः विद्वच्चक्रचन्द्रस्य वादिनक्षत्राणां च दीप्योः

प्रकाशयोः मूलं कारणं युष्मत्प्रेष्ठं प्रत्यक्षादिप्रमाणसिद्धभेदादि प्रपञ्चचोराणां युष्माकं अतिप्रियं यत्तु तमः अज्ञानं अभूत् तदपि निरस्तं यथा चन्द्रदीप्तेः नक्षत्रदीप्तेश्च कारणं ध्वान्तं चोराणां अतिप्रियं तमसि हि चोराः चोरयन्ति तादृशे ध्वान्ते नष्टे सति यथा कश्चित्पुरुषः चोरान् प्रतिवदेत् हे चोराः अन्धकारो नष्टः जनाः युष्मान् पश्येयुः हन्युश्च ततः आशु द्रवत इति तद्वत् हे मायावादिनः भवदीयविदुषां विद्यामदो नाशितः वादिनां जयशोभा च नष्टा यत् अज्ञानं अवलम्ब्य इयन्तं कालं विदुषां प्रवृत्तिः अज्ञानस्य सर्वनिर्वाहहेतुत्वाङ्गीकारात् भवतां अतिप्रियं तच्च अज्ञानं नाशितं अतः निराश्रयत्वात् गुहां प्रवेष्टुं पलायध्वं इति सज्जना अब्रुवन् इति भावः ॥ ४८ ॥

पूर्वाशामापूर्य विश्वप्रकाशी गोसन्दोहैः सप्तविद्याख्यवाहः ।
युष्माभिः किं नैक्षि देदीप्यतेऽसौ देवः साक्षात्सर्ववित् सर्वदीपः ॥ ४९ ॥

भावप्रकाशिका – पूर्वेषां ब्रह्मादीनामाशां च ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – विद्वच्चक्रचन्द्रादेः तेजो भङ्गः कुतः? कुतश्च तमो नष्टमिति चेत् अत्राह—

पूर्वेति ॥ सप्तविद्याख्यवाहः सप्त च ता विद्याश्च सप्तविद्याः ऋगाद्याश्चत्वारो मूलरामायणं भारतं पञ्चरात्रञ्चेति सप्तविद्याः ता इत्याख्या नाम येषां ते तथोक्तास्तादृशा वाहा अश्वा यस्य स तथोक्तः । 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तय' इत्यमरः । अत एव विश्वस्मिन् सर्वस्मिंल्लोके प्रकाशत इति विश्वप्रकाशी । अथवा विश्वस्य प्रपञ्चस्वरूपस्य ब्रह्मस्वरूपस्य च प्रकाशी उपदेशेन प्रकाशनशीलः । देवः क्रीडादिगुणकोऽसौ सर्ववित्सर्व-दीपः सर्वं दीपयति प्रकाशयतीति सर्वदीपः सूर्यः सर्वविदेव श्रीपूर्णप्रज्ञ एव सर्वदीपः श्रीमध्वाख्यसूर्य इत्यर्थः । गोसन्दोहा वचनसमूहाः तैः पूर्वाशां पूर्वेषां ब्रह्मादीनामाशां सज्जनाज्ञाननिरासविषयं मनोरथमित्यर्थः । आपूर्य पूरयित्वा ब्रह्मादीनां मनोरथं सम्यक् साधयित्वेति भावः । साक्षात् सर्वसमक्षम् । साक्षात्प्रत्यक्षतुल्ययोरि'त्यमरः । देदीप्यते प्रकाशते । श्रीमध्वाचार्यः सूर्यवत् सर्वसमक्षं प्रकाशते । असौ युष्माभिः नेक्षि किं ? न दृष्टः किम्? श्रीमन्मध्वाचार्यं दृष्ट्वापि एवं अस्थानं भवतां अत्यनुचितम् । शीघ्रं प्रपलायध्वं इति भावः । श्लेषार्थे तु सप्तवाहः सप्ताश्वः विश्वप्रकाशी सर्वप्रकाशको देवः सर्ववित् सर्वज्ञः

सर्वदीपः सूर्यः पूर्वाशां प्राचीदिशं गोसन्दोहैः किरणसमूहैः देदीप्यते । असौ युष्माभिः नैक्षि किम् ? हे बालिशा! शीघ्रं प्रपलायध्वं इति यथा कश्चित् चोरान् वदेत् तद्वदिति भावः ॥ ४९ ॥

मन्दोपकारिणी – विद्वच्चक्रचन्द्रादेः तेजोभङ्गः कस्मात् अभूत् कुतश्च तमो नष्टं इत्यत आह ॥ **पूर्वेति** ॥ असौ सर्ववित् सर्वदीपः सर्वं वेत्ति जानातीति सर्ववित् सर्वज्ञः पूर्णप्रज्ञः स एव सर्वं दीपयति प्रकाशयतीति सर्वदीपः मध्वाख्यसूर्यः साक्षात् प्रत्यक्षं सर्वसमक्षं इति यावत् 'साक्षात्प्रत्यक्षतुल्ययोः' इत्यमरः देदीप्यते अतिशयेन प्रकाशते सूर्यो यथा सर्वसमक्षं प्रकाशते तथा मध्वाचार्योऽपि सर्वसमक्षं प्रकाशते असौ युष्माभिः नैक्षि किं न दृष्टः किं श्रीमध्वाचार्यं दृष्ट्वापि एवं अवस्थानं भवतां अनुचितं अतः शीघ्रं पलायध्वं इति भावः 'दीपी दीप्तौ इत्यतो यङंतात् लडात्मनेपदं देदीप्यते देदीप्येते देदीप्यन्ते' 'ईक्ष् दर्शनाङ्कनयोः इत्यतः कर्मणि लुङ् आत्मनेपदं ऐक्षि ऐक्षिषातां एक्षिषत' किं कृत्वा असौ प्रकाशते गोसन्दोहैः गवां वाचां सन्दोहैः समूहैः 'सन्दोहविसरव्रजाः' इत्यमरः पूर्वाशां पूर्वेषां ब्रह्मादीनां आशां अभिलाषं आपूर्य पूरयित्वा सज्जनाज्ञाननिरासो भवेत् इति ब्रह्मादीनां मनोरथः तत्वोपदेशेन सज्जनाज्ञाननिरासं साधयित्वेति भावः । कथंभूतः सप्तविद्याख्यवाहः सप्त च ता विद्याश्च सप्तविद्या इति आख्या येषां ते सप्तविद्याख्याः ता एव वाहाः अश्वाः यस्य स तथोक्तः 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः ऋग्यजुःसामाथर्वसंज्ञकाः चत्वारो वेदाः, मूलरामायणं भारतं पञ्चरात्रं च इति त्रयम् । एवं सप्तविद्याः विश्वप्रकाशी विश्वस्मिन् सर्वस्मिन् प्रकाशते इति विश्वप्रकाशी । यद्वा विश्वस्य परापरतत्वस्य प्रकाशनात् विश्वप्रकाशी देवः क्रीडादिगुणवान् यथा सप्ताश्वः विश्वप्रकाशी सर्वप्रकाशकः सूर्यः पूर्वाशां पूर्वा प्राची च सा आशा दिक् च पूर्वाशा तां 'आशादिगभिलाषयोः' इत्यमरः गोसन्दोहैः गवां किरणानां सन्दोहैः आपूर्य व्याप्य देदीप्यते असौ नैक्षि किम् । हे बालिशाः शीघ्रं पलायध्वं इति कश्चित् चोरान् प्रति वदेत् तद्वत् मायिनः प्रति सज्जनोऽवदत् इति 'गौः स्वर्गे वृषभे रश्मौ' इति विश्वः ॥ ४९ ॥

सर्वाधारं ब्रह्मसंज्ञं विहायो रम्याकारं शारदेन्दीवराभम् ।
सन्निर्णीतं गुण्यलं शब्दभेदैर्मध्वादित्यं संश्रितं कोऽपिधत्ते ॥ ५० ॥

भावप्रकाशिका – शब्दभेदैर्गुणि सन्निर्णीतं वेदैर्ज्ञानादिगुणवन्निश्चितं ध्वनिभिर्गुणवच्च ॥

पदार्थदीपिकोद्बोधिका – एवंभूतो असौ केनापि आच्छादयितुं अशक्य इत्याह—

सर्वाधारमिति ॥ सर्वाधारं सर्वेषां आश्रयं, शरदि भवं शारदं यत् इन्दीवरं तद्वत् आभा यस्य तत्तथोक्तम् । अत एव रम्य आकारो यस्य तत्तथा । शब्दभेदा वेदविशेषाः तैः अलं सम्यक् गुणा अस्य सन्तीति गुणि ज्ञानानन्दादिगुणवदिति निर्णीतं निश्चितं सत् निर्दोषं ब्रह्मेति संज्ञा यस्य तद्ब्रह्मसंज्ञं विहायो नभः संश्रितं मध्वादित्यं श्रीमध्वसूर्यं कः अपिधत्ते आच्छादयेत् । सर्वाधारत्वादिगुणयुक्तं परं ब्रह्म सम्यगाश्रितं श्रीमध्वं कः पुमान् आच्छादयेत् निराकुर्यात् न कोऽपीत्यर्थः । यथा सर्वाधारं सर्वप्राणिनामाश्रयं शारदेन्दीवराभं नीलवर्णं रम्याकारं शब्दभेदैः शब्दविशेषैः ध्वनिभिः गुणि ध्वन्याख्यगुणयुक्तत्वेन निर्णीतं विहायः आकाशं आश्रितं आदित्यं न कश्चित् आच्छादयेत् तद्वदिति श्लेषाभिप्रायः ॥५०॥

मन्दोपकारिणी – एवं भूतः मध्वसूर्यः केनापि आच्छादयितुं न शक्यते इत्याह ॥ **सर्वाधारं इति** ॥ सर्वाधारं सर्वेषां आश्रयं शारदेन्दीवराभं शरदि शरत्काले भवं शारदं च तत् इन्दीवरं नीलोत्पलं च शारदेन्दीवरवत् आभा कान्तिः यस्य स तथोक्तः तं नीलवर्णं इत्यर्थः रम्याकारं रम्यः मनोहरः आकारः स्वरूपं यस्य स तथोक्तः तं शब्दभेदैः शब्दानां वर्णात्मकशब्दानां भेदैः विशेषैः वेदैः इत्यर्थः अलं सम्यक् गुणि गुणाः अस्य सन्तीति गुणि ज्ञानानन्दाद्यनन्तगुणवत् इति निर्णीतं सत् निर्दोषं ब्रह्मसंज्ञं ब्रह्मेति परब्रह्मेति संज्ञा नाम यस्य तत् ब्रह्मसंज्ञं विहायः आकाशं 'वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः संश्रितं आश्रितं मध्वादित्यं मध्वाचार्याख्यं आदित्यं सूर्यं 'सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः' इत्यमरः कः पुरुषः अपिधत्ते आच्छादयेत् न कोऽपीत्यर्थः । यथा सर्वाधारं सर्वप्राणिनां आश्रयं शारदेन्दीवराभं नीलरूपं 'आकाशे नीलिमोदेति' इति श्रुतेः रम्याकारं शब्दभेदैः ध्वनिविशेषैः गुणि शब्दाख्यगुणयुक्तत्वेन निर्णीतं विहायः आकाशं आश्रितं सूर्यं न कश्चित् आच्छादयेत् तद्वत् सर्वाधारत्वादिगुणयुक्तं परब्रह्म सम्यगाश्रितं मध्वाचार्यं कः पुमान् आच्छादयेत् इति भावः । 'अपि पूर्वात् डु धाञ् धारणपोषणयोः इति धातोः लट् आत्मनेपदं धत्ते दधाते दधते' ॥ ५० ॥

विधावत विधावत त्वरितमत्रिवादासुरा अदभ्रधिषणाभिधो नरहरिर्हि जाज्वल्यते ।
स युक्तिनखरैः खरैर्मुखरमूर्खदुःखाङ्कुरैर्विदारयति दारुणप्रवचनप्रणादोऽप्रियान् ॥५१॥

भावप्रकाशिका – आनन्दतीर्थपुंसिंहो मायावादिदितेः सुतान् । विदार्य युक्तिनखरैरप्रतीपोऽभिभासते । नृहरिः सकलज्ञनामकः समुपैति हि मायिदानवान् । प्रपलायनमत्र तत्क्षमं त्वरया वो वसतिर्गुहासु च ॥ इत्यनयोर्विधावतेति । मायावादिदितेः सुतानित्यत्र 'षष्ठ्या आक्रोश' इत्यलुग्भवति दास्याः पुत्र इत्यादिवत् । नन्विदं दैत्यत्वं तत्त्वतस्तेषामाक्रोशाभिप्रायत्वादिति । सत्यमेव दितिपुत्रत्वं मा भूदेषां मानुषत्वेन जातानां मायिनां, यदसुरत्वमन्धतमसैकयोग्यत्वलक्षणं तदस्त्यतितरामिति ॥ अत्रिवादा जीवेश्वरजडानां त्रयाणां वादेन वचनेन नियमेन रहिताः तत्त्वतस्तद्वचनानां च अतत्त्वावेदकत्वाङ्गीकारेण ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – आनन्दतीर्थपुंसिंहो मायावादिदितेः सुतानि'त्यस्य पद्यस्य, 'नृहरिः सकलज्ञनामकः' इत्यस्य च प्रपञ्चो— **विधावतेत्यादि** ॥ हे अत्रिवादासुरा त्रयाणां वादस्त्रिवादः न विद्यते त्रिवादो येषां तेऽत्रिवादा मायिनः त एव असुराः । अत्रिवादा इति मायिन उच्यन्ते त्रिवादरहितत्वात् । वादो वचनं त्रयाणां वादस्त्रिवादो जीवेश्वरजगद्विषयं वचनमित्यर्थः । जीवेश्वरजगद्विषयवादः वचनं वेदादिकश्च तद्रहितत्वादत्रिवादा इति मायिन उच्यन्ते । वेदरहितत्वश्च तेषां वेदवचनतत्वावेदकत्वानङ्गीकारादित्यर्थः । हि यस्मात् अदभ्रा पूर्णा धिषणा बुद्धिः यस्य सोऽदभ्रधिषणः पूर्णप्रज्ञः स इत्यभिधा नाम यस्य स तथोक्तः । नरश्चासौ हरिः सिंहश्च नरहरिः नृसिंहो जाज्वल्यतेऽतितरां ज्वलति । स श्रीमध्वाख्यसिंहो मुखरा वाचाला ये मूर्खाः कुवादिनः तेषां यानि दुःखानि तेषां अङ्कुर उत्पत्तिर्येभ्यः ते तथोक्ताः तैः खरैः क्रूरैः युक्तय एव नखरा नखाः तैः दारुणं दुष्टानां असह्यं यत् प्रवचनं व्याख्यानं तद्रूपः प्रणादः सिंहनादो यस्य स तथा सन् अप्रियान् शत्रून् विदारयति । दारुणप्रणादो नरसिंहो नखरैः यथा शत्रून् विदारयति । एवमेव अदभ्रधिषणः श्रीपूर्णप्रज्ञाचार्यो दारुणप्रवचनस्सन् युक्तिभिः प्रतिवादिनो निराकरोतीत्यर्थः । तस्मात् त्वरितं यथा भवति तथा विधावत विधावत पलायध्वं पलायध्वम् । पृथ्वीवृत्तम् । 'जसौ जसयलावसुग्रहयतिश्च पृथ्वीगुरुरि'त्युक्तेः ॥ ५१ ॥

मन्दोपकारिणी – विधावतेति ॥ हे अत्रिवादासुराः वादो वेदवचनं त्रयाणां जीवेश्वरजगद्विषयकवेदवचनं इत्यर्थः । न विद्यते त्रिवादो येषां ते अत्रिवादाः मायावादिनः तेषां त्रिवादरहितत्वं च जीवेश्वरजगद्विषयकवेदवचनस्य अतत्वावेदकत्वाङ्गीकारात् तथा च अत्रिवादाः मायावादिन एव असुराः दैत्याः यूयं त्वरितं शीघ्रेण विधावत विधावत पलायध्वं पलायध्वं 'वि पूर्वात् धाव् गतिशुद्ध्योः इत्यतो लोट् परस्मैपदं धाव धावतं धावत' सम्भ्रमात् द्विरुक्तिः । कुतः, हिशब्दो हेतौ 'हिः हेतोः अवधारणे' इत्यमरः हि यस्मात् अदभ्रधिषणाभिधः अदभ्रधिषणः पूर्णप्रज्ञ इति अभिधा नाम यस्यासौ अदभ्रधिषणाभिधः नरहरिः नरसिंहः हरिशब्दस्य सिंहपर्यायत्वात् जाज्वल्यते अतितरां ज्वलति प्रकाशते तस्मात् विधावत इति 'ज्वल दीप्तौ इत्यतो यङंताल्लडात्मनेपदं जाज्वल्यते जाज्वल्येते' ज्वलतु अस्माकं किमनिष्टं इत्यत आह स इति ॥ दारुणप्रवचनप्रणादः प्रवचनं व्याख्यानमेव प्रणादः प्रकृष्टसिंहनादः दारुणः दुःसहः प्रवचनप्रणादो यस्य सः दारुणप्रवचनप्रणादः सः मध्वनृसिंहः मुखरमूर्खदुःखाङ्कुरैः मुखराः असंगतभाषिणश्च ते मूर्खाः अविवेकिनश्च तेषां दुःखस्याङ्कुरैः हेतुभिः स्वरैः तीक्ष्णैः 'तिग्मं तीक्ष्णं स्वरं तद्वत्' इत्यमरः युक्तिनखरैः युक्तय एव नखराः तैः 'नखोऽस्त्री नखरोऽस्त्रियां' इत्यमरः अप्रियान् अहितान् शत्रून् इत्यर्थः 'द्विड् विपक्षाहितामित्र' इत्यमरः विदारयति भेदयति 'दृ विदारणे इत्यतो णिजन्ताल्लट् परस्मैपदं' यथा दारुणनादः नृसिंहः नखैः हिरण्यकशिपुमुखान् शत्रून् विदारयति एवं मध्वाचार्यः व्याख्यानं कुर्वन् युक्तिभिः प्रतिपक्षिणो निराकरोतीति भावः । पृथ्वीवृत्तं 'जसौ जसयलावसुग्रहयतिश्च पृथ्वी गुरुः इति तल्लक्षणात्' ॥ ५१ ॥

धत्ते रूपाण्यनन्तान्यपि भुवनपतेर्यो हृदाऽप्येकपक्षो
दक्षः सद्भ्योऽखिलेभ्योऽप्यमृतमिह ददौ केवलं यो न मात्रे ।
पक्षिश्रेष्ठोऽपरः सन्नमितमतिपदोऽसम्पदे स्यादयं वो
मा दर्पं मायिसर्पा भजत भजत तास्ता गुहा द्राग्द्विजिह्वाः ॥ ५२ ॥

भावप्रकाशिका – स एकरूपमप्यंसे नैव धत्ते द्विपक्षोऽपि अमृतं मोक्षमपि सर्वेभ्यः ॥

पदार्थदीपिकोद्बोधिका – धत्त इति ॥ द्वे जिह्वे येषां ते द्विजिह्वाः मायिनां अनृतवादित्वात् द्विजिह्वत्वं सर्पाणां द्वे जिह्व इति प्रसिद्धमेव । हे मायिसर्पाः! मायिन एव

सर्पाः अयं श्रीमध्वः पक्षिश्रेष्ठः सन्नपरः पक्षिश्रेष्ठात् गरुडादन्यः तद्विलक्षण इति यावत् । तथा हि गरुडः पक्षिणां विहगानां श्रेष्ठत्वात्पक्षिश्रेष्ठ इत्युच्यते । अयं तु न तथा किन्तु पक्षिणां सिद्धान्तवतां वादिनां श्रेष्ठः तस्मात् पक्षिश्रेष्ठःसन् अपि अपर इत्यर्थः । इतश्चाप्यपरोऽयमित्याह— धत्त इत्यादिना । अयं श्रीमध्वो हृदापि हृदयेनापि भुवनपतेः त्रैलोक्यनाथस्य हरेः अनन्तानि अपरिमितानि रूपाणि धत्ते धारयति । सर्वदाऽप्यनन्तभगवद्रूपाणि ध्यायतीत्यर्थः । गरुडस्त्वंसेनाप्येकमेव रूपं धत्ते । अयं श्रीमध्व एकः प्रधानः पक्षः सिद्धान्तो यस्य स तथा सर्वोत्तमसिद्धान्तवान् इति भावः । गरुडस्तु द्विपक्षः । अयं श्रीमध्वो दक्षः सर्वविषये चतुरः । गरुडस्त्वदक्षो न दक्षप्रजेश्वरः, किन्तु दक्षदौहित्र एव । यः श्रीमध्व इह जगत्यखिलेभ्यः सद्भ्यश्च अमृतं मोक्षं ददावित्यर्थः । गरुडस्तु केवलं मात्रेऽमृतं सुधां ददौ । एवं अयं पक्षिश्रेष्ठ इति नामभागापि गरुडात् अपर इत्यर्थः । एवंभूतोऽयं अमितमतिपदो अमितमतिरिति पूर्णप्रज्ञ इति पदं नाम यस्य स तथोक्तो वो युष्माकं असम्पदेऽभूतये स्याद्भवेत् । तस्माद्यूयं दर्पो गर्वः तं मा भजत न कुरुत। वैदुष्यगर्वं त्यक्त्वा विनीता भवत इत्यर्थः । मानित्वाद्गर्वत्यागे समर्था वयं किं कुर्म इति चेदत्राह द्रागिति । द्राक् आशु ताः ताः युष्मदिष्टा गुहा भजत विशत । गरुडं आपतन्तं दृष्ट्वा कश्चित्सर्पान् प्रत्येवं यथा ब्रूयात् तद्वत् चोलादीन् प्रति सन्निकरोवददित्यर्थः। स्रग्धरावृत्तम् । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेय'मित्युक्तेः ॥ ५२ ॥

मन्दोपकारिणी – धत्त इति ॥ द्विजिह्वाः द्वे जिह्वे रसने येषां ते द्विजिह्वाः 'रसज्ञा रसना जिह्वा' इत्यमरः । हे मायिसर्पाः मायिन एव सर्पाः भुजङ्गाः दर्पं गर्वं मा भजत मा कुरुत मायिनां अनृतवादित्वात् द्विजिह्वता प्रसिद्धैव । एवं द्विजिह्वत्वेन सर्पतुल्याः मायिनः यूयं गर्वं त्यक्त्वा विनीता भवत इति भावः 'भज सेवायां इत्यतो लोट् परस्मैपदं भज भजतात् भजतं भजत' । कुतः- अमितमतिपदः अमिता पूर्णा मतिः प्रज्ञा यस्य सः अमितमतिः अमितमतिरिति पदं नाम यस्य स तथोक्तः पक्षिश्रेष्ठः पक्षिणां खगानां श्रेष्ठः गरुडः मध्वनामा गरुडः वः युष्माकं असम्पदे न संपत् असंपत् तस्यै अनैश्वर्याय स्यात् भवेत् मध्वगरुडयोः वैलक्षण्यमाह अपर इति ॥ अयं मध्वः पक्षिश्रेष्ठस्सन् अपरः गरुडात् विलक्षणः । कथं- गरुडः पक्षिणां श्रेष्ठत्वात् पक्षिश्रेष्ठ इत्युच्यते अयं तु न तथा पक्षिणां

सिद्धान्तिनां वादिनां श्रेष्ठत्वात् पक्षिश्रेष्ठ इत्युच्यते । तथा च पक्षिश्रेष्ठशब्दवाचित्वेन समोऽपि मध्वः अर्थवैलक्षण्यात् अपरो गरुड इत्यर्थः । इतोऽपि गरुडाद्विलक्षण इत्याह धत्त इत्यादिना । यः श्रीमध्वः हृदापि हृदयेनापि भुवनपतेः भुवनानां लोकानां पतिः स्वामी तस्य हरेः अनन्तान्यपि रूपाणि धत्ते धरति सर्वदापि मनसि भगवतः अनन्तरूपाणि धत्ते इति भावः । गरुडस्तु स्वस्कन्धेन एकमेव रूपं धत्ते अयं मध्वः एकपक्षः एकः प्रधानः पक्षः सिद्धान्तो यस्य स एकपक्षः सर्वोत्तमसिद्धान्तवान् इत्यर्थः 'एके मुख्यान्यकेवलाः' इत्यमरः । गरुडस्तु पतत्राख्यपक्षद्वययुक्तः अयं मध्वः दक्षः सर्वविषये चतुरः गरुडस्तु अदक्षः दक्षप्रजापतिर्न भवति किंतु दक्षदौहित्रः दक्षप्रजापतिदुहिता विनतादेवी तस्यां कश्यपात् जातत्वात् इति भावः तथा अयं मध्वः इह अधिकारिवर्गे केवलं मात्रे जनन्यै अमृतं मोक्षं न ददौ किंतु अखिलेभ्यः सद्भ्यो सज्जनेभ्योऽपि अमृतं मोक्षं ददौ दत्तवान् 'डुदाञ् दाने इत्यतो लिट् परस्मैपदं ददौ ददतुः ददुः' 'श्रेयो निःश्रेयसामृतं मोक्षोऽपवर्गः' इत्यमरः । गरुडस्तु केवलं मात्रे स्वजनन्यै अमृतं सुधां ददौ, न अखिलेभ्यः सद्भ्यो ददौ 'पीयूषममृतं सुधा' इत्यमरः एवं मध्वः पक्षिश्रेष्ठः इति नामवानपि गरुडादपर इत्यर्थः । एवं भूतोऽयं युष्माकं अनर्थाय स्यात् तस्मात् दर्पं मा भजत इति भावः 'दरी तु कन्दरो वा स्त्री देवखातबिले गुहा' इत्यमरः । यथा गरुडमापतन्तं दृष्ट्वा कश्चित् पुमान् सर्पान् प्रति यूयं गूहिता भवत इति ब्रूते तद्वत् पद्मतीर्थादीन् प्रति सज्जनसमुदायो वदतीति भावः । स्रग्धरावृत्तं 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' ॥ ५२ ॥

वेदव्रातसुदर्शनः परिलसत्तर्काख्यशङ्खध्वनि-
र्विभ्राजिष्णुपुराणसंहतिगदः श्लोकौघशार्ङ्गान्वितः ।
सत्सूत्रेष्वितिहासनन्दकचणो मध्वाख्यनारायणः
प्राप्तो वो निजिघृक्षया द्रवत हे मायाविदेवद्विषः ॥ ५३ ॥

भावप्रकाशिका – 'पलायध्वं पलायध्वं त्वरया मायिदानवाः । सर्वज्ञो हरिरायाति तर्कागमदरारिभृदि'त्यस्य वेदव्रातेत्यादिना ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – 'पलायध्वं पलायध्वं त्वरया मायिदानवाः सर्वज्ञहरिः आयाति तर्कागमदरारिधृक्' इत्यस्य प्रपञ्चो—

वेदव्रातेति ॥ वेदव्रातो वेदसमूहः स एव सुदर्शनं सुदर्शनचक्रं यस्य स तथोक्तः परिलसन्तो वेदानुसारित्वेन शोभमाना ये तर्काः ते इत्याख्या यस्य स तथोक्तः तादृशः शङ्खध्वनिर्यस्य स तथोक्तः । विभ्राजिष्णुर्विशेषेण शोभनशीला या पुराणसंहतिः पुराणसमूहः सैव गदा यस्य स तथोक्तः । श्लौकौघ एव श्लोकरूपपञ्चरात्रवृन्दमेव शार्ङ्गं शार्ङ्गाख्यं धनुः तेन अन्वितो युक्तः । मिताक्षरं श्लोकरूपं पञ्चरात्रं श्लोकशब्दवाच्यं, गद्यरूपं पञ्चरात्रं मिताक्षरं विद्येत्युच्यते । 'अमिताक्षरं पञ्चरात्रं पञ्चरात्रं विद्येत्याहुर्मनीषणः मिताक्षरं श्लोकाख्यमुभयं वेद इत्युच्यते' इति ब्रह्माण्डे । सन्ति निर्दोषाणि च तानि सूत्राणि च सत्सूत्राणि तान्येवेषवश्शरास्ते चेतिहास एव भारतमेव नन्दकः खड्गः स च सत्सूत्रेष्विति हासनन्दकास्तैश्चणश्चतुरः । भगवतः खड्गस्य नन्दकाख्या । 'खड्गोऽस्य नन्दक' इति हलः । मध्वाख्यनारायणः, हे मायाविदेवद्विषः ! माया एषामस्तीति मायाविनो मायावादिनस्त एव देवद्विषो दैत्या वो युष्माकं निगृहीतुमिच्छा निजिघृक्षा निग्रहणेच्छा तया प्राप्तः । अतो द्रवत पलायध्वम् । शार्दूलविक्रीडितवृत्तम् । 'सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितमि'त्युक्तेः । अत्र रूपकालङ्कारः ॥ ५३ ॥

मन्दोपकारिणी – वेदव्रातेति ॥ हे मायाविदेवद्विषः मायाविनो मायावाद्याख्याः देवद्विषः दैत्याः 'पूर्वदेवाः सुरद्विषः' इत्यमरः । द्रवत पलायध्वम् । कुतः- मध्वाख्य-नारायणः मध्व इति आख्या नाम यस्य स तथोक्तः स चासौ नारायणश्च तथोक्तः यः युष्मान् निजिघृक्षया निग्रहीतुं इच्छा निजिघृक्षा तया भवतां निग्रहं कर्तुं प्राप्तः आगतवान् । कथंभूतःवेदव्रातसुदर्शनः वेदानां श्रुतीनां व्रातः समूहः स एव सुदर्शनं चक्रायुधं यस्य स तथोक्तः 'स्तोमौघनिकरव्रातः' इत्यमरः । परिलसत्तर्काख्यशङ्खध्वनिः परिलसन् प्रमाणादि-पदार्थनिर्णायकत्वेन शोभमानः तर्कः ब्रह्मतर्काख्यग्रन्थः परिलसंश्चासौ तर्कश्च परिलसत्तर्कः तर्क इत्याख्या संज्ञा यस्य सः तर्काख्यः स चासौ शङ्खः पाञ्चजन्यनामकः तस्य ध्वनिः घोषो यस्य स तथोक्तः । विभ्राजिष्णुपुराणसंहतिगदः विभ्राजिष्णुः विशेषेण भ्राजनशीला च सा पुराणसंहतिः वृन्दं 'स्त्रियां तु संहतिर्वृन्दं' इत्यमरः पुराणसंहतिरेव गदा कौमोदकी यस्य स तथोक्तः । श्लोकौघशार्ङ्गान्वितः श्लोकानां पद्यानां 'पद्ये यशसि च श्लोकः' इत्यमरः ओघः अमूहः यस्मिन् स श्लोकौघः पञ्चरात्रं इत्यर्थः । श्लोकौघ एव शार्ङ्गं शार्ङ्गनामकं धनुः तेनान्वितः युक्तः । द्विविधं पञ्चरात्रं मिताक्षरममिताक्षरं च इति । आद्यं छन्दोबद्धपद्यरूपं द्वितीयं अच्छन्दोबद्धं गद्यरूपं तच्चोक्तं ब्राह्मे 'अमिताक्षरं पञ्चरात्रं गद्यमाहुर्मनीषिणः ।

मिताक्षरं श्लोकवाच्यन्तूभयं वेद उच्यते ॥' इति ॥ सत्सूत्रेष्वितिहासनन्दकचणः सन्ति उत्तमानि च तानि सूत्राणि च ब्रह्मसूत्राणि 'सच्छब्दमुत्तमं ब्रूयात्' इत्युक्तेः सत्सूत्राण्येव इषवः शराः 'लम्बमार्गणशराः पत्रीरोप इषुर्द्वयोः' इत्यमरः । इतिहासः महाभारतं मूलरामायणं च स एव चन्दकः खड्गः सत्सूत्रेषवश्च इतिहासनन्दकश्च सत्सूत्रेष्विति-हासनन्दकाः तैः चणः प्रसिद्धः । यथा नारायणः चक्रशङ्खगदाधनुर्बाणखड्गाख्यायुधानि धृत्वा शङ्खघोषं कुर्वन् शत्रुनिग्रहणेच्छया आगच्छेत् तद्वत् वेदपञ्चरात्रागमब्रह्मतर्कब्रह्म-मीमांसेतिहासपुराणात्मकशास्त्राभिज्ञः अयं मध्वाचार्यः हे मायावादिनः वः निग्रहणेच्छया आगतोऽस्ति । अतः पलायध्वं इति जनोऽवदत् इति भावः 'शङ्खो लक्ष्मीपतेः पाञ्चजन्यः' इत्यमरः । शार्दूलविक्रीडितवृत्तं 'सूर्याश्वैर्मसजास्ततास्सगुरुवः शार्दूलविक्रीडितम्' ॥ ५३ ॥

इति निगदति मायावादिविद्वेषवेषे शुभजननिकरे स्वारामतोऽस्मात् प्रयातः ।
न्यवसदमरधिष्ण्ये प्राग्र्यवाटाभिधाने गुरुमतिरभिनन्दन् देवमानन्दमूर्तिम् ॥ ५४ ॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते सुमध्वविजये महाकाव्ये आनन्दाङ्के द्वादशः सर्गः ॥

भावप्रकाशिका – स्वारामस्य 'कावु' इत्यपभ्रष्टभाषा । प्राग्र्यवाटस्य 'कोडिपाडि' इति ॥ ५४ ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां द्वादशः सर्गः ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ मायावादिषु विद्वेषः स एव वेषोऽलङ्कारो यस्य स मायावादिविद्वेषवेषस्तस्मिन् मायावादिविषये सम्पूर्णद्वेषयुक्त इत्यर्थः । शुभा ये जनास्तेषां निकरः समूहस्तस्मिन् श्रीमध्वमहाविजयमहोत्सवसकुतूहलिनि सज्जनसमूह इत्यर्थः । इति 'आस्तामास्तामि'त्यादि निगदति सति । तस्माद्यत्र पद्मतीर्थो दृष्टो निरुद्धो वादे पराजितश्च । अस्मात्स्वारामतः 'कावु' इत्यपभ्रष्टसंज्ञकादेशात्प्रयातो गुरुमतिः पूर्णप्रज्ञः प्राग्र्यश्च तद्वाटश्चोपवनश्च प्राग्र्यवाटं तदित्यभिधानं नाम यस्य तत्तथोक्तं तस्मिन् अपभ्रष्टसंज्ञायां 'कोडिपाडी'ति संज्ञकेऽमरधिष्ण्यं देवस्थानं तस्मिन् । आनन्दो मूर्तिः शरीरं

यस्य स तथा तं देवं तत्राधिष्ठितमानन्दरूपं जनार्दननामानं भगवन्तं दृष्ट्वा अभिनन्दन् सन्तुष्टः सन् न्यवसत् । चातुर्मास्यमुवास । मालिनीवृत्तम् । 'ननमयययुतेयं मालिनी भौगिलोकैरित्युक्तेः ॥ ५४ ॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां द्वादशः ॥

मन्दोपकारिणी – इतीति ॥ मायावादिविद्वेषवेषे मायावादिषु विद्वेषः स एव वेषो यस्य इति विग्रहः मायावादिविषये सम्पूर्णद्वेषयुक्ते इत्यर्थः । एवंभूते शुभजननिकरे शुभानां मध्वाचार्यविजयमहोत्सवे कुतूहलिनां जनानां निकरे समूहे इति 'आस्तां आस्तां एष वो विश्वमोषः' इत्यादिकं पूर्वोक्तप्रकारं वचनं निगदति वदति सति यस्मिन् आरामे पद्मतीर्थः निरुद्धः वादे पराजितश्च अस्मात् स्वारामतः शोभमानात् आरामतः उपवनात् 'आरामः-स्यादुपवनं' इत्यमरः प्रयातः निर्गतः गुरुमतिः गुर्वी श्रेष्ठा मतिः यस्य सः पूर्णप्रज्ञाचार्यः प्राग्र्यवाटाभिधाने प्राग्र्यवाटं इति अभिधानं नाम यस्य तत्तथोक्तं तस्मिन् अमरधिष्ण्ये अमरस्य हरेः धिष्ण्ये स्थाने देवालये इत्यर्थः 'धिष्ण्यमोको निवसनं स्थानावसथवास्तु च' इत्यमरः न्यवसत् चातुर्मास्यं उवास 'वस निवासे इत्यतो लङ् परस्मैपदं' किं कुर्वन् आनन्दमूर्तिं आनन्ददेहं देवं तद्देवालयेऽधिष्ठितं भगवन्तं अभिनन्दन् प्रीणयन् इति पद्मतीर्थपराजयानन्तरं अनुपदमेव वर्षाकाले प्राप्ते पद्मतीर्थाधिष्ठितस्थलं परित्यज्य प्राग्र्यवाटाख्यदेवालये चातुर्मास्यं उवासेति भावः मालिनीवृत्तं 'ननमयययुतेऽयं मालिनी भोगिलोकैः' इत्युक्तेः ॥ ५४ ॥

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः

पृथुदर्शनमुत्थितं कृतार्थं पृथिवीभृत्प्रणतिं गृहीतवन्तम् ।
निजशिष्यमुदेऽथ सह्यमाप्तं पुरुषः कश्चिदुपाययौ कदाचित् ॥ १ ॥

भावप्रकाशिका – 'उत्थाय पौर्णमास्यां स्वाराममितो निशीथ एव गतम् । श्रुत्वा चोलं त्रासाद्ग्राम्यैस्सह दत्तमग्रहीद्ग्रन्थम्' । पृथिवीभृज्जयसिंहः ॥ १ ॥

पदार्थदीपिकोद्बोधिका – पृथ्विति ॥ उत्थितं कृतचातुर्मास्योत्थानं कृतः अर्थः प्रयोजनं येन स तथा तम् । चोलजं पद्मतीर्थं पौर्णमास्यां उत्थाय निशीथ एव स्वारामतो गतं श्रुत्वा त्रस्तैर्ग्रामजनैः दत्तं चोलजाहृतं पुस्तकजातं स्वयमगृहीत्वा कस्यचित् मध्यस्थस्य करे स्थापितवन्तमिति भावः । पृथिवीभृत्प्रणतिं पृथिवीं बिभर्तीति पातीति पृथिवीभृत् जयसिंहाख्यभूपः तस्य प्रणतिः नमस्कारस्तां गृहीतवन्तं अङ्गीकृतवन्तम् । निजाः स्वकीया ये शिष्याः तेषां मुत् सन्तोषः तस्यै । सह्यः सह्यगिरिः तमाप्तम् । सह्योपरि विद्यमानानां निजशिष्याणां सन्तोषाय तत्र गन्तुं मार्गवशात्सह्यगिरिं आप्तमिति भावः । पृथु महत् दर्शनं ज्ञानं यस्य तं श्रीपूर्णप्रज्ञं कदाचित् कश्चित्पुरुष उपाययौ । सर्गेऽस्मिन् प्रायश्चन्द्रिकावृत्तम् । 'विषमे ससजा गुरू यदि स्युः सभारायश्च युजीह चन्द्रिका से'त्युक्तेः ॥ १ ॥

मन्दोपकारिणी – पृथ्विति ॥ उत्थितं चातुर्मास्यव्रतादुत्थितं तत्समाप्तिमन्तं इत्यर्थः कृतार्थः कृतः साधितः अर्थः पुस्तकप्राप्तिरूपप्रयोजनं येन सः तथोक्तः तं पृथिवीभृत्प्रणतिं पृथिवीभृतः जयसिंहाख्यस्य राज्ञः प्रणतिं नमस्कारं गृहीतवन्तं अङ्गीकृतवन्तं अथ निजशिष्यमुदे निजानां स्वकीयानां शिष्याणां मुदे संतोषार्थं सह्यं सह्याख्यपर्वतं आप्तं प्राप्तवन्तम् । पृथुदर्शनं पृथु पूर्णं दर्शनं ज्ञानं यस्य सः तथोक्तः तं मध्वाचार्यं कदाचित् कस्मिंश्चित्काले कश्चित्पुरुषः जयसिंहराजभृत्यः आह्वातुं उपाययौ समीपमाजगाम । 'उप आङ् पूर्वात् या प्रापणे इति धातोः लिट् परस्मैपदम्' । चातुर्मास्यसमाप्त्यनन्तरं पद्मतीर्थं पौर्णमास्यां निशीथे एव स्थानाद्गतं श्रुत्वा तद्ग्रामस्थजनाः पद्मतीर्थेन अपहृतं मध्वाचार्यपुस्तकजातं मध्वाचार्याय दत्तवन्तः । मध्वाचार्यस्तु तत्पुस्तकजातं राजसन्निधौ पद्मतीर्थकृतं अन्यायं प्रकटीकृत्य तं निंदयित्वा अनन्तरं ग्रहीष्यामीति बुध्या स्वयं अगृहीत्वा

तद्ग्रामस्थस्यैव कस्यचिन्मध्यस्थस्य हस्ते स्थापितवान् । तदा जयसिंहराजेन मध्वाचार्य-माहात्म्यं श्रुत्वा स्वां पुरीं प्रति आगन्तव्यमिति बुध्या प्रेषितं नमस्कारं अङ्गीकृत्य श्रीमध्वे गच्छति सति मार्गे सह्यगतनिजशिष्याः मध्वाचार्यं नमस्कारादिना प्रार्थ्य सह्यपर्वतं प्रति आनीतवन्तः । तत्र तेषां प्रीतये कतिचिद्दिनानि निवसति सति, कस्मिंश्चिद्दिवसे जयसिंह-राजभृत्यः मध्वाचार्यं आह्वातुं आजगामेति भावः । चन्द्रिकावृत्तं प्रायोऽस्मिन्सर्गे 'विषमे ससजा गुरू यदि स्युः सभरायश्च युजीह चन्द्रिका सा' इत्युक्तेः । केचित् इदं वृत्तं मालभारिणी वसन्तमालिका वा इति वदन्ति ॥ १ ॥

भगवानिह नः स्वकिङ्कराणामचिरेणाव्रजतादनुग्रहार्थम् ।
इति कार्यचिकीर्षयाऽऽर्थयत् त्वां नृप इत्यभ्यधितैष तं प्रणम्य ॥ २ ॥

पदार्थदीपिकोद्बोधिका – भगवानिति ॥ एष समागतः पुरुषस्तं श्रीमध्वं प्रणम्य स्वकिङ्कराणां नोऽस्माकं अनुग्रहार्थं, अचिरेण शीघ्रात् इह अस्मद्देश आव्रजतादागच्छतु । इति नृपो जयसिंहाख्यः कार्यचिकीर्षया चोलजाहृतपुस्तकापहारस्य प्रतिक्रियापूर्वकं त्वां क्षमापयित्वा मध्यस्थकरे स्थापितपुस्तकदानाख्यकार्यकरणेच्छया त्वामार्थयत् प्रार्थयामास । अर्थ उपयाञ्चायां लङ् । इत्यभ्यधित जगाद ॥ २ ॥

मन्दोपकारिणी – भगवानिति ॥ एषः राजपुरुषः तं श्रीमध्वाचार्यं प्रणम्य इति इत्थं अभ्यधित अवोचत् । कथम् ? हे मध्वाचार्य ! भगवान् पूज्यः भवान् स्वकिंकराणां स्वस्य भवतः किंकराणां भृत्यानां नः अस्माकं अनुग्रहार्थं अनुग्रहं कर्तुं अचिरेण शीघ्रेण इह अस्मत्पुर्यां आव्रजतात् आगच्छतु इति । नृपः जयसिंहराजः कार्यचिकीर्षया कार्यस्य पद्मतीर्थकृतपुस्तकापहारस्य प्रतिक्रियापूर्वकं त्वां क्षमयित्वा मध्यस्थलोककरे स्थापितपुस्त-कादापनाख्यकार्यस्य चिकीर्षया कर्तुमिच्छया त्वां आर्थयत् प्रार्थितवान् इत्यभ्यधित इति सम्बन्धः । 'अभिपूर्वात् डु धाञ् धारणपोषणयोरित्यतो लुङात्मनेपदं अधित अधिषातां अधिषत' । 'आङ् पूर्वात् व्रज गताविस्यस्माल्लोट् परस्मैपदं व्रजतु व्रजतात् व्रजतां व्रजन्तु' ॥ २ ॥

अथ माधवतीमपास्य काष्ठां व्रजता प्रैधिततेजसा प्रतीचीम् ।
परिशोधयता स्वपादसङ्गात् पृथिवीं प्राङ्नदिवाकरेण रेजे ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथ इत्थं तद्वचनानन्तरम् । मघोन इन्द्रस्य सम्बन्धिनी माघवती तामैन्द्रीमिति यावत् । काष्ठां दिशमपास्य त्यक्त्वा प्रतीचीं पश्चिमां दिशं व्रजता, स्वपादौ स्वचरणौ तयोः सङ्गः संसर्गः तस्मात् पृथिवीं परिशोधयता, प्रैधितं परिपूर्णं तेजो यस्य स तथा तेन । प्राज्ञदिवाकरेण श्रीपूर्णप्रज्ञाख्यसूर्येण रेजे । ऐन्द्रीमाशां हित्वा प्रतीचीं दिशं व्रजन् स्वकिरणसङ्गात् सर्वं पावयन् दिवाकरो यथा प्रकाशते तद्वत् उक्तलक्षणकोऽयं श्रीमध्वाचार्यो रराजेति भावः ॥ ३ ॥

मन्दोपकारिणी – अथेति ॥ अथ राजभृत्यवचनानन्तरम् । माघवतीं मघवतः इन्द्रस्य इयं माघवती तां प्राचीं इत्यर्थः । 'इन्द्रो मरुत्वान्मघवा' इत्यमरः । अपास्य त्यक्त्वा प्रतीचीं पश्चिमां काष्ठां दिशं प्रति व्रजता गच्छता, स्वपादसङ्गात् स्वस्य पादौ चरणौ तयोस्सङ्गात् सम्बन्धात् पृथिवीं भूमिं परिशोधयता पवित्रीकुर्वता प्रैधिततेजसा प्रैधितं प्रकर्षेण अभिवृद्धं परिपूर्णं इत्यर्थः, तेजः सामर्थ्यं यस्य सः प्रैधिततेजाः तेन प्राज्ञदिवाकरेण प्राज्ञः पूर्णप्रज्ञाचार्याख्यः दिवाकरः सूर्यः तेन रेजे शुशुभे । 'राजृ दीप्तावित्यतो भावे लिडात्मनेपदम् । भावे प्रथमपुरुषैकवचनमेव न द्विवचनबहुवचने भावस्यैकत्वात् । यथा प्राचीं दिशं त्यक्त्वा प्रतीचीं व्रजता स्वपादसङ्गात् स्वस्य पादाः रश्मयः तेषां सङ्गात् पृथिवीं परिशोधयता प्रैधिततेजसा अभिवृद्धदीप्तिमता सूर्येण दीप्यते तद्वत् सूर्यसदृशेन मध्वाचार्येण दीप्यते इति भावः ॥ ३ ॥

अशुभानपहाय मायिजुष्टानधमाद्रीनिव गोत्रनिम्नगौघैः ।
सुजनैस्तरसाऽभिगम्यमानः परमस्नेहतया क्रमप्रसन्नैः ॥ ४ ॥

भावप्रकाशिका – परमस्नेहतया परमप्रणयत्वात् स्नेहवत्वाच्च ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – अशुभानिति ॥ अयं परमानन्दाख्यविद्वच्छ्रेष्ठः मायिजुष्टान् मायावादिभिः वशीकृतान् अशुभान् दुर्जनान् अपहाय हित्वा परम उत्तमः स्नेहो यस्य स परमस्नेहः तस्य भावस्तत्ता तया । क्रमप्रसन्नैः क्रमेण श्रीमध्वसन्दर्शनादिना प्रसन्नैर्मनः प्रसादमाप्नुवद्भिः, अर्थान्तरे परमस्नेहतयोत्तमद्रवद्रव्यत्वेन क्रमप्रसन्नैः क्रमेण काश्यं त्यजद्भिः । 'आपः सांसिद्धिका द्रवा' इत्युक्तेरपामेव स्वाभाविकद्रवत्वम् । लोहादीनां मूषाग्निसंयोगेन द्रवीभावादि औपाधिकत्त्वम् । तत्र परमस्नेहत्वं नाम स्वाभाविकद्रवत्वं

विवक्षितम् । स्वाभाविकद्रवस्यैव कदाचित्कलुषस्य ततः क्रमेण प्रसन्नत्वं निर्मलत्वं भवति । तस्मात् परमस्नेहतया क्रमप्रसन्नैर्वर्षासु कलुषैः क्रमेण शरत्काले प्राप्तप्रसन्नैर्निर्मलैः इत्यर्थः । सुजनैः सज्जनैः मायिजुष्टान् मायिभिः तस्करादिभिः सेवितानधमाद्रीन् क्षुद्रपर्वतानपहाय गोत्राणां पर्वतानां निम्नगा गोत्रनिम्नगास्तासां ओघास्तैरिव पर्वतोत्पन्ननदीसमूहैः इव इत्यर्थः । तरसा त्वरयाऽभिगम्यमानः सन् प्रयाणे यात्रायां सुरसिन्धोः देवनद्या गङ्गायाः सन्ततं प्रवाह इवातिवेलमत्यन्तं विबभौ शुशुभे । अत्यन्तकुलकमेतत् ॥ ४ ॥

मन्दोपकारिणी – अशुभानिति ॥ अयं परमानन्दसुतीर्थसूरिराजः परमः उत्तमः आनन्दो यस्मात् तत् परमानन्दं मोक्षप्रदमिति यावत् । अत एव सु शोभनं तीर्थं शास्त्रं यस्य स तथोक्तः । 'तीर्थं शास्त्रेऽध्वरे क्षेत्रे' इत्यमरः । सूरिणां ज्ञानिनां राजा श्रेष्ठः सूरिराजः परमानन्दसुतीर्थश्चासौ सूरिराजश्च स तथोक्तः । प्रयाणे गमनकाले अतिवेलं भृशं बभौ शुशुभे 'अतिवेलभृशात्यर्थं' इत्यमरः 'भा दीप्तावित्यतो लिट् परस्मैपदं बभौ बभतुः बभुः । क इव ? सुरसिन्धोः सुराणां देवानां सिन्धोः नद्याः भागीरथ्याः सन्ततप्रवाहः सन्ततः अविच्छिन्नः प्रवाहः इव निर्झर इव इति । अन्त्यकुलकमेतत् । कथंभूतो मध्वः मायिजुष्टान् मायावादिभिः जुष्टान् वशीकृतान् अशुभान् दुर्जनान् अपहाय हित्वा सुजनैः तरसा वेगेन 'रंहो वेगस्तरो लघुः' इति विश्वः अभिगम्यमानः अनुगम्यमानः । कथंभूतैः सुजनैः परमस्नेहतया परमः उत्तमः स्नेहः प्रणयः येषां ते परमस्नेहाः तेषां भावः परमस्नेहता तया क्रमप्रसन्नैः क्रमेण पूर्वं श्रीमध्वाचार्यदर्शनं ततः स्पर्शनं अनन्तरं अभिलपनं इत्यादिक्रमेण प्रसन्नैः मनःप्रसादं प्राप्नुवद्भिः मध्वाचार्ये अतिस्नेहस्य विद्यमानत्वात् तद्दर्शनादिना प्रसन्नान्तःकरणैः इत्यर्थः । कः कैरिव - अभिगम्यमानः गङ्गाप्रवाहः मायिजुष्टान् मायिभिः कपटवद्भिः आश्रितान् अशुभान् अधमाद्रीन् अधमाः क्षुद्राश्च ते अद्रयश्च पर्वताश्च तान् अपहाय गोत्रनिम्नगौघैः गोत्राणां महापर्वतानां 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः निम्नगानां नदीनां 'स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा' इत्यमरः ओघैः समूहैरिव क्षुद्रपर्वतान् परित्यज्य महापर्वतोद्भवनदीभिः अनुगम्यमान इत्यर्थः । कथंभूतैः ? निम्नगौघैः परमस्नेहतया परमः स्वाभाविकः स्नेहः द्रवत्वं येषां ते परमस्नेहाः तेषां भावः परमस्नेहता तया स्वाभाविकद्रवद्रव्यत्वात् क्रमप्रसन्नैः वर्षर्तौ कलुषैः क्रमेण शरत्काले प्राप्ते प्रसन्नैः कलुषं त्यजद्भिः स्वभाविकनिर्दोषस्यैव कदाचित् कलुषीभूतस्य क्रमेण प्रसन्नत्वस्य जायमानत्वात् इति भावः ॥ ४ ॥

सुमनःफलशोभिनोऽत्र पुंसो नमयन् गोभिरनोकहानिवोच्चान्।
अपि भङ्गमुपानयन्ननम्रान् दृढभावानपरानवार्यवीर्यः ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – सुमन इति ॥ अयं परमानन्दसुतीर्थसूरिराजो अत्र भुवि उच्चान् उत्तमान्। मुक्तियोग्यान् इति भावः। सुमनःफलशोभिनः सु शोभनं यन्मनः तस्य फलानि फलभूतानि ज्ञानभक्तिवैराग्यादीनि तैः शोभिनः शोभमानान्। मनोनैर्मल्यजन्यत्वेन मनसः फलभूतैः ज्ञानादिगुणैः शोभमानानि इत्यर्थः। पुंसः पुरुषान् सत्पुरुषान् इति यावत्। गोभिः वचनैः। सुरसिन्धुप्रवाहो गोभिर्जलैः सुमनःफलशोभिनः सुमनांसि पुष्पाणि फलानि च तैः शोभिनः शोभमानान् उच्चानुन्नताननोकहानिव वृक्षानिव नमयन् आप्रवणी-कुर्वन् सन्। 'अनोकह कुटः शालः पलाशी द्रुद्रुमानगा' इत्यमरः। दृढस्य भाव दृढभावः तस्मात् दृढत्वादित्यर्थः। कठिनमानसादिति यावत्। अनम्रानविनीतान्। अपरान् पुंसोऽन्यान् पुरुषान् भङ्गमपि तिरस्कारमपि प्रवाहमुखे तिर्यक् पतितान् दृढत्वाद् नम्रान् वृक्षान् सुरसिन्धुप्रवाह इवोपानयन् प्रापयन् सन्। 'शुष्ककाष्ठानि मूर्खाश्च भज्यन्ते न नमन्ति च' इति हि भाषितम्। अवार्यं दुर्वादिभिः निवारयितुं अशक्यं वीर्यं वादसामर्थ्यं यस्य स तथा सन्। न हि केनचिन्निवार्यते मध्वोऽखिलदुर्वादिनिराकरणसंरम्भ इत्यर्थः। सुरसिन्धु-प्रवाहसंरम्भप्रवाह इव श्रीमध्व एतादृशः सन् प्रयाणे सुरसिन्धोः गङ्गायाः सन्ततप्रवाह इवातिवेलं अत्यन्तं विबभौ रेज इत्यन्वयः ॥ ५ ॥

मन्दोपकारिणी – सुमन इति ॥ पुनः कथंभूतः ? अत्र मार्गे सुमनःफलशोभिनः सु शोभनं निर्मलं च तत् मनश्च सुमनः सुमनसः फलानि निर्मलमनोजन्यत्वेन मनःफलानि ज्ञानभक्तिवैराग्यादिगुणाः तैः शोभिनः शोभमानान्। उच्चान् उत्तमान् मोक्षयोग्यान् इति भावः। पुंसः पुरुषान् गोभिः स्वकीयवचनैः नमयन् स्वस्मिन् प्रवणीकुर्वन्। कः कानिव गङ्गाप्रवाहः गोभिः जलैः 'भूवाग्वारिषु गौर्मता' इति विश्वः। सुमनःफलशोभिनः सुमनोभिः पुष्पैः फलैश्च शोभमानान् 'मालायां पण्डिते पुष्पे देवे सुमनसोऽभिधा' इति विश्वः। उच्चान् उत्तमान् अनोकहान् वृक्षान् इव नमयन् प्रह्वीभावं प्रापयन् 'अनोकहः कुटस्सालः पलाशी द्रुद्रुमागमाः' इत्यमरः फलपुष्पभराक्रान्तान् वृक्षान् प्रवाहः स्वजलैर्यथा नमयति तद्वदिति भावः। कथंभूतः दृढभावान् दृढः भावः स्वभावः येषां ते तथोक्ताः तान् 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः। अनम्रान् अविनीतान् अपरान् पुंसः

भङ्गमपि पराजयमपि 'भङ्गः खड्गे पराजये' इति रत्नमाला । उपानयन् प्रापयन् दृढभावान् दृढस्वरूपान् अत एव अनम्रान् भङ्गं द्वैधीभावं प्रापयन् प्रवाह इव 'शुष्ककाष्ठानि मूर्खाश्च भज्यन्ते न नमन्ति च' इत्युक्तेः पुनः कथंभूतः अवार्यवीर्यः अवार्यं केनाप्यनिवार्यं वीर्यं दुर्वादिनिराकरणसंरम्भः यस्य स तथोक्तः गङ्गाप्रवाहोऽपि अवार्यवेगः ॥ ५ ॥

गमनोत्सवविस्मितैर्निषेव्यो विविधैर्जानपदैर्जनैरजस्रम् ।
परिसत्वरकीर्तिरार्तिमुक्त्यै पुरुषैर्दूरभवैश्च गम्यमानः ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – गमनेति ॥ अयं परमानन्दसुतीर्थसूरिराजो गमनोत्सवो गमनमेवोत्सवो महस्तेन विस्मितास्तैर्विविधैः जनपदेषु ग्रामेषु भवा जानपदाः तैर्जनैः अजस्रं निषेव्यः सन् । गङ्गाप्रवाहश्च समुद्रं प्रति गमनोत्सवविस्मितैः जानपदैः जनैः निषेव्यः । नानाविधशिष्यसंवृतमेनं गमनसमये द्रष्टुं नानाजनपदाज्ञना आगच्छन्ति इत्यर्थः । परिसत्वरा प्रसरिष्णुः कीर्तिः यस्य स तथा सन् गङ्गाप्रवाहोऽप्येतादृशः । आर्तिमुक्त्यै सांसारिकदुःख-निवृत्यर्थं पुरुषैः दूरा च सा भूः प्रदेशश्च दूरभूस्तस्याः गम्यमानः प्राप्यमानःसन् । गङ्गौघोऽप्येतादृशः, प्रयाणे सुरसिन्धोः सन्ततप्रवाह इव अतिवेलं विबभावित्यर्थः ॥ ६ ॥

मन्दोपकारिणी – पुनः कथंभूतः ? गमनोत्सवविस्मितैः गमनलक्षणे उत्सवे विस्मितैः आश्चर्ययुक्तैः । विविधैः जानपदैः जनपदो देशः 'नीवृज्जनपदौ देशविषयौ' इत्यमरः जनपदे विद्यमानाः जानपदाः तैः जनैः । अजस्रं नित्यं प्रतिदिनमिति यावत् । 'नित्यानवरताजस्रं' इत्यमरः । निषेव्यः सेव्यमानः । पुनः कथंभूतः ? परिसत्वरकीर्तिः परिसत्वरा प्रसरणशीला कीर्तिः यशः यस्य स तथोक्तः । आर्तिमुक्त्यै आर्तेः सांसारिकदुःखस्य मुक्त्यै निवृत्यर्थं दूरभवैश्च दूरदेशे भवन्ति उत्पद्यन्ते इति दूरभवाः तैरपि पुरुषैः गम्यमानः । यथा भागीरथीप्रवाहः उभयतीरगतैः नानादेशस्थैः विस्मयेन गमनोत्सवदर्शिभिः जनैः प्रतिदिनं स्नानपानादिना सेव्यते लोकव्याप्तकीर्तिश्च भूत्वा सर्वदुःखविमोचनार्थं दूरदेशस्थैरपि जनैः प्राप्यते, तद्वदयं मध्वाचार्यः तत्तद्देशगतस्सन् नानाविधशिष्यवृन्देन सह प्रयाणसमये आश्चर्येण गमनोत्सवदर्शिभिः नानाविधतत्तद्देशस्थजनैः प्रतिदिनं अभिगमननमस्कारादिना सेव्यते । तथा च प्रतिदिनं वर्धमानकीर्तिस्सन् दूरदेशोत्पन्नैरपि दर्शननमस्कारादिना सर्वदुःख-विमोचनाय प्रतिदिनं प्राप्यते च इति भावः ॥ ६ ॥

अमरैरमरानुगैर्मुनीन्द्रैरपरेक्षाविषयैश्च सेव्यमानः ।
हरिपादसरोजसङ्गसारो भुवने पावनपावनो निकामम् ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – अमरैरिति ॥ अयं परमानन्दसुतीर्थसूरिराजः । अपरेषां मनुष्यादीनां ईक्षा चाक्षुषज्ञानं तस्या अविषया अगोचराः तैः, अमरैः देवैः अमरानुगैः देवभृत्यैः गन्धर्वादिभिः मुनीन्द्रैश्च सेव्यमानःसन् । सुरसिन्धुप्रवाहोऽप्येवमेव निकाममत्यन्तं हरेः पादः स एव सरोजं पद्मं तस्य सङ्गः तेन सार उत्तमः । अत एव भुवने पावनात् पवित्रात् पावनः पावनपावनोऽत्यन्तं शुद्धःसन् । मार्गे तत्र तत्र गमनेऽपि हरिपादसन्त-तस्मरणात् सदाप्यतिशुद्धः सन् एवेत्यर्थः । एवमेव गङ्गाप्रवाहोऽपि । प्रयाणे सुरसिन्धोः सन्ततप्रवाह इवातिवेलं विबभावित्युत्तरश्लोकेनान्वयः ॥ ७ ॥

मन्दोपकारिणी – अमरैरिति ॥ पुनः कथंभूतः ? अपरेक्षाविषयैः अपरेषां मनुष्याणां ईक्षायाः दृष्टेः अविषयैः अगोचरैः अदृश्यैः इत्यर्थः । अपरोक्षाविषयैरिति पाठेऽपि प्रत्यक्षाविषयैः इत्येवार्थः । अमरैः देवैः अमरानुगैः अमराणां अनुगैः भृत्यैः गन्धर्वैः मुनीन्द्रैश्च निकामं यथेप्सितं 'कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितं' इत्यमरः सेव्यमानः । गङ्गाप्रवाहोऽपि एवमेव हि । पुनः कथंभूतः ? हरिपादसरोजसङ्गसारः हरेः श्रीनारायणस्य पादावेव सरोजे कमले तयोः सङ्गेन संबन्धेन सारः उत्तमः 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इत्यमरः । अत एव भुवने लोके पावनपावनः अत्यन्तं पवित्रः । एवं सुरसिन्धुप्रवाहोऽपि । त्रिविक्रमपादप्रक्षालनोदकत्वात् गङ्गायाः इति ॥ ७ ॥

अयमप्रतिवारणः प्रयाणे परमानन्दसुतीर्थसूरिराजः ।
विबभावतिवेलमच्छरूपः सुरसिन्धोरिव सन्ततप्रवाहः ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – अयमिति ॥ अच्छं निर्दोषं रूपं यस्य स तथा । सुरसिन्धुप्रवाहोऽपि धवलस्वरूपः । प्रयाणं गमनं तस्मिन् । न विद्यते प्रतिवारणं प्रतिद्वन्द्वो यस्य स तथा गमनेऽसदृश इत्यर्थः । सूरीणां विदुषां राजा सूरिराजः परमानन्दतीर्थ एवोत्तमानन्दतीर्थ एव सूरिराजो ज्ञानिश्रेष्ठः । सुरसिन्धोः देवनद्या गङ्गायाः । 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियामि'त्यमरः । सन्ततः सार्वकालिकश्चासौ प्रवाहश्च सन्ततप्रवाहः स इव । अतिक्रान्ता वेला मर्यादा यथा भवति तथाऽतिवेलं अत्यन्त-मित्यर्थः । विबभौ विरेजे ॥ ८ ॥

मन्दोपकारिणी – अयमिति ॥ पुनः कथंभूतः ? अप्रतिवारणः न विद्यते प्रतिवारणः प्रतिरोधकर्ता यस्य स तथोक्तः । प्रवाहोऽपि तादृशः । अच्छरूपः अच्छं निर्मलं रूपं स्वरूपं यस्य स तथा । गङ्गाप्रवाहोऽपि धवलवर्णः अवशिष्टपदानि चतुर्थश्लोके द्रष्टव्यानि ॥ ८ ॥

समयेन गतोऽमहीयसाऽसौ विषयं स्तम्भपदोपसर्जनाख्यम् ।
मदनाधिपतेः सुधाम धाम प्रविवेशाखिललोकवन्दनीयम् ॥ ९ ॥

भावप्रकाशिका – विषयस्य 'कबेनाङ्' इत्यपभ्रष्टभाषा ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – समयेनेति ॥ असौ श्रीमध्वः महीयान् न भवतीत्यमहीयान् ते नामहीयसा अल्पेन इत्यर्थः । समयेन कालेन स्तम्भ इति पदं स्तम्भपदं तदुपसर्जनं अमुख्यम् । उपपदं इति यावत् । यस्याः सा स्तम्भपदोपसर्जना सैवाख्या नाम यस्य स स्तम्भपदोपसर्जनाख्यः तं विषयं जनपदम् । 'कबेनाडित्यपभ्रष्टसंज्ञा । तथा च कबेनाडिति संज्ञायाः स्तम्भपदोपसर्जनत्वं सम्भवति । गतः प्राप्तःसन् सु शोभनं धाम तेजो यस्य तत् सुधाम, मदनाधिपतेः मदनेश्वरनाम्नो देवस्य, अखिललोकाः समस्तजनास्तैर्वन्दनीयं नमस्कार्यं धाम आलयं प्रविवेश । मदनाधिपतिनाम्नो 'मधूरि'त्यपभ्रष्टसंज्ञा ॥ ९ ॥

मन्दोपकारिणी – समयेनेति ॥ असौ मध्वाचार्यः अमहीयसा महीयान् अतिबहुलो न भवतीति अमहीयान् तेन अल्पेनेत्यर्थः । समयेन कालेन 'कालो दिष्टोऽप्यनेहापि' इत्यमरः । स्तम्भपदोपसर्जनाख्यं स्तम्भ इति पदं उपसर्जनं यस्याः सा स्तम्भपदोपसर्जना तादृशी आख्या अभिधानम् यस्य सः स्तम्भपदोपसर्जनाख्यः तम् । विषयं देशं 'विषयः स्यादिन्द्रियार्थे देशे जानपदेऽपि च' इति विश्वः । गतः प्राप्तःसन् । सुधाम शोभनं धाम तेजः यस्य तत् सुधाम मदनाधिपतेः मदनाधिपतिनाम्नः देवस्य धाम आलयं 'धामधिष्ण्ये च तेजसि' इति विश्वः । प्रविवेश प्रविष्टवान् । 'विश प्रवेशने' इति धातोः लिट् परस्मैपदं विवेश विविशतुः विविशुः । कथंभूतं धाम ? अखिललोकवन्दनीयं अखिलाश्च ते लोकाश्च जनाश्च तैः वन्दनीयं नमस्करणीयं 'लोकस्तु भुवने जने' इत्यमरः ॥ ९ ॥

क्षणदामिह तावदूषिवांसं विहिताहर्मुखयोग्ययोगमेनम् ।
गमनोद्यमलक्षणैरजानन् गमनायोद्यतमाशु शिष्यसङ्घाः ॥ १० ॥

भावप्रकाशिका – क्षणदामूषिवांसं 'कालाध्वनोरत्यन्तसंयोग' इति द्वितीया ॥१० ॥

पदार्थदीपिकोद्बोधिका – क्षणदामिति ॥ इह मदनाधिपतिधाम्नि क्षणदां रात्रिं तावदूषिवांसम् । अत्यन्तसंयोगे द्वितीया । अहर्मुखस्य प्रातःकालस्य योग्योऽहर्मुखयोग्यः स चासौ योगः कर्म च अहर्मुखयोग्ययोगः । विहितः कृतोऽहर्मुखयोग्ययोगो येन स तथोक्तः तम् । कृतप्रातःस्नानादिकर्माणं इति यावत् । 'प्रत्यूषोऽहर्मुखं कल्यमि'त्यमरः । एनं श्रीमध्वं शिष्यसङ्घा गमनस्य प्रयाणस्योद्यमः प्रयत्नस्तस्य लक्षणानि चिह्नानि तैराशु गमनं प्रयाणं तस्मादुद्यतं सन्नद्धं व्यजानन् । ज्ञा अवबोधने लङ् ॥ १० ॥

मन्दोपकारिणी – क्षणदामिति ॥ इह मदनाधिपतिदेवालये । क्षणदां रात्रिं 'निशा निशीथिनी रात्रित्रियामा क्षणदा क्षपा' इत्यमरः । तावत् तां रात्रिमेव ऊषिवांसं एकरात्रिमात्रं वासं कृतवन्तं 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमरः । विहिताहर्मुखयोग्ययोगं विहितः अनुष्ठितः अहर्मुखे प्रत्यूषे प्रातःकाले इत्यर्थः । 'प्रत्यूषोऽहर्मुखं कल्यं' इत्यमरः । योग्यः अनुष्ठानं कर्तुं उचितः योगः कर्म येन स तथोक्तः तं कृतप्रातस्नानादिकर्माणं इति यावत् । एनं श्रीमध्वाचार्यं शिष्यसङ्घाः शिष्याणां शिष्यभूतानां यतीनां गृहस्थानां ब्रह्मचारिणां सङ्घाः गणाः 'गणौघसङ्घसङ्घात-व्रातवारकुलोत्कराः' इति हलायुधः । गमनोद्यमलक्षणैः गमने गमनविषये उद्यमस्य उद्योगस्य लक्षणैः चिह्नैः आशु गमनाय शीघ्रेण गन्तुं उद्यतं उद्योगं कुर्वन्तं अजानन् ज्ञातवन्तः । 'ज्ञा अवबोधने' इत्यस्माल्लङ् परस्मैपदं अजानात् अजानीतां अजानन् । एकस्यामेव रात्रौ उषित्वा प्रातःकाले स्नानादिविहितकर्म कृत्वा उद्योगं कुर्वाणं मध्वाचार्यं विलोक्य शीघ्रं गन्तुं उद्योगं करोतीति ज्ञातवन्त इति भावः ॥ १० ॥

पुरतो विसृताः समाधिशुद्धयै यतयस्तत्र पटीः कषायवेषाः ।
सहसोदहरन् स्वयोग्यमुद्रायुतदण्डादिकधारणोद्यमेन ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – पुरत इति ॥ यतयः श्रीमध्वशिष्याः तत्र अमरसदने समाधेर्भगवद्ध्यानस्य शुद्धिश्चित्तविशेषाभावलक्षणसौष्ठवं तस्यै पुरतोऽग्रतो विसृता विस्तृता यवनिकात्वेन कृता इति यावत् । कषायो वेषः स्वरूपं यासां ताः कषायवेषाः पटीः पटान् ।

स्वेषां परमहंसानां योग्याः स्वयोग्याः तादृशा या मुद्राः सुरभिपरश्वादिमुद्राः ताभिर्युता युक्ता ये दण्डादिका दण्डपुस्तककमण्डल्वादयः तेषां धारणं ग्रहणं तस्योद्यमः प्रयत्नः तेन सह, सहसा द्राक् उदहरन्नुद्धृतवन्तः ॥ ११ ॥

मन्दोपकारिणी – पुरत इति ॥ यतयः मध्वशिष्याः संन्यासिनः । तत्र देवालये समाधिशुद्ध्यै समाधौ भगवद्ध्याने 'समाधिर्नियमे ध्याने' इत्यभिधानम् । शुद्ध्यै चित्तविक्षेपाभावलक्षणसौष्ठवाय पुरतः । स्वेषामग्रतः 'स्यात्पुरः पुरतोऽग्रतः' इत्यमरः । विसृताः प्रसारिताः यवनिकत्वेन कृताः इत्यर्थः कषायवेषाः कषायः रक्तः वेषः वर्णः यासां ताः कषायवेषाः 'निर्यासे च कषायोऽथ लोहितः' इति विश्वः पटीः पटान् सहसा द्राक् उदहरन् उद्धृतवन्तः । कथम् ? स्वयोग्यमुद्रायुतदण्डादिकधारणोद्यमेन स्वेषां परमहंसानां योग्याभिः परशुप्रभृतिभिः मुद्राभिः युताः ते च ते दण्डाः यष्टयश्च दण्डा एव आदयो येषां कमण्डलुपुस्तकादीनां ते स्वयोग्यमुद्रायुतदण्डादिकाः तेषां धारणे उद्यमेन प्रयत्नेन सहेति शेषः । यतयः शीघ्रगमनोद्यमं मध्वाचार्यं दृष्ट्वा स्वयमपि दण्डकमण्डलुपुस्तकादिभारोद्धरण-रूपोद्यमं चक्रुरिति भावः । उत्पूर्वात् 'हृञ् हरण' इत्यतो लङ् परस्मैपदम् ॥ ११ ॥

अवधार्य विशेषकारिशङ्खप्रकटाङ्कान् सुधिया गतार्द्रभावान् ।
लसिता तुलसीस्रगस्य कण्ठे हरिनिर्माल्यतयोचिता न्यधायि ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – अवधार्येति ॥ शोभना धीः यस्य स सुधीः तेन केनचित् यतिना । अस्य श्रीमध्वस्य विशेषका वक्षोभुजादिगतास्तिलकाः ते च अरिः चक्रं स च शङ्खश्च तयोर्ये प्रकटाः स्पष्टा अङ्का लाञ्छनानि तान् । 'तिलकं तमालपत्रं चित्रकमुक्तं विशेषकः पुण्ड्रमि'ति हलः । गत आर्द्रभावो येषां ते तथा तान् शुष्कानिति यावत् । अवधार्य ज्ञात्वा । लसिता शोभमाना हरेः निर्माल्यं हरिनिर्माल्यं तस्य भावस्तत्ता तया, उचिता धर्तुं उचिता तुलसीस्रक् तुलस्याः माला अस्य श्रीमध्वस्य कण्ठे गले न्याधायि निहिता ॥ १२ ॥

मन्दोपकारिणी – अवधार्येति ॥ सुधिया शोभना धीः यस्य सः सुधीः तेन केनचिन्मध्वाचार्यशिष्येण । विशेषकारिशङ्खप्रकटाङ्कान् विशेषकाः तिलकाः 'तमालपत्र-

तिलकचित्रकाणि विशेषकाः' इत्यमरः । अरिः चक्रं च शङ्खश्च अरिशङ्खौ 'अरिः पुमांश्चक्रवाके रिपौ चक्रे तु न द्वयोः' इत्यभिधानम् । तयोः प्रकटाः स्फुटाश्च ते अङ्काः चिह्नानि 'अङ्क उत्सङ्गाचिह्नयोः' इत्यमरः । विशेषकाश्च अरिशङ्खप्रकटाङ्काश्चेति तथोक्ताः । तान् वक्षोभुजादिगतान् गोपीचन्दनादिना कृतान् तिलकान् तदुपरि चक्रशङ्खयोः स्वच्छलांछनानि च इत्यर्थः । गतार्द्रभावान् आर्द्राणां भावः धर्मः आर्द्रभावः गतः अपगतः आर्द्रभावः आर्द्रत्वं येभ्यस्ते तथोक्ताः तान् । शुष्कान् इति यावत् । अवधार्य ज्ञात्वा । तिलकानां आर्द्रत्वे मालासम्बन्धेन नाशशङ्कया शुष्कत्वं निश्चित्य इति भावः । लसिता शोभमाना मनोहरा तुलसीस्रक् तुलस्याः स्रक् माला 'माल्यं मालास्रजौ' इत्यमरः । तुलसीकोमलदलनिर्मिता तत्काष्ठमणिनिर्मिता वा माला अस्य श्रीमध्वाचार्यस्य कण्ठे गले 'कण्ठो गलोऽथ ग्रीवायां' इत्यमरः । न्यधायि निहिता । कथंभूता हरिनिर्माल्यतया हरेः निर्माल्यतया समर्पितत्वेन अनुभूतशेषतया उचिता धारयितुं योग्या । 'निपूर्वकाद्धाञ् धातोः कर्मणि लुङात्मनेपदं अधायि अधायिषातां अधायिषत' ॥ १२ ॥

यतधीर्गुरुचक्रिमूर्तिपूर्णं यतनिश्वासवचा विशोध्य पाणी ।
गुणकुण्डलमण्डितं विमानं गुणबद्धं कवचावृतं बभार ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – यतधीरिति ॥ निश्वासश्च वचश्च निश्वासवचसी यते नियमिते निश्वासवचसी येन स तथोक्तः । यतधीः वशीकृतमना यतिः इत्यर्थः । पाणी हस्तौ विशोध्य प्रक्षाल्य चक्राण्यस्य सन्तीति चक्रिण्यस्ताश्च ता मूर्तयश्चक्रिमूर्तयः, गुरूणां श्रीमध्वाचार्याणां चक्रिमूर्तयः ताभिः पूर्णम् । गुणेन तन्तुना कृते कुण्डले गुणकुण्डले ताभ्यां मण्डितं अलङ्कृतम् । गुणबद्धं कवचावृतं कवचेनाच्छादनवस्त्रेणावृतं आच्छादितं विमानं देवपेटीं बभार ॥ १३ ॥

मन्दोपकारिणी – यतधीरिति ॥ यतनिश्वासवचाः निश्वासः श्वासवायुश्च वचः वचनं च निश्वासवचसी यते नियमिते निश्वासवचसी येन स तथोक्तः । मौनवान् इत्यर्थः । यतधीः यताः निगृहीताः धियः इन्द्रियवृत्तयः येन सः यतधीः कश्चिद्यतिः इत्यर्थः । 'ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते' इत्यमरः । पाणी हस्तौ विशोध्य उदकेन प्रक्षाल्य

गुरुचक्रिमूर्तिपूर्णं गुरूणां श्रीमध्वाचार्याणां चक्रिण्यः चक्रवत्यश्च ताः मूर्तयश्च प्रतिमाश्च चक्रिमूर्तयः शालग्रामशिला इत्यर्थः ताभिः पूर्णम् । गुणकुण्डलमण्डितं गुणैः तन्तुभिः वृत्तं च तत् कुण्डलं च गुणकुण्डलं तेन मण्डितं अलङ्कृतम् । गुणबद्धं गुणेन तन्तुना बद्धम् । कवचावृतं कवचाकारवस्त्रेण आच्छादितं विमानं पेटिकाख्यं बभार शिरसि धृतवान् । 'डु भृञ् भरणे इत्यतो लिट् परस्मैपदं बभार बभ्रतुः बभ्रुः' ॥ १३ ॥

सकमण्डलुमण्डलावलम्बं स्वयमेवालघुपुस्तकादिभारम् ।
युवशिष्यगणो दधे नयत्नान्न हि दाक्ष्यस्य समो गुणोऽपरोऽस्ति ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – सकमण्डल्विति ॥ युवानश्च ते शिष्याश्च युवशिष्याः तेषां गणः समूहः । कमण्डलूनां जलपात्राणां मण्डलं समूहः तस्य अवलम्बोऽवलम्बनं तेन सहितः सकमण्डलुमण्डलावलम्बस्तम् । अलघुर्गुरुर्यः पुस्तकादिभारः पुस्तकानि आदीनि येषां तानि तेषां भारस्तम् । स्वयमेवोद्धरणादावन्यापेक्षां विनैव, यत्नाभावो नयत्नः तस्मात् । नैकधेत्यादिवन्नसमासोऽयम् । दधे उवाह । तथा हि दक्षस्य समर्थस्य भावो दाक्ष्यं तस्य समोऽपरोऽन्यो गुणो नास्ति हि । दक्षत्वमेव सर्वगुणेषु प्रधानमिति भावः । हीति प्रसिद्धिं सूचयति । अत्रार्थान्तरन्यासालङ्कारः ॥ १४ ॥

मन्दोपकारिणी – सेति ॥ युवशिष्यगणः यूनां तरुणानां शिष्याणां छात्राणां गणः समूहः । सकमण्डलुमण्डलावलम्बं कमण्डलूनां उदकपात्राणां मण्डलं कदम्बकं 'स्यान्मण्डलं द्वादशराजके च देशे च बिल्वे च कदम्बके च' इति विश्वः । तस्य अवलम्बेन ग्रहणेन सहितम् । अलघुपुस्तकादिभारं पुस्तकमेव आदि यस्य स तथोक्तः पुस्तकादिश्चासौ भारश्च । लघुर्न भवतीति अलघुः गुरुरित्यर्थः, अलघुश्चासौ पुस्तकादिभारश्च तम् । स्वयमेव उद्धरणादौ अन्यापेक्षां विनैव नयत्नात् अनायासात् दधे शिरसि उवाह । 'धाञो लिडात्मनेपदं दधे दधाते दधिरे' । गुरुभूतपदार्थवहनं युक्तमेवेत्याह न हीति । दाक्ष्यस्य दक्षस्य भावो दाक्ष्यं तस्य दक्षत्वस्य समः सदृशः अपरो गुणः नास्ति दक्षत्वमेव सर्वगुणेषु प्रधानं हीति भावः ॥ १४ ॥

अतिसम्भ्रमतः परिभ्रमन्तं भरदामानवलोकिनं चिराय ।
अनुयोगपरं मुहुः प्रमत्तं जहसुर्नूतनशिष्यमत्र केचित् ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ अत्र अस्मिन्काले । केचित् शिष्याः चिराय चिरकाले भरस्य स्वेन नेतव्यस्य पुस्तकादिभारस्य यद्दाम बन्धनपाशः तदनवलोकिनं अपश्यन्तम् । अत एव अतिसम्भ्रमतः परिभ्रमन्तम् । गमनकालात्ययशङ्क्येति भावः । मुहुः पुनः पुनरनुयोगे 'त्वया दृष्टं किमि'ति पुनः पुनः प्रश्ने परः परायणः तं प्रमत्तं विस्मृतनिहितस्थलं नूतनशिष्यं जहसुः ॥ १५ ॥

मन्दोपकारिणी – अतीति ॥ अत्र स्वाधिष्ठितस्थले प्रयाणोद्यमकाले केचित् शिष्याः नूतनशिष्यं नवीनशिष्यं जहसुः हसितवन्तः 'हसे हसने' इत्यतो लिट् परस्मैपदं जहास जहसतुः जहसुः । कथंभूतं चिराय बहुकालं 'चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः' इत्यमरः । भरदामानवलोकिनं भरस्य नेतव्यपुस्तकादिभारस्य 'भरोऽतिशयभारयोः' इत्यमरः । दाम बन्धनपाशः अनवलोकिनं अपश्यन्तं अत एव अतिसम्भ्रमतः उद्वेगात् 'सम्भ्रमः साध्वसेऽपि स्यात्' इति विश्वः । परिभ्रमन्तं इतस्ततः सञ्चरन्तम् । गमनकालात्ययशङ्क्येति भावः । मुहुः पुनःपुनः अनुयोगपरं अनुयोगः प्रश्नः 'प्रश्नोऽनुयोगः पृच्छा च इत्यमरः । तत्र परं आसक्तं ''त्वया दृष्टं किं भरदाम'' इति प्रतिपुरुषं पुनःपुनः पृच्छन्तं इत्यर्थः । प्रमत्तं निहितस्थलस्मृतिरहितम् ॥ १५ ॥

अथ तत्क्षणघट्टितोरुघण्टाघननादव्यपदेशतः परेण ।
अमितप्रमतिः प्रचोदितोऽसाविति निर्यत्सु निजेषु निर्जगाम ॥ १६ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथ असौ अमितप्रमतिः श्रीपूर्णप्रज्ञाचार्यः निजेषु स्वशिष्येषु इति एवं निर्यत्सु निर्गच्छत्सु । स चासौ क्षणश्च तत्क्षणः तस्मिन् निर्गमनसमय इत्यर्थः । घट्टिता ताडिता या उरुघण्टा तस्या यो घननादः स एव व्यपदेशो व्याजः तस्मादिति ततः । परेण मदनाधिपतिना देवेन प्रचोदितः सन् निर्जगाम । निर्गच्छतो घण्टानाद एव शोभनं निमित्तं अभूदिति भावः ॥ १६ ॥

मन्दोपकारिणी – अथेति ॥ असौ अमितप्रमतिः अमिता पूर्णा प्रमतिः प्रज्ञा यस्य स तथोक्तः श्रीपूर्णप्रज्ञाचार्यः । निजेषु स्वकीयेषु शिष्येषु । इति पूर्वोक्तप्रकारेण स्वस्वभारं ऊढ्वा निर्यत्सु देवालयान्निर्गच्छत्सु सत्सु । अथ अनन्तरं निर्जगाम निर्गतवान् । कथंभूतः

तत्क्षणघट्टितोरुघण्टाघननादव्यपदेशतः स चासौ क्षणश्च तत्क्षणः तस्मिन्निर्गमनसमये घट्टिता ताडिता केनचित् पुरुषेण सहसा वादिता उरुघण्टा उर्वी स्थूला च सा घण्टा च उरुघण्टा तत्क्षणघट्टिता च सा उरुघण्टा च तत्क्षणघट्टितोरुघण्टा घनः गम्भीरश्चासौ नादः शब्दश्च तत्क्षणघट्टितोरुघण्टायाः घननादः स एव व्यपदेशः व्याजः तस्मात् परेण मदनदेवालयस्थेन परमात्मना 'परोऽरिपरमात्मनोः' इत्यमरः । प्रचोदितः प्रेरितः । निर्गमनसमये देवालयान्तः उपरिभागे बद्धा घण्टा केनचित् पुरुषेण स्वभावतः वादिता तं घण्टानादं श्रुत्वा मध्वः अयं घण्टानाद एव निर्गच्छतः शोभनसमय इति मदनाधिपतिः मां प्रेरयतीति घण्टानादं निमित्तीकृत्य निर्जगामेति भावः ॥ १६ ॥

धृतमातपवारणं वरेण्यं व्रतिराजं तमुपर्युपर्युदारम् ।
उदयन्मिहिरोपरिष्ठपूर्णद्विजराजश्रियमाययावभूताम् ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – धृतमिति ॥ वरेण्यं श्रेष्ठम् । व्रतिनां यतीनां राजा व्रतिराजः तं श्रीमध्वम् । उपर्युपरि उपरिभागे समीपभाग इत्यर्थः । धृतं उदारमुत्तमं आतपवारणं श्वेतच्छत्रम् । अभूतां कुत्राप्यजातां कुत्राप्यदृष्टां इति यावत् । उदयन् उद्यन्यो मिहिरः सूर्यः तस्योपरिष्ठ उपरि वर्तमानो यः पूर्णद्विजराजः पूर्णचन्द्रः तस्य श्रीः कान्तिः तामाययौ प्राप । श्रीमध्वस्योद्यदादित्यवर्णत्वात् तदुपरि ध्रियमाणस्य छत्रस्य पूर्णचन्द्रवच्छ्वेतत्वात् उद्यदादित्योपरिभागस्थपूर्णचन्द्रशोभां लेभ इति अभूतोपमेयम् । व्रतिराजमित्यत्र 'उभसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु द्वितीये'त्यनेन द्वितीया ॥ १७ ॥

मन्दोपकारिणी – धृतमिति ॥ वरेण्यं वरणीयं व्रतिराजं व्रतिनां राजा व्रतिराजः तं श्रीमध्वाचार्यम् । उपर्युपरि शिरसः उपरिष्टात् समीपे । 'उपर्यध्यधसः सामीप्ये' इति सूत्रेण द्विरुक्तिः । धृतं केनचित् शिष्येण । उदारं महत् अत्युत्तममिति यावत् आतपवारणं आतपं सूर्यप्रभां वारयति निवारयतीति आतपवारणं 'प्रकाशो द्योत आतपः' इत्यमरः । छत्रपर्यायातपत्रशब्दार्थकथनं इदम् । आतपात् त्रायते इति हि तच्छब्दार्थः छत्रमित्यर्थः । अभूतां कुत्रापि कदापि अदृष्टाम् । उदयन्मिहिरोपरिष्ठपूर्णद्विजराजश्रियं उदयत् उदयं प्राप्नुवांश्चासौ मिहिरः सूर्यश्च 'मिहिरारुणपूषणः' इत्यमरः । तस्य उपरि तिष्ठतीति उपरिष्ठः पूर्णः षोडशकलापूर्णश्चासौ द्विजराजः चन्द्रश्च 'द्विजराजश्शशधरः' इत्यमरः । उपरिष्ठश्चासौ

पूर्णद्विजराजश्च तस्य श्रीः शोभा ताम् । 'श्रीर्वेषरचना शोभा' इत्यमरः । आययौ प्राप । 'या प्रापणे इत्यतो लिट् परस्मैपदम् । अयं भावः - मध्वाचार्यस्य सुवर्णप्रभात्वात् उद्यदादित्यसाम्यं मध्वोपरि धृतच्छत्रस्य शुभ्रत्वात् पूर्णिमाचन्द्रसाम्यम् । यदि उद्यदादित्यस्य लोहितमण्डलोपरिष्टात् सम्पूर्णधवलं वर्तुलं चन्द्रमण्डलं भवेत् तर्हि सुवर्णवर्णमध्वाचार्य-मस्तकोपरि धृतस्य धवलवर्तुलच्छत्रस्योपमा सम्भवेत् । न चेष्टापत्तिः । लोहितोदितसूर्योपरि श्वेतपूर्णचन्द्रमण्डलस्य कदापि अभूतत्वात् अत एव अभूतोपमा इयमिति ॥ १७ ॥

भुवनत्रयधारिणं मुकुन्दं दधदन्तस्स दधे गुरुः स्वयं च ।
अपि केनचिदित्यदो न चित्रं ननु स प्राणपतिर्बभार तं च ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – भुवनेति ॥ भुवनत्रयं लोकत्रयं बिभर्ति । तच्छील इति भुवनत्रयभारी तम् । 'भुवनत्रयधारिणमि'ति क्वचित्पाठः । मुकुन्दं अन्तः स्वहृदये दधत् स गुरुः श्रीमध्वः स्वयञ्च केनचित् केनापि पुरुषेण दधे अंसाभ्यां धृतः । इत्यत इत्येतत् चित्रं आश्चर्यं न भवति । कुत इत्यत आह– प्राणपतिः इति । स प्राणपतिः मुख्यप्राणस्तञ्च वाहकपुरुषञ्च चशब्दात् आत्मानमपि स्वयमेवान्तर्यामी भूत्वा बभार ननु । अतो न चित्रमिति भावः ॥ १८ ॥

मन्दोपकारिणी – भुवनेति ॥ केनचिदपि केनापि पुरुषेण । भुवनत्रयधारिणं भुवनानां त्रयं धरतीति भुवनत्रयधारी तम् । मुकुन्दं श्रीनारायणं अन्तः स्वहृदये 'अन्तर्मध्ये तथा प्रान्ते' इति विश्वः । दधत् वहन् । स गुरुः मध्वाचार्यः स्वयं दधे धृतः इति अदः एतत् चित्रं आश्चर्यं न । कुतः ? स प्राणपतिः प्राणानां इन्द्रियाणां पतिः स्वामी मुख्यप्राणः । तं च स्वात्मवाहकमपि पुरुषं स्वयमेव अन्तर्गतस्सन् बभार उवाह । ननु निश्चयः । हरिः जगत्त्रयं बिभर्ति तादृशं विश्वंभरं मध्वः हृदये सर्वदा स्मरतीति हेतोः हृदयेन भगवद्धारकः तं च वाहकः पुरुषोऽल्पबलः धत्ते इत्येतत् विचित्रतया प्रतीयते । दुर्बलस्य बहुधारणायोगात् । तथापि इदं न चित्रम् । प्राणपतिः मध्वः अन्तर्यामिरूपेण स्ववाहकमपि स्वयमेव बिभर्तीति हेतोरिति भावः । 'धाञ् धारणपोषणयोः' लिडात्मनेपदं दधे दधाते दधिरे । 'भृञ् भरणे इत्यतो लिट् परस्मैपदं बभार बभ्रतुः बभ्रुः ॥ १८ ॥

यतयो गृहिणोऽथ वर्णिमुख्याः श्रुतिगास्त्यक्तनिषिद्धकाम्यभावाः ।
इह मूर्तिधरा इव स्वधर्माः शतसङ्ख्याश्शतसङ्ख्यमन्वगच्छन् ॥ १९ ॥

भावप्रकाशिका – निषिद्धकाम्यभावो निषिद्धकाम्यकर्मणोरभिप्रायो निषिद्धत्वं काम्यत्वं च ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – यतय इति ॥ श्रुतिं वेदं गच्छन्ति इति श्रुतिगाः । वेदगतत्वं नाम वेदपाठादिनिरतत्वं वेदोक्ताचारनिष्ठत्वञ्च । स्वधर्माश्च श्रुतिगा वेदसिद्धाः । काम्ये कर्मणि भावः काम्यभावः काम्यकर्मविषयं मन इति यावत् । निषिद्धश्चासौ काम्यभावश्च त्यक्तो निषिद्धकाम्यभावो यैस्तैः त्यक्तनिषिद्धकाम्यभावाः केवलनिवृत्तविषया इत्यर्थः । 'तस्मान्नेष्टियायजूकः स्या'दित्यादिना काम्यकर्मणो निषिद्धत्वात् । त्यक्तनिषिद्धकाम्यकर्माण इत्यर्थः । धर्माश्च तादृशाः । शतं सङ्ख्या येषां ते शतसङ्ख्या यतयः । शतसङ्ख्या गृहिणो गृहस्थाः । अथ वर्णिमुख्या ब्रह्मचारिषु श्रेष्ठाः । 'ब्रह्माचारी भवेद्वर्णी'ति हलः । मूर्तिं शरीरं धारयन्तीति मूर्तिधराः । स्वधर्मा इव स्वस्ववर्णाश्रमधर्मा इव इह गमनसमये शतं सङ्ख्या ज्ञानं यस्य स तथा तं श्रीपूर्णप्रज्ञाचार्यं अन्वगच्छन् ॥ १९ ॥

मन्दोपकारिणी – यतय इति ॥ इह गमनसमये शतसंख्याः शतं संख्या येषां ते शतसंख्याः शतशब्दो बहुशब्दपर्यायः बहुसंख्याका इत्यर्थः । यतयः संन्यासिनः तथा गृहिणः गृहस्थाः अथ वर्णिमुख्याः वर्णिनां ब्रह्मचारिणां मुख्याः श्रेष्ठाः 'वर्णिनो ब्रह्मचारिणः' इत्यमरः । शतसंख्यं शतं बहु संख्या ज्ञानं यस्य स तथोक्तः तं श्रीपूर्णप्रज्ञाचार्यम् । 'संख्यावान् पण्डितः कविः' इत्यमरः । 'चर्चा संख्या विचारणा' इत्यमरः । अन्वगच्छन् सहययुः । 'गम्लृ गतौ' इत्यतो लङ् परस्मैपदम् । के इव मूर्तिधराः धरन्तीति धराः मूर्तेः शरीरस्य धराः मूर्तिधराः । स्वधर्मा इव स्वस्ववर्णाश्रमधर्मा इव पुण्यानीव वा 'धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः' इत्यमरः । कथंभूताः- श्रुतिगाः श्रुतिषु वेदेषु यागादिषु गाः गताः रताः । वेदानां पाठं व्याख्यानं च कुर्वन्त इत्यर्थः । स्वधर्मा अपि श्रुतिगाः वेदेषु गताः विहिताः । पुनः कथंभूताः त्यक्तनिषिद्धकाम्यभावाः काम्याश्च ते भावाः कर्माणि च काम्यभावाः निषिद्धाश्च ते काम्यभावाश्च निषिद्धकाम्यभावाः त्यक्ताः वर्जिताः निषिद्धकाम्यभावाः यैस्ते तथोक्ताः । निषिद्धाश्च काम्याश्च निषिद्धकाम्याः

ते च ते भावाश्च अन्यत् पूर्ववत् इति वा । 'भावस्सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः । 'तस्मात् नेष्टियाजकः स्यात्' इत्यादिना काम्यकर्मणः निषिद्धत्वात् त्यक्त-निषिद्धकाम्यकर्माण इत्यर्थः । धर्माश्च त्यक्तः वर्जितः निषिद्धः काम्यः भावो विषयः येषां ते तथोक्ताः प्रवृत्तिविषयकाः न भवन्तीत्यर्थः । किन्तु केवलं निवृत्तिविषया इति भावः॥१९॥

परिवारजना न मार्गदुःखं प्रययुः पूरुषरत्नमीक्षमाणाः ।
इति नाद्भुतमस्य हि प्रयान्ति स्मृतिमात्राद्भविनो भवापवर्गम् ॥ २० ॥

पदार्थदीपिकोद्बोधिका – परिवारेति ॥ पूरुषेषु रत्नं पूरुषरत्नं पुरुषश्रेष्ठमित्यर्थः । 'रत्नं स्वजातिश्रेष्ठेऽपी'त्यमरः । श्रीमध्वमीक्षमाणाः सन्तः परिवाराश्च ते जनाश्च परिवारजनाः शिष्यजना मार्गस्य दुःखं मार्गदुःखम् । मार्गगमननिमित्तकश्रमं इत्यर्थः । न प्रययुः । इत्यद्भुतमाश्चर्यं न । कुत इत्यत आह— **भविन इति** । भवः संसार एषामस्तीति भविनः संसारिणः । अस्य स्मृतिमात्रात् स्मरणमात्राद्भवात्संसारादपवर्गो मोक्षस्तं प्रयान्ति हि । एतादृशमाहात्म्यवतः सङ्गेन श्रमो नाभूज्जनानां इत्येतन्नाद्भुतं इति भावः ॥ २० ॥

मन्दोपकारिणी – परिवारेति ॥ परिवारजनाः गच्छता मध्वाचार्येण सह तस्य समंततः गच्छन्तः परिवारभूताः जनाः । पूरुषरत्नं पुरुषश्रेष्ठं 'रत्नं श्रेष्ठे मणावपि' इति विश्वः ईक्षमाणाः सन्तः पश्यन्तस्सन्तः मार्गदुःखं मार्गगमनजन्यक्लेशं न प्रययुः न प्राप्नुवन्तः इति एतत् अद्भुतं आश्चर्यं न । कुतः हि यस्मात् भविनः भवः संसारः एषां अस्तीति भविनः 'भवस्संसारसम्प्राप्तिश्रेयस्संकरजन्मसु' इति विश्वः । अस्य श्रीमध्वाचार्यस्य स्मृतिमात्रात् स्मरणादेव भवापवर्गं भवात् संसारात् अपवर्गं मोक्षं प्रयान्ति लभन्ते । 'मोक्षोऽपवर्गः' इत्यमरः यस्य स्मरणमात्रेण सर्वदुःखरूपसंसारनाशो भवति तद्दर्शने सति तदेकदेशमार्गदुःखपरिहारो भवतीति नाश्चर्यम् । स्मरणापेक्षया दर्शनस्य अधिकसाधनत्वात् इति भावः ॥ २० ॥

मदनेश्वरवल्लभप्रदेशे प्रभुमायान्तमथाभ्यपद्यत द्राक् ।
जयसिंह इमं नृसिंहवर्यः शुभधीः स्तम्भविशिष्टसिंहनामा ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – मदनेति ॥ अथ शुभधीः शोभनचित्तः स्तम्भेन स्तम्भपदेन विशिष्टं सहितं स्तम्भविशिष्टं तादृशं सिंहनाम यस्य स तथोक्तः । स्तम्भपदसिंहनामवान् इत्यर्थः । तौलवभाषायां 'कबेसिंहनामे'त्यर्थः । 'कबे' इति तौलवभाषायां स्तम्भविशेष उच्यते । जयसिंहः तन्नामकः एवं नामद्वयविशिष्टो नृसिंहवर्यो नृसिंहेषु राजसु वर्यः श्रेष्ठः । मदनेश्वरवल्लभो मदनेश्वरप्रियो यः प्रदेशः तस्मिन् आयान्तं प्रभुमिमं श्रीमध्वं द्राक् अभ्यपद्यत ॥ २१ ॥

मन्दोपकारिणी – इदानीं जयसिंहराजस्य मध्वाचार्यदर्शनप्रकारमाह ॥ **मदनेत्यादिना** ॥ अथ एवं गमनारम्भे सति । शुभधीः शुभा धीः यस्य स तथोक्तः । स्तम्भविशिष्टसिंहनामा स्तम्भेन स्तम्भपदेन विशिष्टं युक्तं सिंह इति नाम संज्ञा यस्य स तथोक्तः स्तम्भसिंह इति नामाङ्कितवानित्यर्थः जयसिंहः जयसिंहाख्यः नृसिंहवर्यः नृणां मनुष्याणां सिंहाः श्रेष्ठाः राजानः नृसिंहाः तेषु वर्यः उत्तमः राजश्रेष्ठः मदनेश्वरवल्लभप्रदेशे मदनस्य मदननामकदेवालयस्य ईश्वरस्य स्वामिनः नारायणस्य वल्लभे प्रिये प्रदेशे स्थलविशेषे आयान्तं प्रभुं स्वामिनं इमं श्रीमध्वाचार्यं द्राक् शीघ्रं अभ्यपद्यत अभिमुखतः अगमत् 'अभिपूर्वकपद गताविन्यतः लङात्मनेपदं अपद्यत अपद्येतां अपद्यन्त' ॥ २१ ॥

अवतीर्य पुरैव वाहनात्स्वादपि मार्गादपसार्य सैनिकान् सः ।
सह कैश्चन भूसुरैरवाप्तस्त्रिजगत्पूज्यपदान्तिके ननाम ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – अवतीर्येति ॥ पुरैव श्रीमध्वसमीपगमनात् पूर्वमेव स्वात् स्वकीयाद्वाहनाद्गजादेरवतीर्य सैनिकानपि सेनायां भवान् जनानपि मार्गात् अध्वनोऽपसार्य कैश्चन भूसुरैर्विप्रैः सह साकं अवाप्तः स राजा त्रिजगत्पूज्यस्य श्रीमध्वस्य पदान्तिके पादसन्निधौ ननाम ॥ २२ ॥

मन्दोपकारिणी – अवतीर्येति ॥ सः जयसिंहराजः । पुरैव श्रीमध्वाचार्यागमनात्प्रागेव स्वात् स्वकीयात् 'आत्मीये स्वोऽस्त्रियां धने' इत्यमरः । वाहनात् यानात् अवतीर्य अवरुह्य सैनिकानपि सैन्यानपि । 'सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते' इत्यमरः मार्गादपसार्य निस्सारयित्वा कैश्चन कतिभिः भूसुरैः ब्राह्मणैः सह अवाप्तः प्राप्तस्सन् । त्रिजगत्पूज्यपदान्तिके त्रीणि च तानि जगन्ति च त्रिजगत्सु पूज्यः श्रीमध्वाचार्यः त्रिजगत्पूज्यस्य

पदयोः चरणयोः अन्तिके समीपे । 'पदं व्याजाङ्घ्रितद्भेद' इति भास्करः । ननाम प्रणतवान् । 'उपकण्ठान्तिकाभ्यर्णः' इत्यमरः । 'णमु प्रह्वत्वे शब्दे च' इत्यतो लिट् परस्मैपदं ननाम नेमतुः नेमुः ॥ २२ ॥

पृथिवीपतिनाऽनुगम्यमानो विनयाद्भक्तिरसार्द्रमानसेन ।
अचिरेण स विष्णुमङ्गलस्य प्रययावायतनोत्तमस्य पार्श्वम् ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – पृथिवीति ॥ भक्तिरेव रसस्तेनार्द्रं क्लिन्नं पूर्णमिति यावत् । तादृशं मानसं मनो यस्य स तथोक्तः तेन । पृथिवीपतिना जयसिंहेन विनयात् प्रश्रयादनुगम्यमानः स श्रीमध्वः । चिरं न भवतीत्यचिरेण शीघ्रेण विष्णुमङ्गलं तन्नामकं तस्य आयतनोत्तमस्य देवालयश्रेष्ठस्य पार्श्वमन्तिकं प्रययौ प्राप ॥ २३ ॥

मन्दोपकारिणी – पृथिवीपतिनेति ॥ भक्तिरसार्द्रमानसेन भक्तिरेव रसः जलम् । 'गुणे रागे द्रवे रसः' इत्यमरः । तेन आर्द्रं क्लिन्नं मानसं मनः यस्य स तथोक्तः तेन पृथिवीपतिना पृथिव्याः भूमेः पतिना स्वामिना जयसिंहराजेन । विनयात् प्रावण्यात् अनुगम्यमानः अनु पश्चाद्भागे व्रज्यमानः । 'पश्चात्सादृश्ययोरनु' इत्यमरः । सः श्रीमध्वाचार्यः अचिरेण शीघ्रं विष्णुमङ्गलस्य तन्नामकस्य आयतनोत्तमस्य आयतनेषु देवालयेषु उत्तमस्य श्रेष्ठस्य पार्श्वं अन्तिकं प्रययौ अवाप ॥ २३ ॥

नरदेवदिदृक्षया समेता उभयग्रामजना जनाः परे च ।
उपयान्तमनन्तमानसं तं मुहुरैक्षन्त कुतूहलाब्धिमग्नाः ॥ २४ ॥

भावप्रकाशिका – 'वाटः समुवाय' इति ग्रामद्वयम् ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – नरदेवेति ॥ नरदेवदिदृक्षया जयसिंहाख्यनृपतिदर्शनेच्छया समेता मिलिता उभयश्च तौ ग्रामौ च तयोर्जनाः तौलवभाषया 'पाडिकुडे' इत्यपभ्रष्टसंज्ञक-ग्रामीणजना इत्यर्थः । (वाटः समुवाय' नामक ग्रामद्वयमिति भावप्रकाशिकायाम्) उभयशब्दस्य द्विवचनाभावादेकवचनबहुवचनान्तं रूपम् । परेऽन्ये जनाश्चोपयान्तमुप-गच्छन्तम् । अनन्तं मानसं ज्ञानं यस्य स तथा तं श्रीपूर्णप्रज्ञम् । कुतूहलमेवाब्धिः तस्मिन् मग्नाः सन्तः कुतूहलपूर्णाः सन्तो मुहुः पुनः पुनरैक्षन्त ॥ २४ ॥

मन्दोपकारिणी – इदानीं काव्यनायकं श्रीमध्वाचार्यनामकं श्रीपादराजं पादादिमौलि-पर्यन्तं वर्णयितुमुपक्रमते **नरदेवेत्यादिभिर्द्वादशश्लोकैः** ॥ नरदेवदिदृक्षया नरदेवस्य जयसिंहराजस्य दिदृक्षया द्रष्टुमिच्छया समेताः मिलिताः उभयग्रामजनाः उभयश्चासौ ग्रामश्च उभयग्रामः उभयग्रामस्य जनाः विष्णुमङ्गलाख्यदेवालयपार्श्वस्थग्रामद्वयजना इति भावः । तथा परे अन्ये 'पर इतरान्यपरममुख्येषु' इत्यभिधानम् । ग्रामान्तरस्थाः जनाश्च उपयान्तं गच्छन्तं अनन्तमानसं पूर्णप्रज्ञाचार्यं तं मुहुः पुनःपुनः ऐक्षन्त अपश्यन् । 'ईक्ष दर्शनाङ्कनयोरिति धातोः लङात्मने पदम् । कथंभूताः जनाः कुतूहलाब्धिमग्नाः कुतूहलस्य कौतुकस्य अब्धौ समुद्रे मग्नाः आसक्ताः । कुतूहलं नाम पुनः पुनर्दर्शनीय इति अपूर्वदर्शनजन्यसुखविशेषं अनुभवन्तः इत्यर्थः ॥ २४ ॥

पुरतो मधुरस्वरैर्वदद्भिः स्वकृताः कर्णसुखा मुकुन्दगाथाः ।
धृतपङ्कजबीजचक्रचिह्नैः कृतनृत्यैश्चतुरैर्निषेव्यमाणम् ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – पुनः पुनः कथंभूतमैक्षन्त इत्यपेक्षायामाह—

पुरत इत्यादिना ॥ आदिकुलकमेतत् । उभयग्रामजनाः परे जनाश्च पुरतोऽग्रतः स्वकृताः स्वेन रचिताः कर्णयोः सुधा याभ्यास्ताः कर्णसुधाः मुकुन्दस्य गाथाः । मुकुन्दविषयगाथा इत्यर्थः ताः वदद्भिर्मधुरो मनोहरः स्वनो ध्वनिर्येषां तैः । कृतं नृत्तं यैस्तैः पङ्कजबीजानि चक्रचिह्नानि च धृतानि पङ्कजबीजचक्रचिह्नानि यैस्तैः । बाह्वोश्चक्रचिह्नानि, कण्ठे कमलमणिमालाश्च धृतवद्भिः इत्यर्थः । चतुरैः सर्वकार्येषु विदग्धैः पुरुषैर्निषेव्यमाणं श्रीमध्वं मुहुः ऐक्षन्तेति पूर्वेणान्वयः ॥ २५ ॥

मन्दोपकारिणी – पुरत इति ॥ आदिकुलकमेत् । पुनः कथंभूतं पुरतः अग्रतः स्वकृताः स्वैः कृताः विरचिताः कर्णसुखाः कर्णयोः श्रोत्रयोः सुखं हर्षः याभ्यः ताः कर्णसुखाः मुकुन्दगाथाः मुकुन्दस्य गाथाः गुणकीर्तनरूपप्रबन्धविशेषान् वदद्भिः पठद्भिः मधुरस्वरैः मधुराः प्रियाः श्राव्याः स्वराः ध्वनयः येषां ते तथोक्ताः तैः 'मधुरं रसवत्स्वादुप्रियेषु' इति विश्वः । कृतनृत्यैः कृतानि नृत्यानि नर्तनानि यैस्ते तथोक्ताः तैः 'तांडवं नटनं नाट्यं लास्यं नृत्यं च नर्तनं' इत्यमरः । धृतपङ्कजबीजचक्रचिह्नैः पङ्कजानां

पद्मानां बीजानि च चक्रस्य चिह्नानि लक्षणानि च धृतानि पङ्कजबीजचक्रचिह्नानि यैः ते तथोक्ताः तैः । बाह्वोः चक्रशङ्खलांछनानि धृत्वा कण्ठे कमलाक्षमालां धृतवद्भिः इति भावः चतुरैः विदग्धैः पुरुषैः निषेव्यमाणं सेव्यमानम् ॥ २५ ॥

कलिताञ्जलिना स्फुटानुयान्तं जनसम्बाधसहेन भूमिभर्त्रा ।
करुणाविषयं चिकीर्षुणा स्वं व्रजता किङ्करतामकैतवेन ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – कलितेति ॥ पूर्वोक्तजनाः कलितो बद्धोऽञ्जलिरञ्जलिपुटं येन स तथोक्तः तेन । जनसंबाधो जनसंमर्दस्तं सहत इति तथोक्तः तेन जनसंमर्दसहिष्णुनेत्यर्थः । स्वमात्मानं करुणाविषयं सेवया श्रीमध्वकृपाविषयं चिकीर्षुणा कैतवस्याभावोऽकैतवं तेन निर्व्याजेनेति यावत् । किङ्करतां श्रीमध्वसेवकतां व्रजता भूमिभर्त्रा राज्ञा जयसिंहेन स्फुटं स्पष्टं यथा भवति तथाऽनुयातः स्फुटानुयातस्तं श्रीमध्वं मुहुः ऐक्षन्तेति पूर्वेणान्वयः ॥ २६ ॥

मन्दोपकारिणी – कलितेति ॥ पुनः कथंभूतं कलिताञ्जलिना कलितः बद्धः अञ्जलिः हस्तसम्पुटः येन सः तथोक्तः तेन । 'अञ्जलिस्तु पुमान् हस्तसम्पुटः' इति विश्वः जनसम्बाधसहेन जनानां सम्बाधं सङ्कटं सहते क्षमते इति जनसम्बाधसहः तेन । 'सङ्कटं ना तु सम्बाधः' इत्यमरः । जनसंमर्दसहिष्णुना । स्वं स्वात्मानं करुणाविषयं करुणायाः विषयं गोचरम् । चिकीर्षुणा कर्तुमिच्छता । सेवया स्वात्मानं तत्कृपापात्रं कर्तुकामेन इत्यर्थः । अकैतवेन कपटाभावेन निर्व्याजं यथा स्यात्तथा । 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः किङ्करतां श्रीमध्वाचार्यस्य निरुपाधिककिङ्करतां व्रजता प्राप्नुवता भूमिभर्त्रा भूमेः भर्त्रा स्वामिना । 'भर्त्रेन्द्र इनईशिता' इति धनञ्जयः । जयसिंहेन स्फुटानुयान्तं स्फुटं सर्वसमक्षं अनुयान्तं पादचारिणा अनुगम्यमानम् ॥ २६ ॥

इदमित्थमितीक्षणैर्नराणामपरिच्छेद्यमहिष्ठधामरूपम् ।
अधिकं धरणीमलञ्चिकीर्षुं स्फुटमुद्यन्तमिव द्युनाथमन्यम् ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – इदमिति ॥ पूर्वोक्तजना नराणामीक्षणानि नयनानि तैरिदं दृश्यमानं स्वरूपमित्थमेवंभूतं इत्यपरिच्छेद्यं अनिर्धार्यं महिष्ठधाम बहुलतेजो यस्य

तदपरिच्छेद्यमहिष्ठधाम तादृशं रूपं यस्य स तथोक्तः तम् । धरणीं भुवं अधिकमलंचिकीर्षुं अलङ्करणेच्छावन्तम् । एवंभूतत्वात् स्फुटं सम्यगुद्यन्तमन्यं द्वितीयं द्युनाथं इव सूर्यमिव मुहुः ऐक्षन्तेत्यन्वयः ॥ २७ ॥

मन्दोपकारिणी – इदमिति ॥ पुनः कथंभूतं नराणां मनुष्याणां ईक्षणैः चक्षुर्भिः 'ईक्षणं चक्षुरक्षिणी' इत्यमरः । इदं दृश्यमानं रूपं इत्थं एवंभूतं इति अपरिच्छेद्यमहिष्ठधामरूपं अपरिच्छेद्यं परिच्छेत्तुं ईदृशमेवेति निर्धारयितुं अशक्यं महिष्ठं अतिबहुलं धाम तेजः रूपं स्वरूपं यस्य सः तथोक्तः तं धरणीं धरित्रीं अधिकं यथा भवति तथा अलञ्चिकीर्षुं अलङ्कर्तुकामम् । कमिव नराणां ईक्षणैः इदमित्थमेवेति अपरिच्छेद्य-महिष्ठधामरूपं अधिकं धरणीं अलञ्चिकीर्षुं स्फुटं स्पष्टं उद्यन्तं उदयं प्राप्नुवन्तं अन्यं द्युनाथमिव सूर्यमिव । यथा भुवं अलङ्कर्तुकामः उदयं प्राप्नुवन् सूर्यः अतिबहुलतेजःपुञ्जत्वेन चक्षुषी विवृत्य अविच्छेदेन द्रष्टुमशक्यत्वेन पुनः पुनर्वीक्षणे अभिनवत्वेन दृश्यमानस्सन् एतादृशाकार एवेति निर्धारयितुं अशक्यः तद्वत् भूमिमलङ्कर्तुमेव प्रादुर्भूतः श्रीमध्वाचार्योऽपि महातेजोराशित्वेन चक्षुषा सम्यक् ईदृशाकार एवेति परिच्छेत्तुमशक्य इति भावः । अनेन अतितेजःपुञ्जत्वं उक्तं भवति ॥ २७ ॥

अशनैः शनकैरिवाव्रजन्तं युवसिंहप्रवरप्रगल्भयानम् ।
अतिपाटलपादपल्लवाभ्यामवनिं पावनतामलं नयन्तम् ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – अशनैरिति ॥ पूर्वोक्तजना शनैर्न भवतीति अशनैः शीघ्रं इत्यर्थः । आव्रजन्तमपि शनकैराव्रजन्तमिव, युवा चासौ सिंहप्रवरश्च युवसिंहप्रवरः तद्वत्प्रगल्भं श्रेष्ठं यानं गमनं यस्य स तथा तम् । अतिपाटलौ अतिरक्तौ यौ पादौ तावेव पल्लवौ किसलयौ ताभ्यामवनिं भुवमलं सम्यक् पावनतां नयन्तं श्रीमध्वं मुहुः ऐक्षन्तेत्यन्वयः ॥ २८ ॥

मन्दोपकारिणी – ॥ अशनैरिति ॥ पुनः कथंभूतं अशनैः शीघ्रेण शनकैरिव मन्दमिव आव्रजन्तं आगच्छमानम् । शीघ्रेणैव गच्छता तेन सह गन्तॄणां मार्गश्रमाभावादिति भावः । युवसिंहप्रवरप्रगल्भयानं सिंहानां श्रेष्ठः सिंहप्रवरः युवा तरुणश्चासौ सिंहप्रवरश्च

'वयस्यस्तरुणो युवा' इत्यमरः । युवसिंहप्रवरवत् प्रगल्भं प्रौढं यानं गमनं यस्य सः तथोक्तः तम् । तरुणसिंहवत् गच्छन्तं इत्यर्थः । 'यानं गतौ वाहने च' इति विश्वः । अतिपाटलपादपल्लवाभ्यां अति अत्यन्तं पाटलौ रक्तवर्णौ च तौ पादौ चरणौ च । 'श्वेतरक्तस्तु पाटलः' इत्यमरः । अतिपाटलपादावेव पल्लवौ किसलयौ ताभ्याम् । 'पल्लवोऽस्त्री किसलयं' इत्यमरः । अवनिं भूमिं अलं सम्यक् पावनतां पवित्रतां नयन्तं प्रापयन्तम् । अनेन पादतलद्वयं वर्णितं भवति । तत्र लौहित्यलक्षणसौन्दर्यपवित्रीकरणत्व-रूपयोः गुणयोः उक्तत्वात् ॥ २८ ॥

नखनिर्जितपद्मरागरागं वरकूर्मप्रपदं निगूढगुल्फम् ।
सुरवर्यकराग्रसेव्यजङ्घं द्विरदोदारकरोपमोरुयुग्मम् ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – नखेति ॥ पूर्वोक्तजना नखनिर्जितः स्वपादनखैर्निर्जितः पद्मरागरागः पद्मरागमणीनां लौहित्यं येन स तथा तम् । निगूढौ गुल्फौ पादग्रन्थी यस्य स तथा तम् । 'पादाग्रं प्रपदं पादः पदंघ्रिश्चरणोऽस्त्रियाम् । तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । सुरवर्याणां देवश्रेष्ठानां कराग्राणि करतलानि तैः सेव्ये जङ्घे यस्य स तथा तम् । वरश्चासौ कूर्मश्च वरकूर्म उत्तमकूर्मः तद्वत्प्रपदं पादाग्रं यस्य स तथा तम् । द्वौ रदौ दन्तौ यस्य स द्विरदो गजः तस्योदारकर उत्तमहस्तस्तस्योपमा ययोस्तौ तादृशौ यावूरू तयोर्युग्मं युगलं यस्य स तथा तं मुहुः ऐक्षन्तेत्यन्वयः ॥ २९ ॥

मन्दोपकारिणी – नखेति ॥ पुनः कथंभूतं नखनिर्जितपद्मरागरागं नखैः चरणनखैः निर्जितः तिरस्कृतः पद्मरागस्य शोणरत्नस्य । 'शोणरत्नं लोहितकः पद्मरागः' इत्यमरः । रागः लौहित्यं येन सः तथोक्तः तम् । पद्मरागकान्त्यपेक्षया अधिकरक्तकान्तियुक्त-पादनखोपेतमित्यर्थः । 'रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु' इति विश्वः । वरकूर्मप्रपदं वरः श्रेष्ठः कूर्मः कमठः । 'कूर्मे कमठकच्छपौ' इत्यमरः वरकूर्मवत् प्रपदे पादाग्रे यस्य सः तथोक्तः तम् । कूर्माकारसदृशपादाग्रोपेतं इत्यर्थः । 'पादाग्रं प्रपदं' इत्यमरः । निगूढगुल्फं निगूढौ पिण्डीभूतौ गुल्फौ पादग्रन्थी यस्य सः तथा तम् । 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः जङ्घाधःपिण्डाकारौ पादग्रन्थी गुल्फौ इत्युच्येते । सुरवर्यकराग्रसेव्यजङ्घं सुरवर्याणां रुद्रादिदेवश्रेष्ठानां कराग्रैः करतलैः सेव्ये संवाह्ये जङ्घे जान्वोरधोभागौ यस्य सः

तथा तम् । 'जङ्घा तु प्रसृता जानुः' इत्यमरः द्विरदोदारकरोपमोरुयुग्मं द्विरदः गजः । 'द्विरदोऽनेकपो द्विपः' इत्यमरः । द्विरदस्य उदारः महान् करः शुण्डादण्डः । 'करो वर्षोपले पाणौ शुण्डा' इत्यभिधानं स एव उपमा दृष्टान्तः ययोस्तौ द्विरदोदारकरोपमौ तौ च तौ ऊरु सक्थिनी च । 'सक्थि क्लीबे पुमानूरुः' इत्यमरः । ऊर्वोः युग्मं युगलं यस्य सः तथा तम् । गजशुण्डाकारोरुद्वयोपेतम् ॥ २९ ॥

शुभशुद्धनितम्बबिम्बराजन्नवकौशेयविशेषबाह्यवस्त्रम् ।
तनुकुक्षिगलालिकेषु रेखात्रितयेन प्रकटेन शोभमानम् ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – शुभेति ॥ पूर्वोक्तजनाः शुभः शोभनो यः शुद्धनितम्बो निर्मलनितम्बप्रदेशः तस्य बिम्बं मण्डलं तस्मिन् राजमानः शोभमानो यो नवकौशेयविशेषः नवं नूतनं यत् कौशेयं तस्य विशेषस्तद्रूपं बाह्यवस्त्रं बाह्यवासो यस्य स तथा तम् । तनुश्चासौ कुक्षिश्च तनुकुक्षिः तनूदरं स च गलः कण्ठः स च अलिकं ललाटं तच्च तेषु । प्रकटेन स्पष्टेन रेखात्रितयेन रेखात्रयेण शोभमानं श्रीमध्वं मुहुः ऐक्षन्तेत्यन्वयः ॥ ३० ॥

मन्दोपकारिणी – शुभेति ॥ पुनः कथंभूतं शुभशुद्धनितम्बबिम्बराजन्नवकौशेय-विशेषबाह्यवस्त्रं शुभं शोभमानं च तत् शुद्धं निर्मलं च तत् नितम्बबिम्बं कटिमण्डलं च शुभशुद्धनितम्बबिम्बं तस्मिन् राजत् विराजमानं नवं नूतनं कौशेयविशेषः क्रिमिकोश-निर्मितवस्त्रविशेषः 'कौशेयं क्रिमिकोशोत्थं' इत्यभिधानं पट्टवस्त्रमिति यावत् बाह्यं कौपीनाद्बहिः उपरि धीयमानं बाह्यं च तत् वस्त्रं कौशेयविशेषश्चासौ बाह्यवस्त्रं तथा च शुभशुद्धनितम्बबिम्बराजन्नवकौशेयविशेषात्मकं बाह्यवस्त्रं परिधानाख्यं अधोवस्त्रं यस्य सः तथोक्तः तम् । अन्तः गुह्यमात्राच्छादकं कटिसूत्रे पूर्वतः पृष्ठतश्च सम्बद्धं कौपीनाख्यवस्त्रं परिहितमस्ति । तद्बहिः नितम्बबिम्बे परितः कौशेयवस्त्रं संवीतं अस्तीति भावः । अनेन यतिभिः अन्तः कौपीने धृतेऽपि तदुपरि नितम्बबिम्बाच्छादकं वस्त्रमपि परिधातव्यं इत्युक्तं भवति । तनुकुक्षिगलालिकेषु तनुः अल्पपरिमाणः 'तनुः काये कृशेऽल्पेऽपि' इति विश्वः कुक्षिः उदरः 'पिचण्डकुक्षी जठरोदरं' इत्यमरः गलः कण्ठः अलिकं ललाटं 'ललाटमलिकं गोधिः' इत्यमरः तनुश्चासौ कुक्षिश्च तनुकुक्षिः तनुकुक्षिश्च गलश्च अलिकं च तनुकुक्षिगलालिकानि तेषु । प्रकटेन स्पष्टं दृश्यमानेन रेखात्रितयेन त्रयेण शोभमानं उदरकण्ठललाटानि प्रत्येकं तिर्यग्रेखात्रयोपेतानीति भावः ॥ ३० ॥

मृदुसूक्ष्मघनारुणाविकाच्छप्रकटप्रावरणेन भासमानम् ।
अतिनूतनतिग्मभानुभासां निकरेणेव सुवर्णसानुमन्तम् ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – मृद्विति ॥ पूर्वोक्तजना मृदु च तत् सूक्ष्मं लघु च घनं निबिडं तत् च अरुणं रक्तं तच्चाविकमूर्णात्मकं तच्चाच्छं निर्मलं प्रकटं शोभमानं यत्प्रावरणं आच्छादनवस्त्रं तेन । प्रवरप्रावरणेनेति क्वचित्पाठः अतिनूतनः सद्य एवोद्यन् यस्तिग्मभानुः सूर्यः तस्य भासः किरणाः तासां निकरः समूहः तेन भासमाननम् । सुवर्णमयानि च तानि सानूनि शृङ्गाणि च सुवर्णशृङ्गानि तान्यस्य सन्तीति तथोक्तः तं इव महामेरुपर्वतमिवेत्यर्थः । उद्यद्दिनकरस्यातिरोहितरश्मिनिकरेण भासमानं मेरुमिव इति भावः । भासमानं श्रीमध्वं मुहुः ऐक्षन्तेति पूर्वेणान्वयः ॥ ३१ ॥

मन्दोपकारिणी – मृद्विति ॥ पुनः कथंभूतं मृदुसूक्ष्मघनारुणाविकाच्छप्रकटप्रावरणेन मृदुना कोमलेन सूक्ष्मेण सूक्ष्मतन्तुनिर्मितेन घनेन अविरलतन्तुमता अरुणेन आरक्तेन आविः मेषः 'मेढ्रोरभ्रोरणोर्णायुर्मेषवृष्णय एडके' इत्यमरः आविनः लोम्ना निर्मितं आविकं तेन आविकेन ऊर्णात्मकेन अच्छेन निर्मलेन प्रकटेन शोभमानेन प्रावरणेन शरीराच्छादकवस्त्रेण कटौ संवीतं वस्त्रं 'अन्तरीयोपसंख्यानपरिधानान्यधोऽशुके' इत्यमराभिधानात् परिधानादिशब्दवाच्यं हिमानिलादिनिवारणार्थं देहे प्रावृतं वस्त्रं प्रावरणशब्दवाच्यं 'नीशारः स्यात् प्रावरणे हिमानिलनिवारणे' इत्यमरः मृदु च तत् सूक्ष्मं च तत् घनं च तत् अरुणं च तत् आविकं च तत् अच्छं च तत् प्रकटं च तत् प्रावरणं चेति विग्रहः तेन भासमानम् । कमिव अतिनूतनतिग्मभानुभासां तिग्माः तीक्ष्णाः भानवः किरणाः यस्य सः तथोक्तः 'भानुः किरणसूर्ययोः' इति विश्वः अतिनूतनः सद्य एवोदितश्चासौः तिग्मभानुः सूर्यश्च तस्य भासां दीप्तीनां 'भाश्छविद्युतिदीप्तयः' इत्यमरः निकरेण समूहेन भासमानं दीप्यमानम् । सुवर्णसानुमन्तं सुवर्णाः सुवर्णात्मकाः सानवः शृङ्गाणि यस्य सः तथोक्तः तम् । मेरुपर्वतमिव यथा सौवर्णमेरुपर्वतः उद्यदादित्यकान्त्या शोभते तद्वत् परिहितपीताम्बरः सुवर्णवर्णः अयं मध्वाचार्यः रक्तवर्णेन प्रावृतेन ऊर्णवस्त्रेण व्यराजत इति भावः ॥ ३१ ॥

पृथुवक्षसमुन्नतांसभित्तिं गुरुवृत्तायतहृद्यबाहुदण्डम् ।
परमारुणपाणिपल्लवान्तःस्फुरितोर्ध्वध्वजलाञ्छनादिमन्तम् ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – पृथ्विति ॥ पूर्वोक्तजना पृथु विशालं वक्षो यस्य तम् । अंसावेव भित्ती अंसभित्ती । उन्नतेंऽसभित्ती यस्य स तथा तम् । गुरू स्थूलौ वृत्तायतहृद्यबाहुदण्डौ वर्तुलदीर्घमनोहरभुजदण्डौ यस्य स तथा तम् । परमारुणपाणि-पल्लवान्तः परमारुणावतिलौहितौ यौ पाणिपल्लवौ पाणी पल्लवाविव तयोरन्तरन्तर्भागे हस्ततलयोरिति यावत् । अन्तः इत्यव्ययम् । स्फुरितानि विलसन्ति च तान्यूर्ध्वध्व-जलाञ्छनादीनि च ऊर्ध्वध्वजरेखारूपं लाञ्छनं तदादि येषां चक्रादिचिह्नानां तानि अस्य सन्तीति स्फुरितोर्ध्वध्वजलाञ्छनादिमान् तं श्रीमध्वं ऐक्षन्तेत्यन्वयः ॥ ३२ ॥

मन्दोपकारिणी – पृथ्विति ॥ पुनः कीदृशं पृथुवक्षसं पृथु विशालं वक्षः उरः यस्य सः तथोक्तः तम् । उन्नतांसभित्तिं अंसौ स्कन्धावेव भित्ती कुड्ये अंसभित्ती 'भित्तिः स्त्री कुड्यं' इत्यमरः 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इत्यमरः उन्नते उच्चे अंसभित्ती यस्य सः तथोक्तः तम् । गुरुवृत्तायतहृद्यबाहुदण्डं गुरू स्थूलौ वृत्तौ वर्तुलौ आयतौ दीर्घौ हृद्यौ सुन्दरौ बाहू भुजौ तावेव दण्डौ यस्य सः तथोक्तः तम् । परमारुणपाणि-पल्लवान्तःस्फुरितोर्ध्वध्वजलाञ्छनादिमन्तम् पाणी हस्ततले एव पल्लवौ किसलये परमं अत्यन्तं अरुणौ लोहितौ च तौ पाणिपल्लवौ च तयोः अन्तः मध्ये स्फुरितानि विलसन्ति ऊर्ध्वं ऊर्ध्वरेखा ऊर्ध्वं च तत् ध्वजलाञ्छनं च ध्वजाख्यचिह्नं च ऊर्ध्वध्वजलाञ्छनं तदेव आदि येषां तानि चक्रादिचिह्नानीत्यर्थः ऊर्ध्वध्वजलाञ्छनादीनि अस्य सन्तीति ध्वजलाञ्छनादिमान् तं पाणितलयोः या ऊर्ध्वरेखा सैव ध्वजरेखेत्युच्यते ध्वजचक्रादि-रेखोपेतपाणितलद्वयमन्तं इत्यर्थः ॥ ३२ ॥

परिपूर्णशशाङ्कबिम्बशङ्काविषयं प्राक् सहसाऽवलोकनेन ।
अकलङ्कतया परं विविक्तं वदनं बिभ्रतमच्छविभ्रमाब्धिम् ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – परीति ॥ पूर्वोक्तजनाः प्राक् प्रथमं सहसाऽवलोकनं दर्शनं तेन परिपूर्णं यच्छशाङ्कबिम्बं चन्द्रमण्डलं तदीया या शङ्का तस्या विषयः तम् परं पश्चात्, न विद्यते कलङ्को लाञ्छनं यस्य तत्तथा तस्य भावस्तत्ता तया विविक्तं चन्द्रमण्डलात्पृथक्कृतं, अच्छो निर्मलो यो विभ्रमः कान्तिः तेनाब्धिरिव अब्धिः तम् ।

निर्मलकान्तिपरिपूर्णं इत्यर्थः । वदनं बिभ्रतम् । अयं भावः सहसा श्रीमध्वमुखं पश्यतां पुंसां कान्त्याधिक्योपलम्भादिदं चन्द्रमण्डलमिति प्रतीतिः जायते । पश्चात् विवेकपूर्वकं दर्शने सति तत्र कलङ्कमपश्यतां तेषां नेदं चन्द्रमण्डलं सत्यपि कान्त्याधिक्ये कलङ्काभावात् । तस्मात् अकलङ्कमेतद्वदनं सकलङ्काच्चन्द्रमण्डलात्पृथगेवेति बुद्धिर्जायते । एवं अविवेकदशायां चन्द्रमण्डलत्वशङ्काविषयं, विवेकदशायां चन्द्रमण्डलादन्यत्वबुद्धिविषयं वदनं बिभ्रतमिति । तं श्रीमध्वं मुहुः ऐक्षन्तेत्यन्वयः ॥ ३३ ॥

मन्दोपकारिणी – ॥ **परिपूर्णेति** ॥ पुनः कथंभूतं प्राक् प्रथमं सहसा अतर्कितं 'अतर्किते तु सहसा' इत्यमरः । अवलोकनेन दर्शनेन परिपूर्णशशाङ्कबिम्बशङ्काविषयं परिपूर्णस्य षोडशकलाभिपूर्णस्य शशाङ्कबिम्बस्य चन्द्रमण्डलस्य 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः शङ्काप्रतीतिः भ्रान्तिरिति यावत् तस्याः विषयम् । परं पश्चात् अकलङ्कतया कलङ्कः दोषः 'कलङ्कोऽङ्कापवादयोः' इत्यमरः न विद्यते कलङ्कः दोषो यस्य सः अकलङ्कः तस्य भावः अकलङ्कता तया इत्यर्थः कलङ्करहितत्वेन हेतुना । विविक्तं चन्द्रमण्डलात् पृथक्कृतं अच्छविभ्रमाब्धिं अच्छस्य निर्मलस्य विभ्रमस्य कान्तेः अब्धिः समुद्रः तं 'विभ्रमः संशये भ्रान्तौ शोभायां च' इति वैजयन्ती इह भ्रान्तेः अकारणं एतादृशं वदनं मुखं बिभ्रतं दधतम् । अयं भावः - सहसा श्रीमध्वाचार्यमुखं पश्यतां पुंसां कान्त्याधिक्योपलम्भात् इदं चन्द्रमण्डलमिति प्रतीतिः जायते, पश्चात् विवेकपूर्वं दर्शने सति तत्र कलङ्कमपश्यतां इति बुद्धिरभूत् अविवेकदशायां चन्द्रमण्डलत्वशङ्काविषयं, विवेकदशायां तु चन्द्रमण्डलादन्यदिति बुद्धिविषयं वदनं बिभर्तीति । चन्द्रबिम्बापेक्षया अतिसुन्दरवदनोपेतमिति भावः ॥ ३३ ॥

अतिसुन्दरमन्दहासराजन्नवकुन्दाभरदं शुभारुणोष्ठम् ।
कमलायतलोचनावलोकैरपि लोकान् सकलान् प्रहर्षयन्तम् ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ पूर्वोक्तजना अतिसुन्दरो यो मन्दहासः तेन राजन्तो नवकुन्दाभरदा नवानि नूतनानि यानि कुन्दानि कुन्दकुसुममुकुलानि तेषामाभेवाभा कान्तिर्येषां ते तथा । तादृशा ये रदा दन्तास्ते यस्य स तथोक्तः तम् । शुभावरुणोष्ठौ यस्य स तथा तम् । कमलवदायते विशाले लोचने ताभ्यां अवलोका दर्शनानि तैः सकलान् लोकान् प्रहर्षयन्तं सन्तोषयन्तं श्रीमध्वं मुहुः ऐक्षन्तेत्यन्वयषः ॥ ३४ ॥

मन्दोपकारिणी – अतीति ॥ पुनः कथंभूतं अतिसुन्दरमन्दहासराजन्नवकुन्दाभरदं अतिसुन्दरेण मन्दहासेन सुस्मितेन राजन्तः शोभमानाः नवानि प्रत्यग्राणि सद्य उत्पन्नानीति यावत् । कुन्दानि कुन्दकुसुममुकुलानि नवकुन्दानां आभाः सदृशाः नवकुन्दाभाश्च ते रदाः दन्ताश्च 'रदना दशना दन्ता रदाः' इत्यमरः अतिसुन्दरमन्द-हासराजन्तः नवकुन्दाभरदाः यस्य सः तथोक्तः तं मन्दं हसन्तं शुद्धकुन्दकुड्मलाकार-दन्तयुक्तमित्यर्थः । शुभारुणोष्ठं शुभौ सुन्दरौ अरुणौ लोहितौ ओष्ठौ रदनच्छदौ यस्य सः तथोक्तः तं 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः । कमलायतलोचनावलोकैः कमलवत् कमलपत्रवत् आयतयोः विशालयोः लोचनयोः अवलोकैः दर्शनैः 'दर्शनालोकनेक्षणम्' इत्यमरः । सकलान् लोकान् जनान् प्रहर्षयन्तं सन्तोषयन्तम् ॥३४॥

अतिभासुरकर्णभासितश्रीतुलसीगुच्छमतुच्छकान्तिगण्डम् ।
भुवनत्रयभूत्यभूतिदाने चतुरभ्रूवरविभ्रमं सुमौलिम् ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – अतिभासुरेति ॥ पूर्वोक्तजना अतिभासुरावतिसुन्दरौ यौ कर्णौ तयोर्भासितो विराजितः श्रीतुलसीगुच्छः श्रीतुलसीस्तबको यस्य स तथा तम् । 'स्तबको गुच्छको गुच्छो गुलिच्छः परिकीर्तित' इति हलः । अतुच्छा पूर्णा कान्तिर्ययोस्तौ तथोक्तौ तादृशौ गण्डौ यस्य स तथा तम् । भुवनत्रयं लोकत्रयं तस्य ये भूत्यभूती सृष्टिप्रलयौ तयोर्दानं प्रदानं तस्मिन् चतुरः समर्थो भ्रूवरविभ्रमो भ्रुवोः श्रेष्ठविलासो यस्य स तथा तम् । सु शोभनो मौलिर्मस्तकं यस्य स तथा तं श्रीमध्वं मुहुः ऐक्षन्तेत्यन्वयः ॥३५॥

मन्दोपकारिणी – अतीति ॥ पुनः कथंभूतं अतिभासुरकर्णभासितश्रीतुलसीगुच्छं अतिभासुरयोः कर्णयोः सुन्दरयोः श्रोत्रयोः भासितः राजमानः श्रीतुलस्याः गुच्छः स्तबकः यस्य सः तथोक्तः तं 'स्याद्गुच्छकस्तु स्तबकः' इत्यमरः । अतुच्छकान्तिगण्डं तुच्छा अल्पा न भवतीत्यतुच्छा सम्पूर्णा कान्तिः ययोस्तौ अतुच्छकान्ती गण्डौ कपोलौ यस्य सः तथोक्तः तं 'अधस्ताच्चिबुकं गण्डौ कपोलौ' इत्यमरः । भुवनत्रयभूत्यभूतिदाने भुवनानां लोकानां त्रयस्य भूतिः उत्पत्तिः अभूतिः भूतिभिन्नं स्थितिप्रलयादिकं यद्वा भुवनत्रयस्य सज्जनासज्जनरूपस्य भूतिः सुखाद्यैश्वर्यं अभूतिः दुःखाद्यरिष्टं 'विभूतिर्भूतिरैश्वर्यं' इत्यमरः

तयोः भूत्यभूत्योः दाने । चतुरभ्रूवरविभ्रमं चतुरः दक्षः समर्थ इति यावत् भ्रूवरयोः विभ्रमः विलासः यस्य स तथोक्तः तम् । भ्रुवौ नाम चक्षुषोरूर्ध्वभागे विद्यमानावयवौ ज्ञेयौ 'ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियां' इत्यमरः । सुमौलिं शोभनः मौलिः मस्तको यस्य स तथोक्तः तम् । एतादृशं मध्वाचार्यं ऐक्षन्त इति पूर्वेणान्वयः ॥ ३५ ॥

सकलावयवान् स्फुटं मिमानाः प्रतिमालक्षणदर्शनाय लक्ष्यम् ।
चतुरा विदधुर्यदीयगात्रं स सुलक्ष्मेत्यधुना निगद्यते नो ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – सकलेति ॥ चतुराः पुरुषलक्षणविचारविदग्धाः पुरुषाः सकलावयन् श्रीमध्वस्य हस्तपादादिसर्वावयवान् स्फुटं सम्यक् मिमाना मानीकुर्वन्तः सन्तः । यस्य सम्बन्धि यदीयं तच्च तद्गात्रञ्च यदीयगात्रम् । श्रीमध्वदेहम् । प्रतिमालक्षणानि शिलादिप्रतिमालक्षणानि तेषां लक्षणं ज्ञानं तस्मै लक्ष्यं निदर्शनं विदधुः । पुरुषलक्षण-विचारविदग्धाः पुरुषा श्रीमध्वस्य सकलावयवान् मिमानाः सन्तः तदवयेषु लक्षणशास्त्रसंवादं दृष्ट्वा एतदङ्गोपाङ्गवदेव सर्वप्रतिमाङ्गोपाङ्गानि भवेयुः इति निश्चितवन्त इति भावः । स श्रीमध्वः सु शोभनं लक्ष्म लक्षणं यस्य स सुलक्ष्मा । शोभनलक्षणोपेत इत्यर्थः । इत्यधुना अद्य नो निगद्यते मया विशिष्य न वर्ण्यत इति कविवचनम् ॥ ३६ ॥

मन्दोपकारिणी – सकलेति ॥ चतुराः पुरुषलक्षणविदग्धाः पुरुषाः । सकलावयवान् सर्वावयवान् श्रीमध्वाचार्यस्य हस्तपादाङ्गुल्याद्यङ्गानि 'अङ्गं प्रतीकोऽवयवः' इत्यमरः । स्फुटं मिमानाः प्रमाणीकुर्वन्तस्सन्तः यदीयगात्रं यस्य इदं यदीयं यदीयं च तत् गात्रं शरीरं च यदीयस्य मध्वस्य गात्रम् । प्रतिमालक्षणदर्शनाय प्रतिमानां शिलादिप्रतिमानां लक्षणं तत्तदवयवोचितस्थूलत्वदैर्घ्यादिपरिमाणं तस्य दर्शनाय ज्ञानाय लक्ष्यं निदर्शनं विदधुः कृतवन्तः । पुरुषलक्षणविचारचतुराः पुरुषाः यस्य मध्वस्य हस्तपादादिशरीरावयवान् प्रमाणीकुर्वन्तस्सन्तः तदवयवेषु लक्षणशास्त्रसंवादं दृष्ट्वा एतदङ्गोपाङ्गवदेव सर्वप्रतिमाङ्गो-पाङ्गानि भवेयुः इति निश्चितवन्त इति भावः । सः एवंभूतः मध्वाचार्यः अधुना इदानीं एतज्जन्मन्येव सुलक्ष्मेति शोभनानि लक्ष्माणि लक्षणानि यस्य स तथोक्तः उत्तमपुरुषलक्षणवानिति अस्माभिः नो निगद्यते नोच्यते किन्तु अयं सर्वदा सुलक्षण एवेति

सम्मत इति भावः । अनेन इमानि मध्वाचार्याणां शरीरलक्षणानि स्वाभाविकानीति श्रुत्यादिसम्मतानि इत्युक्तं भवति । निपूर्वकात् गद व्यक्तायां वाचि इति धातोः कर्मणि लडात्मनेपदं निगद्यते निगद्येते निगद्यन्ते ॥ ३६ ॥

अतिलोलदृशां समीक्षितुं स्वं जनसम्बाधभयेन दूरभाजाम् ।
समदर्शयदूर्ध्वमोरसोऽसौ दययैवोरुजनौघमध्यगोऽपि ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ असौ श्रीमध्वः । उरुजना बहुलजनाः तेषामोघः समूहस्तस्य यन्मध्यं तद्गच्छतीति तथोक्तस्तथापि स्वमात्मानं समीक्षितुं द्रष्टुं अतिलोला अत्यन्तलोलुपा दृशो दृष्टयो येषां ते तथा तेषाम् । तथापि जनसम्बन्धो जनसंमर्दः तस्माद्भयेन दूरं दूरप्रदेशं भजन्तीति दूरभाजः तेषां जनानां दययैव, आ उरसः उरस्थलमारभ्योर्ध्वमूर्ध्वभागं समदर्शयत् । स्वयमुरुजनौघमध्यगोऽपि पूर्वमानादुच्चो भूत्वा आत्मानमुरस्थलादारभ्योर्ध्वभागं सर्वेभ्यो दर्शयमास इत्यर्थः ॥ ३७ ॥

मन्दोपकारिणी – अतीति ॥ असौ मध्वाचार्यः । उरुजनौघमध्यगोऽपि उरुश्चासौ जनश्च उरुजनः उरुजनस्य ओघः समूहः 'ओघः प्रवाहो निवहः' इति विश्वः तस्य मध्ये गच्छति तिष्ठतीति उरुजनमध्यगोऽपि । मध्वदर्शनाय बहुलोकानां मिलितत्वात् बहुजन-मध्यस्थं स्वं स्वात्मानं समीक्षितुं द्रष्टुं अतिलोलदृशां अतिलोलाः अत्यन्ततृष्णावत्यः दृशः नेत्राणि येषां ते तथोक्ताः तेषां बहुजनमध्यस्थं मध्वं कदा नु पश्यामः इत्युत्कण्ठावतां इति भावः । 'लोलश्चञ्चलतृष्णयोः' इति भास्करः तथा जनसम्बाधभयेन जनस्य सम्बाधः सम्मर्दः पीडा इति यावत् । तस्य भयेन स्वेषां जनपीडा स्यादिति शङ्कया दूरभाजां दूरदेशं भजन्तीति दूरभाजः तेषां दूरवर्तिनां जनानां दययैव कृपयैव 'कृपा दयाऽनुकम्पा स्यात्' इत्यमरः । उरसः वक्षस्थलात् 'उरो वत्सं च वक्षश्च' इत्यमरः आ आरभ्य इत्यौरसः ऊर्ध्वं ऊर्ध्वभागं समदर्शयत् वक्षस्थलादूर्ध्वभागं सर्वेभ्यो दर्शयामास इति भावः ॥ ३७ ॥

सविकासदृशां कृताञ्जलीनां जनतानां परमादरान्नतानाम् ।
वलयेन वृतः प्रियं मुरारेः प्रविवेशायतनं प्रबर्हबोधः ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – सविकासेति ॥ विकासेन सहिताः सविकासाः तादृशा दृशो यासां ताः तथा तासाम् । स्वमुखारविन्ददर्शनेन सविकासनयनानां इत्यर्थः । कृता अञ्जलयो हस्तमुकुलीभावा याभिः ताः तथा तासाम् । परमादरः परमभक्तिः तेन आनता नम्राः तासां जनतानां जनसमूहानां वलयं मण्डलं तेन वृतो युक्तः । प्रबर्हः श्रेष्ठः बोधो ज्ञानं यस्य स तथा श्रीमध्वो मुरारेः श्रीविष्णुमङ्गलाधिवासिनो हरेः प्रियं आयतनं देवालयं श्रीविष्णुमङ्गलाख्यं देवगृहं प्रविवेश ॥ ३८ ॥

मन्दोपकारिणी – सविकासेति ॥ सविकासदृशां विकासेन सहिताः सविकासाः फुल्लाः दृशः चक्षूंषि येषां ते सविकाशदृशः तेषाम् । मध्वाचार्यमुखारविन्ददर्शनेन प्रसन्ननयनानाम् । कृताञ्जलीनां कृतः अञ्जलिः करसम्पुटः यैस्ते तथोक्ताः तेषाम् । परमादरात् अतिभक्त्या नतानां नम्रीभूतानां जनतानां जनसमुदायानाम् । जनानां समूहो जनता इति व्युत्पत्तिः । वलयेन मण्डलेन वृतः परिवृतः । प्रबर्हबोधः प्रबर्हः श्रेष्ठः बोधो ज्ञानं यस्य स तथोक्तः 'मुख्यवर्यवरेण्याश्च प्रबर्होऽनवरार्ध्यवत्' इत्यमरः । श्रीपूर्णप्रज्ञाचार्यः मुरारेः मुरनामकासुरस्य अरेः शत्रोः श्रीविष्णुमङ्गलाधिवासिनः हरेः प्रियं आयतनं देवालयं प्रविवेश प्रविष्टवान् । 'विश प्रवेशने' इति धातोर्लिट् परस्मैपदम् ॥ ३८ ॥

विविधप्रभुमध्यसन्निषण्णो नरदेवेन समं स गूढदेवः ।
विबभावुडुराडिवोडुमध्ये सह मह्यास्तनयेन पूर्णबिम्बः ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – विविधेति ॥ नरदेवेन जयसिंहभूपेन समं साकं विविधा ये प्रभवः खण्डाधिपतयः तेषां मध्यं तस्मिन् सन्निषण्ण उपविष्टः स गूढः मानुषरूपेण गूढश्चासौ देवश्च गूढदेवः श्रीमुख्यवायुदेवः । पूर्णः बिम्बो मण्डलं यस्य स तथा । उडूनां नक्षत्राणां राट् राजोडुराट् चन्द्रः । 'नक्षत्रमृक्षं भं तारा तारकाप्युडवा स्त्रियामि'त्यमरः । मह्या भुवः तनयेन पुत्रेण अङ्गारकेन सह । 'अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुत' इत्यमरः । उडुमध्यं नक्षत्रमध्यं तस्मिन्निव विभभौ विशेषेण शुशुभे । यद्वा गूढदेवः मह्याः तनयेन सह उडुमध्ये पूर्णबिम्ब उडुराडिव विबभाविति । अत्रोपमालङ्कारः ॥ ३९ ॥

मन्दोपकारिणी – विविधेति ॥ नरदेवेन जयसिंहराजेन समं सह 'साकं सत्रा समं सहं' इत्यमरः । विविधप्रभुमध्यसन्निषण्णः विविधाः अनेकदेशस्थाः प्रभवः परिवृढाः

देशपतयः इति यावत् । 'प्रभुः परिवृढोऽधिपः' इत्यमरः । तेषां मध्ये सन्निषण्णः उपविष्टः गूढदेवः गूढः मानुषवेषेण आच्छादितः देवः मुख्यवायुदेवांशभूतः । सः श्रीमध्वाचार्यः विबभौ विशेषेण शुशुभे । क इव पूर्णबिम्बः पूर्णं बिम्बं मण्डलं यस्य स तथोक्तः । उडुराट् उडूनां नक्षत्राणां 'नक्षत्रमृक्षं भं तारा तारकाप्युडुवा स्त्रियां' इत्यमरः । राट् राजा चन्द्रः । मह्याः भूम्याः तनयेन पुत्रेण अङ्गारकेण 'अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः' इत्यमरः उडुमध्ये इव उडूनां नक्षत्राणां मध्ये इव इति । विबभौ विपूर्वकात् 'भा दिप्तौ' इति धातोः लिट् परस्मैपदं बभौ बभतुः बभुः ॥ ३९ ॥

अवदत्स कथां रथाङ्गपाणेर्भगवान् भागवते भवापहन्त्रीम् ।
अनुरूपगुणस्वरादिभाजा निजशिष्यप्रवरेण वाच्यमाने ॥ ४० ॥

भावप्रकाशिका – निजशिष्यप्रवरेण हृषीकेशतीर्थेन ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – अवददिति ॥ भगोऽस्यास्तीति भगवान् षड्गुणैश्वर्यवान् स श्रीमध्वो अनुकूलाः पुराणार्थवक्तृश्रीमध्वाचार्यानुकूला गुणा गाम्भीर्यश्राव्यत्वादिगुणा येषां तेऽनुकूलगुणाः तादृशा ये स्वरादयः स्वराकृत्यादयः तान् भजतीत्यनुकूलगुणस्वरादिभाक् तेन । गाम्भीर्यश्राव्यत्वादिगुणाकृत्यादिभाजेत्यर्थः । निजशिष्याः स्वकीयशिष्याः तेषु प्रवरः श्रेष्ठः तेन हृषीकेशतीर्थेन भागवतं भागवतपुराणं तस्मिन् वाच्यमाने सति । भवापहन्त्रीं संसारनाशिनीं रथाङ्गं चक्रं पाणौ यस्य स तथा तस्य श्रीकृष्णस्य कथामवदत् ॥ ४० ॥

मन्दोपकारिणी – अवददिति ॥ भगवान् 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसोः भगः अस्यास्तीति भगवान् अव्याहतैश्वर्यादिषड्गुणवान् सः श्रीमध्वः । अनुरूपगुणस्वरादिभाजा अनुरूपः अनुकूलः गुणः श्राव्यत्वादिः यस्य सः अनुरूपगुणः स चासौ स्वरः ध्वनिश्च अनुरूपगुणस्वरः स एव आदिः यस्य तत् आदिशब्देन वाचकत्वशक्तिर्गाह्या अनुरूप-गुणस्वरादि भजतीति भाक् तेन । सर्वेषां श्राव्यस्वरवता सम्यक् वाचकत्वशक्तिमता गाम्भीर्यादिगुणवता च इत्यर्थः । निजशिष्यप्रवरेण निजेन स्वकीयेन शिष्यश्रेष्ठेन हृषीकेशतीर्थेन । भागवते भागवताख्यपुराणे वाच्यमाने सति । भवापहन्त्रीं भवस्य संसारस्य अपहन्त्रीं नाशिनीम् । रथाङ्गपाणेः रथाङ्गं चक्रं पाणौ यस्य सः तस्य श्रीकृष्णस्य कथां चरित्रं अवदत् श्रीकृष्णचरितापादकभागवतव्याख्यानं अकरोत् इत्यर्थः ॥ ४० ॥

कथनं तदुदारधैर्यसारं मधुरं पुष्कलभाववत् प्रसन्नम् ।
विदुषोऽविदुषोऽत्र श्रुण्वतोऽलं व्यधितानन्दरसाम्बुधौ निमग्नान् ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – कथनमिति ॥ उदारधैर्यमुत्तमधैर्यं तस्य सारं सारभूतम् । उदारधैर्यस्य सारो यस्मिन् तदिति वा । मधुरं श्रोतृजनमनोहरं पुष्कलः सम्पूर्णो भावोऽभिप्रायः सोऽस्यास्तीति तथोक्तं प्रसन्नं शब्दतोऽर्थतश्चाकठोरं कथनं पुराणकथनं शृण्वतः श्रवणं कुर्वतो विदुषः पण्डितानविदुषोऽपण्डितानपि आनन्द एव रसो यस्मिन् स तथा स चासावम्बुधिश्च तस्मिन् निमग्नान् व्यधित । अकरोत् ॥ ४१ ॥

मन्दोपकारिणी – कथनमिति ॥ उदारधैर्यसारं उत्कृष्टेन धैर्येण सारं उत्तमम् । मधुरं श्रोतृजनमनोहरम् । पुष्कलभाववत् पुष्कलः पूर्णः भावः अभिप्रायः अस्यास्तीति पुष्कलभाववत् । 'पूर्णश्रेयसि पुष्कलः' इति अभिधानं प्रसन्नं शब्दतोऽर्थतश्च अकठोरम् । एवंभूतं तत्कथनं भागवताख्यानं अत्र सभायां अलं सम्यक् आदरेण शृण्वतः श्रवणं कुर्वतः विदुषः पण्डितान् अविदुषोऽपि अपण्डितानपि जनान् आनन्दरसाम्बुधौ आनन्दरसस्य सुखाख्यजलस्य अम्बुधौ समुद्रे निमग्नान् व्यधित अकृत 'डु धाञ् धारणपोषणयोः इति धातोः लुङात्मनेपदं अधित अधिषातां अधिषत' ॥ ४१ ॥

गमनासनसङ्कथादिलीलाः स्मृतिमात्रेण भवापवर्गदात्रीः ।
कथमप्यमराः प्रपञ्चयेयुर्ननु मध्वस्य न मादृशोऽल्पबोधाः ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – गमनेति ॥ केवला स्मृतिः स्मृतिमात्रं तेन भवादपवर्गो मोक्षः तस्य दात्र्यः ताः श्रीमध्वस्य गमनं आगमनं तच्च आसनं उपवेशनं सङ्कथा श्रीभागवतार्थसङ्कथनं सा च गमनासनसंकथाः ता आदयो यासां तास्तादृशाश्च ता लीलाश्च ताः अमराः कथमपि भारतीरुद्राद्यनुग्रहबलादेव प्रपञ्चेयुः वर्णयेयुः । मादृशो मद्विधा अल्पबोधा अल्पज्ञानिनो न प्रपञ्चयेयुः ननु । सामर्थ्याभावादिति भावः । पचि विस्तारवचने लिङ् ॥ ४२ ॥

मन्दोपकारिणी – गमनेति ॥ स्मृतिमात्रेण केवलस्मरणादेव भवापवर्गदात्रीः भवात् संसारात् अपवर्गस्य मोक्षस्य दात्रीः कर्त्रीः । मध्वस्य पूर्णप्रज्ञाचार्यस्य गमनासन-

सङ्कथादिलीलाः गमनं गतिश्च आसनं उपवेशनं च सङ्कथा सम्भाषणं च गमनासनसङ्कथाः एताः आदयो यासां ताः गमनासनसङ्कथादयः ताश्च ताः लीलाः क्रियाः ताः । 'लीला विलासक्रिययोः' इति विश्वः अमराः देवाः कथमपि भारतीरुद्राद्यनुग्रहबलादेव प्रपञ्चयेयुः विस्तारयेयुः । श्रीमध्वाचार्यगमनादिमहिमानं देवा अपि महाप्रयत्नेन विस्तरात् वर्णयेयुः । मादृशः 'प्रथमा बहुवचनान्तं इदं मादृक् मादृशौ मादृशः' इति । मादृशः मत्सदृशाः अल्पबोधाः अल्पः बोधः ज्ञानं येषां ते तथोक्ताः न प्रपञ्चयेयुः ननु । 'पचि विस्तारवचने' इत्यतो लिङ् परस्मैपदं पञ्चयेत् पञ्चयेतां पञ्चयेयुः ॥ ४२ ॥

सुतपःकवितादिसद्गुणानां लिकुचानां कुलजोऽङ्गिरोन्वयानाम् ।
अभवद्गुहनामको विपश्चित्कविवर्योऽखिलवादिवन्दनीयः ॥ ४३ ॥

भावप्रकाशिका – गुहनामको विपश्चित् सुब्रह्मण्यपण्डितः ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – सुतप इति ॥ सुतपश्च कविता गद्यपद्यात्मककविता आदिर्येषां ते कवितादयः, ते च सुतपःकवितादयः सद्गुणा ज्ञानभक्तिवैराग्यादिसद्धर्मा येषां ते तथा तेषाम् । अङ्गिरसोऽन्वयो गोत्रं येषां ते तथा तेषां लिकुचानां लिकुच-संज्ञककुलजन्मनां द्विजन्मनां कुलजः कविवर्यः कविश्रेष्ठः अखिलवादिवन्दनीयः अखिलवादिभिः स्तुत्यः गुह इति सुब्रह्मण्य इति नाम यस्य स गुहनामको विपश्चित् पण्डितः अभवत् ॥ ४३ ॥

मन्दोपकारिणी – इदानीं मध्वाचार्यस्य त्रिविक्रमपण्डिताचार्यैः सह वादकथां प्रपञ्चयितुं तदुत्पत्तिप्रकारमाह **॥ सुतप इत्यादिना ॥** सुतपःकवितादिसद्गुणानां शोभनं च तत् तपश्च सुतपः, कविता गद्यपद्यात्मकप्रबन्धनिर्माणशक्तिः आदिशब्देन पाण्डित्य-सदाचारभक्तिज्ञानादयः ग्राह्याः । सुतपश्च कविता च सुतपःकविते आदी येषां ते । सन्तश्च ते गुणाश्च सद्गुणाः सुतपःकवितादयश्च ते सद्गुणाश्च सुतपःकवितादिसद्गुणाः येषां तेषाम् । अङ्गिरोन्वयानां अङ्गिरा नाम ऋषिः स एव अन्वयः गोत्रं येषां ते तथोक्ताः तेषां 'सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ' इत्यमरः । आङ्गिरसगोत्रोद्भवानामित्यर्थः । लिकुचानां लिकुचनामकानां द्विजानां कुलजः कुले जातः । गुहनामकः सुब्रह्मण्यनामा सुब्रह्मण्यस्य स्कन्दावतारत्वात् 'पार्वतीनन्दनस्कन्दः सेनानीराग्निभूर्गुहः' इत्यमरात् स्कन्द

वाचकगुहशब्देन व्यवहारः विपश्चित् पण्डितः 'विद्वान् विपश्चिद्दोषज्ञः' इत्यमरः । अभवत् आसीत् । कथंभूतः कविवर्यः कवीनां पण्डितानां श्रेष्ठः 'संख्यावान् पण्डितः कविः' इत्यमरः । अखिलवादिवन्दनीयः अखिलैः वादिभिः वन्दनीयः नमस्करणीयः ॥ ४३ ॥

दयिताऽस्य सती गुणानुरूपा विधिविर्येण मुहुर्मृतप्रजाऽपि ।
अभजद्भुवनप्रभू हरीशौ सुतकामा वसुदेवसूनुभक्ता ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – दयितेति ॥ सती पतिव्रता गुणानुरूपा पत्युर्गुणानुकूला वसुदेवसूनुभक्ता श्रीकृष्णभक्ता । अस्य सुब्रह्मण्यपण्डितस्य दयिता भार्या विधिवीर्यं दैवसामर्थ्यं तेन मुहुः पुनः पुनः मृतप्रजा मृताः प्रजा अपत्यानि यस्याः सा तथापि सुते काम इच्छा यस्याः सा तथा सती भुवनप्रभू सर्वलोकेश्वरौ हरीशौ हरिहरौ अभजत् ॥४४॥

मन्दोपकारिणी – दयितेति ॥ सती पतिव्रता 'सती साध्वी पतिव्रता' इत्यमरः । गुणानुरूपा पत्युर्गुणानां अनुकूलस्वभावा । अस्य सुब्रह्मण्यपण्डितस्य दयिता भार्या विधिवीर्येण विधेः अदृष्टप्रेरकदेवतायाः वीर्येण सामर्थ्येन । मुहुः पुनः पुनः मृतप्रजापि मृता प्रजा सन्तानं यस्यास्सा तथोक्ता । 'प्रजा सन्तानलोकयोः' इति विश्वः मृतपुत्रापि सुतकामा सुतस्य कामः इच्छा यस्यास्सा तादृशी सती । भुवनप्रभू भुवनानां लोकानां प्रभू नाथौ हरीशौ हरिश्च ईशः हरश्च हरीशौ हरिहरौ इत्यर्थः । 'शम्भुरीशः पशुपतिः' इत्यमरः । अभजत् असेवत । 'भज सेवायामित्यतो लङ् परस्मैपदम् ।' कथंभूता वसुदेवसूनुभक्ता वसुदेवस्य सूनुः सुतः श्रीकृष्णः तस्य भक्ता विशेषतो भक्तिमती ॥ ४४ ॥

परमेश्वरयोः प्रसादयोगात्सुतरत्नं तदसूत सूरिपत्नी ।
परिषत्पदपत्तनेषु नार्घो विविदे यस्य समः परीक्षकाग्र्यैः ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – परमेति ॥ सूरिपत्नी सुब्रह्मण्यपण्डितपत्नी परमेश्वरयोः हरिहरयोः प्रसादयोगात्सेवाजन्यानुग्रहसम्बन्धात् । यस्य सुतरत्नस्य परिषदां विदुषां पदानि स्थानानि सभाः तान्येव पत्तनानि तेषु परीक्षकाग्र्याः सुतरत्नपरीक्षकश्रेष्ठाः तैः सम उचितो अर्घो मूल्यं न विविदे न ज्ञातः । अनर्घत्वात् अनर्घमेतदित्येव उच्यते । तथा तत्सुतस्य

विद्वत्सभारूढस्य तस्य सर्वविद्यावैदग्ध्यादिगुणजातं पश्यद्भिः विद्वज्जनैः तस्य गुणानामियत्ता नावधारितेति भावः । तदेतादृशं सुतरत्नं सुताख्यं रत्नं असूत सुषुवे ॥ ४५ ॥

मन्दोपकारिणी – परमेश्वरयोरिति ॥ सूरिपत्नी सूरेः सुब्रह्मण्याख्यपण्डितस्य 'धीमान् सूरिः कृती कृष्टिः' इत्यमरः । पत्नी भार्या । परमेश्वरयोः परमः सर्वोत्तमः हरिः ईश्वरः हरश्च तयोः हरिहरयोः । प्रसादयोगात् सेवाजनितानुग्रहस्य योगात् सम्बन्धात् तत् तादृशं सुतरत्नं पुत्राख्यरत्नं असूत सुषुवे । 'षूङ् प्राणिगर्भविमोचने इत्यतो लङात्मनेपदं असूत असुवातां असुवत । तत् कीदृशं यस्य सुताख्यरत्नस्य परिषत्पदपत्तनेषु परिषदः विद्वत्सभाः 'समज्या परिषद्गोष्टी सभासमितिसंसदः' इत्यमरः । परिषदः एव पदानि स्थानानि तानि च तानि पत्तनानि पुर्यः तेषु । 'पूः स्त्री पुरी नगर्यौ वा पत्तनं पुटभेदनं' इत्यमरः परीक्षकाग्र्यैः रत्नपरीक्षकेषु श्रेष्ठैः पुरुषैः समः उचितः अर्घः मूल्यं न विविदे न ज्ञातः । 'मूल्ये पूजाविधावर्घः' इत्यमरः । 'विद ज्ञाने' इत्यतः कर्मणि लिट् आत्मनेपदं विविदे विविदाते विविदिरे । यथा अनर्घस्य कस्यचिद्रत्नस्य मौल्यपरिज्ञानाय पत्तने नीतस्य सतः पत्तनेषु रत्नमूल्यपरीक्षकेषु विदग्धैः पुरुषैः तद्योग्यार्घो न ज्ञायते किंतु अर्घहीनत्वात् अमूल्यमित्येवोच्यते । तथा तत्सुतस्य विद्वत्तया रूढस्य सतः विद्वत्सभासु प्रविष्टस्य तस्य सर्वविद्यावैदग्ध्यादिगुणजातं पश्यद्भिः विद्वज्जनैः तस्य गुणानां इयत्ता नावधारिता इति भावः । तादृशं सुताख्यरत्नं असूतेत्यन्वयः ॥ ४५ ॥

वदनेन्दुमवेक्ष्य नन्दनस्य स्वकुलोत्तारणदक्षलक्षणस्य ।
कृतकृत्यतया क्रियाः प्रकुर्वन् कविराख्यादुचितां त्रिविक्रमाख्याम् ॥ ४६ ॥

भावप्रकाशिका – वेदे, कवितायां, वेदान्त इति त्रिषु विक्रमोऽस्येत्युचितां त्रिविक्रमाख्याम् ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – वदनेति ॥ स्वस्य सुब्रह्मण्यविपश्चितो यत्कुलं लिकुचसंज्ञकं कुलं तस्य यदुत्तारणं समस्तव्रजिनसमुद्रसन्तरणं तस्मिन् दक्षाणि चतुराणि लक्षणान्यङ्गसम्बन्धा यस्य स तथा तस्य नन्दनस्य वदनेन्दुं अवेक्ष्य कृतं कृत्यं कार्यं येन स तथा तस्य भावस्तत्ता तया । क्रिया जातकर्मादिक्रियाः प्रकुर्वन् कविः सुब्रह्मण्यपण्डित उचितां त्रिविक्रम इत्याख्या त्रिविक्रमाख्या तामाख्यात् अवदत् । ख्या प्रकथन इति धातुः । त्रिषु

वेदे कवितायां वेदान्ते चेति त्रिषु विक्रमो अवगतिरस्येति त्रिविक्रम इत्यन्वर्थत्वात् उचितां त्रिविक्रमसंज्ञां पिता चकारेति भावः ॥ ४६ ॥

मन्दोपकारिणी – वदनेति ॥ कविः सुब्रह्मण्याख्यपण्डितः । स्वकुलोत्तारणदक्षलक्षणस्य स्वकुलस्य आत्मीयकुलस्य लिकुचकुलस्य उत्तारणे सकलपापवृन्दात् मोचने दक्षाणि चतुराणि लक्षणानि शुभलक्षणानि यस्य स तथोक्तः तस्य नन्दनस्य तनयस्य । वदनेन्दुं वदनमेव इन्दुः चन्द्रः तं अवेक्ष्य दृष्ट्वा । कृतकृत्यतया कृतं पूर्णं कृत्यं प्रयोजनं यस्य स तथोक्तः तस्य भावः कृतकृत्यता तया सम्प्राप्तमनोरथत्वेन इत्यर्थः । क्रियाः जातकर्मादिकर्माणि प्रकुर्वन् सन् । उचितां अन्वर्थकां त्रिविक्रमाख्यां त्रिविक्रम इति आख्यां संज्ञां आख्यात् अवदत् । 'आङ्पूर्वकख्या प्रकथने इति धातोर्लङ् परस्मैपदं आख्यात् आख्यातां आख्यान्' । त्रिषु वेदे वेदान्ते कवितायां च इति त्रिषु विक्रमः अवगमः अस्य इत्यन्वर्थकत्वात् उचितां त्रिविक्रमसंज्ञां अकरोत् इति भावः ॥ ४६ ॥

कलभाषण एव सूरिपोतः कविरासीदनवद्यपद्यवादी ।
अवभाति ननु प्रभाप्रभावी भगवान् बालतरोऽपि तिग्मभानुः ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – कलेति ॥ सूरिपोतः पण्डितशिशुः । कलं अव्यक्तमधुरं भाषणं यस्य स तथा बाल्ये अव्यक्तभाषादशापन्न एवेत्यर्थः । अनवद्यानि पद्यानि निर्दोषपद्यानि वक्तुं शीलं अस्येति अनवद्यपद्यवादी, तथा सन् कविरासीत् । तथा हि तिग्मभानुः उष्णकिरणो भगवान् सूर्यः बालतरोऽपि प्रभाप्रभावः प्रभासामर्थ्यं अस्यास्तीति तथोक्तः सन्नवभाति ननु शोभते खलु ॥ ४७ ॥

मन्दोपकारिणी – कलेति ॥ सूरिपोतः सूरेः सुब्रह्मण्याख्यपण्डितस्य पोतः शिशुः 'पोतः पाकोऽर्भको डिम्भः' इत्यमरः । कलभाषण एव कलं अव्यक्तमधुरं भाषणं वचनं यस्य स तथोक्तः । 'ध्वनौ तु मधुरास्फुटे कलः' इत्यमरः । अस्फुटाक्षरवचनावस्थायामेवेति भावः । अनवद्यपद्यवादी न विद्यन्ते अवद्यानि शब्ददूषणानि येषां तानि अनवद्यानि तानि च तानि पद्यानि श्लोकाश्च अनवद्यपद्यानि तेषां वादी वदनशीलः सन् । कविः गद्यपद्यात्मकप्रबन्धकर्ता आसीत् । बाल्ये अव्यक्तकलभाषणकाले एव निर्दोषश्लोककरणशीलोऽभूत् इति भावः । तद्युक्तमेव हि । भगवान् अतिपूज्यः तिग्मभानुः सूर्यः

बालतरोऽपि अतिनूतनोऽपि उदयमात्रमितोऽपीति यावत् । प्रभाप्रभावी प्रभायाः प्रभावः सामर्थ्यं अस्यास्तीति प्रभाप्रभावी सन् 'वीर्यं बलं प्रभावश्च' इत्यमरः । अवभाति ननु शोभते खलु । यथा उदितमात्रस्य सूर्यस्य प्रभासामर्थ्यं च अनुभवसिद्धम् तथा अस्य बालस्यापि महाप्रतिभावत्वं न असम्भावितं इति भावः ॥ ४७ ॥

सकलाङ्गयुतावभातशाखः समये प्राप्त उदारपक्षिसेव्यः ।
स ससर्ज सदध्वगोपकृत्यै लिकुचः काव्यफलं रसाभिरामम् ॥ ४८ ॥

भावप्रकाशिका – काव्यफलमुषाहरणाख्यम् ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – सकलेति ॥ सकलाङ्गानि शिक्षाकल्पनिरुक्तादिसर्वाणि वेदाङ्गानि तैर्युताः सकलाङ्गयुताः सकलाङ्गयुततयाऽवभाता ज्ञाता सकलाङ्गयुतावभाताः तादृशाः शाखाः ऋगादिशाखा येन स तथोक्तः । समयः शास्त्रं तस्मिन् प्राप्ते ज्ञाते सति, उदाराः पूर्वापरविवेकादिगुणोदारा ये पक्षिणः नानाविधशास्त्रवन्तः तैः सेव्यः । नानाविध शास्त्रसिद्धान्ताभिज्ञैः तत्तत्समयविशेषजिज्ञासया निषेव्य इत्यर्थः । लिकुचो लिकुचकुलजन्मा स त्रिविक्रमार्यः । सन्त एवाध्वगाः पान्थाः तेषामुपकृतिरुपकारः तस्यै । रसाभिरामं शृङ्गारादिरसैः अभिरामं काव्यमेव फलं काव्यफलं तत् । उषाहरणाख्यकाव्यात्मकफलं इत्यर्थः । ससर्ज उत्पादयामास । श्लेषार्थे तु– सकलाङ्गयुतावभातशाखः पल्लवान्तरशाखादि सकलवृक्षाङ्गयुक्ततया विराजमानबृहच्छाखोपेतः । अत एव उदारपक्षिसेव्यः एवं स्वस्वजातौ यथायोग्यतया प्रौढनानाविहङ्गमसेव्यः सँल्लिकुचो लिकुचाख्य वृक्षविशेषः समये प्राप्ते सति फलनिष्पत्तिकाले प्राप्ते सति पान्थानामुपकाराय यथा फलति तद्वदित्यभिप्रायः ॥ ४८ ॥

मन्दोपकारिणी – सकलेति ॥ सकलाङ्गयुतावभातशाखः सकलानिं च तानि अङ्गानि शिक्षाकल्पादिवेदाङ्गानि च तैः युताः सहिताः । अवभाताः ज्ञाताः शाखाः ऋगादिशाखाः येन स तथोक्तः षडङ्गसहितवेदाध्ययनवान् इत्यर्थः । समये शास्त्रे प्राप्ते सति अवगते सति 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । उदारपक्षिसेव्यः उदाराः श्रेष्ठाश्च ते पक्षिणः सिद्धान्तिनश्च उदारपक्षिणः तैः सेव्यः निषेव्यः । तत्कालवर्तिनः सर्वसिद्धान्तिनः सर्वसिद्धान्ताभिज्ञं त्रिविक्रमार्यं तत्तत्सिद्धान्तविशेषजिज्ञासया असेवन्त इति भावः । लिकुचः लिकुचकुलसम्भूतः सः त्रिविक्रमार्यः सदध्वगोपकृत्यै सज्जनाख्यपान्थानां उपकाराय ।

रसाभिरामं रसैः शृङ्गारादिभिः काव्यरसैः अभिरामं मनोहरं 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः । 'शृङ्गारहास्यकरुणवीररौद्रभयानकाः । बीभत्साद्भुतशांताख्याः नव काव्ये रसाः स्मृताः' इति काव्यप्रकाशे शृङ्गारादिरसा उक्ताः ज्ञेयाः । काव्यफलं काव्यं उषाहरणाख्यं फलं ससर्ज उत्पादयामास । यथा सकलाङ्गयुतावभातशाखः सकलानि अङ्गानि त्वक्पल्लवादिवृक्षानि तैः युतत्वादेव अवभाताः विराजमानाः शाखाः वृक्षस्कन्धाः यस्य स तथोक्तः अष्टाङ्गत्वेन शोभमानस्थूलशाखावान् । उदारपक्षिसेव्यः उदाराः तत्तज्जातौ श्रेष्ठाः पक्षिणः नानाविधविहङ्गाः तैः सेव्यस्सन् लिकुचः लिकुचाख्यवृक्षविशेषः समये फलोत्पत्तिकाले प्राप्ते सति पान्थानां उपकाराय रसाभिरामं रसेन मधुररसेन अभिरामं मनोहरं फलं सृजति तद्वत् त्रिविक्रमपण्डिताचार्यः सर्वशास्त्राभिगमनानन्तरं शृङ्गारादि-काव्यरसोपेतं उषाहरणाख्यं काव्यं चकार इति श्लेषाभिप्रायः ॥ ४८ ॥

प्रतिपादितमात्मना यथार्थं पृथुमायासमयस्य दुर्घटत्वम् ।
स्वगुरौ परिहर्तुमक्षमेऽपि श्रुतवांस्तं स वयस्यबोधितोऽलम् ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – प्रतीति ॥ आत्मना स्वेन प्रतिभावितमुद्भावितं यथार्थं विचार्यमाणे सति परमार्थतो विद्यमानमेव, पृथुर्महान् मायासमयो मायावादशास्त्रं तस्य दुर्घटत्वं पूर्वापरविरुद्धत्वेन अनुपपन्नत्वं, स्वगुरौ परिहर्तुं अक्षमेऽपि स त्रिविक्रमार्यः तच्छास्त्रश्रवणेच्छारहितः अप्यलं सम्यक् सवयस्यबोधितः सन् सखिबोधितः संस्तं मायासमयं श्रुतवान् । शुश्रावेति भावः ॥ ४९ ॥

मन्दोपकारिणी – प्रतिपादितमिति ॥ आत्मना स्वात्मना प्रतिपादितं उद्भावितं यथार्थं विचार्यमाणे सति परमार्थतो विद्यमानमेव । पृथुमायासमयस्य पृथोः बहुलस्य मायासमयस्य मायावादशास्त्रस्य दुर्घटत्वं पूर्वापरविरुद्धत्वेन अनुपपन्नत्वम् । स्वगुरौ स्वस्य शास्त्रोपदेशकर्तरि । परिहर्तुं अक्षमेऽपि न क्षमः इत्यक्षमः तस्मिन् असमर्थेऽपि इत्यर्थः । 'क्षमं शक्ते हिते त्रिषु' इत्यमरः । सः त्रिविक्रमार्यः तच्छास्त्रश्रवणेच्छारहितोऽपि अलं वयस्यबोधितः सन् वयस्यैः समानवयस्कैः बोधितस्सन् 'स्निग्धो वयस्यः सवयाः' इत्यमरः । तं मायासमयं श्रुतवान् अशृणोत् । स्वकृतानुपपत्तिशङ्कापरिहाराभावेन तच्छास्त्रश्रवणे आदररहितोऽपि केवलं वयस्यबोधित एव सन् मायावादशास्त्रं श्रुतवान् इति भावः ॥ ४९ ॥

भगवत्युदिते सगोविलासे वटुभावं त्यजति त्रिविक्रमार्ये ।
अपि भानुपुरस्सराः समस्ताः प्रययुः कीटमणिप्रभत्वमाशु ॥ ५० ॥

भावप्रकाशिका – भानुर्नाम कश्चित्प्राभाकरप्रचुरः ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – भगवतीति ॥ गोविलासो वचनविलासः तेन सहितः सगोविलासः तस्मिन् त्रिविक्रमार्ये त्रिविक्रमनाम्नि वटुभावं त्यजति सति, भगवति हरावुदिते सति वेदशास्त्रपुरस्सरं प्रतिपादिते सति, भानुः पुरस्सरो येषां ते तथा समस्तवादिनः कीटमणिप्रभेव खद्योतप्रभेव प्रभा येषां ते कीटमाणिप्रभाः तेषां भावः तत्वमाशु प्रययुः । अतिप्रभाणां अपि भानुपुरस्सराणां वैदुष्यं त्रिविक्रमार्यवैदुष्यापेक्षया अत्यल्पं अभूदिति भावः । यथादौ वामनरूपे त्रिविक्रमाख्ये भगवति क्रमेण वटुभावं त्यक्त्वा व्याप्तरूपे भवति सति तत्तेजसा प्रतिमुष्टतेजसः सूर्यादयः खद्योतसदृशा अभवंस्तद्वदिति श्लेषार्थः ॥ ५० ॥

मन्दोपकारिणी – भगवतीति ॥ सगोविलासे गवां वाचां विलासः विस्तारः तेन सहिते । त्रिविक्रमार्ये त्रिविक्रमाचार्यनाम्नि भगवति श्रीनारायणे उदिते वेदशास्त्रनैपुण्याख्यं उदयं प्राप्ते सति । वटुभावं वटोः ब्रह्मचारिणः भावः धर्मः वटुत्वं बाल्यावस्थां त्यजति त्यक्तवति सति । भानुपुरस्सराः भानुर्नाम कश्चित् प्रभाकरशास्त्राभिज्ञः स एव पुरस्सरः आदिः येषां ते तथोक्ताः । समस्ताः वादिनः कीटमणिप्रभत्वं कीटमणिः खद्योताख्यः कीटः तस्य प्रभेव प्रभा कान्तिः येषां ते कीटमणिप्रभाः तेषां भावः कीटमणिप्रभत्वं खद्योतसादृश्यं आशु प्रययुः । अतिपण्डितानामपि भानुप्रभृतिवादिनां वैदुष्यं त्रिविक्रमपण्डिताचार्यवैदुष्यापेक्षया अत्यल्पं अभूत् इति भावः । यथा आदौ सगोविलासे गवां तेजसां विलासेन सहिते अतितेजःपुञ्जे वामनरूपे भगवति वटुभावं ह्रस्वाकारं त्यक्त्वा क्रमेण त्रिविक्रमरूपेण व्याप्ते सति तत्तेजसा प्रतिमुष्टतेजसः सूर्यादयो देवाः खद्योतसदृशाः अभवन् तद्वदिति श्लोषाभिप्रायः ॥ ५० ॥

अतिदक्षमतिं सपादलक्षे समये मायिजनस्य युक्तिशूरम् ।
महितं हि महीतले महिम्ना जनको नन्दनमब्रवीदुपांशु ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ जनकः पिता सुब्रह्मण्यपण्डितः पादेन सहितं सपादं लक्षं लक्षसङ्ख्या यस्य स सपादलक्षः तस्मिन् सपादलक्षग्रन्थात्मक इत्यर्थः ।

मायिजनस्य समये शास्त्रे विषये अतिदक्षमतिं अतिचतुरमतिं युक्तिशूरं स्वपक्षसाधने परपक्षदूषणे च युक्तिभिर्विदग्धम् । अत एव महिम्ना सामर्थ्येन मह्यास्तलं तस्मिन् महितं पूजितं नन्दनं त्रिविक्रमाचार्यं उपांशु रहस्यब्रवीत् ॥ ५१ ॥

मन्दोपकारिणी – अतिदक्षेति ॥ जनकः पिता सुब्रह्मण्याख्यपण्डितः । सपादलक्षे पादेन लक्षचतुर्थांशेन पञ्चविंशतिसहस्रेणेति यावत् सहितं सपादं च तत् लक्षं च सपादलक्षं तस्मिन् । मायिजनस्य मायी चासौ जनश्च मायिजनः तस्य मायावादिनः । समये शास्त्रे अतिदक्षमतिं अतिदक्षा अत्यन्तं निपुणा मतिः बुद्धिः यस्य स तथोक्तः तम् । युक्तिशूरं युक्तिषु स्वपक्षसाधने परपक्षनिवारणे च विदग्धं अत एव महिम्ना माहात्म्येन अत एव महीतले महितं सभाजितं नन्दनं पुत्रं त्रिविक्रमार्यं उपांशु रहसि 'रहश्चोपांशु चालिङ्गे' इत्यमरः अब्रवीत् अवोचत् । 'ब्रूञ् व्यक्तायां' वाचि इत्यतो लङ् परस्मैपदं अब्रवीत् अब्रूतां अब्रुवन् ॥ ५१ ॥

श्रुणु वाचमिमां विचारितार्थां न कलौ निर्गुणभावना सुखाय ।
इति गौणविमुक्तये गुणाढ्यं स्मर देवं सुतवासुदेवमेव ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – शृण्विति ॥ विचारितो विचार्य निर्धारितो अर्थो यस्याः सा तथा तामिमां वक्ष्यमाणां वाचं शृणु । कलौ कलियुगे निर्गुण इति भावना निर्गुणभावना परब्रह्मणो निर्गुणत्वध्यानं इत्यर्थः । सुखाय मोक्षसुखाय न भवति । इति अस्माद्धेतो-र्गुणैर्युक्ता गौणी सा च सा मुक्तिश्च तस्यै ज्ञानानन्दादिगुणयुक्तमोक्षार्थं इत्यर्थः । देवमेव क्रीडादिगुणविशिष्टमेव वसुदेवसूनुं वासुदेवं गुणाढ्यमेव भज । यदि ज्ञानानन्दादिगुणरहितं परं ब्रह्मोपास्येत तर्हि तत्फलं मोक्षोऽपि ज्ञानाद्यभावः सुखाय न भवति । मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदिति मोक्षधर्मवचनात् । तस्मात् निर्गुणोपासनं न सुखाय । यदि ज्ञानानन्दादिगुणं तद्ब्रह्मोपासितं स्यात्तदुपासनफलं मोक्षोऽपि ज्ञानानन्दादिगुणविशिष्ट एव स्यात् । एवंविधश्च मोक्षः पुरुषार्थो भवति । निर्दोषज्ञानानन्दाद्यात्मकत्वात् । तस्मात् एवंविधगौणमोक्षाय भगवन्तं वासुदेवं निर्दोषज्ञानानन्दाद्यनन्तगुणविशिष्टमेव भजेत्यर्थः ॥ ५२ ॥

मन्दोपकारिणी – शृण्विति ॥ हे सुत तनय । विचारितार्थां विचारितः विचार्य निर्धारितः अर्थः अभिधेयः यस्याः सा ताम् । इमां वक्ष्यमाणां वाचं शृणु अवधारय । 'शृ श्रवणे' इति धातोर्लोट् परस्मैपदं शृणु शृणुतं शृणुत । कलौ कलियुगे निर्गुणभावना परब्रह्मणः निर्गुणत्वस्य भावना ध्यानं उपासना सुखाय मोक्षसुखाय न, न भवेत् इति हेतोः । गौणविमुक्तये गौणा ज्ञानानन्दादिगुणात्मिका च सा विमुक्तिश्च तस्यै देवं क्रीडादिगुणवन्तमेव वासुदेवं वसुदेवस्य सुतं श्रीकृष्णं वसुदेवसूनुमिति क्वचित्पाठः । गुणाढ्यमेव गुणैः आढ्यं सम्पन्नमेव स्मर चिन्तय उपास्व इति । 'स्मृ चिन्तायामि'त्यतो लोट् परस्मैपदं स्मर स्मरतं स्मरत । भज इति क्वचित्पाठः । यदि ज्ञानानन्दादिसर्वगुणरहितं परब्रह्म उपास्येत तर्हि तत्फलमोक्षोऽपि ज्ञानानन्दरहित एव स्यात् । 'तं यथा यथोपासते तदेव भवति' इति श्रुतेः । न तु ज्ञानानन्दाभावः सुखाय भवति । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्' इति वचनात् तस्मान्निर्गुणोपासना न सुखाय भवति । यदि ज्ञानानन्दादिगुणविशिष्टं परब्रह्म उपासितं स्यात् तदा तदुपासनाफलमोक्षोऽपि ज्ञानानन्दाद्यनन्तगुणविशिष्ट एव स्यात् । एवंविधो हि मोक्षः पुरुषार्थाय भवति । तस्मात् एवंविधगौणमोक्षाय भगवन्तं वासुदेवं निर्दोषं ज्ञानानन्दाद्यनन्तगुणविशिष्टमेव उपास्व इति भावः ॥ ५२ ॥

इति तातवचो निशम्य किञ्चित्तरलात्माऽपि विचार्य शास्त्रसारम् ।
परमेव स पारमारुरुक्षुर्विगुणोपास्तिमुपाशृणोत्परेभ्यः ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ इति एवमुक्तं तातवचः पितृवचो निशम्यापि किञ्चित्तरलश्चञ्चल आत्मा मनो यस्य स तथा । निर्गुणोपासनं मोक्षसाधनं उत सगुणोपासनमिति चञ्चलमानस इत्यर्थः । स त्रिविक्रमार्यः शास्त्रसारं विचार्य परमन्यत् पारं तीरं संसारसागरस्य पारमित्यर्थः । आरुरुक्षुः मुमुक्षुरित्यर्थः । परेभ्यः पितुरन्येभ्यो मायिभ्यो विगता गुणा यस्मात् तत् विगुणं तस्योपास्तिमुपासनाम् । निर्गुणोपासनप्रकारं इत्यर्थः । उपाशृणोत् । निर्गुणोपासनं मोक्षसाधनं न भवति सगुणोपासनमेव मोक्षसाधनमिति तातवचो निशम्यापि किञ्चित् चञ्चलमानसः सन् येन केनापि प्रकारेण मुमुक्षोस्तु निर्गुणोपासनं वेदादिप्रमाणसंमतं, अथ सगुणोपासनं वेति सयुक्तिकं सर्वशास्त्राभिप्रायं

सम्यग्विचार्य शास्त्रे यदुपासनं वेदादिप्रमाणसम्मतं पुरुषार्थसाधनञ्च तदेवोपसनं करिष्याम इति निश्चित्यादौ तत्प्रकारजिज्ञासया परेभ्यो निर्गुणोपास्तिं शुश्रावेति भावः ॥ ५३ ॥

मन्दोपकारिणी – इतीति ॥ इति एवं तातवचः तातस्य पितुः सुब्रह्मण्यस्य 'तातस्तु जनकः पिता' इत्यमरः । वचः वचनं निशम्यापि श्रुत्वापि । किञ्चित् ईषत् 'किञ्चिदीषन्मनागल्पे' इत्यमरः तरलात्मा तरलः चञ्चलः आत्मा मनः यस्य स तथोक्तः 'चञ्चलं तरलञ्चैव' इत्यमरः । निर्गुणोपासनं वा मोक्षसाधनं उत सगुणोपासनं इति दोलायमानमानसः सः त्रिविक्रमाचार्यः शास्त्रसारं शास्त्रस्य सारं रहस्यमेव विचार्य परं पारं संसारसागरस्य पारं तीरं आरुरुक्षुः आरोढुं इच्छन् सन् परेभ्यः पितुरन्येभ्यो मायिभ्यः विगुणोपास्तिं विगुणां निर्गुणविषयिणीं उपास्तिं उपासनाप्रकारं उपाशृणोत् । 'शृ श्रवणे' इत्यतः लङ् परस्मैपदं अशृणोत् अश्रुणुतां अशृण्वन् । निर्गुणोपासनं मोक्षसाधनं न भवति किन्तु ´सगुणोपासनमेव मोक्षसाधनमिति पितुर्वचनं श्रुत्वापि किंचिच्चञ्चलचित्तः त्रिविक्रमाचार्यः येन केनापि प्रकारेण मुमुक्षोः निर्गुणोपासनं वेदादिप्रमाणसंमतं वा उत सगुणोपासनमेवेति सयुक्तिकं सर्वशास्त्रतात्पर्यं सम्यक् विचार्य शास्त्रे यदुपासनं वेदादिसर्वप्रमाणसंमतं पुरुषार्थसाधनं च तादृशोपासनं करिष्यामीति निश्चित्य आदौ तावत् तत्प्रकारादिजिज्ञासया परेभ्यः विगुणोपास्तिं शुश्राव इति भावः ॥ ५३ ॥

निजधर्मरतो गृहिप्रबर्हः कलिकालाकुलितान्तरोऽपि हन्त ।
नितरां निशितात्मना निसर्गात् स्फुटमालोचयदित्यसौ कदाचित् ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – निजेति ॥ निजः स्ववर्णाश्रमोचितो यो धर्मः तस्मिन् रतो निष्ठो गृहिप्रबर्हो गृहस्थश्रेष्ठोऽसौ त्रिविक्रमार्यः । कलेर्यः कालस्तेनाकुलितं विलोडितमन्तरं मानसं यस्य सः । तथापि निसर्गः स्वभावस्तस्मान्नितरां अत्यन्तं निशितात्मना युक्तायुक्तविचारचतुरेण मनसा स्फुटं सम्यक् इति वक्ष्यमाणप्रकारेणालोचयत् विचारयामास । लोचृ दर्शने । परेभ्यो विगुणोपास्तिं श्रुत्वापि तत्रापरितुष्टमनाः सन् स्वयमेवेत्थं विचारयामासेति भावः ॥ ५४ ॥

मन्दोपकारिणी – निजेति ॥ निजधर्मरतः निजः स्ववर्णाश्रमोचितः निजश्चासौ धर्मश्च तत्र रतः । निष्ठावान् गृहिप्रबर्हः गृहिषु गृहस्थाश्रमिषु प्रबर्हः श्रेष्ठः असौ त्रिविक्रमाचार्यः ।

कलिकालाकुलितान्तरोऽपि कलिकालेन कलिकालसामर्थ्येन आकुलितं व्याकुलीकृतं अन्तरं अन्तःकरणं यस्य स तथोक्तोऽपि । निसर्गात् स्वभावात् 'स्वरूपं च स्वभावश्च निसर्गश्च' इत्यमरः । नितरां अतिशयेन निशितात्मना निशितः तेजितः 'निशितक्ष्णुतशातानि तेजिते' इत्यमरः । युक्तायुक्तविचारचतुर इति यावत् । निशितश्चासौ आत्मा मनश्च तेन स्फुटं सम्यक् इति वक्ष्यमाणप्रकारेण आलोचयत् विचारयामास । हन्त हर्षसूचकाव्ययम् । 'हन्त हर्षेऽनुकंपायां वाक्यारम्भविषादयोः' इत्यमरः । परेभ्यो विगुणोपास्तिं श्रुत्वापि तत्र अपरितुष्टमनाः सन् स्वयं एवं वक्ष्यमाणप्रकारेण विचारयामासेति भावः । आङ् पूर्वात् 'लोचृ दर्शने' इत्यतो णिजन्तात् लङ् परस्मैपदम् ॥ ५४ ॥

रचितं ननु सूत्रमत्र मानं विदुषा सत्यवतीसुतेन साक्षात् ।
अपरस्परसङ्गतानि भाष्याण्यथ सर्वाणि न मानतां व्रजेयुः ॥ ५५ ॥

पदार्थदीपिकोद्बोधिका – रचितमिति ॥ अत्र तत्वनिर्णयविषये विदुषा सर्वज्ञेन सत्यवतीसुतेन रचितं निर्मितं सूत्रं ब्रह्मसूत्रं साक्षान्मुख्यतः मानं प्रमाणं ननु । अपरस्परसङ्गतानि परस्परसम्बन्धरहितानि परस्परविरुद्धानिं इति यावत् । सर्वाणि भाष्याणि, भारतीविजयसच्चिदानन्दब्रह्मघोषादिभी रचितान्येकविंशतिसङ्ख्याकानि सर्वाण्यपि ब्रह्मसूत्रभाष्याणि मानतां प्रमाणतां न व्रजेयुः । अयमत्राभिप्रायः । ब्रह्मस्वरूपनिर्णये तावत् ब्रह्मसूत्रमेव मुख्यं प्रमाणम् । सर्वश्रुत्यादिविरोधपरिहारमुखेन सर्वज्ञेन भगवता रचितत्वात् । एवञ्च सति प्रमाणतमब्रह्मसूत्रस्य तन्मूलभाष्याणां परस्परविरोधे सति सूत्रविरुद्धभाष्याणामेव अप्रामाण्यं न्याय्यम् । भाष्येषु सर्वेष्वपि विचार्यमाणेषु सत्सु तानि सूत्रविरुद्धानि न पुरुषार्थसाधनानि इति । अथवा अपरस्परसङ्गतानि परस्परं समबलभाष्यान्तरविरुद्धानीति न एकमपि भाष्यं प्रमाणम् । आप्ततमप्रणीतं सूत्रमेव प्रमाणं इति वार्थः । अपरस्परसङ्गतानि एकैकशः पूर्वापरविरुद्धानीति वा ॥ ५५ ॥

मन्दोपकारिणी – रचितमिति ॥ अत्र तत्त्वनिर्णयविषये । विदुषा सत्यवतीसुतेन सत्यवत्याः सत्यवतीदेव्याः सुतेन वेदव्यासेन रचितं निर्मितं सूत्रं ब्रह्मसूत्रं साक्षात् मुख्यतः मानं ननु प्रमाणं खलु । अथ अपरस्परसङ्गतानि अन्योन्यं अनुकूलानि एकविषय-विषयाणीति यावत् । परस्परसङ्गतानि न भवन्तीति अपरस्परसङ्गतानि परस्परविरुद्धार्थ-

प्रतिपादकानि सर्वाण्यपि एकविंशतिसङ्ख्याकानि भाष्याणि ब्रह्मसूत्रभाष्याणि मानतां प्रमाणतां न व्रजेयुः न प्राप्नुयुः । अयं भावः- ब्रह्मस्वरूपनिर्णये तावत् ब्रह्मसूत्रमेव मुख्यं प्रमाणम् । सर्वश्रुत्यादि विरोधपरिहारमुखेन सर्वज्ञेन भगवता व्यासेन रचितत्वात् । तद्भाष्याणि तु सर्वाण्यपि परस्परविरुद्धानि अतः नैकमपि भाष्यं प्रमाणमिति । 'व्रज गतौ' इत्यतो लिङ् परस्मैपदम् ॥ ५५ ॥

यदि तेषु निराग्रहान्तराः स्मः सुघटं नोपलभामहे हि किञ्चित् ।
न तथापि परम्परोपयातं न पठामः प्रणयेन शाङ्करीयम् ॥ ५६ ॥

पदार्थदीपिकोद्बोधिका –तर्हि सर्वाण्यपि भाष्याणि सूत्रविरुद्धानीति कृत्वा न तेष्वादरोऽपि कर्तुं शक्यत इत्याह— **यदीत्यादिना** ॥ यदि तेषु भाष्येषु निराग्रहं आग्रहरहितमान्तरं मनो येषां ते निराग्रहान्तराः स्मो भवामः । तर्हि सु शोभना घटा घटना यस्य तत्सुघटं सूत्रार्थाविरुद्धमित्यर्थः । किञ्चित् सूत्रार्थविवरणरूपं किमपि निबन्धनं नोपलभामहे हि न पश्यामो हि । तर्हि का चिकीर्षेत्यत आह — नेत्यादि । तथापि सूत्रविरुद्धतया प्रतीयमानत्वेऽपि परम्परोपयातं परम्पराप्राप्तं सङ्करेण प्रणीतं साङ्करीयं भाष्यं प्रणयेनादरेण न पठाम इति न । किन्तु पठाम एव । सर्वेषां भाष्याणां सूत्रविरुद्धत्व-साम्येऽपि किमिति साङ्करीये पक्षपात इत्याशङ्कायामुक्तं— परम्परोपयातं इति । अस्मत्पूर्वैः आदृतत्ववैशेष्यादिति भावः ॥ ५६ ॥

मन्दोपकारिणी – परस्परविरुद्धेषु भाष्येषु आग्रहं परित्यज्य सूत्राविरुद्धं एकं भाष्यं स्वीकर्तव्यं इति अत आह- **यदीति** ॥ यदि तेषु भाष्येषु वयं निराग्रहान्तराः निर्गतः आग्रहः अभिनिवेशः यस्मात्तत् निराग्रहं निराग्रहं अन्तरं मनो येषां ते तथोक्ताः आग्रहरहिताः स्मः भवामः । 'अस भुवि' इत्यतो लट् परस्मैपदं अस्मि स्वः स्मः । तर्हि तेषु मध्ये सुघटं उपपन्नं सूत्रार्थाविरुद्धं किञ्चित् सूत्रार्थविवरणरूपं एकमपि भाष्यं नोपलभामहे न पश्यामः । हि अनुभवसिद्धमेतत् । उपपूर्वात् 'डु लभष् प्राप्तौ' इत्यतो लडात्मनेपदं लभे लभावहे लभामहे । तर्हि किं चिकीर्षसि इत्यत आह-नेति । तथापि सूत्रविरुद्धमपि शाङ्करीयं शङ्करप्रणीतभाष्यं प्रणयेन आदरेण न पठामः इति न, किन्तु पठाम एव । विरुद्धत्वसाम्यात् भाष्यान्तरपरित्यागेन शङ्करभाष्ये पक्षपातः कुत इत्यत

आह-परम्परोपयातं इति । परम्परया उपयातं अस्मत्पूर्वैः आदृतं अतः कुलपरम्परागतत्त्वरूपविशेषात् इदमेव पाठ्यते अस्माभिरिति भावः । 'पठ व्यक्तयां वाचि' इत्यतो लट् परस्मैपदं पठामि पठावः पठामः ॥ ५६ ॥

घटनोपनिषत्सु नाल्पबुद्धेः सुघटेत्यभ्युपगम्य चिन्तयामः ।
न विमुक्तिमुपैति कोऽपि मुक्त्वा समयोक्तामिह यामिमामुपास्तिम् ॥ ५७ ॥

पदार्थदीपिकोद्बोधिका – घटनेति ॥ अल्पा च सा बुद्धिश्च तस्याः उपनिषत्सु घटना सम्बन्धः । तद्विचारसामर्थ्यमिति यावत् । सुघटा न किन्तु दुर्घटेत्यर्थः । अल्पा बुद्धिः उपनिषद्विचारे न प्रसरतीति भावः । अल्पा बुद्धिर्यस्येति बहुव्रीहिर्वा । तथात्वे अल्पबुद्धेः पुरुषस्य उपनिषद्विचारो दुर्घट इत्यर्थः । इत्यभ्युपगम्य ज्ञात्वा इहोपनिषत्सु यामुपास्तिं मुक्त्वा विना कोऽपि कश्चिदपि विमुक्तिं नो उपैति, समयोक्तां सकलसच्छास्त्रोक्तां तामिमामुपास्तिं चिन्तयामो विचारयामः । अयमत्राभिप्रायः । अल्पबुद्धेः उपनिषद्विचारो दुर्घट इत्यभ्युपेत्य वयमल्पबुद्धयः सन्तः साक्षादुपनिषद्विचारं परित्यज्य भारतपञ्चरात्रब्रह्मसूत्रादिसकलसच्छास्त्रेषु या भगवदुपासना मोक्षसाधनत्वेन उच्यते यया च विना न मोक्षः तामुपास्तिमेव सम्यग्विचारयाम इति ॥ ५७ ॥

मन्दोपकारिणी – ननु विरुद्धभाष्याणि परित्यज्य स्वातन्त्र्येणैव उपनिषद्विचारः कुतो न क्रियते इत्यत आह- **घटनेति** ॥ अल्पबुद्धेः अल्पा अल्पविषयिणी बुद्धिः यस्य तस्य पुरुषस्य । उपनिषत्सु उपनिषद्विषये घटना विचारः न सुघटा न सुलभा दुर्घटा एव इति एवं अभ्युगम्य ज्ञात्वा । वयं इह परब्रह्मविषये यां उपास्तिं उपासनां मुक्त्वा विना कोऽपि पुरुषः विमुक्तिं नोपैति न प्राप्नोति तां इमां समयोक्तां ब्रह्मसूत्रादिसकलसच्छास्त्रेषु उक्तां प्रतिपादितां उपास्तिं उपासनाप्रकारं चिन्तयामः । 'चिति स्मृत्यां' इत्यतो लट् परस्मैपदम् । अयं भावः- अल्पबुद्धेः उपनिषद्विचारो दुर्घट एवेति ज्ञात्वा वयमपि अल्पबुद्धय इति हेतोः साक्षादुपनिषद्विचारं परित्यज्य भारतपञ्चरात्रब्रह्मसूत्रदिसकलसच्छास्त्रेषु या भगवदुपासना मोक्षसाधनत्वेन उच्यते यया उपासनया विना मोक्षो न भवेत् तां सकलसच्छास्त्रोक्तां उपास्तिमेव विचारयामः ॥ ५७ ॥

विततः सुखसच्चिदद्वयात्मा समुपास्यो विहितो हि तत्त्वविद्भिः ।
स च नावयवी निरूप्यते चेद्द्युतिमात्रं च न हीत्यदो रहस्यम् ॥ ५८ ॥

पदार्थदीपिकोद्बोधिका – विचारप्रकार एव श्लोकत्रयेणोच्यते— **वितत इत्यादिना** ॥ तत्वं विदन्ति इति तत्वविदः तैः भगवत्तत्वनिर्णयविद्भिः इत्यर्थः । भगवान् विततो व्याप्तः । सुखसच्चित् सती च सा चिच्च सच्चित् सुखश्च सच्चिच्च सुखसच्चित् सुखरूपो निर्दोषज्ञानरूपश्च इत्यर्थः । न विद्यते द्वयं समानं अधिकं वा वस्तु यस्य सोऽद्वयः तादृश आत्मा स्वरूपं यस्य स तथोक्तः । एवंभूतः सन्नुपास्य उपासनार्हो विहितो हि श्रुत्यादिष्वभिहितो हि । सः एवं उपास्यत्वेन अभिहितो अपि अवयवा अस्य सन्तीत्यवयवी ज्ञानानन्दाद्यात्मक-करचरणादिसुन्दरसकलावयवविशिष्टो न निरूप्यते चेत् । रूप रूपक्रियायां लट् । सर्वात्मना सर्वावयवविशिष्टश्च न निरूप्यते चेदिति योज्यम् । एवं तर्हि केवला द्युतिः द्युतिमात्रं तेजोमात्रश्च न हि सम्भवति हि । इत्यदः इत्येतत् प्रमेयं रहस्यं साङ्करशास्त्रस्य फलितार्थ इत्यर्थः । तत्वविद्भिर्व्याप्तत्वेन निर्दोषज्ञानानन्दाद्यात्मकत्वेन च उपास्यत्वेन विहितो भगवानवयवी न निरूप्यते चेत् स शाङ्करीयशास्त्रोक्तप्रकारेण निरवयवो निर्गुणो निर्विशेषश्चेति निरूप्यते चेत्तर्हि निरवयवत्वात् एव ब्रह्मतेजोरूपं इत्येतत् अपि न स्यात् इति सङ्करभाष्यफलितार्थः स्यादिति भावः ॥ ५८ ॥

मन्दोपकारिणी – विचारप्रकारमेवाह ॥ त्रिभिः श्लोकैः **वितत** इत्यादिभिः ॥ तत्त्वविद्भिः तत्त्वं विदन्तीति तत्त्वविदः तैः भगवत्तत्त्वनिर्णयज्ञानिभिः भगवान् हरिः विततः व्याप्तः, सुखसच्चित् सुखः सुखस्वरूपः सच्चित् निर्दोषज्ञानरूपः सुखश्चासौ सच्चिच्च । अद्वयात्मा न विद्यते द्वयं यस्य सः अद्वयः समाधिकशून्यः आत्मा स्वरूपं यस्य स तथोक्तः । एवंभूतो हरिः समुपास्यः विहितो हि । सः एवं उपासनाविषयत्वेन विहितोऽपि भगवान् । अवयवी ज्ञानानन्दाद्यात्मककरचरणादिसुन्दरसकलावयवान् न निरूप्यते चेत् न प्रतिपाद्यते चेत् तर्हि ब्रह्म द्युतिमात्रं च केवलप्रकाशरूपमपि न हि सम्भवति । इत्यदः एतत्प्रमेयं रहस्यं शास्त्रफलितार्थः स्यात् । तत्त्वज्ञानिभिः व्याप्तत्वेन सुखज्ञानादिरूपेण च उपास्यो विहितो भगवान् हस्तपादाद्यवयववान् न निरूप्यते चेत् शाङ्करीयभाष्योक्तप्रकारेण निरवयवो निर्गुणः निर्विशेषश्चेति निरूप्यते चेत् तर्हि निरवयवत्वादेव हेतोः ब्रह्म

प्रकाशरूपमित्येतदपि न स्यादिति शाङ्करीयभाष्यस्य फलितार्थः स्यादिति भावः । रूप रूपक्रियायां इत्यतः कर्मणि लडात्मनेपदं रूप्यते रूप्येते रूप्यन्ते ॥ ५८ ॥

यदि चेदृगुपास्यतेऽस्य रूपं तिमिरत्वेन विभाति पारिशेष्यात् ।
फलमप्यथ मुक्तिरीदृशी स्यादिति नो नैव धिनोत्युपास्तिरेषा ॥ ५९ ॥

पदार्थदीपिकोद्बोधिका – अस्तु तर्ह्येवंभूतमुपास्यं परं ब्रह्म का बाधा इत्यत आह—

यदीति ॥ अस्य परब्रह्मणो रूपं यदीदृक् द्युतिमात्रविशिष्टं न भवतीति उपास्यते ध्यायते । तर्हि परिशेषस्य भावः पारिशेष्यं तस्मात् तिमिरत्वेन अन्धकारत्वेन विभाति । तद्विरुद्धज्ञानाद्यात्मकत्वं न प्रसज्यत इति भावः । तथात्वेन ब्रह्मोपासने को दोष इत्यत आह– फलमित्यादि । अथैवं उपासनानन्तरं उपासकस्य तत्साध्यफलं फलभूता मुक्तिः अपि ईदृशी केवलतिमिराद्यात्मिका स्यात् । न च उपासकस्यैवंभावः पुरुषार्थ इत्यभिप्रायः । इति तस्मात् हेतोरेषोपास्तिर्हि नोऽस्मान्नैव धिनोति न पुष्णाति । धिनु पुष्टाविति धातुः । एवं विधोपसनं नः अस्माकं मनःप्रसादमासादयतीति भावः ॥ ५९ ॥

मन्दोपकारिणी – अस्त्वेवंभूतं उपास्यं ब्रह्म का हानिः इत्यत आह ॥ **यदीति** ॥ अस्य ब्रह्मणः रूपं यदि ईदृक् पूर्वोक्तप्रकारेण अप्रकाशरूपं इति उपास्यते ध्यायते । उपपूर्वात् 'आस उपवेशने' इत्यतः कर्मणि लडात्मनेपदं आस्यते आस्येते आस्यन्ते । तर्हि पारिशेष्यात् परिशेषतः तिमिरत्वेन तमोरूपत्वेन 'तमिस्रं तिमिरं तमः' इत्यमरः । विभाति प्रतिभाति । 'भा दीप्तौ' इत्यतो लट् परस्मैपदम् । प्रसक्तप्रतिषेधः परिशेषः तस्य भावः पारिशेष्यम् । यदि ज्ञानानन्दात्मकत्वतेजोमात्रत्वादिप्रकारं ब्रह्म न भवति इति शास्त्रनिर्णयः स्यात् तर्हि सम्भाविततया प्रसक्तज्ञानानन्दात्मकत्वाभावे तद्विरुद्धाज्ञानाद्यात्मकं प्रसज्येत इति भावः । तथात्वेन ब्रह्मोपासने को दोष इति चेत्तत्राह- **फलमिति** । अथ एवं उपासनानन्तरं उपासकस्य फलं उपासनासाध्यं फलं मुक्तिरपि ईदृशी केवलं तिमिररूपा स्यात् न च उपासकस्य अयं भावः पुरुषार्थ इत्यभिप्रायः इति तस्माद्धेतोः एषा निर्गुणविषयिणी उपास्तिः नः अस्मान् नैव धिनोति न पुष्णाति । 'धिनु पुष्टौ' इति धातोः लट् परस्मैपदं धिनोति धिनुतः धिन्वन्ति । एवंविधोपासना अस्माकं मनःप्रसादं न सम्पादयतीति भावः ॥ ५९ ॥

अथ वेदपुराणभारतादि स्वयमालोच्य यथावबोधमत्र ।
गुणवन्तमुपास्महे मुकुन्दं स्मृतिधर्मान् भृशमाचरन्त एव ॥ ६० ॥

पदार्थदीपिकोद्बोधिका – एवं तर्हि सङ्करभाष्योक्तमुपासनं न धिनोति चेत् कथं भगवदुपासनं क्रियत इत्यत आह— अथेति ॥ स्वयं वयं स्वयमेव स्मृत्युक्ता धर्मा स्मृतिधर्माः तान् मन्वादिस्मृत्युक्तवर्णाश्रमोचितधर्मान् इत्यर्थः । स्फुटं सम्यगाचरन्तः कुर्वन्त एव सन्तः भृशमिति क्वचित्पाठः । वेदाश्च पुराणानि च भारतञ्च वेदपुराणभारतानि तानि । आलोच्य विचार्यात्र वेदादौ अवबोधं अनतिक्रम्य यथावबोधम् । अस्मदवबोधानुसारेण इत्यर्थः । मुकुन्दं श्रीहरिं गुणवन्तं उपास्महे चिन्तयामः । तद्दर्शनपक्षपातं विहाय स्वयमेव वेदपुराणादिकं विचार्य तत्र वेदादौ यथा मुकुन्दस्वरूपं प्रतिपाद्यते । प्रतिपादितञ्च तत्स्वरूपं अस्माकं यथा ज्ञातुं शक्यते तथा ज्ञानानन्दादिगुणविशिष्टमेव मुकुन्दं उपास्महे, स्वविहितधर्मानुष्ठानस्य चित्तशुद्धिद्वारा भगवदुपासनाङ्गत्वात् तदाचरणपुरस्सरमिति भावः ॥ ६० ॥

मन्दोपकारिणी – ननु शङ्करभाष्योक्तोपासनानुष्ठाने मनःप्रसादाभावे केन प्रकारेण भगवदुपासना क्रियते इत्यत आह ॥ **अथेति** ॥ अथ तत्तद्भाष्योक्तपक्षपरित्यागानन्तरं स्वयं स्वयमेव वेदपुराणभारतादि आदिपदेन पञ्चरात्रादि ग्राह्यं आलोच्य विचार्य अत्र वेदादौ यथावबोधं बोधानुसारेणेत्यर्थः । मुकुन्दं गुणवन्तं गुणाः ज्ञानानन्दादयः अस्य सन्तीति गुणवान् तं उपास्महे ध्यायामः । तत्तद्दर्शनपक्षपातं विहाय वेदपुराणादिकं विचार्य तत्र वेदादौ यथा मुकुन्दस्वरूपं प्रतिपाद्यते तत्स्वरूपं अस्माभिः यथा ज्ञातुं शक्यते तथा ज्ञानानन्दादिविशिष्टमेव मुकुन्दं उपास्महे इति भावः । उपपूर्वात् 'आस उपवेशने' इत्यतो लडात्मनेपदं आसे आस्वहे आस्महे । किं कुर्वतः स्मृतिधर्मान् स्मृतिषु उक्ताश्च ते धर्माश्च तान् स्मृत्युक्तस्ववर्णाश्रमोचितपञ्चमहायज्ञादिकर्माणि भृशं सम्यक् आचरन्त एव अनुतिष्ठन्त एव स्ववर्णाश्रमविहितधर्मानुष्ठानस्य अन्तःकरणशुद्धिद्वारा भगवदुपासनाङ्गत्वात् इति भावः ॥ ६० ॥

अवधार्य यदेति कार्यमार्यः स विवेकादुपचक्रमे विधातुम् ।
परिपूर्णमतेर्जगत्सु कीर्तिं परिपूर्णामशृणोत् तदा विशुद्धाम् ॥ ६१ ॥

पदार्थदीपिकोद्बोधिका – अवधार्येति ॥ स आर्यः त्रिविक्रमपण्डिताचार्यः कार्यं स्वकर्तव्यं विवेकः पूर्वोत्तरपरामर्शः तस्मात् इत्येवं अवधार्य निश्चित्य विधातुं वेदादिविचारं कर्तुं यदोपचक्रमे प्रारभत तदा जगत्सु परिपूर्णां व्याप्तां विशुद्धां निर्दोषां परिपूर्णमतेः श्रीपूर्णप्रज्ञाचार्यस्य कीर्तिं अशृणोत् ॥ ६१ ॥

मन्दोपकारिणी – अवधार्येति ॥ स आर्यः त्रिविक्रमपण्डिताचार्यः कार्यं स्वकर्तव्यं विवेकात् स्वकर्तव्याकर्तव्ये विविच्य इति यावत् । इति पूर्वोक्तप्रकारेण अवधार्य निश्चित्य इत्थमेव करिष्ये इति निर्धार्य विधातुं वेदादिविचारं कर्तुं यदा उपचक्रमे आरम्भं अकरोत् । उपपूर्वात् 'क्रमु पादविक्षेपे' इति धातोर्लिडात्मनेपदं चक्रमे चक्रमाते चक्रमिरे । तदा विचारारम्भसमये जगत्सु लोकेषु परिपूर्णां व्याप्तां विशुद्धां निर्मलां परिपूर्णमतेः पूर्णप्रज्ञाचार्यस्य कीर्तिं प्रसिद्धिं अशृणोत् श्रुतवान् । मध्वाचार्यो नाम कश्चन तत्त्ववादी पण्डितः सर्वान् वादिनः विजित्य सर्वाणि मायावादमतानि दूषयित्वा सर्वत्र पूज्यमानो विराजते इत्येवं मध्वाचार्यं दृष्टवतां जनानां मुखेन मध्वकीर्तिं शुश्राव इति भावः ॥ ६१ ॥

विहिनस्ति हि नो जनोऽतिवाग्मी समयं कोऽपि परम्परोपयातम् ।
क्षिप तं त्वमुदारयुक्तिशूरो न परे तत्र समर्थतां व्रजेयुः ॥ ६२ ॥

पदार्थदीपिकोद्बोधिका – विहिनस्तीति ॥ अन्त्यकुलकमेतत् । मायी च असौ जनश्च मायिजनः तेन मायिमताश्रितजनेन इत्यर्थः । तत्र तत्र दृष्टस्थले स्वश्चासौ जनश्च स्वजनः तस्य भावस्तत्त्वं तेन स्वयूथ्यजनत्वेन हेतुनेत्यर्थः । इति 'क्षिप तं त्वमुदारयुक्तिशूर' इत्यादिना प्रकारेण श्रीमध्वं क्षेप्तुं निराकर्तुमर्थ्यमानोऽनुकूलं वचो वाक्यं यस्य सोऽनुकूलवचा अर्थयतो मायिजनस्यानुकूलवचन इत्यर्थः । मायिनां परितोषायाहमेकेनैवोत्तरेण श्रीमध्वाचार्यं निराकरिष्यामीति वदन्निति भावः । महिष्ठोऽतिमहान्मानो यस्य स तथोक्तः । बहुप्रमाणोपेत इत्यर्थः । संशयं छिनत्तीति संशयच्छित् स्वयं सर्वेषां संशयस्य छेत्तेत्यर्थः । एवंभूतोऽपि मनसा संशयमाप श्रीमध्वं क्षेप्तुं शक्नोमि न वेति संशयापन्नोऽभूदित्यर्थः । इति कुलकान्त्यश्लोकेन सम्बन्धः । कथमर्थ्यमान इत्यत आह– **विहिनस्तीति** । अत्यन्तं वाग्म्यतिवाग्मी कोऽपि जनः कश्चिज्जनः श्रीमध्वतदन्तेवास्यादिजन इत्यर्थः । परम्परोपयातः

परम्पराप्राप्तस्तं पुरातनमिति यावत् । नोऽस्माकं समयं शास्त्रं हि यस्माद्विहिनस्ति निराकरोति । हिसु हिंसायां लट् । तस्मादुदारयुक्तिशूरः उत्तमयुक्तिभिः शूरस्त्वं तमस्मत्समयं निराकुर्वन्तं जनं क्षिप निराकुरु परेऽन्ये तत्र निराकरणे समर्थतां शक्ततां न व्रजेयुः ॥ ६२ ॥

मन्दोपकारिणी – तदा मायावादिनः त्रिविक्रमाचार्यं उपेत्य प्रार्थितवन्तः कथं इत्यत आह ॥ **विहिनस्तीति** ॥ अतिवाग्मी अत्यन्तं वाचालः कोऽपि कश्चिज्जनः । परम्परोपयातं परम्परया उपयातं प्राप्तं पुरातनमिति यावत् । नः अस्माकं समयं मायावादशास्त्रं विहिनस्ति निराकरोति । विपूर्वात् 'हिसि हिंसायां' इत्यतो लट् परस्मैपदं हिनस्ति हिंस्तः हिंसन्ति । तस्मात् हे त्रिविक्रमाचार्य उदारयुक्तिशूरः उदाराः उत्कृष्टाश्च ताः युक्तयश्च तासु शूरः समर्थः त्वं तं अस्मत्समयं निराकुर्वन्तं जनं क्षिप निराकुरु । 'क्षिप निरसने' इति लोट् परस्मैपदं क्षिप क्षिपतं क्षिपत । परे त्वदन्ये तत्र मध्वनिराकरणविषये समर्थतां शक्ततां न व्रजेयुः न प्राप्नुयुः । 'व्रज गतौ' इत्यतो लिङ् परस्मैपदम् ॥ ६२ ॥

तव वेदनदीर्विगाह्य भूयः समयाम्भोदिषु कुर्वतो विहारम् ।
नवकाव्यरसप्रियस्य वादिद्विरदेन्द्रप्रतिवारणो न जज्ञे ॥ ६३ ॥

पदार्थदीपिकोद्बोधिका – **तवेति** ॥ वादिद्विरदेन्द्र ! सर्ववादिगजराज! वेदा एव नद्यस्ताः विगाह्य प्रविश्य भूयः समया एव शास्त्राण्येवाम्भोदयः समुद्रास्तेषु विहारं क्रीडां कुर्वतः, नवकाव्यानि नूतनकाव्यानि तेषां ये रसाः शृङ्गारादयस्तेषु प्रियस्य । वेदेषु शास्त्रेषु शृङ्गारादिरसोपेतकाव्येषु कृतपरिश्रमस्येत्यर्थः । तव प्रतिवारणः प्रतिवादिगजो न जज्ञे । तव प्रतिवादी कोऽपि नास्ति । यथा मत्तगजेन्द्रस्य जेता कश्चिदपि गजो न भवति तद्वदिति भावः ॥ ६३ ॥

मन्दोपकारिणी – **तवेति** ॥ हे वादिद्विरदेन्द्र वादिन एव द्विरदाः गजाः तेषां इन्द्र श्रेष्ठ ! तव प्रतिवारणः प्रतिवादिनामा प्रतिगजः न जज्ञे नोत्पन्नः । 'जनी प्रादुर्भावे इति धातोः लिडात्मनेपदं जज्ञे जज्ञाते जज्ञिरे । तव प्रतिवादी कोऽपि नास्ति । यथा मत्तगजेन्द्रस्य जेता कश्चिदपि गजो न भवति तद्वदिति भावः । 'द्विरदोऽनेकपो द्विपः' इत्यमरः । कथंभूतस्य तव, वेदनदीः वेदा एव नद्यः ताः विगाह्य प्रविश्य भूयः पुनः

समयाम्भोधिषु समयाः सर्वशास्त्राणि तान्येव अम्भोधयः समुद्राः तेषु विहारं क्रीडां कुर्वतः । वेदशास्त्रेषु निशितबुद्धिमतः इत्यर्थः । पुनः कथंभूतस्य तव, नवकाव्यरसप्रियस्य काव्यरसाः शृङ्गारादयः नवकाव्यरसाः नवसङ्ख्याकाश्च तेषु प्रियस्य प्रीतिमतः 'शृङ्गारहास्यकरुण-वीररौद्रभयानकाः । बीभत्साद्भुतशान्ताख्याः नव काव्ये रसाः स्मृताः' इति काव्य-प्रकाशोक्ताः शृङ्गारादयो नवरसाः ज्ञेयाः वेदेषु शास्त्रेषु शृङ्गारादिरसोपेतकाव्येषु च परिचयवतः इत्यर्थः ॥ ६३ ॥

उपयाहि यशः शशाङ्कगौरं निजयूथस्य भयं निराकुरु त्वम् ।
अधुना विधिनोपपादितं त्वं प्रतिवादिप्रतिवारणं निवार्य ॥ ६४ ॥

पदार्थदीपिकोद्बोधिका – उपयाहीति ॥ अधुना विधिना दैवेनोपपादितं निष्पादितं तं प्रतिवाद्येव प्रतिवारणः प्रतिगजस्तं निवार्य निराकृत्य शशाङ्कगौरं चन्द्रवद्धवलं यश उपयाहि प्राप्नुहि । निजानां स्वकीयानां यूथस्य समूहस्य भयं निराकुर्वित्यर्थ्यमान इत्युत्तरश्लोकेन सम्बन्धः ॥ ६४ ॥

मन्दोपकारिणी – उपयाहीति ॥ हे त्रिविक्रमाचार्य ! त्वं अधुना इदानीं विधिना दैवेन । 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः । उपपादितं उत्पादितं तं प्रतिवादिप्रतिवारणं प्रतिवादी श्रीमध्वः स एव प्रतिवारणः प्रतिगजः तं निवार्य निराकृत्य । शशाङ्कगौरं शशाङ्कवत् चन्द्रवत् गौरं धवलं 'अवदातस्सितो गौरो वलक्षो धवलोऽर्जुनः' इत्यमरः । यशः कीर्तिं उपयाहि प्राप्नुहि । 'यशः कीर्तिस्समाख्या च' इत्यमरः । उपपूर्वात् 'या प्रापणे' इति धातोः लोट् याहि यातं यात । निजयूथस्य निजानां स्वकीयानां जनानां यूथस्य वृन्दस्य भयं निराकुरु परिहर । 'निर् आङ् पूर्वकात् डु कृञ् करणे इत्यतो लोट्-परस्मैपदं कुरु कुरुतं कुरुत' ॥ ६४ ॥

इति मायिजनेन तत्र तत्र स्वजनत्वेन स तावदर्थ्यमानः ।
अनुकूलवचा महिष्ठमानो मनसा संशयमाप संशयच्छित् ॥ ६५ ॥

पदार्थदीपिकोद्बोधिका – पूर्वमेव व्याख्यातोऽयं श्लोकः ॥ ६५ ॥

मन्दोपकारिणी – इतीति ॥ इति पूर्वोक्तप्रकारेण मायिजनेन मायी मायावादी चासौ जनश्च मायिजनः तेन मायिमतमाश्रितेन जनेन तत्र तत्र दृष्टदृष्टस्थलेषु स्वजनत्वेन स्वः स्वयूथ्यश्चासौ जनश्च स्वजनः तस्य भावः तेन स्वयूथ्यत्वेन हेतुना । इति पूर्वोक्तप्रकारेण मध्वं क्षेप्तुं अर्थ्यमानः तावत् तदा अनुकूलवचाः अनुकूलं प्रार्थयतो मायिजनस्य सन्तोषकरं वचः वचनं यस्य सः अनुकूलवचाः । मायिनां परितोषाय अहमेकेनैवोत्तरेण श्रीमध्वाचार्यं निराकरिष्यामीति वदन् इति भावः । महिष्ठमानः महिष्ठः अतिबहुलः मानः अभिमानः यस्य स तथोक्तः । बहुप्रमाणोपेतो वा । संशयच्छित् स्वयं सर्वेषां संशयं छेत्तीति संशयच्छित् एवंभूतः सः त्रिविक्रमाचार्यः मनसा संशयं आप अवाप्तवान् । सर्ववादिनिराकरणदक्षं श्रीमध्वाचार्यं प्रतिक्षेप्तुं शक्नोमि न वेति संशयमापन्नोऽभूत् इत्यर्थः । 'आप्लृ व्याप्तौ' इत्यतो लिट् परस्मैपदम् ॥ ६५ ॥

सितमध्ववचःसृणिप्रयोक्तॄन् पुरुषानेष विषादयन् कवीभः ।
विविधोत्तरधूलिपातनेन प्रतिघेनाधिकमन्धयाञ्चकार ॥ ६६ ॥

पदार्थदीपिकोद्बोधिका – शितास्तीक्ष्णा मध्ववचांस्येव सृणयोऽङ्कुशास्तासां प्रयोक्तारस्तान् । 'अङ्कुशोऽस्त्री सृणिः स्त्रियामि'त्यमरः । श्रीमध्वाचार्योक्तयुक्त्यात्मकवचनानि प्रयुञ्जानानित्यर्थः । पुरुषान् श्रीमध्वशिष्यान् विषादयन् भीषयन्नेष कवीभः त्रिविक्रमपण्डिताख्यगजो विविधानि यान्युत्तराणि तान्येव धूलयस्तासां पातनेन प्रक्षेपणेन विविधोत्तरात्मकधूलिप्रक्षेपात्मकेनेत्यर्थः । प्रतिघेन प्रतिबन्धा प्रतिघो नाम प्रतिघातः निवारणमिति यावत् । 'प्रतिघः प्रतिघातेऽस्त्र' इत्यमरः । प्रतिघेन कोपेनेति वा । प्रत्युत्तराप्रतिपत्तौ सत्यां कोपाद्यादृशतादृशनानाविधोत्तरात्मकधूलिप्रक्षेपेणेत्यर्थः । 'प्रतिघौ रुट् प्रतीघाता'विति अधिकं यथा भवति तथा अन्धयाञ्चकार निरुत्तरांश्चकार ॥ ६६ ॥

मन्दोपकारिणी – सितेति ॥ एषः कवीभः कविः त्रिविक्रमपण्डिताचार्य एव इभः महागजः । 'इभः स्तम्बेरमः पद्मी' इत्यमरः । सितमध्ववचःसृणिप्रयोक्तॄन् सितानि तीक्ष्णानि च तानि मध्वस्य वचांसि युक्त्यात्मकवचनानि च तान्येव सृणिः अङ्कुशः तां प्रयोक्तॄन् प्रयुञ्जानान् । 'अङ्कुशोऽस्त्री सृणिःस्त्रियाम्' इत्यमरः । पुरुषान् श्रीमध्वाचार्यशिष्यभूतान् विदुषः विषादयन् खेदं प्रापयन् सन् विषादं कर्तुमित्यर्थः । प्रतिघेन

कोपेन 'कोपक्रोधामर्षरोषप्रतिघारुट् क्रुधौ स्त्रियाम्' इत्यमरः । विविधोत्तरधूलिपातनेन विविधानि नानारूपाणि च तानि उत्तराणि प्रत्युत्तराणि च तान्येव धूलयः पांसवः तासां पातनेन प्रक्षेपणेन । 'रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयोरजः' इत्यमरः । अधिकं अन्धयाञ्चकार अन्धान् अकरोत् । अयं भावः- मध्वाचार्यकीर्तिश्रवणानन्तरं तस्मिन् देशे तत्र तत्र दृष्टैः श्रीमध्वाचार्यसमीपे मध्वशास्त्रं सम्यगधीतवद्भिः मध्वाचार्यशिष्यभूतैः पुरुषैः प्रसङ्गे सति यथा मत्तगजः अङ्कुशं कुम्भस्थले प्रयोक्तारं अम्बष्ठं क्लेशयन् कोपेन तदुपरि नानाविधधूलिं प्रक्षिप्य अन्धीकरोति तद्वत् त्रिविक्रमाचार्यः मध्वशास्त्रोक्तदृढयुक्तीः प्रयुञ्जानान् मध्वशिष्यभूतजनान् विषादयन् समये प्रत्युत्तरापरिस्फूर्तौ सत्यां कोपेन यादृशतादृशनानाविधप्रत्युत्तरैः निरुत्तरान् अकरोत् इति ॥ ६६ ॥

क्षणदासु विचक्षणः स वीक्ष्य प्रचुरप्रज्ञमनोज्ञशास्त्रसारम् ।
अपराविदितः प्रसादगर्भं विदधे विस्मयमान्तरं महान्तम् ॥ ६७ ॥

पदार्थदीपिकोद्बोधिका – क्षणदास्विति ॥ विचक्षणो विवेकी स त्रिविक्रमपण्डितः क्षणदासु निशास्वपराविदितोऽन्यैरविज्ञातः सन् प्रसादः प्रसन्न गर्भोऽभिप्रायो यस्य स तथा तम् । यद्वा प्रसन्नता गर्भेऽन्तर्भागेऽभिप्राये यस्य स तथा तं प्रचुरप्राज्ञस्य श्रीपूर्णप्रज्ञस्य मनोज्ञशास्त्रस्य मनोहरशास्त्रस्य सारः फलितार्थस्तं वीक्ष्यान्तरं मानसं महान्तं विस्मयमाश्चर्यं चक्रे विदधे । श्रीमध्वाचार्यशिष्येण त्रिविक्रमार्यसहजेन सङ्कर्षेण स्वमन्दिरे निहितं श्रीमध्वाचार्यशास्त्रपुस्तकजातं क्षणदास्वन्यैरविदितो वाचयन् मनोहरं तच्छास्त्राभिप्रायं ज्ञात्वा मनसा महान्तं विस्मयमापेत्यर्थः ॥ ६७ ॥

मन्दोपकारिणी – क्षणदास्विति ॥ विचक्षणः विवेकी सः त्रिविक्रमपण्डिताचार्यः । क्षणदासु रात्रिषु 'त्रियामा क्षणदा क्षपा' इत्यमरः । अपराविदितः सन् अपरैः अन्यैः अविज्ञातः सन् । प्रसादगर्भं प्रसादः अभिप्रायः गर्भे कुक्षौ यस्य तत् तथोक्तं 'गर्भोऽर्भके नाट्यसन्धौ कुक्षौ पवनसङ्कटे' इत्यमरः । प्रचुरप्रज्ञमनोज्ञशास्त्रसारं प्रचुरा पूर्णा प्रज्ञा यस्य सः तथोक्तः तस्य मध्वाचार्यस्य मनोज्ञं मनोहरं च तत् शास्त्रसारं च ग्रन्थश्रेष्ठं चेति तथोक्तं । 'निदेशग्रन्थयोः शास्त्रं' इत्यमरः । मध्वकृतभाष्यादिग्रन्थं वीक्ष्य दृष्ट्वा आन्तरं अन्तरे मनसि भवः आन्तरं महान्तं बहुलं विस्मयं आश्चर्यं विदधे चक्रे । विपूर्वात् 'डु धाञ्

धारणपोषणयोः' इति धातोः लिडात्मनेपदं दधे दधाते दधिरे । अयं भावः- त्रिविक्रम-पण्डिताचार्यस्य अनुजः शङ्कराचार्यनामकः कश्चिदभूत् । स च मध्वाचार्यशिष्यो भूत्वा तच्छास्त्रं अधीत्य मध्वस्य परमाप्तो भूत्वा मध्वाचार्यशास्त्रपुस्तकजातं मध्वाचार्यानुज्ञयैव स्वाधीनं कृत्वा स्वमन्दिरे निहितवान् । ततः त्रिविक्रमाचार्यः स्वानुजगृहे विद्यमानं मध्वाचार्यपुस्तकजातं ज्ञात्वा रात्रिष्वेव अन्यैरविज्ञातस्सन् गम्भीराभिप्रायगर्भितं मध्वशास्त्रं दृष्ट्वा वाचयन् आलोच्य मनोहरं तदभिप्रायं ज्ञात्वा स्वमनस्येव अत्याश्चर्यं अनुभूतवान् इति ॥ ६७ ॥

विदितवान् व्यवहृत्य सुदर्शनं बहुलबोधमवेक्ष्य स निश्चयात् ।
अपि न तस्य मतं सहसाऽऽददे ननु विमृश्य कृती कुरुतेऽखिलम् ॥ ६८ ॥

पदार्थदीपिकोद्बोधिका – विदितवानिति ॥ स त्रिविक्रमार्यो बहुलबोधं श्रीपूर्ण-प्रज्ञमवेक्ष्य, व्यवहृत्य विप्रतिपन्ननानाविधप्रमेयविषयव्यवहारं कृत्वा सुदर्शनं प्रबल-युक्त्याऽऽगमादिप्रमाणयुक्तत्वेन चैतच्छास्त्रमेव निश्चयान्निर्दुष्टशास्त्रमिति विदितवानपि ज्ञातवानपि तस्य श्रीमध्वस्य मतं सहसा झटिति नाददे नाङ्गीचकार । तथाऽहि । कृती निपुणः पुरुषोऽखिलं कार्यं विमृश्यालोच्य कुरुते ननु । अतो विमृश्यकारित्वादयं सहसा नाङ्गीचकारेति भावः । अत्रार्थान्तरन्यासालङ्कारः । द्रुतविलम्बितवृत्तम् । 'द्रुतविलम्बितमाह नभौ भराविं'त्युक्तेः ॥ ६८ ॥

मन्दोपकारिणी – विदितवानिति ॥ सः त्रिविक्रमपण्डिताचार्यः । बहुलबोधं बहुलः पूर्णः बोधो ज्ञानं यस्य स तथोक्तः तं मध्वाचार्यं अवेक्ष्य । व्यवहृत्य विप्रतिपन्न-नानाविधप्रमेयविषये व्यवहारं कृत्वा । निश्चयात् सुदर्शनं प्रबलयुक्त्यादिप्रमाणोपेतत्वात् एतद्दर्शनमेव निर्दोषदर्शनं इति विदितवानपि ज्ञातवानपि तस्य मध्वाचार्यस्य मतं सिद्धान्तं सहसा झटिति नाददे न स्वीकृतवान् । आङ्पूर्वात् 'डु दाञ् दाने' इत्यतो लिडात्मनेपदं ददे ददाते ददिरे । तद्युक्तं हि । कृती निपुणः । 'कृती कुशल इत्यपि' इत्यमरः । अखिलं अशेषं कार्यं विमृश्य सम्यग्विचार्यैव कुरुते ननु करोति खलु । 'डु कृञ् करणे' इत्यतो लट् कुरुते कुर्वाते कुर्वते । अयं भावः त्रिविक्रमाचार्यः पुस्तकदर्शनानन्तरं कदाचित् यदृच्छया मध्वाचार्यं दृष्ट्वा तदा विप्रतिपन्नप्रमेयविषयेषु व्यवहारं कृत्वा मनसि एतद्दर्शनमेव सुदर्शनं अत्र

संशयो नास्तीति सम्यक् ज्ञातवान् । एवं तत्र मध्वशिष्यभूतैः जनैः सह प्रसङ्गतः । रात्रिषु पुस्तकदर्शनतोऽपि मध्वाचार्यं दृष्ट्वा तेन सह प्रमेयविशेषव्यवहारतोऽपि मध्वशास्त्रस्य निर्दोषदर्शनत्वं ज्ञात्वापि पुनरपि विचारणीयं इति बुद्ध्या झटिति मध्वमतं न जग्राह इति । द्रुतविलम्बितवृत्तं 'द्रुतविलम्बितमाह नभौ भरौ' इति वचनात् ॥ ६८ ॥

तं विष्णुमङ्गलगतं बहुलप्रबोधं प्राप्याभ्यवन्दत तदाऽयुगविक्रमार्यः ।
आनन्ददं स चतुराननहासलक्ष्म्या तत्त्वं प्रवेत्तुममरेन्द्र इवाब्जयोनिम् ॥ ६९ ॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते सुमध्वविजये महाकाव्ये आनन्दाङ्के त्रयोदशः सर्गः ॥

भावप्रकाशिका – चतुराननं चत्वार्याननानि ॥ ६९ ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां त्रयोदशः सर्गः ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – तमिति ॥ युगं युगलं न भवतीत्ययुगाः । अयुगा विक्रमा यस्य सोऽयुगविक्रमस्त्रिविक्रमः स चासावार्यश्च । तदा विष्णुमङ्गलं विष्णुमङ्गलाख्यदेवालयं गतं प्राप्तं चतुरं भद्रं यदाननं तस्य यो हासस्तस्य लक्ष्मीः श्रीः तया सतामानन्ददं तं बहुलप्रबोधं प्राप्य, अमरेन्द्रा देवेन्द्रास्तत्वं श्रीहरिस्वरूपं प्रवेत्तुं सम्यग् ज्ञातुं चतुराननहासलक्ष्म्या चतुर्णामाननानां हासश्रिया सतामानन्ददमब्जयोनिमिव चतुर्मुखमिवाभ्यवन्दत । त्रिविक्रमार्योऽपि तत्वविविदिषया प्राप्याभ्यवन्दतेत्यभिप्रायः ॥६९॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ
पदार्थदीपिकोद्बोधिकायां त्रयोदशः सर्गः ॥

मन्दोपकारिणी – तमिति ॥ सः अयुगविक्रमार्यः त्रिशब्दस्य अयुगार्थत्वात् त्रिशब्दस्थाने अयुगशब्दप्रयोगः । तथा च त्रिविक्रमपण्डिताचार्यः । तदा जयसिंहराजोद्देशे आगमनकाले । विष्णुमङ्गलगतं विष्णुमङ्गलाख्यदेवालये गतं विद्यमानं बहुलप्रबोधं श्रीमध्वाचार्यं प्राप्य उपेत्य अभ्यवन्दत नमस्कृतवान् । कथंभूतं- चतुराननहासलक्ष्म्या चतुरं

सुन्दरं च तत् आननं मुखं च तस्य हासः मन्दहास एव लक्ष्मीः श्रीः तया मन्दस्मितशोभया । आनन्ददं आनन्दं ददातीति आनन्ददः तम् । कः कमिव- अमरेन्द्रः अमराणां देवानां इन्द्रः पुरन्दरः । तत्त्वं श्रीहरिस्वरूपं प्रवेत्तुं सम्यग्ज्ञातुं अब्जयोनिं विरिञ्चिमिव । 'धाताब्जयोनिर्ब्रुहिणो विरिञ्चिः कमलासनः' इत्यमरः । कथंभूतं अब्जयोनिं- चतुराननहासलक्ष्म्या चत्वारि च तानि आननानि च चतुराननानि तेषां हासलक्ष्म्या मन्दहासश्रिया आनन्ददम् ।

अयमस्य सर्गद्वयस्य समुदायाभिप्रायः । एवं पूर्वोक्तरीत्या त्रिविक्रमपण्डिताचार्ये स्थितवति सति रजतपीठपुरे श्रीमध्वाचार्येऽपि वेदान्तसूत्रव्याख्यानादिना उत्कर्षेण विराजमाने सति तदुत्कर्षमसहमानैः पद्मतीर्थपुण्डरीकपुरिप्रभृतिभिः मन्त्रादिबलात् शङ्कराचार्यमन्दिरे स्थापितमध्वाचार्यपुस्तकजाते अपहृते सति तां वार्तां श्रुत्वा मध्वाचार्यः शीघ्रेण पद्मतीर्थाधिष्ठितग्रामं प्राप्य तं निगृह्य पराजयति सति प्राग्र्यवाटाख्ये चातुर्मास्यव्रतसमाप्त्यनन्तरं पौर्णमास्यां रात्रावेव पद्मतीर्थः पलायितः । तत् ज्ञात्वा तत्रस्थाः परिवृढाः तदपहृतमध्वाचार्यपुस्तकजातं आनीय मध्वाचार्याय प्रददुः । मध्वाचार्यस्तु पद्मतीर्थादिकृतापराधं राजसमक्षं प्रकटीकृत्य तं निन्दयित्वा पुस्तकजातं ग्रहीष्यामीति बुद्ध्या स्वयमगृहीत्वा तत्रस्थस्य कस्यचित् मध्यस्थस्य ब्राह्मणस्य सन्निधावेव निधाय सह्यपर्वतस्थ-स्वकीयशिष्यजनप्रीत्यर्थं सह्यपर्वतं जगाम । तदनन्तरं तत् श्रुत्वा जयसिंहराजः तत्पुस्तकजातं दापयिष्यामीति बुद्ध्या मध्वाचार्यं स्वदूतमुखेन सम्प्रार्थ्य स्वराजधानीं प्रति आह्वयामास । आहूतो मध्वाचार्यः अनेकविधैः यतिगृहस्थब्रह्मचारिभिः अनेकैः शिष्यैः परिवृतस्सन् जयसिंहराजधानीं प्रत्यागत्य विष्णुमङ्गलाख्यदेवालये प्रविश्य उवास । तदा त्रिविक्रमाचार्यः यथा देवेन्द्रः तत्त्वं वेत्तुं चतुर्मुखं जगाम तथा तत्त्वं वेत्तुमनास्सन् मध्वाचार्यमुपेत्य अभ्यवन्दत इति । वसन्ततिलकावृत्तं 'उक्ता वसन्ततिलका तभजा जगौ गः' इति तल्लक्षणात् ॥ ६९ ॥

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां
शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः

परिवृढघनसङ्घे राजसिंहोर्जशक्त्या त्यजति मलिनभावं नीरसत्वान्निकामम् ।
स्फुटमुदयति तेजस्व्युज्ज्वले मध्वभानौ सुजनजलजकान्त्यै विश्वमासीन्मनोज्ञम् ॥१॥

भावप्रकाशिका – ऊर्जः शरद उत्तरभागः । मलिनभावं मानसभावं नीलत्वं च । विश्वं कार्यमशेषं जगच्च ॥ १ ॥

पदार्थदीपिकोद्बोधिका – परिवृढेति ॥ परिवृढाः स्तम्भविषयोद्भवा ग्रामण्यः त एव घनाः तेषां सङ्घः समूहः तस्मिन् । राजसिंहो राजश्रेष्ठो जयसिंहाख्यः स एव ऊर्जो वृश्चिकमासः तस्य शक्तिः सामर्थ्यं तया । निर्गतो रसो बलं यस्मात्स नीरसः तस्य भावः तत्वं तस्माद्दुर्बलत्वादित्यर्थः । मलिनभावं मलिनत्वं, पद्मादिषु पक्षपातं श्रीमध्वद्वेषञ्चेत्यर्थः निकामं नितरां त्यजति सति, तेजस्वी च असौ उज्वलश्च तेजस्व्युज्वलः तस्मिन् । तेजस्विनां मध्य उज्वलो अधिकं शोभमान इति वा । मध्व एव भानुः सूर्यः तस्मिन् । सुजना एव जलजानि पद्मानि तेषां कान्तिः तस्यै । स्फुटं सम्यक् उदयति सति नृपादिसर्वजनपूज्यत्वादिसम्पदं गच्छति सति इत्यर्थः । विश्वं सकलं कार्यजातं मनोज्ञं मनोहरमासीत् । राजानं श्रीमध्ववशवर्तिनं दृष्ट्वा तद्भयेन ग्रामीणजने श्रीमध्वप्रातिकूल्यं परित्यज्य आनुकूल्यं भजति सति, प्राक् शङ्करार्यकरात् पद्मतीर्थकृतपुस्तकापहारस्य शङ्करार्यसंमाननात्मकप्रतिक्रियापूर्वकं राज्ञि श्रीमध्वक्षमापनोन्मुखे सति सर्वं कार्यं मनोहरमासीदित्यभिप्रायः । श्लेषार्थे तु– घनसङ्घे ऊर्जशक्त्या शरत्कालोत्तरस्य वृश्चिकमासस्य सामर्थ्येन निर्जलत्वान्मालिन्यं त्यजति सति शुभ्रत्वञ्च भजति सति सूर्ये च शरदि मेघावरणरहितत्वेन स्फुटं उदयति सति विश्वं जगत् सर्वतो दिशं यथा मनोहरं भवेत् तद्विदिति भावः । अत्र श्लेषरूपकयोः सङ्करः । सर्गेऽस्मिन् प्रायो मालिनीवृत्तम् । 'ननमयययुतेयं मालिनी भोगिलोकैरि'ति ॥

मन्दोपकारिणी – परिवृढेति ॥ परिवृढघनसङ्घे परिवृढाः स्तम्भविषयगतोभयग्रामप्रभवः 'नाथः परिवृढः प्रभुः' इत्यमरः घनाः मेघाः 'घनजीमूतमुदिरजलमुग्धूमयोनयः' इत्यमरः परिवृढा एव घनाः तेषां सङ्घे समूहे । राजसिंहोर्जशक्त्या राजसिंहः राजश्रेष्ठः जयसिंहः स

एव ऊर्जः कार्तिकमासः 'कार्तिके बाहुलोर्जौ कार्तिकिकः' इत्यमरः तस्य शक्त्या सामर्थ्येन। नीरसत्वात् निर्गतः रसः वीर्यं येभ्यः नीरसाः तेषां भावः नीरसत्वं तस्मात् दुर्बलत्वात् 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः । मलिनभावं मलिनत्वं पद्मतीर्थादिषु पक्षपातं श्रीमध्वद्वेषं च इत्यर्थः । निकामं नितरां त्यजति सति विसृजति सति तेजस्व्युज्ज्वले तेजस्विनां कान्तिमतां मध्ये उज्ज्वले अधिकं प्रकाशमाने मध्वभानौ मध्वाख्यसूर्ये । सुजनजलजकान्त्यै सुजनाः सज्जना एव जलजानि कमलानि तेषां कान्त्यै विकासाय स्फुटं स्पष्टं उदयति सति जयसिंहप्रभृतिसर्वजनपूज्यत्वादिरूपाभ्युदयं प्राप्नवति सति विश्वं समस्तं कार्यजातं मनोज्ञं मनोहरं आसीत् । जयसिंहराजं श्रीमध्वाचार्यवशवर्तिनं दृष्ट्वा तद्भयेन उभयग्रामाधिपजने श्रीमध्वप्रातिकूल्यं परित्यज्य आनुकूल्यं च भजति सति तदनन्तरं श्रीमध्वे सज्जनहर्षाय प्रसन्नमुखे सति सर्वं कार्यं मनोहरमासीत् इत्यर्थः । मेघसङ्घः ऊर्जशक्त्या कार्तिकमासाख्यकालशक्त्या शरत्कालसामर्थ्येनेति यावत् । नीरसत्वात् निर्जलत्वात् मलिनभावं नीलत्वं त्यजति सति सूर्ये च कमलविकासाय शरत्काले मेघावरणरहितत्वेन स्फुटं उदयति सति प्रकाशमाने सति विश्वं जगत् सर्वतो दिशं यद्वत् मनोहरं भवेत् तद्वत् इति भावः । प्रायेण अस्मिन् सर्गे मालिनीवृत्तं 'ननमयययुतेयं मालिनी भोगिलोकैः' इति तल्लक्षणात् ॥ १ ॥

कृतमपकृतमार्यैः क्षम्यतां क्षान्तिभूषैरिति मृदु वदतां सम्प्रार्थनाभिः प्रभूणाम्।
अपहृतमपरेषां मन्त्रतोग्रन्थजातं दशहृदयनियोगादग्रहीच्छङ्करार्यः ॥ २ ॥

पदार्थदीपिकोद्बोधिका – कृतमिति ॥ शङ्करार्यः पूर्वं चोलजेन यस्य करात् पुस्तकं अपहृतं स इत्यर्थः । अपरेषां मायिनां मन्त्रतः कुमन्त्रादपहृतं ग्रन्थजातं, क्षान्तिः क्षमा भूषा भूषणं येषां तैः आर्यैः पूज्यैः भवद्भिः, कृतं अविवेकिभिः बालिशैः कृतं, अपकृतं ग्रन्थापहाराख्यापराधः । अत्र भावे क्तः । क्षम्यतामिति एवं मृदु सामपूर्वकं यथा भवति तथा वदतां प्रभूणां उभयग्रामस्वामिनां स्तम्भविषयाधीशस्य जयसिंहस्य च सम्प्रार्थनादिभिः, अपि च दशहृदयनियोगात् श्रीपूर्णप्रज्ञाचार्याज्ञात अग्रहीत् । अयमभिप्रायः – चोलजं पद्मतीर्थं पौर्णमास्यामुत्थाय निशीथ एव विद्रुतमेव श्रुत्वा तद्ग्रामजनैः तेनापहृतं ग्रन्थजातं श्रीमध्वाय समर्पितम् । स तु तन्मध्यस्थकरे स्थापयित्वा निजशिष्यमुदे सह्यगिरिमाप्तः । तच्छ्रुत्वा राजमुखेन प्रार्थिते तस्मिन् श्रीमध्वे विष्णुमङ्गलं गते सति तत्सन्निधौ

राज्ञोभयग्रामपरिवृढजनैश्च क्षमापितः शङ्करार्यः क्षितिपतिना तत्रानाययितं ग्रन्थजातं श्रीमध्वाज्ञयाऽग्रहीदिति ॥ २ ॥

मन्दोपकारिणी – कृतमिति ॥ शङ्करार्यः पूर्वं चोलजेन यस्य शङ्करार्यस्य हस्तात् पुस्तकजातं अपहृतं सः शङ्करार्यः । अपरेषां मायिनां मन्त्रतः कुमन्त्रात् अपहृतं ग्रन्थजातं ग्रन्थस्य समूहं अग्रहीत् स्वीचकार । 'ग्रह उपादाने इत्यतो लुङ् परस्मैपदं अग्रहीत् अग्रहीष्टां अग्रहीषुः' । कथं । हे शङ्करार्याः ! क्षान्तिभूषैः क्षान्तिः क्षमा भूषा अलङ्कारो येषां ते तथोक्ताः तैः 'भूषा तु स्यादलङ्क्रियां' इत्यमरः आर्यैः पूज्यैः सर्वसम्भावितैः इत्यर्थः । एवंभूतैः भवद्भिः विवेकिभिः बालिशैः कृतं अपकृतं ग्रन्थापहाराख्यापराधः क्षम्यतां सह्यताम् । 'क्षमूष् सहने इत्यतः कर्मणि लोट् आत्मनेपदं क्षम्यतां क्षम्येतां क्षम्यन्ताम्' । इत्थं मृदु सान्त्वपूर्वकं यथा स्यात् तथा वदतां प्रभूणां उभयग्रामाधिपतीनां स्तम्भदेशाधीशस्य जयसिंहराजस्य च सम्प्रार्थनाभिः याचनाभिः प्रार्थनानिमित्तेनेति यावत् । दशहृदयनियोगाच्च 'दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते' इति वचनात् दश पूर्णं हृदयं यस्य स तथोक्तः मध्वाचार्यः तस्य नियोगात् आज्ञायाश्च । अयं भावः- मध्वाचार्यं प्रसन्नमुखं दृष्ट्वा उभयग्रामपरिवृढाः देशाधिपतिः जयसिंहराजश्च, हे शङ्करार्याः । सर्वत्र सम्भाविताः भवन्तः अविवेकिभिः बालिशैः पद्मतीर्थादिभिः कृतं ग्रन्थापहारलक्षणापराधं क्षम्यतां, मध्वाचार्यपुस्तकजातं गृह्णन्तु इत्येवं शङ्करार्यं सम्प्रार्थ्य पद्मतीर्थापहृतं मध्यस्थपुरुषहस्ते स्थापितं पुस्तकजातं समर्पितवन्तः । एवं प्रार्थितः शङ्करार्यः श्रीमध्वाचार्याणां आज्ञया तत्पुस्तकजातं स्वीकृतवान् ॥ २ ॥

परिवृतमवनम्रैर्ग्रामणीग्राम्यपूर्वैः अवनतमुरुचेतःपादपार्श्वे नृसिंहम् ।
सहजविजयतोऽयुग्विक्रमार्यः प्रसन्नः कविकुलतिलकोऽसावाशिषाऽतोषयत्तम् ॥३॥

भावप्रकाशिका –

'स्वस्सुन्दरीभुजलतापरिरम्भणी धूः पौरन्दरी भवति यं भजतां भुजिष्या ।
आनन्दतीर्थभगवत्पदपद्मरेणुः स्वानन्ददो भवतु ते जयसिंह भूप'इत्याशिषा ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – परीति ॥ कवीनां कुलं समूहः तस्य तिलकभूतः कविकुलतिलकः । सहजः सोदरः शङ्करार्यः तस्य विजयः तस्मादिति ततः ।

सन्मानपूर्वकमपहृतपुस्तकलाभाख्यविजयलाभादित्यर्थः । प्रसन्नः सन्तुष्टः असौ अयुग्विक्रमार्यः त्रिविक्रमपण्डितः । अवनम्रैः विनीतैः ग्रामण्यः ग्रामाधिपतयः ते च ग्राम्या ग्रामोद्भवा विप्राः, ते च ते पूर्वे येषां ते तथा तैः नानाजनैः परिवृतम् । उरुचेतसः श्रीपूर्णप्रज्ञस्य पादपार्श्वे पादसन्निधौ अवनतं नम्रं नृसिंहं जयसिंहराजमाशिषा पद्यरूपेण वाक्येन । 'आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोरि'ति वैजयन्ती अतोषयत् । तच्च पद्यमिदं 'स्वः सुन्दरीभुजलतापरिरम्भणी धूः पौरन्दरी भवति यं भजतां भुजिष्या । आनन्दतीर्थभगवत्पदपद्मरेणुः स्वानन्ददो भवतु ते जयसिंहभूप !' एतदर्थानुवादरूपः 'उपचरति नितान्तमि'त्युपरितनश्लोकः ॥ ३ ॥

मन्दोपकारिणी – परिवृतमिति ॥ कविकुलतिलकः कवीनां पण्डितानां कुलस्य तिलकः ललामभूतः । सहजविजयतः सहजस्य सोदर्यस्य शङ्कराचार्यस्य विजयतः सन्मानपूर्वकं अपहृतपुस्तकलाभाख्यविजयलाभात् प्रसन्नः सन्तुष्टः 'समानोदर्यसोदर्यसगर्भ्यसहजाः समाः' इत्यमरः । असौ अयुग्विक्रमार्यः त्रिविक्रमपण्डिताचार्यः अवनम्रैः विनीतैः ग्रामणीग्राम्यपूर्वैः ग्रामण्यः ग्रामाधिपतयश्च ग्राम्याः ग्रामे भवाः विप्राश्च एते पूर्वे आदयो येषां ते तथोक्ताः तैः नानाजनैः परिवृतं जनमध्ये विद्यमानं इति यावत् 'ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु' इत्यमरः । उरुचेतःपादपार्श्वे उरुचेतसः पूर्णप्रज्ञाचार्यस्य पादयोः चरणयोः पार्श्वे सन्निधौ अवनतं नम्रीभूतं नृसिंहं नृणां पुरुषाणां सिंहं श्रेष्ठं जयसिंहराजं आशिषा आशीर्वचनेन अतोषयत् सन्तोषयामास । 'तुष् तुष्टौ' इति धातोर्लङ् परस्मैपदम् । पुस्तकस्वीकरणसमये तस्यां सभायां उपविष्टः त्रिविक्रमाचार्यः स्वानुजस्य शङ्कराचार्यस्य जयसिंहराजादिकृतबहुमानेन सन्तुष्टस्सन् जनसंसदि श्रीमध्वसमीपे नम्रीभूय उपविष्टं जयसिंहराजं आशीर्वचनेन अतोषयत् इति भावः ॥ ३ ॥

उपचरति नितान्तं हन्त पौरन्दरी धूर्युसदसि भजतो यं दुर्लभा दभ्रभाग्यैः ।
दिशतु स परमानन्दाग्र्यतीर्थाङ्घ्रिरेणुर्धरणिधर सुखं ते सन्ततं स्वान्तरेति ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – उपचरतीति ॥ शोभनं आन्तरं मनो यस्य स स्वान्तरः तत्सम्बुद्धिः । धरणीधर राजन् ! यं अङ्घ्रिरेणुं भजतः सेवमानान् सत्पुरुषान्, दभ्रं अल्पं भाग्यं येषां ते तथा तैः दुर्लभा, पुरन्दरपदप्राप्तियोग्यत्वलक्षणभाग्यरहितैर्दुर्लभेत्यर्थः । न हि

पुरन्दरत्वप्राप्तियोग्यसत्वरहितैः पुरन्दरव्यापारो लभ्यः । तस्मात् दभ्रभाग्यैः दुर्लभा हि । पुरन्दरस्य सम्बन्धिनी पौरन्दरी धूः व्यापारो द्युसदसि स्वर्गसभायां नितान्तं अत्यन्तं उपचरति सम्भावयति । श्रीमध्वचरणरजः सेवकसम्भावनारूपं व्यापारं इन्द्रः स्वसदसि दर्शयतीत्यर्थः । स तथाविधः परमानन्दतीर्थाग्र्यांघ्रिरेणुः परमो य आनन्दतीर्थः तस्य यावग्र्यांघ्री तयो रेणू रजः ते तव सन्ततं सुखं सौख्यं दिशतु ददातु इति अतोषयत् इति सम्बन्धः ॥ ४ ॥

मन्दोपकारिणी – आशीर्वचनप्रकारमाह ॥ **उपचरतीति** ॥ हे स्वान्तर सु निर्दुष्टं आन्तरं मनः यस्य स तथोक्तः तस्य सम्बुद्धिः हे स्वान्तर । धरणिधर धरतीति धरः धरण्याः धरः तस्य सम्बुद्धिः, हे धरणिधर भूप । सः एतादृशः परमानन्दाग्र्यतीर्थाङ्घ्रिरेणुः आनन्दप्रदं अग्र्यं श्रेष्ठं तीर्थं शास्त्रं यस्य आनन्दाग्र्यतीर्थः परमः उत्तमश्चासौ आनन्दाग्र्यतीर्थश्च परमानन्दाग्र्यतीर्थः तस्य अङ्घ्रयोः चरणयोः रेणुः धूलिः, ते तव सन्ततं सर्वदा सुखं दिशतु ददातु । 'दिश अतिसर्जने' इति धातोः लोट् परस्मैपदम् । कीदृशः अङ्घ्रिरेणुः ? यं अङ्घ्रिरेणुं भजतः सेवमानान् सत्पुरुषान् दभ्रभाग्यैः दभ्रं स्वल्पं भाग्यं पुण्यं येषां ते तथोक्ताः तैः 'स्तोकाल्पक्षुल्लकाः श्लक्ष्णं सूक्ष्मं दभ्रं कृशं तनु' इत्यमरः । दुर्लभा लब्धुमशक्या पुरन्दरपदप्राप्तियोग्यतालक्षणभाग्यरहितैः दुर्लभा इत्यर्थः । न हि पुरन्दरपदप्राप्तियोग्यत्वरहितैः पुरन्दरव्यापारो लभ्यः तस्मात् दभ्रभाग्यैः दुर्लभा, पौरन्दरी पुरन्दरस्य शचीपतेः इन्द्रस्य सम्बन्धिनी पौरन्दरी धूः व्यापारः स्थानं वा द्युसदसि द्योः स्वर्गस्य सदसि सभायां 'सुरलोको द्योदिवौ द्वे' इत्यमरः नितान्तं अतिशयेन उपचरति सम्भावयति हन्त हर्षः । यं पादरेणुं सेवमानान् इन्द्रपदयोग्यान् पुरुषान् अमरावती सेवते इत्यर्थः । अनेन इन्द्रपदयोग्याः जीवाः मध्वाचार्यपादरेणुसेवयैव स्वर्गाधिपत्यं प्राप्नुवन्तीति उक्तं भवति । एवंभूताङ्घ्रिरेणुः ते सुखं दिशतु इति अतोषयत् इति पूर्वश्लोकस्थेनान्वयः । 'चर गतिभक्षणयोः' इति धातोः लट् परस्मैपदम् ॥ ४ ॥

अनतिपरिचितस्याप्यस्य सोऽयं कवीन्द्रो गुणरसमतिगूढं ज्ञातवानित्यचित्रम् ।
मधु मधुकरराजो निष्पतन् पौष्पमासुं ननु परिचयहीनः काननेऽपि प्रभुः स्यात् ॥५॥

पदार्थदीपिकोद्बोधिका – अनतीति ॥ सोऽयं कवीन्द्रस्त्रिविक्रमार्यः । अत्यन्तं परिचितो न भवति इति अनतिपरिचितस्य अपि श्रीमध्वस्य अतिगूढं अतिगूहितं पामरैः

अज्ञेयमित्यर्थः । गुणरसं गुणसारं ज्ञातवान् इत्येतत् अचित्रं आश्चर्यं न भवति । तथा हि कानने वने निष्पतन् सञ्चरन् , मधु कुर्वन्तीति मधुकराः तेषां राजा श्रेष्ठो मधुकरराजः परिचयहीनोऽपि, पुष्पस्य सम्बन्धि पौष्पं मधुपुष्परसमाप्तुं प्राप्तुं प्रभुः शक्तः स्यात् ननु । यथा पुष्परसं अन्विष्यन् भ्रमरः काननेऽपि निष्पतन् प्रागदृष्टस्यापि पुष्पस्य मधु प्राप्नोत्येव । पुष्पसन्दर्शनमात्रेण तन्मधुवैशेष्यं ज्ञात्वा स्वीकरोति तद्वत् अयं अपि इति भावः । अत्रार्थान्तरन्यासालङ्कारः ॥ ५ ॥

मन्दोपकारिणी – अनतीति ॥ सोऽयं कवीन्द्रः पण्डितश्रेष्ठः त्रिविक्रमाचार्यः । अनतिपरिचितस्यापि अपरिचितस्य प्रागतिशयेन अविदितस्यापि अस्य श्रीमध्वाचार्यस्य अतिगूढं अत्यन्तं आच्छादितं गुणरसं गुणसारं ज्ञातवान् इति इत्येतत् अचित्रं आश्चर्यं न भवति । कुतः ? कानने वने 'गहनं काननं वनं' इत्यमरः निष्पतन् सञ्चरन् मधुकरराजः मधुकराणां भ्रमराणां राजा श्रेष्ठः 'मधुव्रतो मधुकरो मधुलिण्मधुपालिनः' इत्यमरः । परिचयहीनोऽपि परिचयेन प्राक् ज्ञानेन रहितोऽपि पूर्वमविदितवानपि पौष्पं पुष्पाणां सम्बन्धि मधु मकरन्दं आप्तुं लब्धुं प्रभुः शक्तः स्यान्ननु । 'मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः । दैत्ये चैत्रे वसन्ते च जीवशाके मधुर्द्रुमे' इति विश्वः । यथा पुष्परसान्वेषण-तत्परो भ्रमरः कानने सञ्चरन् प्राक् अदृष्टस्यापि पुष्पस्य रसं प्राप्नोत्येव पुष्पदर्शनमात्रेण तद्गतमकरन्दविशेषं स्वीकरोत्येव तद्वत् अयं त्रिविक्रमाचार्योऽपि प्रागतिपरिचयहीनस्यापि मध्वाचार्यस्य गुणविशेषं ज्ञातवान् । तादृशसूक्ष्मवेदनशक्तिमत्वात् अतः नेदमाश्चर्यं इति भावः ॥ ५ ॥

अखिलखलकुलानां वर्धयन् द्वेषदोषं विदधदपि नराणां कौतुकं मध्यमानाम् ।
स्वगतिसमुचितानां भूतिदायी शुभानां बहुलहृदिह निन्ये शर्वरीः काश्चिदेवम् ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – अखिलेति ॥ बहुलहृत् श्रीपूर्णप्रज्ञार्यः । अखिलाः सर्वे ये खला दुर्जनाः तमोयोग्याः इत्यर्थः । तेषां कुलानि समूहास्तेषां द्वेष एव दोषः तं, आत्मविषयकद्वेषाख्यदोषमित्यर्थः । वर्धयन् सन् । मध्यमानां मध्यमाधिकारिणां नराणां कौतुकमाश्चर्यं विदधत् कुर्वन् सन् । अमानुषैः स्वचरित्रैरिति भावः । स्वस्य स्वतन्त्रस्य श्रीहरेः गतिः स्वगतिः तस्याः समुचितानां योग्यानां मुक्तियोग्यानामित्यर्थः । शुभानां सज्जनानां भूतिं ज्ञानभक्त्यादिसम्पदं दातुं शीलं अस्येति भूतिदायी सन् इह विष्णुमङ्गल एवं वक्ष्यमाणप्रकारेण काश्चित् शर्वरीः रात्रीः निन्ये गमयामास ॥ ६ ॥

मन्दोपकारिणी – अखिलेति ॥ बहुलहृत् पूर्णप्रज्ञाचार्यः । इह विष्णुमङ्गले एवं वक्ष्यमाणप्रकारेण काश्चित् शर्वरीः रात्रीः निन्ये गमयामास । 'णीञ् प्रापणे' इत्यतो लिट् आत्मनेपदं निन्ये निन्याते निन्यिरे । कतिचित् दिनानि विष्णुमङ्गले उवास इति भावः । किं कुर्वन्? अखिलखलकुलानां अखिलानां खलानां अधमजनानां कुलानां समूहानां 'क्रूरे नीचेऽधमे खलः' इति विश्वः । द्वेषदोषं आत्मविषये द्वेषाख्यदोषं वर्धयन् अभिवर्धयन् मध्यमानां नराणां कौतुकं आश्चर्यं विदधत् कुर्वन् अमानुषैः स्वचरित्रैः इति भावः । स्वगतिसमुचितानां स्वगतेः स्वकीयगतेः समुचितानां मुक्तिप्राप्तियोग्यानां शुभानां सज्जनानां भूतिदायी भूतेः भक्त्युद्रेकाद्यैश्वर्यस्य दायी दानशूरः 'भूतिर्भस्मनि सम्पदि' इत्यभिधानम् । अमानुषमध्वाचार्यस्य दर्शनेन तदसहमानानां अधमानां मध्वे द्वेषो भवति मध्यमानां आश्चर्यं भवति उत्तमानां मध्वाचार्ये भक्त्युद्रेको भवतीति भावः ॥ ६ ॥

उदयति विनताया नन्दने श्लाघ्यकाले स कृतसकलकृत्यः कृत्यवेदिप्रवेकः ।
अरुणयवनिकान्तर्ब्रह्म नारायणाख्यं गुरुगुणमभिदध्यौ योग्ययोगासनस्थः ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – उदयतीति ॥ कृत्यं कर्तव्यं विदन्ति तच्छीला इति कृत्यवेदिनः तेषु प्रवेक उत्तमः । 'अग्रचं प्राग्रहणं प्रवेकमपरं वर्यं वरेण्यं वरमि'ति हलः । स श्रीमध्वः विनताया विनतादेव्या नन्दने पुत्रेऽरुण उदयति सति । श्लाघ्यः प्रातः सन्ध्याकर्मणः प्रशस्तो यः कालः तस्मिन् कृतं सकलकृत्यं कृत्स्नस्नानादिव्यापारो येन स तथोक्तः सन् । अरुणा रक्ता च सा यवनिका च तस्या अन्तर्भागे योग्यं यद्योगासनं तस्मिंस्तिष्ठतीति तथोक्तः । 'नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरमि'त्युक्तलक्षणवत्तया ध्यानयोग्यासन उपविष्टः सन्नित्यर्थः । गुरवो बहवो गुणा यस्य स तथा तं नारायणाख्यं ब्रह्म अभिदध्यौ ध्यायति स्म ॥ ७ ॥

मन्दोपकारिणी – उदयतीत्यादिनोत्तरग्रन्थेन ॥ कृत्यवेदिप्रवेकः कृत्यानि विहितकर्तव्यानि विदन्तीति कृत्यवेदिनः तेषां प्रवेकः उत्तमः 'क्लीबे प्रधानं प्रमुखं प्रवेकानुत्तमोत्तमाः' इत्यमरः । विहितकर्मज्ञश्रेष्ठः सः मध्वाचार्यः विनताया नन्दने विनतायाः कश्यपपत्न्याः नन्दने सुते अरुणे 'सूर्यसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः' इत्यमरः । उदयति सति श्लाघ्यकाले

प्रातःस्नानसन्ध्यादिकर्मणः श्लाघ्ये प्रशस्ते काले । कृतसकलकृत्यः कृतानि सकलानि कृत्यानि स्नानाद्यखिलकर्माणि येन स तथोक्तस्सन् । अरुणयवनिकान्तः अरुणा रक्तवर्णा च सा यवनिका तिरस्करणी च 'प्रतिसीरा यवनिका स्यात्तिरस्करिणी च सा' इत्यमरः समाधिशुद्धयै दुर्जननिवारणाय स्वस्य जनस्य च मध्यभागे भित्तिका आवरणत्वेन बद्धमानपटविशेषः यवनिका इत्युच्यते तस्याः अन्तः मध्ये 'अन्तर्मध्ये तथा प्रान्ते' इति विश्वः । योग्ययोगासनस्थः योग्यं 'नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्' इत्युक्तलक्षणवत्तया ध्यानयोग्यं योगस्य ध्यानस्य आसनं तत्र तिष्ठतीति योग्ययोगासनस्थः ध्यानासनसंनिषण्णः इत्यर्थः 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः । एतादृशः सन् गुरुगुणं गुरवः अनन्ताः गुणाः ज्ञानानन्दादयः यस्य तत् गुरुगुणं गुणपरिपूर्णं नारायणाख्यं नारायण इति आख्या नाम यस्य तत् तथोक्तं ब्रह्म परब्रह्म अभिदध्यौ ध्यातवान् 'ध्यै चिन्तायामि' त्यतो लिट् परस्मैपदं दध्यौ दध्यतुः दध्युः ॥ ७ ॥

अतिधवलितदन्ता दन्तकाष्ठैः प्रशस्तैरपि युगपदनेके सस्नुरत्र व्रतीन्द्राः ।
गुरुभिरभिहितेष्वाचारभेदेषु निष्ठां स्फुटमवगमयन्तः सौष्ठवात् कर्मणां च ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ प्रशस्तैः 'कनिष्ठिकासमं स्थौल्ये द्वादशाङ्गुलमायतम् । सत्वचं दन्तकाष्ठं स्यात्तस्याग्रेण तु धावयेदित्युक्तलक्षणवत्तया प्रशस्तैः दन्तानां शोधकानि काष्ठानि दन्तकाष्ठानि तैः अतिधवलिता दन्ता यैः ते तथोक्ताः । कर्मणां स्वविहितप्राणायामादिकर्मणां सौष्ठत्वं तस्मात् । न केवलं यथा कथञ्चिदाचरणमात्रात् किन्तु न्यूनाधिक्यराहित्यलक्षणसौष्ठवाच्च । गुरुभिः अभिहितेष्वाचारभेदा आचारविशेषाः तेषु निष्ठां आस्थां स्फुटं सम्यक् अवगमयन्तो ज्ञापयन्तो अनेके बहवो व्रतीन्द्रा यतिश्रेष्ठा अत्र तटाके युगपत् सस्नुः । ष्णा शौचे लिट् ॥ ८ ॥

मन्दोपकारिणी – अतीति ॥ अनेके बहवः व्रतीन्द्राः व्रतीनां यतीनां इन्द्राः श्रेष्ठाः अत्र तटाके युगपत् एकदा 'तदा तदानीं युगपदेकदा सर्वदा सदा' इत्यभिधानम् । सस्नुः स्नातवन्तः 'ष्णा शौचे' इत्यतो लिट् परस्मैपदं सस्नौ सस्नतुः सस्नुः । कथंभूताः प्रशस्तैः 'कनिष्ठिकासमं स्थौल्ये द्वादशाङ्गुलमायतम् । सत्वचं दन्तकाष्ठं स्यात् तस्याग्रेण तु धावयेत्'। इत्युक्तलक्षणवत्तया विहितैः दन्तकाष्ठैः दन्तानां शोधनकाष्ठैः अतिधवलितदन्ता

अपि अति अत्यन्तं धवलिताः निर्णिक्ताः दन्ताः दशनाः यैः ते तथोक्ताश्च । कर्मणां स्वविहितशौचाचमनप्राणायामादिकर्मणां सौष्ठवाच्च न्यूनाधिक्यराहित्यलक्षणात् सौष्ठवात् सम्यक् आचरणाच्च न तु यथा कथञ्चित् आचरणमात्रात् इति भावः । गुरुभिः स्वस्वगुरुभिः अभिहितेषु आचारभेदेषु आचारविशेषेषु निष्ठां आस्थां आदरमिति यावत् । स्फुटं सम्यक् अवगमयन्तः ज्ञापयन्तः लोकानां इति शेषः । अयं भावः विहितकाष्ठेन दन्तान् शोधयित्वा शौचाचमनादिकर्मणां न्यूनाधिक्यं यथा न स्यात् तथा कर्मानुष्ठानेन स्वगुरूपदिष्टाचारेषु यतीनां अत्यादरो वर्तते इति ज्ञायते लोकानां इति ॥ ८ ॥

चरमसमयसुप्ताः पूर्वमुत्थाय शिष्याः गुरुजनपरिचर्यां चक्रिरे दुष्करां च ।
सबहुमति तदाद्यप्यार्धरात्रात्प्रसन्नाः सुगतिरपरथैषां स्यात्कथङ्कारमिष्टा ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – चरमेति ॥ चरमो गुरुजनसुप्त्यनन्तरं यः समयः कालस्तस्मिन् सुप्ता निद्रिता शिष्याः पूर्वं गुरुजनोत्थानात्पूर्वमुत्थाय । तदादि तदुत्थानं आदिर्यथा भवति तथाऽऽर्धरात्रान्निशीथादपि, एष्यत् अर्धरात्रपर्यन्तमपीत्यर्थः । 'अर्धरात्र निशीथौ द्वावि'त्यमरः । प्रसन्ना अरतिविरहिताः सन्तो दुष्करां अल्पभाग्यैः कर्तुमशक्यां गुरुजनपरिचर्यां बहुमत्या बहुमानेन सहितं यथा भवति तथा सबहुमति सादरमित्यर्थः । चक्रिरे । अपरथा एवं गुरुजनपरिचर्याकरण एषां शिष्याणामिष्टा अभीष्टा सुगतिः सद्गतिः कथङ्कारं केन प्रकारेण स्याद्भवेत् ? ॥ ९ ॥

मन्दोपकारिणी – चरमेति ॥ चरमसमयसुप्ताः चरमे अन्त्ये समये काले गुरुजनसुप्त्यनन्तरं इति भावः 'चरमोऽन्त्ये च पश्चिमे' इति विश्वः सुप्ताः निद्रिताः शिष्याः छात्राः पूर्वं गुरुजनोत्थानात् प्राक् उत्थाय शयनादुत्थाय प्रबुद्धय इति यावत् । तदादि सः प्रबोधकाल आदिः यथा भवति तथा तदादि प्रबोधकालमारभ्येति यावत् । आर्धरात्रात् इति पदच्छेदः अर्धरात्रं आमर्यादीकृत्य भविष्यदर्धरात्रमपि, प्रसन्नाः सन्तः दुष्करां च अल्प-भाग्यैः कर्तुं अशक्यामपि गुरुजनपरिचर्यां गुरुजनानां परिचर्यां शुश्रूषां 'वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्' इत्यमरः । सबहुमति बहुमत्या बहुमानेन सहितं यथा भवति तथा सबहुमति गुरुषु आदरपूर्वकं इत्यर्थः । चक्रिरे कृतवन्तः । एवं गुरुसेवाकरणं आवश्यकं

इत्याह सुगतिरिति ॥ अपरथा गुरुशुश्रूषाकरणाभावे एषां शिष्याणां इष्टा अभीष्टा सुगतिः सद्गतिः कथङ्कारं केन प्रकारेण स्यात् भवेत् ॥ ९ ॥

श्रवणमननहेतोः प्राक् चिरायास्तनिद्रः सपदि विवशयन्त्या निद्रया ग्रस्तचेताः ।
स्वयमपि नयति द्रागङ्गवस्त्रादि पूज्ये झटिति विगतनिद्रः कोऽपि शिष्योऽन्वशेत
॥१०॥

पदार्थदीपिकोद्बोधिका – श्रवणेति ॥ श्रवणस्य श्रुतग्रन्थस्य मननहेतुः मननिमित्तं तस्मात् । श्रवणं भागवतादिश्रवणं तच्च मननं श्रुतग्रन्थविमर्शनं तच्च तद्धेतोरिति वा । प्राक् पूर्वरात्रे चिराय बहुकालं अस्ता निरस्ता निद्रा येन स तथोक्तः । अत एव सपदि तदानीं अरुणोदयकाल इत्यर्थः । विवशयन्त्या परवशयन्त्या निद्रया ग्रस्थमावृतं चेतो बुद्धिः यस्य स तथा सन् झटिति सहसा विगता निद्रा यस्य स तथा कोऽपि कश्चन शिष्यः पूज्ये स्वगुरौ । अङ्गवस्त्रमादिः यस्य तदङ्गवस्त्रादि, गुरोः पूर्वं उत्थाय आत्मना नेतव्यं स्वगरुस्नानाङ्गं अङ्गसंमार्जनवस्त्रपेट्यादिकम् । गुरौ स्वयमपि स्वयमेव द्राक् शीघ्रं नयति सतिस्र अन्वशेत पश्चात्तप्तोऽभूत् । शीङ् स्वप्ने लङ् ॥ १० ॥

मन्दोपकारिणी – श्रवणेति ॥ श्रवणमननहेतोः श्रवणं ग्रन्थश्रवणं मननं श्रुतग्रन्थविचिन्तनं श्रवणमनने ते एव हेतुः तस्मात् श्रवणमननाख्यनिमित्तात् इत्यर्थः । प्राक् पूर्वरात्र्यां चिराय बहुकालं अस्तनिद्रः अस्ता निरस्ता निद्रा स्वापः येन स तथोक्तः 'स्यान्निद्रा शयनं स्वापः' इत्यमरः । तत एव हेतोः सपदि तत्क्षणे अरुणोदयकाले इति यावत् 'सद्यः सपदि तत्क्षणे' इत्यमरः । विवशयन्त्या स्ववशं कुर्वन्त्या अत्यजन्त्या इति यावत् । निद्रया ग्रस्तचेताः निद्रया ग्रस्तं आवृतं चेतो मनो यस्य स तथोक्तः सन् झटिति सहसा विगतनिद्रः विगता निरस्ता निद्रा यस्मात् स तथोक्तः । कोऽपि यः कश्चन शिष्यः पूज्ये स्वगुरौ स्वयमपि स्वयमेव अङ्गवस्त्रादि अङ्गस्य शरीरस्य वस्त्रं स्नानानन्तरं संमार्जनवस्त्रं आदि यस्य तत् अङ्गवस्त्रादि स्नानसाधनं यद्वा अङ्गं स्नानाङ्गं च तत् वस्त्रादि च अङ्गवस्त्रादि आदिपदेन दण्डादि 'अङ्गं गात्रान्तिकोपायंप्रतीकेष्वप्रधानकः' इति विश्वः । द्राक् शीघ्रं नयति सति गुरौ स्वयमेव स्नानसाधनमादाय गच्छति सति इति यावत् । अन्वशेत पश्चात्तप्तोऽभूत् 'अनुपूर्वकात् शीङ् स्वप्ने' इति धातोः लङ् आत्मनेपदं अशेत अशेयातां अशेरत । कश्चित् शिष्यः पूर्वरात्रौ श्रुतग्रन्थचिन्तनेन निमित्तेन बहुकालजागरूकस्सन्

अरुणोदयकाले निद्रावशगतः । तदा गुरोः पूर्वं उत्थाय आत्मना नेतव्यस्वगुरुस्नानाङ्गवस्त्रादिकं स्वगुरौ स्वयमेव गृहीत्वा स्नानाय गच्छति सति सहसा प्रबुद्धस्सन् ''महान् अपराधः मम प्राप्त'' इति पश्चात्तापं प्राप्तवान् इति भावः ॥ १० ॥

विहितमविहितं प्रागेव कस्माद्विनिद्रैरिति गुरुपरिवादाशङ्कया नम्रगात्राः ।
चिरमनवतरन्तः श्रावका मुक्तमार्गा गुरुषु जलसकाशस्थेषु तूष्णीमतिष्ठन् ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – विहितमिति ॥ शृण्वन्तीति श्रावकाः श्रवणकर्तारः शिष्याः प्रागेव अस्मत्प्रबोधात् पूर्वमेव विनिद्रैः प्रबुद्धैः भवद्भिः विहितं अस्माभिः नियुक्तं श्रुतिस्मृतिविहितं वा कर्म कस्मात् अविहितं न कृतं इति गुरूणां गुरुजनानां परिवादो भर्त्सनं तस्य आशङ्का तया गुरवो भर्त्सयन्तीति शङ्कया इत्यर्थः नम्राणि गात्राणि येषां ते तथा सन्तः गुरुषु जलसकाशस्थेषु सत्सु चिरं अनवतरन्तःसन्तः, मुक्तो मार्गो यैः ते तथा सन्तः, स्नानानन्तरं गुरूणां आगमनमार्गं मुक्त्वा स्थिताः सन्तः इत्यर्थः । तूष्णीं निर्वचनमतिष्ठन् ॥ ११ ॥

मन्दोपकारिणी – विहितमिति ॥ प्रागेव अस्मत् प्रबोधात् पूर्वमेव, विनिद्रैः विगता निद्रा येभ्यः तैः प्रतिबुद्धैः भवद्भिः । विहितं अस्माभिः नियुक्तं कार्यं कस्मात् कुतः अविहितं न कृतं इति इत्थं गुरुपरिवादाशङ्कया गुरूणां परिवादः आक्षेपः तस्य आशङ्कया गुरुर्मां भर्त्सयिष्यतीति शङ्कया इत्यर्थः 'अवर्णाक्षेपनिर्वादपरिवादापवादवत्' इत्यमरः । नम्रगात्राः नम्रं प्रह्वीभूतं गात्रं वपुः येषां ते तथोक्तास्सन्तः गुरुषु जलसकाशस्थेषु जलस्य समीपे तिष्ठत्सु सत्सु स्वयं चिरं विलम्बं कृत्वा अनवतरन्तः तीरान् जलं प्रति अगच्छन्तस्सन्तः । मुक्तमार्गाः मुक्तः त्यक्तः मार्गः स्नानं कृत्वा आगच्छतां गुरूणां वर्त्म यैः ते तथोक्तास्सन्तः । श्रावकाः व्याख्यानश्रवणकर्तारः शिष्याः तूष्णीं निर्व्यापाराः अतिष्ठन् स्थिताः । 'ष्ठा गतिनिवृत्तौ इति धातोः लङ् परस्मैपदम्' ॥ ११ ॥

विपुलहृदयपार्श्वे दीपदीप्तिप्रदीप्ते दरवरपरिपूर्णैर्वार्भिरर्घ्यादि दत्वा ।
यतिरतियतचेताश्चक्रिणोऽर्चानिकायात् कुसुमसमितिमग्र्यामादरादुज्जहार ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – विपुलेति ॥ अत्यन्तं यतं नियतं अतियतं तादृशं चेतः चित्तं यस्य स तथा यतिः कश्चिद्यतिः । दीपस्य दीप्तिः प्रकाशः तेन प्रदीप्तः प्रकाशनशीलः तस्मिन् । विपुलहृदयस्य श्रीपूर्णप्रज्ञस्य पार्श्वे सन्निधौ । दरवरः शङ्खश्रेष्ठः तस्मिन् परिपूर्णानि तैः वार्भिः उदकैः अर्घ्यं आदिः यस्य तत् अर्घ्यादि, अर्घ्यपाद्यादिकमित्यर्थः दत्वा, चक्रमस्यास्तीति चक्री श्रीकृष्णः तस्य अर्चानां सालग्रामप्रतिमादीनां निकायः समूहः तस्मात् । 'अर्चा पूजाप्रतिमयोरि'ति यादवः । अग्र्यां कुसुमसमितिं पुष्पसमूहं आदरो भक्तिः तस्मात् उज्जहार उद्धृतवान् । निर्माल्यपुष्पविसर्जनमकरोदित्यर्थः ॥ १२ ॥

मन्दोपकारिणी – विपुलेति ॥ अतियतचेताः अतियतं निगृहीतं चेतो यस्य स तथोक्तः विरक्त इति भावः । यतिः कश्चित् संन्यासी दीपदीप्तिप्रदीप्ते दीपस्य दीप्त्या प्रकाशेन प्रदीप्ते प्रकाशिते अनेन अरुणोदयकाले इति ज्ञायते । विपुलहृदयपार्श्वे विपुलं पृथुलं पूर्णमिति यावत् हृदयं चित्तं यस्य सः विपुलहृदयः 'विपुलः पृथुलेऽगाधे' इति विश्वः । तस्य श्रीपूर्णप्रज्ञाचार्यस्य पार्श्वे सन्निधौ । दरवरपरिपूर्णैः दरवरे पाञ्चजन्यश्रेष्ठे परिपूर्णैः वार्भिः अद्भिः 'आपः स्त्री भूम्नि वार्वारि' इत्यमरः । अर्घ्यादि अर्घ्यं आदि यस्य तत् अर्घ्यादि अर्घ्यपाद्याचमनादि दत्वा देवाय प्रदाय चक्रिणः चक्रं सुदर्शनसंज्ञं रथाङ्गं अस्यास्तीति चक्री तस्य चक्रिणः चक्रायुधधारिणो विष्णोः 'चक्रं सैन्यरथाङ्गयोः' इति विश्वः । अर्चानिकायात् अर्चानां शालग्रामादिशिलाप्रतिमानां 'अर्चा पूजाप्रतिमयोः' इति विश्वः निकायात् समूहात् अग्र्यां श्रेष्ठां कुसुमसमितिं पुष्पाणां समूहं 'सङ्घे सभायां समितिः' इत्यमरः । आदरात् भक्त्या 'अङ्गुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत्' इत्युक्तप्रकारेण इति भावः । उज्जहार उद्धृतवान् निर्माल्यपुष्पविसर्जनं अकरोत् इति भावः । 'उत् पूर्वकात् हृञ् हरणे' इति धातोः लिट् परस्मैपदं जहार जह्रतुः जह्रुः ॥ १२ ॥

अमृतमपि निरीक्ष्य स्रावि निर्माल्यसूने घृतमिदमिति सद्यो भ्रान्तिमन्तोऽपि शिष्याः ।
श्रदधुरधिकवाक्यैर्विभ्रमास्तच्च पश्चादनुदिनममृतान्नैस्तस्य सेव्यस्य शक्त्या ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – अमृतमिति ॥ दिने दिनेऽनुदिनं नित्यश इत्यर्थः । अमृतमेवान्नं येषां ते तथा तैः देवैः सेव्यस्य तस्य श्रीमध्वाचार्यस्य शक्त्या निर्माल्यसूने निर्माल्यपुष्पे स्रावि स्रुतममृतं निरीक्ष्यापि सद्यः तदानीं इदं घृतमिति भ्रान्तिमन्तोऽपि

शिष्याः पश्चादुत्तरकालेऽधिकानां उत्तमानां वाक्यानि तैः श्रीमध्वमाहात्म्यविदां नेदं आज्यं किन्तु अमृतम् इत्यादिवाक्यैरित्यर्थः । विगतो भ्रमो येभ्यः ते विभ्रमाः सन्तः तत् च अमृतं एवेति च श्रद्धधुः विश्वासं अगच्छन् । 'श्रदन्तरोरुपसर्गवद्वृत्तिर्वाच्ये'त्युक्तेः । श्रत् पूर्वात् धाञ् धातोः लुङ् । नैतद्धृतं किन्त्वमृतमेवेत्युत्तमानां वाक्यैर्विभ्रमाः सन्तो निर्माल्यपुष्पे घृतवत्स्निग्धतया अस्माभिः दृष्टं अमृतं एवेति श्रद्दधुरिति भावः ॥ १३ ॥

मन्दोपकारिणी – अमृतमिति ॥ अनुदिनं दिने दिने इति अनुदिनं प्रतिदिनं अमृतान्नैः अमृतं अन्नं येषां ते अमृतान्नाः देवाः तैः 'अमर्त्या अमृतान्धसः' इत्यमरः सेव्यस्य तस्य मध्वाचार्यस्य शक्त्या महिम्ना निर्माल्यसूने निर्माल्यं शालग्रामोपरि समर्पितं च तत् सूनं पुष्पं च निर्माल्यसूनं तस्मिन् 'सूनं प्रसवपुष्पयोः' इति विश्वः स्रावि स्रुतं अमृतं सुधां निरीक्ष्यापि सद्यः तदानीं इदं घृतं आज्यं 'घृतमाज्यं हविः सर्पिः' इत्यमरः इति भ्रान्तिमन्तोऽपि शिष्याः पश्चात् तदुत्तरकाले अधिकवाक्यैः अधिकानां स्वोत्तमानां श्रीमध्वमाहात्म्यविदां इति यावत् वाक्यैः वचनैः विभ्रमाः विगतः भ्रमः भ्रान्तिः येभ्यः ते 'भ्रान्तिर्मिथ्यामतिर्भ्रमः' इत्यमरः तच्च घृतत्वेन दृष्टं अमृतमिति श्रद्दधुः विश्वासं चक्रुः 'श्रत्पूर्वकात् डु धाञ् धारणपोषणयोः इत्यतो लुङ् परस्मैपदं निर्माल्यविसर्जनसमये देवोपरि समर्पितपुष्पेषु मध्वाचार्यमहिम्ना परिस्रुतं अमृतं घृतमिदं इति भ्रान्त्या मन्यमानाः जनाः पश्चात् मध्वाचार्यमाहात्म्यविदुषां जनानां 'नेदं घृतं किन्तु अमृतमेव' इति वाक्यं श्रुत्वा भ्रान्तिरहितास्सन्तः निर्माल्यपुष्पे घृतवत् स्निग्धतया अस्माभिः यदेतत् दृष्टं तत् अमृतमेवेति विश्वासमगमन् इति भावः ॥ १३ ॥

अगमदुचितमंत्रैस्तूदयानां त्रयाणां कृतिभिरनुमतात्मा तत्र पञ्चाङ्गविद्भिः ।
उदयमहिमरोचिश्चक्रवर्ती त्रिशक्तिर्दधदतिबृहदन्तः षड्गुणं स्वात्मतेजः ॥ १४ ॥

भावप्रकाशिका – अरुणोषस्सवितॄणामुदयास्त्रयः मित्रभूकोशानामुदयाश्च । मन्त्रा गायत्र्याद्या गोप्या व्यवहरणविशेषाश्च । हृदयशिरश्शिखाकवचास्त्राणि पञ्चाङ्गानि कर्मणामारम्भोपायः पुरुषद्रव्यसम्पत् विनिपातप्रतीकारो देशकालावेक्षणं कार्यसिद्धिरिति च । प्रकाशनतपनाह्लादनशक्तयस्तिस्र आह्लादनं वृष्ट्या उत्साहमन्त्रप्रभुत्वशक्तयश्च । स्वात्मतेजः स्वस्वामिनो विष्णोर्ज्योतिः सुष्ठ्वात्मनः पराक्रमश्च । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः

श्रियः । ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणेति' षड्गुणाः 'सन्धिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षड्गुणान् कवयो विदुः'इति च ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – अगमदिति ॥ उचितो मन्त्रो येषां ते तथा तैः पुरुषार्थहेतुतया जपोचितगायत्र्यादिमन्त्रयुक्तैरित्यर्थः । पञ्च च तानि अङ्गानि च पञ्चाङ्गानि तानि विदन्तीति पञ्चाङ्गविदः तैः । हृदयशिरःशिखाकवचास्त्राख्यपञ्चाङ्गाभिज्ञैरित्यर्थः । त्रयाणां उदयानां अरुणोदयोषोदयसूर्योदय इति प्रसिद्धानां त्रयाणां उदयानां इत्यर्थः । अनुमत आत्मा स्वरूपं यस्य स तथोक्तः । उदयत्रयस्य सूर्यसञ्चारकालावधिनियतत्वात् उदयस्य त्रयस्य सूर्योऽनुमतात्मा इत्यर्थः । चक्रवर्तिपक्षे तु उचितमन्त्रैः मित्राद्युदयोचित-गोप्यव्यवहारयुक्तैः, पञ्चाङ्गविद्भिः 'कर्मारम्भोचितोपायः पुरुषद्रव्यसम्पदः । विनिपात-प्रतीकारो देशकालावलोकनम् । कार्यसिद्धिरि'ति प्रोक्तानां अङ्गानां पञ्चकैरित्युक्त पञ्चाङ्गविद्भिरित्यर्थः । मन्त्रिभिस्त्रयाणामुदयानां मित्रोदय, भूम्युदय, कोशोदयाख्या-नामुदयानामनुमतात्मा संमतात्मेत्यर्थः । तिस्रः शक्तयो यस्य स तथोक्तः, प्रकाशनतापनाह्लादनाख्यशक्तित्रयोपेत इत्यर्थः । सूर्यस्याह्लादनं नाम वर्षणं 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्टते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा' इति स्मृतिसिद्धश्चैतत् । अर्थान्तरे तु– त्रिशक्तिरुत्साहशक्तिः प्रभुशक्तिर्मन्त्रशक्तिरिति शक्तित्रययुक्त इत्यर्थः । अन्तः स्वमण्डलान्तरत्यन्तं बृहत् पूर्णमतिबृहत् षड्गुणा यस्य तत् षड्गुणम् । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणे'ति प्रसिद्धैश्वर्यादिषड्गुणयुतमित्यर्थः । स्वात्मा स्वामी श्रीविष्णुस्तस्य तेजः स्वात्मतेजो दधानः । अर्थान्तरे– सन्धिविग्रहयानासनद्वैधीभावसंश्रयलक्षणषड्गुणयुतं, स्वात्मतेजः स्वरूपसामर्थ्यं दधान इत्यर्थः । हिमानि शीतानि न भवन्तीत्यहिमान्युष्णानि तादृशानि रोचींषि दीप्तयो यस्य सोऽहिमरोचिः सूर्यः स एव चक्रवर्ती महानृपः, तत्र तस्मिन् काल उदयमगमत् । महाराजो यथोदयं सम्पदं गच्छेत्तथा सूर्योऽप्युदयमगमदित्यर्थः ॥ १४ ॥

मन्दोपकारिणी – अगमदिति ॥ तत्र तस्मिन् काले, अहिमरोचिश्चक्रवर्ती हिमं शीतलं न भवतीति अहिमं उष्णं इत्यर्थः 'तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः' इत्यमरः अहिमं रोचिः प्रकाशः यस्य सः अहिमरोचिः सूर्यः 'रोचिः शोचिरुभे क्लीबे

प्रकाशोद्योत आतपः' इत्यमरः अहिमरोचिरेव चक्रवर्ती सार्वभौमो राजा 'चक्रवर्ती सार्वभौमः' इत्यमरः सूर्याख्यमहाराजः उदयं अगमत् प्राप्तवान् । यथा राजा अभ्युदयं गच्छेत् तथा सूर्योऽपि उदयं अगमत् सूर्योदयो जात इति भावः । 'गम्लृ गतौ' इत्यतो लुङ् परस्मैपदं अगमत् अगमतां अगमन् । कथंभूतः ? सूर्यः उचितमन्त्रैः उचितः मन्त्रो येषां ते उचितमन्त्राः तैः पुरुषार्थहेतुतया जपोचितगायत्र्यादिमन्त्रयुतैः इत्यर्थः । पञ्चाङ्गविद्भिः पञ्च अङ्गानि हृदयादिपञ्चाङ्गानि विदन्तीति पञ्चाङ्गविदः तैः हृदयशिरःशिखाकवचास्त्राख्यानि गायत्रीमन्त्रन्यासे पञ्चाङ्गानि ज्ञेयानि । कृतिभिः कुशलैः 'कृती कुशलः' इत्यमरः विप्रादिभिः ज्ञानिभिः इत्यर्थः । त्रयाणां उदयानां अरुणोषःसूर्याख्यानां अनुमतात्मा अनुमतः संमतः आत्मा स्वरूपं यस्य स तथोक्तः अरुणोदयानन्तरं उषसः उदयः तदनन्तरं सूर्योदयः तदनन्तरं सूर्यसञ्चारः इत्येवं उदयत्रयस्य सूर्यसञ्चारकालावधिनियतत्वात् सूर्योऽनुमतात्मा इत्यर्थः । पुनः कथंभूतः ? त्रिशक्तिः तिस्रः शक्तयः यस्य पदार्थप्रकाशनतापनाह्लादनरूपाः तिस्रः सूर्यस्य शक्तयः प्रसिद्धाः । अन्तः स्वमण्डलमध्ये अतिबृहत् अतिपूर्णं षड्गुणं षड्गुणा ऐश्वर्यादयः यस्य तत् तथोक्तम् । स्वात्मतेजः स्वस्य आत्मा अन्तर्यामी विष्णुः तस्य तेजः तेजोमयं रूपं दधत् दधानः । यथा चक्रवर्ती उचितमन्त्रैः अभ्युदयोचितः मन्त्रः गोप्यव्यवहारो येषां ते तथोक्ताः 'वेदभेदे गुप्तवादे मन्त्रः' इत्यभिधानम् । पञ्चाङ्गविद्भिः पञ्चाङ्गज्ञानवद्भिः 'कर्मारम्भोचितोपायः पुरुष-द्रव्यसम्पदः । विनिपातप्रतीकारो देशकालावलोकनं कार्यसिद्धिरिति प्रोक्तमङ्गानां पञ्चकं बुधैः' । कृतिभिः मन्त्रिभिः त्रयाणां मन्त्रभूकोशाख्यानां उदयानां अनुमतात्मा संमतस्वरूपः त्रिशक्तिः प्रभावमन्त्रोत्साहाख्यशक्तित्रयोपेतः अन्तः स्वदेशमध्ये अतिबृहत् अतिमहत् षड्गुणं सन्ध्यादिषड्गुणयुक्तं 'संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः । षड् गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः' इत्यमरः । स्वात्मतेजः स्वरूपभूतं तेजः सामर्थ्यं दधत् अभ्युदयं प्राप्नुयात् तद्वत् अयं सूर्योऽपि उदयं अगमत् इति भावः ॥ १४ ॥

तिमिरनिकरकुम्भिव्रातमत्यंततीव्रं स्थिरतरमखिलानां प्राणिनां रुद्धमार्गम् ।
भुवनभवनपूर्णं भानुमानञ्जनाभं हरिरिव नखरैः प्राग्रश्मिजालैर्निरास ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – तिमिरेति ॥ भानवः किरणा अस्य सन्तीति भानुमान् सूर्यः । अत्यन्तं तीव्रो दुस्सहोऽत्यन्ततीव्रस्तम् । अत्यन्तं स्थिरः स्थिरतरः तं

भानुतेजोविनान्येनानपोह्यमिति यावत् । अखिलानां प्राणिनां रुद्धो मार्गो येन स तथोक्तः तं सर्वेषां प्राणिनां मार्गमावृत्य वर्तमानमिति यावत् । भुवनमेव भवनं गृहं तस्मिन् पूर्णं व्याप्तम् । अञ्जनवत् आभा शोभा यस्य सोऽञ्जनाभः तं नीलवर्णमिति यावत् । तिमिरनिकरोऽन्धकारसमूहः स एव कुम्भिव्रातो गजसमूहः तम् । प्राक् स्वमण्डलाविर्भावात् पूर्वमेव रश्मिजालानि रश्मिसमूहाः तैः हरिः सिंहो नखरैः नखैः अत्यन्ततीव्रं स्थिरतरं अखिलानां प्राणिनां रुद्धमार्गं भुवनपूर्णं अञ्जनाभं कुम्भिव्रातं इव निरास निराकरोत् ॥१५॥

मन्दोपकारिणी – तिमिरेति ॥ भानुमान् भानवः किरणाः अस्य सन्तीति भानुमान् सूर्यः 'भानुः किरणसूर्ययोः' इति विश्वः । अत्यन्ततीव्रं अतिदुःसहं स्थिरतरं सूर्यप्रकाशं विना अन्येन अनिवारणीयं अखिलानां प्राणिनां चेतनानां 'प्राणी तु चेतनो जन्मी' इत्यमरः । रुद्धमार्गं निरुद्धः मार्गः पन्था येन स तथोक्तः तं गमनादिप्रवृत्तिप्रतिबन्धकं इत्यर्थः । भुवनभवनपूर्णं भुवनं जगदेव भवनं मन्दिरं तस्मिन् पूर्णं व्याप्तं अञ्जनाभं अञ्जनवत् अञ्जनपर्वतवत् आभा नीलकान्तिः यस्य स तथोक्तः तम् । तिमिरनिकरकुम्भिव्रातं तिमिराणां अन्धकाराणां निकरः समूहः 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः' इत्यमरः कुम्भः गण्डस्थलं एषां अस्तीति कुम्भिनः गजाः 'कुम्भौ घटेऽथ मूर्धांशौ' इत्यमरः कुम्भिनां व्रातः स्तोमः 'स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः' इत्यमरः तिमिरनिकर एव कुम्भिव्रातः तम् । प्राक् स्वमण्डलाविर्भावात् पूर्वमेव रश्मिजालैः रश्मीनां किरणानां 'किरणप्रग्रहौ रश्मी' इत्यमरः जालैः समूहैः 'जालं समूह आनायः' इत्यभिधानम् । हरिः सिंहः इव नखरैः नखैः निरास निराकृतवान् । उक्तविशेषणं कुम्भिव्रातं गजसमूहं सिंहः यथा निराकरोति तद्वदिति भावः । 'इव वद्वा यथा शब्दाः उपमानार्थवाचकाः' इति दण्डी । 'निर् आङ् पूर्वात्' अस भुवि इत्यतो लिट् परस्मैपदम् ॥ १५ ॥

मधुरपतगरावाः शान्तनैशाम्बुबाष्पाः सपदि विपुलरागाः स्वाभिसारात्प्रसन्नाः ।
अरुणतरणिरत्यच्छाम्बरा दिक्पुरन्ध्रीः स्मितसरसिजवक्त्राः स्वैः करैरालिलिङ्गे ॥१६॥

पदार्थदीपिकोद्बोधिका – मधुरेति ॥ अरुणतरणिः उद्यदादित्यः स्वैः स्वकीयैः 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन' इत्यमरः करैः रश्मिभिः । मधुराः श्रोत्रप्रिया पतगरावा विहङ्गकूजितानि, यासां दिशां ताः तथोक्ताः । मध्वोऽपि

मधुरपतगराव इव मनोहरशुकपिकादिध्वनिः इव रावो ध्वनिः यासां ताः तथोक्ताः । निशा सम्बन्धीनि नैशानि तादृशानि यान्यम्बूनि जलानि हिमाम्बूनीत्यर्थः । तान्येव बाष्पाः शान्ता नैशाम्बुबाष्पा यासां ताः तथोक्ताः । स्त्रियोऽपि प्रियदर्शनानन्तरं शान्तप्रियविरह-खेदोत्पन्नबाष्पाः सपदि उद्यद्रविसम्पर्कसमय एव विपुलो बहुलो रागः सान्ध्यरक्तिमा यासां ताः तथोक्ताः । स्त्रियश्च प्रियतमाभिसरणादेवाभिव्यक्तविपुलस्नेहाः । स्वाभिसारः स्वेषां सूर्यकिरणानां अभिसारो व्याप्तिः तस्मात् प्रसन्ना शान्ततुषारतया प्रसन्ना इत्यर्थः । स्त्रियः स्वकीयप्रियतमाभिगमनात्प्रसन्ना शान्तकोपाः । अत्यच्छं अतिनिर्मलं अम्बरं आकाशो यासां ताः तथोक्ताः । स्त्रियश्च अतिनिर्मलवसनाः । स्मितसरसिजान्येव विकसितपद्मान्येव वक्त्राणि यासां ताः तथोक्ताः । स्त्रियश्च स्मितसरसिजाभवदनाः । दिक्पुरन्ध्रीः दिश एव पुरन्ध्रयः स्त्रियः ता आलिलिङ्गे । लिगि गतौ लिट् । कश्चित् तरुणः स्ववधूः इव इति श्लेषाभिप्रायः ॥ १६ ॥

मन्दोपकारिणी – मधुरेति ॥ अरुणतरणिः अरुणः लोहितश्चासौ तरणिः सूर्यश्च 'द्युमणिस्तरणिर्मित्रः' इत्यमरः उद्यदादित्य इत्यर्थः । दिक्पुरन्ध्रीः दिश एव पुरन्ध्रयः भार्याः ताः 'पुरन्ध्री सुचरित्रा च' इत्यमरः । स्वैः स्वकीयैः 'स्वो ज्ञातावात्मनि स्वं त्रिषु' इत्यमरः । करैः किरणाख्यहस्तैः 'वलिहस्तांशवः कराः' इत्यमरः । आलिलिङ्गे परिरेभे 'लिगि गतौ' इत्यतो लिडात्मनेपदं लिलिङ्गे लिलिङ्गाते लिलिङ्गिरे । कथंभूताः दिक्पुरन्ध्रीः, मधुरपतगरवाः मधुराः श्रोत्रेन्द्रियप्रियाः पतगानां पक्षिणां 'पतत्रिपत्त्रिपत-गपतत्पत्त्रस्थाण्डजाः' इत्यमरः रावाः कूजितानि यासां ताः तथोक्ताः पुरन्ध्रयोऽपि मधुरपतगरावाः मधुरः श्राव्यः पतगवत् कोकिलपक्षिवत् रावः वचनं यासां ताः तथोक्ताः । शान्तनैशाम्बुबाष्पाः निशायां भवं नैशं नैशं च तत् अम्बु तुषारोदकं च नैशाम्बु नैशाम्ब्वेव बाष्पं नैशाम्बुबाष्पं शान्तं नष्टं नैशाम्बुबाष्पं यासां ताः तथा । रात्रौ सर्वदिशि पतितं हिमं सूर्योदये सति नश्यतीति प्रसिद्धम् । स्त्रियोऽपि पतिदर्शनानन्तरं शान्तं नैशाम्बुसदृशं बाष्पं प्रियविरहजखेदोत्पन्नं नेत्राम्बु यासां ताः तथा सपदि सद्यः उद्यदादित्यसम्पर्कसमय एव विपुलरागाः विपुलः बहुलः रागः रक्तिमकान्तिः यासां ताः । स्त्रियोऽपि सपदि प्रियतमदर्शनादेव अभिव्यक्तः विपुलः रागः अनुरागः स्नेहः यासां ताः तथोक्ताः । 'रागोऽनुरागे मात्सर्ये लाक्षादौ रक्तिमत्विषोः' इति रत्नमाला । स्वाभिसारात् स्वेषां स्वकीयानां किरणानां अभिसारात् प्रसारात् व्यापनात् प्रसन्नाः शान्ततुषारतया निर्मलाः ।

स्त्रियश्च स्वकीयकान्तस्य अभिसारात् अभिमर्शनात् प्रसन्नाः शान्तकोपाः अत्यच्छाम्बराः अति अत्यन्तं अच्छं निर्मलं अम्बरं आकाशं यासां ताः तथोक्ताः । स्त्रियोऽपि अतिनिर्मलं अम्बरं वसनं यासां ताः तथोक्ताः । स्मितसरसिजवक्त्राः स्मितानि विकसितानि सरसिजानि कमलान्येव वक्त्राणि मुखानि यासां ताः तथोक्ताः । स्त्रियश्च कमलसदृशमुखाः उदितसूर्यस्य किरणाः सर्वदिक्षु प्रसारिताः इति भावः ॥ १६ ॥

प्रणतिरभसधूलीबद्धशोभाविशेषा दधुरुपकृतिमत्तां साधुजालान्तरात्माः ।
समयमुपनतं संवेदयन्तो वयस्या इव दशशतकेतोः केतवः श्रावकाणाम् ॥ १७ ॥

भावप्रकाशिका – भद्रजालरन्ध्रगताः सज्जनसमूहमध्यादागताश्च ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – प्रणतीति ॥ प्रणतेः सान्ध्यसूर्यनमस्कारस्य रभसो वेगः तस्मात् उत्पन्ना या धूल्यः ताभिः बद्ध उत्पादितः शोभाविशेषः कान्तिविशेषो यैः ते प्रणतिरभसधूलीबद्धशोभाविशेषाः । वयस्याश्च नमस्कारसम्भ्रमेणाञ्जलग्नधूलीकान्तिविशेषाः । साधु भद्रं यत् जालं गवाक्षः तस्यान्तरं रन्ध्रमध्यं तेन आत्मा अन्तरागता इत्यर्थः । वयस्याश्च साधुजालान्तरात्माः सज्जनसमूहमध्यात् आगताः । समयं शास्त्रश्रवणसमयमुपनतं प्राप्तं संवेदयन्तो ज्ञापयन्तः । गवाक्षमध्यादागतं सूर्यकिरणं दृष्ट्वा श्रावकाः श्रवणमननोद्यता आसन् इत्यर्थः । वयस्याश्च अन्योन्यं श्रवणकालं ज्ञापयन्ति । दश च तानि शतानि च दशशतानि केतवः किरणा यस्य स तथा तस्य सूर्यस्य इत्यर्थः । केतवो रश्मयः वयस्या इव सहपाठिन इव श्रावकाणां श्रोतॄणां शिष्याणां उपकृतिः उपकारो येषां अस्तीति उपकृतिमन्तः तेषां भावः तत्ता तां दधुः । स्वयं श्रोतॄणां उपकारं कृत्वा आत्मनां उमुपकाराख्यधर्मवत्तां दधुः इत्यर्थः ॥ १७ ॥

मन्दोपकारिणी – प्रणतीति ॥ दशशतकेतोः दशशतं सहस्रं केतवः किरणाः यस्य स तथोक्तः । तस्य सूर्यस्य केतवः किरणाः सर्वदिक्षु श्रावकाणां व्याख्यानश्रोतॄणां शिष्याणां उपकृतिमत्तां उपकृतिः उपकारः एषां अस्तीति उपकृतिमन्तः उपकृतिमतां भावः उपकृतिमत्ता ताम् । दधुः धृतवन्तः । स्वयं श्रोतॄणां उपकारं कृत्वा आत्मनां उपकाराख्यधर्मवत्तां दधुः इत्यर्थः । के इव वयस्या इव समानवयस्का इव 'वयस्यः सवयाः स्निग्धः' इत्यमरः । सहश्रोतार इवेति यावत् । कथंभूताः केतवः, प्रणतिरभसधूलीबद्ध-शोभाविशेषाः प्रणतेः नमस्कारस्य रभसेन सम्भ्रमेण वेगेन वा 'रभसो हर्षवेगयोः' इति

विश्वः उत्पन्नाभिः धूलीभिः बद्धः सम्बद्धः उत्पादितः शोभाविशेषः कान्तिविशेषो येषां ते तथोक्ताः । श्रोतृभिः संभ्रमेण वेगेन च नमस्कारे कृते सति उत्पन्नभूमिरेणुसम्बन्धेन रश्मिषु कान्तिविशेषः उत्पन्नोऽभूत् इत्यर्थः । वयस्याश्च प्रणतिरभसेन नमस्कारसम्भ्रमेण धूलीभिः अङ्गलग्नधूलीभिः बद्धः जनितः शोभाविशेषो येषां ते तथोक्ताः । शिष्याणामपि नमस्कारेण धूलिसम्बद्धदेहकान्तिविशेषोऽभूत् इत्यर्थः । पुनः कथंभूताः साधुजालान्तराप्ताः साधूनि रम्याणि च तानि जालानि गवाक्षाश्च साधुजालानि साधुजालानां अन्तरेण रन्ध्रमध्येन आप्ताः आगताः । वयस्याश्च साधूनां सज्जनानां जालस्य समूहस्य अन्तरं मध्यं आप्ताः प्राप्ताः । पुनः कथंभूताः समयं शास्त्रश्रवणकालं उपनतं प्राप्तं संवेदयन्तः ज्ञापयन्तः । गवाक्षमध्यात् आगतान् सूर्यकिरणान् दृष्ट्वा श्रावकाः श्रवणायोद्यताः आसन् इत्यर्थः । वयस्याश्च अन्योन्यं श्रवणकालं ज्ञापयन्ति हि । गवाक्षात् अन्तः प्रविष्टाः सूर्यकिरणाः श्रावकनमस्कारोत्पन्नधूलिसम्बन्धेन शोभाविशेषप्राप्तिलक्षणोपकारवन्तः सन्तः स्वयमपि श्रावकाणां श्रवणसमयज्ञापनलक्षणं उपकारं कृत्वा प्रत्युपकारिणो बभूवुः इति भावः । अनेन अरुणोदये स्नानादिकं कृत्वा गृहान्तर्जपमनुतिष्ठन्तः शिष्याः गवाक्षमध्यात् आगतसूर्यरश्मीन् दृष्ट्वा श्रवणसमयोऽयं इति ज्ञात्वा श्रवणाय उद्यमं चक्रुः इति भावः ॥ १७ ॥

निहितमुचितमुच्चं योगपीठं प्रवक्तुः परिषदि परितोऽमी सत्वराः सत्वभाजः ।
द्रुतमवसितकृत्यैर्धन्यसन्न्यासिसङ्घैः श्रवणपरमकृत्यायोपतस्थुः समेताः ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – निहितमिति ॥ त्वरया वेगेन सहिताः सत्वराः । सत्वं सात्विकगुणं भजन्तीति सत्वभाजः सात्विकाः बलिन इति वा । स्वविहितकर्मक्षमाबलवन्त इत्यर्थः । अमी श्रोतारो द्रुतं शीघ्रं यथा भवति तथा अवसितं समापितं कृत्यं जपादिकृत्यं यैः ते तथोक्ताः तैः । धन्या ये सन्यासिनः तेषां वर्गाः समूहाः तैः समेताः सन्तः परिषदि व्याख्यामण्डपे निहितं निक्षिप्तं उचितं श्रीमध्वाचार्योचितं उच्चं उत्तमम् उन्नतं वा । प्रवक्तुः व्याख्यातुः श्रीमध्वाचार्यस्य योगपीठं योगासनं परितः योगासनस्य समन्तात् इत्यर्थः । 'अभितः परित' इति द्वितीया । श्रवणं एव परमकृत्यं उत्तमव्यापारः तस्मै । उपतस्थुः उपासांचक्रिरे ॥ १८ ॥

मन्दोपकारिणी – निहितमिति ॥ सत्वराः त्वरया वेगेन सहिताः । सत्वभाजः सत्वं सत्वगुणं भजन्तीति सत्वभाजः सात्विकाः इत्यर्थः ।~अमी श्रावकाः द्रुतं शीघ्रं अवसितकृत्यैः अवसितानि समापितानि कृत्यानि स्नानजपादिविहितकर्माणि यैः ते अवसितकृत्याः तैः । धन्यसन्यासिसङ्घैः धन्यानां श्रेष्ठानां सन्यासिनां सङ्घैः समूहैः समेताः सहिताः सन्तः परिषदि सभायां व्याख्यानमण्डपे निहितं आस्तृतं उचितं श्रीमध्वाचार्यस्य उचितं उच्चं उन्नतं प्रवक्तुः व्याख्यातुः श्रीमध्वाचार्यस्य योगपीठं परितः योगासनस्य समन्ततः 'विष्टरः पीठमासनं' इत्यमरः 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः । श्रवणपरमकृत्याय श्रवणं व्याख्यानश्रवणं तच्च तत् परमकृत्यं च उत्तमप्रयोजनं च तस्मै । उपतस्थुः उपासिरे । व्याख्यातुः समन्तात् उपविष्टा इति भावः । योगपीठं परितः इत्यत्र 'अभितः परितः समया निकषा हा प्रतियोगेऽपि' इति द्वितीया । 'उपपूर्वात् ष्ठा गतिनिवृत्तौ इति धातोः लिट् परस्मैपदं तस्थौ तस्थतुः तस्थुः' ॥ १८ ॥

बभुरमलगुणानां शोभनाच्छादनानां मुररिपुनिलयानां हन्त वेदान्तकीनाम् ।
सपदि सुविवृतानामन्तरर्था धियां वा विविधकवलिकानां सञ्चयाः पत्रिकाणाम्
॥ १९ ॥

पदार्थदीपिकोद्बोधिका – बभुरिति ॥ अमला निर्मला गुणाः सूत्राणि यासां ताः तथा तासाम् । शोभनानि आच्छादनानि वासांसि यासां तासाम् । मुररिपोः श्रीकृष्णस्य निलयाः सान्निध्यायतनभूताः तेषाम् । निलयशब्दो नित्यपुल्लिङ्गः । वेदान्तानां वेदान्तशास्त्राणां सम्बन्धिन्यो वैदान्तिकाः तासाम् । सपदि तदानीमेव सुविवृतानां वस्त्रादि आवरणशून्यानां विविधा नानाविधा याः कवलिका अन्तःपत्रिका यासां तासां पत्रिकाणां पत्राणां सञ्चयाः समूहाः, अमलगुणानां निर्दोषज्ञानभक्त्यादिगुणयुक्तानां शोभनाच्छादनानां अयोग्येषु भगवत्स्वरूपनिगूहनयुक्तानां मुररिपुनिलयानां मुररिपोः आवासभूतहृत्सरोजानां वैदान्तिकानां वेदान्तशास्त्रसम्बन्धयुक्तानां तद्विचारनिरतानां इत्यर्थः । सपदि सद्गुरूपदेशमात्रेणैव सुविवृतानां निरस्ताज्ञानाद्यावरणानां सतामन्तोऽन्तःकरणे धियां बुद्धीनां अर्था वा विषया इव । सतां अन्तःकरणे तेषां बुद्धिविषया भगवत्स्वरूपादयो यथा तथा बभुः रेजिरे इति भावः ॥ १९ ॥

मन्दोपकारिणी – बभुरिति ॥ विविधकवलिकानां विविधाः कवलिकाः यासां ताः तथोक्ताः तासां पुस्तकस्थापनार्थं कृतकटविशेषः कवलिकेत्युच्यत इति सम्प्रदायः । पत्रिकाणां तालपत्राणां सञ्चयाः सम्पुटानि बभुः शुशुभिरे हन्त । कथंभूतानां पत्रिकाणां, अमलगुणानां अमलः निर्मलः गुणः बन्धनसूत्रं यासां ताः तथोक्ताः तासाम् । शोभनाच्छादनानां शोभनानि मनोहराणि आच्छादनानि पुस्तकसंवेष्टिवस्त्राणि यासां ताः तथोक्ताः 'वस्त्रमाच्छादनं वासः' इत्यमरः । मुररिपुनिलयानां मुररिपोः श्रीकृष्णस्य निलयानां आश्रयाणां तत्र भगवान् प्रतिपाद्यत्वेन सन्निहितो वर्तते इति भावः । वेदान्तकीनां वेदान्तानां सम्बन्धिन्यः वेदान्तक्यः तासां लिखितवेदान्तशास्त्राणां इति यावत् । सपदि श्रवणकाले सुविवृतानां आच्छादनाभावेन प्रकटानाम् । का इव, अन्तः अन्तःकरणे धियां बुद्धीनां अर्थाः वा विषयाः भगवत्स्वरूपादयो यथा बभुः तथा इत्यर्थः । कथंभूतानां धियां अमलगुणानां अमलाः निर्दोषाः गुणाः ज्ञानभक्त्यादयो यासु ताः तासाम् । शोभनाच्छादनानां शोभनस्य भगवत्स्वरूपस्य आच्छादनानां अयोग्येषु गूहनयुक्तानां मुररिपुनिलयानां मुररिपोः हरेः निलयानां आवासभूतहृदयवतां तादृशान्तःकरणजन्यानां इत्यर्थः । वेदान्तकीनां वेदान्तशास्त्रसम्बन्धिनीनां वेदान्तविचारनिरतानां इत्यर्थः । सपदि गुरूपदेशमात्रेणैव सुविवृतानां सु सम्यक् वि निरस्तं वृतं आवरणं अज्ञानाख्यं यासां तासाम् । 'भा दीप्तौ' इत्यतो लिट् परस्मैपदं बभौ बभतुः बभुः ॥ १९ ॥

अनतिविरलभावा अप्यनन्योन्यसङ्गा ऋजुतरततनानापङ्क्तिसाम्याप्तशोभाः ।
द्विरदतुरगदेश्या दूरतो वर्जितान्ताः कुशललिखितरूपा रेजिरे तेषु वर्णाः ॥ २० ॥

भावप्रकाशिका – तुरगदेश्यास्तुरङ्गकल्पा 'ईषदसमाप्तौ कल्पब्देश्यदेशीयर' इति ॥ २० ॥

पदार्थदीपिकोद्बोधिका – अनतीति ॥ अत्यन्तं विरलभावो अतिविरलभावः न विद्यते अतिविरलभावो येषां ते तथा । अन्योन्यं परस्परं सङ्गो अन्योन्यसङ्गः न विद्यते अन्योन्यसङ्गो येषां ते तथा परस्परासंस्पृष्टा इत्यर्थः । ऋजुतरा अवक्राः ताः च ता तता व्याप्ताः च ताः या नानापङ्क्तयः तासां साम्यं आद्यन्तयोर्न्यूनाधिक्यराहित्यं तेन सम्प्राप्ता शोभा कान्तिः यैः ते तथोक्ताः । द्विरदा गजाः तुरगा अश्वाः तेषां देश्याः सदृशा

द्विरदतुरगदेश्या अश्वगजलिपिनामका इति भावः । 'ईषदसमाप्तौ कल्पप्देश्यदेशीयर' इति सादृश्यार्थे देश्यप्रत्ययः । दूरतो दूरादेव वर्जिता अन्ता यैस्ते तथोक्ताः, तत्राद्यन्तयोः पार्श्वयोः नाभिद्वयस्य चतुर्दिक्षु च दूरतो वर्जितप्रान्ता इत्यर्थः । एवंभूतत्वादेव कुशलैः लेखनकर्मणि चतुरैः लिखितानि स्वरूपाणि येषां ते तथा तेषु पत्रिकाणां सञ्चयेषु वर्णा अक्षराणि रेजिरे ॥ २० ॥

मन्दोपकारिणी – अनतीति ॥ तेषु पत्रिकाणां सञ्चयेषु वर्णाः अक्षराणि रेजिरे शुशुभिरे 'राजृ दीप्तौ' इत्यतो लिट् आत्मनेपदं रेजे रेजाते रेजिरे । 'वर्णो द्विजादौ शुक्लादौ यशोगुणकथासु च । अक्षरे गुणभेदे च स्वर्णे यज्ञे विलेपने' इति विश्वः । कथंभूताः अनतिविरलभावाः अतिव्यवधानरहिताः अपि समीपस्था अपि अनन्योन्यसङ्गाः परस्परं असंस्पृष्टाः इत्यर्थः । ऋजुतरततनानापङ्क्तिसाम्याप्तशोभाः ऋजुतराः अत्यन्तऋजवः ऋजुतराणां ततानां दीर्घाणां नानानां वह्नीनां पङ्क्तीनां श्रेणीनां साम्येन समत्वेन आप्ता प्राप्ता शोभा यैस्ते तथोक्ताः । पत्रेषु लिखितवर्णानां पङ्क्तयः ऋजुतराः दीर्घाः बह्व्यः समानाकारा एव सन्ति । तेन च वर्णाः सम्यक् शोभन्ते इत्यर्थः । द्विरदतुरगदेश्याः द्विरदाः गजाः तुरगाः अश्वाः तेषां तदाकाराणां देश्याः सदृशाः अश्वाकारगजाकारलिपयः इत्यर्थः । सादृश्यार्थे देश्यप्रत्ययः । दूरतः दूरे वर्जितान्ताः वर्जिताः परित्यक्ताः अन्ताः प्रान्ताः यैः ते तथोक्ताः तत्राद्यन्तयोः तत्पार्श्वयोश्चेति चतुर्दिक्ष्वपि प्रान्तभागेषु न लिखिताः इत्यर्थः । 'अन्तर्मध्ये तथा प्रान्ते' इति विश्वः । एवंभूतत्वादेव कुशललिखितरूपाः कुशलैः लेखनकर्मणि चतुरैः पुरुषैः लिखितं रूपं येषां ते तथोक्ताः ॥ २० ॥

झटिति ददृशुरेके वाचनीयादिभागं परिचयपटुताभ्यां तावदेके चिरेण ।
हरिगुरुनमनं द्राग्यत्नतोऽमी विधाय प्रययुरपरसाम्यं सिद्धये स्याद्धि यत्नः ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – सपदीति ॥ एके केचन श्रोतरो वाचनीयस्य तदानीं श्रोतव्यत्वेन वाचनीयस्य ग्रन्थस्य आदिभागं आदिवाक्यं, परिचयो ग्रन्थविषयकपरिचयः पटुता चातुर्यं ताभ्यां सपदि झटिति ददृशुः । तावत् तदा एके चिरेण शनैः ददृशुः । तावत्परिचयपटुताभावादिति भावः । तथापि अमी चिरेण वाचनीयादिभागं ये ददृशुः ते यत्नतः प्रयत्नविशेषात् हरिगुरुनमनं द्राक् विधायापरसाम्यं सपदि दृष्टवतां तेषां साम्यम् ।

नमनविषये साम्यं वा प्रययुः । तथा हि यत्नो देशकालोचितप्रयत्नः सिद्धये स्याद्धि । अत्रार्थान्तरन्यासालङ्कारः ॥ २१ ॥

मन्दोपकारिणी – झटितीति ॥ एके केचन श्रोतारः । वाचनीयादिभागं श्रवणोपक्रमणकाले श्रोतव्यत्वेन वाचनीयस्य ग्रन्थस्य आदिं आदिमं भागं वाक्यरूपैक-देशम् । परिचयपटुताभ्यां ग्रन्थविषयश्रवणमननादिरूपपरिचयः अभ्यासश्च पटुता चातुर्यं वाचनशक्तिरिति यावत् ताभ्यां निमित्ताभ्यां झटिति सपदि ददृशुः दृष्टवन्तः । तावत् तदा एके अन्ये 'एके मुख्यान्यकेवलाः' इत्यमरः । चिरेण विलम्बेन ददृशुः तावत्परिचय-पटुताऽभावात् इति भावः । 'दृशिर् प्रेक्षणे' इति धातोः लिट् परस्मैपदम् । तथापि अमी विलम्बेन द्रष्टारः यत्नतः यत्नविशेषात् हरिगुरुनमनं हरेः गुरोश्च नमनं नमस्कारं द्राक् शीघ्रं विधाय कृत्वा, अपरसाम्यं अपरेषां झटिति दृष्टवतां साम्यं प्रययुः । वाचनीयादिभागदर्शने साम्यसम्पादनासमर्थत्वात् नमस्कारं कृत्वा, तत्र साम्यं प्रापुः इति भावः । यद्वा विलम्बेन द्रष्टारः शीघ्रद्रष्ट्रपेक्षया पूर्वमेव महोद्योगेन नमनं कृत्वा वाचनीयादिभागज्ञानं सम्पाद्य वाचनविषये साम्यं प्रापुः इत्यर्थः । तद्युक्तं हि यत्नः देशकालोचितप्रयत्नः सिद्धये अभीष्टसिद्धये स्याद्धि तत्तत्कार्योचिते प्रयत्ने कृते किं कार्यं न सिद्धचेत् सर्वं सिध्येदेव इति भावः ॥ २१ ॥

यतवचसि जनेऽस्मिन्नानते सन्निरस्यन् सिचययवनिकां तां सान्ध्यजीमूतरक्ताम् ।
रविरिव रविपूज्याङ्घ्रिः समाजान्तरिक्षे व्यलसदतिशयालुः सन् सहस्रप्रकाशः ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – यतेति ॥ आनते कृतनमस्कारे अस्मिन् जने श्रोतृजने यतं नियतं वचो यस्य स यतवचाः तस्मिन् इति मौनवति सति इत्यर्थः । सन्ध्यायां भवः सान्ध्यः स च असौ जीमूतो मेघश्च तद्वद्रक्तां रक्तवर्णां प्राक् स्थापितां सिचयात्मिका वस्त्रात्मिका च सा यवनिका च सिचययवनिका ताम् । 'वस्त्रं सिचयः पटः प्रोक्त' इति हलः । सन्निरस्यन् अपास्यन् । रविपूज्यावंघ्री यस्य स तथा । अत एवातिशयालुः स्वगुणैः सूर्यं अतिशयिष्णुः सन् सहस्रं प्रकाशा यस्य स तथोक्तः श्रीपूर्णप्रज्ञः । समाजो व्याख्यानसभा स एव अन्तरिक्षं तस्मिन् रविरिव व्यलसत् शुशुभे । अस्मिन् जने सन्ध्यानुष्ठानं कुर्वति जने यतवचसि सति सहस्रप्रकाशः सहस्रकिरणः सूर्यः सान्ध्यजीमूताख्यां यवनिकामपास्यन्नभसि यथा शोभां भजेत्तद्वदित्यभिप्रायः ॥ २२ ॥

मन्दोपकारिणी – यतेति ॥ आनते कृतनमस्कारे अस्मिन् जने श्रोतृजने यतवचसि यतः नियतं निगृहीतं वचः वचनं येन स तथोक्तः तस्मिन् । मौनेन वर्तमाने सति सांध्यजीमूतरक्तां सांध्यः संध्याकालीनश्चासौ जीमूतः मेघश्च तद्वत् रक्तां लोहितवर्णां 'घनजीमूतमुदिरजलमुग्धूमयोनयः' इत्यमरः तां समाधिकाले कृतां सिचयवनिकां सिचा वस्त्रात्मिका च सा यवनिका तिरस्करिणी च 'प्रतिसीरा यवनिका स्यात् तिरस्करिणी च सा' इत्यमरः । सन्निरस्यन् अपास्यन् रविपूज्याङ्घ्रिः रविणा सूर्येण पूज्यै अङ्घ्री चरणौ यस्य स तथोक्तः । अत एव अतिशयालुः स्वगुणैः सूर्यं अतिशयिष्णुस्सन् सहस्रप्रकाशः सहस्रं अनन्तं प्रकाशो ज्ञानं यस्य स तथोक्तः श्रीपूर्णप्रज्ञाचार्यः समाजान्तरिक्षे समाजः व्याख्यानसभैव अन्तरिक्षं गगनं तस्मिन् रविरिव व्यलसत् शुशुभे । 'विपूर्वात् लस विकासे' इति धातोः लङ् परस्मैपदम् । यतवचसि अस्मिन् संध्यानुष्ठानं कुर्वति जने विप्रादिजने आनते स्थिते सति । विप्रादिजने प्रातः संध्यां अनुष्ठाय मौनेन नमस्कारं कृत्वा वर्तमाने सतीति यावत् । सहस्रप्रकाशः सहस्ररश्मिः रविः सूर्यः सांध्यजीमूताख्यरक्तवर्णयवनिकां मेघाख्यावरणं अपास्यन् आकाशे यथा शोभते तथा इत्यभिप्रायः ॥ २२ ॥

त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्लत्रितयरसतया ये वर्णिता वर्णवर्याः ।
पृथुमतिरथ तेषामैक्यमापाद्य सम्यक् प्रवचनपरिशुद्ध्यै स्म प्रणौति प्रवीणः ॥ २३ ॥

भावप्रकाशिका – 'स इमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवं तान् लोकानभ्यतपत्ते(पंस्ते)भ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ताग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींष्यभ्यतपत्ते(पंस्ते)भ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्तान् वेदानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्लान्यजायन्त भूरित्येव ऋग्वेदादजायत भुवरिति यजुर्वेदात् स्वरिति सामवेदात्तानि शुक्लान्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति । तानेकधा समभरत्तदेतदोमिती'त्यादिश्रुत्या वर्णिताः ऐतयब्राह्मणपञ्चमखण्डिकाप्रतिपादितप्रणवप्रकारो द्रष्टव्यः ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – त्रिभुवनेति ॥ अथ प्रवीणः पृथुमतिः श्रीपूर्णप्रज्ञः ये वर्णवर्या आकारोकारमकाराख्यवर्णश्रेष्ठाः त्रयाणां भुवनानां समाहारः त्रिभुवनं तस्मिन्

वराणि उत्तमानि यानि तेजांसि अग्निवायुसूर्यलक्षणानि तेभ्यो व्यक्ता ये वेदा ऋग्यजुः-सामवेदाः तेषां अर्थो अर्थभूतं यच्छुक्लत्रितयं भूर्भुवःस्वरिति व्याहृतित्रयं तस्य रसः सारः तस्य भावः तत्ता तया वर्णिता श्रुता युक्ताः । तेषां वर्णवर्याणां सम्यगैक्यमानुपूर्व्येण नैरन्तर्यलक्षणं श्लेषमापाद्य सम्पाद्य वचनस्य व्याख्यानस्य परिशुद्धिः निर्दोषत्वं तस्यै प्रणौति स्म प्रणवोच्चारणं अकरोत् । श्रुतिश्च 'स इमान् लोकान् असृजत पृथिवीमन्तरिक्षं दिवं तान् लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यः त्रीणि ज्योतींषि अजायन्त अग्निरेव पृथिव्या अजायत । वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींषि अभ्यतपत्तेभ्योऽभितप्तेभ्यः त्रयो वेदा अजायन्त। ऋग्वेद एव अग्नेरजायत । यजुर्वेदो वायोः सामवेद आदित्यात् तान् वेदान् अभ्यतपत्, तेभ्योऽभितप्तेभ्यः त्रीणि शुक्लान्यजायन्त । भूरित्येव ऋग्वेदादजायत । भुवरिति यजुर्वेदात् । स्वरिति सामवेदात् तानि शुक्लान्यभ्यतपत् तेभ्योऽभितप्तेभ्यः त्रयो वर्णा अजायन्त । अकार उकारो मकार इति । तानेकधा समभरत् तदेतत् ॐ इति' इत्यादि ऐतरेयब्राह्मणपञ्चमखण्डिकाप्रतिपादितप्रणवप्रकारो द्रष्टव्यः ॥ २३ ॥

मन्दोपकारिणी – त्रिभुवनेति ॥ प्रवीणः प्रवचननिपुणः 'प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः' इत्यमरः । पृथुमतिः श्रीपूर्णप्रज्ञाचार्यः प्रवचनपरिशुद्धयै प्रवचनस्य व्याख्यानस्य परिशुद्धयै निर्दोषत्वाय प्रणौति स्म प्रणवोच्चारणं कृतवान् 'प्रपूर्वात् नु स्तुतौ' इति धातोः लट् परस्मैपदं नौति नुतः नुवन्ति किं कृत्वा तेषां वर्णानां सम्यक् आनुपूर्व्येण ऐक्यं नैरन्तर्यलक्षणसंश्लेषं आपाद्य, केषां वर्णानां, ये वर्णवर्याः अक्षरश्रेष्ठाः अकारोकारमकाराख्याः । त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्लत्रितयरसतया अत्र त्रिशब्दः भुवनतेजोवेदशब्दैः प्रत्येकं सम्बध्यते सरूपाणां इत्येकशेषः एवं च त्रीणि च तानि भुवनानि पृथिव्यन्तरिक्षदिवः संज्ञानि त्रिभुवनानि तेभ्यः वराणि सारत्वेन व्यक्तानि च तानि तेजांसि त्रीणि ज्योतींषि च अग्निवाय्वादित्याख्यानि तेभ्यो व्यक्ताः सारत्वेन अभिव्यक्ताश्च ते वेदाः ऋग्वेदयजुर्वेद-सामवेदाख्यास्त्रयो वेदाश्च तेभ्यः अर्थाः अभिधेयरूपाणि व्यक्तानीति यावत् । शुक्लानि भूर्भुवस्वरिति व्याहृतयः तेषां त्रितयं त्रयं तस्मात् रसतया सारतया वर्णिताः श्रुतौ उक्ताः त्रिभुवनेषु त्रीणि ज्योतींषि साराणि तेषु त्रिष्वपि त्रयो वेदाः साराः तेष्वपि त्रिषु तिस्रो व्याहृतयः साराः तास्वपि तिसृषु त्रयो वर्णाः अकारोकारमकाराख्याः साराः इति श्रुतौ प्रतिपादिताः इत्यर्थः । तेषां इति सम्बन्धः । श्रुतिस्तु 'स इमान् लोकान् असृजत पृथिवीमन्तरिक्षं दिवं तान् लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यः त्रीणि ज्योतींषि अजायन्त

अग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींषि अभ्यतपत् तेभ्योऽभितप्तेभ्यः त्रयो वेदाः अजायन्त ऋग्वेद एवाग्नेः अजायत यजुर्वेदो वायोः सामवेद आदित्यात् । तान् वेदान् अभ्यतपत् तेभ्योऽभितप्तेभ्यः त्रीणि शुक्राणि अजायन्त भूरित्येव ऋग्वेदादजायत भुवरिति यजुर्वेदात् स्वरिति सामवेदात् तानि शुक्राणि अभ्यतपत् तेभ्योऽभितप्तेभ्यः त्रयो वर्णाः अजायन्त अकार उकार मकार इति तानेकधा समभरत् तदेतत् ओं इति' ॥ २३ ॥

स्वरमचरमकाले मन्द्रमेवात्यजद्भिः स्फुटमुपनिषदन्ते वाचकैर्वाच्यमाने ।
प्रवचनमतिचित्रं प्राणभाजां श्रुतीनां अमृतममृतभावस्यैष हेतुं चकार ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – स्वरमिति ॥ चरमकाल उपसंहारकालः स न भवति इति अचरमकाल उपक्रमकाल इत्यर्थः तस्मिन् । मन्द्रो मन्दः स्वरः तं अत्यजद्भिः । उपक्रमकाले उच्चैर्ध्वनेः निषिद्धत्वात् अङ्गीकृतमन्द्रस्वरैरित्यर्थः । मन्द्रस्वरं अत्यजद्भिः वाचकैः, उपनिषदां अन्तो निर्णयो यस्मात् सः उपनिषदन्तः तस्मिन् ग्रन्थे । उपनिषद्भाष्ये वा वेदान्तशास्त्रविषयग्रन्थान्तरे वेत्यर्थः । वाचकैः स्फुटं वाच्यमाने सति मन्द्रं वाचयद्भिरपि स्फुटं वाच्यमाने सति इत्यर्थः । एष श्रीमध्वः प्राणभाजां जीवानां श्रुतीनां कर्णानां अमृतं अमृतायमानं, अमृतभावो मुक्तत्वं तस्य हेतुं अतिचित्रं प्रवचनं व्याख्यानं चकार ॥ २४ ॥

मन्दोपकारिणी – स्वरमिति ॥ अचरमकाले चरमः अन्तिमः न भवतीति अचरमः अचरमश्चासौ कालश्च अचरमकालः तस्मिन् उपक्रमकाले इत्यर्थः । मन्द्रमेव स्वरं उपांशुध्वनिं अत्यजद्भिः स्वीकृतवद्भिः उच्चैर्ध्वनेः निषिद्धत्वात् अङ्गीकृतमन्द्रस्वरैः इत्यर्थः । वाचकैः पुस्तकं वाचयद्भिः शिष्यैः उपनिषदन्ते उपनिषदां अन्तः निर्णयः यस्मात् तत् उपनिषदन्तम् । उपनिषद्भाष्यादिग्रन्थः तस्मिन् 'अन्तोऽस्त्री निर्णये नाशे स्वरूपाग्र्येतरेतरः' इति भास्करः । स्फुटं स्पष्टं वाच्यमाने मन्द्रध्वनिना वाचयद्भिरपि इतरेषां अर्थबोधो यथा भवेत् तथा स्फुटं वाच्यमाने सति इत्यर्थः । एषः श्रीमध्वाचार्यः प्राणभाजां प्राणान् इन्द्रियाणि भजन्तीति प्राणभाजः तेषां श्रोत्रादीन्द्रियपाटववतां इत्यर्थः । जीवानां श्रुतीनां श्रवणेन्द्रियाणां अमृतं अमृतसदृशं सुखकरं इत्यर्थः । अमृतभावस्य अमृतत्वस्य मुक्तत्वस्य मोक्षस्येति यावत् । हेतुं कारणं अतिचित्रं प्रवचनं वाचितग्रन्थव्याख्यानं चकार ॥ २४ ॥

धनमिव सधनायेभ्योऽर्कसूनुः प्रसन्नः शरशतमिव पार्थः संयुगार्थिभ्य उग्रः ।
अरतिविरहितः सोऽनारतं नोऽदिशन्नो प्रतिवचनमदीनं चोदकेभ्योऽखिलेभ्यः ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – धनमिति ॥ अरतिविरहितः तन्द्रारहितः स श्रीमध्वः । चोदकेभ्यो ये मत्सरवर्जिताः सन्तः तत्त्वज्ञानबुभुत्सया चोदयन्ति तेभ्यः तत्सन्तोषकरं प्रत्युत्तरं प्रसन्नः सन्, धनाया धनतृष्णा तया सहिताः सधनायास्तेभ्यो धनार्थिभ्य इत्यर्थः । अर्कसूनुः कर्णो धनमिव, अथ ये समत्सरा जिगीषया चोदयन्ति तेभ्यः तन्निराकरण-चतुराणि प्रत्युत्तराणि उग्रः, शत्रुभयङ्करः पार्थोऽर्जुनः संयुगार्थिभ्यो युद्धार्थिभ्यः शत्रुभ्यः शरशतमिवाखिलेभ्यः पृच्छकेभ्योऽदीनमतिप्रौढं प्रतिवचनं प्रत्युत्तरं अनारतं सर्वदा नो अदिशदिति नो न प्रददातीति नो । अदिशदेवेत्यर्थः ॥ २५ ॥

मन्दोपकारिणी – धनमिति ॥ अरतिविरहितः अरत्या आलस्येन विरहितः वर्जितः । सः श्रीमध्वाचार्यः । अखिलेभ्यः चोदकेभ्यः पृच्छद्भ्यः सन्तुष्टस्सन् अदीनं अतिप्रौढं प्रतिवचनं प्रत्युत्तरं 'प्रतिवाक्योत्तरे समे' इत्यमरः अनारतं अविच्छेदेन नोऽदिशन्नो न प्रददौ इति नो अदिशत् एव इत्यर्थः । ये मत्सरवर्जितास्सन्तः तत्वबुभुत्सया पृच्छन्ति तान् प्रति तत्सन्तुष्टिकरं प्रत्युत्तरं प्रसन्नो भूत्वा दिदेश इति भावः । कः कस्मै किमिव, अर्कसूनुः सूर्यपुत्रः कर्णः 'विकर्तनार्कमार्तण्डमिहिरारुणपूषणः' इत्यमरः सधनायेभ्यः धनाया धनतृष्णा तया सहिताः सधनायाः धनकांक्षावन्तः तेभ्यः धनं द्रव्यं इव, ये तु मत्सरात् जिगीषया चोदयन्ति तेभ्यः तन्निराकरणे शरान् उग्रः क्रूरस्सन् दिदेश तत्कथमिव उग्रः पार्थः संयुगार्थिभ्यः संयुगं युद्धं अर्थिभ्यः इच्छद्भ्यः शत्रुभ्यः शरशतमिव बाणशतमिव 'सम्प्रहाराभिसम्पातकलिसस्फोटसंयुगाः' इत्यमरः । 'दिश अतिसर्जने' लङ् परस्मैपदम् ॥ २५ ॥

अथ दशशतशोचिष्याप्रयाति प्रतीच्याः प्रवचनमवसाय्य स्नातुमायात् तटाकम् ।
पृथुमतिरिह तावच्छ्रेष्ठसंसर्गलोलैः समगमि सपदि स्वर्निम्नगाद्यैः सुतीर्थैः ॥२६॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ दश च तानि शतानि च दशशतानि तावन्ति रोचींषि यस्य तस्मिन् सहस्ररश्मौ सूर्य इत्यर्थः । प्रतीच्याः पश्चिमत आ ईषत् प्रतियाति सति मध्याह्नानन्तरमेवेति यावत् । पृथुमतिः श्रीमध्वः प्रवचनं व्याख्यानं अवसाय्य समाप्य

स्नातुं यावत् यदा तटाकं आयात् जगाम तावत् तदा श्रेष्ठस्य उत्तमस्य मध्वस्य यः संसर्गः सम्बन्धः तस्मिँल्लोलानि लोलुपानि तैः स्वः स्वर्गस्य निम्नगा गङ्गा आद्या येषां तानि स्वर्निम्नगाद्यानि तैः, तीर्थैः तटाकं सपदि झटिति समगमि समागतम् । गङ्गादितीर्थानि तटाके मिलितानि इत्यर्थः ॥ २६ ॥

मन्दोपकारिणी – अथेति ॥ दशशतशोचिषि दशशतं सहस्रं शोचींषि रश्मयः यस्य सः दशशतशोचिः सूर्यः तस्मिन् । प्रतीच्याः पश्चिमदिशः अभिमुखं इति शेषः पश्चिमाभिमुखं इत्यर्थः । आ ईषत् प्रयाति सति गच्छति सति मध्याह्नानन्तरं इति भावः । पृथुमतिः श्रीपूर्णप्रज्ञाचार्यः प्रवचनं व्याख्यानं अवसाय्य समाप्य स्नातुं माध्याह्निकस्नानं कर्तुं यदा तटाकं प्रति सरोवरं प्रति आयात् अगच्छत् 'या प्रापणे' इति धातोः लङ् परस्मैपदं आयात् आयातां आयन् । तावत् तदा श्रेष्ठसंसर्गलोलैः श्रेष्ठस्य उत्तमस्य श्रीमध्वाचार्यस्य संसर्गे सम्बन्धविषये लोलैः सतृष्णैः 'लोलः सतृष्णचलयोः' इति भास्करः स्वर्निम्नगाद्यैः स्वः स्वर्गस्य निम्नगा नदी भागीरथी आद्या येषां तानि स्वर्निम्नगाद्यानि तैः सुतीर्थैः शोभनैः तीर्थैः तीर्थाभिमानिदेवैः इह तटाके सपदि झटिति समगमि समागतम् । श्रीमध्वाचार्य-स्नानवेलायां मध्वाचार्यसङ्गत्यपेक्षया गङ्गादिसर्वतीर्थानि तटाके मिलितानि अभूवन् इति भावः ॥ २६ ॥

घनरसनिकरोऽसावन्तरत्यन्तशुद्धो मुनिगण इव भूयः स्नेहवान् प्राग्दधानः ।
प्रतिकृतिमखिलज्ञस्यापरोक्ष्येण तावत् स्फुटमलभत रूपं मज्जने सज्जनेष्टम् ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – घनेति ॥ अन्तो अन्तर्भागे अत्यन्तशुद्धः कर्दमादिशुद्धः भूयो बहुलो यः स्नेहः स्नेहाख्याम्भसो गुणो भूयः स्नेहः सोऽस्यास्तीति तथोक्तोऽसौ घनरसनिकरो जलसमूहः । 'नीरक्षीराम्बुशम्बरम् । मेघपुष्पं घनरस' इत्यमरः । प्राक् मज्जनात् पूर्वं, अखिलज्ञस्य तटाकसमीपवर्तिनः श्रीमध्वस्य प्रतिकृतिं प्रतिबिम्बं दधानः सन् तावत् तदा मज्जनं अवगाहनं तस्मिन् मज्जनसमय इत्यर्थः । सज्जनेष्टं सज्जनप्रियं रूपं श्रीमध्वाचार्यरूपं स्फुटं सम्यक् आपरोक्ष्यं अपरोक्षत्वं तेन मुनिगण इव मुनिसमूह इव अलभत प्राप । भूयः स्नेहवशात् बहुलभक्तिमदन्तःकरणे अत्यन्तं शुद्धो अज्ञानादिदोषरहितः प्राक् ध्यानयोगपरिपाकात्पूर्वं प्रतिकृतिं ध्यानकाले मनसि प्रतीयमानभगवत्प्रतिबिम्बं अन्ते

अन्तःकरणे दधानो मुनिगणः पश्चात् ध्यानयोगपरिपाकानन्तरं तत्स्वरूपमेव यथा सम्यगापरोक्ष्येण पश्येत्तद्वदिति भावः । तटाकसमीपवर्तिनः श्रीमध्वाचार्यस्य प्रतिबिम्बं दधानो जलसमूहः पश्चात् मज्जनसमये स्वरूपमेव अपरोक्ष्येण प्राप इत्यर्थः ॥ २७ ॥

मन्दोपकारिणी – घनेति ॥ अन्तः जलान्तः जलमध्ये । अत्यन्तशुद्धः कर्दमादि-रहितः भूयः स्नेहवान् भूरिद्रवत्वधर्मवान् असौ घनरसनिकरः घनरसानां अम्भसां निकरः समूहः 'मेघपुष्पं घनरस' इत्यमरः । प्राक् मज्जनात् पूर्वं अखिलज्ञस्य अखिलं सर्वं जानातीति अखिलज्ञः तस्य पूर्णप्रज्ञाचार्यस्य प्रतिकृतिं प्रतिच्छायां दधानस्सन् तावत् तदा मज्जने अवगाहनसमये सज्जनेष्टं सज्जनानां इष्टं प्रियं रूपं मध्वाचार्यस्य रूपं आकारं स्फुटं सम्यक् आपरोक्ष्येण प्रत्यक्षतः अलभत प्राप्तवान् । स्नानार्थं गच्छतः तटाकतीरवर्तिनः श्रीमध्वाचार्यस्य जले प्रतिफलितं प्रतिबिम्बं दधानः जलसमूहः पश्चात् मज्जनसमये स्वरूपमेव सम्यक् प्रत्यक्षेण प्राप इति भावः । क इव भूयः स्नेहवान् बहुभक्तिमान् मुनिगणः मुनीनां ध्यानं कुर्वतां ऋषीणां गणः समूह इव । मुनिगणोऽपि अन्तः अन्तःकरणे अत्यन्तशुद्धः अज्ञानादिदोषरहितस्सन् प्राक् ध्यानयोगपरिपाकात्पूर्वं अखिलज्ञस्य भगवतः ध्यानकाले मनसि प्रतीयमानं वासनामयं प्रतिबिम्बं दधानः ध्यानपरिपाकानन्तरं भगवत्स्वरूपमेव यथा सम्यक् अपरोक्षेण पश्येत् तद्वत् इति भावः ॥ २७ ॥

अपरिमितमनीषस्योल्लसच्छङ्खबाहो रथचरणिशिलानां तन्वतोऽत्राभिषेकम् ।
प्रतितनव उदारास्तास्वलं सन्निधातुस्तनव इव विरेजुः पाञ्चजन्यप्रियस्य ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – अपरिमितेति ॥ अत्र तटाके रथचरणः चक्रं अस्यास्तीति रथचरणी श्रीहरिः तस्य शिलाः तासाम् । यद्वा रथचरणाः चक्राण्यासु सन्तीति रथचरण्यः ताश्च ताः शिलाश्च तासामिति । सालग्रामशिलानां इति यावत् । अभिषेकं अभिषेचनं तन्वतः कुर्वतः, उल्लसत् शङ्खो बाहौ यस्य स तथोक्तः तस्य । अपरिमिता मनीषा यस्य स तथा तस्य उदाराः समीचीनाः प्रतितनवः प्रतिबिम्बाः तासु चक्रिशिलास्वलं सम्यक् सन्निधातुः सन्निधानं कुर्वतः, पाञ्चजन्यः प्रियो यस्य स तथा तस्य श्रीहरेः तनव इव स्वरूपाणीव तासु चक्रिशिलासु विरेजुः ॥ २८ ॥

मन्दोपकारिणी – अपरिमितेति ॥ अत्र तटाके रथचरणिशिलानां रथचरणं चक्रं आसां अस्तीति रथचरण्यः ताश्च ताः शिलाश्च रथचरणिशिलाः तासां शालग्रामशिलानां इति यावत् । अभिषेकं तन्वतः कुर्वतः उल्लसच्छङ्खबाहोः उल्लसत् शुभ्रत्वेन शोभमानः शङ्खः बाहौ दक्षिणकरे यस्य स तथोक्तः तस्य । अपरिमितमनीषस्य अपरिमिता मनीषा बुद्धिः यस्य स तथोक्तः तस्य श्रीमध्वाचार्यस्य 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः उदाराः उत्कृष्टाः सुरूपा इत्यर्थः । प्रतितनवः प्रतिबिम्बाः तासु शालग्रामशिलासु विरेजुः शुशुभिरे । का इव, तासु शालग्रामशिलासु अलं अत्यन्तं सन्निधातुः सन्निधानं कुर्वतः पाञ्चजन्यप्रियस्य पाञ्चजन्यः शङ्खः प्रियः यस्य सः तस्य शङ्खपाणिनः इति यावत् । हरेः तनव इव रूपाणीव । स्नात्वा तीरे उपविश्य शङ्खं दक्षिणपाणिना गृहीत्वा तीर्थार्थं शालग्रामशिलाभिषेककरणवेलायां स्वच्छत्वेन शालिग्रामशिलासु प्रतिफलिताः हस्तधृत-शङ्खस्य मध्वाचार्यस्य आकाराः शालग्रामशिलासन्निहितस्य शङ्खपाणेः हरेः रूपाणीव रेजिरे इति भावः ॥ २८ ॥

अभिदधति मुनीन्द्रा द्वादशाब्दोपवासप्रतिमफलमलं यत्सेवनं भक्तियुक्तम् ।
अधिकममरनद्याद्याप्लवाद्धन्यमान्यादपिबदलवबोधो विष्णुपादोदकं तत् ॥ २९ ॥

भावप्रकाशिका – त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः । समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥ षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी । द्वादशाब्दोपवासस्य विष्णुपादोदसेवनम् । यानि कानि च तीर्थानि ब्रह्माण्डान्तर्गतानि च । विष्णुपादोदकस्यैते कलां नार्हन्ति षोडशीमित्यभिदधति ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – अभीति ॥ मुनीन्द्रा भक्त्या युक्तं सहितं यथा भवति तथा भक्तियुक्तं यस्य श्रीविष्णुपादोदकस्य सेवनं यत्सेवनं अलं सम्यक्, द्वादश च ते अब्दाश्च तेषु उपवासः तेन प्रतिमं समानं द्वादशाब्दोपवासप्रतिमं तादृशं फलं यस्य तत्तथोक्तं अभिदधति वदन्ति । पुनः कथंभूतमित्यत आह– धन्येति । धन्यमान्यात् महद्भिः मान्यात् अमरनदी गङ्गा आद्यः यासां तास्वाप्लवात् स्नानादधिकं अधिकफलं चाभिदधति । अलवबोधः पूर्णप्रज्ञाचार्यः तदेवं महाफलं विष्णुपादोदकं सालिग्रामाभिषेकतीर्थं इत्यर्थः अपिबत् स्वीकृतवान् विष्णुपादोदकस्योक्तफलवत्वञ्च । 'त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः ।

समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः । षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी । द्वादशाब्दोपवासस्य विष्णुपादोदसेवनम्' इति प्रमाणसिद्धम् ॥ २९ ॥

मन्दोपकारिणी – अभिदधतीति ॥ मुनीन्द्राः मुनिश्रेष्ठाः । भक्तियुक्तं भक्त्या युक्तं यथा भवति तथा भक्तिपूर्वकं यत्सेवनं यस्य श्रीविष्णुपादोदकस्य शालग्रामतीर्थस्य सेवनं पानरूपभजनं अलं सम्यक् विधिपूर्वकं द्वादशाब्दोपवासप्रतिमफलं द्वादश अब्दाः वत्सराः यस्य सः द्वादशाब्दः स चासौ उपवासः अनशनरूपव्रतविशेषश्च द्वादशाब्दोपवासस्य प्रतिमं सदृशं फलं यस्य तत् द्वादशाब्दोपवासप्रतिमफलं अभिदधति द्वादशाब्दोपवासव्रते कृते सति यावत् फलं भवति तावत् फलं विष्णुपादोदकपाने कृते सति भवति इति वदन्तीति भावः । तथा धन्यमान्यात् धन्यैः महद्भिः मान्यात् आदरणीयात् अमरनद्याद्याप्लवात् अमरनदी देवनदी गङ्गा सैव आदिः येषां तानि अमरनद्यादीनि अमरनद्यादिषु तीर्थेषु आप्लवात् स्नानात् अधिकं अधिकफलं अभिदधति 'आप्लवः स्नानं' इत्यमरः । अलवबोधः अलवः अनल्पः बहुलः बोधो यस्य स तथोक्तः पूर्णप्रज्ञः । तत् एवं महाफलं विष्णुपादोदकं शालग्रामशिलाभिषेकतीर्थं इत्यर्थः अपिबत् पानं अकरोत् । 'अभिपूर्वात् डु धाञ् धारणपोषणयोः इति धातोः लट् परस्मैपदं दधाति धत्तः दधति' । 'पा पाने' इत्यतो लङ् परस्मैपदम् । विष्णुपादोदकस्य उक्तफलत्वं च 'त्रिरात्रफलदा नद्यः- द्वादशाब्दोपवासस्य विष्णुपादोदकसेवनं इत्यादिवाक्यात् सिद्धम् ॥ २९ ॥

तरणिभिरिव गौरैरूर्ध्वपुण्ड्रैर्द्विषड्भिः सदरपरमचक्रोदीर्णतेजा हरीष्टः ।
मुररिपुविमुखानां दुःसहो देहभाजां लयसमय इवान्यो मान्यधीराबभासे ॥ ३० ॥

भावप्रकाशिका – सन्तोऽरा अस्येति सदरम् ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – तरणिभिरिति ॥ दरेण शङ्खेन सहितं सदरं तादृशं यत्परमचक्रं उत्तमसुदर्शनं तेनोदीर्णं प्रवृद्धं तेजो यस्य स तथा शङ्खचक्रलाञ्छनेन प्रवृद्धकान्तिविशेष इत्यर्थः । हरेः इष्टः हरीष्टः । मुररिपुविमुखानां भगवद्विमुखानां दुष्टानां देहभाजां प्राणिनां दुःसहोऽसह्योऽत्यप्रिय इत्यर्थः । मान्यधीः श्रीपूर्णप्रज्ञाचार्यः तरणिभिरिव सूर्यैरिव गौरैः शुभ्रैः द्वौ च ते षट् च तैः द्वादशभिः इत्यर्थः । उर्ध्वानि च तानि पुण्ड्राणि च तैः । 'चित्रकमुक्तं विशेषकं पुण्ड्रमि'ति हलः । अन्यो अपरो लयसमय इव प्रलयस्य

कालः स इव आबभासे । सोऽपि द्विषड्भिः सूर्यैः सहितः प्रलयकाले द्वादशादित्यानां युगपत् उदयात् । सदरपरमचक्रोदीर्णतेजाः शोभनारयुक्तहरिचक्रेण प्रवृद्धतेजा इत्यर्थः । लयसमयोऽपि संहाराङ्गत्वात् हरीष्टः । मुररिपुविमुखानां देहभाजां दुःसहश्च, तेषां तमः प्राप्तिनिमित्तत्वात् । हरिद्वेषपरिपाकवन्तो हि प्रलये तमः प्रविशन्ति ॥ ३० ॥

मन्दोपकारिणी – तरणिभिरिति ॥ तरणिभिरिव सूर्यैरिव गौरैः शुभ्रैः 'द्युमणिस्तरणिर्मित्रः' इत्यमरः 'अवदातः सितो गौरः' इति च । द्विषड्भिः द्वौ च ते षट् च तैः द्विषड्भिः द्वादशभिः इत्यर्थः । ऊर्ध्वपुण्ड्रैः ऊर्ध्वाकारैः पुण्ड्रैः तिलकैः गोपीचन्दनेन देहे कृतैः सहितः । सदरपरमचक्रोदीर्णतेजाः दरः पाञ्चजन्यः शङ्खः दरेण सहितं च तत् परमं च तत् चक्रं च तेन उदीर्णं अभिवृद्धं तेजः कान्तिः यस्य स तथोक्तः चक्रशङ्खलाञ्छनेन अभिवृद्धशोभाविशेषवान् इत्यर्थः । हरीष्टः हरेः इष्टः । मुररिपुविमुखानां मुररिपोः श्रीहरेः विमुखानां देहभाजां शरीरिणां दुःसहः अत्यप्रियः । भगवद्विमुखाः शङ्खचक्रधारिणं श्रीमध्वाचार्यं दृष्ट्वा न सहन्ते इति भावः । मान्यधीः मान्या प्रमाणजन्या यथार्था धीः बुद्धिः यस्य स तथोक्तः, मान्या सर्वैः आदरणीया धीः बुद्धिः यस्य इति वा श्रीपूर्णप्रज्ञाचार्यः आबभासे बभौ । 'भा दीप्तौ' इत्यतो लिट् आत्मनेपदं बभासे बभासाते बभासिरे । क इव अन्यः प्रलयकालादपरः लयसमय इव लयकाल इव । लयकालोऽपि द्विषड्भिः सूर्यैः सहितः । प्रलयकाले द्वादशादित्याः युगपत् उदयन्ति हि । सदरपरमचक्रोदीर्णतेजाश्च सन्तः उत्तमाः अराः चक्राङ्गानि यस्य तत् सदरं 'अरं शीघ्रे च चक्राङ्गे शीघ्रगामिनि किल्बिषे' इति विश्वः । सदरं च तत् परमं च तत् चक्रं चेति सदरपरमचक्रं तेन उदीर्णं शोभमानं तेजो यस्य स तथोक्तः । हरिचक्रेण प्रवृद्धतेजाः इत्यर्थः । हरीष्टः संहाराङ्गत्वात् । मुररिपुविमुखानां तमोयोग्यानां देहाभाजां जीवानां दुःसहश्च । तेषां तमःप्राप्तिनिमित्तत्वात् । हरिद्वेषपरिपाकवन्तो हि प्रलये प्रविशन्ति । स्नानानन्तरं तिलकचक्रशङ्खाद्यायुधानि दधार इति भावः ॥ ३० ॥

समधिकधिषणस्य प्रेक्षमाणो जनौघः प्रकृतिमधुरमास्यव्याजपूर्णेन्दुबिम्बम् ।
अमुचदपसरेति श्रावकोक्तेः पुराऽस्मिन् प्रचलति पदवीं तां प्राञ्जलिस्तूर्णमारात् ॥३१॥

पदार्थदीपिकोद्बोधिका – समधिकेति ॥ समधिका धिषणा प्रज्ञा यस्य स तथा तस्य श्रीमध्वस्य प्रकृतिमधुरं स्वभावेन रमणीयं आस्यं एव व्याजो मिषः तेन पूर्णेन्दुबिम्बं

पूर्णेन्दुमण्डलं यस्य स तथोक्तः तम् । प्रेक्ष्यमाणः पश्यन् जनौघः । अपसरेति मार्गात् अपगच्छेति श्रावकोक्तेः श्रोतुः शिष्यस्य उक्तेः, पुरा पूर्वं अस्मिन् श्रीमध्वे प्रचलति आसनात् चलति सति प्राञ्जलिः सन् तूर्णं यथा भवति तथा आरात् दूरतः तां पदवीं मार्गं अमुचत् अत्यजत् ॥ ३१ ॥

मन्दोपकारिणी – समधिकेति ॥ समधिकधिषणस्य सम्यक् अधिका पूर्णा धिषणा यस्य तस्य पूर्णप्रज्ञाचार्यस्य । प्रकृतिमधुरं प्रकृत्या स्वभावेन मधुरं रमणीयं 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे' इति वैजयन्ती । आस्यव्याजपूर्णेन्दुबिम्बं आस्यं व्याजं निमित्तं यस्य तत् तच्च तत् पूर्णं च तत् इन्दुबिम्बं चन्द्रमण्डलं च पूर्णेन्दुमण्डलसममुखं इत्यर्थः । प्रेक्षमाणः पश्यन् जनौघः अस्मिन् मध्वाचार्ये प्रचलति सति आसनात् उत्थाय निर्गच्छति सति, हे जन त्वं मार्गात् अपसर अपयाहि, गमनमार्गं त्यक्त्वा दूरतो गच्छ इत्यर्थः । इति एवं श्रावकोक्तेः श्रावकस्य कस्यचित् शिष्यस्य उक्तेः वचनात् पुरा पूर्वमेव प्राञ्जलिस्सन् प्रकृष्टः बद्धः अञ्जलिः करसम्पुटः येन स तथोक्तस्सन् तूर्णं शीघ्रं आरात् दूरतः 'आरादूरसमीपयोः' इत्यभिधानं तां मध्वगम्यां पदवीं मार्गं 'अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः अमुचत् अत्यजत् । 'मुच्लृ मोक्षणे' इति धातोः लुङ् परस्मैपदं अमुचत् अमुचतां अमुचन् । स्नानानन्तरं मठं प्रति गमनवेलायां मार्गस्थो जनः मार्गं त्यज इति शिष्योक्तेः पूर्वमेव कृताञ्जलिर्भूत्वा मार्गं विहाय मध्वमुखं निरीक्षमाणस्सन् दूरतः अतिष्ठत् इति भावः ॥ ३१ ॥

गुरुचरणसरोजद्वन्द्वनिर्णेजनाम्भो दधति जननिकाये सर्वमुर्वीगतं च ।
अवनिरनभिनन्दिन्यप्यदश्चक्षमेऽसौ कथमपि कथमेव स्यात्क्षमाख्याऽन्यथाऽस्याः
॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – गुरुचरणेति ॥ जननिकाये जनसमूहे गुरोः श्रीमध्वस्य चरणावेव पादावेव सरोजे पद्मे तयोः द्वन्द्वस्य युग्मस्य निर्णेजनं प्रक्षालनं तस्याम्भो जलं उर्वीगतं भुवि पतितं सर्वं दधति सति असौ अवनिः अनभिनन्दिन्यपि अप्रीयमाणापि अदः चरणक्षालनजलधारणं कथमपि कथञ्चिदेव चक्षमे सेहे । अन्यथा न च क्षमते चेत् अस्या भुवः क्षमाख्या क्षमेति नाम कथमेव कथं नु स्यात्? सर्वत्र अतिक्षमायुक्तत्वात् हि क्षमा इत्युच्यते । कुत्रचित् क्षमाभावे च क्षमाख्या न स्यात् इत्यर्थः ॥ ३२ ॥

मन्दोपकारिणी – गुरुचरणेति ॥ जननिकाये जनानां समूहे । गुरुचरणसरोजद्वन्द्व-निर्णेजनाम्भः गुरोः श्रीमध्वाचार्यस्य चरणावेव सरोजे कमले तयोः द्वन्द्वं युग्मं 'द्वन्द्वं कलहयुग्मयोः' इत्यमरः तस्य निर्णेजनं प्रक्षालनसम्बन्धि अम्भः जलं उर्वीगतं भूम्यां गतं सर्वमपि निश्शेषमपि दधति सति स्वशिरसि धृतवति सति असौ अवनिः भूमिः अनभिनन्दिन्यपि अप्रीयमाणापि असन्तुष्यमाणापि अदः स्वगतपादोदकधारणं कथमपि कथञ्चिदेव कृच्छ्रेणेव चक्षमे सेहे । 'क्षमूष् सहने' इत्यतो लिट् आत्मनेपदं चक्षमे चक्षमाते चक्षमिरे । अन्यथा सहनाभावे अस्याः भुवः क्षमाख्या क्षमा इति आख्या नाम कथमेव कथं नु स्यात् । सर्वत्र अतिक्षमायुक्तत्वादेव क्षमेत्युच्यते । कुत्रचित् क्षमाभावे क्षमेति नाम न स्यात् इत्यर्थः 'गौरिला कुम्भिनी क्षमा' इत्यमरः ॥ ३२ ॥

अविदितरसभेदं शीतलं लघ्वगन्धं विमलममलपाणिः पाणिजैरप्रविष्टम् ।
वदनपवनभीत्या पार्श्वतो बिभ्रदग्र्यं कमथ करकपूर्णं संयमीहानिनाय ॥ ३३ ॥

भावप्रकाशिका – 'अगन्धमव्यक्तरसं शीतलं च तृषापहम् । अच्छं लघु च पथ्यं च तोयं गुणवदुच्यत' इति च ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – अवदितेति ॥ अथ अमलौ पाणी हस्तौ यस्य स तथोक्तः संयमी निगृहीतेन्द्रियः कश्चित् यतिः । वदनपवनस्य मुखवायोः भीत्या भयेन श्वासवायुसम्बन्धभयादित्यर्थः । पार्श्वत एकस्मिन्पार्श्वे बिभ्रत् दधानः सन् अविदितो रसभेदो रसविशेषो यस्य तत्तथोक्तम् । शीतलं, लघु गुरुत्वदोषरहितं, न विद्यते गन्धो यस्य तदगन्धं विमलं स्वच्छं पाणिजैः नखरैः अप्रविष्टं अस्पृष्टं करकपूर्णं कमण्डलुपूर्णम् । 'अगन्धम-व्यक्तरसं शीतलञ्च तृषापहम् । अच्छं लघु च पथ्यं च तोयं गुणवदुच्यते' इत्युक्ततोयगुण-युक्तमित्यर्थः । अग्र्यं श्रेष्ठं कं जलम् । अग्र्योदकमित्यर्थः । इह आनिनाय ॥ ३३ ॥

मन्दोपकारिणी – अविदितेति ॥ अथ अमलपाणिः अमलौ प्रक्षालनेन निर्मलौ पाणी हस्तौ यस्य स तथोक्तः । संयमी कश्चित् यतिः । इह पूजाकाले अग्र्यं श्रेष्ठं कं जलं अग्र्योदकं इत्यर्थः । आनिनाय आनीतवान् 'णीञ् प्रापणे' इति धातोः लिट् परस्मैपदं

निनाय निन्यतुः निन्युः । 'को ब्रह्मात्मानिलार्केषु शमने सर्वनामनि । पावके च मयूरे च मुखशीर्षजलेषु कं' इति विश्वः । किं कुर्वन् वदनपवनभीत्या वदनस्य मुखस्य पवनो वायुः श्वासवायुरिति यावत् । तस्य भीत्या भयेन पार्श्वतः मुखाभिमुख्यं परिहृत्य एकस्मिन् पार्श्वे बिभ्रत् दधानः । कथंभूतं अग्र्योदकं अविदितरसभेदं अविदितः अज्ञातः रसभेदः रसविशेषः यस्य तत् तथोक्तं अनुच्छिष्टं इत्यर्थः । शीतलं लघु गुरुत्वदोषरहितं अगन्धं दुर्गन्धरहितं विमलं स्वच्छं पाणिजैः नखैः अप्रविष्टं अस्पृष्टं करकपूर्णं करके कमण्डलौ पूर्णं पूरितं 'कमण्डलौ च करकः' इत्यमरः 'अगन्धमव्यक्तरसं शीतलं च तृषापहम् । अच्छं लघु च पथ्यं च तोयं गुणवदुच्यते' इति उक्ततोयगुणयुक्तं इत्यर्थः ॥ ३३ ॥

विहसितबिसभङ्गश्रीप्रकर्षं सितिम्ना जलजममृतपूरैः पूरयामास रम्यम् ।
समयगुणविशेषालोचकैर्लालनीयः ससुरभिसुमनोभिः स स्फुटं गौरपक्षः ॥ ३४ ॥

भावप्रकाशिका – सुसुरभिसुमनोभिः सुष्ठुसुगन्धिपुष्पैः— 'पूरयन्ति दिशः सोमं देवा गावः सरस्वती'ति च ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – विहसितेति ॥ गौरः प्रामाणिकत्वेन शोभनः पक्षः सिद्धान्तो यस्य स तथोक्तः । अत एव समयस्य स्वप्रणीतशास्त्रस्य ये गुणविशेषाः श्रुतिस्मृत्यनुगुणत्वादिगुणविशेषाः तेषां आलोचकैः चिन्तकैः सुमनोभिः देवैः स्फुटं सम्यग्लालनीय आदरणीयः स श्रीमध्वः सितिम्ना शुभ्रतया विहसितो निराकृतो बिसभङ्गश्रीप्रकर्षः मृणालभङ्गकान्त्यतिशयो येन स तथोक्तः तम् । 'मृणालं बिसमब्जादी'त्यमरः । रम्यं जलजं पाञ्चजन्यम् । सुरभीणि च तानि सुमनांसि च तैः शोभनपरिमलयुक्तप्रसूनैः इत्यर्थः । अमृतपूरैः जलसमूहैः । 'पयः कीलालममृतमि'त्यमरः । पूरयामास । पाञ्चजन्यं अग्र्योदकेन अपूरयदित्यर्थः । समयगुणविशेषालोचकैः शुक्लपक्ष-कृष्णपक्षादिकालगुणविशेषपरैः ज्योतिःशास्त्रविशारदैः इत्यर्थः । लालनीयः शुभकर्मसु प्रशस्तत्वेन आदरणीयो गौरपक्षः शुक्लपक्षः सितिम्ना विहसितबिसभङ्गश्रीप्रकर्षम् । अत एव रम्यं मनोहरं जलजं चन्द्रं ससुरभिसुमनोभिः सुरभ्या सहिताः ससुरभयः ते च ते सुमनसो देवाश्च तैः कर्तृभिः अमृतपूरैः अमृतात्मककलासमूहैः किरणैः यथा पूरयेत् तद्वदिति ध्वनितोऽर्थः । तथा हि सुरभ्यादयो देवाः कृष्णपक्षप्रतिपदमारभ्य प्रत्यहं चन्द्रस्य एकैकां

कलां दर्शावधि स्वीकृत्य पुनः शुक्लपक्षप्रतिपदमारभ्य यथाक्रमं प्रत्यर्पणेन चन्द्रं अमृत-कलाभिः पूर्णिमावधि पूरयन्ति । तथाचोक्तं 'पूरयन्ति दिशः सोमं देवा गावः सरस्वती' इति ॥ ३४ ॥

मन्दोपकारिणी – विहसितेति ॥ गौरपक्षः गौरः प्रामाणिकत्वेन निर्मलः पक्षः वैष्णवसिद्धान्तः यस्य स तथोक्तः । अत एव समयगुणविशेषालोचकैः समयस्य स्वप्रणीत-सिद्धान्तस्य गुणविशेषाणां श्रुतिस्मृत्यनुगुणत्वादिगुणविशेषाणां आलोचकैः परामर्शपरैः । सुमनोभिः देवैः स्फुटं सम्यक् लालनीयः आदरणीयः सः मध्वाचार्यः शितिम्ना धवलतया 'शिते धवलमेचकौ' इत्यमरः । विहसितबिसभङ्गश्रीप्रकर्षं विहसितः निराकृतः बिसस्य कमलस्य भङ्गः विकासः तस्य श्रीप्रकर्षः कान्त्युत्कर्षः येन स तथोक्तः तं अतिशुभ्रं इत्यर्थः रम्यं मनोहरं जलजं शङ्खं ससुरभिसुमनोभिः सुरभयः परिमलसहिताश्च ताः सुमनसः पुष्पाणि च ताभिः सहिताः तैः 'स्त्रियः सुमनसः पुष्पं' इत्यमरः । अमृतपूरैः अमृतानां जलानां पूरैः समूहैः पूरयामास पूरितं अकरोत् । देवपूजाकाले अग्र्योदकेन शङ्खं पूरयित्वा देवस्याभिषेकं कृतवान् इति भावः । समयगुणविशेषालोचकैः समयस्य शुक्लपक्षकृष्ण-पक्षकालस्य गुणविशेषस्य साधुत्वादिगुणविशेषस्य आलोचकैः विचारपरैः ज्योतिःशास्त्रज्ञैः इत्यर्थः लालनीयः शुभकर्मसु प्रशस्तत्वेन आदरणीयः । गौरपक्षः गौरः शुक्लश्चासौ पक्षश्च शुक्लपक्षाख्यः कालविशेष इत्यर्थः । शितिम्ना विहसितबिसभङ्गश्रीप्रकर्षं पूर्व एवार्थः अत एव रम्यं जलजं चन्द्रं 'अब्जौ शङ्खशशाङ्कौ च' इत्यमरः । ससुरभिसुमनोभिः सुरभ्या कामधेन्वा सहिताः ते च ते सुमनसः देवाश्च तैः कर्तृभिः अमृतपूरैः अमृतानां अमृतकलानां पूरैः समूहैः करणैः यथा पूर्णं कुर्यात् तद्वदिति ध्वनितोऽर्थः । सुरभ्यादयो देवाः कृष्णप्रति-पदमारभ्य चन्द्रस्य प्रतिदिनं एकैकां कलां दर्शावधि स्वीकृत्य पुनः शुक्लपक्षप्रति-पत्तिथिमारभ्य यथाक्रमं प्रत्यहं एकैककलाप्रत्यर्पणेन चन्द्रं अमृतकलाभिः पूर्णिमावधि पूरयन्तीति हि प्रसिद्धं 'पूरयन्ति दिशः सोमं देवा गावः सरस्वती' इति ॥ ३४ ॥

विमलमलयजाम्भोबिन्दुभिश्चर्चिताचों नवललिततुलस्या पुष्पराज्याऽऽर्चयत्सः ।
स्थलजजलजवल्लीवृक्षवीरुत्समस्तप्रसवविजयलक्ष्म्या मूर्तयेवेन्दिरेशम् ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – विमलेति ॥ विमलं निर्मलं यन्मलयजं चन्दनं तद्युक्तमंभः तस्य बिन्दवः तैः विमलमलयजाम्भोबिन्दुभिः अर्चिता भूषिता अर्चा प्रतिमा येन स तथोक्तः । 'अर्चा तु प्रतिमा प्रोक्ता हरिणी सा हिरण्मयी'ति हलः । स श्रीमध्वो नवा नूतना या ललिततुलसी कोमलतुलसी तया पुष्पराज्या पुष्पसमूहेन मूर्तया मूर्तिमत्या स्थलजाश्च जलजाश्च वल्लीवृक्षवीरुधः स्थलजजलजवल्लीवृक्षवीरुधः तासां यानि समस्तप्रसवानि सर्वकुसुमानि तेषां यो विजयस्तस्य या लक्ष्मीः श्रीः तया इव इन्दिरेशं श्रीकृष्णं आर्चयत् अर्चयामास ॥ ३५ ॥

मन्दोपकारिणी – विमलेति ॥ विमलमलयजाम्भोबिन्दुभिः विमलः निर्मलश्चासौ मलयजः चन्दनश्च विमलमलयजः तस्याम्भोबिन्दुभिः चन्दनबिन्दुभिः इत्यर्थः 'गन्धसारो मलयजो भद्रः श्रीचन्दनोऽस्त्रियां' इत्यमरः आर्द्रगन्धेनेति भावः 'अम्भोऽर्णस्तोयपानीयं' इत्यमरः । चर्चितार्चः चर्चिताः लेपिताः अर्चाः शालग्रामशिलादिप्रतिमाः येन स तथोक्तः 'अर्चा पूजाप्रतिमयोः' इति विश्वः । सः श्रीमध्वाचार्यः नवललिततुलस्या नवा नूतना तत्काल एव सङ्गृहीता इति भावः ललिता कोमला नवा च सा ललिता च सा तुलसी च तया नूतनैः कोमलतुलसीदलैः इत्यर्थः । पुष्पराज्या कुसुमानां समूहेन इन्दिरेशं लक्ष्म्याः पतिं हरिं आर्चयत् पूजितवान् । 'अर्च पूजायामि'ति धातोः लङ् परस्मैपदं आर्चिचदिति पाठे णिजन्तात् लङ् आर्चिचत् आर्चिचतां आर्चिचन् । कया इव मूर्तया मूर्तिमत्या तुलस्या तदभिमानिन्या देव्या इव तथा मूर्तया स्थलजजलजवल्लीवृक्षवीरुत्समस्तप्रसवविजयलक्ष्म्या इव वल्लयः लताश्च वृक्षाश्च वीरुधः लताविशेषाश्च वल्लीवृक्षवीरुधः स्थले जाताः स्थलजाः जले जाताः जलजाः स्थलजाश्च ताः जलजाश्च ताः वल्लीवृक्षवीरुधश्च स्थलजजलजवल्ली-वृक्षवीरुधः वल्लीवृक्षवीरुधां समस्तप्रसवाः समस्तपुष्पाणि 'स्यादुत्पत्तौ फले पुष्पे प्रसवो गर्भमोचने' इत्यमरः तेषां विजयः उत्कर्षः तस्य लक्ष्मीः पुष्पोत्कर्षाभिमानिनी श्रीः तया इव मूर्तिमत्या तुलस्यभिमानिदेव्या इव मूर्तिमत्या नानाविधपुष्पोत्कर्षाभिमानिश्रीदेव्या इव इत्यर्थः । अत्र वल्लीशब्देन ऊर्ध्वमण्डपावलम्बिन्यो लताः वीरुधूशब्देन भूमावेव प्रसारिता लताविशेषाः ग्राह्याः 'वल्ली तु व्रततिर्लता लता प्रतानिनी वीरुत्' इत्यमरः । प्रतानिनी भूमावेव प्रसारिता लता वीरुत् इति उच्यते इति अभिधानार्थः । स्थलजाः जातीमालत्यादयः जलजाः कल्हारपद्मादयः वृक्षाः चम्पकादय इति ज्ञेयम् । श्रीगन्धतुलसीनानाविधपुष्पैश्च देवं सम्यक् आराधयामास इति भावः ॥ ३५ ॥

स दददधिकबोधः षोडशात्रोपचारान् व्यरहयदगुणान् द्वात्रिंशदागःपुरोगान् ।
अगणितगुणमुच्चैस्तोषयन् शार्ङ्गपाणिं षडपि परमभक्त्याऽनूपचारान् दिदेश ॥ ३६ ॥

भावप्रकाशिका – अर्घ्यपाद्याचमनीयमधुपर्कपुनराचमनीयस्नानवस्त्रभूषणयज्ञोपवीतासनगन्धपुष्पधूपदीपनैवेद्यनमस्काराः षोडशोपचाराः । अगुणा अन्यचित्तत्त्वादयः । 'भुक्त्वा पीत्वार्चनं दन्तकाष्ठाभक्ष्युपसर्पणम् । मैथुनानन्तरं चार्चा शवं स्पृष्ट्वोपसर्पणम् । अर्चान्तरे मूत्रविष्ठाविसर्गौ सास्रभाषणम् । नीलवस्त्रावृतस्याप्ती राजान्नात्तिरुपाग(ह)तिः । उपस्पृश्याविधानैस्तु शुश्रूषोरपि रुष्टता । अकर्मण्यप्रसूनार्चा रक्तकौपीनवस्त्रता । कृष्णवस्त्रैर्हरेः कर्मविधिः स्पृष्टिस्तमस्यपि । कामानुसारिता कृष्णवस्त्रस्य परिधूननम् । श्व(सं)स्पृष्टिः कोलमांसात्तिर्जालपादासनं तथा । उपसर्पः पङ्किले च चितिं स्पृष्ट्वोपसर्पणम् । पिण्याकात्तिश्चोपसर्तुः पोत्रिमांसोपपादनम् । उपयातुर्मद्यपानं कुसुम्भदलभक्षणम् । (परप्रावरणग्राहः स्वञ्जनादेरकल्पनम् ।) पुष्पादाने धूपदानं हरिवोढुरुपानहौ । अभेरीहन्तुरभ्याप्तिरजीर्णान्नस्य पूजनम् । द्वात्रिंशदपराधास्तु कथिता गुरुदोषदाः । वसुन्धरायै कोलेन (लोकेश) विष्णुना प्रभविष्णुनेति' च । 'मुखवासश्च ताम्बूलं दर्पणं छत्रचामरे । पादुके चेति विज्ञेया उपचाराः परे बुधैरि'ति षडनूपचाराः ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ अत्र षडधिका दश षोडश ते च ते उपचाराश्च तान् ददत् प्रयच्छन् अगणिता गुणा यस्य तं शार्ङ्गं पाणौ यस्य तं श्रीकृष्णं तोषयन् स श्रीमध्वः अधिकबोधः । द्व्यधिका त्रिंशत् द्वात्रिंशच्च तानि आगांसि च तानि पुरोगाणि पूर्वकाणि येषां तान् अगुणान् दोषान् व्यरहयत् वर्जयामास । रह त्यागे लङ् । परमभक्त्या षट् अनूपचारानपि दिदेश ददौ । तत्र षोडशोपचाराः — अर्घ्यपाद्याचमनीयमधुपर्क पुनराचमनीय स्नान वस्त्र भूषण यज्ञोपवीतासन गन्ध पुष्प धूप दीप नैवेद्य नमस्काराः इति । द्वात्रिंशदपराधाश्च—

भुक्त्वा पीत्वार्चनं दन्तकाष्ठाभक्ष्युपसर्पणम् ।
मैथुनानन्तरं चर्चा शवं स्पृष्ट्वोपसर्पणम् ॥
अर्चान्तरे मूत्रविष्ठाविसर्गौ सास्रभाषणम् ।
नीलवस्त्रवृतःस्याप्ती राजान्नात्तिरुपागतिः ॥

उपस्पृश्याविधानैस्तु शुश्रूषोरपि रुष्टता ।
अकर्मण्यप्रसूनार्चा रक्तकौपीनवस्त्रता ॥
कृष्णवस्त्रैर्हरेः कर्मविधिः स्पृष्टिस्तमस्यपि ।
कामानुसारिता कृष्णवस्त्रस्य परिधूननम् ॥
श्वस्पृष्टिः कोलमांसात्तिर्जालपादासनं तथा ।
उपसर्पः पङ्किले च चितिं स्पृष्ट्वोपसर्पणम् ॥
पिण्याकात्तिश्चोपसर्तुः पोत्रिमांसोपपादनम् ।
उपयातुर्मद्यपानं कुसुम्बदलभक्षणम् ॥
पुष्पादाने धूपदानं हरिवोढुरुपानहौ ।
अभेरी हन्तुरभ्यात्तिरजीर्णान्नस्य पूजनम् ॥
द्वात्रिंशदपराधास्तु कथिता गुरुदोषदाः ।
वसुन्धरायै कोलेन विष्णुना प्रभविष्णुना ॥

इत्युक्ताः । षडनूपचाराश्च मुखवासश्च ताम्बूलं दर्पणं छत्रचामरे । पादुके चेति विज्ञेया उपचाराः परे बुधैरिति ॥ ३६ ॥

मन्दोपकारिणी – स इति ॥ अत्र पूजायां षोडश उपचारान् अर्घ्यपाद्यादीन् ददत् प्रयच्छन् । अगणितगुणं अगणिताः असंख्याताः गुणाः ज्ञानानन्दादयो यस्य स तथोक्तः तम् । शार्ङ्गपाणिं शार्ङ्गं धनुः पाणौ यस्य स तथोक्तः तं नारायणं उच्चैः सम्यक् तोषयन् प्रीणयन् सः अधिकबोधः श्रीपूर्णप्रज्ञाचार्यः द्वात्रिंशदागःपुरोगान् द्वात्रिंशदपराधादीन् अगुणान् गुणविरुद्धान् दोषान् व्यरहयत् वर्जयामास 'रह त्यागे' इत्यतो लङ् परस्मैपदं अरहयत् अरहयतां अरहयन् । परमभक्त्या षट् अनूपचारानपि मुखवासादीनपि देवाय दिदेश दत्तवान् 'दिशि अतिसर्जने इत्यतो लिट् परस्मैपदम्' । 'अर्घ्यं पाद्यं चाचमनं मधुपर्कं तथैव च । पुनराचमनं स्नानं वसनं भूषणं तथा । उपवीतासने गन्धपुष्पे वै धूपदीपकौ । नैवेद्यं नमनं चैते उपचाराश्च षोडश' । 'मुखवासश्च ताम्बूलं दर्पणं छत्रचामरे । पादुके चेति षडिमेऽनूपचाराः परे मताः' । द्वात्रिंशदपराधास्तु, भुक्त्वा, पीत्वा, दन्तधावनमकृत्वा, शवं दृष्ट्वा, नीलवस्त्रं धृत्वा, अर्चनादयः ग्रन्थान्तरादवगन्तव्याः । मध्वाचार्यः अर्घ्यादि-षोडशोपचारैः मुखवासादिभिः षड्भिः अनूपचारैश्च हरिं पूजयित्वा 'अपराधसहस्राणि

क्रियन्तेऽहर्निशं मया । तानि सर्वाणि मे देय क्षमस्व मधुसूदन' इत्युक्तप्रकारेण क्षमापयामास इति भावः ॥ ३६ ॥

तमरुणमणिवर्णं दिव्यदेहाख्यगेहे स्नपितमतिपृथुश्रद्धानदीचित्तवार्भिः ।
ननु स यजति नित्यं हृत्सरोजासनस्थं न तु सकृदिति पुष्पैरष्टभिर्भावपुष्पैः ॥ ३७ ॥

भावप्रकाशिका – 'आराधयामि मणिसन्निभमात्मबिम्बं मायापुरे हृदयपङ्कज-सन्निविष्टम् । श्रद्धानदीविमलचित्तजलाभिषेकं भावाष्टपुष्पविधिना हरिमर्चयामी'ति भीमवचन-मनूदितं **तमित्यादिना** । अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ । शौचं तुष्टिः सर्व समर्पणमित्यष्टभावपुष्पाणि । 'अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः । सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते । ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तु सप्तमम् । सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशव' इति च ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – तमिति ॥ स श्रीमध्वः । अरुणो रक्तो यो मणिः पद्मरागमणिः तस्य वर्ण इव वर्णो यस्य तम् । दिव्योऽलौकिको यो देहः स इत्याख्या यस्य तत्तथोक्तं तादृशं यद्गेहं गृहं तस्मिन् । अतिपृथुः अतिविस्तृता या श्रद्धैव नदी तस्याः चित्तमेव वारीणि तैः । अतिविस्तृतश्रद्धाख्यनदीगतचित्ताख्यजलैरित्यर्थः । स्नपितं अभिषिक्तम् । हृत्सरोजमेव हृत्पद्ममेवासनं पीठं तस्मिन् तिष्ठतीति तथोक्तस्तं भगवन्तं पुष्टैः पूर्णैः अष्टभिः भावपूर्णैः नित्यं सर्वदा यजति ननु । इति, इत्थं 'विमलमलय-जाम्भोबिन्दुभिः' इत्याद्युक्तप्रकारेण, पुष्पैर्नवललिततुलस्यादिबाह्यपुष्पैः सकृदेकदा न तु यजति । अयं भावः । अष्टभिः पुष्पैः भगवन्तं सर्वदा यजत्येव न तु बाह्यपुष्पैः प्रत्यहं सकृदेव यजतीति । 'तमरुणमणिवर्णमिति च'— 'आराधयामि मणिसन्निभमात्मबिम्बं मायापुरे हृदयपङ्कजसन्निविष्टम् ॥ श्रद्धानदीविमलचित्तजलाभिषेकं' भावाष्टपुष्पविधिना हरिमर्चयामी'ति भीमवचनं अनूदितं ज्ञातव्यम् । 'अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ । शौचं तुष्टिः सर्वसमर्पणमि'त्यष्टभावपुष्पाणि ।

अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते ॥ १ ॥

ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तु सप्तमम् ।
सत्यञ्चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः ॥ २ ॥

इति चाष्टौ भावपुष्पाणि ॥ ३७ ॥

मन्दोपकारिणी – तमिति ॥ सः श्रीमध्वाचार्यः इति पूर्वोक्तप्रकारेण पुष्पैः नानाविधबाह्यपुष्पैः नित्यं प्रत्यहं सकृदेव तं हरिं यजतीति न तु नैव किन्तु दिव्यदेहाख्यगेहे शरीरनाम्नि मन्दिरे अतिपृथुश्रद्धानदीचित्तवार्भिः अतिपृथुः अतिविस्तृता च सा श्रद्धा आस्तिक्याख्या च सा नदी च श्रद्धानद्याः चित्ताख्यैः वार्भिः जलैः स्नपितं अभिषिक्तं अरुणमणिवर्णं अरुणमणिः पद्मरागः तस्य वर्ण इव वर्णो यस्य स तथोक्तः तं रक्तवर्णं हृत्सरोजासनस्थं हृत्सरोजं हृदयकमलं तदेव आसनं तस्मिन् तिष्ठतीति हृत्सरोजासनस्थः तं बिम्बरूपं भगवन्तं हरिं अष्टभिः अष्टसंख्याकैः भावपुष्पैः भावाख्यपुष्पैः नित्यं सर्वदा यजति ननु पूजयत्येव ।

'अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते ॥
ज्ञानपुष्पं तपः पुष्पं ध्यानपुष्पं तु सप्तमम् ।
सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः ॥'

इत्याद्यष्ट भावपुष्पाणि ज्ञेयानि ॥ ३७ ॥

कृतपरमसपर्यः सान्द्रसच्चन्दनाम्भःपरिमलितभुजोरोमण्डलांसो मनीषी ।
स्मितरुचिरमुखेन्दुः स्निग्धकौशेयवासाः स सुरमुनिनराणां चक्षुषामुत्सवोऽभूत् ॥३८॥

पदार्थदीपिकोद्बोधिका – कृतेति ॥ कृता परमसपर्या हरिपूजा येन स तथोक्तः । सान्द्रं अविरलं यत् सच्चन्दनाम्भः समीचीनचन्दनजलं तेन परिमलिताः परिमलयुक्ततया कृता भुजोरोमण्डलांसो भुजौ च उरोमण्डलं च अंसौ च यस्य सः तथोक्तः । स्मितं मन्दहासयुक्तं यद्रुचिरमुखं शोभनमुखं तदेव इन्दुः यस्य स तथा । स्निग्धं मनोहरं कौशेय-वासो यस्य स तथा । मनीषी स श्रीमध्वो मुनिसुरनराणां चक्षुषां उत्सवः अभूत् ॥ ३८ ॥

मन्दोपकारिणी – कृतेति ॥ कृतपरमसपर्यः कृता परमस्य सर्वोत्तमस्य भगवतः सपर्या पूजा येन स तथोक्तः 'पूजा नमस्यापचितिः सपर्यार्चार्हणाः समा' इत्यमरः ।

सान्द्रसच्चन्दनाम्भःपरिमलितभुजोरोमण्डलांसः भुजौ च उरसः वक्षसः मण्डलं च अंसौ स्कन्धौ च भुजोरोमण्डलांसाः । सान्द्रं घनीभूतं च तत् सत् समीचीनं च तत् चन्दनाम्भः गन्धजलं च सान्द्रसच्चन्दनाम्भः चन्दनाम्भसा परिमलिताः परिमलयुताः भुजोरोमण्डलांसाः यस्य स तथोक्तः । स्मितरुचिरमुखेन्दुः स्मितेन मन्दहासेन रुचिरं सुन्दरं मुखमेव इन्दुः चन्द्रः यस्य स तथोक्तः 'सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्' इत्यमरः । स्निग्ध-कौशेयवासाः स्निग्धं मसृणं कौशेयं पट्टतन्तुरचितं वासः वस्त्रं यस्य तथोक्तः 'चिक्कणं मसृणं स्निग्धं' इत्यमरः । मनीषी पण्डितः सः श्रीमध्वाचार्यः । सुरमुनिनराणां सुराश्च मुनयश्च नराश्च तेषां चक्षुषां नयनानां उत्सवः हर्षकरः अभूत् । हरिपूजानन्तरं निर्माल्यगन्धेन स्वाङ्गं अलंकृत्य कौशेयवस्त्रेण प्रावरणं कृत्वा उपविष्टं मन्दं हसन्तं श्रीमध्वाचार्यं पश्यतां सुरनरादीनां नयनानां उत्सवोऽभूत् इत्यर्थः ॥ ३८ ॥

परमथ परमान्नं प्राप्तमेवाप्रयासं प्रभुरिह बुभुजेऽसौ वेदवादप्रवीणः ।
अजितपरमभक्तः सन्ततं मन्यमानः सकलजगदधीशः प्रीयतां शौरिरित्थम् ॥ ३९ ॥

भावप्रकाशिका – 'प्रायः सोऽयमनायासं पूज्यते परमेश्वरः । प्रीयतामिति तद्भक्त्या सततं वेदशालिभिरि'ति भगवता स्वयमेवाभिहितमनूदितं परमित्यादिना ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – परमिति ॥ अथ श्रीहरिपूजानन्तरम् । प्रभुः वेदानां वादे कथने प्रवीणः चतुरः । अजितस्य श्रीहरेः परमभक्तो मुख्यभक्तः । 'सकलजगदधीशः शौरिः श्रीकृष्ण इत्थं प्रीयतामि'ति सन्ततं मन्यमानः स्मरन् असौ श्रीमध्वः न विद्यते प्रयासो यथा भवति तथाऽप्रयासं प्राप्तं परं उत्तमं परमान्नं पायसं इह विष्णुमङ्गले बुभुजे । 'भुजोऽनवन' इत्यात्मनेपदम् ॥ ३९ ॥

मन्दोपकारिणी – परमिति ॥ अथ प्रभुः स्वामी सकलजगदधीशः सकलानां जगतां अधीशः नियामकः शौरिः श्रीकृष्णः प्रीयतां मम प्रीतो भवतु । इत्थं सन्ततं सर्वदा मन्यमानः स्मरन् वेदवादप्रवीणः वेदस्य वादे प्रवचने प्रवीणः निपुणः । अजितपरमभक्तः अजितस्य नारायणस्य परमः उत्तमः भक्तः असौ श्रीमध्वाचार्यः इह मठे अप्रयासं न विद्यते प्रयासः प्रयत्नो यस्मिन् कर्मणि यथा भवति तथा प्राप्तं परं उत्तमं परमान्नं पायसं बुभुजे भुक्तवान् । 'भुज पालनाभ्यवहारयोः' इति धातोः लिट् आत्मनेपदम् ॥ ३९ ॥

सहचरपरिक्लृप्ते सूक्ष्मवस्त्रावृतेऽसाववितनुरुहरूपौशीरवर्ये निषण्णः ।
अरमयदिह नानाहृद्यविद्याविलासैः कविजनपरिवारं मण्डयन् मण्डपाग्र्यम् ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – सहचरेति ॥ सहचरेण शिष्येण परिक्लृप्ते रचिते सूक्ष्मं यद्वस्त्रं तेन आवृते अवितनुरुहरूपमवीनां मेषाणां तनूरुहरूपं रोमरूपं यत् औशीरवर्यं आसनश्रेष्ठं तस्मिन् । रत्नकम्बलाख्यासनवर्य इत्यर्थः । 'औशीरं तनयासन' इत्यमरः । निषण्णो मण्टपाग्र्यं मण्टपश्रेष्ठं मण्डयन् स्व उपवेशनात् अलंकुर्वन् असौ श्रीमध्वः । इह मण्टपे कविः विद्वान् यो जनः स च असौ परिवारश्च तं नानाविधा या हृद्यविद्या मनोहरविद्याः तासां विलासैः अरमयत् समतोषयत् ॥ ४० ॥

मन्दोपकारिणी – सहचरेति ॥ सहचरपरिक्लृप्ते सहचरेण अनुचरेण शिष्येण परिक्लृप्ते निर्मिते । सूक्ष्मवस्त्रावृते सूक्ष्मेण वस्त्रेण आस्तृते अवितनुरुहरूपौशीरवर्ये अविः मेषः 'मेषाजावय एडकः' इत्यमरः तनुरुहं रोम 'तनूरुहं रोमलोम' इत्यमरः अवेः तनूरुहैः रूपं रूप्यते इति रूपं विरचितं अवितनुरुहरूपं केवलं तदात्मकं इत्यर्थः अवितनुरुहरूपं च तत् औशीरवर्यं च आसनश्रेष्ठं च तस्मिन् निषण्णः उपविष्टः 'औशीरेशयनामने' इत्यभिधानम् । मण्डपाग्र्यं मण्डपो नाम जनाश्रयस्थलं 'मण्डपोऽस्त्री जनाश्रयः' इत्यमरः मण्डपेषु अग्र्यं श्रेष्ठं मण्डयन् उपवेशनात् अलंकुर्वन् असौ श्रीमध्वाचार्यः इह मण्डपे कविजनपरिवारं कविजनः पण्डितजनश्चासौ परिवारश्च कविजनपरिवारः तं परिवारतया उपविष्टविद्वज्जनं इत्यर्थः । यद्वा कविजनानां परितः स्थितं वारं समुदायं 'वारसङ्घातसञ्चयाः' इत्यमरः नानाहृद्यविद्याविलासैः नाना नानाविधाश्च ताः हृद्याः मनोहराश्च ताः विद्याश्च नानाहृद्यविद्याः तासां विलासैः लीलाभिः 'विलासो भावलीलयोः' इति विश्वः । अरमयत् आनन्दयत् । 'रमु क्रीडायां' इति धातोः णिजन्तात् लङ् परस्मैपदम् ॥ ४० ॥

अवसरमधिगम्य भ्रूविजृम्भादभीष्टो मुखसततगलक्ष्मीभूतपाणिप्रवालः ।
स्मितनयनविकासैस्तस्य विज्ञातभावः श्रवसि किमपि कार्यं मन्त्रयामास मङ्क्षु
॥४१॥

पदार्थदीपिकोद्बोधिका – अवसरमिति ॥ अभीष्टः श्रीमध्वाचार्यप्रियो भ्रूविलासात् श्रीमध्वस्य भ्रूविजृम्भात् अवसरं समयं अधिगम्य ज्ञात्वा उपांशु किञ्चित् विवक्षुः अवसरं

प्रतीक्षमाणः सन् । कश्चित् श्रीमध्वस्य भ्रूविलाससंज्ञया ज्ञातावसर इत्यर्थः । स्मितञ्च नयनविकासाश्च तैः विज्ञातो भावोऽभिप्रायो येन स तथोक्तः कश्चित् तस्य श्रीमध्वस्य श्रवसि श्रोत्रे किमपि कार्यं मंक्षु द्राक् मुखस्य सततगः पवनो मुखश्वास इत्यर्थः । तस्य लक्ष्मीभूतः सम्पन्नूतः पाणिप्रवालः पाणिपल्लवो यस्य स तथोक्तः सन्, स्वमुखश्वासो यथा मध्वाङ्गे न पतिष्यति तथा मुखपवनव्यवधानभूतपाणिकिसलयः सन् इत्यर्थः । मन्त्रयामास आलोचयामास ॥ ४१ ॥

मन्दोपकारिणी – अवसरमिति ॥ अभीष्टः श्रीमध्वाचार्यस्य प्रियः कश्चित् शिष्यः भ्रूविजृम्भात् भ्रुवोः विजृम्भात् विलासात् अवसरं अवकाशं अधिगम्य ज्ञात्वा उपांशु किञ्चित् वक्तुं अवसरं प्रतीक्षमाणस्सन् कश्चित् श्रीमध्वाचार्यस्य भ्रूविलासविशेषं दृष्ट्वा अयं अवसर इति ज्ञात्वा इत्यर्थः । स्मितनयनविकासैः स्मितेन मन्दहासेन नयनविकासैश्च विज्ञातभावः विज्ञातो भावो अभिप्रायो येन स तथोक्तस्सन् 'भावोऽभिप्राय आशयः' इत्यभिधानं तस्य मध्वाचार्यस्य श्रवसि श्रोत्रे 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः । किमपि यत्किञ्चित् कार्यं कर्तव्यं मङ्क्षु द्रुतं 'द्राङ्मङ्क्षु सपदि द्रुतं' इत्यमरः । मन्त्रयामास गौप्यकार्यं विचारयामास । मन्त्रयाम् आमूप्रत्ययान्तमव्ययम् । 'अस भुवी'त्यतो लिट् परस्मैपदम् । कथंभूतः मुखसततगलक्षीभूतपाणिप्रवालः मुखस्य सततगः सततं गच्छतीति सततगः सदागतिः वायुः 'मातरिश्वा सदागतिः' इत्यमरः । तस्य लक्षीभूतः व्यवधानीकृतः पाणिप्रवालः पाणिरेव करतलमेव प्रवालः पल्लवः यस्य स तथोक्तः 'प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे' इति विश्वः ॥ ४१ ॥

प्रणतिपरमकृत्याः सन्मतेर्ये जनौघा विबभुरनतिदूरे संहतास्तानतीत्य ।
अहमहमिकयाऽऽशु प्राप्य पार्श्वं प्रणेमुः बहव इह गृहस्थाः पूर्वसेवां विधातुम् ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – प्रणतीति ॥ इह अस्मिन् सदसि बहवो गृहस्थाः पूर्वसेवां विधातुं अहमहमिकया अहमादौ कुर्यां अहमादौ कुर्यां इति बुद्ध्या आशु पार्श्वं प्राप्य प्रणतिरेव श्रीमध्वनमस्कार एव उत्तमकृत्यं उत्तमव्यापारो येषां ते तथोक्ता ये जनौघाः सन्मतेः श्रीपूर्णप्रज्ञाचार्यस्य अनतिदूरे समीपे सङ्गताः सन्तो विबभुः । तानतीत्य तेभ्यो अपि अतिसामीप्यं गत्वा प्रणेमुः इति भावः ॥ ४२ ॥

मन्दोपकारिणी – प्रणतीति ॥ इह अस्यां सभायां बहवो गृहस्थाः पूर्वसेवां सर्वेभ्यः पूर्वं क्रियमाणा सेवा पूर्वसेवा तां विधातुं अहमहमिकया 'अहमहमिका तु सा स्यात् परस्परं यो भवति अहंकारः' इत्यमरः अहमादौ कुर्यां अहमादौ कुर्यां इति अन्योन्यं जनानां योऽहंकारः सोऽहमहमिका इत्युच्यते अहं पूर्वं अहं पूर्वं इति बुद्ध्या इत्यर्थः । आशु शीघ्रं पार्श्वं मध्वाचार्यसमीपं प्राप्य प्रणेमुः नमस्कारं कृतवन्तः । 'णमु प्रह्वत्वे शब्दे च इत्यतो लिट् परस्मैपदम्' । किं कृत्वा प्रणतिपरमकृत्याः प्रणतिः नमस्काराख्यं परमं उत्तमं कृत्यं येषां ते तथोक्ताः ये जनौघाः जनानां समुदायाः सन्मतेः सती निर्दुष्टा मतिः यस्य तस्य श्रीमध्वाचार्यस्य अनतिदूरे समीपे संहताः अविरलाः सङ्कुचितास्सन्तः विबभुः शुशुभिरे । तानतीत्य अतिक्रम्य ये पूर्वं नमस्कारं कर्तुं मध्वसमीपं गताः निरवकाशत्वेन संहता अभूवन् अहं पूर्वमहं पूर्वं इति बुद्ध्या तान् अतीत्य तेभ्योऽपि अतिसमीपं गत्वा बहवो गृहस्थाः श्रीमध्वाचार्यं प्रणेमुः इति भावः ॥ ४२ ॥

विविधजनपदस्थाः प्राक् श्रुतेभ्यो गुणेभ्यः शतगुणगुणमेनं विस्मिता वीक्षमाणाः ।
मुकुलितकरपद्मा आस्यतामित्यवाप्ताः प्रचुरतरहृदा सम्भावयाञ्चक्रिरेऽन्ये ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – विविधेति ॥ अवाप्ता दिदृक्षयाऽऽगता विविधा नानाविधा ये जनपदा देशाः तेषु तिष्ठन्ति इति तथोक्ताः । 'नीवृज्जनपदो देश' इत्यमरः । अन्ये जनाः प्राक् दर्शनात्पूर्वं श्रुतेभ्यो गुणेभ्यः शतं गुणा गणना येषां ते शतगुणाः शतावृत्तयो गुणा यस्य स तथा तं शतगुणाधिकगुणमित्यर्थः । एनं श्रीमध्वं वीक्षमाणास्सन्तः । अत एव विस्मिताः सन्तः मुकुलितानि करपद्मानि येषां ते तथा सन्तः प्रचुरतरहृदा श्रीपूर्णप्रज्ञाचार्येण आस्यताम् इति सम्भावयांचक्रिरे ॥ ४३ ॥

मन्दोपकारिणी – विविधेति ॥ अवाप्ताः श्रीमध्वाचार्यमाहात्म्यं श्रुत्वा तं द्रष्टुं आगताः । विविधजनपदस्थाः विविधाः नानाविधाः जनपदाः देशाः तेषु तिष्ठन्तीति विविधजनपदस्थाः । अन्ये जनाः 'नीवृज्जनपदो देशविषयौ' इत्यमरः । प्राक् दर्शनात्पूर्वं स्वस्थानस्थितिकाले श्रुतेभ्यः गुणेभ्यः श्रीमध्वाचार्यगुणेभ्यः शतगुणगुणं शतेन गुणिताः गुणाः यस्य स तथोक्तः तम् । पूर्वं यावन्तो गुणाः श्रुताः अभूवन् तदपेक्षया शतगुणाधिकगुणवन्तं इत्यर्थः । एनं श्रीमध्वाचार्यं वीक्षमाणाः पश्यन्तः अत एव विस्मिताः

आश्चर्ययुक्ताः । मुकुलितकरपद्माः मुकुलितानि अञ्जलीकृतानि करपद्मानि हस्ताख्यपद्मानि यैः ते तथोक्तास्सन्तः प्रचुरतरहृदा प्रचुरतरं अत्यन्तपूर्णं हृत् हृदयं यस्य स तथोक्तः तेन पूर्णप्रज्ञाचार्येण हे जनाः युष्माभिः आस्यताम् उपविश्यतां इति सम्भावयांचक्रिरे आदृता अभूवन् । 'आस उपवेशने' इत्यतो लोट् आत्मनेपदम् । आस्यतां इति एकवचनमेव ॥ ४३ ॥

अलमलमनुवादेनानुवाच्येत पश्चान्ननु गुरव इदानीमुद्यता हि प्रवक्तुम् ।
न मननमधुना द्रागाव्रजेत्याह्वयत्तान् श्रुतपरिचयसक्ताञ्छ्रावकाञ्छ्रावकाग्र्यः ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – अलमिति ॥ अनुवादेन प्रमेयानुवादेन अलं अलं सम्भ्रमे द्विरुक्तिः । पश्चात् श्रवणानन्तरं अनुवाच्येत । अनुवचनमपि पश्चात् क्रियताम् । मननं चिन्तनं अपि अधुना इदानीं न । कुत इत्यत आह– गुरवः इति । गुरवः इदानीं प्रवक्तुं व्याख्यातुं उद्यता हि यस्मात् तस्मात् द्राक् आव्रज । इत्येवं वदन् श्रावकाग्रयः कश्चित् श्रोतृषु प्रधानः श्रुतस्य श्रुतग्रन्थस्य परिचये अभ्यासे सक्तान् निरतान् श्रावकान् श्रोतॄन् आह्वयत् । आव्रजेत् इति एकैकापेक्षया एकवचनम् ॥ ४४ ॥

मन्दोपकारिणी – अलमिति ॥ हे सहस्रश्रोतः । त्वया क्रियमाणेन अनुवादेन श्रुतग्रन्थानुवादेन अलं अलम् । अलं शब्दो निषेधे । अनुवादो मास्तु इत्यर्थः । संभ्रमात् द्विरुक्तिः 'अलं भूषणपर्याप्तिशक्तिवारणवाचकं' इत्यमरः । पश्चात् समयान्तरे अनुवाच्येत ग्रन्थानुवादः क्रियतां 'अनुपूर्वं वच परिभाषणे' इत्यतो कर्मणि विधिलिङ् आत्मनेपदम् । वाच्येत वाच्येयातां वाच्येरन् । मननं चिन्तनमपि अधुना न कर्तव्यम् । कुतः गुरवः इदानीं प्रवक्तुं व्याख्यातुं उद्यताः ननु हि यस्मात् तस्मात् त्वं द्राक् शीघ्रं आव्रज आगच्छ इति पृथक् पृथक् श्रावकाग्र्यः श्रोतृषु प्रधानः कश्चित् शिष्यः श्रुतपरिचयसक्तान् श्रुतस्य ग्रन्थस्य परिचये पादार्धचर्चादिरूपेण आवर्तनरूपाभ्यासे सक्तान् निरतान् तान् श्रावकान् श्रोतॄन् आह्वयत् आहूतवान् 'ह्वेञ् स्पर्धायां शब्दे च' इति धातोः लङ् परस्मैपदम् ॥ ४४ ॥

अधिकधिषणमेनं व्याख्यया शोभमानं हरिमिव कविवर्यं सत्यवत्यास्तनूजम् ।
सततमनिमिषं सन्दृश्य सानन्दचित्ताः समयमपि गतं संविन्दते न स्म लोकाः
॥ ४५ ॥

भावप्रकाशिका – संविद्रते 'वेत्तेर्विभाषेति' रुट् ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – अधिकेति ॥ लोका जना व्याख्यया शोभमानं कविवर्यं ज्ञानिश्रेष्ठं सत्यवत्याः तनूजं सत्यवतीपुत्रं हरिमिव व्यासमिव एनं अधिकधिषणं श्रीपूर्णप्रज्ञाचार्यं सततं, न विद्यते निमेषो निमेषणं यथा भवति तथाऽनिमिषं सन्दृश्य दृष्ट्वा सानन्दं आनन्दसहितं चित्तं येषां ते तथा सन्तो गतं अतीतं समयं कालं अपि न संविद्रते स्म न व्यजानन् । स्म अतीते । संविद्रत इति 'समोगमृच्छीत्यात्मनेपदं' 'वेत्तेर्विभाषे'ति दस्य रुडागमः ॥ ४५ ॥

मन्दोपकारिणी – अधिकेति ॥ लोकाः जनाः व्याख्यया शोभमानं कविवर्यं ज्ञानिश्रेष्ठं सत्यवत्याः सत्यवतीदेव्याः तनूजं सुतं हरिं वेदव्यासमिव एनं अधिकधिषणं अधिका पूर्णा धिषणा बुद्धिः यस्य स तथोक्तः तं 'बुद्धिर्मनीषा धिषणा' इत्यमरः पूर्णप्रज्ञाचार्यं सततं अविच्छेदेन अनिमिषं निमेषरहितं यथा भवति तथा अतिप्रीत्यासक्तिपूर्वकं इति भावः । सन्दृश्य दृष्ट्वा सानन्दचित्ताः सानन्दं चित्तं येषां ते तथोक्तास्सन्तः गतं अतिक्रान्तं समयमपि न संविन्दते स्म न ज्ञातवन्तः । 'विद ज्ञाने' इत्यस्मात् लट् आत्मनेपदम् । 'समोगमृच्छिप्रच्छी' इति आत्मनेपदं संवित्ते संविदाते संविन्दते, सविद्रते वा' ॥ ४५ ॥

उदयमित इवास्तं यंश्च भानुर्बभासे स्फुटमकलुषरूपो दर्शनीयोऽनुरागी ।
शुचिहरिपदमापत्सम्पदोराश्रितानां न हि भवति विशेषः स्वप्रकाशोन्नतानाम् ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – उदयमिति ॥ अकलुषं प्रसन्नं रूपं यस्य स तथा । अत एव दर्शनीयः सुखेन द्रष्टुं शक्यः । अनुरागः अस्यास्ति इति अनुरागी सन्ध्याकालानुयुक्ता-मलरागयुक्तो भानुः सूर्यः । अस्तं अस्तगिरिं यन् गच्छंश्च, उदयं उदयपर्वतं इत इव प्राप्त इव स्फुटं सम्यक् बभासे शुशुभे । यथा कश्चित् प्रसन्नरूपो दर्शनीयः सुन्दरोऽनुरागी स्वप्रियेषु स्नेहयुक्तः पुरुषोऽस्तं विपदं गच्छन् सन्नुदयं सम्पदं इत इव शोभते । न तु तत्र सङ्कोचविकासौ दर्शयति तथेत्यभिप्रायः । तत् तथा हि । शुचि निर्मलं हरिपदं विष्णुपदं आकाशं इत्यर्थः । आश्रितानां स्वप्रकाशोन्नतानां स्वरूपप्रकाशेन उत्कृष्टानां आपत्सम्पदोः आपत्काले सम्पत्काले च विशेषः सङ्कोचविकासलक्षणो विकारो न भवति हि । श्रीहरिचरणाश्रितनां यथाऽऽपत्सम्पदोः विशेषाभावः तद्वद्विष्णुपदं आकाशं आश्रितस्य भानोरपि इति भावः । अत्रार्थान्तरन्यासालङ्कारः ॥ ४६ ॥

मन्दोपकारिणी – उदयमिति ॥ भानुः सूर्यः अस्तं अदर्शनं यंश्च गच्छन्नपि उदयं इतः प्राप्त इव स्फुटं स्पष्टं बभासे शुशुभे 'भासृ दीप्तौ' इत्यतो लिट् आत्मनेपदम् । कथंभूतः अकलुषरूपः न विद्यते कलुषं अस्वच्छं रूपं स्वरूपं यस्य स तथोक्तः 'कलुषोऽनच्छ आविलः' इत्यमरः स्वच्छरूप इत्यर्थः । अत एव दर्शनीयः सायंकाले सुखेन द्रष्टुं शक्यः अनुरागी अनुरागः सन्ध्याकालीनरक्तिमा अस्यास्तीति अनुरागी लोहितकान्तिः इत्यर्थः । सूर्यः उदयकाले यथा निर्मलाकारः सुखेन द्रष्टुं शक्यश्च लोहितकान्तिश्च तथैव अस्तमान-कालेऽपि तादृशगुणवान् अभूत् इत्यर्थः । यथा प्रसन्नरूपः दर्शनीयः अनुरागी स्वकीयेषु स्नेहवान् कश्चित् पुरुषः अस्तं अदर्शनं विपदं इत्यर्थः । यंश्च प्राप्नुवन्नपि उदयं संपदं इत इव प्राप्त इव शोभते न तु तत्र सङ्कोचविकासौ दर्शयति तद्वत् सूर्यः उदयास्तमययोः एकप्रकार एव सन् शुशुभे इति भावः । तथा हि शुचि निर्मलं हरिपदं हरेः विष्णोः पदं चरणं आश्रितानां स्वप्रकाशोन्नतानां स्वप्रकाशेन स्वरूपप्रकाशेन उन्नतानां उत्कृष्टानां सतां पुरुषाणां, आपत्संपदोः आपच्च संपच्च आपत्संपदौ तयोः आपत्काले सम्पत्काले च विशेषः सङ्कोचविकासलक्षणविकारः न हि भवति । यथा श्रीहरिचरणमाश्रितानां सतां आपत्संपदोः विशेषाभावः तथा विष्णुपदं आकाशं आश्रितस्य प्रकाशोन्नतस्य भानोरपि उदयास्तमययोः विशेषाभाव इति भावः ॥ ४६ ॥

मरकतमणिवर्णे भूतधात्रीपुरन्ध्र्या लसति जलधिवासस्यर्धलीनः क्षणार्धम् ।
अरुणतरणिबिम्बच्छद्मना पद्मरागः कपिशकरकलापोल्लास्यभूत्प्रेक्षणीयः ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – मरकतेति ॥ भूतधात्रीपुरन्ध्र्या भूतधात्री भूमिरेव पुरन्ध्री स्त्री तस्या । 'रमा वामा वामनेत्रा पुरन्ध्रीति हलः । मरकतश्चासौ मणिश्च तद्वद्वर्णो यस्य तथा तस्मिन् । लसति शोभमाने । जलधिः समुद्र एव वासो वस्त्रं तस्मिन् । क्षणार्धं किञ्चित्कालमित्यर्थः । अर्धलीनं अर्धनिमग्नं अरुणं लोहितं यत् तरणिबिम्बं सूर्यमण्डलं तदेव छद्म व्याजं तेन कपिशा रक्ता ये करा रश्मयः तेषां कलापाः समूहाः तैः उल्लसितुं शीलमस्येति तथोक्तः पद्मरागः प्रेक्षणीयो दर्शनीयोऽभूत् । कस्याश्चित् योषितः नितम्बलग्ननीलवस्त्रे अर्धनिमग्नः पद्मरागो यथा दर्शनीयो भवति । एवं पृथिव्याख्ययोषितः समुद्राख्यनीलवसने अर्धनिमग्नो लोहितसूर्यमण्डलाख्यपद्मरागः प्रेक्षणीयो अभूदिति भावः । अत्र रूपकालङ्कारः ॥ ४७ ॥

मन्दोपकारिणी – मरकतेति ॥ भूतधात्रीपुरन्ध्रचाः भूतधात्री पृथिव्येव पुरन्ध्री योषित् तस्याः 'भूतधात्री रत्नगर्भा विपुला सागराम्बरा' इत्यमरः । मरकतमणिवर्णे मरकतमणेः इन्द्रनीलमणेः वर्ण इव वर्णः नीलकान्तिः यस्य तथोक्तः तस्मिन् 'गारुत्मकं मरकतमश्मगर्भो हरिन्मणिः' इत्यमरः । लसति शोभमाने जलधिवाससि जलधिः समुद्र एव वासो वस्त्रं तस्मिन् क्षणार्धं क्षणस्य अर्धं अर्धक्षणपर्यन्तं अर्धलीनः अर्धं यथा स्यात् तथा लीनः निमग्नः । अरुणतरणिबिम्बच्छद्मना अरुणः लोहितः तरणिः सूर्यः तस्य बिम्बं मण्डलं तस्य छद्मना व्याजेन कपिशकरकलापोल्लासी कपिशाः लोहिताश्च ते कराः रश्मयश्च कपिशकराः तेषां कलापैः समूहैः उल्लासी भ्राजिष्णुः पद्मरागः तन्नामकमणिः प्रेक्षणीयः दर्शनीयः अभूत् 'कलापो भूषणे बर्हे तूणीरे संहतेऽपि च' इत्यमरः । कस्याश्चित् योषितः नितम्बसंवीतनीलवस्त्रे अर्धं गूढः अर्धं दृश्यमानः पद्मरागः यथा दर्शनीयो भवति एवं पृथिव्याख्ययोषितः समुद्रस्य नीलवर्णत्वात् समुद्राख्यनीलवसने निमग्नः अर्धं दृश्यः लोहितसूर्यमण्डलः प्रेक्षणीयोऽभूत् इति भावः । अनेन सूर्यास्तमयो जात इत्युक्तं भवति ॥ ४७ ॥

अवनिवनवनध्रुग्वायुखाहम्महत्सु प्रकृतिगुणसमेताव्याकृताकाश एकम् ।
ततमतनुमनाः सोऽचिन्तयत्सत्समाधावसुरसुरनरेभ्यः सद्गुणं नाथमन्यम् ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – अवनीति ॥ सः । अतन्वसूक्ष्मं मनो यस्य स तथा पूर्णप्रज्ञ इत्यर्थः । सत्समाधिः शोभनसमाधिः तस्मिन् । समाधिसमय इत्यर्थः । अवनिः भूमिः सा च वनं जलं तत् च । 'जीवनं भुवनं वनं इत्यमरः । वनध्रुक् वह्निः स च वायुश्च खं आकाशं तच्च अहं अहङ्कारतत्त्वं तच्च महत् महत्तत्त्वञ्च तेषु । प्रकृतिगुणाः सत्वरजस्तमांसि तैः समेतं तच्च तदव्याकृताकाशश्च तस्मिन् ततं व्याप्तं एकं प्रधानम् । स्थानभेदात् भेदरहितं वा । असुराश्च सुराश्च नराश्च तेभ्यो जीवराशिभ्य इत्यर्थः । अन्यं भिन्नं सन्तो गुणा यस्य स तथा तं निर्दोषज्ञानानन्दाद्यनन्तगुणमित्यर्थः । नाथं सर्वस्वामिनं भगवन्तं अचिन्तयत् दध्यौ ॥ ४८ ॥

मन्दोपकारिणी – अवनीति ॥ अतनुमनाः अतनु अनल्पं मनो यस्य सः अतनुमनाः । सः पूर्णप्रज्ञाचार्यः । सत्समाधौ संश्चासौ समाधिश्च शोभनसमाधिः तस्मिन् समाधिसमये इत्यर्थः । अवनिवनवनध्रुग्वायुखाहम्महत्सु अवनिः भूमिः वनं जलं 'वनं

काननीरयोः' इति विश्वः, वनध्रुक् वनाय अरण्याय द्रुह्यति कुप्यते इति वनध्रुक् वनदाहकोऽग्निरित्यर्थः वायुः भूतवायुः खं आकाशं 'खं आकाशं प्रकीर्तितम्' इति एकाक्षररत्नमाला अहं अहङ्काराख्यं तत्त्वं महत् महत्तत्वम् । अवनिश्च वनं च वनध्रुक् च वायुश्च खं च अहं च महच्च अवनिवनवनध्रुग्वायुखाहम्महन्ति तेषु । तथा प्रकृतिगुणसमेता-व्याकृताकाशे प्रकृतेः जडप्रकृतेः 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे' इति वैजयन्ती गुणाः सत्वरजस्तमाख्याः त्रयो गुणाः तैः समेतश्चासौ अव्याकृताकाशश्च तस्मिन् ततं व्याप्तं एकं स्थानभेदात् भेदरहितं प्रधानं वा । असुरसुरनरेभ्यः असुराश्च सुराश्च नराश्च तेभ्यः उपलक्षणमेतत् चेतनाचेतनेभ्यः अन्यं अत्यन्तभिन्नं सद्गुणं सन्तो निर्दोषा गुणाः ज्ञानानन्दादयः यस्य सः सद्गुणः तं नाथं सर्वस्वामिनं एवंभूतं भगवन्तं अचिन्तयत् ध्यातवान् । 'चिति स्मृत्यां' इति धातोः लङ् परस्मैपदम्' । सायंकालीनमन्त्रजपादि चकार इति भावः ॥ ४८ ॥

व्यदधत परिदृष्टज्योतिषः साधु सान्ध्यं नियममवनिदेवा ज्योतिषोऽप्यावलोकात् ।
विहितमनुसरन्तो धर्मशास्त्रप्रवीणाः सवितरि सवितारं चिन्तयन्तस्त्रिलोक्याः

॥ ४९ ॥

भावप्रकाशिका – आज्योतिषो दर्शनात् 'पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमर्क-दर्शनात् । उत्तरां तु समासीत सम्यगृक्षविभावना' दिति विहितम् ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – व्यदधतेति ॥ विहितं स्मृत्यादिविहितं सदाचारः सतां आचारः तं अनुसरन्तः अनुवर्तमानाः । 'पूर्वां सन्ध्यां जपंस्तिष्ठेत्सावित्रीमर्कदर्शनात् । उत्तरान्तु समासीनः सम्यगृक्षविभावनादि'ति स्मृतेः । धर्मशास्त्राणि धर्मप्रतिपादकशास्त्राणि तेषु प्रवीणाः चतुराः स्मृतिविचारचतुराः इत्यर्थः । सवितरि सूर्ये त्रिलोक्याः सवितारं स्रष्टारं हरिं चिन्तयन्तो ध्यायन्तः । परिदृष्टानि ज्योर्तीषि सूर्यकिरणा यैः ते तथोक्ता अवनिदेवा भूमिदेवा ब्राह्मणा ज्योतिषः जातावेकवचनं ज्योतिषां इति यावत् । अवलोको दर्शनं तस्मात् आ पर्यन्तं नक्षत्रदर्शनपर्यन्तमित्यर्थः । सन्ध्यायां कर्तव्यः सान्ध्यस्तं नियमं कर्म साधु सम्यग् यथा भवति तथा व्यदधत चक्रुः सूर्यास्तमयात्पूर्वमारभ्य नक्षत्रदर्शनपर्यन्तं सान्ध्यं कर्म अकुर्वन् इत्यर्थः ॥ ४९ ॥

मन्दोपकारिणी – व्यदधतेति ॥ परिदृष्टज्योतिषः परिदृष्टानि ज्योतींषि सूर्यकिरणाः यैः ते परिदृष्टज्योतिषः । अवनिदेवाः भूदेवाः ब्राह्मणाः ज्योतिषः नक्षत्रसमुदायस्य आवलोकात् अवलोकः दर्शनं आवलोकात् दर्शनपर्यन्तं सान्ध्यं सन्ध्याकाले कर्तव्यमपि नियमं नित्यकर्म 'नियमस्तु स यत्कर्म नित्यमागन्तुसाधनं' इत्यमरः । साधु सम्यक् व्यदधत चक्रुः । 'वि पूर्वात् डु धाञ् धारणपोषणयोः' इति धातोः लङ् आत्मनेपदं व्यधत्त व्यदधाताम् व्यदधत । सूर्यास्तमानात्पूर्वमारभ्य नक्षत्रदर्शनपर्यन्तं सान्ध्यं कर्म अकुर्वन् इति भावः । कथंभूताः विहितं 'पूर्वां सन्ध्यां जपंस्तिष्ठेत्सावित्रीमर्कदर्शनात् । उत्तरान्तु समासीनः सम्यगृक्षविभावनात्' इति स्मृत्यादिविहितं सदाचारं अनुसरन्तः अनुवर्तमानाः । पुनः कथंभूताः धर्मशास्त्रप्रवीणाः धर्मशास्त्रे धर्मशास्त्रविचारे चतुराः । किं कुर्वन्तः सन्तः सवितरि सूर्ये त्रिलोक्याः त्रयाणां लोकानां समाहारः त्रिलोकी तस्याः सवितारं स्रष्टारं हरिं चिन्तयन्तः ध्येयस्सदा सवितृमण्डलमध्यवर्तीत्यादिगुणवत्तया ध्यायन्तः सन्तः ॥ ४९ ॥

विविदुरतितरां ये देवताः षोडशोक्ता हरहरिहयपूर्वान्त्याः कलाभेदतोऽस्य ।
सुहुतमतिसृजन्तोऽग्न्याहितास्तेऽग्निहोत्रं व्यधुरुचितमपूर्वं येन गायत्रलोकः ॥ ५० ॥

भावप्रकाशिका – रौद्रं गवि सद्वायव्यमुपावसृष्टमाश्विनं दुह्यमानं सौम्यं दुग्धं वारुणमधिश्रितं पौष्णं समुदयन्तं मारुतं विष्यन्दमानं वैश्वदेवं बिन्दुमन्मैत्रं शरो गृहीतं द्यावापृथिवीयमुद्भासितं सावित्रं प्रक्रान्तं वैष्णवं ह्रीयमाणं बार्हस्पत्यमुपावसन(मुपसम्पन्न) मग्नेः पूर्वाहुतिः प्रजापतेरुत्तरैन्द्रं हुतम्' इति श्रुत्युक्ताः षोडशदेवताः । अतिसृजन्तोऽग्नये इदमित्यादिरूपेण । 'वाहिताग्न्यादिष्वि'ति परनिपातः ॥ 'गायत्रीलोकमाप्नोती'ति श्रुतौ गायत्रीशब्दोदितस्य विष्णोर्लोको ज्ञानद्वारा भवतीति ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – विविदुरिति ॥ ये अग्न्याहिता आहिता अग्नयो यैः ते अग्न्याहिताः । 'वाहिताग्न्यादिषु' इति सूत्राद्विशेषणस्य परनिपातः । आहिताग्नय इत्यर्थः । अस्य अग्निहोत्राख्यकर्मणः, कलानां भेदो विभागः तेन इति ततः । अवान्तर-विभागाभिमानित्वेनेत्यर्थः । उक्ता 'रौद्रं गवीत्या'दि श्रुत्युक्ता । हरो रुद्रः स च हरिहयः पुरन्दरः स च तौ पूर्वान्त्यौ यासां ताः तथोक्ता रुद्रपूर्वा हरिहयान्त्या इत्यर्थः । षडधिका दश षोडश देवता अतितरां सम्यक् विदुः ज्ञातवन्तः । त अग्न्याहिता सुहुतं अतिसृजन्तः

अतिसर्जनं नाम 'अग्नये इदं न मम' इत्युक्तिः तत् कुर्वन्तस्सन्तः । येनाग्निहोत्रेण गायत्रलोको गानत्राणकर्तृत्वेन, गायति च त्रायति चेति व्युत्पत्या गायत्रो गायत्रशब्दवाच्य श्रीहरिः तस्य लोको भवति । अग्निहोत्रस्य भगवदर्पणबुद्ध्या कृतस्य ज्ञानद्वारा मोक्षहेतुत्वादिति भावः । उचितं स्वेषां उचितं अपूर्वं सर्वेषां असाधारणं तमग्निहोत्रं व्यधुः चक्रुः । षौडशदेवताश्च— 'रौद्रं गवि सद्वायव्यमुपावसृष्टमाश्विनं दुह्यमानं सौम्यं दुग्धं वारुणमधिश्रितं पौष्णं समुदयन्तं मारुतं विष्यन्दमानं वैश्वदेवं बिन्दुमन्मैत्रं शरोगृहीतं द्यावापृथिवीयमुद्वासितं सावित्रं प्रक्रान्तं वैष्णवं ह्रीयमाणं बार्हस्पत्यमुपसन्नमग्नेः पूर्वाहुतिः प्रजापतेः उत्तरैन्द्राहुतमि'ति श्रुत्युक्ताः । अस्याश्च अयमर्थः– गवि सत्, अग्निहोत्रे होष्यं क्षीरं दोहात्पूर्वं गवि वर्तमानं, रौद्रं रुद्रो देवता अस्येति रौद्रं, तदेव पुनरुपावसृष्टं स्तनस्थं सत् वायव्यं वायुदैवत्यं, दुह्यमानं सत् आश्विनं आश्विदैवत्यं, दुग्धं निवृत्तदोहं सत् सौम्यं सोमदेवत्यं, अधिश्रितं, उष्णिकरणाधिश्रेण्यां निगदितं वारुणं वरुणदेवताकं, समुदयन्तं पाकानन्तरं सम्यग्गच्छन्तं पौष्णं पूषदैवत्यं, विष्यन्दमानं अतिकथनेन पात्रादवगलन्मारुतं मरुद्दैवत्यं, बिन्दुमत् विष्यन्दसमये यदा बिन्दुयुक्तं भवति तदा वैश्वदेवं विश्वेदेवा अस्य देवता इत्यर्थः । प्रक्रान्तं होतुं प्रक्रान्तं सावित्रं सवितृदेवताकं, ह्रियमाणं होतुमग्निसमीपं नीयमानं वैष्णवं विष्णुदैवत्यं, उपावसनं अग्नेः समीपं प्राप्तं बार्हस्पत्यं बृहस्पतिदैवत्यं, पूर्वाहुतिः अग्नेः प्रथमाहुतिः अग्निदैवत्या, प्रजापतेरुत्तरा उत्तराहुतिः प्रजापतिदैवत्या, हुतं ऐन्द्रं, हवनक्रियेन्द्रदैवत्येत्यर्थः ॥ ५० ॥

मन्दोपकारिणी – विविदुरिति ॥ अग्न्याहिताः आहितः अग्निः यैः ते अग्न्याहिताः 'वाहिताग्न्यादिषु' इति सूत्रात् पूर्वनिपातः । अस्य अग्निहोत्राख्यकर्मणः कलाभेदतः कलानां अवान्तरविभागानां भेदतः, उक्ताः अभिमानित्वेन श्रुतौ उदिताः । हरहरिहयपूर्वान्त्याः हरः रुद्रश्च हरिहयः इन्द्रश्च हरहरिहयौ पूर्वः आदिमश्च अन्त्यः अन्तिमश्च पूर्वान्त्यौ हरहरिहयौ पूर्वान्त्यौ यासां ताः तथोक्ताः षोडशदेवतानां मध्ये रुद्रः पूर्वः इन्द्रः अन्त्यः इत्यर्थः 'हरः स्मरहरो भर्गः' इत्यमरः 'जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः' इत्यमरः । षोडश देवताः अतितरां सम्यक् विविदुः ज्ञातवन्तः 'विद ज्ञाने' इत्यस्मात् लिट् परस्मैपदम् विवेद विविदतुः विविदुः । ते ब्राह्मणाः उचितं स्वेषां योग्यं अपूर्वं सर्वेषां असाधारणं अग्निहोत्रं

कर्म व्यधुः चक्रुः । 'डु धाञ् धारणपोषणयोः' लुङ् परस्मैपदं अधात् अधाताम् अधुः । किं कुर्वन्तः सुहुतं अग्नौ प्रक्षिप्तं हविः अतिसृजन्तः त्यजन्तः अग्नौ हविः स्वाहेति हुत्वा 'अग्नये इदं न मम' इत्युक्तिं कुर्वन्तः इत्यर्थः । अग्निहोत्रस्य फलमाह ॥ येनेति ॥ येन अग्निहोत्रेण गायत्रलोकः गायत्रस्य गायत्रनामकस्य हरेः लोकः भवतीति शेषः तादृशं अग्निहोत्रं व्यधुः इति सम्बन्धः । गायते त्रायते च इति व्युत्पत्या गानत्राणकर्तृत्वेन भगवतः गायत्र-शब्दवाच्यत्वं ज्ञेयं अग्निहोत्रस्य भगवदर्पणबुद्ध्या कृतस्य ज्ञानद्वारा मोक्षहेतुत्वात् इति भावः । षोडशदेवताप्रतिपादकश्रुतिः उदाह्रियते 'रौद्रं गवि सद्धायव्यमुपावसृष्टमाश्विनं दुह्यमानं सौम्यं दुग्धं वारुणमधिश्रितं पौष्णं समुदयन्तं मारुतं विष्यन्दमानं वैश्वदेवं बिन्दुमन्मैत्रं शरो गृहीतं द्यावापृथिवी यमुद्वासितं सावित्रं प्रक्रान्तं वैष्णवं ह्रियमाणं बार्हस्पत्यमुपसन्नमग्नेः पूर्वाहुतिः प्रजापतेरुत्तरैन्द्राहुतम् इति' ॥ ५० ॥

विधुरयमकलङ्कः स्याद्यदि स्यादवश्यं ननु निजसहजायाः सुन्दरास्येन्दुकल्पः ।
इति सुरललनाभिर्लालितः खेचरीभिः समधिकमधुरिम्णा पूर्णचन्द्रस्तदोदैत् ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – विधुरिति ॥ खेचरीभिः आकाशचरीभिः सुरललनाभिः देवस्त्रीभिः अयं विधुः चन्द्रः यदि, न विद्यते कलङ्कश्चिह्नं यस्य सः अकलङ्कः स्यात् भवेत् तर्हि समधिको अत्युद्रिक्तो यो मधुरिमा माधुर्यं तेन निजा आत्मीया च सा सहजा स्वसा च निजसहजा तस्याः श्रीमहालक्ष्म्याः सुन्दरास्यमेव इन्दुः तस्य सदृशः सुन्दरास्येन्दु-कल्पोऽवश्यं स्यात् ननु सर्वथा भवेद्धि इति लालितः श्लाघितः पूर्णचन्द्रः उदैत् उदयमगात् । अयं भावः । चन्द्रो निजसहजाया रमायाः सुन्दरवदनमाधुर्यसमानमाधुर्यवान् भवति । तथापि न रमावदनसमानः । सममधुरमाधुर्यवत्वेऽपि सकलङ्कत्वात् । तस्मात्, यदि अयमकलङ्कः स्यात् तर्हि निष्कलङ्करमावदनसमानो भवेत् । न च अयं निष्कलङ्कः । एवं च सति सकलङ्कत्वात् न रमावदनसमानः । एतादृशमाधुर्यस्यान्यत्राभावात् नास्य समानः तस्मात् असमान एवेति ॥ ५१ ॥

मन्दोपकारिणी – विधुरिति ॥ तदा पूर्णचन्द्रः उदैत् उदयं अगात् 'उत्पूर्वात् इण् गतौ' इति धातोः लङ् परस्मैपदं ऐत् ऐताम् आयन् । कथंभूतः खेचरीभिः खे आकाशे चरन्तीति खेचर्यः ताभिः । सुरललनाभिः सुराणां देवानां ललनाभिः स्त्रीभिः' प्रमदा

मानिनी कान्ता ललना च नितम्बिनी' इत्यमरः । लालितः आदृतः, कथं, अयं विधुः चन्द्रः यदि अकलङ्कः नैल्याख्यदोषरहितः स्यात् 'कलङ्कोऽङ्कापवादयोः' इत्यमरः । तर्हि निजसहजायाः निजा स्वकीया च सा सहजा च निजसहजा तस्याः निजस्वसुः रमायाः सुन्दरास्येन्दुकल्पः सुन्दरं च तत् आस्यं मुखं च सुन्दरास्यं सुन्दरास्यमेव इन्दुः चन्द्रः तस्य कल्पः सदृशः अवश्यं नियमेन स्यान्ननु भवेत् खलु तथापि समधिकमधुरिम्णा समधिकश्चासौ मधुरिमा च समधिकमधुरिमा तेन अत्युत्तमसौन्दर्येण इत्यर्थः युक्त एव इति लालितः आदृतः इत्यर्थः सकलङ्कत्वात् अकलङ्करमावदनसाम्याभावेऽपि एतादृशमाधुर्यस्य अन्यत्राभावात् नान्यसमानः किंतु अन्यापेक्षया अधिकसुन्दर एवेति लालितः इति भावः ॥ ५१ ॥

इनविरहमसह्यं प्राप्य पद्मैः सचक्रैश्चिरमिह परितप्तं पूर्वतप्तैः सुतुष्टम् ।
मृदुकुमुदचकोरैः पादसङ्गेन राज्ञः कमपि सकलहृद्यं कल्पयेन्नैव दैवम् ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – इनेति ॥ इह रात्रौ चक्रैः चक्रवाकैः सहितानि सचक्राणि (चक्रवाकानि) तैः पद्मैः । असह्यं इनविरहं सूर्यवियोगं प्राप्य चिरं रात्रिपर्यवसानपर्यन्तं परितप्तम् । राज्ञः चन्द्रस्य पादसङ्गेन किरणसम्बन्धेन पूर्वतप्तैः दिवासूर्यकिरणतप्तैः मृदुकुमुदानि मनोहरकुमुदानि तानि चकोराः चकोरपक्षिणः ते च तैः सुतुष्टं सुष्ठु सन्तोषं प्राप्तम् । तथा हि– दैवं विधिः कमपि पदार्थं सकलहृद्यं सकलमनोहरं नैव कल्पयेत् । निर्दोषोऽपि कश्चित् कस्यचित् अप्रियो भवतीति भावः ॥ ५२ ॥

मन्दोपकारिणी – इनेति ॥ इह रात्रौ सचक्रैः चक्रवाकपक्षिभिः सहितानि सचक्राणि तैः 'कोकश्चक्रश्चक्रवाकः' इत्यमरः । पद्मैः कमलैः असह्यं सोढुमशक्यं इनविरहं सूर्यस्य वियोगं प्राप्य 'इनः सूर्ये नृपे पत्यौ' इति विश्वः । राज्ञः चन्द्रस्य 'राजा प्रभौ नृपे चन्द्रे' इति विश्वः पादसङ्गेन पादानां रश्मीनां सङ्गेन सम्बन्धेन 'पाद रश्म्यंघ्रितुर्यांशाः' इत्यमरः चिरं बहुकालं रात्र्यवसानपर्यन्तं इत्यर्थः । परितप्तं दुःखितं पूर्वतप्तैरपि पूर्वं दिवा सूर्यकिरणैः तप्तैः दुःखितैः मृदुकुमुदचकोरैः मृदुभिः कोमलैः कुमुदैः नीलोत्पलैः चकोरैः चकोराख्यपक्षिभिश्च सुतुष्टं सुष्ठु सन्तोषः प्राप्तः । तथा हि दैवं विधिः कमपि पदार्थं सकलहृद्यं सकलानां चेतनानां हृद्यं मनोहरं नैव कल्पयेत् न कुर्यात् । निर्दोषो न कश्चिदपि भवतीति एतत् चित्रं न हि इति भावः ॥ ५२ ॥

दलितेन्द्रनीलमणिनीलविभ्रमं नवकुन्दकुड्मलसितद्विजावलि ।
स्मितया नगोत्तमशिरस्सुजातया वनमालया सुरभिताशयाऽन्वितम् ॥ ५३ ॥

भावप्रकाशिका – द्विजाः स्त्रीदन्ता नक्षत्राणि च । नगा गिरयो वृक्षाश्च ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – दलितेति ॥ विशेषकमेतत् । 'त्रिभिः श्लोकैर्विशेषकमि'त्युक्तेः । भगवान् स श्रीमध्वो गोभिः वचनैः तमांस्यज्ञानानि अपनयन् नाशयन् सन् प्रजानां गतिदं मोक्षदम् । आकाशपक्षे तु गमनक्रियाप्रदमित्यर्थः । मार्गदमिति वा । अन्योऽर्थोऽर्थान्तरं श्रीकृष्णाख्यं वस्तु प्रकटीचकार । तच्छास्त्रव्याख्यया तत्स्वरूपं प्रकटीचकारेत्यर्थः । भगवान् चन्द्रोऽपि स्वोदयेनार्थान्तरमाकाशाख्यं वस्तु प्रकटीचकार तत्राप्ययं विशेष इत्याह— परिपूर्णेत्यादिना । परिपूर्णसंवित् श्रीपूर्णप्रज्ञाचार्यः आनन्दश्च चिच्चानन्दचितौ ताभ्यां सहिताः सानन्दचितः तादृशाः गुणाः सानन्दचिद्गुणाः तेषां गणः समूहो यस्य तत्तथोक्तमर्थान्तरं श्रीहरिलक्षणं वस्तु प्रकटीचकार । चन्द्रस्तु शब्दः गुणो यस्य तत् शब्दगुणं नभः प्रकटीचकारेत्ययमेव भेदः । एतावानेव विशेष इत्यर्थः । कथंभूतमर्थान्तरमित्यत आह— दलितेति । परिपूर्णसंवित् श्रीमध्वः । दलितो विपाटितो य इन्द्रनीलं मणिः तस्य नीलविभ्रम इव नीलविभ्रमो नीलकान्तिः यस्य तत् दलितेन्द्रनीलमणिनीलविभ्रमम् । एवंविधं श्रीकृष्णाख्यं वस्तु । गगनमप्येतादृशम् । 'आकाशो नीलमोदेतीति' श्रुतेः । नवानि नूतनानि यानि कुन्दकुड्मलानि तानीव सिता धवला ये द्विजा दन्ताः । 'दन्तविप्राण्डजा द्विजा' इत्यमरः । तेषां आवलिः पङ्क्तिः यस्य तत्तथोक्तम् । गगनञ्च नवकुन्दकुड्मलवद्धवलनक्षत्रयुक्तम् । स्मितया विकसितया । नगोत्तमा वृक्षोत्तमाः तेषां शिरांस्यग्राणि तेषु सुजाता सम्यगुत्पन्ना तया । सुरभिताः स्वगतपुष्पगन्धेन परिमलिता आशा दिशो यया सा तथोक्ता तया वनमालया वैजयन्त्याख्यया अन्वितं युक्तम् । गगनपक्षे तु— नगोत्तमशिरस्सु पर्वतोत्तमाग्रेषु सुजातया, वनमालया वनसमूहेनान्वितमित्यर्थः । अर्थान्तरं श्रीकृष्णं गोभिर्वाग्भिः प्रकटीचकारेत्यन्वयः । चन्द्रस्तु गोभिः स्वचन्द्रिकाभिरुक्तप्रकारं गगनं प्रकटीचकारेति भावः । मञ्जुभाषिणीवृत्तम् । 'सजसाजगौ च यदि मञ्जुभाषिणी'त्युक्तेः ॥ ५३ ॥

मन्दोपकारिणी – अन्त्यकुलकमेतत् । भगवान् षड्गुणसम्पन्नः सः परिपूर्णसंवित् पूर्णप्रज्ञाचार्यः अर्थान्तरम् कृष्णाख्यवस्तुविशेषं प्रकटीचकार सच्छास्त्रव्याख्यानेन तत्स्वरूपं

स्पष्टं चकार । चन्द्रस्तु चन्द्रोऽपि स्वोदयेन अर्थान्तरं, आकाशाख्यं वस्तु प्रकाशयामास इति तृतीयश्लोकेन योजना । कथंभूतं कृष्णाख्यं अर्थान्तरं- दलितेन्द्रनीलमणिनीलविभ्रमं दलितः विस्फुटितश्चासौ इन्द्रनीलमणिश्च दलितेन्द्रनीलमणिः तद्वत् नीलः विभ्रमः कान्तिः यस्य तत् तथोक्तं आकाशाख्यमपि नीलरूपमेव । पुनः कथंभूतं नवकुन्दकुड्मल-सितद्विजावलि कुन्दस्य कुन्दपुष्पस्य कुड्मलाः मुकुलाः 'कुड्मलो मुकलोऽस्त्रियां' इत्यमरः नवाः नूतनाश्च ते कुन्दकुड्मलाश्च नवकुन्दकुड्मलवत् सिताः शुभ्राः द्विजानां दन्तानां आवलिः पङ्क्तिः यस्य तत् तथोक्तं 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । आकाशन्तु नवकुन्दकुड्मलवत् सितानां द्विजानां नक्षत्राणां आवलिः 'यस्मिन् तत् तथोक्तम् । पुनः कथंभूतं स्मितया विकसितया नगोत्तमशिरस्सुजातया नगानां वृक्षाणां उत्तमाः नगोत्तमाः पारिजातादयः तेषां शिरोभिः अग्रभागोत्पन्नपुष्पैः इत्यर्थः । सु सम्यक् जातया उत्पन्नया 'अगो नगश्च भुजगे भानौ भूधर भूरुहौ' इति भास्करः । सुरभिताशया सुरभिताः परिमलिताः आशाः दिशः यया सा तथोक्ता तया 'आशा तृष्णादिशोः प्रोक्ता' इति विश्वः । वनमालया वैजयन्त्याख्यया मालया अन्वितं भूषितं 'आपादलम्बिनी माला वनमालाभिधीयते' इत्युक्तलक्षणा वनमाला ज्ञेया । आकाशं तु स्मितया विकसितकु-सुमयुक्तया नगोत्तमशिरस्सु जातया इति पदद्वयम् । नगोत्तमानां पर्वतोत्तमानां शिरस्सु उपरिप्रदेशेषु जातया सुरभिताशया सुरभिताः आशाः दिशः दिगन्ताः यया सा तथोक्ता तया । वनमालया वनानां काननानां मालया समूहेन अन्वितं 'माला च उन्नतभूमाला पङ्क्तौ पुष्पादिदामनि' इति भास्करः । मञ्जुभाषिणीवृत्तं 'सजसाजगौ च यदि मञ्जुभाषिणी' ॥ ५३ ॥

मृदुगामिविमानसम्पदो रमयत्सुस्मितगोपसुन्दरीः
परितापविहीनमुज्ज्वलं सुततं सूक्ष्मतराम्बरं वरम् ॥ ५४ ॥

भावप्रकाशिका – मृदुगामिन्यो विमानसम्पद आसां मृदुगामिन्यश्चैता विगतमान-सम्पदश्चेति च । गोपाः स्वर्गपाः पशुपाश्च । ततं व्याप्तं वीणादिवाद्यं च ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – मृद्विति ॥ स श्रीमध्वः । यत् अर्थान्तरं, मान एवाभिमान एव सम्पत् विगता नष्टा मानसम्पत् । यासां ताः विमानसम्पदो नष्टलज्जा इत्यर्थः । मृदु

मनोहरं यथा भवति तथा गन्तुं शीलमासामस्तीति मृदुगामिन्यस्ताश्च ता विमानसम्पदश्चेति मृदुगामिविमानसम्पदस्ताः । शोभनं स्मितं यासां ता सुस्मिताः ताः च ताः गोपसुन्दर्यश्च सुस्मितगोपसुन्दर्यः ताः रमयत् । आकाशमपि मृदुगामीनि यानि विमानानि तेषां सम्पत् यासां ताः तथोक्ताः ताः, गां स्वर्गं पान्तीति गोपा देवाः तेषां सुन्दर्योऽङ्गनाः ताः रमयत् । मृदुगामिविमानारूढाः सुस्मिता देवाङ्गना आकाशे रमयन्ति हि । परितापविहीनं स्वतन्त्रत्वात् क्लेशरहितम् । आकाशन्तु जडत्वात् परितापविहीनम् । उज्वलं स्वच्छं निर्दोषमिति यावत् । आकाशमपि निर्मलम् । सु शोभनं ततं वीणादिवाद्यं यस्य तत्सुततम् । गोपाङ्गनाभिः सह नानावीणादिवाद्यैः विहरदिति भावैः । आकाशमपि सम्यग् व्याप्तम् । सूक्ष्मतरं अतिसूक्ष्मं अम्बरं वस्त्रं यस्य तत्तथोक्तम् । आकाशन्तु सूक्ष्मतरं अतीन्द्रियश्च तदम्बरं चेति सूक्ष्मतराम्बरं, बाह्येन्द्रियागोचरमित्यर्थः । वरमुत्तमम् । एवंविधं श्रीकृष्णाख्यं वस्तु सच्छास्त्रव्याख्यायनेन प्रकटीचकार । चन्द्रोऽपि स्वोदयेनैवंविधमम्बराख्यमर्थान्तरं प्रकटीचकारेत्यन्वयः । सुन्दरीवृत्तम् ॥ ५४ ॥

मन्दोपकारिणी – पुनः कथंभूतं कृष्णाख्यं अर्थान्तरम् ॥ मृदुगामिविमानसम्पदः मान एव अभिमान एव सम्पत् मानसम्पत् विगता मानसम्पत् याभ्यः ताः विमानसम्पदः नष्टलज्जाः इत्यर्थः । मृदुगामिन्यः मन्दं गच्छन्त्यश्च ताः विमानसम्पदश्चेति तथोक्ताः । सुस्मितगोपसुन्दरीः शोभनं स्मितं मन्दहासः यासां ताः सुस्मिताः गोपानां गोपालकानां सुन्दर्यः रमण्यः सुस्मिताश्च ताः गोपसुन्दर्यश्च ताः 'सुन्दरी रमणी रामा' इत्यमरः । रमयत् क्रीडयत् । आकाशं तु मृदुगामिविमानसम्पदः आकाशे मृदु शनैः गामिनां विमानानां सम्पत् यासां ताः सुस्मितगोपसुन्दरीः गां स्वर्गं पान्तीति गोपाः देवाः तेषां सुन्दर्यः सुस्मिताश्च ताः गोपसुन्दर्यश्च ताः 'गौर्नाके वृषभे चन्द्रे' इति रत्नमाला । रमयत् देवाङ्गनाः विमानारूढाः सत्यः आकाशे क्रीडन्तीति अर्थः । पुनः कथंभूतं, परितापविहीनं परितापेन सन्तापेन विहीनं, आकाशं तु जडत्वात् परितापविहीनम् । उज्वलं स्वच्छं निर्दोषं इति यावत् । आकाशं तु मेघरहितत्वात् उज्वलम् । सुततं सु शोभनं ततं वीणादिवाद्यं यस्य तत् सुततं गोपाङ्गनाभिस्सह वीणादिनानाविधवाद्यैः विहारं कुर्वत् इति भावः 'ततं वीणादिकं वाद्यं' इत्यमरः । आकाशं तु सुततं सम्यक् ततं व्याप्तम् । सूक्ष्मतराम्बरं अतिशयेन सूक्ष्मं अम्बरं वस्त्रं यस्य तत् सूक्ष्मतराम्बरम् । आकाशं तु सूक्ष्मतरं च तत् अम्बरं अम्बरशब्दवाच्यं च इति तथोक्तं, आकाशं तु बाह्येन्द्रियागोचरत्वात् सूक्ष्मं इत्युच्यते । वरं

सर्वोत्तमम् । आकाशं तु वरं पञ्चभूतोत्तमं पञ्चभूताऽवरा च इति पृथिव्याः भूतावरत्वोक्त्या आकाशस्य भूतोत्तमत्वं सिद्धम् । सुन्दरीवृत्तम् 'अयुजोर्यदि सौ लगौ लगौ समयोः स्भौरलगाश्च सुन्दरी' इति वचनात् ॥ ५४ ॥

गोभिस्तमांस्यपनयन् गतिदं प्रजानामर्थान्तरं स भगवान् प्रकटीचकार ।
सानन्दचिद्गुणगणं परिपूर्णसंविच्चन्द्रस्तु शब्दगुणमित्ययमेव भेदः ॥ ५५ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते सुमध्वविजये महाकाव्ये आनन्दाङ्के चतुर्दशः सर्गः ॥

भावप्रकाशिका – गतिदं मोक्षदं मार्गदं च । निशायां भागवतं व्याचक्षाणः श्रीमन्मध्वः कृष्णादिरूपं प्रकाशितवानिति भावः ॥ ५५ ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां चतुर्दशः सर्गः ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – व्याख्यातोऽयं श्लोकः । वसन्ततिलकावृत्तम् ॥ ५५ ॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ
पदार्थदीपिकोद्बोधिकायां चदुर्दशः सर्गः ॥

मन्दोपकारिणी – पुनः कथंभूतं प्रजानां जनानां मोक्षयोग्यानां गतिदं मोक्षादिगतिं ददातीति गतिदम् । आकाशन्तु प्रजानां गतिं मार्गं ददातीति गतिदं इति । किं कुर्वन् सन् गोभिः वचनैः तमांसि अज्ञानाख्यतमांसि, अपनयन् नाशयन् चन्द्रोऽपि स्वोदयेन गोभिः किरणैः तमांसि अन्धकारान् अपनयन् सन् । एवं अर्थान्तरप्रकटनं चन्द्रमध्वयोः समं तथापि कश्चन विशेषोऽस्ति । कथं पूर्णप्रज्ञाचार्यः सानन्दचिद्गुणगणं आनन्दश्च चित् ज्ञानं च आनन्दचितौ आनन्दचिद्भ्यां सहिताः सानन्दचितः ते च ते गुणाः ऐश्वर्याद्यनन्तगुणाश्च तेषां गणः समूहः यस्य तत् सानन्दचिद्गुणगणं तत् अर्थान्तरं प्रकटीचकार । चन्द्रस्तु

शब्दगुणं शब्दाख्यः एक एव गुणो यस्य तत् शब्दगुणं अर्थान्तरं प्रकटीचकार । इत्ययमेव एतावानेव भेदः विशेषः मध्वचन्द्रयोः इति शेषः । अनेन रात्रौ चन्द्रोदयेन आकाशः सम्यक् प्रकाशितः तथा रात्रौ मध्वाचार्यः पूर्वोक्तविशेषणकं आनन्दज्ञानाद्यनन्तगुणं सर्वोत्तमं श्रीकृष्णाख्यं भगवन्तं भागवतादिसच्छास्त्रादिप्रवचनेन शिष्येभ्यः प्रकाशयामास इति भावः । वसन्ततिलकावृत्तं 'उक्ता वसन्ततिलका तभजा जगौ गः' इति तल्लक्षणात् ॥ ५५ ॥

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण विरचितायां
मन्दोपकारिण्यां चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः

भूयोबोधस्ततो भूयो व्याचख्यौ भाष्यमद्भुतम् ।
ग्रामे ग्रामीणसामान्ये वसंस्तत्रामरालये ॥ १ ॥

भावप्रकाशिका – अमरालयस्य 'कुडेल्'इत्यपभ्रष्टभाषा । ग्रामस्यापि ॥ १ ॥

पदार्थदीपिकोद्बोधिका – भूयोबोध इति ॥ ततः तदनन्तरं भूयान् बोधो यस्य स तथोक्तः श्रीपूर्णप्रज्ञः । तत्र ग्रामे 'पाडिकुडेल्' इत्यपभ्रष्टनामके ग्रामे भवा ग्रामीणा ग्रामजनाः तेषां सामान्यः साधारणः तस्मिन् अमरालये 'कूडेल्' नामक देवालये वसन् सन् भूयः पुनरपि अद्भुतं भाष्यं श्रीमद्भाष्यं व्याचख्यौ । अस्मिन् सर्गे प्रायः पथ्यावक्रं वृत्तम् । 'युजश्चतुर्थतोजेन पथ्यावक्रं प्रकीर्तितमि'त्युक्तेः ॥ १ ॥

मन्दोपकारिणी – भूयोबोध इति ॥ ततः विष्णुमङ्गलदेवालये कतिपयदिवसवासानन्तरम् । भूयोबोधः भूयान् पूर्णः बोधो यस्य स मध्वाचार्यः । तत्र ग्रामे ग्रामीणसामान्ये ग्रामस्थानां सर्वेषामपि साधारणे अमरालये विष्णुमङ्गलादन्यस्मिन् देवालये वसन् भूयः अद्भुतं भाष्यं आत्मप्रणीतं श्रीब्रह्मसूत्रभाष्यं व्याचख्यौ व्याख्यातवान् । 'ख्या प्रकथने' लिट् परस्मैपदं चख्यौ चख्यतुः चख्युः । अस्मिन् सर्गे पथ्यावक्रं वृत्तं 'वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् । युजोर्जेन सरिद्भर्तुः पथ्यावक्रं प्रकीर्तितम्' ॥ १ ॥

परपक्षरथारूढं खरतर्कमहायुधम् ।
त्रिविक्रमार्यं सोऽपश्यत् प्रतिवीरमिवाग्रतः ॥ २ ॥

पदार्थदीपिकोद्बोधिका – परेति ॥ स श्रीमध्वाचार्यः परपक्ष एव स्वसिद्धान्तस्य प्रतिपक्षभूतसिद्धान्त एव रथस्तमारूढ आरुह्य वर्तमानः तम् । खराः तीक्ष्णा ये तर्का अनुमानानि त एव महायुधानि यस्य स तथोक्तः तं त्रिविक्रमार्यं प्रतिवीरमिव प्रतिभटमिव अग्रतः अपश्यत् । स्वसिद्धान्तं समर्थ्य परपक्षप्रतिपक्षभूतं पक्षं अवलम्ब्य वर्तमानं अति तर्ककर्कशं त्रिविक्रमार्यं अपश्यत् । यथा कश्चित् योद्धा रथारूढं निशितनानायुधधरं प्रतिवीरं अग्रतः पश्येत् तद्वदिति भावः ॥ २ ॥

मन्दोपकारिणी – परपक्षेति ॥ सः श्रीमध्वाचार्यः । परपक्षरथारूढं परः स्वसिद्धान्तात् अन्यः पक्षः सिद्धान्तः स एव रथः तं आरूढः आश्रितः तं परसिद्धान्त-रथमवलम्ब्य वर्तमानं इत्यर्थः । खरतर्कमहायुधं खराः तीक्ष्णाः तर्काः युक्तयः एव महन्ति आयुधानि यस्य सः तं 'तिग्मं तीक्ष्णं खरं तद्वत्' इत्यमरः । त्रिविक्रमार्यं त्रिविक्रम-पण्डिताचार्यं अग्रतः पुरतः अपश्यत् दृष्टवान् । कमिव प्रतिवीरमिव प्रतियोद्धारमिव । 'दृशिर् प्रेक्षणे' इति धातोः लङ् परस्मैपदम्' । स्वसिद्धान्तं समर्थ्य परसिद्धान्तं निराकुर्वन् श्रीमध्वाचार्यः स्वपक्षविरुद्धपरपक्षमवलम्ब्य आगतं अतितर्ककर्कशं त्रिविक्रमार्यं अभिमुखतः स्थितं अपश्यत् । यथा कश्चित् योद्धा रथारूढं नानानिशितायुधधरं प्रतिवीरं अग्रतः पश्येत् तद्वत् इति भावः ॥ २ ॥

तदा तदाननाम्भोजात् वृत्तोपन्यासभारती ।
सेना सेनाग्रहा दिव्या शिबिरादिव निर्ययौ ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – तदेति ॥ तदा त्रिविक्रमार्ये शृण्वति सति वृत्ता प्रवृत्ता आदिकर्मणि 'कर्तरि चे'ति कर्तरि क्तः । दिव्या अलौकिका इने सर्वस्वामिनि आग्रहः इनाग्रहः तेन सहिता सेनाग्रहा सर्वजगत्सृष्ट्यादिकारणस्य हरेः तत्स्वामित्वसमर्थनपरा इत्यर्थः । सेनापि सेनाग्रहा इनस्य स्वनायकस्य जयादावाग्रहेन सहिता सेनाग्रहा । उपन्या-सात्मिका च सा भारती वाक् च उपन्यासभारती तदाननाम्भोजात् तस्य श्रीमध्वस्य आननं इव अम्भोजं पद्मं तस्मात् दिव्या सेना शिबिरात् इव सेनानिवासस्थानात् इव निर्ययौ ॥३॥

मन्दोपकारिणी – तदेति ॥ तदा त्रिविक्रमाचार्ये श्रुण्वति सति वृत्ता वर्तमाना 'कर्तरि क्तः' दिव्या अद्भुतरूपा उपन्यासभारती उपन्यासः वाङ्मुखं 'उपन्यासस्तु वाङ्मुखं' इत्यमरः, उपन्यासरूपा भारती वाक् 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती' इत्यमरः । तदाननाम्भोजात् तस्य श्रीमध्वाचार्यस्य आननं आस्यमेव अम्भोजं तस्मात् निर्ययौ निर्गता । सेना गजाश्वरथपत्तिसमुदायरूपा 'हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयं' इत्यमरः । शिबिरादिव निवेशादिव 'निवेशः शिबिरं पण्डे' इत्यमरः । कीदृशी भारती सेनाग्रहा इने सर्वस्वामिनि हरौ आग्रहेण सहिता सर्वजगत्सृष्ट्यादिकारणस्य हरेः तत्स्वामित्वसमर्थनपरा इत्यर्थः । सेनापि सेनाग्रहा इने स्वामिनि राज्ञि तज्जयादौ आग्रहसहिता इत्यर्थः । 'इनः स्वामिनि सूर्ये च' इत्यभिधानम् । आदिकुलकमेतत् ॥ ३ ॥

नात्यत्वरा नातिरया नस्खलन्ती निरन्तरा।
अनानावयवेत्येव दवीयोभिः प्रतर्किता ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – नातीति ॥ नात्यत्वरा त्वरया रहिता अत्वरा अत्यन्तं अत्वरा अत्यत्वरा अतिशनैः इत्यर्थः । अत्यत्वरा न भवतीति नात्यत्वरा नातिरया अत्यन्तं रयो वेगो यस्याः सा अतिरया, अतिरया न भवतीति नातिरया अतिवेगवती न भवति इत्यर्थः । अतिशनैः वा अतिद्रुतं वा वाच्यमाना न भवति इत्यर्थः । स्खलन्ती न भवतीति नस्खलन्ती शब्दतोऽर्थतश्च स्खलनरहितेत्यर्थः । निर्गतं अन्तरं विच्छेदो यस्याः सा निरन्तरा, दवीयोभिः दूरवर्तीभिः दूरशब्दादीयसुनि 'स्थूलदूर' इत्यादिना यणो लोपः पूर्वस्य गुणश्च । नानाविधाश्च ते अवयवाश्च नानावयवा न विद्यन्ते नानावयवा यस्याः सा अनानावयवा, इत्येव स्वरवर्णपदादिरूपनानावयवरहितैव इत्यर्थः । प्रतर्किता ऊहिता सा उपन्यासभारती निर्यायिति पूर्वेणान्वयः । सेना च नात्यत्वरा, नातिरया नस्खलन्ती निरन्तरा च दवीयोभिः दूरस्थपुरुषैः दृश्यमानापि अनानावयवेत्येव रथतुरगादि-नानास्वपरिकरवत्यपि तद्रहितेत्येव प्रतर्किता दूरस्थपुरुषैः सेनाप्रवाहमात्रं दृश्यते न तु तद्विशेषोऽपीति भावः ॥ ४ ॥

मन्दोपकारिणी – नेति ॥ पुनः कथंभूता नात्यत्वरा त्वरया वेगेन रहिता अत्वरा अत्यन्तं अत्वरा सा न भवतीति नात्यत्वरा, अतिशनैः नेत्यर्थः । नातिरया अत्यन्तं रयो वेगो यस्याः सा अतिरया सा न भवतीति अतिरया, अतिद्रुतोच्चारणतया च नेत्यर्थः । 'रंहस्तरसी तु रयः स्यदः' इत्यमरः । नस्खलन्ती शब्दतोऽर्थतश्च स्खलनरहिता । निरन्तरा निर्गतं अन्तरं विच्छेदो यस्याः सा । दवीयोभिः दूरवर्तिभिः 'स्थूलदूरयुवह्रस्व-क्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुण' इति सूत्रेण दूरशब्दादीयसुन् प्रत्ययः । अना-नावयवा नानाविधाश्च ते अवयवाश्च न विद्यन्ते नानावयवाः यस्याः सा, स्वरवर्ण-पदादिरूपनानावयवरहिता इत्यर्थः । इत्येव प्रतर्किता ऊहिता । शिबिरात् निर्गता सेनापि उक्तगुणविशिष्टा । सापि दवीयोभिः अनानावयवेत्येव गजतुरगादिनानास्वपरिकरवत्यपि तद्रहितेत्येव प्रतर्किता दूरस्थपुरुषैः सेनाप्रवाहमात्रं दृश्यते न तु तद्विशेषोऽपीति भावः ॥४॥

सूत्रस्यन्दनवृन्दाढ्या दुर्वारश्रुतिवारणा ।
सूपपत्तिमहापत्तिर्विचित्रस्मृतिसप्तिका ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – पुनः कथंभूता उपन्यासभारती इत्यत आह — **सूत्रेति** ॥ सूत्राणि ब्रह्मसूत्राणि एव स्यन्दना रथाः तेषां वृन्दानि समूहाः तैः आढ्या सम्पन्ना । दुर्वाराः निरवकाशत्वेन प्रबलत्वात् निवारयितुं अशक्या या श्रुतयः ता एव वारणा गजा यस्याः सा । सूपपत्तयः एव शोभनयुक्तयः एव महापत्तयो महापदातयो यस्याः सा तथोक्ता । विचित्राः विविक्षितनानार्थपरत्वेन नानाविधा याः स्मृतयः पौरुषेयग्रन्थाः ता एव सप्तयो हया यस्याः सा तथोक्ता । उपन्यासभारती तदाननाम्भोजात् दिव्या सेना शिबिरादिव निर्ययौ इति पूर्वेणान्वयः ॥ ५ ॥

मन्दोपकारिणी – सूत्रेति ॥ पुनः कथंभूता सूत्रस्यन्दनवृन्दाढ्या ब्रह्मसूत्राण्येव स्यन्दनानि रथाः तेषां वृन्देन समूहेन आढ्या सम्पन्ना 'शताङ्गः स्यन्दनो रथः' इत्यमरः । दुर्वारश्रुतिवारणा दुर्वाराः अपौरुषेयत्वेन प्रबलत्वात् निवारयितुं अशक्याः श्रुतय एव वारणाः गजाः यस्यां सा तथोक्ता । सूपपत्तिमहापत्तिः सुष्ठु उपपत्तयः युक्तय एव महत्यः बह्व्यः पत्तयः पदातयः यस्यां सा तथोक्ता 'पदातिपत्तिपतगः' इत्यमरः । विचित्र-स्मृतिसप्तिका विचित्राः विवक्षितार्थसमर्थनपरत्वेन नानाविधाः स्मृतयः पौरुषेयग्रन्था एव सप्तयो हयाः यस्यां सा तथोक्ता 'हयसैन्धवसप्तयः' इत्यमरः । सेना तु हस्त्यश्वरथ-पदातिरूपचतुरङ्गिणी प्रसिद्धैव ॥ ५ ॥

वर्धितोर्मिहरिप्रेष्ठा सुपयोधरसुस्वना ।
सवितानप्रकाशार्था सागरी श्रीरिवापरा ॥ ६ ॥

भावप्रकाशिका – स्वभक्तिविषये खण्डितषड्ऊर्मिकस्य हरेः प्रेष्ठा उपन्यासभारती सागरजा लक्ष्मीश्च । सादिभिर्वर्धितोर्म्याख्यगतिविशेषवदश्वप्रेष्ठा सेना । सागरापत्यश्रीश्च स्वोदयेन वर्धितकल्लोलचन्द्रप्रेष्ठा । सागरसम्बन्धिनी कान्तिश्च । सुकुचा सुस्वरा रमा । सुजलधरवद्गम्भीरसुस्वरा अन्या । सविस्तरं प्रकाशाभिप्राया गीः । सविस्तारस्व-रूपतेजोद्रव्यात्मिका रमा । सविस्तारप्रादुर्भावेन प्रयोजनं शत्रुभीषणं सेनायाः । सयज्ञप्रकाशनप्रयोजना सागरापत्यश्रीः । सविस्तारतेजोयुक्तरत्नाख्यार्थवती अन्या ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – पुनः कथंभूता उपन्यासभारती इत्यत आह– **वर्धितेति** ॥ वर्धिताः खण्डिता ऊर्मयः षड्ऊर्मयो येन स तथोक्तः । स चासौ हरिश्च तस्य अतिप्रेष्ठा अतिप्रिया 'कल्यनं कर्तनं प्रोक्तं वर्धनं छेदनं तथे'ति हलः । सुपयोधरस्य शोभनमेघस्य सुस्वन इव सुस्वनो यस्याः सा तथोक्ता । वितानेन विस्तारेण सहितं यथा भवति तथा सवितानं सवितानं प्रकाशार्थः प्रकाशाभिप्रायो यस्याः सा तथोक्ता । उपन्यासभारती तदाननाम्भोजात् अपरा अन्या सागरस्य अपत्यं स्त्री सागरी क्षीरसागरतनया इत्यर्थः । श्रीरिव रमा इव निर्ययौ इत्यन्वयः । सापि वर्धितोर्मिहरिप्रेष्ठा खण्डितषड्ऊर्मिकस्य हरेः अतिप्रिया सुपयोधरा च सा सुस्वना च, सुकुचा सुस्वना चेत्यर्थः । सवितानप्रकाशार्था विस्तारयुक्ततेजोमयद्रव्यात्मिका । अत्र अर्थशब्देन स्वरूपाख्यं व्योम उच्यते । यद्वा—— वर्धितोर्मिहरिप्रेष्ठा सुपयोधरसुस्वना सवितानप्रकाशार्थोपन्यासभारती अपरा अन्या सगरस्य तदाख्यराज्ञः सम्बन्धिनी सागरी श्रीरिव सेनाख्यश्रीरिव सगरस्य दण्डयात्रायां तत्सैन्याख्यश्रीः शिबिराद्यथा निर्गच्छेत् तथा तदाननाम्भोजान्निर्ययौ इत्यन्वयः । सेनाख्यश्रीश्च वर्धितोर्मिहरिप्रेष्ठा अश्वारोहैः वर्धितोर्म्याख्यगतिविशेषवदश्वस्य प्रेष्ठा सुपयोधरसुस्वना जलधरवत्सुस्वना सवितानप्रकाशार्था सवितानं सविस्तरं यथा भवति तथा प्रकाशेन प्रादुर्भविन अर्थः प्रयोजनं शत्रुभीषणाख्यं यस्याः सा तथोक्ता । अथवा उपन्यासभारती अपरा सागराणां षष्ठिसहस्रसङ्ख्याकसगरापत्यानां सम्बन्धिनी सागरी श्रीरिव कान्तिरिव निर्ययाविति । सा कान्तिश्च वर्धितोर्म्याख्यगतिसम्बन्धिनी सागरी श्रीरिव विशेषवन्मेध्याश्वस्य प्रेष्ठा वितानं यज्ञस्तत्प्रकाशनाख्यप्रयोजनसहिता । 'वितानं संस्तरो बर्हिः सवः सत्रञ्च कथ्यते' इति हलः । अथवा उपन्यासभारती सागरी श्रीरिव कान्तिरिव निर्ययावित्यन्वयः सापि । वर्धितोर्मिहरिप्रेष्ठा स्वोदयेन वर्धिततरङ्गस्य हरेश्चन्द्रस्य प्रेष्ठा 'अर्कमर्कटमण्डूकविष्णुवासववायवः । तुरङ्गसिंहशीतांशुयमाश्च हरयो दश' इति हलः । सवितानप्रकाशार्था सविस्तारतेजोयुक्तरत्नाख्यपदार्थवती ॥ ६ ॥

मन्दोपकारिणी – **वर्धितेति** ॥ पुनः कथंभूता वर्धितोर्मिहरिप्रेष्ठा वर्धिताः छेदिताः ऊर्मयः वृद्धिह्रासादिषड्विकाराः यस्य, स चासौ हरिश्च तस्य प्रेष्ठा अतिप्रिया 'वर्धनं छेदने द्वयोः' इति हलायुधः । सुपयोधरसुस्वना सुपयोधरस्य सुमेघस्य गम्भीरतया शोभनस्वन इव सुस्वनो यस्याः सा तथोक्ता 'ध्वनिध्वानरवस्वनाः' इत्यमरः । सवितानप्रकाशार्था वितानेन विस्तारेण सहितं यथा भवति तथा प्रकाशे प्रकाशने अर्थः अभिप्रायः यस्याः सा तथोक्ता,

विस्तारेण प्रमेयोपपादने तात्पर्यवती इत्यर्थः । का इव अपरा अन्या सागरी सागरस्य क्षीरसमुद्रस्य इयं सागरी क्षीरसमुद्राज्जाता श्रीरिव रमेव 'क्षीरोदतनया रमा' इत्यमरः । सापि वर्धितोर्मिहरिप्रेष्ठा उक्त एवार्थः । सुपयोधरसुस्वना सुपयोधरा सुस्तना । च सा सुस्वना च सवितानप्रकाशार्था सवितानः विस्तारसहितः प्रकाशः अर्थो यस्याः सा । अत्र अर्थशब्देन धनादिकं उच्यते यद्वा । अपरा सागरी सगराख्यराज्ञः सम्बन्धिनी श्रीरिव सेनाख्यश्रीरिव सा च वर्धितोर्मिहरिप्रेष्ठा अश्वारूढैः पुरुषैः वर्धिता अभिवर्धिता ऊर्मिः गतिविशेषो येषां ते च ते हरयः अश्वाश्च तेषां प्रेष्ठा । सुपयोधरसुस्वना उक्त एवार्थः । सवितानप्रकाशार्था सवितानं सविस्तारं यथा भवति तथा प्रकाशेन प्रादुर्भावेन अर्थः शत्रुभीषणाख्यं प्रयोजनं यस्याः । यद्वा अपरा सागरी सगरापत्यसम्बन्धिनी श्रीरिव सेनाख्यश्रीरिव । सापि वर्धितोर्म्याख्यगतिविशेषवत् मेध्याश्वस्य प्रेष्ठा । सुपयोधरसुस्वना उक्तोऽर्थः । वितानस्य यज्ञस्य प्रकाशः प्रकाशनं स एवार्थः प्रयोजनं तेन सहिता 'क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके' इत्यमरः पुनः का इव अपरा सागरी सागरस्य समुद्रस्य सम्बन्धिनी श्रीरिव कान्तिरिव। सापि वर्धितोर्मिहरिप्रेष्ठा वर्धिता अभिवर्धिताः ऊर्मयः तरङ्गाः येन स चासौ हरिः चन्द्रश्च तस्य प्रेष्ठा चन्द्रोदयेन समुद्रतरङ्गा अभिवर्धन्ते हि 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः। सुपयोधरसुस्वना पूर्व एवार्थः । सवितानप्रकाशार्था सविस्तरः प्रकाशः कान्तिः येषां ते च ते अर्थाः रत्नाख्यवस्तूनि यस्याः सा तथोक्ता 'अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिषु' इत्यमरः ॥ ६ ॥

पद्मेशपदपद्माश्रित्कृत्याङ्गं पद्मजन्मनः ।
लालिता शिरसेशेन गङ्गेवाशेषपावनी ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – पुनः कथंभूता उपन्यासभारती इत्यत आह– **पद्मेशेति** ॥ पद्माया रमाया ईशः पद्मेशः तस्य पदं पादः तदेव पद्मं तत् श्रयत इति पद्मेशपदपद्माश्रित्। गङ्गा च विष्णुपदाश्रिता । पद्मात् श्रीहरिनाभिपद्मात् जन्म यस्य स तथा तस्य विरिञ्चस्य कृत्यस्य व्यापारस्याङ्गं साधनं कृत्याङ्गं ब्रह्मपदप्राप्त्यनन्तरं तद्व्यापारं कर्तुमङ्गभूतेत्यर्थः । एतेन एतत् शास्त्रव्याख्यानं ब्रह्मपदप्राप्तेरपि हेतुर्भवति तद्योग्यस्येत्युक्तं भवति । गङ्गा च हरिचरणक्षालनात्मकव्यापाराङ्गभूता । ईशेन रुद्रेण शिरसा लालिता । भक्तिवशात् शिरसि बद्धा अपि नाश्रुतेति भावः । गङ्गापि साक्षात् शिवेन शिरसा धृता । एवं भूतोपन्यासभारती

गङ्गेव अशेषपावनी अशेषं सुरनरनागादिसकलं जगत्पावयितुं शीलमस्या इति तथोक्ता । यद्वा एतादृशी उपन्यासभारती अशेषपावनी गङ्गेव तदाननाम्भोजात् निर्ययौ इत्यन्वयः।।७।।

मन्दोपकारिणी – पद्मेशेति ।। पुनः कथंभूता व्याख्यानभारती पद्मेशपदपद्मश्रित् पद्मायाः लक्ष्म्याः ईशः पतिः 'लक्ष्मीः पद्मालया पद्मा' इत्यमरः, तस्य हरेः पदपद्मं पादारविन्दं श्रित् आश्रिता विष्णूत्कर्षप्रतिपादिका इति भावः । पद्मजन्मनः पद्मात् कमलात् जन्म उत्पत्तिः यस्यं तस्य चतुर्मुखस्य कृत्याङ्गं कृत्यस्य व्यापारस्य अङ्गं उपायभूता ब्रह्मपदप्राप्त्यनन्तरं ब्रह्मव्यापारं कर्तुं साधनभूतेत्यर्थः । अनेन एतत् शास्त्रव्याख्यानं ब्रह्मपदयोग्यस्य तत्पदप्राप्तेरपि हेतुः भवतीति उक्तं भवति । ईशेन रुद्रेण 'शंभुरीशः पशुपतिः' इत्यमरः, शिरसा लालिता भक्तिवशात् शिरसि बद्धाञ्जलिना रुद्रेण आदृता इति भावः । अशेषपावनी अशेषान् श्रीभाष्यश्रोतृजनान् पावयति पवित्रीकरोतीति । अशेषपावनी का इव गङ्गेव मन्दाकिनीव । गङ्गा च पद्मेशपदपद्मश्रित् विष्णुपादमाश्रिता पद्मजन्मनःकृत्याङ्गं श्रीहरिचरणप्रक्षालनात्मकव्यापाराङ्गभूता, ईशेन शिरसा लालिता शिवेन शिरसा धृता अशेषपावनी अशेषान् दर्शनादिना पावयतीति तथोक्ता ।। ७ ।।

नारायणोऽनन्तगुणो ब्रह्माख्यो वेदवेदितः ।
विश्वकर्तेति विश्वज्ञः श्रुत्या युक्त्याऽप्यसीषधत् ।। ८ ।।

पदार्थदीपिकोद्बोधिका – किं तदुपन्यासप्रतिपाद्यमित्यत आह– **नारायण इत्यादिना** ।। विश्वं सकलं जानातीति विश्वज्ञः श्रीपूर्णप्रज्ञाचार्यः नारायणः न विद्यन्ते अन्तः देशतः कालतः गुणतः सङ्ख्यातश्च परिच्छेद इति अनन्ताः तादृशा गुणा ज्ञानभक्तिबलैश्वर्य-वीर्यतेजःप्रभृतयः शुभधर्मा यस्य सः अनन्तगुणः ब्रह्मेत्याख्या नाम यस्य स तथोक्तः । परिपूर्णत्वात् मुख्यतो ब्रह्माख्येति वेदैः सर्ववेदैः वेदित मुख्यतः प्रतिपादितः वेदवेदितः वेदैः एव वेदितो न तु अनुमानादिना इति वा । विश्वस्य कर्ता विश्वकर्ता इति श्रुत्या वेदेन युक्त्या अनुमानेन च असीषधत् असाधयत् । 'राधसाध संसिद्धौ' लुङ् । अनन्तगुणत्वं च– 'यः पार्थिवानि विममे रजांसि । सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिभिः । ब्रह्माख्यत्वं च– 'सर्वेषु भूतेषु एवमेव ब्रह्मेत्याचक्षते' एष पन्था एतत् कर्म एतत् ब्रह्म 'एष उ एव ब्रह्म एष उ एव इत्यादिभिः वेदवेदितत्वञ्च 'तावा एता ऋचः सर्वे वेदाः सर्वे घोषा एक एव व्याहृतिः

प्राणऋच इत्येव विद्यात् स एव सर्ववेदेड्य' इत्यादिभिः । विश्वकर्तृत्वञ्च— 'यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा, 'न तं विदाथ य इमा जजान, आत्मा वा इदमेक अग्र आसीन्नान्यत्किञ्चन मिषत्, स ऐक्षत, लोकानसृजत इति स इमाँल्लोकानसृजत्' इत्यादिभिः, असीषधत् ॥ ८ ॥

मन्दोपकारिणी – किं तदुपन्यासवाक्यप्रतिपाद्यमित्यपेक्षायामाह ॥ **नारायण इति** ॥ विश्वज्ञः विश्वं सर्वं जानातीति विश्वज्ञः पूर्णप्रज्ञः । नारायणः अनन्तगुणः न विद्यते अन्तः कालतः गुणतः देशतः सङ्ख्यातश्च परिच्छेदः येषां तादृशाः गुणाः ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभृतयः शुभधर्माः यस्य सः अनन्तगुणः । ब्रह्माख्यः ब्रह्मेति आख्या नाम यस्य स तथोक्तः परिपूर्णत्वात् मुख्यतः ब्रह्माख्य इति । वेदवेदितः वेदैः वेदितः मुख्यतः प्रतिपादितः न तु अनुमानादिना इति वा । विश्वकर्ता विश्वस्य जगतः कर्ता सृष्ट्यादिकर्ता । इति एवं प्रकारेण श्रुत्या वेदेन युक्त्यापि अनुमानेन च असीषधत् साधयामास 'साध संसिद्धौ इत्यतो णिजन्ताल्लुङ् परस्मैपदम्' । अनन्तगुणत्वं च 'परोमात्रया तन्वा वृधानः विष्णोर्नुकं वीर्याणि प्रवोचं' 'सत्यं ज्ञानं अनन्तं ब्रह्म' इत्यादिभिः । ब्रह्माख्यत्वञ्च 'सर्वेषु भूतेषु एतमेव ब्रह्मेत्याचक्षते' 'एष पंथा एतत् कर्म एतत् ब्रह्मा' इति 'एष उ एव' 'ब्रह्म एष' इत्यादिभिः । वेदवेदित्वञ्च 'तावा एताः सर्वा ऋचः स एव सर्ववेद्यः' इत्यादिभिः । विश्वकर्तृत्वञ्च 'यो नः पिता जनिता यो विधाता' 'न तं विदाथ य इमा जजान' 'आत्मा वा इदमेक एव अग्र आसीत्' इत्यादिभिः असीषधत् ॥ ८ ॥

प्रधानमपराधीनं कारणं परिणामि यत् ।
पयोवदिति चेत् साध्यवैकल्यं स्यान्निदर्शने ॥ ९ ॥

भावप्रकाशिका – नारायण इत्यादिपद्योक्तस्यार्थस्य साधकः प्रधानमित्यादिप्रबन्धः । युक्त्येति पदस्य कृत्यरूपेण प्रधानमित्यादिना सांख्यानां मतमनूद्य दूष्यते । साध्यवैकल्यं पयसोऽपि विष्ण्वधीनत्वात् 'न ऋतेत्वत्' इत्यादिः ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – अथ 'प्रधानमपराधीनमि'त्यारभ्य विष्णुः मोक्षस्य दाता इत्येतदन्तःप्रबन्धः नारायणः अनन्तगुणः इत्याद्यर्थस्य प्रतिपादकः । यदुक्तं नारायणस्य अनन्तगुणत्वादिकं श्रुत्या युक्त्या असीषधत् इति । तत्र नारायणस्य अखिलकर्तृत्वयुक्त्यादेः

प्रत्यर्थिभूतं साङ्ख्यमतं अनूद्य दूषयति— **प्रधानमित्यादिना** ॥ प्रधानं प्रधानाख्यतत्त्वं परस्य अधीनं तन्त्रं पराधीनं तत् न भवति इति अपराधीनं स्वतन्त्रमित्यर्थः । कारणं यद्यस्मात् परिणामो विकारः अस्यास्तीति परिणामि तस्मात् विकारित्वादित्यर्थः । प्रधानं स्वतन्त्रकारणं परिणामित्वात् यत्परिणामि तत्स्वतन्त्रकारणं पयोवत् क्षीरवत् । अत्र कारणत्वमात्रसाधने कुलालादौ सिद्धसाधनं तन्निवृत्यर्थं स्वतन्त्रमिति । यथा क्षीरं अपराधीनमेव विकृत्या दधिभावं भजते एवं स्वतन्त्रमेव प्रधानं जगदाकारेण परिणमत इत्यभिप्रायः । चेद्यदि इति ब्रूयात् तर्हि निदर्शने दृष्टान्ते साध्यवैकल्यं साध्यराहित्यं स्यात् इति वक्तव्यमिति शेषः । स्वतन्त्रकारणत्वं हि साध्यं तत्तु दृष्टान्ते न विद्यते । 'एतेन ह वाव पयोमण्डं भवति । 'न ऋते त्वत्क्रियते किञ्चनारे, द्रव्यं कर्म च कालश्च स्वभावो जीव एव च' इत्यादिना क्षीरदधिभावस्य विष्ण्वधीनत्वाङ्गीकारात् ॥ ९ ॥

मन्दोपकारिणी –अथ प्रधानमपराधीनं इत्यारभ्य विष्णुः मोक्षादिदाता इति एतदन्तःप्रबन्धः नारायणोऽनन्तगुणः इति अस्यार्थस्य प्रतिपादकः । तथा हि यदुक्तं नारायणस्य अनन्तगुणत्वादिकं श्रुत्या युक्त्यापि असीषधदिति तत्र नारायणस्य अखिलकर्तृत्वादेः प्रत्यर्थिभूतं निरीश्वरसाङ्ख्यमतं अनूद्य दूषयति- **प्रधानमित्यादिना** ॥ यत् यस्मात् कारणात् प्रधानं प्रधानाख्यं तत्त्वं परिणामि परिणामः विकारः अस्यास्तीति परिणामि विकारि तस्मात् अपराधीनकारणं स्वतन्त्रकारणं किमिव पयोवत् क्षीरमिव 'पयः पानीयदुग्धयोः' इति भास्करः । 'परिणामो विकारः स्यात् समे विकृतिविक्रिये' इत्यमरः । अयमत्रानुमानप्रयोगप्रकारः - 'प्रधानं स्वतन्त्रकारणं भवितुमर्हति कुतः परिणामित्वात् यत्परिणामि तत् स्वतन्त्रकारणं पयोवत्' इति । अत्र कारणत्वमात्रसाधने कुलालादौ सिद्धसाधनता स्यात्, अतः स्वतन्त्रमिति विशेषणम् । यथा क्षीरं अनन्याधीनमेव विकृत्या दधिभावं लभते तथा स्वतन्त्रमेव प्रधानं जगदाकारेण परिणमते इति भावः 'इति चेत् तर्हि निदर्शने दृष्टान्ते साध्यवैकल्यं साध्यस्य वैकल्यं राहित्यं स्यात् । अत्र प्रधानं पक्षः स्वतन्त्रकारणत्वं साध्यं परिणामित्वं हेतुः । दृष्टान्ते स्वतन्त्रकारणत्वरूपं साध्यं नास्ति । 'एतेन ह वाव पयोमण्डं भवति' 'न ऋते त्वत्क्रियते किञ्चनारे' 'द्रव्यं कर्म च कालश्च' इत्यादिना क्षीरदधिभावस्य विष्ण्वधीनत्वाङ्गीकारात् । एवं दृष्टान्तस्य साध्यवैकल्याख्यदोषापत्तिः इति भावः ॥ ९ ॥

विवादाध्यासिता सृष्टिश्चेतनेच्छानुसारिणी ।
सृष्टित्वात् पटसृष्टिर्वेत्यनुमा पक्षसाधिका ॥ १० ॥

पदार्थदीपिकोद्बोधिका – एवं परिणामित्वानुमानस्य दृष्टान्ते साध्यवैकल्योक्त्या प्रतिपक्षे दूषितेऽपि स्वपक्षे साधकोपन्यासेन विना स्वसिद्धान्तप्रतिष्ठाया असिद्धत्वादुपन्यासः कर्तव्यः तत्र सत्यप्यागमे अनुमानेन प्रत्यवतिष्ठमानं परं प्रति तदुपन्यास एव न्याय्य इत्यनुमानोपन्यासमेव करोति- **विवादेत्यादिना** ॥ विवादं विप्रतिपत्तिविषयत्वं अध्यासिता आरोपिता विवादाध्यासिता स्वतन्त्रजडाधीनेति चेतनाधीनेति च वादिप्रतिवादिविप्रतिपत्तिविषयीभूत इत्यर्थः । सृष्टिः जगत्सृष्टिः चेतनेच्छानुसारिणी चेतनेच्छाधीना सृष्टित्वात् पटसृष्टिवत् । 'वा विकल्पोपमानयोः' इत्यमरः । इति एवं अनुमा व्याप्त्यादिवदनुमा पक्षसाधिका अस्माकमिति शेषः ॥ १० ॥

मन्दोपकारिणी –एवं परिणामित्वानुमानस्य दृष्टान्ते साध्यवैकल्योक्त्या परपक्षे दूषितेऽपि साधकप्रमाणोपन्यासेन विना स्वसिद्धान्तप्रतिष्ठायाः दुर्लभत्वात् तदुपन्यासः कर्तव्यः, सत्यप्यागमेऽनुमानेन प्रत्यवतिष्ठमानं परं प्रति तदुपन्यासः एवोचितः इति अनुमानमेव उपन्यस्यति- **विवादेत्यादिना** ॥ विवादाध्यासिता चेतनाधीना वा जडाधीना वा इति विप्रतिपत्तिं अध्यासिता आरूढा विमतिविषयेति यावत्, सृष्टिः जगत्सृष्टिः चेतनेच्छानुसारिणी चेतनस्य इच्छायाः अनुसारिणी सृष्टित्वात् पटसृष्टिर्वा पटस्य सृष्टिवत् 'इव यद्वा यथा शब्दाः उपमानार्थवाचकाः' इति दण्डी । इति एवं व्याप्त्यादिमती अनुमा अनुमानं पक्षसाधिका पक्षस्य अस्मत्सिद्धान्तस्य साधिका ॥ १० ॥

यच्चेतनाचेतनयोरङ्गाङ्गित्वादि मन्वते ।
सृष्टावीशानपेक्षायां तन्न शोभनतां व्रजेत् ॥ ११ ॥

भावप्रकाशिका – आदिशब्देनेश्वराङ्गीकारेऽपि तत्तदीश्यत्वेनाङ्गीकारश्चार्वाकस्य अचेतनव्यतिरिक्तचेतनाङ्गीकारश्च वेदितव्यः । ईशानपेक्षायामित्यादिनाऽर्थतोऽनीश्वरवादिनो भाट्टादयश्च निरस्यन्ते ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – निरीश्वराः सेश्वरा इति द्विविधाः साङ्ख्याः । तत्र निरीश्वराः केचित् केवलादेव जडात् सृष्टिं आचक्षते, केचित् चेतनाचेतनयोः अङ्गाङ्गिभावत्वं

आचक्षते। तत्र केवलाचेतनस्य स्रष्टृत्वं निराकृत्य चेतनाचेतनयोः अङ्गाङ्गिभावेन स्रष्टृत्वं निराकरोति– **यदित्यादिना** ॥ सृष्टौ जगत्सृष्टिविषये चेतनो जीवः स च अचेतनः प्रधानं तयोः यदङ्गमुपसर्जनं अङ्गि मुख्यं तयोर्भावौ अङ्गाङ्गित्वे त आदिः यस्य तदङ्गाङ्गित्वादि मन्वते अङ्गीकुर्वन्ति । चेतनाचेतनयोः अङ्गाङ्गित्वं नाम चेतनस्य उपसर्जनत्वं अचेतनस्य प्रधानत्वं यथा आम्लसंयोगात्परिणम्य दध्याख्यं कार्यं उत्पादयदपि क्षीरं आम्लसंयोगे यथा पुरुषव्यापारं अपेक्षते । एवं कार्यं उत्पादयदपि जडं प्रधानतत्त्वं चेतनानुग्रहं अपेक्षत इति मन्वत इत्यर्थः । तदेवं तैरङ्गीकृतं प्रमेयं ईशानपेक्षायां सत्यां शोभनतां विवेकिभिः अङ्गीकारार्हतां न व्रजेत् । तथा हि, चेतनाचेतनयोः अन्योन्यं संसृष्टयोरेव ह्यङ्गाङ्गिभावेन कर्तृत्वं वक्तव्यं तत्रान्योन्यसंसर्गाख्यं आदिकार्यं चेतनापेक्षं, जडमेव न उत्पादयेत् केवलाचेतनस्य कार्यानुत्पादकत्वाङ्गीकारात् अन्यथा कार्यान्तरेऽपि तत्प्रसङ्गात् । एवं चेतनस्याप्यचेतनानुग्रहापेक्षायां अन्योन्याश्रयप्रसङ्गात् । तस्मात् चेतनाचेतननियामक-स्वतन्त्रेश्वराङ्गीकारे तयोः अन्योन्यप्रत्यासत्तेरेव असम्भवात् निरीश्वरसाङ्ख्यमतं अशोभनम् । अङ्गाङ्गित्वादि इत्यत्र आदिशब्देन अचेतनव्यतिरिक्तचेतनं अनङ्गीकुर्वतो भूतचतुष्टयारब्धं सर्वं कार्यं अभ्युपगच्छतः चार्वाकस्य मतमपि अशोभनं इत्युक्तं भवति । तेनैव आदिशब्देन ईश्वरमभ्युपगच्छतामपि सेश्वरसांख्यादीनामप्यशोभनं इति च वेदितव्यम् ॥ ११ ॥

मन्दोपकारिणी – साङ्ख्याः द्विविधाः निरीश्वराः सेश्वराः इति । तत्र निरीश्वराः केचित् केवलादेव जडात् सृष्टिमाचक्षते । केचित् चेतनाचेतनयोः अङ्गाङ्गिभावेन स्रष्टृत्वं आचक्षते । तत्र केवलाचेतनस्य स्रष्टृत्वं निराकृत्य चेतनाचेतनयोः अङ्गाङ्गिभावेन स्रष्टृत्वं निराकरोति **यदित्यादिना** ॥ चेतनाचेतनयोः अङ्गाङ्गित्वादिनाम चेतनस्य अङ्गत्वं उपसर्जनत्वं अप्रधानत्त्वं अचेतनस्य अङ्गित्वं प्रधानत्वम् । यथा आम्लसंयोगात् परिणामि दध्याख्यं कार्यं उत्पादयदपि अचेतनं क्षीरं आम्लसंयोगे चेतनपुरुषव्यापारमपेक्षते । एवं सर्वकार्ये उत्पादयदपि जडं चेतनानुग्रहं अपेक्षते । एवं सति सृष्टौ जगत्सृष्टिविषये चेतनाचेतनयोः चेतनं जीवाश्च अचेतनं प्रधानं च तयोः यत् अङ्गाङ्गित्वादि अङ्गं उपसर्जनं अङ्गित्वं मुख्यत्वं तयोर्भावः अङ्गाङ्गित्वं तदेव आदि यस्य तत् अङ्गाङ्गित्वादि मन्वते अङ्गीकुर्वन्ति । 'मनु अवबोधने इत्यतो लट् आत्मनेपदं मनुते मन्वाते मन्वते' । तत् ईशानपेक्षायां ईशस्य ईश्वरस्य अनपेक्षायां सत्यां अपेक्षाभावे सति स्वतन्त्रेश्वरस्य अनङ्गीकारे इत्यर्थः । शोभनतां विवेकिभिः अङ्गीकारार्हतं न व्रजेत् न प्राप्नुयात् । तथा हि,

चेतनाचेतनयोः अन्योन्यं संसृष्टयोः एव हि अङ्गाङ्गिभावेन कर्तृत्वं वक्तव्यम् । तयोः अन्योन्यसंसर्गाख्यं आदिकार्यं चेतनानपेक्षं, केवलं जडमेव नोत्पादयेत् केवलाचेतनस्य कार्यानुत्पादकत्वाङ्गीकारात्, अन्यथा कार्यान्तरेऽपि तत्प्रसङ्गः । एवं चेतनेऽपि अचेतनानुग्रहापेक्षायां अन्योन्याश्रयप्रसङ्गः । तस्मात् चेतनाचेतननियामकस्वतन्त्रेश्वरानङ्गीकारे तयोः अन्योन्यप्रत्यासत्तेरेव असम्भवात् साङ्ख्यमतं अशोभनम् । अङ्गाङ्गित्वादीत्यत्र आदिशब्देन चेतनव्यतिरिक्ताचेतनं अङ्गीकुर्वतः सर्वं कार्यं पृथिव्यादिभूतचतुष्टयारब्धं इति प्रतिपादयतः चार्वाकस्य मतमपि अशोभनमेव इत्युक्तं भवति । तेनैव आदिशब्देनेश्वरमुपगच्छतामपि सेश्वरसाङ्ख्यानां मतं अशोभनं इति वेदितव्यम्। तदङ्गीकृतेश्वरस्य सर्वकर्तृत्वसर्वज्ञत्वाद्यभावात् इति भावः । तच्च न विश्वकृत् पशुपतिरित्यादिना वक्ष्यते । ईशानपेक्षायां इत्यनेन निरीश्वरभाट्टप्राभाकरादिमतमपि अशोभनमित्युक्तं भवति ॥ ११ ॥

सर्वविन्निर्मितं सर्वं कादाचित्कत्वहेतुतः ।
न यदेवं नो तदेवं यथात्मेतीश्वरानुमा ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – ननु ईश्वरसिद्धौ प्रमाणाभावात् कथं तदङ्गीकारो युक्तः । वेदः प्रमाणं तत्सद्भाव इति चेन्न । तदप्रामाण्यवादिनं प्रति तेन तत्साधनायोगात् । नापि प्रत्यक्षमत्र प्रमाणम् । तस्य अतीन्द्रियत्वाङ्गीकारात् । न च अनुमानं मानं सर्वज्ञेश्वरान्तराभावेन निदर्शनाभावात् । अत एव अप्रसिद्धविशेषणत्वम् । तस्मात् ईश्वरस्य अप्रामाणिकत्वाच्च कथं अनीश्वरमतं अशोभनं स्यात् इत्याशङ्क्य नायं दोषः केवलव्यतिरेक्यनुमानेन ईश्वरसिद्धेरित्याह– ॥ **सर्वविदित्यादिना** ॥ सर्वं समस्तकार्यजातं सर्वविन्निर्मितं सर्वज्ञेन निर्मितं कदाचित् विद्यमानं कादाचित्कं तस्य भावः कादाचित्कत्वं तदेव हेतुः तस्मादिति ततः कादाचित्कत्वात् अभूत्वाभावित्वादित्यर्थः । यद्धस्तु सर्वविन्निर्मितं न भवति तत् कादाचित्कमपि न भवति यथा आत्मा इत्येवं ईश्वरानुमा अस्मत्पक्ष ईश्वरसाधकानुमानं अस्तीति शेषः ॥ १२ ॥

मन्दोपकारिणी –नन्वीश्वरसद्भावे प्रमाणाभावात् कथं ईश्वराङ्गीकारो युक्तः । वेदाः प्रमाणं ईश्वरसद्भावे इति चेन्न । वेदाप्रामाण्यवादिनं प्रति वेदेन ईश्वरसाधनायोगात् । नापि प्रत्यक्षं अत्र प्रमाणं, ईश्वरस्य अतीन्द्रियत्वाङ्गीकारात् । नाप्यनुमानं सर्वेश्वरान्तराभावेन

दृष्टान्ताभावात् । अत एव अप्रसिद्धविशेषणत्वात् तस्मात् ईश्वरस्य अप्रामाणिकत्वाच्च कथं अनीश्वरमतं अशोभनमित्याशङ्क्य, नायं दोषः केवलव्यतिरेक्यनुमानेनैव ईश्वरसिद्धेः इत्याह- **सर्वविदिति** ॥ सर्वं समस्तकार्यजातं सर्वविन्निर्मितं सर्वं वेत्तीति सर्ववित् तेन सर्वज्ञेन ईश्वरेण निर्मितं उत्पादितं, कादाचित्कत्वहेतुतः कदाचित् विद्यमानं कादाचित्कं तस्य भावः कादाचित्कत्वं तदेव हेतुः तस्मादिति ततः कादाचित्कत्वरूपहेतोः अभूत्वा-भावित्वादित्यर्थः । यत् यद्वस्तु एवं सर्वविन्निर्मितं न न भवति तत् एवं कादाचित्कमपि नो न भवति, यथा आत्मा जीवः । इति एवं ईश्वरानुमा अस्मत्पक्षे ईश्वरस्य साधिका अनुमा अनुमानं अस्तीति अध्याहारः ॥ १२ ॥

बलाय सर्वानुमानां वेदाः स्युर्यैरपालिताः ।
कामादेताः प्रवर्तन्ते कामिन्य इव भर्तृभिः ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – यदुक्तं वेदप्रामाण्याभावात् न तेन ईश्वरसिद्धिरिति तदभ्युपगम्य केवलव्यतिरेक्यनुमानं ईश्वरसिद्धौ प्रमाणमित्यभिधाय इदानीं प्रामाण्य-मनङ्गीकृत्य केवलानुमानेन अभिलषितप्रमेयसिद्ध्यङ्गीकारे अतिप्रसङ्गः स्यादित्याह— **बलायेत्यादिना** ॥ वेदाः सर्वानुमानां समस्तानुमानानां बलाय प्राबल्याय स्युः भवेयुः वेदानुकूल्ये सत्येव अनुमानेन अतीन्द्रियधर्मादितत्तदभिलषितप्रमेयसिद्धिर्भवति नान्यथेत्यर्थः । कुत इत्यत आह— यैरिति ॥ यैर्वेदैः अपालिता अननुगृहीता एता अनुमा कामात् तत्तद्वादिनां इच्छानुसारात् कामिन्यः स्वैरिण्यः स्वाभिलषितभर्तृभिरिव प्रवर्तन्ते । अयं भावः । स्वस्वभर्तृभिः अनियताः स्वैरिण्यो यथा स्वाभिलषितकामिभिः सह वर्तन्त एवं वेदैरनियता अनुमा अपि तत्तद्वादिनां इच्छानुसारेण प्रवर्तन्ते । तस्मात् वेदसाहाय्य-व्यरहितानां तासां न प्रामाण्यमिति । तथा च उक्तं 'श्रुतिसाहाय्यरहितं अनुमानं न कुत्रचित् । निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च' इति । तस्मात् वेदप्रामाण्यं अवश्यमङ्गीकार्यमेव इति वेद एव ईश्वरसिद्धौ प्रमाणमिति ॥ १३ ॥

मन्दोपकारिणी –यदुक्तं वेदप्रामाण्याभावात् न तेन ईश्वरसिद्धिरिति तदभ्युपगमेन ईश्वरसिद्धौ केवलव्यतिरेक्यनुमानं प्रमाणमित्यभिधाय इदानीं वेदप्रामाण्यं अङ्गीकृत्य केवलानुमानमात्रेण अभिलषितप्रमेयसिद्ध्यङ्गीकारेऽतिप्रसङ्गः स्यात् इत्याह- **बलायेति** ॥

वेदाः सर्वानुमानां बलाय प्राबल्याय स्युः वेदानुकूल्ये सत्येव अनुमानेन अतीन्द्रिय-धर्मादितत्तदभिलषितप्रमेयसिद्धिर्भवति नान्यथा इत्यर्थः । कुतः वेदैः अपालिताः अननुगृहीताः एताः अनुमाः कामात् तत्तद्वादिप्रतिवादिनां इच्छानुसारेण प्रवर्तन्ते । का इव भर्तृभिः स्वस्वपतिभिः अपालिताः अनियमिताः कामिन्यः स्त्रिय इव । अयं भावः स्वस्वभर्तृभिः अनियमिताः स्वैरिण्यो यथा स्वस्वाभीष्टकामिभिः प्रवर्तन्ते एवं वेदैः अननुगृहीता अनुमा अपि तत्तद्वादिनां इच्छानुसारेण प्रवर्तन्ते । तस्मात् वेदसहाय्यरहितानां अनुमानां अप्रामाण्यमिति । तच्चोक्तं 'श्रुतिसाहाय्यरहितं अनुमानं न कुत्रचि'दिति । तस्मात् वेदप्रामाण्यं अङ्गीकर्तव्यमेव इति वैदिकेश्वरसद्भावे प्रमाणमिति भावः ॥ १३ ॥

कारणं परिणामि स्याद् ब्रह्म नो चेतनत्वतः ।
न यदित्थं नो तदित्थं यथा क्षीरपुरस्सरम् ॥ १४ ॥

भावप्रकाशिका – कारणमित्यादिना भास्करादयः ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – भास्करादयः केचिद्वादिनो ब्रह्मैव जगदाकारेण परिणमत इति वर्णयन्ति तन्मतं अपाकरोति— **कारणमिति** ॥ ब्रह्म परिणामो विकारोऽस्यास्तीति परिणामि कारणं न स्यात् परिणामित्वेन कारणं न भवितुं अर्हतीत्यर्थः । कुत इत्यत आह— चेतनत्वत इति । चेतनत्वतः चेतनत्वात् । यद्वस्तु इत्थं परिणामिकारणं न भवतीति न तद्वस्तु इत्थं चेतनमिति नो न भवति । क्षीरं पुरस्सरं आदिः यस्य तत्क्षीर-पुरस्सरं वस्तु यथा । इत्थमत्र प्रयोगः । ब्रह्म परिणामिकारणं न भवति चेतनत्वात् यत् परिणामिकारणं तत् अचेतनं यथा क्षीरादिकं, न तथा च इदं अचेतनं तस्मात् न परिणामिकारणमिति । अत्र ब्रह्म कारणं न भवति इत्युक्ते ब्रह्मणः सर्वकारणत्वा-भ्युपगमविरोधः स्यात्, तस्मात् परिणामिकारणं न भवतीति साध्यनिर्देशः कृतः ॥ १४ ॥

मन्दोपकारिणी –भास्करादयः केचन वादिनो ब्रह्मैव जगदाकारेण परिणमते इति वर्णयन्ति । तन्मतमपाकरोति- **कारणमित्यादिना** ॥ ब्रह्म परिणामि विकारि कारणं नो स्यात् परिणामित्वेन कारणं भवितुं नार्हति । कुतः चेतनत्वतः चेतनत्वात् । यत् वस्तु इत्थं परिणामिकारणं न भवतीति न तत् वस्तु इत्थं चेतनमिति नो न भवति क्षीरपुरस्सरं दुग्धादि यथा । इत्थमत्र प्रयोगः 'ब्रह्म परिणामिकारणं न भवति चेतनत्वात्

यत्परिणामिकारणं तदचेतनं यथा क्षीरादिकं, न तथा च इदं अचेतनं तस्मात् परिणामिकारणं न भवति' । इति तत्र ब्रह्म कारणं न भवतीत्युक्ते ब्रह्मणः सर्वकारणत्वाभ्युपगमविरोधः तस्मात् परिणामीति साध्यविशेषणप्रक्षेपः ॥ १४ ॥

न विश्वकृत् पशुपतिः श्रूयमाणागुणत्वतः ।
चैत्रवत्किं पुनर्विघ्नब्रध्नाद्या बालशङ्किताः ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – यदुक्तं ब्रह्माख्यो नारायणो विश्वकर्तेति तदयुक्तम् । पशुपतिगणपतिस्कन्दसूर्यादीनां एव विश्वकर्तृत्वप्रतिपादकतत्तदागमनिरुद्धत्वादित्याशङ्क्य परिहरति— **न विश्वकृदित्यादिना** ॥ पशूनां प्रजानां पतिः पशुपती रुद्रः विश्वकृत् सर्वकर्ता न भवति । कुत इत्यत आह- श्रूयमाणागुणत्वतः श्रूयमाणाः 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं, 'यं कामये तं तमुग्रं कृणोमि' इत्यादि वेदवाक्येषु प्रतिपाद्यमाना अगुणा दुःखित्वपारतन्त्र्यादिदोषाः तद्वत्त्वेन। क इव चैत्रवत् विश्वकर्तृत्वं दुर्घटम् । किं वक्तव्यम्। विघ्नेशादीनामिति भावेनाह- किं पुनरिति । बालैरविवेकिभिः शङ्किता जगत्कर्तृत्वेन शङ्किता विवेकं विना बाहुल्येन आपाततः प्रतीत्यनुसारेण श्रुत्यर्थं निश्चयं कुर्वद्भिः तत्तद्वादिभिः सर्वकर्तृत्वादिगुणवत्त्वेन अनिश्चिता इत्यर्थः । विघ्नो विनायकः ब्रध्नः सूर्यस्तावाद्यौ येषां स्कन्दादीनां ते तथोक्ता देवाः किं पुनर्विश्वकर्तृत्वादिगुणवन्तो न भवन्तीति वक्तव्यम् । अनेन यदुक्तं नारायणस्य सर्वकर्तृत्वं पाशुपताद्यागमविरुद्धमिति तदयुक्तं, श्रुतिप्रसिद्धदुःखित्वपारतन्त्र्यादिदोषयुक्तपशुपत्यादीनामेव स्वातन्त्र्येण विश्वकर्तृत्वप्रतिपादक पाशुपताद्यागमानां दोषशङ्काकलङ्करहितश्रुतिविरोधेन अप्रामाण्यमित्युक्तं भवति ॥ १५ ॥

मन्दोपकारिणी –यदुक्तं ब्रह्माख्यो नारायणो विश्वकर्ता इति तदयुक्तं पशुपतिगणपतिस्कन्दसूर्यादीनां एव विश्वकर्तृत्वप्रतिपादकतत्तदागमविरुद्धत्वादित्याशङ्क्य परिहरति ॥ **न विश्वकृदिति** ॥ पशुपतिः रुद्रः 'शंभुरीशः पशुपतिः' इत्यमरः, विश्वकृत् विश्वस्य समस्तकार्यजातस्य कृत् कर्ता न । कुतः श्रूयमाणागुणत्वतः 'सोऽरोदीद्यदरोदीद्रुद्रस्य रुद्रत्वं' 'यं कामये तं तमुग्रं कृणोमि' इत्यादिवेदवाक्येषु श्रूयमाणाः अगुणाः गुणविरुद्धाः दोषाः दुःखित्वपारतन्त्र्यादयः यस्य सः तस्य भावः तत्वं तस्मात् इति ततः

श्रूयमाणदोषत्वात् इत्यर्थः । क इव चैत्रवत् । यदा एवं पशुपतेरपि दुःखपारतन्त्र्यादि-दोषवत्त्वेन विश्वकर्तृत्वं दुर्घटं तदा किमुत वक्तव्यं विघ्नेशादीनां इति भावेनाह ॥ किं पुनः इति ॥ बालशङ्किताः बालैः अविवेकिभिः विवेकं विना बाहुल्येन आपाततः स्वप्रीत्यनुसारेण श्रुत्याद्यर्थनिश्चयं कुर्वद्भिः इत्यर्थः । 'मूर्खेऽर्भकेऽपि बालः स्यात्' इत्यमरः । शङ्किताः तत्तद्वादिभिः सर्वकर्तृत्वादिगुणवत्त्वेन समर्थिताः तथात्वं अनिश्चिताश्च इत्यर्थः । विघ्नब्रध्नाद्याः विघ्नः विनायकः ब्रध्नः सूर्यः विघ्नब्रध्नौ आद्यौ येषां ते विघ्नब्रध्नाद्याः स्कंदादयः । किं पुनः विश्वकर्तृत्वादिगुणवन्तो न भवन्तीति किं वक्तव्यं 'भास्कराहस्कर-ब्रध्नाः' इत्यमरः । नारायणस्य सर्वकर्तृत्वं पाशुपताद्यागमविरुद्धमिति यदुक्तं तदयुक्तम् । श्रुतिप्रसिद्धपारतन्त्र्यादिदोषवतः पशुपत्यादेः स्वातन्त्र्येण विश्वकर्तृत्वप्रतिपादकपाशुपता-द्यागमानां दोषशङ्काकलङ्करहितश्रुतिविरोधेन अप्रामाण्यादिति उक्तं भवति ॥ १५ ॥

ननु सौख्यादिमान् नेशो दुःखादिरहितत्वतः ।
यो नैवं स्यात् स नैवं स्याद्यथा संसृतिमानिति ॥ १६ ॥

भावप्रकाशिका – नन्वित्यादिता वैशेषिकादयः । 'सौख्यादिमान्' इत्यादिशब्देन क्रिया ग्राह्या 'दुःखादि' इत्यानेनारतिः ॥ १६ ॥

पदार्थदीपिकोद्बोधिका – यदुक्तं नारायणोऽनन्तगुण इति नारायणस्य सुखाद्य-नन्तगुणत्वं तदसहमाना वैशेषिकाः प्रत्यवतिष्ठन्त इति भावेन तावत् तन्मतं अनुवदति— **नन्वित्यादिना** ॥ नन्वित्याक्षेपे ईशः भवद्भिः सौख्याद्यनन्तगुणत्वेन अङ्गीकृतो नारायणाख्य ईशः सुखमेव सौख्यं तदादिः येषां ते सौख्यादयस्त अस्य सन्तीति सौख्यादिमान् सुखादिविशिष्ट इत्यर्थः । न, न भवति दुःखादिरहितत्वतः दुःखं आदिः येषां ते दुःखादयः तैः रहितः तस्य भावः तत्वं तस्मादिति ततः, दुःखादिरहितत्वात् इत्यर्थः । य एवं न स्यात् सौख्यादिरहितो न स्यात् स एवं न स्यात् दुःखादिरहितो न स्यात् संसृतिमान् संसारवान् यथा तथा इत्यर्थः । विमत ईश्वरः सुखादिरहितः दुःखादिरहितत्वात्, यः सुखादिरहितो न भवति स दुःखादिरहितो न भवति यथा संसारी, न च अयं दुःखादिमान् तस्मात् न सुखादिमान् इत्यापादनं वा । सौख्यादीत्य-त्रादिशब्देन क्रियादयो गृह्यन्ते । दुःखादीत्यत्र च आदिशब्देन अज्ञानादयो गृह्यन्ते इत्यनुमानविरुद्धत्वात् नारायणस्य सौख्याद्यनन्तगुणवत्वं न युज्यत इति भावः ॥ १६ ॥

मन्दोपकारिणी –यदुक्तं नारायणोऽनन्तगुण इति सुखाद्यनन्तगुणवत्त्वमसहमानाः वैशेषिकादयः प्रत्यवतिष्ठन्तीति भावेन तावत् तन्मतं अनुवदति- **ननु इत्यादिना** ॥ ननु इत्याक्षेपः । ईशः सौख्याद्यनन्तगुणवत्त्वेन अङ्गीकृतो नारायणाख्यः सौख्यादिमान् सौख्यं सुखमेव आदि येषां ते सौख्यादयो गुणाः ते अस्य सन्तीति सौख्यादिमान् सुखाद्यनन्त-गुणविशिष्ट इत्यर्थः । न न भवति दुःखादिरहितत्वतः दुःखाज्ञानादिरहितत्वात् यः पुरुषः एवं सौख्यादिरहितः न स्यात् सः एवं दुःखादिरहितः न स्यात् यथा संसृतिमान् संसारी यथेत्यर्थः । अयमत्र प्रयोगः 'विमतः ईश्वरः सुखादिरहितः दुःखदिरहितत्वात् यः सुखादिरहितो न भवति स दुःखादिरहितो न भवति यथा संसारी चेतनः, न च अयं सुखादिरहितः तस्मात् दुःखादिरहितो न भवति' इति । अथवा 'यदि ईशः सौख्यादिमान् स्यात् तर्हि दुःखादिमानपि स्यात् यथा संसारी, न च अयं दुःखादिमान् तस्मात् न सुखादिमान्' इत्यापादनं वा इति हेतोः अनुमानविरुद्धत्वात् नारायणस्य सौख्याद्यनन्त-गुणवत्त्वं न युक्तं इति आक्षेपः ॥ १६ ॥

एवं चेद्भिमतो ज्ञानी न भ्रान्तिरहितत्वतः ।
य एवं नो स एवं नो भवीवेत्यनुमीयते ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – इति परोक्तानुमानं प्रत्यनुमानेन दूषयति— **एवञ्चेदि-त्यादिना** ॥ एवं चेत् दुःखादिरहितत्वानुमानस्य पक्षधर्मताबलात् अनेन अनुमानेन ईश्वरस्य श्रुत्यादिसिद्धमपि सुखादिमत्त्वं निवार्यते चेत् वयमपि पक्षधर्मादिमता केवलानुमानेन तत्तद्वादिभिः सर्वज्ञतया अङ्गीकृतस्येश्वरस्य ज्ञानित्वमात्रमपि दुर्घटमिति साधयामः इति भावः । विमतः वादिप्रतिवादिनोः सर्वज्ञत्वासर्वज्ञत्वाभ्यां विप्रतिपत्तिविषय ईश्वरः ज्ञानं अस्यास्तीति ज्ञानी न भवति भ्रान्तिरहितत्वतः भ्रान्त्या भ्रमज्ञानेन रहितस्तस्य भावः तत्त्वं तस्मात् भ्रान्तिज्ञानशून्यत्वादिति भावः । य एवं न स्यात् ज्ञानरहितो न स्यात् स एवं न स्यात् भ्रान्तिज्ञानशून्योऽपि न स्यात् । भवः संसारोऽस्यास्तीति भवी स इव संसारी यथेत्यर्थः । इत्यनुमीयते अस्माभिरिति शेषः । श्रुतिसिद्धमपि ईश्वरस्य सुखादिमत्वं केवलानुमानेन निवार्यते चेत् तादृशानुमानेन ईश्वरस्य ज्ञानमात्रशून्यत्वमपि साधयितुं शक्यत इत्यभिप्रायः ॥ १७ ॥

मन्दोपकारिणी –एवं परोक्षानुमानं प्रत्यक्षानुमानेन दूषयति- ॥ **एवं चेदिति** ॥ एवं चेत् दुःखादिरहितत्वानुमानेन ईश्वरस्य सुखादिमत्वं निवार्यते चेत् तर्हि विमतः सर्वज्ञत्वासर्वज्ञत्वाभ्यां विप्रतिपत्तिविषयः ज्ञानी ज्ञानवान् न न भवति कुतः भ्रान्ति-रहितत्वतः भ्रान्त्या विपरीतज्ञानेन शून्यत्वात् । यः एवं ज्ञानरहितः नो न भवति सः एवं भ्रान्तिशून्योऽपि नो न भवति भवीव भवः संसारः अस्यास्तीति भवी संसारीव इति ईश्वरस्य अज्ञत्वं अस्माभिः अनुमीयते । यदि ईश्वरस्य सुखाभावः साध्यते तर्हि ज्ञानाभावोऽपि मया साध्यते अविशेषात् इत्याशयः ॥ १७ ॥

सर्वज्ञस्याज्ञतां वेदः श्रद्धेयो निरुणद्धि चेत् ।
तस्यैवामन्दमानन्दं वदन्नाश्राव्यसौ कथम् ॥ १८ ॥

भावप्रकाशिका – 'यः सर्वज्ञः सर्ववित्' 'आनन्दं ब्रह्मण' इत्यादिर्वेदः ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – नन्वेवं केवलानुमानेन ईश्वराज्ञत्वसाधनमयुक्तम् । 'यः सर्वज्ञः सर्ववित्' इतीश्वरस्य सर्वज्ञत्वप्रतिपादकवेदविरुद्धत्वात् । वेदस्य प्रमाणतमत्वञ्च भवद्भिरपि अङ्गीकृतमेव । तथा च भ्रान्तिरहितत्वहेतुः कालात्ययापदिष्ट इत्याशङ्क्य एवं चेत् दुःखादिरहितत्वहेतुरपि कालात्ययापदिष्टः स्यादिति भावेन परानुमानमपि प्रतिबन्ध्या प्रतिक्षिपति— **सर्वज्ञस्येत्यादिना** ॥ श्रद्धेयः प्रमाणत्वेन आदरणीयो वेद ईश्वरस्य सार्वज्ञ्य-प्रतिपादकः । 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' इत्यादिवेदः सर्वज्ञस्य वेदेन सर्वज्ञ-त्वेनावधारितेश्वरस्य अज्ञतां चेद्यदि रुणद्धि निवारयति तर्हि तस्यैव 'यः सर्वज्ञ' इति श्रुति-विषयस्यैव ईश्वरस्य अमन्दं परिपूर्णं आनन्दं वदन् असौ 'आनन्दं ब्रह्मणो विद्वान्, न बिभेति कुतश्चन, 'आनन्दो ब्रह्मेति व्यजानात्, को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' इति वेदः कथं केन प्रकारेण नाश्रावि त्वया न श्रुतः । यदि यः सर्वज्ञ इत्यादिश्रुतिबलेन त्वयेश्वरस्याज्ञत्वं निवार्यते तर्हि आनन्दं ब्रह्मणो विद्वान् इत्यादेरपि श्रुतित्वाविशेषात् तयैव श्रुत्या प्रमितं ईश्वरस्य सुखित्वमपि न निराकर्तुं उचितमिति भावः ॥ १८ ॥

मन्दोपकारिणी –ननु केवलानुमानेन ईश्वरस्य अज्ञत्वसाधनं न युज्यते 'यः सर्वज्ञः स सर्ववित्' इत्यादि ईश्वरसर्वज्ञत्वप्रतिपादकवेदवाक्यविरुद्धत्वात् । वेदवाक्यप्रामाण्यन्तु भवद्भिः

अङ्गीकृतमेव । तथा च भ्रान्तिरहितत्वहेतुः बाधितः इत्याशङ्क्य तर्हि दुःखादिरहित-त्वहेतुरपि बाधित एवेति भावेन परानुमानमपि प्रतिक्षिपति ॥ **सर्वज्ञस्येति** ॥ श्रद्धेयः प्रमाणत्वेन आदरणीयः वेदः ईश्वरस्य सर्वज्ञत्वप्रतिपादकः 'यः सर्वज्ञः स सर्ववित्' इत्यादिरूपो वेदः सर्वज्ञस्य सर्वज्ञत्वेन अवधारितस्य ईश्वरस्य अज्ञतां अज्ञानित्वं निरुणाद्धि निवारयति चेत् तर्हि तस्यैव यः सर्वज्ञ इत्यादिश्रुतिविषयस्यैव ईश्वरस्य अमन्दं परिपूर्णं आनन्दं सुखं वदन् प्रतिपादकः असौ 'आनन्दं ब्रह्मणो विद्वान्' इत्यादिवेदः कथं त्वया नाश्रावि न श्रुतः । यदि 'यः सर्वज्ञ' इत्यादिश्रुतिबलेन त्वया ईश्वराज्ञत्वं निवार्यते तर्हि आनन्दं ब्रह्मणो विद्वान् इत्यादेरपि श्रुतित्वाविशेषात् तयैव श्रुत्या प्रतीतं ईश्वरस्य सुखित्वमपि न निराकर्तुमुचितमिति भावः । 'रुधिर् आवरणे इत्यस्मात् लट् परस्मैपदं रुणद्धि रुन्धः रुन्धन्ति' 'श्रु श्रवणे इत्यस्मात् कर्मणि लुङ् आत्मनेपदं अश्रावि अश्राविषातां अश्राविषत' ॥ १८ ॥

दुःखं परिजिहीर्षन् यः सुखं नाङ्गीचिकीर्षति ।
स हन्तापतितं दुःखमीशस्य व्यस्मरज्जडः ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – ननु कथं ईश्वरस्य सुखं अङ्गीकारार्हम् । सुखित्वे दुःखित्वापातात् । तथा हि विमतः चैत्रः दुःखी सुखित्वात् यथा मैत्र इति व्याप्तेः प्रमितत्वात् 'आनन्दं ब्रह्मण' इत्यादिश्रुतेश्च दुःखाभाव एवार्थः । एवं च ब्रह्मणो दुःखाभावातिरिक्तभावरूपसुखसद्भावे प्रमाणाभावान् कथं ईश्वरः सुखादिरहितः दुःखादि-रहितत्वात् इत्यनुमानस्य कथं कालात्ययापदिष्टतेत्याशङ्क्य परिहरति— **दुःखमित्यादिना** ॥ दुःखं परिजिहीर्षन् परिहर्तुमिच्छत् यो वादी तार्किकः सुखं दुःखाभावातिरिक्तं भावरूपं सुखं नाङ्गीचिकीर्षति नाङ्गीकर्तुमिच्छति । जडोऽविवेकी स अङ्गीकर्तुमनिच्छताप्यङ्गीकार्यतया प्राप्तमीशस्य दुःखं व्यस्मरत् विस्मृतवान् । हन्त आश्चर्यम् । अस्य मौढ्यं इति यावत् । अयमत्राभिप्रायः – ईश्वरस्य चेतनत्वेन काचिद्विप्रतिपत्तिः चेतनस्य च सुखदुःखयोरन्योन्य-तराविनाभावे नियमो दृष्टो देवदत्तादौ, विमतो देवदत्तः सुखदुःखयोरन्यतराविना-भूतश्चेतनत्वात् यः सुखदुःखयोरन्यतराविनाभूतो न भवति 'नासौ चेतनो भवति यथा घट इत्यनुमानात् 'सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखमि'त्यागमात्, सर्वेषामनु-भवाच्चेश्वरस्य चेतनत्वात्सुखदुःखयोरन्यतराविनाभूतत्वं अभ्युपगन्तव्यम् । तत्र च

सुखित्वानभ्युपगमे दुःखित्वं बलादापतति । तदभ्युपगमाद्वरमीश्वरस्य निर्दुःखानन्दाभ्युपगम इति । तथा च यदुक्तं सुखित्वे दुःखित्वापातात् न ईश्वरः सुखी तस्य परमानन्दत्वश्रुतिस्तु दुःखाभावविषयेति दुःखादिरहितानुमानस्य कथं कालात्ययापदिष्टतेति तदसत् ॥ १९ ॥

मन्दोपकारिणी –ननु सुखं ईश्वरस्य कथं अङ्गीकारार्हं, सुखित्वे दुःखित्वापातात्। तथा हि विमतः ईश्वरः दुःखी सुखित्वात् यः सुखी स दुःखी यथा संसारी इति व्याप्तेः प्रमितत्वात् । आनन्दं ब्रह्मण इत्यादिश्रुतेश्च दुःखाभाव एवार्थः स्यात् । एवं च ब्रह्मणो दुःखाभावातिरिक्तभावरूपसुखसद्भावे प्रमाणाभावात् कथं दुःखादिरहितत्वानुमानस्य कालात्ययापदिष्टतेत्याशङ्क्य परिहरति ॥ **दुःखमिति** ॥ ईशस्य ईश्वरस्य दुःखं परिजिहीर्षन् परिहर्तुमिच्छन् यः सुखं दुःखाभावातिरिक्तं सुखं नाङ्गीचिकीर्षति अङ्गीकर्तुं नेच्छति जडः अविवेकी 'जडोऽज्ञे एडमूकस्तु' इत्यमरः । सः आपतितं अङ्गीकर्तुमनिच्छतापि अङ्गीकार्यतया प्राप्तं ईश्वरस्य दुःखं व्यस्मरत् विस्मृतवान् । हन्त आश्चर्यं, अत्यमौढ्यमिति यावत् । अयमत्र अभिप्रायः । ईश्वरस्य चेतनत्वे न काचित् विप्रतिपत्तिः चेतनस्य च सुखदुःखयोः अन्यतराविनाभावो दृष्टः देवदत्तादौ । विमतो देवदत्तः सुखदुःखयोः अन्यतराविनाभूतः चेतनत्वात् यः सुखदुःखयोरन्यतराविनाभूतो न भवति नासौ चेतनो भवति यथा घटः इत्यनुमानात् । सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखमित्यागमात्, सर्वेषां अनुभवाच्च । तस्मात् ईश्वरस्य चेतनत्वात् सुखदुःखयोरन्यतराविनाभूतत्वं अवश्यं अभ्युपगन्तव्यम् । तत्र ईश्वरस्य सुखाभावाभ्युपगमे दुःखित्वं च बलात् आपततीति तदभ्युपगमात् ईश्वरस्य निर्दुःखानन्दाभ्युपगम एव युक्त इति । तथा च यदुक्तं सुखित्वे दुःखित्वापातात् न ईश्वरः सुखी । तस्य आनन्दश्रुतिस्तु दुःखाभावपरा । अतः दुःखादिरहितत्वानुमानस्य कथं कालात्ययापदिष्टतेति तदसदित्युक्तं भवति ॥ १९ ॥

यो दुःखसमवायोऽयं चैत्रे तेन ह्यभेदवान् ।
समवायः कश्चिदीशे तदनेकत्वमन्यथा ॥ २० ॥

भावप्रकाशिका – तदनेकत्वं समवायस्यानेकत्वम् ॥ २० ॥

पदार्थदीपिकोद्बोधिका – एवं ईश्वरः सुखादिरहितः दुःखरहितत्वात् इत्यनुमानस्य कालात्ययापदिष्टतां व्युत्पाद्य पररीत्या असिद्धिमपि व्युत्पादयति— **यो दुःखसमवाय**

इत्यादिना ॥ चैत्रे वर्तमानो योऽयं दुःखसमवायः तेन चैत्रवर्तिना दुःखसमवायेन, अभेदोऽस्यास्तीति अभेदवान्, कश्चित् समवायः ज्ञानादिसमवायः ईशेऽपि वर्तते । हि यस्मात् तस्मादीशोऽपि दुःखसमवायवान् स्यादिति शेषः । ततश्च दुःखी स्यात् । न हि दुःखसमवायसत्वातिरिक्तं चैत्रेऽपि विद्यते । अयं भावः । चैत्र इति संसार्युपलक्षणं, संसारिणि तावद्विप्रतिपन्नो दुःखसमवायो वर्तते । ईश्वरे च ज्ञानेच्छादिसमवायः, तयोश्च समवाययोरभेद इति वैशेषिकादिसिद्धान्तः । तथा चोक्तं– 'समवायस्तु सम्बन्धो नित्यः स्यादेक एव स' इति । ततश्च दुःखसमवायवान् संसारी यथा न दुःखरहितः, तथा दुःखसमवायात् अभिन्नसमवायवत्वादीशोऽपि न दुःखरहितः तस्मात् दुःखादिरहितत्वानुमानस्य असिद्धत्वात् न तेन ईश्वरसौख्यादिराहित्यं साधयितुं शक्यत इति। ननु भवेत् एतदेवं, यदि संसारिणि वर्तमानदुःखादिसमवायस्य ईश्वरे वर्तमानज्ञानेच्छादिसमवायस्य च अभेदः स्यात् स एव नाङ्गीक्रियत इत्यत आह— तदित्यादि । अन्यथा, तयोः समवाययोः भेदाङ्गीकारे तदनेकत्वं तस्य समवायस्यानेकत्वं स्यादिति शेषः । ततश्च सर्वगतस्य नानाप्रतियोगिकस्यापि समवायस्यैकत्वं अभ्युपगच्छतां तेषां तदनेकत्वाङ्गीकारे अपसिद्धान्तः स्यादिति भावः ॥ २० ॥

मन्दोपकारिणी –एवं दुःखादिरहितत्वानुमानस्य कालात्ययापदिष्टतां व्युत्पाद्य असिद्धतामपि व्युत्पादयति- **य इति** ॥ चैत्रे संसारिणि चेतने वर्तमानः यः अयं प्रसिद्धः दुःखसमवायः दुःखस्य समवायसंबन्धः तेन चैत्रवर्तिना दुःखसमवायेन अभेदवान् ऐक्यवान् कश्चित्समवायः ज्ञानेच्छादिसमवायः ईशेऽपि वर्तते । हि यस्मात् तस्मात् ईशोऽपि दुःखसमवायवान् । ततश्च दुःखी स्यात् । न हि स्वसमवायातिरिक्तं दुःखित्वं चैत्रे वर्तते । अयं भावः । संसारिणि तावदविप्रतिपन्नो दुःखसमवायो वर्तते ईश्वरेऽपि ज्ञानादिसमवायोऽस्ति। तयोश्च समवाययोः अभेद इति वैशेषिकसिद्धान्तः । तथा चोक्तं 'समवायस्तु सम्बन्धो नित्यः स्यात् एक एव सः' इति । ततश्च दुःखसमवायवान् संसारी यथा न दुःखरहितः तथा दुःखसमवायानतिरिक्तसमवायवान् ईशोऽपि न दुःखरहितः तस्मात् दुःखादिरहितत्वानुमानस्य असिद्धत्वात् न तेन ईश्वरस्य सौख्यादिराहित्यं साधयितुं शक्यमिति । ननु भवेत् एतत् यदि संसारिणि वर्तमानस्य दुःखसमवायस्य ईश्वरे वर्तमानस्य ज्ञानेच्छादिसमवायस्य च अभेदः स्यात्, स एव नाङ्गीक्रियते इत्यत आह- तदिति ॥

अन्यथा तयोः समवाययोः भेदाङ्गीकारे तदनेकत्वं तस्य समवायस्य अनेकत्वं स्यात् तदङ्गीकारे तु अपसिद्धान्तः स्यात् इति भावः ॥ २० ॥

औपाधिकोऽस्य भेदश्चेत् सत्योऽसत्यः स्विदुच्यताम् ।
तद्वयं चोक्तदोषं हि मायिवन्मा वदेत्परम् ॥ २१ ॥

भावप्रकाशिका – सत्यश्चेत्तदनेकत्वमसत्यश्चेत्समवायैक्यादि स दुःखमित्युक्तदोष-द्वयम् । परं सदसद्विलक्षणं स्वव्याहतम् ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – नन्वनेकवृत्तिसमवायस्य एकत्वेऽपि चैत्रमैत्रादीनामुपाधि-सम्बन्धात् औपाधिकभेदोऽङ्गीक्रियत एव । तस्मात् यद्यपि एक एव समवायः तथापि यश्चैत्रदुःखसमवायो नासौ ईश्वरेऽस्ति यथा खलु सर्वगतस्याकाशस्य एकत्वेऽपि तस्य घटाद्यनेकोपाध्यवच्छेदेन घटाकाशो मठाकाश इति भेदव्यवहारः । तत्राकाशभेदाभावेऽपि यथा पूर्वोक्तव्यवहारः एवं समवायस्य एकत्वेऽपि चैत्रमैत्राद्युपाधीनां भिन्नत्वाच्चैत्रगतो दुःखसमवायो न ईश्वरेऽस्ति, ईश्वरगतो नित्यज्ञानादिसमवायो न चैत्र इति समवायस्य औपाधिकभेदाङ्गीकारात् कथमीश्वरस्य दुःखसमवायः स्यात्कथञ्च दुःखरहितत्वानुमानस्य असिद्धिरित्याशङ्क्य परिहरति—॥ **औपाधिक इत्यादिना** ॥ अस्य समवायस्य उपाधिना प्राप्त औपाधिकः भेदश्चेत् यद्यङ्गीक्रियते तर्हि इदं पृच्छामीति शेषः । किमित्यत आह— सत्य इति । स औपाधिकभेदः सत्यः स्वित् ? परमार्थतः किं? असत्यः स्वित् अपारमार्थिको वा ? मिथ्या वा इत्यर्थः उच्यतां, एवं अस्माभिः पृष्टेन त्वया त्वदभिलषितार्थोऽभिधीयताम् । कस्मिन् सति किं स्यादित्यत आह– तदिति । तद्वयं तत्पक्षद्वयं उक्तौ दोषौ यस्य पक्षद्वयस्य तदुक्तदोषम् । तथा हि औपाधिकस्यापि समवायभेदस्य पारमार्थिकत्वे समवायानेकत्वं वास्तवं स्यात् । तथा च अपसिद्धान्तः स्यादिति भावः । असत्यश्चेत् नास्ति भेद इत्युक्तं भवति। तथा च यश्चैत्रगतो दुःखसमवायः स एव ईश्वरेऽपीति कथमसौ दुःखादिरहितः स्यात्। दुःखसमवायवतोऽपि दुःखराहित्ये चैत्रस्यापि किं न स्यात् अविशेषादित्युक्तदोषं तत्पक्षद्वयमिति भावः । ननु सत्यासत्यपक्षातिरिक्ततृतीयपक्षाङ्गीकारात्कथं पक्षद्वयोक्तदोषसञ्चारः तत्रेत्याशङ्क्य तन्न भवतीत्याह— मायिवदिति । मायिवत् सदसद्विलक्षणं नाम पक्षान्तरं मा वद,

सदसद्विलक्षणमिति स्वव्याहतभाषणं मायिनामेव भूषणम् । न तु तार्किकंमन्यस्य वैशेषिकस्येति भावः । एवं तृतीयपक्षासम्भवात् पक्षद्वये चोक्तदोषानिस्तारात् समवायभेदासम्भवेन ईश्वरस्यापि दुःखसमवायित्वात् न दुःखादिरहितत्वमिति न तेन ईश्वरस्य सौख्यादिराहित्यसाधनं सङ्गच्छत इति सर्वेश्वरस्य भगवतः सौख्याद्यनन्तगुणाकरत्वं युक्तं इति स्थितमेतत् ॥ २१ ॥

मन्दोपकारिणी – नन्वेकवृत्तिसमवायस्य एकत्वेऽपि चैत्रमैत्रादिनानोपाधिसम्बन्धात् औपाधिको भेदो अङ्गीक्रियत एव तस्मात् यद्यपि चैत्रे दुःखसमवायोऽस्ति तथापि नासौ ईश्वरेऽस्ति । यथा खलु सर्वगताकाशस्य एकत्वेऽपि तस्य घटमठाद्यनेकोपाध्यवच्छेदेन घटाकाशो मठाकाश इति भेदव्यवहारः । एवं समवायस्य एकत्वेऽपि चैत्राद्युपाधीनां भिन्नत्वात् चैत्रगतो दुःखसमवायो नेश्वरेऽस्ति । ईश्वरगतो नित्यज्ञानादिसमवायव्यवहारो न चैत्रे इति समवायस्य औपाधिकभेदाङ्गीकारात् । तेन कथं ईश्वरे दुःखसमवायः स्यात् , कथं वा दुःखरहितत्वानुमानस्यासिद्धिः इत्याशङ्क्य परिहरति ॥ **औपाधिक इति** ॥ अस्य समवायस्य औपाधिको भेदः सत्यः स्वित् पारमार्थिकसत्यो वा ? असत्यः स्वित् अपारमार्थिको वा ! मिथ्या वा इत्यर्थः, 'स्वित् प्रश्ने च वितर्के च' इत्यमरः । उच्यतां एवं अस्माभिः पृष्टेन समवायस्य औपाधिकभेदं अङ्गीकुर्वता त्वया त्वदभिलषितार्थः अभिधीयताम् । 'वचेः कर्मणि लोट्' । कस्मिन् सति किं स्यात् इत्यत आह तदिति ॥ तद्द्वयं तयोः पक्षयोः द्वयं च उक्तदोषं हि उक्तौ दोषौ यस्य तदुक्तदोषम् । तथा हि औपाधिकस्यापि समवायभेदस्य पारमार्थिकत्वे समवायानेकत्वं वास्तवं स्यात् । तथा च अपसिद्धान्तः स्यादिति भावः । असत्यश्चेत् नास्ति भेद इत्युक्तं भवति । तथा च यश्चैत्रगतो दुःखसमवायः स एव ईश्वरेऽपि इति तत्कथं असौ ईश्वरः दुःखादिरहितः स्यात् । दुःसमवायेऽपि दुःखराहित्यं चैत्रस्यापि किं न स्यात् अविशेषादित्युक्तदोषं तत्पक्षद्वयमिति भावः । ननु सत्यासत्याख्यपक्षद्वयातिरिक्तस्य तृतीयपक्षस्याङ्गीकारात् कथं पक्षद्वयोक्त-दोषसञ्चारः तत्रेत्याशङ्क्य तत् न भवतीत्याह मायीति ॥ मायिवत् मायावादिवत् परं सदसद्विलक्षणं नाम पक्षान्तरं मा वदेत् न ब्रूयात्। सदसद्विलक्षणमिति स्वव्याहतभाषणं मायिनामेव भूषणं न तु तार्किकंमन्यमानस्य वैशेषिकस्येत्यभिप्रायः । एवं तृतीयपक्षासम्भवात् पक्षद्वयोक्तदोषानिस्तारात् समवायभेदासम्भवेन ईश्वरस्यापि दुःखसमवायित्वात् न दुःखरहितत्वादिकमिति तेन ईश्वरस्य सौख्यादिराहित्वसाधनं न सङ्गच्छते इति सर्वेश्वरस्य भगवतः सौख्यादिगुणवत्वं युक्तं इति स्थितं एतत् ॥ २१ ॥

ब्रूयुरौपाधिकं भेदं ज्ञानादीनां यदात्मनः ।
नीत्याऽनया तन्निरासात् स्यात् तस्यानन्तधर्मिता ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – एवं समवायस्य औपाधिकभेदनिरासेन अन्यच्च तन्मनीषितं प्रमेयं निरस्तं इत्याह— **ब्रूयुरित्यादिना** ॥ आत्मनः ज्ञानं आदिः येषां ते ज्ञानादयः तेषां ज्ञानेच्छाप्रयत्नादिगुणानामित्यर्थः । उपाधिना प्राप्तं औपाधिकं उपाधिनिमित्तकं भेदं ब्रूयुरिति यत् अनया नीत्या समवायस्य औपाधिकभेदनिरासयुक्त्या तन्निरासात् तस्य औपाधिकभेदस्य निरासात् अन्ततः परिशेषात् भेदस्यैव वास्तवत्वे सति तस्य परमात्मनः अनन्ता धर्मा यस्य सोऽनन्तधर्मा तस्य भावोऽनन्तधर्मता अनन्तगुणता स्यात् । अयं भावः अस्ति तावदात्मगुणानां भेदः तस्य चोक्तप्रकारेण औपाधिकत्वासम्भवात् स्वाभाविकत्वं अनिच्छताप्यङ्गीकार्यम् । तस्मात् आत्मनोऽनन्तगुणता स्यादिति ॥ २२ ॥

मन्दोपकारिणी – एवं समवायस्य उपाधिभेदनिरासेन अन्यच्च तन्मनीषितं प्रमेयं निरस्तमित्याह ॥ **ब्रूयुरिति** ॥ आत्मनः परमात्मनः ज्ञानादीनां ज्ञानेच्छाप्रयत्नादीनां गुणानां औपाधिकं उपाधिनिमित्तकं भेदं ब्रूयुः इति यत् अनया नीत्या समवायस्य औपाधिकभेदनिरासयुक्त्या तन्निरासात् तस्य औपाधिकभेदस्य निरासात् निराकरणात् ततः परिशेषात् भेदस्यैव वास्तवत्वे इति तस्य आत्मनः अनन्तधर्मिता अनन्तगुणवत्वं स्यात् । अयं भावः । अस्ति तावदात्मगुणानां भेदः इत्यङ्गीकारः । तस्य च भेदस्य उक्तप्रकारेण औपाधिकत्वासम्भवात् स्वाभाविकत्वं अनिच्छतापि अङ्गीकार्यं प्राप्तं तस्मात् आत्मनः अनन्तगुणता स्यादिति ॥ २२ ॥

गुणादिभेदे सम्बन्धमपेक्ष्याप्यनवस्थितेः ।
विशेषमात्रेणानन्त्यं गुणानां शोभते विभोः ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – यच्चान्यदुच्यते वैशेषिकेण अवयवावयविनोः क्रियाक्रियावतोः जातिव्यक्त्योः विशेषनित्यद्रव्ययोश्च सम्बन्धः समवाय इति, तच्च न घटत इत्याह— **गुणादीत्यादिना** ॥ गुणादिभेदे गुणादीनां गुण्यादिभ्यो भेदे अङ्गीक्रियमाणे सम्बन्धं अपेक्ष्य भेदिनोर्गुणगुणिनोर्भेदस्य च मिथः सम्बन्धं अपेक्ष्य चाप्यनवस्थितेः । गुणगुणिनोर्भेदो न युज्यत इति भावः । तथा हि गुणगुणिनौ भिन्नौ इत्यत्र विशेष्यभूतयोः गुणगुणिनोः

विशेषणभूतस्य भेदस्य च मिथो भेदोऽङ्गीकार्यः । अन्यथा विशेष्यविशेषणभावासम्भवात् । अस्य भेदस्य गुणादीनां भेदिनां च मिथो भेदः अस्त्येव अन्यथा ईश्वरस्य गुणित्वासम्भवात्। गुणानामेव मिथो भेदाभावे तेषां आनन्त्यासम्भवाच्च । तस्मात् गुणादिभेदाङ्गीकारे अनवस्थाप्रसङ्गो भवतामपि सम इत्याशङ्क्य परिहरति— विशेषमात्रेणेति । भवेदेवमनवस्था, यदि वयं ईश्वरस्य तद्गुणानाञ्च भेदमङ्गीकुर्मः न च एवं, किं तर्हि ईश्वरस्य तद्गुणानां च अभेदवादिनोऽपि वयं विशेषमङ्गीकुर्मः । विशेषो नाम भेदहीने वस्तुनि भेदनिमित्तानेकव्यवहारहेतुभूतः । तथा च उक्तं— 'भेदहीने त्वपर्याय-शब्दान्तरनियामकः । विशेषो नाम कथितः साऽस्ति वस्तुष्वशेषत' इति । तस्माद्भेदानङ्गीकारेऽपि विशेषमात्राङ्गीकारात् विशेषमात्रेण विभोः व्याप्तस्य नारायणस्य गुणानां आनन्त्यं शोभते । मात्रशब्दो भेदानङ्गीकारद्योतकः विशेषबलादेव आनन्दादीनां गुणत्वमीश्वरस्य च गुणित्वं तयोः भोज्यभोक्तृभावश्च गुणानामानन्दादीनां विशेषबलादेव आनन्त्यमपि घटत इति भावः ॥ २३ ॥

मन्दोपकारिणी – यच्चान्यदुच्यते वैशेषिकैः अवयवावयविनोः गुणगुणिनोः क्रिया-क्रियावतोः जातिव्यक्त्योः विशेषनित्यद्रव्ययोश्च सम्बन्धः समवाय इति तच्च निरस्तमित्याह ॥ **गुणादीति** ॥ गुणादिभेदे गुणानां गुण्यादिभ्यो भेदे अङ्गीक्रियमाणे सतीति शेषः । सम्बन्धं अपेक्ष्यापि भेदिनः गुणगुणिनोर्भेदस्य च मिथः सम्बन्धं अपेक्ष्यापि अनवस्थितेः गुणगुणिनोः भेदो न युज्यते इति भावः । तथा हि गुणगुणिनौ भिन्नौ इत्यत्र विशेष्यभूतयोः गुणगुणिनोः विशेषणभूतस्य भेदस्य च मिथो भेदोऽङ्गीकार्यः, अन्यथा विशेषण-विशेष्यभावासम्भवात् । तस्य भेदस्य गुणादीनां च मिथो भेदः इति भेदपरंपरया अनवस्थितिरेव इति । ननु भवतां पक्षे गुणगुणिनोः गुणानां च मिथो भेदः अस्त्येव अन्यथा ईश्वरस्य गुणित्वासम्भवात् । गुणानामेव मिधो भेदाभावे तेषां आनन्त्यासम्भवाच्च गुणगुणिभेदाङ्गीकारेऽनवस्थाप्रसङ्गः भवतामपि समानः इत्याशङ्क्य परिहरति-विशेषमात्रेणेति ॥ भवेदेवं अनवस्था अस्मन्मते यदि वयं ईश्वरस्य तद्गुणानां च भेदं अङ्गीकुर्मः किं तर्हि ईश्वरस्य तद्गुणानां च अभेदवादिनो वयं विशेषं अङ्गीकुर्मः । विशेषो नाम भेदहीने वस्तुनि भेदनिमित्तानेकव्यवहारहेतुभूतः । तथा चोक्तं 'भेदहीने त्वपर्यायशब्दान्तरनियामकः । विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेषतः' इति तस्मात् भेदानाङ्गीकारेऽपि विशेषमात्रा-ङ्गीकारात् तेन विशेषमात्रेण विभोः व्याप्तस्य नारायणस्य गुणानां आनन्त्यं शोभते ।

मात्रशब्दो भेदानङ्गीकारद्योतकः । विशेषबलादेव आनन्दादीनां गुणत्वं ईश्वरस्य गुणित्वं आनन्दादीनां भोग्यत्वं भगवतश्च भोक्तृत्वं तेषां आनन्दादिगुणानां मिथो भेदाभावेऽपि विशेषबलादेव आनन्त्यमपि घटते इति भावः ॥ २३ ॥

मन्यन्ते शून्यमेवान्ये तत्त्वमागमवैरिणः ।
मता माध्यमिकास्तेऽपि व्यक्ताश्छन्ना इति द्वये ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – इदानीं अप्राकृतभगवद्गुणानां आनन्त्यं असहमानानां शून्यवादिनां मायावादिनाञ्च परापरप्रमेययोः विशेषाभावेन मायिनामेव शून्यवादित्वं उपपादयितुं तावत् शून्यवादिविभागमाह— **मन्यंत इत्यादिना** ॥ अन्ये वैशेषिकादिभ्योऽन्ये आगमवैरिणः वेदादिसदागमद्वेषिणः माध्यमिका बौद्धैकदेशिनः अन्यमेव तत्त्वं अबाधितवस्तु मन्यते ते तु शून्यमेव परतत्वमिति मन्यमाना बौद्धैकदेशिनश्च व्यक्ताः स्पष्टाः छन्नाः प्रच्छन्नाः इति द्वये द्विविधा मताः । विज्ञानवादिनः शून्यवादिनः क्षणिकवादिनश्चेति त्रिविधा बौद्धाः । तत्र शून्यवादिनोऽपि द्विविधाः स्पष्टशून्यवादिनः प्रच्छन्नशून्यवादिनश्चेति । तत्र प्रच्छन्नशून्यवादिनो मायावादिन इति भावः ॥ २४ ॥

मन्दोपकारिणी – इदानीं प्रकृतभगवद्गुणानन्त्यमसहमानानां शून्यवादिनां मायवादिनां च परस्परं प्रमेययोः विशेषाभावेन मायिनामेव शून्यवादित्वमुपपादयितुं तावत् शून्यवादिविभागमाह ॥ **मन्यन्ते इत्यादिना** ॥ अन्ये वैशेषिकादिभ्योऽन्ये आगमवैरिणः आगमस्य वेदादिसच्छास्त्रस्य वैरिणः 'आगमस्त्वागतौ शास्त्रे' इति भास्करः । माध्यमिकाः बौद्धाः शून्यमेव तत्त्वं मन्यन्ते अङ्गीकुर्वन्ति । 'मनु अवबोधने लट्' । तेऽपि शून्यवादिनोऽपि बौद्धाः व्यक्ताः स्पष्टाः छन्नाः प्रच्छन्नाः इति द्वये द्विविधाः मताः कीर्तिताः । प्रच्छन्नशून्यवादिनो मायावादिनः ॥ २४ ॥

शून्यं ब्रह्माह्वयेनाहुः स्वांश्च वेदान्तिनोऽभ्यधुः ।
अतत्त्वावेदकं वेदं वदन्तश्चरमे खलाः ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – ननु ब्रह्मवादिनां मायावादिनां कथं शून्यवादित्वं, वेदान्तिनां तेषां आगमवैरित्वञ्च कथमित्यत आह— **शून्यमित्यादिना** ॥ मन्त्र, ब्राह्मण,

उपनिषद्भेदेन, त्रिविधो हि वेदः । तत्र च मन्त्र-ब्राह्मणात्मको वेदो ब्रह्मव्यतिरिक्त-कर्माप्रतिपादकत्वात् अतत्त्वावेदकप्रमाणमिति मायिनो वदन्ति । उपनिषद्भागश्च तत्त्वावेदक-प्रमाणमिति । एवञ्च वेदं मन्त्रब्राह्मणात्मकं वेदभागं अतत्त्वावेदकं तत्त्वस्य सत्यस्य आवेदको न भवतीति तं, वदन्तः मन्त्रब्राह्मणात्मको वेदः प्रमाणमपि तत्त्वं पारमार्थिकं ब्रह्मस्वरूपं न आवेदयतीति अतत्त्वावेदकप्रमाणमिति वदन्त इति भावः । अत एव खलाः । मुख्यतः सकलवेदवेद्यस्य ब्रह्मणो वेदैकदेशेन अवेद्यत्वाङ्गीकारादेव खला इत्यर्थः । चरमे अन्तिमा 'व्यक्ता छन्ना इति द्वय' इत्यत्र पश्चादुद्दिष्टाः प्रच्छन्नशून्यवादिनो मायावादिन इत्यर्थः । शून्यं ब्रह्मेत्याह्वयो ब्रह्माह्वयस्तेन ब्रह्मेति नाम्नेत्यर्थः आहुर्वदन्ति । शून्यवादिनो निराकारं निर्विशेषं यच्छून्यं यत्परतत्वमाहुः तस्मात् शून्यात् विशेषरहितं परतत्त्वं ब्रह्मेत्याहुः इत्यर्थः । अनेन नामभेदमात्रेणैव भेदो न वस्तुभेद इत्युक्तं भवति । स्वान् आत्मनश्च वेदान्तिनः तन्नामकानभ्यधुः प्रोचुः । शून्यवादिनां शून्यस्य मायिनां ब्रह्मणश्च न कश्चन विशेषः इत्युभयेऽपि शून्यवादिन इत्यर्थः ॥ २५ ॥

मन्दोपकारिणी – ननु ब्रह्मवादिनां कथं शून्यवादित्वं वेदान्तिनां तेषां आगमवैरित्वं च कथं इत्यत आह ॥ **शून्यमिति** ॥ वेदं मन्त्रब्राह्मणात्मकं वेदं अतत्त्वावेदकं तत्त्वं ब्रह्मस्वरूपं आवेदयति प्रतिपादयति इति तत्त्वावेदकं तन्न भवतीति अतत्त्वावेदकं वदन्तः वेदः ब्रह्मप्रतिपादको नेति वदन्त इत्यर्थः । वेदवेद्यस्य भगवतः वेदवेद्यत्वानङ्गीकारादेव खलाः दुष्टाः चरमे व्यक्ताः छन्ना इति द्वये इत्यत्र पश्चादुद्दिष्टाः प्रच्छन्नबौद्धाः मायावादिनः शून्यं ब्रह्माह्वयेन ब्रह्मेति आह्वयेन नाम्ना आहुः वदन्ति । शून्यवादिनः निर्विशेषवच्छून्यं तत्त्वमित्याहुः मायावादिनः तस्मात् शून्यात् विशेषरहितं परतत्त्वं ब्रह्म इत्याहुः इत्यर्थः । अनेन शब्दमात्रेणैव भेदः वस्तुतो न भेदः इत्युक्तं भवति । स्वांश्च आत्मनश्च वेदान्तिनः वेदान्तिनामकानभ्यधुः उक्तवन्तः । 'डु धाञ् इति धातोः लुङ् परस्मैपदं अधात् अधातां अधुः' । वेदस्य अतत्त्वावेदकत्वोक्त्या वेदस्य मिथ्याभूतार्थप्रतिपादकत्वाङ्गीकारात् मायावादिनां आगमवैरित्वं निर्विशेषशून्यसदृशब्रह्माख्यतत्त्वाङ्गीकाराच्छून्यवादित्वं च उक्तं भवति ॥ २५ ॥

परतत्त्वविवर्तत्वादपरस्याखिलस्य च ।
अविशेषत्वतश्चास्य नान्तरन्तरमेतयोः ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – एवं शून्यवादिनां मायावादिनां च परतत्त्वविषये विवादाभावं उपपाद्य अपरतत्वेऽपि विवादाभावमाह— ॥ **परतत्वेति** ॥ अखिलस्य समस्तस्य अपरस्य भूभूधरादिनानाप्रपञ्चाख्यस्य अपरतत्त्वस्य च परतत्त्वविवर्तत्त्वात् परतत्त्वस्य विवर्तः अतात्विकोऽन्यथाभावः तस्य भावः तत्त्वं तस्मात् परतत्वोपादानकत्वादित्यर्थः । शून्यवादिनो यथा शून्योपादानकं जगदिति ब्रूयुः तथा मायावादिभिः ब्रह्मोपादानकं जगदित्यङ्गीकृतं, तस्मात् अपरतत्त्वे न विवाद इति भावः । ननु शून्यब्रह्मणोर्विशेषसद्भावात् कथमपरतत्त्वे न विवाद इत्याशङ्क्य भवेदयं यदि ब्रह्मणः शून्यात् कश्चन विशेषः स्यात् । न च असौ अस्ति । तथात्वे ब्रह्मणो निर्विशेषत्वभङ्गादित्याह- अविशेषत्वतश्चेति । अस्य ब्रह्मणः न विद्यते विशेषो यस्य तदविशेषं तस्य भावः तत्त्वं तस्मात् शून्याद्विशेषरहितत्वादित्यर्थः । एतयोः मतयोः अन्तरा विचार्यमाणे सति अन्तरं भेदो नास्ति, एतयोः ब्रह्मशून्ययोरिति वा ॥ २६ ॥

मन्दोपकारिणी – एवं शून्यवादिनां मायिनां च परतत्त्वविषये विवादाभावमुपपाद्य अपरतत्त्वविषयेऽपि विवादाभावमाह ॥ **परतत्त्वेति** ॥ अखिलस्य समस्तस्य अपरस्य वियदादिप्रपञ्चरूपस्य अपरतत्त्वस्य च परतत्त्वविवर्तत्वात्परतत्त्वं ब्रह्म तत् विवर्तं उपादानं यस्य तत् तस्य भावः तत्त्वं तस्मात् परतत्त्वोपादानत्वादित्यर्थः । शून्यवादिनोऽपि यथा शून्योपादानकं जगदिति ब्रूयुः तथा मायावादिनोऽपि ब्रह्मोपादानकं जगदित्यङ्गीकुर्वन्ति, तस्माद्धेतोः इति भावः । किं च अस्य ब्रह्मणः अविशेषत्वतः शून्याद्विशेषरहितत्वाच्चेत्यर्थः। एतयोः मतयोः ब्रह्मशून्ययोर्वा अन्तः मध्ये 'अन्तर्मध्ये तथा प्रान्ते' इति धनञ्जयः । अन्तरं भेदः नास्ति 'अन्तरं तु परीधानभेदे रन्ध्रावकाशयोः' इति विश्वः ॥ २६ ॥

अखण्डखण्डनन्यायानखण्डमपि खण्डयन् ।
अखण्डयदखण्डज्ञो द्वयांश्चाखण्डलद्विषः ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – एवं मतद्वयस्य साम्यात् तन्निराकरणमपि सममेवाकारीत्याह— **अखण्डेत्यादिना** ॥ अखण्डाः समस्ता ये खण्डनन्यायाः सत्सिद्धान्तनिराकरणन्यायाः तान् मायिशून्यवादिनोः सत्सिद्धान्तनिराकरणाङ्गकुतर्करूपन्यायाभासानिति यावत् । खण्डयन् दूषयन् अखण्डमपि निर्विशेषमपि निर्विशेषत्वेन

अङ्गीकृतपरतत्वमपि इत्यर्थः । खण्डयन् प्रमाणाभावोपपादनेन निराकुर्वन् अखण्डं सर्वं जानातीति अखण्डज्ञः सर्वज्ञ इत्यर्थः । श्रीमध्वः द्वयान् द्विविधांश्च आखण्डलद्विष इन्द्रारीन् अखण्डयत् निराचक्रे ॥ २७ ॥

मन्दोपकारिणी – एवं मतद्वयस्य साम्यमुपपाद्य इदानीं तन्निराकृतवानित्याह ॥ अखण्डेति ॥ अखण्डज्ञः अखण्डं समस्तं जानातीति अखण्डज्ञः सर्वज्ञः पूर्णप्रज्ञाचार्यः अखण्डखण्डनन्यायान् अखण्डाः समस्ताः खण्डनाः स्वसिद्धान्तनिराकरणरूपाश्च ते न्यायाः कुतर्करूपन्यायाभासाश्च तान् स्वसिद्धान्तनिराकरणरूपान् मायिशून्यवादिनोः समस्तन्यायान् अखण्डमपि निर्विशेषत्वेन अङ्गीकृतं परतत्त्वमपि खण्डयन् प्रमाणेन निराकुर्वन् सन् द्वयान् द्विविधान् मायावादिशून्यवाद्याख्यान् आखण्डलद्विषः आखण्डलस्य इन्द्रस्य द्विषः शत्रून् दानवान् अखण्डयत् निराकरोत् 'खडि भेदने इत्यस्मात् लङ् परस्मैपदम्' । 'आखण्डलः सहस्राक्षः' इत्यमरः, 'दनुजेन्द्रारिदानवाः' इति च ॥ २७ ॥

विमतं कारणं न स्यादसत्वान्न यदीदृशम् ।
नेदृशं तद्यथा कुम्भकर्तेत्यत्रानुमीयते ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – यदुच्यते शून्यवादिना शून्यं जगत्कारणमिति तन्निराकरोति— **विमतमित्यादिना** ॥ अङ्गो तापसेत्युत्तरश्लोकस्थं अत्र सम्बध्यते । अङ्गो तापस! हे तापस! हे बौद्ध! विमतं शून्यं कारणं जगत्कारणं न स्यात् । कुत इत्यत आह— असत्वादिति । अत्र व्यतिरेकव्याप्तिं दर्शयति— न यदित्यादिना । यदीदृशं न-अकारणं न, तदीदृशं न-असत् न यथा कुम्भकर्ता कुलाल इत्यत्रानुमीयते । अस्माभिरिति शेषः । विमतं शून्यं कारणं न भवति असत्वात् यत्कारणं तत्सत् यथा कुलालः इति प्रयोगः ॥ २८ ॥

मन्दोपकारिणी – शून्यवादिमतं निराकरोति ॥ **विमतमिति** ॥ विमतं शून्यं कारणं जगत्कारणं न स्यात् , कुतः असत्वात् । यत् ईदृशं कारणं नेति न, कारणं इति यावत् । तत् ईदृशं असत् न, सदिति यावत् । यथा कुम्भकर्ता कुलालः इति अस्माभिः अत्र अनुमीयते । विमतं शून्यं कारणं न भवति असत्वात् यत्कारणं तत् सत् यथा कुम्भकारः इति व्यतिरेक्यनुमानप्रयोगः । 'अनु पूर्वकात् माङ् माने इत्यतो भावे लट् परस्मैपदम्' ॥ २८ ॥

अहो तापस नो शून्यं कारणं कुम्भकर्तृवत् ।
यत् संवृत्युत्थितं विश्वं तत् कारणमितीर्यते ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – शून्यवादी प्रत्यवतिष्ठते ॥ **नो शून्यमित्यादिना** ॥ शून्यं कुम्भकर्तृवत् कुम्भस्य कर्ता तद्वत् कुलालवदित्यर्थः । कारणं जगत्कारणं नो न भवति । शून्यं जगत्कारणं वदन्तोऽपि वयं कुलालादिवत् बाह्योपादानसापेक्षं तत् जगत्कारणं नाङ्गीकुर्म इत्यर्थः । किं तर्हि इत्यत आह— यदित्यादिना । विश्वं जगत् यत्संवृत्युत्थितं यस्य शून्यस्य संवृतिरज्ञानं तया उत्थितं उत्पन्नं दृश्यत इति यावत् । तत् शून्यं कारणमिति ईर्यत उच्यते । अयमभिप्रायः— शुक्तिकायाः शुक्तिकात्वं आपरोक्षेणापश्यतो भ्रान्तस्य यथा तत्र रजतज्ञानं जायते रजतमिदं पुरोवर्तीति । एवमेव शून्यतत्त्वं सम्यगापरोक्षेणोपश्यतां अज्ञानिनां भूभूधरादिनानाप्रपञ्चप्रतीतिर्जायते । एवं च सति शुक्तिकाऽयाथात्म्यज्ञानात्प्रतीयमानस्य रजतस्य शुक्तिका यथा कारणमित्युच्यते, एवं शून्यतत्वापरिज्ञानात् प्रतीयमानस्य प्रपञ्चस्य शून्यं कारणमित्युच्यते न तु शून्यं कुलालादिवत् जगत्कारणमिति ॥ २९ ॥

मन्दोपकारिणी – एवं अनुमानेन शून्यस्य जगत्कारणत्वे दूषिते सति यच्छून्यवादिनोक्तं तदनूद्य दूषयति द्वाभ्यां श्लोकाभ्याम् ॥ **अहो इति** ॥ अहो तापस हे शाक्यमुने 'मुनीन्द्रः श्रीघनः शास्ता मुनिः' इत्यमरकोशे तापसपर्यायमुनिशब्दप्रयोगात् । शून्यं कुम्भकर्तृवत् कुलालवत् कारणं जगत्कारणं नो न भवति । कुलालवत् बाह्योपादानसापेक्षाकारणं न भवतीत्यर्थः, किन्तु विश्वं जगत् यत्संवृत्युत्थितं यस्य शून्यस्य संवृत्याऽज्ञानेन उत्थितं प्रतीतं तत् कारणं इति मया ईर्यते उच्यते । 'ईर गतौ कम्पने च इति धातोः कर्मणि लट् आत्मनेपदम्' ॥ २९ ॥

एवं चेत् कारणं मा स्म ब्रवीः शून्यं कथञ्चन ।
आयुष्मंस्तदधिष्ठानं व्युत्पित्सस्व गुरोर्गृहे ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – तदेतत्सामान्यतोऽनूद्य दूषयति— ॥ **एवञ्चेत्यादिना** ॥ चेत् यदि एवं सम्यक् शून्यतत्त्वापरिज्ञानेन निमित्तेन प्रतीयमानस्य प्रपञ्चस्य शून्यं कारणमित्यभ्युपगमः तर्हि शून्यं कथञ्चन सर्वात्मना कारणं जगत्कारणं मा स्म ब्रवीः । स्वाज्ञानेन

प्रतीयमानस्य प्रपञ्चस्य शून्यं स्वयं कारणमिति मा वद तर्हि किं ब्रूयामित्यपेक्षायामाह— आयुष्मान्निति । शून्यं जगत्कारणमिति वदता त्वया कारणत्वं नाम इत्थमिति तदभिप्रायः सम्यगुक्तमिति हास्यादायुष्मान्नित्युक्तं हे आयुष्मन्! तत् एवं त्वया अङ्गीकृतं शून्यं गुरोर्गृहे अधिष्ठानं व्युप्तित्सस्व व्युत्पत्तुमिच्छ । 'पद गतौ' सन्नन्तात् लोट् । त्वदभ्युपगमप्रकारेण विचार्यमाणे सति अधिष्ठानं सच्छून्यं कारणमिति वदन्, अत एव कारणाधिष्ठानयोः स्वरूपं सम्यक् अजानन् त्वं अथापि कञ्चित्कालं गुरोर्गृहे तिष्ठन् कारणाधिष्ठानयोः स्वरूपं विविच्य ज्ञात्वा पश्चात्कारणलक्षणयुक्तं 'कारण'मिति व्यवहर, अधिष्ठानलक्षणयुक्तमधिष्ठानमिति व्यवहर । एवं अधिष्ठानव्युत्पत्यनन्तरमेव अस्माभिः व्यवहर इति भावः ॥ ३० ॥

मन्दोपकारिणी – एवं चेत् इत्थं वदसि चेत् तर्हि शून्यं स्वयं कारणं जगत्कारणमिति कथञ्चन सर्वथा मा स्म ब्रवीः न वद तर्हि किं ब्रूयात् इत्यत आह- **आयुष्मन् इति** ॥ हे आयुष्मन् चिरञ्जीविन् तत् त्वया अङ्गीकृतं शून्यं अधिष्ठानं वासस्थानं भवति इति अध्याहारः । गुरोः गृहे मन्दिरे व्युत्पित्सस्व व्युत्पत्तुं इच्छस्व ज्ञातुं यतस्व इत्यर्थः । त्वदभ्युपगमप्रकारेण विचार्यमाणे सति तच्छून्यं अधिष्ठानं भवति । अधिष्ठानभूतं शून्यं कारणं इति वदन् त्वं कारणाधिष्ठानयोः स्वरूपं सम्यक् न जानासि । अतः कञ्चित्कालं गुरुगृहे तिष्ठन् कारणाधिष्ठानयोः स्वरूपं जानीहि व्युत्पत्त्यनन्तरमेव आत्मानं व्यवहर इत्यभिप्रायः । अज्ञात्वा व्यवहर्तुः बहुकालजीवनं निरर्थकं इत्यभिप्रायेण आयुष्मन् इति सम्बोधनम् । 'ब्रूञ् व्यक्तायां वाचि इत्यतो लुङ् परस्मैपदम् । न माङ् योगे इत्यडभावः, मा स्म ब्रवीः मा स्म ब्रूतं मा स्म ब्रूत' । 'वि उत् पूर्वात् पत्लृ पतने इत्यतः सन्नन्तात् लोट् आत्मनेपदं व्युत्पित्सस्व व्युत्पित्साथां व्युत्पित्सध्वम्' ॥ ३० ॥

विवादस्य पदं न स्यादधिष्ठानमसत्त्वतः ।
वैधर्म्येणैष दृष्टान्तः शुक्त्यादिवदितीर्यते ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – ननु तर्हि मा भूत् शून्यं कारणमिति, अधिष्ठानमेवास्तु तथापि यथा भ्रान्तिदशायां प्रतीयमानं शुक्तिकाव्यतिरिक्तं रजतं न तात्विकमेवं शून्य-व्यतिरिक्तं जगन्न तात्विकमिति वदतो मम न किञ्चित् अवशिष्टमित्याशङ्क्य शून्यस्याधिष्ठानत्वमपि न घटत अनुमानविरोधादिति भावेनाह—

विवादस्येत्यादिना ॥ विवादस्य विप्रतिपत्तेः पदं विषयभूतं शून्यं अधिष्ठानं न स्यात् कुतः असतो भावोऽसत्वं तस्मादिति ततः । अत्र सपक्षाभावात्कथं व्याप्तिरिति चेत् तत्राह वैधर्म्येणेति । वैधर्म्येण तत्साध्याभावेन साधनाभावेन च सम्प्रतिपन्न एष दृष्टान्त ईर्यते, कथं शुक्त्यादिवदिति । अत्रेत्थमनुमानप्रयोगः विमतं शून्यं जगदारोपाधिष्ठानं न भवति असत्वात् यदारोपाधिष्ठानं तत्सत्, यथा रजताद्यारोपाधिष्ठानशुक्त्यादि इति ॥ ३१ ॥

मन्दोपकारिणी – ननु शून्यं जगदारोपस्य अधिष्ठानमेवास्तु इत्याशङ्क्य शून्यस्य अधिष्ठानत्वमपि न घटते अनुमानविरोधादिति भावेन आह ॥ **विवादस्येति** ॥ विवादस्य विप्रतिपत्तेः पदं विषयभूतं शून्यं अधिष्ठानं न स्यात् कुतः असत्त्वतः असत्त्वात् अत्र सत्पक्षाभावात्कथं व्याप्तिरिति चेत् आह वैधर्म्येणेति ॥ वैधर्म्येण साध्याभावेन साधनाभावेन च सम्प्रतिपन्नः एष दृष्टान्तः ईर्यते कथं शुक्त्यादिवत् इति । 'विमतं शून्यं जगदारोपस्य अधिष्ठानं न भवति असत्त्वात् यत् अधिष्ठानं तत्सत् यथा रजताद्यारोपाधिष्ठानं शुक्त्यादीति' ॥ ३१ ॥

अतत्त्वावेदकं मानमिति स्वव्याहतं यतः ।
तद्वादी तेन वेदस्य सोऽभिप्रैत्यप्रमाणताम् ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – ननु 'परतत्त्वविवर्तत्वादपरस्याखिलस्य च । अविशेषत्वतश्चास्य नान्तरान्तरमेतयो'रिति मायावादिशून्यवादिमतयोर्विशेषो नास्तीति यदुक्तम् । तदसत् । शून्यवादिनां वेदाप्रामाण्यवादित्वान्मायावादिनां तत्प्रामाण्याभ्युपगमात् । इत्थं हि मायावादिनो वदन्ति— मन्त्रब्राह्मणात्मक एको वेदभागः उपनिषदात्मकोऽपरः । तत्राद्यो मिथ्याभूतभेदादिप्रपञ्चविषयत्वादतत्वावेदकप्रमाणम् । द्वितीयस्तु परमार्थभूतब्रह्मविषयत्वात्तत्वावेदकप्रमाणमिति । एवमुभयथा वेदप्रामाण्यवादिनां तेषां मतस्य कथमवैदिकशून्यवादिमताद्विशेषाभाव इत्याशङ्क्य भवेदयं विशेषो मायिमते यद्युक्तप्रकारेण प्रामाण्यं सम्भवेत् । न चैतदस्ति । अतत्वावेदकञ्च प्रमाणञ्चेत्युक्तेर्व्याहतत्वादित्याह— ॥ **अतत्वावेदकमित्यादि** ॥ तत्वस्यावेदकं ज्ञापकं तत्वावेदकं तन्न भवतीति अतत्वावेदकं मानं प्रमाणमिति वचो माता वन्ध्येतिवत् स्वव्याहतम् । यतस्तत्तस्मात्, तद्वादी वेदस्यातत्वावेदकत्ववादी स मायावादी तेन वेदस्यातत्वावेदकत्ववचनेन वेदस्याप्रामाण्यतामभिप्रैति ।

तथा हि— वेदस्यातत्वावेदकत्वं नाम अतत्वस्यायथार्थाकारस्य आवेदकत्वमभिप्रेतम् । एतदेव ह्यप्रामाण्यं नाम । तस्मादतत्वावेदकत्वमित्युक्त्वा पुनस्तस्य प्रमाणत्ववचनं स्वव्याहतम् । तस्मादेवं स्वव्याहतभाषिणः तस्य वेदप्रामाण्यवचनं वैदिकप्रकारकमात्रमेव एवं मायिशून्यवादिनोः वेदाप्रामाण्याभ्युपगमस्तु समान एव मायिनः स्वव्याहतभाषणमधिकम् । तस्माच्छून्यवादिमतान्न मायिमतस्य वैलक्षण्यमिति भावः ॥ ३२ ॥

मन्दोपकारिणी – ननु 'अविशेषत्वतश्चास्य' इत्यत्र उभयोर्मतयोः विशेषो नास्तीति यदुक्तम् । तन्न । शून्यवादिनां वेदाप्रामाण्यवादित्वात् मायावादिनां वेदप्रामाण्याङ्गीकार-सद्भावात् इत्याशङ्क्य तद्रीत्या वेदप्रामाण्यं न सम्भवतीत्याह ॥ **अतत्त्वावेदकमिति** ॥ यतः कारणात् वेदः अतत्त्वावेदकं मानं इति स्वव्याहतं तेन कारणेन तद्वादी वेदस्य अतत्त्वावेदकत्ववादी सः मायावादी वेदस्य अप्रमाणतां अप्रामाण्यं अभिप्रैति अङ्गीकरोति । अयं भावः वेदस्य अतत्त्वावेदकत्वं नाम अतत्त्वस्य अयथार्थाकारस्य आवेदकत्वं ज्ञापकत्वम् । एतदेवाप्रामाण्यं नाम । तस्मात् वेदस्य अतत्त्वावेदकत्वं उक्त्वा पुनः तस्य प्रमाणत्ववचनं स्वव्याहतम् । तस्मादेव व्याहतभाषिणः तस्य वेदप्रामाण्यवचनं जनप्रतारण-मात्रमेव । एवं च उभयोरपि वेदाप्रामाण्यवादित्वं सममेव । मायावादिनस्तु व्याहतभाषित्वं अधिकम् । तस्मादुभयोः मतयोः न वैशेष्यं इति ॥ ३२ ॥

यं तत्त्वावेदकं वेद वेदान्तं वेददूषकः ।
तत्त्वस्यावर्णनीयत्वात् स तत्त्वावेदकः कथम् ॥ ३३ ॥

भावप्रकाशिका – अवर्णनीयं वागविषत्वेन । न हि प्रमेयसम्बन्धरहितं प्रमाणं भवति ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – यदप्युक्तमुपनिषदात्मको वेदभागः परमार्थभूतब्रह्मविषयत्वात् तत्वावेदकं प्रमाणमिति तदपि अशोभनमित्याह— **यमित्यादिना** ॥ वेददूषक उक्तप्रकारेण वेदप्रामाण्याभ्युपगमात् वेदनिन्दको मायावादी यं वेदांशं तत्त्वावेदकं वेद अभ्युपगच्छति स वेदांशः कथं तत्वावेदकः ? न कथमपि । कुतः ? तत्वस्य परमार्थभूतस्य ब्रह्मणः अवर्णनीयत्वात् अवाच्यत्वात् । तथा च ब्रह्म अवाच्यमित्यभ्युपगमात् । ब्रह्मविषय-तयाभ्युपगतस्य वेदभागस्य ब्रह्मवाचकतया न ब्रह्मसम्बन्धः सम्भवति । प्रमेयसम्बन्धरहितस्य

प्रामाण्यञ्च दुर्घटमिति भावः । एवं अतत्त्वावेदकस्य मिथ्याविषयत्वात् अप्रामाण्यमङ्गीकृतं स्यात् । तत्वावेदकस्य पुनः निर्विषयत्वेन अप्रामाण्यं अभ्युपगतमिति उभयथापि वेदाप्रामाण्यवादित्वात् वेदस्य दूषकोऽयमित्यभिप्रायः ॥ ३३ ॥

मन्दोपकारिणी – ननु मन्त्रब्राह्मणात्मको वेदभाग एकः उपनिषदात्मकोऽपरः । तत्र आद्यः मिथ्याभूतभेदादिप्रपञ्चविषयत्वात् अतत्त्वावेदकं प्रमाणम् । अपरस्तु परमार्थभूतब्रह्मविषयत्वात् तत्त्वावेदकं प्रमाणम् । तत्र मन्त्रब्राह्मणात्मकभागस्य अतत्त्वावेदकत्वोक्त्या अप्रामाण्येऽपि उपनिषद्भागस्य तत्त्वावेदकप्रमाणत्वाभ्युपगमात् । शून्यवादिभिस्तु तदनङ्गीकारात् उभयोः विशेषः स्यादित्याशङ्क्य तदपि अशोभनं इत्याह **यमिति** ॥ वेददूषकः उक्तप्रकारेण वेदस्य अप्रामाण्याभ्युपगमात् वेदस्य निन्दकः मायावादी यं वेदान्तं उपनिषदाख्यं वेदं तत्त्वावेदकं वेद जानाति सः वेदान्तः कथं तत्त्वावेदकः तत्त्वस्य परमार्थभूतस्य ब्रह्मणः आवेदकः प्रतिपादकः स्यात् । कुतः, तत्त्वस्य परमार्थभूतब्रह्मणः अवर्णनीयत्वात् अवाच्यत्वात् । वेदान्तस्य ब्रह्मवाचकतया न ब्रह्मसम्बन्धः सम्भवति ब्रह्मणोऽवाच्यत्वाभ्युपगमात् । प्रमेयसम्बन्धरहितस्य प्रामाण्यं दुर्घटम् । एवं च अतत्त्वावेदकस्य मिथ्याविषयत्वात् अप्रमाण्यं अङ्गीकृतं तत्त्वावेदकस्यापि निर्विषयत्वेन अप्रामाण्यं अभ्युपगतं इति उभयथापि वेदाप्रामाण्यं इति भावः ॥ ३३ ॥

लक्षणाभिः प्रवर्तन्ते वाक्यानि तिसृभिर्यदि ।
विषयत्वं लक्षणानां तस्यैवानिष्टमागतम् ॥ ३४ ॥

भावप्रकाशिका – 'यतो वा इमानि भूतानि जायन्त' इत्यादीनि जहल्लक्षणया । 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादीन्यजहल्लक्षणया । 'तत्वमसी'त्यादीनि जहदजहल्लक्षणया ॥

पदार्थदीपिकोद्बोधिका – ननु यदुक्तं तत्वावेदकप्रमाणस्य ब्रह्मणि वचनवृत्या प्रवृत्यभावान्निर्विषयत्वेनाप्रामाण्यमिति, तदसत् । यद्यपि, 'यतो वाचो निवर्तन्त' इत्यादि वाक्यैः ब्रह्मणो वाच्यत्वाभावाद्वचनवृत्या ब्रह्मणि न प्रवर्तते वेदः । तथापि लक्षणावृत्या प्रवर्तते । लक्षणा त्रिविधा जहल्लक्षणा, अजहल्लक्षणा जहदजहल्लक्षणा चेति । तत्र 'यतो वा इमानि भूतानि जायन्त' इत्यादीनि जहल्लक्षणया, 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादीन्यजहल्लक्षणया, 'तत्त्वमसीत्यादीनि जहदजहल्लक्षणया ब्रह्मपराणि । तदेवं लक्षणया

ब्रह्मविषयत्वात्कथं निर्विषयत्वं तत्त्वावेदकप्रमाणस्येत्याशङ्क्यानिष्टापादनमुखेन परिहरति— **लक्षणाभिरिति** ॥ वाक्यानि तत्त्वावेदकप्रमाणत्त्वेन अङ्गीकृतानि यदि तिसृभिः लक्षणाभि र्ब्रह्मणि प्रवर्तन्ते तर्हि तस्यैव अवाच्यत्व प्रमेयत्वादिसकलविशेषनिर्मुक्ततयाङ्गीकृतस्य ब्रह्मणः लक्षणानां लक्षणावृतीनां विषयत्वं नाम विशेषणमागतम् । अनिच्छतापि अङ्गीकार्यतया प्राप्तम् । तच्च अनिष्टं अपसिद्धान्तप्रसङ्गात् अङ्गीकर्तुं अनुचितम् । तस्मात् ब्रह्मणो लक्षणा-विषयत्वासम्भवात् तत्वावेदकप्रमाणस्य निर्विषयत्वेन अप्रामाण्यं तादवस्थमेवेति भावः

॥ ३४ ॥

मन्दोपकारिणी – ननु वेदस्य ब्रह्मणि वचनतया प्रवृत्त्यभावेऽपि लाक्षणिकया वृत्त्या प्रवृत्तिर्भविष्यति । अतः लक्षणया ब्रह्मणो विषयत्वात्कथं अविषयत्वं तत्त्वावेदकप्रमाणस्य इत्याशङ्क्य अनिष्टापादनमुखेन परिहरति ॥ **लक्षणाभिरिति** ॥ वाक्यानि वेदवाक्यानि यदि तिसृभिः लक्षणाभिः जहल्लक्षणाऽजहल्लक्षणाजहदजहल्लक्षणाख्याभिः ब्रह्मणि प्रवर्तन्ते तर्हि तस्यैव अवाच्यत्वाप्रमेयत्वादिसकलविशेषनिर्मुक्ततयाङ्गीकृतस्यैव ब्रह्मणः लक्षणानां तिसृणां विषयत्वं नाम विशेषणत्वमागतम् । अनिच्छतापि अङ्गीकार्यतया प्राप्तम् । कथंभूतं अनिष्टं अपसिद्धान्तप्रसङ्गात् अङ्गीकर्तुं अनुचितम् । तस्मात् ब्रह्मणो लक्षणाविषयत्वस्याप्यसम्भवात् अविषयत्वेन अप्रामाण्यमेव वेदस्य इति भावः ॥ ३४ ॥

किञ्चाखण्डेऽत्र वाक्यानि किञ्चिद्विदधते न हि ।
तान्यभ्यधुरभावं चेज्जाड्यादेस्तन्न शोभते ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – नैतावदेव दूषणं ब्रह्मणो निर्विशेषत्वाङ्गीकारे, किन्त्वधिकञ्च अस्तीति प्रतिजानीते— **किञ्चेति** ॥ अखण्डे न विद्यते खण्डो भेदो यस्य तदखण्डं तस्मिन् । 'खडि भेद' इति धातुः । निर्विशेषे अत्र ब्रह्मणि वाक्यानि 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादीनि किञ्चित् सत्यत्वादिरूपं किमपि विशेषणं न विदधते हि यस्मात् । ननु सत्यज्ञानादिपदानां असत्यत्वादिव्यावृत्तिरेवार्थः । तस्मात् निर्विशेषस्य ब्रह्मणः सत्यत्वादि-भावरूपविशेषाभावेऽपि असत्यव्यावृत्तत्वात्सत्यं ब्रह्म, अज्ञानव्यावृत्तत्वाज्ज्ञानं ब्रह्म, अन्तव्यावृत्तत्वादनन्तं ब्रह्म, इति सत्यादिपदानामतद्व्यावृत्या ब्रह्मविषय-तयाङ्गीकारात्कथं निर्विषयता इत्यत आह— तानीति । तानि सत्यज्ञानादिवाक्यानि जाड्यादेः अभावं जडत्वाद्यभावं अभ्यधुः, इत्यङ्गीकृतश्चेदपि तन्न शोभते ॥ ३५ ॥

मन्दोपकारिणी – दूषणान्तरं प्रतिजानीते ॥ किं चेति ॥ किं च अन्यच्च दूषणमुच्यते इत्यर्थः । अखण्डे निर्विशेषे अत्र ब्रह्मणि वाक्यानि 'सत्यं ज्ञानं' इत्यादिवाक्यानि किञ्चित् सत्यत्वज्ञानत्वादिरूपं किमपि विशेषणं न विदधते न समर्थयन्ति । हि यस्मात् वाक्यानां ब्रह्मणि विशेषसमर्पकत्वाभावात् व्यर्थश्च लाक्षणिकत्वाभ्युपगमः इति भावः । ननु सत्य-ज्ञानादिवाक्यानां ब्रह्मणि सत्वादिभावरूपधर्मसमर्पकत्वाभावेऽपि अतद्व्यावृत्या असत्यत्वाद्य भावरूपधर्मसमर्पकत्वेन ब्रह्मविषयत्वाङ्गीकारात् न निर्विषयता इत्यत आह ॥ तानीति ॥ तानि सत्यज्ञानादिवाक्यानि जाड्यादेः अभावं अभ्यधुश्चेत् प्रतिपादयन्ति चेत् असत्यात् जडात् व्यावृत्तत्वात् सत्यमित्यादिना प्रकारेण जाड्यादेः अभावं अभ्यधुः इति अङ्गीकृतं चेदपि न शोभते ॥ ३५ ॥

अभावभावस्याभावाद्भावरूपस्य तस्य तु ।
भावाभावविशेषाणामभावादविशेषिणः ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – कुत इति चेत् विकल्पासहत्वात् । तथा हि 'सत्यज्ञानादि' पदाभिधेयानां असत्यत्वाद्यभावानां किं ब्रह्मात्मकत्वमङ्गीक्रियते, आहोस्विद्ब्रह्मविशेषत्वम् । आद्येऽसत्यत्वाभावानां ब्रह्मात्मकत्वाङ्गीकारे ब्रह्मणोऽप्यभावात्मकं स्यात् । तच्च नाङ्गी-कारार्हं कुत इत्यपेक्षायामाह— **अभावेति** ॥ भावो रूपं यस्य तद्भावरूपं तस्य ब्रह्मणः अभावभावोऽभावत्त्वं तस्य अभावादसम्भवात् इत्यर्थः । द्वितीयोऽपि पक्षो न घटते, कुत इत्यत आह — भावाभावेति । विशेषोऽस्यास्तीति विशेषि तन्न भवतीत्यविशेषि तस्य अविशेषिणः । सर्वविशेषरहितत्वेनाङ्गीकृतस्य ब्रह्मणः भावश्चाभावश्च भावाभावाः ते च ते विशेषाश्च तेषां भावाभावात्मकसर्वधर्माणां इत्यर्थः । अभावादसम्भवात् । निर्विशेषत्वे-नाङ्गीकृतस्य ब्रह्मणो भावाभावरूपविशेषाङ्गीकारे अपसिद्धान्तप्रसङ्गादिति भावः । तस्मात् असत्यत्वाद्यभावानां ब्रह्मात्मकतया ब्रह्मविशेषतया वा ब्रह्मसम्बन्धाभावात् तत्प्रतिपादन-पराणां सत्यज्ञानादिवाक्यानां ब्रह्मविषयत्वाभावात् न तत्वावेदकत्वं सम्भवतीत्यर्थः ॥३६॥

मन्दोपकारिणी – कुत इति चेत् असत्यत्वाद्यभावः किं ब्रह्मरूपो वा तद्विशेषो वा । नाद्य इत्याह, भावरूपस्य भावात्मकत्वेन अङ्गीकृतस्य तस्य ब्रह्मणः अभावभावस्य अभावस्य अभावात् असम्भवात् इत्यर्थः । न द्वितीयः इत्याह ॥ भावेति ॥ अविशेषिणः

विशेषरहितत्वेन अङ्गीकृतस्य ब्रह्मणः भावाभावविशेषाणां अभावात् भावरूपस्य वा अभावरूपस्य वा कस्यापि विशेषस्य अभावात् इत्यर्थः । विशेषाङ्गीकारेऽपसिद्धान्तप्रसङ्गात् इति भावः । तस्मात् सत्यज्ञानादिवाक्यानां पूर्वोक्तप्रकारेण ब्रह्मविषयत्वाभावात् न तत्त्वावेदकत्वं इति भावः ॥ ३६ ॥

यो वेदवेदितार्थानां नित्यं सन्त्यागसंश्रवी ।
वेदबाह्यो विपश्चिद्भिराष निश्चीयतां ततः ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – 'मन्यन्ते शून्यमेवान्ये' इत्यत्र प्रच्छन्नबौद्धत्वं मायिन उक्तम् । तच्च 'परतत्त्वविवर्तत्वा'दित्यादिनोपपादितम् । इदानीं युक्त्यन्तरेणापि बौद्धमत-मुपपाद्योपसंहरति— **य इति** ॥ यो मायी वेदवेदितार्थानां वेदैः वेदिता ज्ञापिता ये अर्थाः तेषां प्रपञ्चसत्यत्वादीनां हरेः अनन्तगुणपूर्णत्वनिर्दोषत्वादीनां अर्थानां वा इत्यर्थः । नित्यं संत्यागः परित्यागः नित्यसंत्यागः नित्यसंत्यागरूपः संश्रवः सोऽस्यास्तीति तथोक्तः । सर्वदा परित्यागरूपप्रतिज्ञावानित्यर्थः । अत्र वेदार्थसंत्यागो नाम तेषां मिथ्यात्वाङ्गीकारः ततः वेदोक्तार्थमिथ्यात्वाङ्गीकारात् । एष मायी विपश्चिद्भिः ज्ञानिभिः वेदबाह्य इति निश्चीयताम् । न हि वेदोक्तार्थमिथ्यात्वाङ्गीकारातिरिक्तं वेदबाह्यत्वं बौद्धानामपीति भावः ॥ ३७ ॥

मन्दोपकारिणी – मन्यन्ते शून्यमेवान्ये इत्यादिना मायिनां प्रच्छनबौद्धत्वं प्रतिज्ञायो-पपादितम् । तत्रैव युक्त्यन्तरं वदन् बौद्धत्वमुपसंहरति ॥ **य इति** ॥ यः मायावादी वेदवेदितार्थानां वेदैः वेदितानां प्रतिपादितानां प्रपञ्चसत्यत्वादीनां हरेरनन्तगुणपरिपूर्णत्व-निर्दोषत्वादीनां अर्थानां नित्यं संत्यागसंश्रवी नित्यं सर्वदा संत्यागः परित्यागः मिथ्यात्वाङ्गीकाररूपः संश्रवः प्रतिज्ञा अस्यास्तीति स तथोक्तः । ततो वेदार्थस्य मिथ्यात्वाङ्गीकारात् । एषः मायी विपश्चिद्भिः ज्ञानिभिः वेदबाह्य इति निश्चीयताम् । ततश्च मायिशून्यवादिनोः सर्वप्रकारेण साम्यं सिद्धमिति भावः ॥ ३७ ॥

ज्यायसो दूषणेनैव धूर्तमन्योऽपि दूषितः ।
पक्षयोरविशेषत्वादेतयोः सद्विपक्षयोः ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – तस्मान्मायिशून्यवादिनोः वेदबाह्यत्वसाम्यात्परापरतत्वे च विशेषाभावात् शून्यवादिमते यद्दूषणं तेनैव दूषणेन मायिमतमपि दूषितं वेदितव्यमित्याह—

ज्यायस इति ॥ 'मता माध्यमिकाः तेऽपि व्यक्ताश्छन्ना इति द्वये' इत्यत्र शून्यवादिनः प्रथममुद्दिष्टत्वात् शून्यवादी मायावादिनो ज्यायान् । तस्य ज्यायसः श्रेष्ठस्य शून्यवादिनो दूषणेनैव धूर्तमन्यः आत्मानं धूर्तं मन्यमानो मायावाद्यपि दूषितो वेदितव्य इत्यर्थः । धूर्तमन्य इत्यत्र 'आत्ममाने खश्' इति खश्, 'खित्यनव्ययस्ये'ति मुमागमः । ननु शून्यवादि-निराकरणयुक्तिभिः मायिनिराकरणं कथं स्यात्, तयोः मतयोः परस्परविरुद्धत्वादित्यत आह— पक्षयोरिति । सद्विपक्षयोः सिद्धान्तयोः अविशेषत्वात् न विद्यते विशेषो वैलक्षण्यं ययोः तौ तथोक्तौ, तयोः भावः तत्वं तस्मात् मिथो विशेषरहितत्वादित्यर्थः ॥ ३८ ॥

मन्दोपकारिणी – ततश्च किं इत्याह ॥ **ज्यायस इति** ॥ 'मता माध्यमिकाः तेऽपि व्यक्ताश्छन्ना इति द्वये' इत्यत्र प्रथमं उद्दिष्टत्वेन ज्यायसः श्रेष्ठस्य शून्यवादिनः दूषणेनैव दूषणकरणेनैव धूर्तमन्यः आत्मानं धूर्तं वञ्चकं मन्यमानः मायावाद्यपि दूषितः वेदितव्यः इत्यर्थः । कुतः इत्यत आह ॥ पक्षयोरिति ॥ सद्विपक्षयोः सतां विपक्षभूतयोः एतयोः पक्षयोः सिद्धान्तयोः अविशेषत्वात् मिथो विशेषरहितत्वात् । 'पापो धूर्तस्तु वञ्चकः' इत्यमरः ॥ ३८ ॥

असत्त्वादित्यसौ हेतुरसिद्धो ब्रह्मवादिनः ।
मेति भाण्यविशेषत्वात् तत्त्वायोर्ब्रह्मशून्ययोः ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – ननु 'विमतं कारणं न स्यात्' इत्यत्र 'विवादस्य पदं न स्यात्' इत्यत्र च शून्यस्य कारणत्वं अधिष्ठानत्वं च निराकर्तुं योऽयं असत्वहेतुः प्रयुक्तः स तु ब्रह्मवादिनो मम असिद्धः । मया 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिना जगज्जन्मादि-कारणस्य ब्रह्मणः सत्यत्वाङ्गीकारादित्यत आह— ॥ **असत्वादिति** ॥ ब्रह्मवादिनो मम असत्वादिति हेतुरसिद्धः इति मा भाणि, मायिना त्वया नोच्येत । कुतः? ब्रह्मशून्ययोः मायिशून्यवादिभ्यां परतत्वमित्यङ्गीकृतयोः ब्रह्मशून्ययोः अविशेषत्वात् सर्वविशेषरहित-त्वात् । तस्मात् असदात्मकाश्छून्याद्ब्रह्मणो विशेषाभावात् असत्वं ब्रह्मणो दुर्वारमिति न असत्वहेतुरसिद्धो मायावादिन इति भावः ॥ ३९ ॥

मन्दोपकारिणी – यदुक्तं शून्यवादिनिराकरणहेतुनैव मायावाद्यपि निराकृतो भवेत् इति तत् अयुक्तम् । विमतं कारणं न स्यात् इत्यादिना शून्यवादिनं प्रति शून्यस्य कारणत्वं

अधिष्ठानत्वं च निराकर्तुं यः असत्वादिहेतुः प्रयुक्तः सः मायावादिनोऽसिद्धः, ब्रह्मणः सत्यत्वाङ्गीरात् इत्याशङ्क्य निषेधति ॥ **असत्वादिति** ॥ ब्रह्मवादिनः मम असत्वादित्यसौ हेतुः कारणं असिद्ध इति मा भाणि न वक्तव्यं, मा भाषीति पाठेऽपि अयमर्थः । 'भण शब्दे, भाष् व्यक्तायां वाचि लुङ्, न माङ् योग इत्यडभावः, मा भाणि मा भाणिषातां मा भाणिषत' । एवं मा भाषीत्यत्रापि । कुतः तत्त्वयोः मायिशून्यवादिभ्यां तत्वत्वेनाङ्गीकृतयोः ब्रह्मशून्ययोः अविशेषत्वात् सर्वविशेषरहितत्वात् । तस्मात् असदात्मकस्य शून्यस्य ब्रह्मणश्च विशेषाभावादसत्वं ब्रह्मणः दुर्वारमिति न असत्वहेतुः मायिनः असिद्ध इति भावः ॥३९॥

सोऽङ्गीकरोति चेत् सत्त्वं ब्रह्मणः स्याद्विशेषिता ।
न चेत् प्राप्तं पारिशेष्यादसत्त्वं न निरस्यतु ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – ननु भवेदयं दोषो यद्यस्माभिः असत्वं ब्रह्मणोऽङ्गीक्रियेत, न च एवं ब्रह्मणः सत्वाङ्गीकारादित्यत आह— **स इति** ॥ स मायी ब्रह्मणः सत्वं अङ्गीकरोति चेत् ब्रह्मणो विशेषिता विशेषोऽस्यास्तीति विशेषि, तस्य भावः तत्ता, सविशेषत्वमित्यर्थः स्यात् । न चेत् ब्रह्मणः सत्वं नाङ्गीकरोति चेत् परिशेषस्य भावः पारिशेष्यं तस्मात्, परिशेषप्रमाणत इत्यर्थः । प्राप्तमसत्वं न निरस्यतु न निराकरोतु, परस्परविरुद्धयोः न एकतरनिषेधस्य अन्यतरविधिनान्तरीयकत्वनियमात् सत्वासत्वयोश्च परस्परविरुद्धत्वात् । अयं अभिप्रायः ब्रह्मणः शून्याद्वैलक्षण्यसिध्यर्थं सत्वाख्यविशेषाङ्गीकारे निर्विशेषत्वभङ्गः स्यात् । तद्भयात् असत्वानभ्युपगमे परिशेषतः प्राप्तं असत्वं न निराकर्तुमुचितम् । असत्वाङ्गीकारे च असत्वहेतुरसिद्ध इत्युक्तमयुक्तमित्युभयतः पाशारज्जुरिति ॥ ४० ॥

मन्दोपकारिणी – ननु ब्रह्मणोऽसत्त्वं मया नाङ्गीक्रियते किन्तु सत्त्वमेव अङ्गीक्रियते अतः असिद्धः असत्वादिहेतुः इत्यत आह ॥ **स इति** ॥ सः मायी ब्रह्मणः सत्त्वं अङ्गीकरोति चेत् विशेषिता विशेषोऽस्यास्तीति विशेषी तस्य भावः विशेषिता सविशेषितं स्यात् । न चेत् ब्रह्मणः सत्त्वं नाङ्गीकरोति चेत् पारिशेष्यात् परिशेषतः प्राप्तं असत्त्वं न निरस्यतु न निराकरोतु । परस्परविरुद्धयोः अन्यतरनिषेधेन अपरस्य अपरिहार्यत्वनियमात् सत्त्वासत्त्वयोश्च परस्परविरुद्धत्वात् । 'निर् पूर्वकात् असु क्षेपणे इत्यतो लोट् परस्मैपदं

अस्यतु अस्यतां अस्यन्तु' । अयं भावः ब्रह्मणः शून्यात् वैलक्षण्यसिद्ध्यर्थं सत्त्वाख्यविशेषाङ्गीकारे निर्विशेषत्वभङ्गः स्यात् । तद्भयात् सत्त्वानभ्युपगमे परिशेषप्राप्तं तद्विरुद्धं असत्वं न निराकर्तुं उचितम् । असत्त्वाङ्गीकारे च न असत्त्वहेतुः असिद्धः इति उभयतः पाशारज्जुः इति ॥ ४० ॥

विगीतं न विचार्यं स्यात् न भाव्यं न फलप्रदम् ।
शून्यं ब्रह्माद्यमद्वैतं विधिधीगोचरो न यत् ॥ ४१ ॥

भावप्रकाशिका – आद्यशब्देन विज्ञानस्फोटकालाद्वैतानि ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – अस्तु तर्हि शून्याद्वैलक्षण्याभावादसत्व ब्रह्मणः किं अनिष्टमित्यतः फलितार्थमाह— **विगीतमित्यादिना** ॥ विविधतया गीतं विगीतं विप्रतिपन्नं इत्यर्थः न विद्यते भेदप्रपञ्चो यस्य तदद्वैतम् । विगलिताखिलभेदादिप्रपञ्चत्वेन अङ्गीकृतं इति यावत् । शून्यं शून्यात्मकं सत् सत्यं ब्रह्म आद्यं यस्य तद्ब्रह्माद्यम् । मायावादिप्रभृतिभिः वादिभिः परतत्वमित्यङ्गीक्रियमाणं वस्तु विचार्यं न स्यात् । मुमुक्षूणां श्रवणमननादिरूपविचारास्पदं न स्यात् । भावयितुं ध्यातुं योग्यं भाव्यं ध्येयं च न स्यात् । फलप्रदं धर्मादिमोक्षान्ततत्तदभीष्टफलप्रदञ्च न स्यात् । ब्रह्माद्यं इत्यत्र आद्यशब्देन शून्यवादिनां शून्यं, विज्ञानवादिनां विज्ञानं, स्फोटवादिनां वैय्याकरणानां स्फोटः (कालश्च) गृह्यते । विचार्यत्वादिकं कुतो न स्यात् इत्यत आह— विधीति । यदेतत् परतत्वं अङ्गीकृतं ब्रह्माद्यं विधिधीगोचरः, विधिरूपा धीस्तस्या गोचरो विषयः । गोचरः प्रथमप्रतिपत्तौ विधिप्रत्ययविषयो न भवति यतः तस्मात् इत्यर्थः ॥ ४१ ॥

मन्दोपकारिणी – अस्तु तर्हि ब्रह्मणः असत्त्वं किं अनिष्टमित्यतः फलितार्थमाह ॥ **विगीतमिति** ॥ विगीतं विप्रतिपन्नं अद्वैतं द्वैतरहितम् । विगलिताखिलभेदादिप्रपञ्चत्वेन अङ्गीकृतं इति यावत् । शून्यं शून्यात्मकं ब्रह्माद्यं ब्रह्मप्रभृति मायावादिप्रभृतिभिः वादिभिः अङ्गीक्रियमाणपरतत्त्वं विचार्यं मुमुक्षूणां श्रवणमननादिरूपविचारास्पदं न स्यात् । भाव्यं ध्येयं च न स्यात् । फलप्रदं धर्मादिमोक्षान्ततत्तदभीष्टफलप्रदं च न स्यात् । ब्रह्माद्यं इति आद्यशब्देन शून्यवादिनां विज्ञानं, स्फोटवादिनां वैयाकरणानां स्फोटश्च गृह्यते । विचार्यादिकं कुतो न स्यात् इत्यत आह ॥ विधिधीति ॥ परतत्त्वत्वेनाङ्गीकृतं ब्रह्माद्यं

विधिधीगोचरः प्रथमप्रतिपत्तौ विधिधियः विधिप्रत्ययस्य गोचरः विषयः न भवति यस्मात् इत्यर्थः ॥ ४१ ॥

खपुष्पवदखण्डत्वाद्व्यतिरिक्तं निदर्शनम् ।
प्रमाणादिवदित्येवमूहनीयं यथेप्सितम् ॥ ४२ ॥

भावप्रकाशिका – विमतानि भगवद्वाचकानि न भवन्ति असद्विषयत्वात् शशविषाणवदित्याद्यूहनीयम् ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – किमिवेत्यत आह— **खपुष्पवदिति** ॥ खपुष्पवत् गगनकुसुमवत्, खपुष्पशब्दात् खपुष्पप्रतीतावपि तद्यथा विधिप्रत्ययविषयो न भवति, तथा तत्पक्षे ब्रह्माद्यमपीति भावः । विधिप्रत्ययविषयत्वाभावः कुत इत्यत आह ॥ अखण्डत्वादिति ॥ अखण्डत्वात् निर्विशेषत्वात् । सत्वादिधर्मरहितत्त्वेन विधिप्रत्ययगोचरत्वासम्भवादित्यर्थः । अयमत्र प्रयोगः— विमतं ब्रह्माद्यं विवेकिना श्रुतिमीमांसादिभिः विचार्यं न भवति श्रुत्याद्यविषयत्वात् खपुष्पवत् । विमतं ध्येयं न भवति निराकारत्वात् खपुष्पवत् । विमता ब्रह्मादिविषयभावना मोचिका न भवति असद्विषयत्वात् शशविषाणादिभावनावत् । विमतं ब्रह्माद्यं पुरुषार्थप्रदं न भवति असत्वात् अश्वशृङ्गवत् । यद्यद्विचार्यं भाव्यं फलप्रदं वा तत् सदेव दृष्टं प्रमाणादिवत् । प्रमाणं प्रमेयं वा साधुत्वासाधुत्वादिविचारविषयो भवति । इतिशब्दः दूषणोक्तसमाप्तौ । 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः । एवं व्यतिरिक्तं साध्यसाधनाभ्यां रहितं निदर्शनं दृष्टान्तः यथेप्सितं यथेष्टं प्रमाणप्रमेयादिकं ऊहनीयम् । व्यतिरेकदृष्टान्त अपि ऊहनीय इत्यर्थः ॥ ४२ ॥

मन्दोपकारिणी – किमिवेत्यत आह ॥ **खपुष्पवदिति** ॥ खपुष्पशब्दात् खपुष्पप्रतीतावपि तद्यथा विधिप्रत्ययविषयो न भवति तथा त्वत्पक्षे ब्रह्माद्यपीति भावः । कुत इत्यत आह ॥ अखण्डत्वादिति ॥ निर्विशेषत्वात् इत्यर्थः । सत्त्वादिधर्मरहितत्वेन विधिप्रत्ययगोचरत्वासम्भवात् इति भावः । अयमत्र प्रयोगः 'विमतं ब्रह्मादि श्रुत्याद्यविषयः सत्त्वादिसर्वविशेषमुक्तत्वात् खपुष्पवत् । 'विमतं ब्रह्मादि विवेकिनां श्रुतितन्मीमांसाभिः विचार्यं न भवति श्रुत्याद्यविषयत्वात् खपुष्पवत्' । 'विमतं ब्रह्माद्यं ध्येयं न भवति निराकारत्वात् खपुष्पवत्' । 'विमता ब्रह्मादिविषयभावना संसारमोचिका न भवति

असद्विषयत्वात् शशविषाणादिभावनावत् । 'विमतं ब्रह्माद्यं पुरुषार्थप्रदं न भवति असद्विषयत्वात् अश्वशृङ्गवत्' । तथा विचार्यं भाव्यं फलप्रदं वा सत्त्वात् प्रमाणादिवत् । यथा प्रमाणं प्रमेयं वा साधुत्वासाधुत्वादिविचारविषयो सच्च भवति तद्वत् । इत्येवं व्यतिरिक्तं निदर्शनं यथोप्सितं स्वेच्छानुसारेण ऊहनीयम् । सत्तयैव विचारादिविषयत्वं इत्यत्र प्रमाणादिवत् इत्यादि-व्यतिरेकदृष्टान्तः ऊहनीयः इत्यर्थः ॥ ४२ ॥

आम्नायानाममानत्वे धर्मादेरप्रमाणता ।
धर्माद्यभावे नो मानं प्रत्यक्षैकप्रमाणिनः ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – 'नारायणोऽनन्तगुण' इत्यत्र वेदवेदित इत्यनेन नारायणस्य अनन्तगुणादित्वे वेद एव प्रमाणं इत्युक्तं, तत्र वेदप्रामाण्यविषये ये विप्रतिपद्यन्ते तान् प्रत्याह—

आम्नायानामिति ॥ शाखाभेदात् बहुवचनम् । आम्नायानां वेदानां अमानत्वे । अङ्गीकृते सतीति शेषः । धर्म आदिर्यस्य स धर्मादिः तस्य । धर्माधर्माद्यतीन्द्रियप्रपञ्चस्य इत्यर्थः । अप्रमाणता प्रमाणशून्यता । न विद्यते प्रमाणं यस्मिन् तदप्रमाणं तस्य भावः । अप्रमाणता । अयं भावः सर्वसमयिभिः अपि स्वस्वसमयप्रयोजनतया धर्मादिकं तावदवश्यं अभ्युपगन्तव्यम् । तच्च प्रमाणेन विना न सिध्यति । न च प्रत्यक्षं तत्र, धर्मादेः अतीन्द्रियत्वात् । नापि केवलानुमानं तदभावेऽपि प्रमाणयितुं शक्यत्वात् । तस्मादन्तत आगम एवेष्टव्यः । तत्रापि न पौरुषेयागमः, धर्मादिविषय आगमस्य प्रणेतॄणां पुरुषाणां आप्तत्वे विप्रतिपत्तेः । तस्मादपौरुषेयागम एव तत्र प्रमाणम् । तस्य च प्रामाण्यानंगीकारे प्रमाणाभावाद्धर्माद्यसिद्धिः स्यात् । प्रमेयसिद्धेः प्रमाणाधीनत्वात् इति । ननु भवेदिदं धर्मादिकं अभ्युपगच्छतां पक्षे वेदप्रामाण्याभावे धर्माद्यसिद्धिः स्यादिति तेषां अनिष्टापादनम् । मन्मते धर्माद्यभावः प्रमाणञ्च प्रत्यक्षमेव तस्य चार्वाकस्य धर्माद्यसिद्धिः नानिष्टेत्यत आह— **धर्मादीति** । प्रत्यक्षैकप्रमाणिनः एकञ्च तत्प्रमाणञ्चैकप्रमाणं प्रत्यक्षं एव एकप्रमाणं, तदस्यास्तीति तथोक्तः तस्य । प्रत्यक्षं एकमेव प्रमाणमित्यङ्गीकुर्वतः चार्वाकस्य धर्माद्यसिद्धौ मानं प्रमाणं नो नास्ति । धर्माद्यभावस्य, रूपाद्यभाववत् प्रत्यक्षेण गोचरयितुं अशक्यत्वादिति भावः ॥ ४३ ॥

मन्दोपकारिणी – ब्रह्माख्यो वेदवेदितः इति ब्रह्मणो वेदवेद्यत्वमुक्तम् । तत्र वेदप्रामाण्यविषये विप्रतिपत्तिं कुर्वाणान् प्रति आह ॥ **आम्नायानां इति** ॥ आम्नायानां वेदानां अमानत्वे अप्रमाणत्वे । अङ्गीकृते इति शेषः । धर्मादेः धर्माद्यतीन्द्रियवस्तुनः अप्रमाणता प्रमाणशून्यता स्यात् । धर्माद्यतीन्द्रियादिकं तावत्सर्वं संमतम् । तच्च प्रमाणेन विना न सिध्यति । न च प्रत्यक्षं तत्र प्रमाणम् । धर्मादेः अतीन्द्रियत्वात् । नापि अनुमानम् । कामचारित्वेन अनिर्णायकत्वात् । तस्मात् अपौरुषेयो वेदः एव प्रमाणं तत्रेति वाच्यम् । तस्य प्रामाण्यानङ्गीकारे प्रमाणान्तराभावात् धर्माद्यसिद्धिः स्यात् इति भावः । स्यादिदं धर्माधिकं अभ्युपगच्छतां वादिनां अनिष्टापादनं न चार्वाकस्य । तेन धर्माद्यभावस्यैव अङ्गीकारादित्यत आह ॥ धर्मादीति ॥ प्रत्यक्षैकप्रमाणिनः प्रत्यक्षमेकमेव प्रमाणं इत्यङ्गीकारिणः वादिनः धर्माद्यभावे मानं प्रमाणं नो नास्ति । धर्माद्यभावस्य रूपाद्यभाववत् प्रत्यक्षेण गोचरयितुं अशक्यत्वात् इति भावः ॥ ४३ ॥

न पौरुषेयं वचनं प्रामाण्येन विनिश्चितम् ।
पौरुषेयत्वतो यद्वद्वाक्यमुन्मत्तभाषितम् ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – ननु यदुक्तं वेदप्रामाण्याभावे धर्माद्यसिद्धिः स्यात् इति तदसत् । वेदेन विनापि सर्वज्ञपुरुषप्रणीतागमेनैव तत्सिद्धेः । तदागमप्रामाण्यञ्च आप्तोक्तत्व-गुणयोगादेव सिध्यति । तथा च वेदप्रामाण्यानभ्युपगमेऽपि धर्मादिसिद्धिः इत्यत आह—

न पौरुषेयमिति ॥ पुरुषेण प्रणीतं पौरुषेयं वचनं वाक्यं प्रामाण्येन विनिश्चितं न भवति । कुतः पौरुषेयत्वतः पुरुषप्रणीतत्वात् । किमिव उन्मत्तभाषितं वाक्यं यद्वत् । विमतं बुद्धादिप्रणीतवाक्यं धर्मादौ मानं न भवति पौरुषेयत्वात् । यद्यत्पौरुषेयं वाक्यं तत् तत् न धर्मादौ मानं यथा उन्मत्तवचनमिति प्रयोगः ॥ ४४ ॥

मन्दोपकारिणी – ननु वेदस्य प्रामाण्यानङ्गीकारेऽपि न धर्माद्यसिद्धिः । पौरुषेयवाक्येनैव तत् सिद्धेः इत्यत आह ॥ **नेति** ॥ पौरुषेयं बुद्धादिपुरुषप्रणीतं वचनं प्रामाण्येन धर्मादौ प्रमाणत्वेन विनिश्चितं न भवति । कुतः पौरुषेयत्वतः पुरुषप्रणीतत्त्वात् । किमिव उन्मत्तभाषितं उन्मत्तेन भाषितं उक्तं वाक्यं यद्वत् यथेति । 'विमतं बुद्धादिप्रणीतं वाक्यं धर्मादौ न प्रमाणं पौरुषेयत्वात् यत् पौरुषेयं वाक्यं तद्धर्मादौ न प्रमाणं यथा उन्मत्तवचनं' इति प्रयोगः ॥ ४४ ॥

विमतः पुरुषोऽज्ञः स्यात् स्याच्चासौ विप्रलम्भकः ।
पुंस्त्वाच्चैत्रवदित्यस्ताः सार्वज्ञे केवलानुमाः ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – ननु बुद्धादीनां सर्वज्ञत्वात् कथं तद्वचनं न मानमित्यत आह— ॥ **विमत इति** ॥ विमतः सर्वज्ञत्वासर्वज्ञत्वाभ्यां वादिप्रतिवादिविषयः, वेदाप्रामाण्यवादिभिर्बौद्धादिभिः सर्वज्ञत्वेनाङ्गीकृतः पुरुषो बुद्धादिरज्ञः स्यात् । विवक्षितार्थतत्वज्ञानरहितो भवितुं अर्हति पुरुषत्वात् उन्मत्तचैत्रवत् । असौ विमतः पुरुषो विप्रलम्भकः स्यात् पुरुषत्वादेव विप्रलम्भकत्वेन सम्मतपुरुषान्तरवत् । इति एवं सर्वज्ञे सर्वज्ञविषये सर्वज्ञत्वसाधकत्वेन परैः प्रयुज्यमाना केवला च सा अनुमा च केवलानुमा श्रुत्यादिसाहाय्यरहितानुमेत्यर्थः । धर्मादयः कस्यचित्प्रत्यक्षा वस्तुत्वाद्घटवदित्यादिरूपानुमेत्यर्थः अस्ता निरस्ता वेदितव्या ॥ ४५ ॥

मन्दोपकारिणी – ननु बुद्धादीनां सर्वज्ञत्वात् कथं तद्वचनं धर्मादौ प्रमाणं न स्यात् इत्यत आह ॥ **विमत इति** ॥ विमतः बुद्धादिः अज्ञः विवक्षिततत्त्वज्ञानरहितः स्यात् । पुंस्त्वात् चैत्रवत् उन्मत्तपुरुषवत् । असौ विमतः पुरुषः विप्रलम्भकश्च स्यात् पुंस्त्वात् चैत्रवत् विप्रलम्भकपुरुषवत् । इति एवं सार्वज्ञे सर्वज्ञत्वविषये परैः प्रयुज्यमानाः केवलानुमाः श्रुत्यादिसहायरहिताः अनुमाः अनुमानानि 'धर्माधर्मौ कस्यचित्प्रत्यक्षौ घटवत्' 'परमाणवः कस्यचित् प्रत्यक्षाः घटवत्' इत्यादिरूपाः अस्ताः निरस्ता वेदितव्याः ॥४५॥

दुःखीकरोति यद्दैवं दुःशास्त्रेषूग्र आग्रहः ।
दुःखाकरोऽतिघोरः स्याल्लोकोऽतस्तद्व्रतां ध्रुवः ॥ ४६ ॥

भावप्रकाशिका – दुःखाकरोति विपरीतीकरोति 'दुःखात्प्रातिलोम्ये' इति डाच् ॥४६॥

पदार्थदीपिकोद्बोधिका – एवं अवैदिकशास्त्राणां दुःशास्त्रत्वं अर्थादुक्त्वा तेषु दुःशास्त्रेषु आग्रहवतां फलमाह— **दुःखाकरोतीति** ॥ दुष्टानि च तानि शास्त्राणि च दुःशास्त्राणि तेषु उग्रः अनिवर्त्यः आग्रहः दुःशास्त्रेषु प्रामाण्यविस्रम्भरूपाग्रहः दैवं वेदादिसदागमप्रतिपाद्यं परमदैवं भगवन्तं दुःखाकरोति । यत् यस्मात् वेदादिसदागमोक्तप्रकारादन्यथा भवति अतः वैपरीत्यकरणात् विपरीतोपासनात् इत्यर्थः । तद्व्रतां दैवविपरीतोपासनकारणदुःशास्त्राग्रहवतां

पुरुषाणां दुःखाकरः दुःखानां आकरः अत एव अतिघोरः दुःसहः ध्रुवः अविनाशी लोकः स्यात् । दुःशास्त्रेष्याग्रहेण दैवमन्यथोपास्य निरतिशयदुःखं अतिदुःसहं लोकं आप्नुवन्तीति भावः । दुःखाकरोतीत्यत्र 'दुःखात्प्रातिलोम्ये डाच्' इति डाच् प्रत्ययः प्रतिलोम्ये वैपरीत्येऽर्थे गम्यमाने डाच्प्रत्ययान्तो दुःखशब्दो वैपरीत्यवाचकः ॥ ४६ ॥

मन्दोपकारिणी – इदानीमेतादृशेषु शास्त्रेषु आग्रहवतां फलमाह ॥ **दुःखीकरोतीति** ॥ यत् यस्मात् दुःशास्त्रेषु वेदविरुद्धशास्त्रेषु उग्रः अतिदृढः आग्रहः प्रामाण्यविश्रम्भरूप आग्रहः दैवं वेदादिप्रतिपाद्यं भगवन्तं दुःखीकरोति वेदाद्युक्तप्रकारादन्यथा भावयति । अतः विपरीतोपासनकरणात् तद्वतां सः दुःशास्त्राग्रहः येषां अस्तीति तद्वन्तः तेषां दुःशास्त्राग्रहवतां पुरुषाणां दुःखाकरः दुःखानां आकरः उत्पत्तिस्थानभूतः अत एव अतिघोरः दुःसहः लोकः अन्धतमोरूपः स्यात् । कथंभूतः, ध्रुवः शाश्वतः पुनरावृत्तिरहितः इत्यर्थः ॥ ४६ ॥

आस्माकेऽपेक्षिते पक्षे मोक्षं दद्यादधोक्षजः ।
यत्र स्वानन्दिनः सन्तः सेवन्ते विषयान् बहून् ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – एवं दुःशास्त्रेष्वाग्रहवतां फलमभिधायेदानीं सच्छास्त्रनिरतानां फलमाह—

आस्माक इति ॥ अस्माकं सम्बन्धी आस्माकस्तस्मिन् पक्षे सिद्धान्ते अपेक्षिते सति प्रमाणत्वेन अङ्गीकृते सति तदुक्तप्रकारेण भगवदुपासने कृते सतीति शेषः । अधोक्षजः अधःकृतं अक्षजं इन्द्रियजन्यज्ञानं येन स तथोक्तः । प्रत्यक्षागोचरः केवलं आगमसमधिगम्यः श्रीनारायणः यत्र यस्मिन्मोक्षे सन्तो मुक्तिगा सज्जना स्वः स्वरूपभूतः स चासावानन्दश्च स्वानन्दः स एषां अस्तीति स्वानन्दिनः सन्तः । बहून् विषयान् शब्दादीन् सेवन्ते अनुभवन्ति तादृशं मोक्षं दद्यात् ॥ ४७ ॥

मन्दोपकारिणी – इदानीं सच्छास्त्रेषु निरतानां फलमाह ॥ **आस्माक इति** ॥ आस्माके अस्माभिः अङ्गीकृतत्वेन अस्मत्सम्बन्धिनि पक्षे सिद्धान्ते अपेक्षिते सति प्रमाणत्वेन अङ्गीकृते सति तदुक्तप्रकारेण भगवदुपासने कृते च सतीति शेषः । अधोक्षजः अधःकृतं अक्षजं इन्द्रियजन्यज्ञानं येन स तथोक्तः । प्रत्यक्षागोचरः केवलं आगमैक-

समधिगम्यः श्रीमन्नारायणः मोक्षं दद्यात् । यत्र यस्मिन् मोक्षे सन्तः विद्यमानाः मुक्तिं गताः सज्जनाः बहून् विषयान् शब्दादीन् सेवन्ते अनुभवन्ति । कथंभूताः स्वानन्दिनः स्वः स्वरूपभूतः आनन्दो येषां अस्तीति स्वानन्दिनः स्वरूपसुखं अनुभवन्तः ॥ ४७ ॥

स्वव्याहत्यादिनोपेक्ष्य मुक्तिर्या निर्विशेषता ।
कदेत्याद्यनुयोगेऽस्या विशेषः स्यान्ननूत्तरे ॥ ४८ ॥

भावप्रकाशिका – स्वव्याहत्यादिना प्रमाणविषयत्वेन च । निर्विशेषब्रह्मता कदा कथमित्यनुयोगे ज्ञानोत्तरं ब्रह्मभावेनेत्याद्युत्तरे ज्ञानोत्तरकालसम्बन्धः ब्रह्मभाव इत्यादयो विशेषा मुक्तेः ॥ तूष्णीं भावे निग्रहस्थानम् ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – ननु निर्विशेषब्रह्मभाव एव हि मोक्षो नाम, तस्मात्तत्र कथं आनन्दानुभवः सम्भवति । तथात्वे निर्विशेषभङ्गादित्यत आह— **स्वव्याहत्यादिनेति** ॥ विशेषः अस्यास्तीति विशेषि । तस्य भावो विशेषिता निर्गता च सा विशेषिता च । निर्विशेषिता निर्विशेषिब्रह्मतादात्म्यं आप्तस्य मुक्तस्य सर्वविशेषरहितता नाम या मुक्तिः सा स्वव्याहत्यादिनोपेक्ष्या स्वव्याहतिदोषेण दूषितत्वात् विवेकिभिः तादृशं उक्त्यर्थं साधनानुष्ठानं न कर्तव्यमिति भावः । अत्रादिशब्देन अनुक्तिर्गृह्यते । निर्विशेषिब्रह्मभावो मुक्तिरिति पक्षे कथं स्वव्याहत्यादि? कथञ्च नापेक्ष्यत इत्यत आह— कदेत्यादीति । मुक्तिः कदा कथं वा इत्याद्यनुयोगे प्रश्नेऽस्माभिः कृते सतीति शेषः । उत्तरे प्रत्युत्तरे दत्ते सति तस्या मुक्तेः विशेषः स्यान्ननु । अयं भावः । कदा मुक्तिः इति प्रश्नस्य ऐक्यज्ञानपरिपाकसमनन्तरं निर्विशेषब्रह्मभावो मुक्तिः इत्यादिप्रत्युत्तरं मायिना दत्तश्चेत् ऐक्यज्ञानोत्तरकालसम्बन्धादि विशेषवत्वं स्यान्मुक्तेः । ततश्च निर्विशेषिता मुक्तिः इत्युक्तेः स्वव्याहतिः स्यात् । कदेत्यादि प्रश्नस्य प्रत्युत्तरं न दत्तश्चेत् तूष्णीं भावेन अनुक्त्याख्य निग्रहस्थानं स्यादिति ॥ ४८ ॥

मन्दोपकारिणी – ननु निर्विशेषब्रह्मभाव एव हि मोक्षो नाम । तत्कथं आनन्दानुभवः सम्भवति । तथात्वे निर्विशेषत्वभङ्गः स्यात् इत्यत आह ॥ **स्वव्याहत्यादिनेति** ॥ निर्विशेषता निर्गतः विशेषो यस्मात् तस्य भावः तत्ता सर्वविशेषरहितब्रह्मस्वरूपा या मुक्तिः सा स्वव्याहत्यादिना स्वव्याहतिरेव आदिः यस्य तत् तेन दूषणेन युक्तत्वादिति शेषः । आदिपदेन अनुक्तिः गृह्यते । उपेक्ष्या अनादरणीया विवेकिभिः तादृशमुक्त्यर्थं

साधनानुष्ठानं न कर्तव्यमिति भावः । कथं स्वव्याहत्यादीत्यत आह ॥ कदेति ॥ कदा इत्याद्यनुयोगे मुक्तिः कदा वा भवति कथं वा भवति इत्यादिप्रश्ने अस्माभिः कृते सतीति शेषः । उत्तरे दत्ते सति अस्याः मुक्त्याः विशेषः स्यान्नु । अयं भावः । कदा मुक्तिः इति प्रश्नस्य ऐक्यज्ञानपरिपाकसमाप्त्यनन्तरं निर्विशेषब्रह्मभावो मुक्तिः इत्यादिप्रत्युत्तरं मायिना दत्तं चेत् ऐक्यज्ञानोत्तरकालसम्बन्धादिविशेषवत्त्वं स्यात् मुक्तेः । ततश्च निर्विशेषा मुक्तिः इत्युक्तेः स्वव्याहतिः स्यात् । कदा इत्यादि प्रश्नस्य प्रत्युत्तरं न दत्तं चेत् तूष्णीं भावेन अनुक्त्याख्यं निग्रहस्थानं स्यादिति ॥ ४८ ॥

अपि बुद्ध्यादिरहितः पुरुषार्थी न सर्वथा ।
निखिलानुभवाभावात् पुत्तलीकापुरोगवत् ॥ ४९ ॥

भावप्रकाशिका – अपीत्यादिना निर्विशेषमोक्षो वैशेषिकादिविवक्षितो बुद्ध्यादिविरही च ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – निर्विशेषिता मोक्ष इति पक्षे दोषान्तरं वदन्नेव वैशेषिकादिभिः अङ्गीकृतं मुक्तस्य बुद्ध्यादिराहित्यं निराकरोति— ॥ **अपीत्यादिना** ॥ निर्विशेषभावो मोक्ष इति पक्षे दोषान्तरसमुच्चयार्थः अपिशब्दः बुद्ध्यादिरहितः अन्तःकरणचक्षुरादीन्द्रिय-रहित अत एव तत्तद्विषयभोगरहितश्च मुक्तः सर्वथा पुरुषार्थः अस्यास्तीति पुरुषार्थी न भवति । कुत इत्यत आह— ॥ निखिलेति ॥ निखिलाः समस्ता ये अनुभवः तेषामभावः तस्मात्, बाह्यान्तरज्ञानमात्रशून्यत्वात् इत्यर्थः किमिवेत्यत आह— पुत्तलीकेति, पुत्तलीकाः प्रतिमाः पुरोगा आदयो यस्य तद्वत् । एवमेव वैशेषिकपक्षेऽपि मुक्तस्य बुद्ध्यादिराहित्यात् सः मुक्तोऽपि पुरुषार्थी न भवति ॥ ४९ ॥

मन्दोपकारिणी – दूषणान्तरमाह ॥ **अपीति** ॥ बुद्ध्यादिरहितः बुद्धिः अन्तःकरणं आदिः येषां चक्षुरादिबाह्यकरणानां तैः रहितोऽपि वर्जितश्च मुक्तः सर्वथा पुरुषार्थी पुरुषार्थवान् न भवति । कुतः ? निखिलानुभवाभावात्, निखिलानां अनुभवानां ज्ञानानां अभावात् बाह्याभ्यन्तरसर्वज्ञानमात्रशून्यत्वात् । तत्र दृष्टान्तः पुत्तलीकापुरोगवत् दार्वादिकृतप्रतिमादिवदित्यर्थः । एतेन वैशेषिकोक्तयुक्तिरपि दूषिता भवति । तैरपि मुक्तानां बुद्ध्यादिराहित्याङ्गीकारादिति ॥ ४९ ॥

ज्ञानप्रयत्नवाञ्छावानीशो न ह्यशुभं व्रजेत् ।
स्वसामर्थ्येन तेनैव तं च कुर्यात् स तादृशम् ॥ ५० ॥

भावप्रकाशिका – (नेष्टश्चेत् यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीति वेदोक्तिः । विजानेत्यादिना चरममेव) । तं च तादृशमेव कुर्यात् । जीवं ज्ञानप्रयत्नवाञ्छावन्तमेवाशुभभोगमभुञ्जानं कुर्यादीश्वरः ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – मुक्तस्य बुद्ध्यादिराहित्याङ्गीकारे मुक्तेरपुरुषार्थतारूपदोष उक्तः । इदानीं ईश्वरसारूप्यमाप्तस्य मुक्तस्य बुद्ध्यादिराहित्यं युक्तिविरुद्धञ्चेति वक्तुं तदुपयुक्तमीश्वरस्य स्वरूपं तावदाह— **ज्ञानेत्यादिना** ॥ ईश्वरो हि ज्ञानप्रयत्नेच्छादि-गुणयुक्तः अङ्गीक्रियते । स ज्ञानप्रयत्नवाञ्छावान्, ज्ञानञ्च प्रयत्नश्च वाञ्छा च, ता अस्य सन्तीति तथोक्तः । ईशः अशुभं अनिष्टं न भजेत् हि । हिशब्दः प्रसिद्धिद्योतकः । ईशः तावन्न भुंक्त इति प्रसिद्धम् । अन्यथा ईशत्वव्याघातादित्यर्थः । ईश्वरस्य दुखाभावः किं समर्थोपासनाद्युपायेन, नेत्याह ॥ स्वसामर्थ्येति ॥ ईश्वरस्य दुःखाभोक्तृत्वं स्वसामर्थ्येनैव न रूपान्तरेण इत्यर्थः । नाप्युपायान्तरेण इत्यर्थः । अस्तु नाम ईश्वर ईदृशः मुक्तस्य बुद्ध्यादिसाहित्ये किमायातं इत्यत आह— तेनैवेति । तेनैव स्वसामर्थ्येनैव स ईश्वरः तञ्च स्वोपासकञ्च तादृशं ज्ञानादिमन्तं अशुभभोगवर्जितञ्च कुर्यात् । अन्यथा मुक्तस्य ईश्वर-सारूप्यायुक्तेः इत्यर्थः । तस्मान्मुक्तस्य बुद्ध्यादिराहित्यं युक्तिविरुद्धमिति भावः ॥ ५० ॥

मन्दोपकारिणी – ईश्वरसारूप्यं प्राप्तस्य मुक्तस्य बुद्ध्यादिराहित्यं युक्तिविरुद्धं चेत्याह ॥ **ज्ञानेति** ॥ ज्ञानप्रयत्नवाञ्छावान् ज्ञानं च प्रयत्नश्च वाञ्छा च ताः अस्य सन्तीति तथोक्तः । ईशः नारायणः स्वसामर्थ्येनैव स्वरूपशक्त्यैव अशुभं दुःखं न व्रजेत् न भुङ्क्ते । हिशब्दः प्रसिद्धिद्योतकः । ईशः तावद्दुःखं न भुङ्क्ते इति प्रसिद्धं अन्यथा ईशत्वव्याघातात् इत्यर्थः । सः ईशः तेनैव तं च स्वोपासकमपि तादृशं ज्ञानादिगुणवन्तं अशुभभोगवर्जितं च कुर्यात् । स्वोपासकं स्वसदृशं कुर्यात् । अन्यथा मुक्तस्य ईश्वरसारूप्यायुक्तेः इत्यर्थः । तस्मात् मुक्तस्य बुद्ध्यादिराहित्यं युक्तिविरुद्धमिति भावः ॥ ५० ॥

दुःखव्याप्तं सुखं बद्धे दृष्ट्वा मुक्तेर्निरस्यता ।
स्वरूपं च निरस्येत शून्यवादी तदा भवेत् ॥ ५१ ॥

भावप्रकाशिका – स्वरूपं च बद्धे दुःखव्याप्ति दृष्टम् । तथा चायं प्रयोगः विमतो मुक्तः स्वरूपशून्यो दुःखरहितत्वात् यः स्वरूपशून्यो न भवति स दुःखरहितो न भवति यथा संसारीत्यतिप्रसङ्गः ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – ननु 'यत्र स्वानन्दिनः सन्तः' इत्यत्र मुक्तस्य यः सुखभोग उक्तः स न घटते । मुक्तस्य सुखित्वे दुःखित्वापातात् । सुखदुःखयोः अविनाभूतत्वात् तथा च अत्र प्रयोगः विमतो मुक्तः सुखी न भवति दुःखरहितत्वात् । यः सुखी स दुःखरहितो न भवति यथा संसारी न चासौ मुक्तो दुःखरहितो न भवति तस्मात् न सुखी इत्यत आह— **दुःखव्याप्तमिति** ॥ बद्धे संसारिणि सुखं वर्तमानसुखं दुःखव्याप्तं दुःखाविनाभूतं दृष्ट्वा संसारान्मुक्तेः निरस्यता सुखित्वे दुःखत्वापातभयात् सुखं निराकुर्वता वादिना स्वरूपञ्च निरस्येत मुक्ताविति शेषः । संसारिणि सुखदुःखयोः साहचर्यदर्शनमात्रेण मुक्तावपि तयोः अविनाभावं पश्यता स्वरूपस्यापि ताभ्यां साहचर्यदर्शनात् मुक्तौ सुखदुःखानङ्गीकारवत् स्वस्वरूपञ्च नाङ्गीक्रियेत इति भावः । बाढमिति चेत्तत्राह— शून्येति । तदा मुक्तस्वरूपस्य निरासेऽङ्गीकृते शून्यवादी भवेत् । अयमत्र प्रयोगः— विमतो मुक्तः स्वरूपशून्यः चेतनत्वे सति दुःखरहितत्वात् । यः स्वरूपशून्यो न भवति स चेतनत्वे सति दुःखरहितोऽपि न भवति । यथा संसारीति । तस्मान्मुक्तस्य बुद्ध्यादि-राहित्यसाधिकाया युक्तेराभासत्वान्मुक्तस्य बुद्ध्यादिमत्वं स्वानन्दित्वं च स्थितमेतत् ॥५१॥

मन्दोपकारिणी – मुक्तस्य सुखित्वे दुःखित्वरूपबाधकं आशङ्क्य निराकरोति ॥ **दुःखव्याप्तमिति** ॥ बद्धे संसारिणि वर्तमानं सुखं दुःखव्याप्तं दुःखेन अविनाभूतं दृष्ट्वा मुक्तेः संसारात् मुक्तेः निरस्यता दुःखित्वापातभयेन सुखं निराकुर्वता वादिना स्वरूपं च निरस्येत मुक्तौ इति शेषः । अयं भावः । विमतो मुक्तः सुखी न भवति दुःखरहितत्वात्, यः सुखी सः दुःखरहितो न भवति, दुःखीति यावत् । यथा संसारी । न च असौ मुक्तः दुःखरहितो न भवति, दुःखरहित इति यावत् । तस्मात् न सुखीति । संसारिणि सुखदुःखयोः साहचर्यदर्शनमात्रेण मुक्तावपि तयोः अविनाभावं पश्यता स्वरूपस्यापि ताभ्यां साहचर्यदर्शनात् मुक्तौ सुखदुःखानङ्गीकारवत् स्वरूपं च नाङ्गीक्रियेत । 'मुक्तः स्वरूप-शून्यः चेतनत्वे सति दुःखरहितत्वात् यः स्वरूपशून्यो न भवति सः दुःखरहितो न भवति यथा संसारीति' प्रयोगो ज्ञेयः । मुक्तस्य स्वरूपानङ्गीकारे दोषमाह - शून्येति । तदा मुक्तस्वरूपस्य निरासाङ्गीकारे शून्यवादी भवेत् ॥ ५१ ॥

ननु विप्रतिपन्नः स्यादूर्मिमान् देहवत्त्वतः ।
चैत्रो यथेत्युपाधिः स्यादत्र चाशुद्धदेहिता ॥ ५२ ॥

भावप्रकाशिका – एवं ज्ञानानन्दादि साधयित्वा देहादि साध्यते मुक्तौ - 'नन्वि'त्यादिना ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – एवं मुक्तस्य बुद्ध्यादिमत्वे सिद्धे अर्थात्सिद्धं देहवत्त्वं, तत्र शङ्कते— **नन्वित्यादिना** ॥ विप्रतिपन्नो मुक्तजीव ऊर्मिमान् स्यात् षड्ऊर्मिमान् भवितुं अर्हति देहवत्वतः देहवत्वात् चैत्रो यथा चैत्रवत् । अत्रेतिशब्दः शङ्काग्रन्थसमाप्तौ । अयमत्राभिप्रायः मुक्तस्य यदि बुद्ध्यादिकं स्यात्तर्हि तदाश्रयो देहोऽपि स्यात् देहवत्वे च ऊर्मिमत्वमपरिहार्यं, देहिनः संसारिणः तद्दर्शनात् । तद्भत्वे च मुक्तत्वव्याघात इति मुक्तस्य ऊर्मिमत्वपरिहारायादेहोऽङ्गीकार्यः । देहाभावे च बुद्ध्यादिमत्वं दुर्घटमिति वैशेषिकादयो मन्यन्त इति, एवं परोपन्यस्तस्य देहवत्वानुमानस्य उपाधिमाह— उपाधिरिति । तत्र ऊर्मिमत्वे, अशुद्धदेहिता, अशुद्धश्चासौ देहश्च सोऽस्यास्तीत्यशुद्धदेही, तस्य भावस्तत्ता, प्राकृतदेहित्वं इत्यर्थः । उपाधिः स्यात् । ऊर्मिमत्वस्य शुद्धदेहित्वं उपाधिः प्रयोजकः । तस्य च पक्षाव्यावृत्तिः स्वव्यावृत्या च साध्यस्योर्मिमत्वस्य व्यावर्तकत्वादस्त्येवौपाधिकत्वम् । यत्र अशुद्धदेहित्वाभावः तत्रोर्मिमत्वाभाव यथेश्वर इति व्याप्तिसम्भवात् । एवञ्चोपाध्यभावः साध्याभावसाधने हेतुर्भवति । तथा च प्रयोगः– विमतो मुक्त ऊर्मिमान् न भवति अशुद्ध-देहरहितत्वात् । ईश्वरवदिति । एवञ्च देहवत्वानुमानस्य सोपाधिकत्वात् न तेन साध्य-सिद्धिरिति ॥ ५२ ॥

मन्दोपकारिणी – मुक्तस्य बुद्ध्यादिमत्वाङ्गीकारे बाधकं शङ्कते ॥ **नन्विति** ॥ नन्विति शङ्कायाम् । विप्रतिपन्नः मुक्तजीवः ऊर्मिमान् ऊर्मयः षड्ऊर्मयः अस्य सन्तीति ऊर्मिमान् स्यात् । कुतः देहवत्वतः शरीरित्वात् चैत्रो यथा । इतिशब्दः शङ्कासमाप्तौ । अयं भावः । यदि मुक्तस्य बुद्ध्यादिकं स्यात् तर्हि तदाश्रयो देहोऽपि स्यात् । देहवत्वे उत्पत्याद्यूर्मिमत्वं च स्यात् । देहिनः संसारिणः ऊर्मिमत्वदर्शनात् । ऊर्मिमत्वे च मुक्तत्वव्याघातः इति मुक्तस्य ऊर्मिमत्वपरिहाराय देहाभावोऽङ्गीकर्तव्यः । देहाभावे च बुद्ध्यादिमत्वं दुर्घटं मुक्तस्येति वैशेषिकाः मन्यन्ते इति एवं उपन्यस्तं अनुमानं दूषयति उपाधिरिति ॥ अत्र च ऊर्मिमत्वे अशुद्धदेहिता अशुद्धः प्राकृतः देहः अस्यास्तीति

अशुद्धदेही तस्य भावः अशुद्धदेहिता प्राकृतदेहवत्वं उपाधिः प्रयोजकं स्यात् इत्यर्थः । 'यत्र ऊर्मिमत्वं तत्र अशुद्धदेहिता यथा संसारिणीति साध्यव्यापकतायाः यत्र देहवत्वं तत्र अशुद्धदेहवत्त्वं इति नास्ति । पक्षे मुक्ते अशुद्धदेहवत्त्वस्य अभावेन साधनाव्यापकतायाश्च सत्त्वात् । तथा च व्यापकीभूतः अशुद्धदेहित्वलक्षणः उपाधिः पक्षात् मुक्तात् व्यावृत्तः स्वव्याप्यं ऊर्मिमत्वरूपं साध्यमपि व्यावर्तयति । व्यापकनिवृत्तौ व्याप्यनिवृत्तेः आवश्यकत्वात् । एवं च उपाध्यभावः साध्याभावसाधने हेतुर्भवति । कथं 'विमतो मुक्तः ऊर्मिमान् न भवति अशुद्धदेहरहितत्वात् ईश्वरवत्' इति । एवं च देहवत्त्वानुमानस्य सोपाधिकत्वेन दुष्टत्वात् न तेन साध्यसिद्धिः इति ॥ ५२ ॥

अनैकान्तिकता हेतोर्देहवत्त्वादधीशितुः ।
सोऽदेहश्चेदनिच्छादिर्भवेच्छशविषाणवत् ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – एवं देहवत्त्वानुमानस्योपाधिग्रस्तत्वमुक्त्वेदानीमनैकान्तिकतामाह— ॥ **अनैकान्तिकतेति** ॥ हेतोः देहवत्वहेतोः अनैकान्तिकता स्यात् । कुतः अधीशितुः ईश्वरस्य देहवत्वात् । अयमभिप्रायः पक्षत्रयवृत्तिर्हेतुः अनैकान्तीत्युच्यते । देहवत्वहेतुश्च पक्षीकृते मुक्ते वर्तते । मुक्तस्य ज्ञानानन्दात्मकदेहवत्वाङ्गीकारात् । ऊर्मिमत्वेन सम्प्रतिपन्ने सपक्षे संसारिणि च वर्तते । साध्याभावाधिकरणे विपक्षे ईश्वरे च वर्तते । तस्मात् अनैकान्तिक इति । ननु भवेद्देहवत्वहेतोः अनैकान्तिकता । यदीश्वरस्य देहवत्वं स्यात् तदेव नाभ्युपगच्छामः । तस्माद्विपक्षवृत्तित्वाभावात् कथं अनैकान्तिकता इत्यत आह— स इति। स ईश्वरः अदेहश्चेत् देहरहितश्चेत् अनिच्छादिः इच्छादिगुणरहितः अपि भवेत् । किमिव ? शशविषाणवत् । विमत ईश्वरः इच्छादिरहितः देहरहितत्वात् शशविषाणवत्, इति साधनानुमानं वा, यद्यदेहः स्यात् तर्हि इच्छादिरहितोऽपि स्यात् शशविषाणवदित्यापादनं वाऽत्राभिप्रेतम् ॥ ५३ ॥

मन्दोपकारिणी – देहवत्त्वहेतोः दूषणान्तरमाह ॥ **अनैकान्तिकतेति** ॥ हेतोः देहवत्त्वस्य अनैकान्तिकता व्यभिचारः स्यात् । कुतः अधीशितुः ईश्वरस्य देहवत्त्वात् । अयं भावः - यो देहवान् स ऊर्मिमान् इति व्याप्तिः नास्ति । ईश्वरे देहवत्त्वहेतोः सद्भावेऽपि ऊर्मिमत्त्वस्य साध्यस्याभावात् । अतोऽनैकान्तिको हेतुरिति । ईश्वरे देहवत्त्वहेतोरेव अभावात् न अनैकान्तिकता इति आशङ्क्याह ॥ स इति ॥ सः ईश्वरः अदेहश्चेत्

देहरहितश्चेत् तर्हि सः अनिच्छादिः न विद्यन्ते इच्छाज्ञानप्रयत्नादयो गुणाः यस्य सः इच्छादिगुणरहितः स्यात् इत्यर्थः । किमिव शशविषाणवत् शशशृङ्गमिव । अनेन 'ईश्वरः इच्छादिरहितः देहरहितत्वात् शशविषाणवत्' इति अनुमानम् । यदि ईश्वरो निर्देहः स्यात् तर्हि इच्छादिरहितोऽपि स्यात् इत्यापादनं वा अत्र अभिप्रेतम् ॥ ५३ ॥

ज्ञात्रादिरूपमस्य स्याद्वैलक्षण्याय चेत्ततः ।
तदेव देहशब्दोक्तं न ह्यसौ प्राकृताकृतिः ॥ ५४ ॥

भावप्रकाशिका – ज्ञात्रादिरूपमेव देहश्चेत्स्यान्नाम ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – नन्वीश्वरस्य ज्ञात्रादिरूपसद्भावात् कथं शशविषाणसाम्यमित्यत आह— **ज्ञात्रादीति** ॥ ईश्वरस्य ततः शशविषाणादेः वैलक्षण्याय विलक्षणत्वसिद्धये ज्ञात्रदिरूपं स्यात् अङ्गीक्रियते चेत् तर्हि अस्येश्वरस्य देहवत्वं त्वयाप्यङ्गीकृतमेव कुत इति चेत्तत्राह— तदेवेति । तदेव ज्ञात्रादिरूपमेव देहशब्दोक्तम् । अस्माभिः इति शेषः । असावीश्वरः प्राकृताकृतिः प्राकृतदेहवान् न हि । अस्माभिः ईश्वरस्य प्राकृतदेहवत्वं न अङ्गीक्रियते । तथा च वस्तुनि विवादाभावस्य अप्रयोजकत्वात्सिद्धं ईश्वरस्य देहवत्वमिति देहवत्वहेतोः अनैकान्तिकता तादवस्थ्यमिति ॥ ५४ ॥

मन्दोपकारिणी – ननु ईश्वरस्य ज्ञात्रादिरूपसद्भावात् कथं शशशृङ्गसाम्यं इत्यत आह ॥ **ज्ञात्रादीति** ॥ अस्य ईश्वरस्य ततः शशविषाणादेः वैलक्षण्याय विलक्षणत्वसिद्धयर्थं ज्ञात्रादिरूपं ज्ञातृ आदिः यस्य तत् तच्च तत् रूपं च ज्ञातृरूपं इच्छितृरूपं इत्यादिरूपं इत्यादिस्वरूपं स्यात् चेत् अङ्गीक्रियते चेत् । तर्हि तदेव ज्ञात्रादिरूपमेव देहशब्दोक्तं देहाख्यशब्देन उक्तम् । अस्माभिरिति शेषः । तर्हि ईश्वरस्य देहवत्त्वं अङ्गीकृतमेव इत्यर्थः । ईश्वरस्य ज्ञात्रादिरूपं अस्तीति त्वया यदुच्यते तदेव अस्माभिः देहशब्देनोच्यते । तथा च वस्तुनि विवादाभावात् नाममात्रे विवादस्य अप्रयोजकत्वात् सिद्धं ईश्वरस्य देहवत्त्वं इति । ईश्वरस्य देहवत्त्वाङ्गीकारे ऊर्मिमत्त्वशङ्कां परिहर्तुमाह ॥ न हीति ॥ असौ ईश्वरः प्राकृताकृतिः प्राकृता विकारभूता आकृतिः देहः यस्य सः तथोक्तः । प्राकृतदेहवान् न भवति । हि यस्मात् तस्मात् ऊर्मिमान् न भवतीत्यर्थः । तथा च ईश्वरस्य अप्राकृतज्ञानानन्दात्मक स्वरूपदेहवत्त्वस्य सद्भावात् ऊर्मिमत्वस्य अभावात् देहवत्त्वहेतोः अनैकान्तिकता सिद्धैव इति भावः ॥ ५४ ॥

एवं स्वरूपदेहत्वं मुक्तस्याप्युररीकृतम् ।
नानिष्टभोगस्तेन स्यात् प्राकृतक्षेत्रसम्भवः ॥ ५५ ॥

पदार्थदीपिकोद्बोधिका – अस्तु तर्हीश्वरस्य अप्राकृतज्ञानानन्दात्मकस्वरूपभूतदेहवत्त्वम् । तथापि प्रकृते मुक्तस्य देहवत्त्वे किं आयातमित्यतः प्रकृते योजयति— ॥ **एवमिति** ॥ मुक्तस्याप्येवं ईश्वरवत्स्वरूपदेहवत्त्वं, स्वरूपभूतज्ञानानन्दाद्यात्मकत्वं उररीकृतं अङ्गीकृतम् । अस्माभिरिति शेषः । तच्चेश्वरस्वरूपवदेव सिद्ध्यति । अत एवेश्वरवदूर्मिमत्वाभावो बुद्ध्यादिमत्वं सिद्धम् । मुक्तस्य सुखभोग एवास्ति न दुःखभोग इत्येतदुपपादयति ॥ नानिष्टेति ॥ अत्राप्येवमिति सम्बध्यते । एवं ईश्वरवत् मुक्तस्याप्यनिष्टभोगो न स्यात् । कथंभूत इत्यत आह— प्राकृतेति । प्राकृतक्षेत्रं प्राकृतशरीरं तस्मात् सम्भव उत्पत्तिर्यस्य स तथोक्तः । प्राकृतशरीरसम्बन्धज इत्यर्थः । अनेनैतदुक्तं भवति– यदुक्तं परेण मुक्तस्य सुखित्वे दुःखित्वापात इति तदसत् । दुःखस्य प्राकृतशरीरनिमित्तकत्वात् मुक्तस्य च तदभावात् न दुःखभोगः । किन्तु केवलपरमानन्दभोग एवेति ॥ ५५ ॥

मन्दोपकारिणी – एवमनुमाने दूषिते सति लब्धमर्थमाह ॥ **एवमिति** ॥ एवं ईश्वरवत् मुक्तस्यापि स्वरूपदेहत्वं ज्ञानानन्दादिस्वरूपदेहवत्त्वं उररीकृतं अङ्गीकृतम् । अस्माभिः इति शेषः । तथा च मुक्तस्य ईश्वरवदेव ऊर्मिमत्वाभावात् बुद्ध्यादिमत्त्वं स्वानन्दभोगश्चास्तीति सिद्धम् । तेन मुक्तस्य सुखभोग एव अस्ति न दुःखभोगः इत्येतत् उपपादयति ॥ नेति ॥ अपि इत्येतत् अत्रापि सम्बद्ध्यते । तेन पूर्वोक्तहेतुना ईश्वरवत् मुक्तस्यापि अनिष्टभोगः अनिष्टस्य दुःखस्य भोगः न स्यात् । कथंभूतः प्राकृतक्षेत्रसम्भवः प्राकृतं च तत् क्षेत्रं शरीरं च तस्मात् सम्भवः जन्यः । 'क्षेत्रं पत्नीशरीरयोः' इत्यमरः । दुःखभोगस्य प्राकृतशरीरनिमित्तत्वात् । मुक्तस्य च प्राकृतशरीराभावात् न दुःखभोगः । किं तु केवलपरमानन्दभोग एव अप्राकृतशरीरनिमित्तकः इति । मुक्तस्य सुखित्वे दुःखित्वापातः इति यदुक्तं तन्नेति भावः ॥ ५५ ॥

विमतो नावयववान् विनाशित्वप्रसङ्गतः ।
पटवच्चेदवयवा निरस्यन्तेऽत्र कीदृशाः ॥ ५६ ॥

भावप्रकाशिका – तत्रापि नावयवितेत्याशङ्क्य निरस्यते विमत इत्यादिना ॥ ५६ ॥

पदार्थदीपिकोद्बोधिका – नन्वेवं 'स्वरूपदेहमित्यत्र यदुक्तं मुक्तस्य देहात्मकत्वं तदयुक्तम् । देहस्य सावयवत्वात् । तदात्मकस्य च मुक्तस्य सावयवत्वापातात् । सावयवत्वे विनाशित्वं स्यादिति शङ्कते— ॥ **विमत इत्यादिना** ॥ विमतः सावयवत्वनिरवयवत्वाभ्यां विमतिविषयो मुक्तः अवयववान्न भवति । कुतः विनाशित्वप्रसङ्गतः विनाशः अस्यास्तीति, तस्य भावः तत्वं, तस्य प्रसङ्गः प्रसक्तिः तस्मादिति ततः । सावयवत्वे विनाशित्वापातात् न सावयव इत्यर्थः, अयमत्र प्रयोगः - विमतो मुक्तो निरवयवः अविनाशित्वात् परमाणुवत्, यद्यवयवी स्यात्तर्हि विनाशी स्यात् यथा पट इति विपक्षे बाधकतर्कश्च । तस्मान्निरवयवत्वात् न मुक्तस्य सावयवदेहात्मकत्वमिति । तदेतत्सामान्यतोऽनूद्य निराकरोति— अत्र मुक्ते अवयवा निरस्यन्ते चेत्, कीदृशाः? कीदृशा इत्यनेनावयवानां अनेकविधत्वं सूचितम् । तेनैव भिन्नावयवनिरासोऽभिन्नावयवनिरासो वेति विकल्पोऽपि सूचितः ॥ ५६ ॥

मन्दोपकारिणी – ननु एवं स्वरूपदेहत्वं इत्यनेन मुक्तस्य देहात्मकत्वं यदुक्तं तन्न । देहस्य सावयवत्वात् । तदात्मकस्य मुक्तस्यापि सावयवत्वात् । सावयवत्वे विनाशित्वं स्यादिति शङ्कते ॥ **विमत इति** ॥ विमतः मुक्तः अवयववान् न भवति । विनाशित्व-प्रसङ्गतः विनाशित्वस्य प्रसङ्गतः आपातात् पटवत् । 'विमतो निरवयवः अविनाशित्वात् यः अविनाशी स निरवयवः यथा परमाणुः' इति प्रयोगः । 'यदि अवयवी स्यात् तर्हि विनाशी स्यात् पटवत्' इति विपक्षे बाधकतर्कश्च । तस्मात् मुक्तस्य निरवयवत्वात् न सावयवदेहात्मकत्वं इति । तदेतत् दूषयितुं विकल्पयति ॥ चेदिति ॥ एवं अनुमानादिना मुक्तस्य अवयवाः निरस्यन्ते चेत् तर्हि पृच्छामः, किमिति, अत्र मुक्ते कीदृशाः अवयवाः निरस्यन्ते इति भिन्ना वा अभिन्ना वा इत्याशयः ॥ ५६ ॥

सिद्धसाधनता हेतोस्ते भिन्नाश्चेदचिन्मयाः ।
आत्मनो भेदरहिता एष्टव्या एव वादिभिः ॥ ५७ ॥

पदार्थदीपिकोद्बोधिका – भिन्नावयवनिरासपक्षं दूषयति— **सिद्धसाधनतेति** ॥ ते अवयवा भिन्ना अचिन्मया निरस्यन्ते चेत्तर्हि निरवयवसाधकविनाशित्वहेतोः सिद्धसाधनता-स्यात् । मुक्तस्य भिन्नावयवराहित्यं सिद्धमस्माकम् । अभिन्नावयवनिरासपक्षं दूषयति— आत्मन इति । आत्मनो जीवस्य भेदरहिता अवयवा वादिभिः एष्टव्या अङ्गीकर्तव्या एव । अभिन्नावयवानां अङ्गीकार्यत्वात् न तन्निराकरणं युक्तमिति भावः ॥ ५७ ॥

मन्दोपकारिणी – आद्यं दूषयति ॥ **सिद्धसाधनतेति** ॥ ते अवयवाः भिन्नाः अचिन्मयाः चिन्मयाः न भवन्तीति अचिन्मयाः अचेतनरूपा जडा इति यावत् । निरस्यन्ते चेत् तर्हि निरवयवत्वसाधकविनाशित्वहेतोः सिद्धसाधनता स्यात् । मुक्तस्य भिन्नावयव-राहित्यस्य अस्माकं सिद्धत्वात् इति भावः । द्वितीयं निराकरोति ॥ आत्मन इति ॥ आत्मनः जीवस्य भेदरहिताः अवयवाः वादिभिः एष्टव्याः अङ्गीकर्तव्या एव । वादित्व-साम्यात् यत्र क्वापि अभिन्नावयवानां अङ्गीकार्यत्वात् न निराकरणं युक्तं इति भावः ॥ ५७ ॥

परमाण्वादिदेशेषु व्याप्त्यै व्यामादिकेष्वपि ।
यथाऽऽत्मनः प्रदेशाः स्युस्तेषां नोऽवयवास्तथा ॥ ५८ ॥

पदार्थदीपिकोद्बोधिका – ननु वैशेषिकैः कुत आत्माभिन्ना अवयवा अङ्गीकर्तव्या इत्यत आह— **परमाण्विति** ॥ तेषां वैशेषिकाणां पक्षे आत्मनः परमात्मनो जीवात्मनो वा । व्याप्त्यै व्याप्तिसिद्ध्यर्थम् । परमाणुरादिर्येषां ते परमाण्वादयः तेषां देशास्तेषु । परमाणुद्व्यणुक त्र्यणुकाद्यवस्थानयोग्येषु स्थानेषु । व्यामादिकेष्वपि व्यायतं हस्तद्वयम् व्याम इत्युच्यते । स आदिर्येषां तेष्वपि, आत्मनः प्रदेशा अवयवा यथा स्युः अस्मत्पक्षेऽवयवा अभिन्नास्तथा स्युः । आत्मनो व्याप्तिं अङ्गीकुर्वतां वैशेषिकाणां पक्षे परमाण्वाद्यल्पस्थले व्यामादिबहुस्थलेषु च आत्मनः प्रदेशा अङ्गीकर्तव्याः । अन्यथा व्याप्त्यसम्भवात् । ते चात्मप्रदेशा आत्माभिन्ना एवाङ्गीकर्तव्याः । अन्यथा एकस्यात्मनः सर्वव्याप्त्यसम्भवात् । एवं सति तेषां पक्षे यथा आत्माभिन्ना आत्मप्रदेशाः तथाऽस्मत्पक्षेऽप्यात्मनो मुक्तजीवस्य त अवयवाः तदभिन्नाः, सुखज्ञानादिगुणा एव करचरणाद्यात्मकाः सम्भवेयुः इति भावः ॥ ५८ ॥

मन्दोपकारिणी – ननु वैशेषिकैः कुतः आत्मनः अभिन्नावयवाः अङ्गीकर्तव्याः इत्यत आह ॥ **परमाण्विति** ॥ तेषां वैशेषिकाणां पक्षे आत्मनः परमात्मनो जीवात्मनो वा । व्याप्त्यै व्याप्तिसिद्ध्यर्थम् । परमाण्वादिदेशेषु परमाणुः आदिः येषां ते ते च ते देशाः प्रदेशाश्च तेषु । आदिशब्देन द्व्यणुकत्र्यणुकादिस्थलानि गृह्यन्ते । परमाण्वाद्यल्पस्थलेषु इत्यर्थः । व्यामादिकेषु व्यामो नाम तिर्यक् प्रसारितं हस्तद्वयम् । 'व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरं' इत्यमरः । स एव आदिः येषां ते व्यामादिकाः तेष्वपि । यथा आत्मनः प्रदेशाः अवयवाः स्युः तथा नः अस्मत्पक्षे अवयव्यभिन्नाः अवयवाः स्युः । अयं

भावः - आत्मनः व्याप्तिं अङ्गीकुर्वतां वैशेषिकाणां परमाण्वाद्यल्पस्थलेषु व्यामादिस्थलेषु च आत्मनः प्रदेशाः अङ्गीकर्तव्या एव। अन्यथा व्याप्त्यसम्भवात्। तत्प्रदेशा आत्माभिन्ना एव अङ्गीकर्तव्याः। अन्यथा एकस्य आत्मनः सर्वव्याप्त्यसम्भवात्। एवं च सति तेषां पक्षे यथा आत्माभिन्नाः आत्मप्रदेशाः तथा अस्मत्पक्षेऽपि आत्मनः मुक्तजीवस्य अवयवाः तदभिन्नाः सुखज्ञानादिगुणाः एव करचरणाद्यात्मकाः सम्भवेयुरिति ॥ ५८ ॥

मुक्तो रूपादिवित् सत्वाज्जडान्यत्वे सतीशवत्।
दृष्टान्तोऽसाध्यविकलस्तस्य सर्वज्ञताग्रहात् ॥ ५९ ॥

भावप्रकाशिका – मुक्त इत्यादिना इन्द्रियवत्त्वं प्रसाध्यते ॥ ५९ ॥

पदार्थदीपिकोद्बोधिका – मुक्तस्यावयवत्वं प्रसाध्येदानीमिन्द्रियवत्वं प्रसाध्यते— ॥ **मुक्त इत्यादिना** ॥ मुक्तो रूपादिवित् रूपादिविषयकज्ञानवान्, तादृशविषयवांश्च, जडान्यत्वे सति सत्वादीशवत्। नन्वीश्वरस्य रूपादिविषयकज्ञानाभावाद्दृष्टान्तः साध्यविकल इत्यत आह— दृष्टान्त इति। दृष्टान्तः ईशवदित्ययं दृष्टान्तः साध्येन साध्यधर्मेण विकलो रहितः स न भवतीत्यसाध्यविकलः। कुत इत्यत आह— तस्येति। तस्य ईश्वरवादिभिः अङ्गीकृतेश्वरस्य सर्वज्ञताग्रहात् सर्वज्ञताङ्गीकारात्। रूपादेरपि सर्वान्तः पातित्वात्तद्विज्ञानाभावे सर्वज्ञताऽसम्भवादिति भावः ॥ ५९ ॥

मन्दोपकारिणी – एवं मुक्तस्य अभिन्नावयवत्त्वं प्रसाध्य इदानीं इन्द्रियवत्वादि साधयति ॥ **मुक्त इति** ॥ मुक्तः रूपादिवित् रूपं आदिः येषां ते रूपादयो विषयाः तान् वेत्तीति रूपादिवित्। आदिशब्देन रसगन्धशब्दस्पर्शाः ग्राह्याः। प्रकृतो मुक्तः रूपादिविषयज्ञानवान् भवितुमर्हति जडान्यत्वे सति जडाद्भिन्नत्वे सति सत्त्वात् वस्तुत्वात् चेतनत्वादिति यावत्। यः चेतनः सः रूपादिज्ञानवान् ईश्वरो यथा इत्यर्थः। ननु ईश्वरस्य रूपादिज्ञानाभावात् दृष्टान्तः साध्यविकल इत्यत आह ॥ दृष्टान्त इति ॥ दृष्टान्तः ईशवत् इत्ययं दृष्टान्तः असाध्यविकलः साध्येन विकलः रहितः न भवतीति असाध्यविकलः। कुतः तस्य ईश्वरस्य वादिभिः अङ्गीकृतस्य ईश्वरस्य सर्वज्ञताग्रहात् सर्वज्ञतायाः ग्रहात् अङ्गीकारात्। ईश्वरवादिभिः ईश्वरस्य सर्वज्ञत्वस्य स्वीकारात् रूपादिविषयज्ञानस्य सत्त्वात् दृष्टान्तः साध्यविकलो न भवतीति भावः ॥ ५९ ॥

ईश्वरो न सुखी तेन रूपाद्यनुभवन्नपि ।
दुःखप्रसङ्गादिति मा वादि तद्व्याप्तिदूषणात् ॥ ६० ॥

पदार्थदीपिकोद्बोधिका – ननु सर्वज्ञत्वाद्रूपादिज्ञानवान् अपि ईशः न रूपाद्यनुभव-जन्यसुखवान् । सुखित्वे दुःखित्वापातात् । 'मुक्तौ रूपादिवित्सत्वात्' इत्यत्र च मुक्तस्य रूपादिज्ञानजन्यसुखानुभवो भवद्विवक्षितः । तस्माद्दृष्टान्तः असाध्यविकलो न भवतीत्या-शङ्क्य परिहरति— **ईश्वर इत्यादिना** ॥ ईश्वरो रूपाद्यनुभवन्नपि जानन्नपि तेन रूपादि-ज्ञानेन सुखी न स्यात् दुःखप्रसङ्गात्, सुखित्वे दुःखित्वापातात्, इति मा वादि न ब्रूयात् । कुतः तद्व्याप्तिदूषणात् । यः सुखी स दुःखी यथा चैत्र इति तदुक्तव्याप्तेर्दूषितत्वात् । 'ननु सौख्यादिमान्नेशो दुःखादिरहितत्वतः' इत्याशङ्क्य एवं 'विमतो ज्ञानी न भ्रान्तिरहितत्वतः' इति सत्प्रतिपक्षत्वेन च । तस्यैवामन्दमानन्दं वदन् 'नाश्राव्यसौ कथमिति' कालात्ययाप-दिष्टत्वेन च दुःखादिरहितत्वानुमानस्य प्रागेवास्माभिः दूषितत्वादिति भावः । तस्मात् ईश्वरस्य सुखाद्यनुभवसद्भावात् न दृष्टान्तोऽसाध्यविकल इति फलितार्थः ॥ ६० ॥

मन्दोपकारिणी – ननु रूपादिवित् इत्यत्र मुक्तस्य सुखानुभवजनकरूपादिज्ञानं भवतां विवक्षितम् । तथा च तादृशं रूपादिज्ञानं ईश्वरे नास्तीति कथं दृष्टान्तः साध्यविकलो न भवतीति आशङ्क्य परिहरति ॥ **ईश्वर इति** ॥ ईश्वरः रूपादिविषयजातं अनुभवन्नपि जानन्नपि तेन रूपादिज्ञानेन सुखी न भवति । कुतः दुःखप्रसङ्गात् सुखित्वे दुःखित्वापातात् इति मा वादि त्वया न वक्तव्यम् । कुतः तद्व्याप्तिदूषणात् तद्व्याप्तेः तस्याः 'यः सुखी स दुःखी यथा संसारी' इत्युक्तायाः व्याप्तेः दूषणात् । 'ननु सौख्यादिमान् न ईशः' इत्यादिना पूर्वं दूषितत्वात् इति भावः । तस्मात् ईश्वरस्य रूपाद्यनुभवजन्यसुखसद्भावात् न साध्यविकलो दृष्टान्तः इत्यर्थः 'वदेः कर्मणि लुङ्' ॥ ६० ॥

दृष्टान्तो यस्य नेष्टोऽयं तस्य स्याद्व्यतिरेकवान् ।
शिलावदित्यतः शुद्धचिद्देहेन्द्रियभोग्यसौ ॥ ६१ ॥

भावप्रकाशिका – भाट्टादेरनीश्वरत्वादीशवदित्ययं दृष्टान्तो नेष्टश्चेत् ॥ ६१ ॥

पदार्थदीपिकोद्बोधिका – ननु भवेदिदं मुक्तो रूपादिज्ञानवान् जडान्यत्वे सति सत्वादीशवदिति सर्वज्ञेश्वरदृष्टान्तेन मुक्तस्य रूपादिज्ञानसमर्थं, सर्वज्ञमीश्वरं अभ्युपगच्छतः

प्रति । ये तु निरीश्वरभाट्टाद्यास्तेषामयं दृष्टान्तो न सम्मत इति न तान्प्रतीदं समर्थनं युक्तमित्यत आह— **दृष्टान्त इति** ॥ यस्य वादिनोऽयं दृष्टान्तो नेष्टः सर्वज्ञेश्वरदृष्टान्तो न सम्मतः तस्य व्यतिरेकः साध्यसाधनाभावः सोऽस्यास्तीति व्यतिरेकवान् स्यात् । साध्य-साधनाभावविशिष्टोऽन्यः कश्चन दृष्टान्तो भवति । यथा मुक्तो रूपादिविज्ञानवान् जडान्यत्वे सति सत्वात् यो रूपादिज्ञानवान् न भवति, स जडान्यत्वे सति सन्न भवति यथा शिलेत्यादि व्यतिरेकदृष्टान्तो भवतीत्यर्थः । निरीश्वरोऽपि यो भाट्टादिर्वेदप्रामाण्यमभ्युप-गच्छति तं प्रति 'यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि' 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा' इत्यादिवाक्यं मुक्तस्य रूपज्ञानादिसद्भावे प्रमाणत्वेनोदाहर्तव्यम् । एवं मुक्तस्य देहेन्द्रियादि-मत्वं आनन्दभोगवत्त्वञ्च प्रसाध्येदानीमुपसंहरति— अत इति । अत मुक्तदेहेन्द्रियादिमत्त्वे साधनप्रमाणसद्भावाद्बाधकाभावाच्च असौ मुक्तः शुद्धचिद्देहेन्द्रियभोगी देहश्चेन्द्रियाणि च भोगाश्च, शुद्धा च सा चिच्च, तदात्मकाश्च ते देहेन्द्रियभोगाश्च तेऽस्य सन्तीति तादृशः ॥

मन्दोपकारिणी – ननु ईश्वरावादिनं प्रति ईश्वरदृष्टान्तेनैवं साधनं अयुक्तं इत्यत आह ॥ **दृष्टान्त इति** ॥ यस्य निरीश्वरवादिनः अयं ईश्वरवत् इत्युक्तः दृष्टान्तः इष्टः संमतः न । तस्य व्यतिरेकवान् व्यतिरेकः साध्यसाधनयोः अभावः सः अस्यास्तीति व्यतिरेकवान् । यः रूपादिज्ञानी न भवति स चेतनो न भवति शिलावत् पाषाणो यथा इत्येवंरूपः व्यतिरेकदृष्टान्तः स्यात् । एवं मुक्तस्य देहवत्त्वं इन्द्रियवत्त्वं आनन्दभोगवत्त्वं च प्रसाध्य इदानीं उपसंहरति ॥ अत इति ॥ अतः मुक्तस्य देहेन्द्रियादिमत्वसाधकप्रमाणसद्भावात् बाधकाभावाच्च असौ मुक्तः शुद्धचिद्देहेन्द्रियभोगी शुद्धा अप्राकृता स्वरूपभूतेति यावत् । सा च सा चित् ज्ञानं च देहश्च इन्द्रियाणि शुद्धचिदात्मकानि च तानि देहेन्द्रियाणि च तैः भोगः सुखं अस्यास्तीति एतादृशः भवत्येव । 'भोगः सुखे स्त्र्यादिभृतौ' इत्यमरः ॥६१॥

स्वानन्दविषये मोक्षे वेदोक्ते युक्तिसाधिते ।
द्वेषोऽयं वादिनां कस्मात् तद्विरुद्धेऽथवाऽऽग्रहः ॥ ६२ ॥

भावप्रकाशिका – 'यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राप्ताः कामास्तत्र मामृतं कृधीन्द्रायेन्दो परिस्रवे'ति वेदोक्तिः ॥ ६२ ॥

पदार्थदीपिकोद्बोधिका – एवं अस्मदुक्तप्रकारेण मुक्तस्याप्राकृतदेहेन्द्रियज्ञानवत्त्वे प्रमाणसिद्धेऽपि वादिनामेवंविधमोक्षानभ्युपगमो न प्रमाणमूलोऽपि तु द्वेषमूल एव । तथापि तद्विरुद्धमोक्षाभ्युपगमश्च दुराग्रहमूल एवेत्याह— ॥ **स्वेति** ॥ स्वानन्दविषये स्वरूपभूतः आनन्दः स्वानन्दः स एव विषयो भोग्यो यस्मिन्, तस्मिन् । वेदोक्ते 'यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते' 'कामस्य यत्राप्ताः कामास्तत्र मामृतं कृधीन्द्रायेन्दो परिस्रव' 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः' 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'त्यादिवेदवाक्यैरुक्ते, निर्दुःखानन्दरूपतया प्रतिपादिते युक्तिसाधिते, 'ज्ञानप्रयत्नवाञ्छावानीशो न ह्यशुभं भजेत् । स्वसामर्थ्येन तेनैव तञ्च कुर्यात्स तादृशम् । सोऽदेहश्चेदनिच्छादिर्भवेच्छशविषाणवत् । मुक्तो रूपदिवित्सत्वाज्जडान्यत्वे सतीशवत्' इत्यादियुक्तिभिश्च साधिते मोक्षे वादिनामयं द्वेषः कस्मात् । किं मूलः? अथ तद्विरुद्धे अस्मदुक्तमोक्षविरुद्धे निर्विशेषब्रह्मत्वादिरूपमोक्षे आग्रहो वा कस्मात् । तत्र च स्वसमयपक्षपातमन्तरेण न किञ्चिदपि कारणं पश्याम इत्यर्थः ॥

मन्दोपकारिणी – ननु तर्हि भवदुक्तप्रकारमेव मोक्षं अनभ्युपगम्य तद्विरुद्धमोक्षाङ्गीकारो वादिनां कुत इत्यत आह ॥ **स्वानन्देति** ॥ स्वानन्दविषये स्वानन्द एव स्वरूपभूतानन्द एव विषयो भोग्यो यस्मिन् स तथोक्तः तस्मिन् । वेदोक्ते वेदैः 'यत्र आनन्दाश्च मोदाश्च' 'अक्षण्वन्तः कर्णवन्तः सखायः' 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' 'सोऽश्नुते सर्वान् कामान् सह' इत्यादि वेदवाक्यैः उक्ते निर्दुःखपरमानन्दतया प्रतिपादिते । युक्तिसाधिते युक्तिभिः 'ज्ञानप्रयत्नवाञ्छावान् ईशः न हि अशुभं व्रजेत्' इत्यादियुक्तिभिश्च साधिते मोक्षे वादिनां अयं दोषः कस्मात् किं मूलकः । अथवा तद्विरुद्धे तस्य अस्मदुक्तस्य मोक्षस्य विरुद्धे निर्विशेषब्रह्मभावरूपमोक्षे आग्रहः कस्मात् किं मूलक इति । तत्तत्स्वभावमन्तरेण द्वेषाग्रहयोः मूलं न पश्यामः इति भावः ॥ ६२ ॥

ततः स्वतः प्रमाणेन देवो वेदेन वेदितः ।
विष्णुर्मोक्षादिदातेति विश्वं भवति शोभनम् ॥ ६३ ॥

पदार्थदीपिकोद्बोधिका – 'आस्माकेऽपेक्षिते पक्षे' इत्युक्तमुपसंहरति—

तत इति ॥ ततोऽस्मन्मतविरुद्धानामप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्च तानि मतान्यनादृत्य स्वतः प्रमाणेन अन्यानपेक्षप्रमाणेन स्वप्रामाण्यग्रहणे स्वव्यतिरिक्तप्रमाणान्तर-

निरपेक्षेणेत्यर्थः । वेदेन वेदितः स्वातन्त्र्याद्यशेषगुणपूर्णतया निर्दोषतया च प्रतिपादितः देवः क्रीडादिगुणविशिष्टः विष्णुः श्रीनारायणो मोक्षस्य दातेति विश्वं तत्तदपेक्षितं मोक्षाद्यखिलं शोभनं मङ्गलं भवति ॥ ६३ ॥

मन्दोपकारिणी – 'आस्माकेऽपेक्षिते पक्षे मोक्षं दद्यादधोक्षजः' इत्युक्तं उपसंहरति ॥ **तत इति** ॥ ततः अस्मन्मतविरुद्धानां अप्रामाणिकत्वात् प्रमाणविरुद्धत्वाच्च तानि मतानि अनादृत्य विष्णुः व्याप्तः नारायणः मोक्षादिदाता । आदिशब्देन सृष्ट्यादेः ग्रहणम् । मोक्षः आदिः यस्य तत् तस्य दाता इति इत्थं अङ्गीकारे सति विश्वं अखिलं तत्तदपेक्षितं मोक्षादि शोभनं मङ्गलं भवति । कथंभूतो विष्णुः स्वतः प्रमाणेन स्वप्रामाण्यग्रहणार्थं स्वव्यतिरिक्त-प्रमाणान्तरनिरपेक्षेण वेदेन वेदितः स्वातन्त्र्याद्यशेषगुणपूर्णतया निर्दोषतया च प्रतिपादितः देवः क्रीडादिगुणविशिष्टः ॥ ६३ ॥

इत्यादीन् दर्शयन्त्यर्थान् व्याख्योपन्याससंयुता ।
त्रिविक्रमार्येण तदा विश्वाभिज्ञस्य शुश्रुवे ॥ ६४ ॥

पदार्थदीपिकोद्बोधिका – 'तदा तदाननाम्भोजादि'त्याद्युक्तमुपसंहरन्नेव 'त्रिविक्रमार्यं सोऽपश्यत्' इति प्रकृतमनुसरति— **इत्यादीनिति** ॥ इत्यादीन् 'प्रधानमपराधीनं' इत्यादी-नर्थान् स्वपक्षसाधनपरपक्षनिराकरणरूपान् प्रमेयान् दर्शयन्ती, विश्वं अखिलमभिजानातीति विश्वाभिज्ञः पूर्णप्रज्ञस्तस्य उपन्याससंयुता व्याख्या त्रिविक्रमार्येण तदा शुश्रुवे ॥ ६४ ॥

मन्दोपकारिणी – 'तदा तदाननाम्भोजाद्वृत्तोपन्यासभारती' इत्यारभ्योक्तं उपसंहरन्नेव त्रिविक्रमार्यं सोऽपश्यत् इति प्रकृतमनुसरति ॥ **इत्यादीनिति** ॥ इत्यादीन् पूर्वोक्तान् अर्थान् प्रमेयविशेषान् दर्शयन्ती प्रतिपादयन्ती विश्वाभिज्ञस्य विश्वं अभितः सम्यक् जानातीति विश्वाभिज्ञः तस्य पूर्णप्रज्ञाचार्यस्य उपन्याससंयुता उपन्यासेन वाङ्मुखेन संयुता व्याख्या प्रवचनं त्रिविक्रमार्येण त्रिविक्रमपण्डिताचार्येण तदा व्याख्यानसमये शुश्रुवे श्रुता । 'श्रु श्रवणे इति धातोः कर्मणि लिट् आत्मनेपदं शुश्रुवे शुश्रुवाते शुश्रुविरे' ॥ ६४ ॥

अथ प्रायुङ्क्त विविधान् बोधचापगुणेरितान् ।
विपक्षयुक्तान् वीर्येण तीक्ष्णांस्तर्कशरानसौ ॥ ६५ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथ श्रीमध्वोपन्याससमाप्त्यनन्तरं असौ त्रिविक्रमार्यः विविधान् नानाविधान् बोध एव चापो धनुस्तस्य यो गुणस्तेन ईरितान् प्रेरितान् विपक्षयुक्तान् मध्वमतविरुद्धसिद्धान्तयुक्तान् तीक्ष्णान् प्रतिपक्षप्रतिक्षेपदक्षान् तर्का एव शरास्तान् अनुमानाख्यशरानित्यर्थः । वीर्येण सामर्थ्येन प्रायुङ्क्त प्रयुयोज । कश्चिद्योद्धा प्रतिवीरनिरासाय चापगुणेरितान् विपक्षयुक्तान् वेः पक्षिणः पक्षाः पतत्राणि तैर्युक्तान्, विः पक्षिपरमात्मनोः' इत्याभिधानम्, तीक्ष्णान् विविधान् सायकान् वीर्येण बलादाक्रम्य यथा विसृजेत्तद्वदिति श्लेषार्थः ॥ ६५ ॥

मन्दोपकारिणी – अथेति ॥ अथ श्रीमध्वोपन्याससमाप्त्यनन्तरं असौ त्रिविक्रमाचार्यः विविधान् तर्कशरान् तर्का एव युक्तय एव शराः बाणाः तान् वीर्येण बुद्धिबलेन । 'वीर्यं बले प्रभावे च' इत्यमरः प्रायुङ्क्त प्रयोजितवान् । 'युजिर्योगे इत्यतो लङ् आत्मनेपदं अयुङ्क्त अयुञ्जातां अयुञ्जत' । कथंभूतान् बोधचापगुणेरितान् बोधः ज्ञानमेव चापस्य गुणः धनुषः मौर्वी तेन ईरितान् । विपक्षयुक्तान् मध्वमतविरुद्धसिद्धान्तयुक्तान् । तीक्ष्णान् व्याप्त्यादि-मत्तया दृढान् । यथा कश्चित् योद्धा प्रतिवीरनिरासाय चापगुणेरितान् धनुषः मौर्व्या उत्थितान् विपक्षयुक्तान् वेः पक्षिणः पक्षाः तैः युक्तान् । 'विः पक्षिपरमात्मनोः' इत्यमरः। तीक्ष्णान् निशितान् विविधान् सायकान् वीर्येण बलादाकृष्य विसर्जयेत् तद्वत् इति श्लेषाभिप्रायः 'मौर्व्यां द्रव्याश्रिते तन्त्वे शुक्ले सन्ध्यादिके गुण' इत्यभिधानम् ॥ ६५ ॥

चिच्छेदातुच्छधिषणस्तांस्तदा तर्कसायकैः ।
प्रयुक्तमात्रान् प्रहसन् लीलयाऽतिशयालुभिः ॥ ६६ ॥

पदार्थदीपिकोद्बोधिका – चिच्छेदेति ॥ प्रहसन् अतुच्छधिषणः श्रीपूर्णप्रज्ञाचार्यः लीलया अनायासेन तान् त्रिविक्रमार्यप्रयुक्ताननुमानशरान् तदा प्रयोगसमनन्तरमेव तर्कसायकैः प्रत्यनुमानबाणैः अतिशयालुभिः अतितीक्ष्णैः चिच्छेद निराकरोत् । यथा कश्चिद्योद्धा अतिशयालुभिः सायकैः प्रयुक्तमात्रान् सायकान् छिनत्ति तद्वदिति श्लेषार्थः ॥

मन्दोपकारिणी – चिच्छेदेति ॥ तदा त्रिविक्रमार्येण उक्ते सति प्रहसन् मन्दं हसन् अतुच्छधिषणः अतुच्छा अनल्पा पूर्णा धिषणा प्रज्ञा यस्य स तथोक्तः मध्वाचार्यः । तान् त्रिविक्रमार्यप्रयुक्ततर्कान् अतिशयालुभिः अतिक्रान्तवद्भिः । तदपेक्षया प्रबलैः इति यावत् ।

तर्कसायकैः स्वप्रयुक्तयुक्त्याख्यबाणैः प्रयुक्तमात्रान् केवलप्रयुक्तानेव न तु अवकाशवतः प्रयोगानन्तरमेव इति यावत् । लीलया अनायासेन चिच्छेद निराकृतवान् । यथा योद्धा प्रतिवीरप्रयुक्तान् शरान् तदपेक्षया दृढैः स्वशरैः अविलम्बेन छिनत्ति तद्वत् इति श्लेषाभिप्रायः । 'छिदिर् द्वैधीकरणे इति धातोः लिट् परस्मैपदं चिच्छेद चिच्छिदतुः चिच्छिदुः' ॥ ६६ ॥

अधार्याणीतरजनैरनिवर्त्यानि पूरुषैः ।
विजिगीषुर्द्विजश्रेष्ठो वेदास्त्राणि प्रयुक्तवान् ॥ ६७ ॥

पदार्थदीपिकोद्बोधिका – अधार्याणीति ॥ विजिगीषुः जेतुमिच्छन् द्विजश्रेष्ठः इतरे च ते जनाश्च तैरितरजनैस्त्रिवर्णेतरजनैरित्यर्थः । अधार्याणि त्रिवर्णेतरेषां वेदानधिकारित्वाद्धर्तुमशक्यानि वेदास्त्राणि वैदिकान्यस्त्राणि ब्रह्मपाशुपतादीनि च । पूरुषैरनिवार्याणि अनिवर्त्यानि प्रयुक्तवान् । तर्केण पराजितः सन् वेदवाक्यानि स्वाभिमतार्थे प्रयुक्तवानित्यर्थः । विजिगीषुर्योद्धा शस्त्रयुद्धे पराजितोऽस्त्रयुद्धं यथा कुर्यात्तद्वदिति श्लेषार्थः ॥ ६७ ॥

मन्दोपकारिणी – अधार्याणीति ॥ विजिगीषुः जेतुमिच्छन् द्विजश्रेष्ठः ब्राह्मणोत्तमः त्रिविक्रमाचार्यः वेदास्त्राणि वेदा एव वेदवाक्यान्येव अस्त्राणि प्रयुक्तवान् । तर्केण पराजितस्सन् वेदवाक्यानि प्रयुक्तवान् इत्यर्थः । विजिगीषुः द्विजश्रेष्ठः क्षत्रियश्रेष्ठः बाणयुद्धे पराजितो भूत्वा अस्त्रप्रयोगं यथा कुर्यात् तद्वदिति श्लेषार्थः । कथंभूतानि इतरजनैः इतरैः त्रिवर्णेभ्यः ब्राह्मणक्षत्रियवैश्येभ्यः अन्यैः जनैः शूद्रैः अधार्याणि श्रवणायोग्यानि । शूद्राणां वेदानधिकारित्वात् इति भावः । यद्वा इतरजनैः श्रुतधारणाशक्तिरहितैः अल्पप्रज्ञैः अधार्याणि बहुत्वात् अनुवदितुमशक्यानि अस्त्राणि च वैदिकत्वात् शूद्रायोग्यानि शत्रुजनैः सोढुमशक्यानीति वा । पूरुषैः अनिवर्त्यानि प्रतीतार्थं निवारयितुमशक्यानि अर्थान्तरं कर्तुं अशक्यानीति यावत् अस्त्राणि च प्रत्यस्त्रानभिज्ञैः अनिवार्याणि हि ॥ ६७ ॥

वाक्यैरतिबलीयोभिः प्रत्यस्त्रैरिव वैदिकैः ।
अर्थान्तरं प्रकटयंस्तान्यसौ सन्यवर्तयत् ॥ ६८ ॥

भावप्रकाशिका –अर्थान्तरमग्नेश्च विपरीतं जयादिकं च ॥ ६८ ॥

पदार्थदीपिकोद्बोधिका – वाक्यैरिति ॥ असौ श्रीमध्वः तानि परप्रयुक्तानि वेदवाक्यानि अतिबलीयोभिः निरवकाशत्वेनोपजीव्यत्वेन चातिबलिष्ठैः, वैदिकैर्वाक्यैः स्वप्रयुक्तैरित्यर्थः । अर्थान्तरं प्रतिवादिप्रयुक्तस्य तदभिप्रेतार्थादर्थान्तरं प्रकटयन् प्रकाशयन् प्रत्यस्त्रैरिव सन्न्यवर्तयत् निवर्तितवान् । निवर्तनं नाम पराभिमतार्थप्रच्यावनमेव । यथा कश्चिद्योद्धा परप्रयुक्तास्त्रं प्रत्यस्त्रैर्निवर्तयेदिति भावः ॥ ६८ ॥

मन्दोपकारिणी – वाक्यैरिति ॥ असौ श्रीमध्वः तानि परप्रयुक्तानि वेदवाक्यानि संन्यवर्तयत् निवर्तितवान् । निवर्तनं नाम पराभिमतार्थप्रत्याख्यानम् । किं कुर्वन् अतिबलीयोभिः निरवकाशत्वेन बहुत्वेन च बलिष्ठैः वैदिकैः वेदगतैः वाक्यैः स्वप्रयुक्तैः अर्थान्तरं प्रकटयन् । प्रतिवादिप्रयुक्तवाक्यस्य तदभिप्रेतार्थात् अर्थान्तरं प्रकाशयन् । कैरिव प्रत्यस्त्रैरिव । यथा कश्चित् योद्धा परप्रयुक्तास्त्रं प्रत्यस्त्रैः निवारयति तद्वत् इति भावः । 'निपूर्वात् वृतु वर्तने इति धातोः णिजन्तात् लङ् परस्मैपदम्' ॥ ६८ ॥

सप्ताष्टानि दिनान्येवं वादं कृत्वा सहामुना ।
निरुत्तरं तं निश्चोद्यं चक्रे चक्रायुधप्रियः ॥ ६९ ॥

पदार्थदीपिकोद्बोधिका – सप्तेति ॥ चक्रमायुधं यस्य तस्य श्रीहरेः प्रियः श्रीमध्वः अमुना त्रिविक्रमार्येण सह एवमुक्तप्रकारेण सप्त चाष्टौ च सप्ताष्टौ, सप्ताष्टानां पूरणानि सप्ताष्टानि 'तस्य पूरणे डट्' इति डट् । दिनानि वादमुपक्रम्य । पञ्चदशदिनपर्यन्तमित्यर्थः । 'कालाध्वनोरिति' द्वितीया । वादं कृत्वा तं त्रिविक्रमार्यं निर्गतमुत्तरं यस्मात्स निरुत्तरस्तम् । प्रत्युत्तररहितमित्यर्थः । निर्गतं चोद्यं प्रश्नो यस्मात्स निश्चोद्यस्तम् । प्रश्नरहितञ्चेत्यर्थः चक्रे ॥ ६९ ॥

मन्दोपकारिणी – सप्तेति ॥ चक्रायुधप्रियः चक्रं आयुधं यस्य स चक्रायुधः हरिः तस्य प्रियः श्रीमध्वाचार्यः । अमुना त्रिविक्रमार्येण सह एवं पूर्वोक्तप्रकारेण सप्ताष्टानि सप्त च अष्ट च सप्ताष्टानि पञ्चदशसङ्ख्याकानि दिनानि । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । पञ्चदशदिनेषु इत्यर्थः । प्रतिपदमारभ्य पञ्चदशदिनपरिपूर्तिपर्यन्तं इति यावत् । वादं वादकथां कृत्वा तं त्रिविक्रमपण्डिताचार्यं निरुत्तरं प्रत्युत्तररहितं निश्चोद्यं प्रश्नरहितं चक्रे । तत्पृष्टस्य सर्वस्यापि उक्तत्वेन प्रष्टव्यांशस्य अभावात् इति भावः ॥ ६९ ॥

प्रणम्याचष्ट शिष्टोऽसौ क्षम्यतां नाथ चापलम् ।
पदपद्मरजोदास्यं ध्रुवं मे दीयतामिति ॥ ७० ॥

पदार्थदीपिकोद्बोधिका – प्रणम्येति ॥ शिष्ट उत्तमः असौ त्रिविक्रमार्यः प्रणम्य हे नाथ! श्रीमध्व! चपलस्य भावो चापलं क्षम्यताम् । ध्रुवं शाश्वतं, पदे पद्म इव पदपद्मे तयोः रजांसि, तेषां दास्यं दासत्वं मे मह्यं दीयतां इत्याचष्ट ॥ ७० ॥

मन्दोपकारिणी – प्रणम्येति ॥ शिष्टः विशिष्टः उत्तमजीवः असौ त्रिविक्रमाचार्यः मध्वाचार्यं प्रणम्य नमस्कृत्य आचष्ट अब्रवीत् । 'आङ् पूर्वात् चक्षीङ् व्यक्तायां वाचीत्यतो लडात्मनेपदं आचष्ट आचक्षातां आचक्षत' । किमिति, हे नाथ स्वामिन् चापलं मम चापल्यम् । बालत्वमिति यावत् । क्षम्यतां त्वया सह्यताम् । 'क्षमूष् सहने इति धातोः कर्मणि लोट् आत्मनेपदम्' । ध्रुवं शाश्वतं तव पदपद्मरजोदास्यं पदपद्मयोः पादकमलयोः रजांसि पांसवः तेषां दास्यं किङ्करत्वं मे मह्यं दीयताम् । त्वया इति शेषः । 'पांसुर्ना न द्वयो रजः' इत्यमरः । 'डु दाञ् दाने इत्यतः कर्मणि लोट् आत्मनेपदम्' । एतादृशबुध्युत्पादने स्वरूपोत्तमत्त्वमेव निमित्तं इति सूचयितुं शिष्ट इत्युक्तम् ॥ ७० ॥

व्याख्यां भाष्यस्य भूयोधीः श्रवणं सूरिनन्दनः ।
सन्तः प्रीतिमसन्तोऽन्यां सममारेभिरे ततः ॥ ७१ ॥

पदार्थदीपिकोद्बोधिका – व्याख्यामिति ॥ भूयसी पूर्णा धीर्यस्य स श्रीमध्वः भाष्यस्य ब्रह्मसूत्रभाष्यस्य व्याख्यां उपन्यासमारेभे । सूरिनन्दनः सुब्रह्मण्यार्यनन्दनः श्रवणं भाष्यश्रवणम् आरेभे । सन्तः सज्जनाः प्रीतिमारेभिरे । असन्तो दुष्टा अन्यामप्रीतिमारेभिरे इति । त एते मध्वाद्याः एतानि व्याख्याप्रभृतीनि समं युगपत् आरेभिर उपचक्रमिरे ॥७१॥

मन्दोपकारिणी – व्याख्यामिति ॥ ततः दासत्वदानानन्तरं भूयोधीः भूयसी पूर्णा धीः प्रज्ञा यस्य स भूयोधीः मध्वाचार्यः भाष्यस्य ब्रह्मसूत्रभाष्यस्य व्याख्यां आरेभे । सूरिनन्दनः सूरेः सुब्रह्मण्याख्यपण्डितस्य नन्दनः सूनुः त्रिविक्रमाचार्यः श्रवणं भाष्यश्रवणं आरेभे । सन्तः सज्जनाः प्रीतिं आरेभिरे । असन्तः असज्जनाः अन्यां अप्रीतिं आरेभिरे आरब्धवन्तः । मध्वादयः तद्व्याख्यानादिकं समं युगपत् आरेभिरे । 'रभ राभस्ये इत्यतः

लिट् आत्मनेपदम्' । यदा त्रिविक्रमाचार्यः वादे पराजितः मध्वाचार्यशिष्यो भूत्वा मध्वाचार्यात् तत्कृतब्रह्मसूत्रभाष्यव्याख्यानं श्रुतवान् तदा सज्जनाः सन्तोषं प्रापुः मायावादिनः सर्वे दुःखं प्रापुः इति भावः ॥ ७१ ॥

गुर्वाज्ञागौरवाट्टीकां कुर्वन् भाष्यस्य दुष्कराम् ।
षडर्धविक्रमार्योऽसौ महाचार्यमवोचत ॥ ७२ ॥

पदार्थदीपिकोद्बोधिका – गुर्वाज्ञेति ॥ गुर्वाज्ञागौरवात् श्रीमध्वाज्ञागौरवेण दुष्करां तदाज्ञामृते कर्तुमशक्यां भाष्यस्य श्रीमद्भाष्यस्य टीकां कुर्वन् असौ षडर्धविक्रमार्यः त्रिविक्रमार्य इत्यर्थः । महाचार्यं श्रीमध्वाचार्यं अभाषत ॥ ७२ ॥

मन्दोपकारिणी – गुर्वाज्ञेति ॥ षडर्धविक्रमार्यः षडर्धशब्दस्य व्यर्थकत्वात् त्रिशब्दस्थाने षडर्धशब्दप्रयोगः । ततश्च असौ त्रिविक्रमार्यः गुर्वाज्ञागौरवात् गुरोः श्रीमध्वाचार्यस्य आज्ञायां गौरवात् बहुमानात् । गुर्वाज्ञां स्वीकृत्येति यावत् । दुष्करां गुर्वाज्ञां ऋते कर्तुं अशक्यां भाष्यस्य श्रीब्रह्मसूत्रभाष्यस्य टीकां विवृतिं तत्त्वप्रदीपिकाख्याम् । 'विवृतिः पञ्चिका टीका' इत्यभिधानम्। कुर्वन् महाचार्यं महांश्चासौ आचार्यश्च महाचार्यः श्रुत्यादेः मुख्यव्याख्यातारं तं मध्वाचार्यम् । 'मन्त्रव्याख्याकृदाचार्यः' इत्यमरः । अवोचत अभाषत । 'वच परिभाषणे इत्यतो लङ् आत्मनेपदं अवोचत अवोचेतां अवोचन्त' ॥ ७२ ॥

कवीन्द्रैर्न समाप्यन्ते सङ्गृह्यापि यतोऽनिशम् ।
न्यायरत्नानि भाष्याब्धेरस्य गाम्भीर्यमद्भुतम् ॥ ७३ ॥

पदार्थदीपिकोद्बोधिका – कवीन्द्रैरिति ॥ कवीन्द्रैर्ज्ञानिश्रेष्ठैः यतो यस्मात् भाष्याब्धेः श्रीमद्भाष्यसमुद्रात् न्याया एव रत्नानि शास्त्रन्यायाख्यरत्नानि अनिशं निरन्तरं सङ्गृह्यापि उद्धृत्यापि न समाप्यन्ते । समुद्राद्रत्नान्यनिशं सङ्गृह्यापि यथा न समाप्यन्ते एवमेव भाष्यादपि न्याया उद्धृत्य न समाप्यन्त इति भावः । न्यायाः श्रुत्यर्थविचाराङ्गभूताः उपक्रमोपसंहाराभ्यासापूर्वफलार्थवादाः । श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानि । तथा प्रमाणानां प्राबल्यदौर्बल्यविचाराङ्गभूतानि, निरवकाशत्वसावकाशत्वोपजीव्यत्वोपजीवकत्व बहुत्वाल्पत्वानि चोच्यन्ते । ते च न्याया अस्मिन् भाष्ये तत्र तत्र व्युत्पादिता इत्यर्थः । तस्मादस्य भाष्यस्य गाम्भीर्यं अद्भुतम् ॥ ७३ ॥

मन्दोपकारिणी – कवीन्द्रैरिति ॥ यतः यस्मात् भाष्याब्धेः भाष्याख्यरत्नाकरात् न्यायरत्नानि न्यायाख्यरत्नानि अनिशं निरन्तरं सङ्गृह्यापि स्वीकृत्यापि कवीन्द्रैः पण्डितश्रेष्ठैः न समाप्यन्ते । न्यायानां बहुत्वात् इति भावः । यथा समुद्रात् रत्नानि अनिशं सङ्ग्रहेणापि न समाप्यन्ते एवमेव भाष्यादपि न्यायानुद्धृतवता विदुषा न समाप्यन्ते इति भावः । 'सम्पूर्वादाप्लृ व्याप्तौ इत्यतः कर्मणि लट् आत्मनेपदम्' । अत्र न्यायशब्देन श्रुति-विचाराङ्गभूताः 'उपक्रमोपसंहाराभ्यासाः अपूर्वताफलार्थवादाः श्रुतिलिङ्गसमाख्याप्रकरण-स्थानानि च तथा प्रमाणानां प्राबल्यदौर्बल्यविचाराङ्गभूताः निरवकाशत्त्वसावकाशत्त्वोप-जीवकत्त्वबहुत्वाल्पत्वानि चोच्यन्ते' । एतेन न्याया एव अस्मिन् भाष्ये बाहुल्येन व्युत्पादिताः इत्यर्थः । तस्मात् अस्य भाष्यस्य गाम्भीर्यं गम्भीरत्वं अद्भुतं आश्चर्यम् ॥७३॥

दशोपनिषदो देवीर्देवा इव समीप्सिताः ।
युक्ताः प्रसादयन्त्यर्था एषु भाष्यालयेष्वलम् ॥ ७४ ॥

पदार्थदीपिकोद्बोधिका – दशेति ॥ एषु भाष्याण्येव आलया मन्दिराणि तेषु भाष्याख्यमन्दिरेषु । उपनिषद्भाष्याख्यमन्दिरेष्वित्यर्थः । युक्ता उपपन्ना अर्थास्त्वयोक्ता उपनिषदर्थाः देवीः द्योतमानार्थाः दश च ता उपनिषदश्च दशोपनिषदः दशवेदान्तान् समीप्सिता अभीष्टा देवा भर्तृभूता देवा इत्यर्थः । आलयेषु स्वमन्दिरेषु युक्ताः सङ्गता देवीरिव अलं सम्यग् प्रसादयन्ति विवृण्वन्ति । सुखेन विज्ञातार्थन् कुर्वन्तीत्यर्थः । देवा यथा स्वभार्याः प्रसादयन्ति तद्वदिति भावः । अत्रोपमालङ्कारः ॥ ७४ ॥

मन्दोपकारिणी – दशेति ॥ एषु भाष्यालयेषु उपनिषद्भाष्याख्यमन्दिरेषु युक्ताः उपपन्नाः समीप्सिताः अभिप्रेताः अर्थाः उपनिषद्भाष्येषु प्रोक्ताः उपनिषदर्थाः दश दशसङ्ख्याकाः उपनिषदः वेदान्तान् अलं सम्यक् प्रसादयन्ति सुखेन विज्ञातार्थान् कुर्वन्ति । के का इव, समीप्सिताः भर्तृभूताः देवाः आलयेषु स्वमन्दिरेषु युक्ताः देवीः स्वभार्याः इव । स्त्रीणां स्वस्वमन्दिरेषु स्वस्वपतियोगेन प्रसन्नमनस्त्वस्य प्रसिद्धत्वात् । उपनिषदः सुखेन ज्ञातार्थाः बभूवुः इति भावः । 'प्रपूर्वात् षदॢ विशरणगत्यवसादनेषु इति धातोर्णिजन्तात् लट् परस्मैपदम्' ॥ ७४ ॥

गीतातात्पर्यभाष्याभ्यामाभ्यां विश्वं प्रकाश्यते ।
गोगणैरप्रतीकारैरर्केन्दुभ्यामिवाधिकम् ॥ ७५ ॥

पदार्थदीपिकोद्बोधिका – गीतेति ॥ आभ्यां, तात्पर्यञ्च भाष्यञ्च तात्पर्यभाष्ये गीतायास्तात्पर्यभाष्ये, ताभ्याम् । न विद्यते प्रतीकारः प्रतिषेधो येषां तैः । परैर्निराकतु-मशक्यैरिति यावत् । गोगणैर्वचनसमूहैर्विश्वं विवक्षितं सर्वं प्रमेयजातं, अर्केन्दुभ्यां गोगणैः किरणसमूहैः विश्वं जगदिव अधिकं यथा भवति तथा प्रकाश्यते ॥ ७५ ॥

मन्दोपकारिणी – गीतेति ॥ आभ्यां गीतातात्पर्यभाष्याभ्यां गीतायाः भगवद्गीतायाः तात्पर्यं च भाष्यं च तात्पर्यभाष्ये ताभ्याम् । अप्रतीकारैः प्रतीकाररहितैः । परैः निराकर्तुं अशक्यैः इति यावत् । गोगणैः वचनसमूहैः विश्वं सर्वं प्रमेयजातं अधिकं प्रकाश्यते प्रकटितं भवति । 'कासृ दीप्तौ इति धातोः कर्मणि लिट् आत्मनेपदम्' । तत्र दृष्टान्तः अर्केन्दुभ्यां गोगणैः गवां रश्मीनां गणैः समूहैः विश्वं जगदिव ॥ ७५ ॥

इतिहासपुराणाब्धेर्भवच्चित्ताद्रिलोडितात् ।
जातां भारततात्पर्यसुधां कः सन्न सेवते ॥ ७६ ॥

पदार्थदीपिकोद्बोधिका – इतिहासेति ॥ भवतश्चित्तं तदेवाद्रिर्मन्दरगिरिस्तेनालो-डितान्मथितात् । इतिहासश्च पुराणानि च तान्येवाब्धिस्तस्मात् । जातामुत्पन्नां भारतस्य तात्पर्यं तदेव सुधा तां सन् सत्पुरुषः को न सेवते । स्पष्टः श्लेषार्थः ॥ ७६ ॥

मन्दोपकारिणी – इतिहासेति ॥ भवच्चिताद्रिलोडितात् भवतः चित्तं मनः तल्लक्षणोऽद्रिः मन्दरपर्वतः तेन लोडितात् मथितात् । इतिहासपुराणाब्धेः इतिहासाः भारतरामायण पञ्चरात्रागमाख्याः पुराणानि भागवतादीनि तेषां समाहारः इतिहासपुराणं तन्नामकात् अब्धेः क्षीरसमुद्रात् जातां उत्पन्नां भारततात्पर्यसुधां श्रीमन्महाभारततात्पर्यनिर्णयाख्यामृतं सन् सत्पुरुषः कः न सेवते सर्वेऽपि सेवन्त एव । यथा सज्जनाः सर्वेऽपि अमृतं पिबन्त्येव तथा सर्वेऽपि सत्पुरुषाः भारततात्पर्यनिर्णयं श्रवणादिना सेवन्त एव इति भावः ॥ ७६ ॥

पुराणस्थानपान्थानामभाषात्रयवेदिनाम् ।
भवता सुसखा चक्रे श्रीभागवतनिर्णयः ॥ ७७ ॥

भावप्रकाशिका– सुसखा 'राजाहः सखिभ्यष्टजि'त्यस्य 'न पूजनादि'त्यपवादः॥७७॥

पदार्थदीपिकोद्बोधिका – पुराणेति ॥ भाषाणां गुह्यदर्शनसमाधिलक्षणभाषाणां त्रयं तद्विदन्तीति भाषात्रयवेदिनः । ते न भवन्तीत्यभाषात्रयवेदिनस्तेषाम् । पुराणस्थानपान्थानां एकार्थावच्छिन्नं वाक्यजातं प्रकरणम् । प्रकरणजातं स्थानमित्युच्यते । पुराणानां स्थानानि प्रकरणजातानि तेषु पान्थास्तेषाम् । पुराणकथाप्रकरणजातेषु वर्तमानानामित्यर्थः । सुसखा श्रीभागवतनिर्णयः श्रीभागवतस्य निर्णयोऽर्थनिश्चयो यस्मिन् स तथोक्तः । श्रीभागवत-तात्पर्यनिर्णयाख्यो ग्रन्थ इत्यर्थः । भवता चक्रे कृतः । तत्तदशेषभाषामजानतां पथिकानां तत्तद्भाषां जानन् कश्चिद्यथा सुसखा स्यात् तद्वदेव भाषात्रयमजानतां पुराणकथासङ्कथने प्रवर्तमानानां पुरुषाणां सुसखेत्यर्थः ॥ ७७ ॥

मन्दोपकारिणी – पुराणेति ॥ भवता त्वया श्रीभागवतनिर्णयः श्रीभागवतस्य निर्णयः तात्पर्यनिर्णयः चक्रे कृतः । 'डु कृञ् करणे इति धातोः कर्मणि लिट् चक्रे चक्राते चक्रिरे' । कथंभूतः अभाषात्रयवेदिनां भाषाणां गुह्यदर्शनसमाधिलक्षणभाषाणां त्रयं विन्दन्तीति भाषात्रयवेदिनः भाषात्रयवेदिनो न भवन्तीति अभाषात्रयवेदिनः तेषाम् । भाषात्रयमजानतां पुराणस्थानपान्थानां पुराणान्येव स्थानं आश्रयो येषां ते पुराणस्थानाः । पुराणोपजीवनेनैव तत्त्वज्ञानार्थिन इत्यर्थः । पुराणस्थाना एव पान्थाः पथिकाः तेषाम् । 'पान्थः पथिकः' इत्यमरः । सुसखा समीचीनः सखा मित्रम् । उपकारक इति यावत् तत्तदंशभाषां अजानतां पुराणकथासङ्कथने प्रवर्तमानानां पुरुषाणां अयं भागवततात्पर्य निर्णयः तात्पर्यज्ञानसाधनत्वात् सुसखा भवतीति भावः ॥ ७७ ॥

कस्तन्त्रसारं सम्प्राप्य न स्यात् पर्याप्तवाञ्छितः ।
अमरैराश्रितच्छायं कल्पद्रुममिवोत्तमम् ॥ ७८ ॥

पदार्थदीपिकोद्बोधिका – क इति ॥ उत्तमं ग्रन्थोत्तमं, अमरैर्भगवन्मूर्तिभिः वर्णाभिमानिभिर्ब्रह्मादिदेवैर्वा आश्रिता छाया वर्णपङ्क्तिर्यस्य स तथा तम् । 'छाया पङ्क्तौ प्रतिमायामर्के योषित्यनातपे । उक्ता वै पावने कान्तौ शोभायां च तमस्यपी'ति हेमचन्द्रः । यद्वा आश्रिता छाया सिद्धान्तो यस्य स तथा तमिति । तन्त्रेषु तन्त्रग्रन्थेषु सारं श्रेष्ठं तन्त्रसाराख्यग्रन्थमित्यर्थः । अमरैराश्रितच्छायं कल्पद्रुममिव कल्पवृक्षमिव प्राप्य कः पुमान् पर्याप्तं सम्पूर्णं वाञ्छितं यस्य स तथा, न स्यात् । कल्पद्रुमच्छाया यथाऽमरैराश्रितैवं

तन्त्रसारस्य सिद्धान्तोऽमरैराश्रितः । एवंभूतं तन्त्रसारं प्राप्य कः पुमान् पर्याप्तवाञ्छितो न स्यादित्यर्थः ॥ ७८ ॥

मन्दोपकारिणी – क इति ॥ उत्तमं उत्तमार्थोपेतं अमरैः देवैः आश्रितच्छायं आश्रिता अङ्गीकृता छाया सिद्धान्तः यस्य स तथोक्तः तम् । तन्त्रसारं सम्प्राप्य कः पुमान् पर्याप्तवाञ्छितः पर्याप्तः पूर्णः वाञ्छितः कामः यस्य सः पर्याप्तवाञ्छितः न स्यात् । कमिव अमरैः आश्रितच्छायां आश्रिता छाया अनातपः यस्य स तथोक्तः तम् । 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्यमरः । कल्पद्रुममिव कल्पवृक्षमिव । यथा कल्पद्रुमच्छायाश्रितानां पूर्णो मनोरथो भवेत् तथा तन्त्रसारसिद्धान्तं जानतां अभीष्टसिद्धिः भवतीति भावः ॥ ७८ ॥

लोकानामवलोकाय मार्गस्यास्य व्यधाद्भवान् ।
करुणाकर नेत्राभे वादसन्मानलक्षणे ॥ ७९ ॥

पदार्थदीपिकोद्बोधिका – लोकानामिति ॥ हे करुणाकर! श्रीमध्व! भवान् लोकानां जनानां अस्य मार्गस्य वादजल्पवितण्डाख्यकथात्रयमार्गस्य तथा प्रत्याक्षानुमानागमाख्यप्रमाणत्रयमार्गस्य च अवलोकाय दर्शनाय, नेत्रस्याभेवाभा ययोस्ते नेत्राभे मार्गावलोकने नेत्रं यथा कारणं तद्वदेव वादादिकथात्रयमार्गावलोकनाय, कथालक्षणाख्यं प्रकरणं नेत्राभं, प्रत्यक्षादिप्रमाणत्रयस्योद्देशविभागलक्षणाद्यवलोकनाय प्रमाणलक्षणाख्यं प्रकरणं नेत्राभमित्यर्थः, एवं वादसन्मानलक्षणे वादश्च सन्मानं सत्प्रमाणं तच्च तयोर्लक्षणे ययोस्ते कथालक्षणप्रमाणलक्षणाख्यप्रकरण इत्यर्थः व्यधात् चक्रे ॥ ७९ ॥

मन्दोपकारिणी – लोकानामिति ॥ हे करुणाकर ! दयासमुद्र ! गुरो भवान् त्वं वादसन्मानलक्षणे वादः कथा च सच्च तत् मानं सन्मानं प्रमाणं च वादसन्माने तयोः लक्षणे । कथालक्षणप्रमाणलक्षणाख्यप्रकरणे इत्यर्थः । व्यधात् कृतवान् । कथंभूते, लोकानां जनानां अस्य मार्गस्य कथाप्रमाणप्रकारस्य अवलोकाय दर्शनाय नेत्राभे नेत्रयोः चक्षुषोः आभेव आभा ययोस्ते नेत्राभे । वादजल्पवितण्डाख्यकथाप्रकारदर्शनाय कथालक्षणं प्रमाणप्रकारदर्शनाय प्रमाणलक्षणाख्यं प्रकरणं नेत्राभं इत्यर्थः ॥ ७९ ॥

एकाकी किल यश्चक्रे पदं मौलिषु विद्विषाम् ।
तत्त्वनिर्णयपार्थोऽयं केन नाम न पूज्यते ॥ ८० ॥

पदार्थदीपिकोद्बोधिका – एकाकीति ॥ यस्तत्वनिर्णयपार्थ एकाकी असहायवान् विद्विषां वादिनां मौलिषु मस्तकेषु पदं पादं चक्रे । तान् निराकरोतीत्यर्थः । अयं तत्वनिर्णयपार्थस्तत्वानां परापरवस्तूनां निर्णयो यस्मिन् स विष्णुतत्वनिर्णयाख्यो ग्रन्थः स पार्थ इव अर्जुन इव केन नाम न पूज्यते? सर्वैरपि पूज्यत इति भावः ॥ ८० ॥

मन्दोपकारिणी – एकाकीति ॥ अयं तत्त्वनिर्णयपार्थः तत्त्वनिर्णयः विष्णुतत्त्व-निर्णयाख्यः पार्थः अर्जुनः केन नाम केन पुरुषेण न पूज्यते सर्वैरपि पूज्यते एवेति भावः । 'पूज पूजायां इति धातोः कर्मणि लट् आत्मनेपदम्' । यः एकाकी असहायः सन्नपि विद्विषां द्वेषिणां वादिनां मौलिषु मूर्धसु पदं पादं चक्रे स्थापितवान् । निराकरोत् इति यावत् । किल इति प्रसिद्धौ । पार्थपक्षे पुराणप्रसिद्धिः तत्त्वनिर्णयपक्षे अनुभवसिद्धिः ज्ञेया । यथा विराटनगरे उत्तरगोग्रहणे निवातकवचाद्यसुरनिग्रहे च अर्जुनः एक एव शत्रून् पराभूतवान् तद्वत् अयं ग्रन्थोऽपि एक एव सर्वदुर्वादिगर्वनिराकरणे समर्थ इति ॥ ८० ॥

वादादयः प्रकरणस्फुलिङ्गास्तनवोऽप्यलम् ।
विपक्षकक्षं क्षिण्वन्ति मारुतेन त्वयेरिताः ॥ ८१ ॥

पदार्थदीपिकोद्बोधिका – वादादय इति ॥ मारुतेन वायुना त्वया ईरिताः प्रोक्ताः वादः वादाख्यं तत्वोद्योतं प्रकरणमादिर्येषां ते वादादयः प्रकरणान्येव स्फुलिङ्गा अलं तनवोऽपि अणवोऽपि विपक्षाः प्रतिवादिन एव कक्षं वनं क्षिण्वन्ति नाशयन्ति । वायुनोद्बोधिता अग्निकणा यथा वनं नाशयन्ति तद्वद्वायुना त्वया प्रोक्तानि तत्वोद्योतादि-प्रकरणानि प्रतिवादिनो निराकुर्वन्तीत्यर्थः । अत्र रूपकालङ्कारः ॥ ८१ ॥

मन्दोपकारिणी – वादेति ॥ मारुतेन वायुना त्वया ईरिताः प्रोक्ताः वादादयः वादः तत्त्वोद्योतः आदिः येषां ते वादादयः । प्रकरणस्फुलिङ्गाः प्रकरणान्येव स्फुलिङ्गाः अग्निकणाः । 'त्रिषु स्फुलिङ्गोऽग्निकणः' इत्यमरः । अलं अत्यन्तं तनवोऽपि सूक्ष्मा अपि विपक्षकक्षं विपक्षः विरुद्धसिद्धान्त एव कक्षं शुष्ककाननम् । 'सौरभे च तृणे कक्षं शुष्ककाननवीरुधोः' इति विश्वः क्षिण्वन्ति नाशयन्ति । यथा वायुनोद्बोधिताः अग्निकणाः वनं नाशयन्ति तथा वायुना त्वया प्रोक्तानि श्रीमत्तत्त्वोद्योतादिप्रकरणानि प्रतीपवादं निराकुर्वन्तीति भावः । 'क्षिणु हिंसायां इत्यतो लट् परस्मैपदं क्षिणोति क्षिणुतः क्षिण्वन्ति' ॥ ८१ ॥

अनन्तोऽर्थः प्रकटितस्त्वयाऽणौ भाष्यसंग्रहे ।
अहो आत्मपरिज्ञप्त्यै कृष्णेनेवाननान्तरे ॥ ८२ ॥

पदार्थदीपिकोद्बोधिका – अनन्त इति ॥ त्वया, आत्मनः स्वस्य परिज्ञप्तिः परिज्ञानं तस्यै । स्वसमार्थ्यज्ञापनायेत्यर्थः । अणौ, भाष्यस्य सङ्ग्रहो यस्मिन् स भाष्यसङ्ग्रहस्तस्मिन् । अणुवेदान्तभाष्य इत्यर्थः । अनन्तोऽपरिमितोऽर्थः, कृष्णेन यशोदाकृष्णेन आननान्तरे विवृतवदनान्तरे आत्मपरिज्ञप्त्यै यशोदां स्वसामर्थ्यज्ञापनार्थं अनन्तोऽपरिमितः अर्थः प्रपञ्चः स इव प्रकटितः । अहो एतदाश्चर्यम् ॥ ८२ ॥

मन्दोपकारिणी – अनन्त इति ॥ त्वया आत्मपरिज्ञप्त्यै आत्मनः स्वसामर्थ्यस्य परिज्ञप्त्यै अणौ अल्पे भाष्यसङ्ग्रहे भाष्यस्य ब्रह्मसूत्रभाष्यस्य सङ्ग्रहे सङ्कोचकथनरूपे अणुवेदान्तभाष्ये अनन्तः अपरिमितः अर्थः अभिधेयः प्रकटितः । अहो एतदाश्चर्यम् । केनेव कृष्णेन यशोदानन्दनेन आत्मपरिज्ञप्त्यै आननान्तरे विवृतस्ववदनस्य मध्ये अनन्तः अर्थः प्रपञ्च इव ॥ ८२ ॥

भगवंश्चित्रकवितां लौकिकीं दर्शयन् किल ।
गोप्यं भारतसंक्षेपमकृथा विश्वविस्मयम् ॥ ८३ ॥

पदार्थदीपिकोद्बोधिका – भगवन्निति ॥ हे भगवन् श्रीमध्व! लौकिकीं लोकविषयां चित्रकवितां विचित्रकवित्वं दर्शयन् त्वं गोप्यं गोपनीयं विश्वस्य विस्मयो यस्मात्तं, भारतस्य सङ्क्षेपस्तं यमकभारतम् । भारतसङ्क्षेपात्मककाव्यरूपग्रन्थमित्यर्थः । अकृथाः कृतवानसि ॥

मन्दोपकारिणी – भगवन्निति ॥ हे भगवन् लौकिकीं लौकिकविषयां चित्रकवितां नानाविधयमकरूपां कवितां कवित्वं दर्शयन् गोप्यं रहस्यं भारतसंक्षेपं भारतस्य महाभारतार्थस्य संक्षेपं सङ्ग्रहरूपं यमकभारताख्यं काव्यं अकृथाः कृतवानसि किल । कथंभूतं विश्वविस्मयं विश्वस्य आश्चर्यकरम् ॥ ८३ ॥

नानासुभाषितस्तोत्रगाथादिकृतिसत्कृतीः ।
त्वयि रत्नाकरे रत्नश्रेणीर्वा गणयन्ति के ॥ ८४ ॥

पदार्थदीपिकोद्बोधिका – नानेति ॥ त्वयि विद्यमानास्त्वया कृता इत्यर्थः । स्तोत्राणि च गाथाश्च ता आदयो येषां ते, नानाविधानि सुभाषितानि येषु ते, ते च ते स्तोत्रग्रन्था-दयश्च, तेषां कृतिर्निर्माणं, तदात्मिकाश्च ताः सत्कृतयः, शोभनकरणानि ताः, नानासुभाषित स्तोत्रगाथादिकृतिसत्कृतीः, रत्नाकरे समुद्रे रत्नश्रेणीर्वा रत्नसमूहानिव के गणयन्ति? त्वदीयकृतीनां साकल्येन गणनेऽपि न कोऽपि समर्थः किमु वर्णन इति भावः ॥ ८४ ॥

मन्दोपकारिणी – नानेति ॥ त्वयि विद्यमानाः । त्वत्कृताः इत्यर्थः । नानासुभाषित स्तोत्रगाथादिकृतिसत्कृतीः सुभाषितानि च स्तोत्राणि च गाथाश्च ताः एव आदयो येषां तानि तथोक्तानि नानाविधानि च तानि सुभाषितस्तोत्रगाथादीनि च तेषां कृतयः आकाराः ताश्च ताः सत्कृतयः समीचीनग्रन्थाश्च ताः । सुभाषितरूपः स्तोत्ररूपः गाथारूपः सदाचारस्मृतिरूपः जयन्तीकल्परूपः इत्यादिनानाविधग्रन्थान् त्वत्कृतान् के गणयन्ति बहुत्वात् इति भावः । का इव, रत्नाकरे समुद्रे विद्यमानाः रत्नश्रेणीः वा रत्नानां श्रेणीः समूहान् । यथा समुद्रे बहुरत्नानि सन्ति तथा त्वय्यपि बहुग्रन्थाः सन्तीति भावः । 'गण संख्याने इत्यतो लट् परस्मैपदम्' ॥ ८४ ॥

एषु दभ्रमतीन् दभ्रान् हसत्युच्चैः सतां सभा ।
चिन्तामणींश्चिन्तयन्ती मितानप्यमितार्थदान् ॥ ८५ ॥

पदार्थदीपिकोद्बोधिका – एष्विति ॥ मितानपि शब्दतः परिमितानपि अमितार्थान् अपरिमितार्थान् ददतीति तान् । अमितार्थवाचकानित्यर्थः । एतान् ग्रन्थान् चिन्तामणीन् तत्सदृशान् चिन्तयन्ती सतां सज्जनानां सभा एषु भवत्प्रणीतेषु श्रीमद्भाष्यादिग्रन्थेषु दभ्र इति स्वल्प इति मतिर्येषां तान् । एते ग्रन्था अल्पा इति मन्यमानानित्यर्थः । दभ्रान् योग्यतया अल्पान् पुरुषान् उच्चैः सम्यक् हसति । चिन्तामणय परिमाणतो मिता अपि यथा अमिताभीष्टप्रदास्तथा एते भवत्प्रणीता ग्रन्थाः शब्दतो मिता अपि अमितार्थवाचका-स्तानेतान् दभ्रान्मन्यमानानल्पमतीन् पुरुषान् सतां सभोच्चैर्हसतीति भावः ॥ ८५ ॥

मन्दोपकारिणी – एष्विति ॥ सतां सज्जनानां सभा एषु भवत्प्रणीतेषु भाष्यस्तोत्र-गाथादिग्रन्थेषु विषये दभ्रमतीन् दभ्रा अल्पा मतिः येषां तान् । एते ग्रन्थाः अल्पा इति मन्यमानान् इत्यर्थः । दभ्रान् मन्दान् जनान् उच्चैः हसति अपहासं करोति । मितानपि

शब्दतः परिमितानपि अमितार्थदान् अमिताश्च ते अर्थाश्च तान् ददतीति तान्। बह्वर्थप्रतिपादकान् एतान् ग्रन्थान् चिन्तामणीन् चिन्तामणिसदृशान् चिन्तयन्ती मन्यमाना। यथा चिन्तामण्याद्याः अणुत्वेन परिमिता अपि अनन्ताभीष्टदाः एवं एते भवत्प्रणीता ग्रन्थाः शब्दतः मिताः अपि अमितार्थवाचकाः तान् एतान् अल्पान् मन्यमानान् मन्दबुद्धीन् सत्सभा उच्चैः हसतीति भावः ॥ ८५ ॥

अपरोऽपीष्यतेऽस्माभिर्ग्रन्थेष्वेतेषु सत्स्वपि।
सत्स्वपीन्द्रादिषु पुरा तारकारिरिवामरैः ॥ ८६ ॥

पदार्थदीपिकोद्बोधिका – अपर इति ॥ एतेषु ग्रन्थेषु सत्स्वपि अस्माभिरपरोऽपि ग्रन्थः, पुरा इन्द्रादिषु सत्स्वपि अमरैरपरस्तारकारिरिव स्कन्द इवेष्यते ॥ ८६ ॥

मन्दोपकारिणी – अपरोऽपीति ॥ एतेषु एतादृशेषु ग्रन्थेषु सत्स्वपि अस्माभिः अपरोऽपि अन्योऽपि ग्रन्थः इष्यते अपेक्ष्यते। अत्र दृष्टान्तः-पुरा इन्द्रादिषु इन्द्रादिदेवेषु सत्स्वपि अमरैः देवैः अपरः तारकारिरिव तारकः तारकासुरः तस्य अरिः शत्रुः स्कन्द इव। 'बाहुलेयस्तारकजित्' इत्यमरः। 'इषु इच्छायां कर्मणि लट् आत्मनेपदम्' ॥ ८६ ॥

ग्रन्थेभ्य एभ्योऽगाधेभ्यो युक्तयो नो दुरुद्धराः।
मनोमान्द्यात्ततो ग्रन्थं व्यक्ततर्कततिं कुरु ॥ ८७ ॥

पदार्थदीपिकोद्बोधिका – अपरो ग्रन्थः कुत इष्यत इत्यत आह— **ग्रन्थेभ्य इति** ॥ एभ्योऽगाधेभ्यो ग्रन्थेभ्यो युक्तयो भवदभिमतयुक्तयो मनोमान्द्यादस्मद्बुद्धेरल्पविषयत्वाद्धेतोः दुरुद्धरा उद्धर्तुमशक्याः। ततो नोऽस्माकं व्यक्ताः स्पष्टास्तर्कततयो युक्तिसमूहा यस्मिन् स तथा तमपरं ग्रन्थं कुरु ॥ ८७ ॥

मन्दोपकारिणी – अपरो ग्रन्थः कुत इत्यत आह ॥ **ग्रन्थेभ्य इति** ॥ अगाधेभ्यः गम्भीरेभ्यः बहुयुक्तिगर्भितेभ्यः इति यावत्। एभ्यः भवत्कृतेभ्यः ग्रन्थेभ्यः युक्तयः भवदभिप्रेता युक्तयः मनोमान्द्यात् मनसः अस्मद्बुद्धेः मान्द्यात् अल्पविषयत्वात् नः अस्माकं दुरुद्धराः उद्धर्तुं अशक्याः। ज्ञातुं अशक्याः इत्यर्थः। ततः तस्मात् कारणात् अस्माकं व्यक्ततर्कततिं व्यक्तानां तर्काणां युक्तीनां ततयः समूहाः यस्मिन् स तथोक्तः तं ग्रन्थं कुरु विरचय। 'डु कृञ् करणे इति धातोः लोट् परस्मैपदं कुरु-कुरुतात् कुरुतं कुरुत' ॥८७॥

इत्यर्थितो व्यधान्मध्वः सोऽनुव्याख्यां सतां सुधाम् ।
दुर्वादिगर्वाद्रिपविं मायिध्वान्तरविद्युतिम् ॥ ८८ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ त्रिविक्रमार्येणेतीत्थमर्थितः स मध्वः सतां सुधां अमृतवत्परितोषिणीं दुर्वादिनां यो गर्वः स एवाद्रिः पर्वतस्तस्य पविरिव वज्रमिव दुर्वादिनां गर्वपर्वतस्य वज्रायितामित्यर्थः । मायिन एव ध्वान्तोऽन्धकारस्तस्य निरासे रविद्युतिरिव द्युतिर्यस्यास्तां अनुव्याख्यां चक्रे ॥ ८८ ॥

मन्दोपकारिणी – इतीति ॥ त्रिविक्रमार्येण इति पूर्वोक्तप्रकारेण अर्थितः प्रार्थितः सः मध्वः सतां सुधां अमृतवत् सुखकरीं अनुव्याख्यां तन्नामकग्रन्थं व्यधात् चकार । कथंभूतां दुर्वादिगर्वाद्रिपविं दुर्वादीनां गर्वः अहंकार एव अद्रिः पर्वतः तस्य पविं वज्रतुल्याम् । वज्रेण यथा अद्रयः भिद्यन्ते तथा अनयापि दुर्वाद्यहंकारखण्डनं भवतीति भावः । 'कुलिशं भिदुरं पविः' इत्यमरः । पुनः कथंभूतां मायिध्वान्तरविद्युतिं मायिन एव मायिमतमेव ध्वान्तं अन्धकारः तस्य रविद्युतिः सूर्यप्रभासदृशी ताम् । यथा अन्धकारः सूर्यप्रभया निरस्यते तथा अनया मायिमतं निरस्यत इति भावः ॥ ८८ ॥

युगपद्रचयन्नेनां कदाचित् स निरन्तरम् ।
चतुरश्चतुरः शिष्यान् लीलयाऽलेखयत् खलु ॥ ८९ ॥

भावप्रकाशिका – निरन्तरमलेखयत् ॥

पदार्थदीपिकोद्बोधिका – युगपदिति ॥ कदाचित् एनां श्रीमदनुव्याख्यां युगपद्रचयन् चतुरः कुशलः श्रीमध्वो निर्गतमन्तरं व्यवधानं यथा भवति तथा निरन्तरं चतुरः शिष्यान् लीलया अलेखयत्खलु । स्वयं रचयन्नेवाध्यायचतुष्टयं चतुर्भिः शिष्यैर्निरन्तरमलेख-यदित्यर्थः । तच्च लीलयैव ॥ ८९ ॥

मन्दोपकारिणी – ॥ युगपदिति ॥ कदाचित् एनां अनुव्याख्यां युगपत् एकदा रचयन् कुर्वन् चतुरः कुशलः सः श्रीमध्वाचार्यः चतुरः चतुः संख्याकान् शिष्यान् निरन्तरं अवकाशं विनैव युगपत् इति यावत् लीलया अनायासेन अलेखयत् खलु । चतुरः श्रीमध्वः कस्मिंश्चित् काले स्वयं अध्याय चतुष्टयं युगपदेव अनायासेन लेखयामासेति भावः ॥८९॥

युक्ताया युक्तिमालायाः प्रोक्तायास्तत्र चात्मना ।
व्यक्तं चक्रे विवरणं कवीन्द्रैरेष दुष्करम् ॥ ९० ॥

पदार्थदीपिकोद्बोधिका – युक्ताया इति ॥ एष श्रीमध्वस्तत्र श्रीमदनुव्याख्याने आत्मना प्रोक्ताया युक्ताया उपपन्नायाः युक्तिमालायाः कवीन्द्रैः दुष्करं कर्तुमशक्यं विवरणं व्यक्तं यथा भवति तथा चक्रे । श्रीमदनुव्याख्यानोक्तपूर्वपक्षसिद्धान्तयुक्तिप्रकाशानुरूपं श्रीमन्न्यायविवरणाख्यमपरं ग्रन्थं चक्र इत्यर्थः ॥ ९० ॥

तथा च श्रीमदाचार्यकृता ग्रन्थाः —

१. तत्वसङ्ख्यानम्
२. तत्वविवेकः
३. उपाधिखण्डनम्
४. मायावादखण्डनम्
५. मिथ्यात्वानुमानखण्डनम्
६. तत्वोद्योतः
७. तत्त्वनिर्णयः
८. कर्मनिर्णयः
९. कथालक्षणम्
१०. गीताभाष्यम्
११. गीतातात्पर्यम्
१२. ऋग्भाष्यम्
१३. ब्रह्मसूत्रभाष्यम्
१४. अणुवेदान्तः
१५. अनुव्याख्यानम्
१६. न्यायविवरणम्
१७. तन्त्रसारः
१८. द्वादशस्तोत्रम्
१९. प्रणवकल्पः
२०. जयन्तीकल्पः
२१. नखस्तुतिः
२२. यमकभारतम्
२३. कृष्णामृतमहार्णवः
२४. सदाचारस्मृतिः
२५. भागवततात्पर्यम्
२६. प्रमाणलक्षणम्
२७. श्रीमद्भारततात्पर्यनिर्णयः
२८. ऐतरेयभाष्यम्
२९. तैत्तिरीयभाष्यम्
३०. बृहदारण्यकभाष्यम्
३१. ईशावास्यभाष्यम्
३२. काठकभाष्यम्
३३. छान्दोग्यभाष्यम्
३४. आथर्वणभाष्यम्
३५. माण्डूकभाष्यम्
३६. षड्प्रश्नभाष्यम्
३७. तलवकारभाष्यम्

मन्दोपकारिणी – ॥ **युक्ताया इति** ॥ एषः श्रीमध्वाचार्यः तत्र श्रीमदनुव्याख्याने आत्मना स्वेन प्रोक्तायाः कथितायाः युक्तायाः उपपन्नायाः युक्तिमालायाः युक्तीनां मालायाः पङ्क्तेः समूहस्येति यावत् विवरणं प्रपञ्चनं व्यक्तं स्पष्टं यथा भवति तथा चक्रे । कथं भूतं, कवीन्द्रैः पण्डितश्रेष्ठैः । दुष्करं कर्तुमशक्यं अनुव्याख्यानोक्त पूर्वपक्षसिद्धान्तानुरूपं श्रीमन्न्यायविवरणाख्यं अपरं ग्रन्थं चकारेति भावः ॥ ९० ॥

मध्वेन्दोर्नित्यसम्बन्धान्निस्तमस्तापचेतसोः ।
वैकुण्ठं यातयोः पित्रोर्गृहेऽस्यावरजोऽवसत् ॥ ९१ ॥

पदार्थदीपिकोद्बोधिका – श्रीविष्णुतीर्थार्यवर्णनमुपक्रमते— **मध्वेन्दोरित्यादिना** ॥ मध्वेन्दोः नित्यसम्बन्धात् दर्शनश्रवणादिरूपात् निर्गतौ तमस्तपौ ययोः ते निस्तमस्तापे तादृशे चेतसी ययोः तौ तयोः निस्तमस्तापचेतसोः माता च पिता च पितरौ तयोः पित्रोः वैकुण्ठं यातयोः सतोः अस्य श्रीमध्वस्य अवरजः गृहे अवसत् ॥ ९१ ॥

मन्दोपकारिणी – अथ श्रीविष्णुतीर्थाचार्यस्य महिमानं वर्णयितुं उपक्रमति ॥ **मध्वेन्दोः इति** ॥ मध्वेन्दोः मध्वाचार्याख्यचन्द्रस्य नित्यसम्बन्धात् नित्यं दर्शनादि-सम्बन्धात् निस्तमस्तापचेतसोः तमः अज्ञानं च तापश्च तमस्तापौ निर्गतौ तमस्तापौ यस्मात् । तादृशं चेतः अन्तःकरणं ययोस्तौ निस्तमस्तापचेतसौ तयोः । अज्ञानता-परहितान्तःकरणयोः इत्यर्थः । पित्रोः मध्यगेहतद्भार्ययोः वैकुण्ठं वैकुण्ठलोकं यातयोः प्राप्तयोः सतोः अस्य श्रीमध्वस्य अवरजः अनुजः गृहे स्वमन्दिरे अवसत् ॥ ९१ ॥

विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसम्पदा ।
निर्वेदिना वेदविदा तेनापे वेदवादिराट् ॥ ९२ ॥

पदार्थदीपिकोद्बोधिका – विधीति ॥ विधेः दैवस्य या भ्रूः तस्या यो विभ्रमो विलासः परिपाक इति यावत् । तेन भ्रश्यन्ती धनानि च गावश्च धान्यानि च सम्पदश्च धनगोधान्यसम्पदो यस्य स तथा तेन । अत एव निर्वेदोऽस्यास्तीति निर्वेदी तेन । विरक्तिमतेत्यर्थः वेदविदा तेन अवरजेन वेदवादिराट् वेदवादिश्रेष्ठः श्रीमध्व आपे प्राप्तः । विधिवशात् धनादिनाशे सति विरक्तो मध्वानुजो मध्वमगमदित्यर्थः ॥ ९२ ॥

मन्दोपकारिणी – विधीति ॥ विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसम्पदा विधेः अदृष्ट-प्रेरकस्य विधातुः भ्रुवोः विभ्रमेण विलासेन भ्रश्यन्ती नष्टा धनं च गावश्च धान्यानि च धनगोधान्यानि एतद्रूपा च सा सम्पच्च धनगोधान्यसम्पत् विधिभ्रूविभ्रमभ्रश्यन्ती धनगोधान्यसम्पत् यस्य स तथोक्तः तेन । निर्वेदिना निर्वेदः वैराग्यं अस्यास्तीति निर्वेदी तेन। विरक्तिमता । वेदविदा वेदं वेत्तीति वेदवित् तेन वेदार्थज्ञानिना । तेन मध्वानुजेन वेदवादिराट् वेदान् वदन्ति व्याख्यान्ति ते वेदवादिनः तेषां वेदव्याख्यातॄणां राट् श्रेष्ठः श्रीमध्वाचार्यः आपे प्राप्तः । 'आपॄ व्याप्तौ इत्यतः कर्मणि लिट् आत्मनेपदं आपे आपाते आपिरे' । मध्वानुजः मातापितृमरणानन्तरं अदृष्टवशात् धनादिनाशे सति विरक्तः सन् यत्याश्रमं ग्रहीतुं श्रीमध्वाचार्यं अगमत् इति भावः ॥ ९२ ॥

पारिव्राज्यं प्रार्थयन्तं पादानम्रमिमं मुहुः ।
समयापेक्षयोर्वीक्षो गमयामास धाम तम् ॥ ९३ ॥

पदार्थदीपिकोद्बोधिका – पारिव्राज्यमिति ॥ उर्वी ईक्षा यस्य स उर्वीक्षः श्रीपूर्णप्रज्ञः। परिव्राजो भावः पारिव्राज्यं यत्याश्रममित्यर्थः । प्रार्थयन्तं मुहुः पादानम्रं तं इमं स्वानुजं समयापेक्षया कालापेक्षया धाम मन्दिरं गमयामास । नायं कालः सन्यासस्य कालान्तरे भविष्यति इत्युक्त्वा तावत् गृहं गमयामास इत्यर्थः ॥ ९३ ॥

मन्दोपकारिणी – पारिव्राज्यमिति ॥ उर्वीक्षः उर्वी बहुला ईक्षा बुद्धिः यस्य स उर्वीक्षः पूर्णप्रज्ञाचार्यः । पारिव्राज्यं परिव्राजः भिक्षोः भावः पारिव्राज्यं संन्यासाश्रमम् । 'भिक्षुः परिव्राट् कर्मन्दी' इत्यमरः । प्रार्थयन्तं मुहुः भृशं पादानम्रं पादयोः आनम्रं आनतं तमिमं स्वानुजं समयापेक्षया समयस्य संन्यासाश्रमस्वीकारयोग्यस्य कालस्य अपेक्षया इच्छया धाम स्वगृहं गमयामास । अयं चातुर्मास्यः कालः संन्यासस्वीकारयोग्यो न चातुर्मास्यसमाप्त्यनन्तरं संन्यासाश्रमं दास्यामीति तं प्रत्युक्त्वा तावत् गृहं प्रवेशयामास इति भावः ॥ ९३ ॥

न जघास न सुष्वाप न जहास स धीरधीः ।
समयार्थी स्मरन् ज्येष्ठं रामं रामानुजो यथा ॥ ९४ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ ज्येष्ठं स्मरन् धीरा धीः यस्य स धीरधीः सन्यासे स्थिरबुद्धिरित्यर्थः । स मध्वानुजो समयार्थी सन्यासकालं प्रतीक्षमाणः सन् चतुर्दशवत्सरान्ते समेष्यामीति श्रीरामोक्तसमयं प्रतीक्षमाणो ज्येष्ठं रामं स्मरन् रामानुजो भरतो यथा, तथा न जघास न आदत् । अद भक्षणे लिट् । न सुष्वाप, न जहास न हासं चकार ॥९४॥

मन्दोपकारिणी – नेति ॥ समयार्थी समयं अर्थयते इति समयार्थी संन्यासकालं प्रतीक्षमाणः धीरधीः धीरा संन्यासाश्रमस्वीकारे धैर्यवती धीः यस्य सः स्थिरबुद्धिः सः मध्वानुजः ज्येष्ठं अग्रजं मध्वाचार्यं स्मरन् ध्यायन्, न जघास, न भुक्तवान्, न सुष्वाप निद्रां न चकार, न जहास हासं न कृतवान् । समयार्थी चतुर्दशवत्सरानन्तरं आयास्यामीति रामकृतं कालं प्रतीक्षमाणः ज्येष्ठं रामं स्मरन् रामानुजः दाशरथिरामस्य अनुजः भरतः यथा न निद्रादिकं कृतवान् तथेत्यर्थः । न कुत्रापि विषये आसक्तिं कृतवान् इति भावः । ञिष्वप् शये इति धातोर्लिट् परस्मैपदम् । ''सुष्वाप सुषुपतुः सुषुपुः । 'घस्तृ अदने इति धातोः लिट् परस्मैपदम्, ''जघास जक्षतुः जक्षुः । ''हसे हसेन'' इति लिट् परस्मैपदम् । जहास जहसतुः जहसुः ॥ ९४ ॥

राज्ये कथञ्चिन्निक्षिप्य राजानं विरहार्दितम् ।
अवतारभुवं प्रायाद्भगवाञ्छरदत्यये ॥ ९५ ॥

पदार्थदीपिकोद्बोधिका – राज्य इति ॥ भगवान् श्रीमध्वः शरदत्यये दत्वसाने विरहादर्दितं भविष्यद्विरहाद्दुःखितं राजानं जयसिंहं कथञ्चिद्राज्ये संस्थाप्य अवतारभुवं स्वावतारस्य भुवं पाजकक्षेत्रं प्रायात् ॥ ९५ ॥

मन्दोपकारिणी – ॥ राज्येति ॥ (भगवान्) श्रीमध्वः (शरदत्यये) शरदः शरदृतोः 'स्यादृतौ वत्सरे शरत्' इत्यभिधानं अत्यये अवसाने सति (अवतारभुवं) अवतारस्य स्वजन्मनः भूः भूमिः तां पाजकक्षेत्रं (प्रायात्) प्राप किं कृत्वा (विरहार्दितं) भविष्यत्स्वावियोगात् आर्दितं दुःखितं (राजानं) जयसिंहं (कथञ्चित्) येन केन प्रकारेण (राज्ये) तद्राष्ट्रे (निक्षिप्य) संस्थाप्य शरदृतुगमनानन्तरं जिगमिषुं स्वं दृष्ट्वा स्वावियोगो भविष्यतीति बुद्ध्या खिन्नमनसः जयसिंहराजस्य केनचित् प्रकारेण समाधानं कृत्वा पुनः पाजकक्षेत्रं प्रत्यगमत् इति भावः । 'प्रपूर्वात् या प्रापणे इति धातोः लङ् परस्मैपदं अयात् अयातां अयुः अयान्' ॥ ९५ ॥

विशुद्धद्विकुलं श्रौतं शुचिं कृतपितृक्रियम् ।
विरक्तं विषयान् भुक्त्वा व्यधान्मध्वोऽनुजं यतिम् ॥ ९६ ॥

भावप्रकाशिका – विशुद्धद्विकुलमित्यादि हेतुगर्भम् ॥ ९६ ॥

पदार्थदीपिकोद्बोधिका – विशुद्धेति ॥ विशुद्धे द्वे कुले यस्य स तथा तं निर्दुष्ट-मातापितृ वंशजं इत्यर्थः । श्रुतिसम्बन्धी श्रौतः तम् । श्रुतिपाठतदर्थावधारणयुक्तमित्यर्थः । शुचिं मनोवाक्कायशुद्धिमन्तम् । कृता अनुष्ठिता पितृक्रिया नित्यनैमित्तिकपितृकार्यं येन तम् । तत्कालानुष्ठितजीवच्छ्राद्धात्मकपितृकार्यमित्यर्थः । विषयान् भुक्त्वा विरक्तं अनुजं यतिं चकार । अत्र विशुद्धद्विकुलत्वादयो धर्माः यत्याश्रमदाने हेतव इत्यर्था एभिः विशेषणैः दर्शिताः ॥ ९६ ॥

मन्दोपकारिणी – विशुद्धेति ॥ मध्वः अनुजं यतिं व्यधात् । कथंभूतं विशुद्धद्विकुलं द्वयोः कुलं विशुद्धं द्विकुलं यस्य स तम् । निर्दुष्टमातापितृवंशजातम् । श्रौतं श्रुतिसम्बन्धिनं श्रुतितदर्थावधारणयुक्तम् । शुचिं मनोवाक्कायैः शुचिम् । कृतपितृक्रियं कृता पितृक्रिया संन्यासकाले क्रियमाणजीवच्छ्राद्धं येन स तथोक्तः तम् । विषयान् शब्दादीन् भुक्त्वा विरक्तं वैराग्योपेतम् । अत्र विशुद्धद्विकुलं इत्यादिविशेषणानि संन्यासस्वीकारहेतुभूतानि इति ज्ञेयम् ॥

रहस्यतिरहस्यं तद्ब्रह्म ब्रह्मसमो ददौ ।
अमुष्मै पञ्चतपसो न विदुर्यत्तपस्विनः ॥ ९७ ॥

पदार्थदीपिकोद्बोधिका – रहसीति ॥ ब्रह्मणा समो ब्रह्मसमः चतुर्मुखसदृशः श्रीमध्वः पञ्चाग्निमध्ये तपो येषां ते पञ्चतपसः । पञ्चाग्निमध्ये तपश्चरन्तः इत्यर्थः तपस्विनो यद्ब्रह्म न विदुः अतिरहस्यं तद्ब्रह्म रहसि अमुष्मा अनुजाय ददौ उपदिदेश ॥ ९७ ॥

मन्दोपकारिणी – रहसीति ॥ ब्रह्मसमः ब्रह्मणः चतुर्मुखस्य समः रहसि एकान्ते अतिरहस्यं अतिगोप्यं तत् ब्रह्म प्रणवमन्त्रं अमुष्मै यतिभूताय अनुजाय ददौ उपदिदेश । 'डु दाञ् दाने इत्यतो लिट् परस्मैपदम्' । कीदृशं ब्रह्म पञ्चतपसः पञ्चसु अग्निषु तपो येषां ते पञ्चतपसः पञ्चाग्निमध्ये तपः चरन्तः तपस्विनः यत् ब्रह्म न विदुः न जानन्ति तादृशं ब्रह्म ददौ इत्यर्थः । 'विद ज्ञाने इत्यतः लिट् परस्मैपदं वेद विदतुः विदुः' । अनेन प्रणवमन्त्रस्य सर्वेषां अनधिकार इति सूच्यते ॥ ९७ ॥

प्रेमामृतप्रसन्नास्यस्मिताङ्गापाङ्गपूर्वकम् ।
श्रीविष्णुतीर्थनामास्मै प्रीतितीर्थः प्रदत्तवान् ॥ ९८ ॥

पदार्थदीपिकोद्बोधिका – प्रेमेति ॥ प्रीतितीर्थः आनन्दतीर्थः प्रेम एव अमृतं प्रेमामृतं तेन प्रसन्नम् । तत् च तत् आस्यं च प्रेमामृतप्रसन्नास्यं तत् च स्मितमेवाङ्गं सहकारि यस्य स चासौ अपाङ्गश्च स च प्रेमामृतप्रसन्नास्यस्मिताङ्गापाङ्गौ तौ पूर्वकौ यथा भवति तथा । अस्मै यतये स्वावरजाय श्रीविष्णुतीर्थनाम प्रदत्तवान् ॥ ९८ ॥

मन्दोपकारिणी – प्रेमेति ॥ प्रीतितीर्थः आनन्दतीर्थः प्रेमामृतप्रसन्नास्यस्मिताङ्गा-पाङ्गपूर्वकं प्रेमैव स्नेह एव अमृतं तेन प्रसन्नं च तत् आस्यं च तस्य स्मितमेव ईषद्धास एव अङ्गं सहकारि यस्य स स्मिताङ्गः स्मिताङ्गश्चासौ उपाङ्गः नेत्रान्तश्च सः पूर्वो यथा भवति तथा । स्नेहेन प्रसन्नमुखः सन् हासयुक्तापाङ्गेन पश्यन् सन् अस्मै यतिभूताय स्वावरजाय श्रीविष्णुतीर्थनाम श्रीविष्णुतीर्थ इति संज्ञां प्रदत्तवान् ॥ ९८ ॥

श्रवणेनानुवादेन मननेनावृथाऽकरोत् ।
कालं वेदान्तशास्त्रस्य वेदान्तगुरुसोदरः ॥ ९९ ॥

पदार्थदीपिकोद्बोधिका – श्रवणेति ॥ वेदान्तगुरुसोदरः श्रीमध्वानुजः श्रीविष्णु-तीर्थाचार्यः वेदान्तशास्त्रस्य श्रवणेन अनुवादेन प्रमेयानुवादेन मननेन चिन्तनेन च कालं समयं अवृथा अवन्ध्यं अकरोत् ॥ ९९ ॥

मन्दोपकारिणी – श्रवणेनेति ॥ वेदान्तगुरुसोदरः वेदान्तानां उपनिषदां गुरोः उपदेशकस्य श्रीमध्वाचार्यस्य सोदरः अवरजः विष्णुतीर्थः वेदान्तशास्त्रस्य उपनिषद्भाष्यस्य श्रवणेनानुवादेन श्रुतस्य पुनःपुनरावर्तनेन मननेन श्रुतार्थस्य मनसा अनुचिन्तनेन कालं अवृथा सार्थकं अकरोत् ॥ ९९ ॥

स दान्तिभक्तिमाधुर्यपरिचर्यादिमेदुरैः ।
महाविटपिनं चक्रे गुरोः स्वस्थं कृपांकुरम् ॥ १०० ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ स श्रीविष्णुतीर्थाचार्यः स्वस्थं स्वस्मिन् स्थितं गुरोः श्रीमध्वाचार्यस्य कृपाङ्कुरं, दान्तिः इन्द्रियनिग्रहः सा च भक्तिश्च माधुर्यं

वाङ्मनसोरपारुष्यं तच्च परिचर्या शुश्रूषा सा च ता आदयो येषां गुणानां त एव मेदुराणि अङ्कुराभिवृद्धिसाधनानि तैः । 'सान्द्रस्निग्धस्तु मेदुर' इत्यमरः । दान्तिभक्तिमाधुर्यपरिचर्यादिमेदुरैः महाविटपिनं महावृक्षं चक्रे स्वगुरुकृपांकुरं स्वीयदान्त्यादिभिरवर्धयदिति भावः ॥ १०० ॥

मन्दोपकारिणी – स इति ॥ सः विष्णुतीर्थः स्वस्थं स्वस्मिन् तिष्ठतीति स्वस्थः तं गुरोः श्रीमध्वाचार्यस्य कृपाङ्कुरं कृपायाः अङ्कुरं दान्तिभक्तिमाधुर्यपरिचर्यादिमेदुरैः दान्तिः इन्द्रियनिग्रहः भक्तिः हरौ गुरौ स्नेहविशेषः माधुर्यं वाङ्मनसोः अपरुषत्वं परिचर्या गुरुशुश्रूषा दान्तिश्च भक्तिश्च माधुर्यं च परिचर्या च दान्तिभक्तिमाधुर्यपरिचर्याः ता एवादयो येषां गुणानां ते एव मेदुराणि अङ्कुराभिवृद्धिसाधनानि तैः । महाविटपिनं महान् अत्युच्चश्चासौ विटपी वृक्षश्च महाविटपी तम् । 'विटपी पादपस्तरुः' इत्यमरः चक्रे । उप्तं बीजं किञ्चित् भूमिमुद्भिद्य निर्गतमात्रं अङ्कुर इत्युच्यते यथा तादृशं अङ्कुरं तदभिवृद्धिसाधनैः वर्धयित्वा महावृक्षं कुर्युः तद्वत् श्रीविष्णुतीर्थः स्वस्मिन् प्रादुर्भूतां मध्वाचार्यकृपां दान्तिभक्त्यादिसाधनैः अभिवृद्धां चकार । मध्वः विष्णुतीर्थे तद्गुणान् दृष्ट्वा महाकृपां कृतवान् इति भावः ॥ १०० ॥

अनन्तमतिकारुण्यकल्पद्रुमवतो जनैः ।
अवर्ण्यो महिमा तस्य लौल्यात् संवर्ण्यते मनाक् ॥ १०१ ॥

पदार्थदीपिकोद्बोधिका – अनन्तेति ॥ अनन्तमतेः श्रीपूर्णप्रज्ञस्य कारुण्यं दया तदेव कल्पद्रुमः सोऽस्यास्तीति तादृशस्य तस्य श्रीविष्णुतीर्थस्य महिमा जनैः अवर्ण्योऽपि वर्णयितुं अशक्योऽपि लोलस्य भावो लौल्यं तस्मात् तन्महिमानमनुक्त्वा स्थातुं धैर्याभावादित्यर्थः । मनाक् ईषत् संवर्ण्यते ॥ १०१ ॥

मन्दोपकारिणी – अनन्तमतीति ॥ अनन्तमतिकारुण्यकल्पद्रुमवतः अनन्ता अपरिमिता मतिः यस्य सः तस्य पूर्णप्रज्ञाचार्यस्य कारुण्यं करुणैव कल्पद्रुमः कल्पवृक्षः सोऽस्यातीति अनन्तमतिकारुण्यकल्पद्रुमवान् तस्य श्रीविष्णुतीर्थस्य महिमा माहात्म्यं जनैः अवर्ण्योऽपि वर्णयितुं अशक्योऽपि लौल्यात् महिमा वर्णनीय इति सतृष्णत्वात् औत्कण्ठ्यात् इति यावत् । 'लोलः सतृष्णचलयोः' इति भास्करः । मनाक् किंचित्

संवर्ण्यते संस्तूयते । 'किंचिदीषन्मनागल्पः' इत्यमरः । 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु च इति धातोः कर्मणि लट् आत्मनेपदं वर्ण्यते वर्ण्ये ते वर्ण्यन्ते' ॥ १०१ ॥

चतुरोऽसौ प्रवचने मनुसंसिद्धिमान्मनः ।
संख्या मां पूरणी मागान्मध्वदासमिति व्यधात् ॥ १०२ ॥

पदार्थदीपिकोद्बोधिका – चतुर इति ॥ प्रवचने श्रीमध्वशास्त्रव्याख्याने चतुरः मनोः मन्त्रस्य संसिद्धिः अस्यास्तीति मनुसंसिद्धिमान् असौ श्रीविष्णुतीर्थार्यो मध्वदासं मां पूरणी अस्मादयं द्वितीय इत्यादिसङ्ख्या पूरणीसङ्ख्या सा मागात् न प्राप्नोत् इति मनो व्यधात् । मनसैवममन्यतेत्यर्थः । मध्वशिष्याग्रगण्यं वदेत् तथा यतिष्य इति अमन्यत इति भावः ॥

मन्दोपकारिणी – चतुर इति ॥ प्रवचने मध्वशास्त्रव्याख्याने चतुरः मनुसंसिद्धिमान् मनूनां प्रणवादिमन्त्राणां संसिद्धिः सम्यक् सिद्धिः अस्यास्तीति मनुसंसिद्धिमान् । येषां मन्त्राणां जपेन अभीष्टसिद्धिः भवत्येव तादृशमन्त्रवान् इत्यर्थः । असौ श्रीविष्णुतीर्थार्यः मनः इति एवं व्यधात् । मनसा एवं अमन्यत इत्यर्थः । कथं मध्वदासं मध्वस्य शिष्यं मां पूरणी अस्मादयं द्वितीयः अस्मात् अयं तृतीयः इत्यादिरूपा पूरणी संख्या मागात् न प्राप्नोतु । मध्वशिष्याणां गणनावसरे मां अयं द्वितीयः तृतीयः इति द्वितीयत्वादिप्रकारेण कोऽपि न वदेत् किन्तु मां मध्वशिष्याग्रेसरं वदेत् तथा अहं अतिशयिष्ये इति अमन्यत इति भावः ॥ १०२ ॥

दिशं प्रयान्तं शशिनश्चरन्तं भुव्यशोधयत् ।
तीर्थकं विष्णुतीर्थं च विष्णुतीर्थश्च तीर्थकम् ॥ १०३ ॥

पदार्थदीपिकोद्बोधिका – दिशमिति ॥ शशिनः चन्द्रस्य दिशं उत्तरदिशमित्यर्थः । प्रयान्तं भुवि चरन्तं विष्णुतीर्थं तीर्थरूपं कं जलं च तीर्थकं पर्यशोधयत् शुध शौचे लङ् । विष्णुतीर्थं च तीर्थकं तीर्थजलं पर्यशोधयत् । गङ्गादितीर्थस्नानेन श्रीविष्णुतीर्थार्यः शुद्धकायोऽभूत् । भागवतश्रेष्ठस्य मज्जनेन तीर्थसलिलानि च पावनानि अभूवन् इत्यर्थः ॥

मन्दोपकारिणी – दिशमिति ॥ शशिनः चन्द्रस्य दिशं उदीचीं दिशं प्रयान्तं गच्छन्तं भुवि भूम्यां चरन्तं तीर्थयात्रार्थं सञ्चरन्तं विष्णुतीर्थं तीर्थकं तीर्थस्य कं जलम् । 'कं शिरो

जलमाख्यातं' इति वररुचिः । अशोधयत् गङ्गादितीर्थस्नानेन श्रीविष्णुतीर्थार्यः शुद्धोऽभूत् । भागवतश्रेष्ठस्य विष्णुतीर्थस्य मज्जनादेव तीर्थसलिलानि च पावनानि अभूवन् इति भावः । 'शुध शौचे इति धातोः लङ् परस्मैपदम्' ॥ १०३ ॥

अकामानामनेकेषां सिद्धिभूमिं तपस्विनाम् ।
तिरोहितात्मा प्रापासौ हरिश्चन्द्रमहीधरम् ॥ १०४ ॥

पदार्थदीपिकोद्बोधिका – आकामानामिति ॥ असौ श्रीविष्णुतीर्थार्यः न विद्यते काम इच्छा येषां तेषां अकामानां अनेकेषां तप एषां अस्तीति तपस्विनः तेषां सिद्धेः तपःसिद्धेः भूमिः स्थानं सिद्धिभूमिः तां, हरिश्चन्द्रमहीधरं तन्नामकं पर्वतं तिरोहितोऽन्तर्हितः आत्मा स्वरूपं यस्य स तथा सन् योगसामर्थ्यात् सर्वप्राणिभिः अदृश्यः सन् इत्यर्थः प्राप ॥१०४॥

मन्दोपकारिणी – अकामानामिति ॥ असौ विष्णुतीर्थार्यः अकामानां न विद्यते कामः फलेच्छा येषां ते अकामाः तेषां काम्यकर्मानुष्ठानरहितानां अनेकेषां बहूनां तपस्विनां तपः कुर्वतां सिद्धिभूमिं तपःसिद्धिस्थानं हरिश्चन्द्रमहीधरं हरिश्चन्द्राख्यपर्वतं तिरोहितात्मा तिरोहितः अन्तर्हितः आत्मा स्वरूपं यस्य स तथोक्तः अदृश्यस्सन् प्राप प्राप्तवान् ॥ १०४ ॥

द्वन्द्वदुःखानले वीरो मात्सर्येण विमत्सरः ।
तत्याज मत्वा तस्यासावशनादीन्धनायितम् ॥ १०५ ॥

पदार्थदीपिकोद्बोधिका – द्वन्द्वेति ॥ वीरः अध्यवसायान्तगामी असौ विगतो मत्सरो यस्मात् स विमत्सरः सन् अपि द्वन्द्वमेव शीतोष्णादिद्वन्द्वमेव दुःखानलो दुःखाग्निः मात्सर्येण अशनमादिर्यस्य तदशनादि, तस्य द्वन्द्वदुःखाग्नेः इन्धनवत् आचरतीती इन्धनायितं मत्वा तत्याज ॥ १०५ ॥

मन्दोपकारिणी – द्वन्द्वेति ॥ वीरः आरब्धान्तगामी असौ विष्णुतीर्थार्यः विमत्सरः सन् अपि शुभद्वेषरहितोऽपि । 'मत्सरोऽन्यशुभद्वेषः' इत्यभिधानम् । द्वन्द्वदुःखानले द्वन्द्वं शीतोष्णादि तज्जन्यं यदुःखं तदेव अनलः अग्निः तस्मिन् मात्सर्येण द्वेषेण अशनादि भोजनादि तत्याज त्यक्तवान् । किं इति मत्वा तस्य द्वन्द्वदुःखाग्नेः अशनादि इन्धनायितं काष्ठायितं इति मत्वा । 'काष्ठं दारु इन्धनं त्वेधः' इत्यमरः । इन्धनादिकं यथाग्नेः

अभिवृद्धिजनकं तद्वत् अशनादि द्वन्द्वदुःखस्य अभिवृद्धिकारणं अतः द्वन्द्वदुःखानुत्पादनार्थं अशनादिपरित्यागं कृतवान् इति भावः । 'त्यज हानौ इति धातोः लिट् परस्मैपदं तत्याज तत्यजतुः तत्यजुः' ॥ १०५ ॥

भक्तैरनुगिरं नीतं प्रार्थितो यतिशेखरः ।
पञ्चगव्यं पपौ किञ्चित् पञ्चमे पञ्चमे दिने ॥ १०६ ॥

भावप्रकाशिका – अनुगिरं 'गिरेश्च सेनकस्ये'ति टच् समासान्तप्रत्ययः ॥ १०६ ॥

पदार्थदीपिकोद्बोधिका – भक्तैरिति ॥ यतिशेखरो यतिश्रेष्ठो भक्तैः अनुगिरं गिरेः समीपं 'गिरेश्च सेनकस्य' इत्यव्ययीभावान्ताट्टज्वा । नीतं पञ्चगव्यं प्रार्थितःसन् पञ्चमे पञ्चमे दिने किञ्चित् पपौ ॥ १०६ ॥

मन्दोपकारिणी – भक्तैरिति ॥ यतिशेखरः यतीनां शेखरः शिखास्थानीयः । अत्युत्तम इति यावत् । 'शिखास्वापीडशेखरौ' इत्यमरः भक्तैः जनैः प्रार्थितः सन् अनुगिरं गिरेः अनु अनुगिरं पर्वतसमीपं नीतं पञ्चगव्यं पञ्चमे पञ्चमे दिने किंचित् स्वल्पं पपौ पीतवान् । अशानादिकं परित्यज्य भक्तैः प्रार्थितः सन् तैरेव पर्वतसमीपं आनीतं पञ्चगव्यं पञ्चमे पञ्चमे दिने अपिबत् इति भावः । 'पा पाने इत्यतो लिट् परस्मैपदं पपौ पपतुः पपुः' ॥ १०६ ॥

स त्यजन् साहसी तच्च तपस्तेपेऽतितापसम् ।
बिल्वपर्णैः क्षितौ पतैस्तृप्तिमान् सलिलैरपि ॥ १०७ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ साहसं अस्यास्तीति साहसी तच्च पञ्चगव्यञ्च त्यजन् स विष्णुतीर्थः तापसान् अतिक्रम्य वर्तमानं अतितापसं तपः, क्षितौ पतैः पतितैः बिल्वपर्णैः सलिलैः अपि तृप्तिमान् सन् तेपे ॥ १०७ ॥

मन्दोपकारिणी – स इति ॥ साहसी साहसं अस्यास्तीति साहसी अतिकृच्छ्रसहनशक्तः । यद्वा साहसं दमः शरीरेन्द्रियादिनिग्रहः अस्यास्तीति साहसी । 'साहसं तु दमो दण्डः' इत्यमरः । सः विष्णुतीर्थार्यः तच्च पञ्चगव्यमपि त्यजन् सन् अतितापसं तापसान् तीव्रतपस्विनः पुरुषान् अति अतिक्रम्य वर्तमानं द्रुततरतपस्यापेक्षया

अतिशयितं इत्यर्थः । तपः तेपे कृतवान् । कथंभूतः क्षितौ भूमौ पत्रैः पतितैः बिल्वपर्णैः बिल्वाख्यवृक्षस्य पत्रैः सलिलैरपि तृप्तिमान् तृप्तिः अलम्बुद्धिः अस्यास्तीति तृप्तिमान् । 'तप सन्तापे इत्यतो लिट्-आत्मनेपदं तेपे तेपाते तेपिरे' ॥ १०७ ॥

यथेष्टमध्यास्त शिलां यमी सुनियमी स ताम् ।
नाध्यासते यामेकाहं दैवभग्नास्तपस्विनः ॥ १०८ ॥

भावप्रकाशिका – शिलामध्यास्त 'अधिशीङ्स्थासां कर्मे'ति ॥ १०८ ॥

पदार्थदीपिकोद्बोधिका – यथेष्टमिति ॥ यमो मनःसंयमोऽस्यास्तीति यमी सुनियमः शोभनव्रतनियमोऽस्यास्तीति सुनियमी दैवभग्ना ईश्वरप्रतिहताः तदनुग्रहरहिता इत्यर्थः । तपस्विनो यां शिलां, एकं च तदहश्च एकाहम् । 'राजाहःसखिभ्य' इति टच् । नाध्यासते 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम् । तां शिलां यथेष्टं बहुकालपर्यन्तमित्यर्थः । अध्यास्त । दैवानुग्रहरहिताः तपस्विनो यस्यां शिलायां एकाहमपि स्थातुं असमर्थाः तस्यां शिलायां अयं बहुकालं वसन् तपश्चकारेति भावः ॥ १०८ ॥

मन्दोपकारिणी – यथेष्टमिति ॥ यमी मनोनिग्रहवान् सुनियमी सु शोभनः नियमः यतिविहितनित्यकर्म अस्यास्तीति सुनियमी सः विष्णुतीर्थः तां शिलां यथेष्टं स्वेच्छानुसारेण बहुकालं इत्यर्थः । अध्यास्त उपविवेश । तां कां दैवभग्नाः दैवेन अदृष्टप्रेरकेश्वरेण भग्नाः प्रतिहताः ईश्वरानुग्रहरहिता इति भावः । तपस्विनः यां शिलां एकं च तत् अहश्च एकाहं 'राजाहःसखिभ्यष्टच्' एकदिनमपि नाध्यासते नोपविशन्ति । उपवेष्टुं न समर्था इति यावत् । तां इत्यर्थः । 'अधिशीङ्स्थासां कर्म' इति सूत्रात् शिलां इति द्वितीया । शिलायां इत्यर्थः । ईश्वरानुग्रहरहिताः तपस्विनः यस्यां शिलायां एकाहमपि उपवेष्टुं न शक्ताः अतिशीतलत्वात् तस्यां शिलायां अयं विष्णुतीर्थः बहुकालमुपविश्य तपश्चकार इति भावः ॥ १०८ ॥

पवनांशानुजो जित्वा पवनं रेचकादिभिः ।
विषयेभ्यो हृषीकाश्वान् मनोयन्त्रा समाहरत् ॥ १०९ ॥

पदार्थदीपिकोद्बोधिका – पवनेति ॥ पवनांशानुजो मध्वानुजः रेचकं आदिः येषां तानि तथा तैः । रेचकपूरककुम्भकैरित्यर्थः । पवनं शारीरं वायुं जित्वा, हृषीकाण्येवाश्वाः

तान्। इन्द्रियरूपाश्वानित्यर्थः । विषयेभ्यः शब्दादिभ्यः मनोयन्त्रा मनोनामकसारथिना समाहरत् ॥ १०९ ॥

मन्दोपकारिणी – पवनेति ॥ पवनांशानुजः पवनस्य मुख्यवायोः अंशस्य श्रीमध्वाचार्यस्य अनुजः श्रीविष्णुतीर्थार्यः रेचकादिभिः रेचकः आदिः येषां ते रेचकादयः तैः । तद्गुणसंविज्ञानो बहुव्रीहिः । रेचकपूरककुम्भकाख्यैः त्रिभिः प्राणायामैः पवनं श्वासवायुं जित्वा वशीकृत्य वायुप्रसादं सम्पाद्येति यावत् । हृषीकाश्वान् हृषीकानि इन्द्रियाण्येव अश्वान् हयान् । 'हृषीकं विषयीन्द्रियं' इत्यमरः । विषयेभ्यः शब्दादिविषयेभ्यः । 'रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी' इत्यमरः । मनोयन्त्रा मन एव बुद्धिरेव यन्ता सारथिः तेन समाहरत् निवर्तयामास । यथा विदेशान् प्रति गच्छतोऽश्वान् सारथिना तेभ्यः परावर्तयति कश्चित् तद्वत् अयं श्रीविष्णुतीर्थार्यः रूपादिविषयान् प्रति गच्छन्तीन्द्रियाणि बुद्ध्या तेभ्यः परावर्तयत् । इन्द्रियाणि वशीचकार इति भावः । 'सं आङ् पूर्वात् हृञ् हरणे इति धातोः लङ् परस्मैपदम्' ॥ १०९ ॥

स्मरन् मुरारेराकारं दध्यावध्यात्मकोविदः ।
समाधिमाधिशमनं योगलभ्यं स लब्धवान् ॥ ११० ॥

पदार्थदीपिकोद्बोधिका – स्मरन्निति ॥ अधिकश्चासौ आत्मा च अध्यात्मा श्रीहरिः तद्विचारे कोविदोऽध्यात्मकोविदः, मुरारेः श्रीकृष्णस्य आकारं स्मरन्, गुरूक्तमार्गेण स्मरन् सन् दध्यौ। एवं कुर्वन् सन्, योगो मनोयोग एषामस्तीति योगिनः तैः लभ्यं प्राप्यं, आधेर्मनःक्लेशस्य शमनं शान्तिः यस्मात् तं आधिशमनं समाधिं निरन्तरं भगवति मनोयोगम्। तथा च उक्तं 'परे हि योगो मनसः समाधि'रिति । लब्धवान् ॥ ११० ॥

मन्दोपकारिणी – स्मरन्निति ॥ अध्यात्मकोविदः आत्मानं परमात्मानं अधिकृत्य प्रवर्तमानं शास्त्रं अध्यात्मं वेदान्तादि, तस्मिन् कोविदः विशारदः सः विष्णुतीर्थार्यः मुरारेः श्रीविष्णोः आकारं रूपं स्मरन् गुरूक्तमार्गेण अनुसन्दधत् दध्यौ ध्यातवान् । एवं कुर्वन् सः विष्णुतीर्थार्यः । योगलभ्यं योगेन भगवति मनोयोगेन लभ्यं प्राप्तुं योग्यम् । आधिशमनं आधेः मानस्याः व्यथायाः शमनं नाशकम् । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । समाधिं अनायासेन निरन्तरं भगवति मनोयोगरूपं लब्धवान् । यथोक्तं 'परे हि योगो मनसः समाधिः' इति । 'ध्यै चिन्तायाम् इति धातोः लिट् दध्यौ दध्यतुः दध्युः' ॥ ११० ॥

मौकुन्दे सुन्दरे रूपे स्वानन्दादिगुणार्णवे ।
स्वाश्चर्यरत्ने मग्नात्मा नान्यत् किञ्चिद्विवेद सः ॥ १११ ॥

पदार्थदीपिकोद्बोधिका – मौकुन्द इति ॥ सुन्दरे स्वानन्दादिगुणार्णवे शोभनानन्दादिगुणसिन्धौ स्वाश्चर्येषु शोभनाश्चर्येषु रत्नं उत्तमं तस्मिन् स्वाश्चर्यरत्ने मौकुन्दे मुकुन्दसम्बन्धिनि रूपे मग्नात्मा मग्नचित्तः स अन्यत् ध्यानविषयभगवद्रूपादन्यत् किञ्चिद्वस्तु न विवेद असंप्रज्ञातसमाधिस्थोऽभूदित्यर्थः ॥ १११ ॥

मन्दोपकारिणी – मौकुन्द इति ॥ सः विष्णुतीर्थार्यः स्वानन्दादिगुणार्णवे आनन्दः आदिः येषां ते आनन्दादयः ते च ते गुणाश्च । सु शोभनाः निर्दोषाश्च ते आनन्दादि गुणाश्च तैः अर्णवः समुद्रः तस्मिन् । स्वाश्चर्यरत्ने शोभनेषु आश्चर्येषु रत्ने श्रेष्ठे । 'रत्नं श्रेष्ठे मणौ' इति विश्वः । सुन्दरे मौकुन्दे मुकुन्दस्य इदं मौकुन्दं तस्मिन् मुकुन्दसम्बन्धिनि रूपे मग्नात्मा मग्नः निमग्नः आत्मा मनो यस्य स तथोक्तः । अन्यत् ध्यानविषयात् भगवद्रूपात् अन्यत् किञ्चित् वस्तु न विवेद न ज्ञातवान् । असम्प्रज्ञातसमाधिमान् अभूत् इति भावः । 'विद ज्ञाने इत्यतो लिट् परस्मैपदं विवेद विविदतुः विविदुः' ॥ १११ ॥

कामत्रासविहीनस्य तस्य सुज्ञानचक्षुषः ।
विना कैवल्यसाम्राज्यं नार्घो योगमणेरभूत् ॥ ११२ ॥

पदार्थदीपिकोद्बोधिका – कामेति ॥ तस्य श्रीविष्णुतीर्थस्य कामः फलकामना स एव त्रासो मणिदोषः तेन विहीनः तस्य । मणिः यथा दोषहीनः स्यादेवमस्य फलाख्यदोषरहित इत्यर्थः । सुज्ञानमेव शोभनापरोक्षज्ञानमेव चक्षुर्यस्य तस्य । मणिप्रकाशश्चक्षुरित्युच्यते । मणिः यथा शोभनप्रकाशवान् स्यात्तथा तद्योगोऽपि सम्यक् अपरोक्षवानित्यर्थः । योग एव मणिर्योगमणिः तस्य । कैवल्यमेव मोक्ष एव साम्राज्यं तद्विना अस्य अर्घो मौल्यं न अभूत् । यथा कस्यचिद्रत्नविशेषस्य साम्राज्यं विना मौल्यं न स्यात् तथा तद्योगस्यापि कैवल्यं विना यत्फलं तन्नाभूदिति भावः ॥ ११२ ॥

मन्दोपकारिणी – कामेति ॥ तस्य श्रीविष्णुतीर्थस्य योगमणेः योग एव असम्प्रज्ञातसमाधिरूपध्यानमेव मणिः रत्नं तस्य । 'योगः संनहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः ।

कैवल्यसाम्राज्यं विना विहाय ।, 'मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतं' इत्यमरः । अन्यत् वस्तु अर्घो मौल्यं नाभूत् । यथा कस्यचित् रत्नविशेषस्य साम्राज्यं विना अन्यत् मूल्यं न स्यात् एवं विष्णुतीर्थकृतध्यानयोगस्यापि मुक्तिं विना अन्यत् फलं नाभूत् इति भावः । 'मूल्ये पूजाविधावर्घः' इत्यमरः । कथंभूतस्य योगमणेः, कामत्रासविहीनस्य काम एव फले काम एव त्रासः तेन विहीनस्य रहितस्य । त्रासो नाम मणिदोषः । मणिः यथा तद्दोष-रहितः स्यात् एवं अस्य योगोऽपि कामाख्यदोषरहित इत्यर्थः । सुज्ञानचक्षुषः शोभनज्ञानं अपरोक्षज्ञानं तदेव चक्षुः यस्य स सुज्ञानचक्षुः तस्य । मणेः प्रकाशश्चक्षुरित्युच्यते । मणिः यथा शोभनप्रकाशवान् स्यात् एवं एतद्योगोऽपि सम्यक् अपरोक्षज्ञानवान् इत्यर्थः ॥११२॥

मध्वानुजे मध्वनाथो यं प्रसादं व्यधात् तदा ।
स चित्ताविषयत्वाद्वा गोप्यत्वाद्वा न वर्ण्यते ॥ ११३ ॥

पदार्थदीपिकोद्बोधिका – मध्वानुज इति ॥ मध्वनाथः श्रीहरिः तदा मध्वानुजे यं प्रसादं अनुग्रहं व्यधात् स अनुग्रहः चित्ताविषयत्वात् वा गोप्यत्वात् वा न वर्ण्यते ॥११३॥

मन्दोपकारिणी – मध्वानुज इति ॥ तदा मध्वनाथः मध्वस्य स्वामी श्रीहरिः मध्वानुजे विष्णुतीर्थे यं प्रसादं व्यधात् चक्रे । सः अनुग्रहः चित्ताविषयत्वात् चित्तस्य मनसः अविषयत्वात् अगोचरत्वाद्वा गोप्यत्वाद्वा अतिगुह्यत्वाद्वा न वर्ण्यते विस्तरेण नोच्यते। साकल्येन विषयीकर्तुं अशक्यत्वात् इतरेषां तज्ज्ञाने अधिकाराभावाच्च इति भावः । वर्ण क्रियाविस्तारगुणवचनेषु इति धातोः कर्मणि लट् आत्मनेपदम्' ॥ ११३ ॥

अहो महाबोधसेवामहिमाऽस्मिन् युगे यतः ।
धन्योऽसौ सिद्धिमापेमां सोऽमरैरित्यलाल्यत ॥ ११४ ॥

पदार्थदीपिकोद्बोधिका – अहो इति ॥ यतः धन्योऽसौ विष्णुतीर्थः अस्मिन् युगे कलियुगे इमां सिद्धिं तपःसिद्धिं आपे तस्मात् महाबोधसेवामहिमा श्रीमध्वाचार्यशुश्रूषामहिमा अहो आश्चर्यम्! इति स महिमा अमरैः देवैः अलाल्यत आदृतोऽभूत् ॥ ११४ ॥

मन्दोपकारिणी – अहो इति ॥ महाबोधसेवामहिमा महान् पूर्णः बोधः ज्ञानं यस्य सः महाबोधः तस्य पूर्णप्रज्ञाचार्यस्य सेवायाः शुश्रूषायाः महिमा माहात्म्यं अहो आश्चर्यम् ।

कुतः । यतः धन्यः असौ विष्णुतीर्थार्यः अस्मिन् युगे कलियुगे इमां एवंभूतां सिद्धिं आप लब्धवान् अत इत्यर्थः । इति सः मध्वसेवामहिमा अमरैः अलाल्यत आदृतोऽभूत् । 'लल ईप्सायां इति धातोः कर्मणि लङ् आत्मनेपदम्' ॥ ११४ ॥

तीव्रव्रतोऽतीन्द्रियविद्विद्याब्धिस्तर्कपण्डितः ।
अनिरुद्धपदाधारः प्रेष्ठः शिष्यस्तमाययौ ॥ ११५ ॥

पदार्थदीपिकोद्बोधिका – तीव्रेति ॥ तीव्रं व्रतं यस्य स तथोक्तः । अन्यदुष्करव्रत-विशेषयुक्त इत्यर्थः । इन्द्रियमतीतं अतीन्द्रियं तद्वेत्ति इति अतीन्द्रियवित् । तपो-महिम्नाऽतीतानागतज्ञानीत्यर्थः । विद्याभिरब्धिरिव विद्याब्धिः तर्कपण्डितः तर्कशास्त्रकुशलः अनिरुद्ध इति पदं नाम तस्याधारः अनिरुद्धतीर्थाचार्य इत्यर्थः । प्रेष्ठोऽतिप्रियः शिष्यः तं विष्णुतीर्थाचार्यं स्वगुरुं आययौ, हरिश्चन्द्रगिरौ ददर्शेत्यर्थः ॥ ११५ ॥

मन्दोपकारिणी – तीव्रेति ॥ तीव्रं दुष्करं व्रतं व्रतविशेषः यस्य स तथोक्तः । अतीन्द्रियवित् अतीन्द्रियं वेत्ति जानातीति अतीन्द्रियवित् अतीतानागतज्ञानी । विद्याब्धिः विद्यासमुद्रः तर्कपण्डितः तर्के तर्कशास्त्रे पण्डितः चतुरः अनिरुद्धपदाधारः अनिरुद्धपदस्य नाम्नः आधारः वाच्यः अनिरुद्धतीर्थाख्यः प्रेष्ठः अतिप्रियः शिष्यः विष्णुतीर्थशिष्यः तं हरिश्चन्द्रगतं स्वगुरुं श्रीविष्णुतीर्थार्यं आययौ प्राप्तवान् ॥ ११५ ॥

तेन सम्प्रार्थितं प्राप्तं रूप्यपीठमिमं पुनः ।
कृत्स्नज्ञं कृपया स्वेषु सम्प्राप्तं मेनिरे प्रजाः ॥ ११६ ॥

पदार्थदीपिकोद्बोधिका – तेनेति ॥ अनिरुद्धतीर्थाचार्येण सम्प्रार्थितम् । रूप्यपीठ-गमनायेति शेषः । अत एव रूप्यपीठं यातं इमं विष्णुतीर्थार्यं दृष्ट्वा प्रजाः शिष्यजना स्वेषु कृपया पुनः सम्प्राप्तं कृत्स्नज्ञं श्रीपूर्णप्रज्ञाचार्यं मेनिरे । श्रीमध्वतदनुजयोः सादृश्यात्प्रजाः श्रीमध्वानुजं दृष्ट्वा स्वेषु कृपया श्रीमध्वं एव पुनः सम्प्राप्तं मेनिर इत्यर्थः ॥ ११६ ॥

मन्दोपकारिणी – तेनेति ॥ तेन अनिरुद्धतीर्थेन सम्प्रार्थितं रूप्यपीठं प्रत्यागन्तव्यं इति प्रार्थितम् । अत एव रूप्यपीठं आगतं इमं श्रीविष्णुतीर्थार्यं दृष्ट्वा प्रजाः शिष्यजनाः स्वेषु कृपया पुनः संप्राप्तं कृत्स्नज्ञं कृत्स्नं सर्वं जानातीति कृत्स्नज्ञः तं पूर्णप्रज्ञाचार्यं मेनिरे

अमन्यन्त । श्रीमध्वाचार्यसादृश्यात् प्रजाः श्रीमध्वाचार्यानुजं श्रीविष्णुतीर्थार्यं दृष्ट्वा स्वेषु कृपया श्रीमध्वमेव पुनः संप्राप्तं मेनिरे इति भावः । 'मनु अवबोधने इति धातोः लिट् आत्मनेपदं मेने मेनाते मेनिरे' ॥ ११६ ॥

कवीन्द्रतिलको विद्वच्छेखरस्तापसाग्रणीः ।
मध्वकेलीशुकोऽस्याभूच्छिष्यो व्यासपदाश्रयः ॥ ११७ ॥

पदार्थदीपिकोद्बोधिका – कवीन्द्रेति ॥ अस्य श्रीविष्णुतीर्थस्य कवीन्द्रतिलकः कविश्रेष्ठानां तिलक इव तिलकः विद्वच्छेखरो विद्वच्छ्रेष्ठः तापसेषु अग्रणीः, मध्वकेलीशुकः श्रीमंध्वस्य क्रीडायाः शुकः व्यासपदाश्रयः व्यासस्य पदं नाम बादरायणनामेत्यर्थः । तस्याश्रयो व्यासपदाश्रयः बादरायणतीर्थ इत्यर्थः । एवंभूतः शिष्योऽभूत् ॥ ११७ ॥

मन्दोपकारिणी – कवीन्द्रेति ॥ कवीन्द्रतिलकः कवीन्द्राणां कवीश्वराणां पद्मादि-प्रबन्धकर्तृणां इत्यर्थः । तिलकः तिलकस्थानीयः श्रेष्ठ इत्यर्थः । विद्वच्छेखरः विदुषां पण्डितानां शेखरः श्रेष्ठः तापसाग्रणीः तापसानां तपस्विनां अग्रणीः अग्रगण्यः मध्वकेलीशुकः मध्वाचार्यस्य केल्याः क्रीडायाः शुकः शुकपक्षिस्थानीयः व्यासपदाश्रयः व्यासस्य वेदव्यासस्य पदं वाचकं बादरायणपदं तस्य आश्रयः वाच्यः बादरायणतीर्थाख्यः अस्य विष्णुतीर्थार्यस्य शिष्यः अभूत्। कविताचतुरः सकलशास्त्रप्रवीणः तपस्वी मध्वस्य क्रीडाशुकस्थानीयः बादरायणाख्यः विष्णुतीर्थस्य अन्यः शिष्यः अभवत् इत्यर्थः ॥११७॥

असौ दास्यं ध्रुवं यान्तं महान्तं महतामपि ।
व्यधादनुग्रहं कुर्वन् सामर्थ्यैः कौतुकं नृणाम् ॥ ११८ ॥

पदार्थदीपिकोद्बोधिका – असाविति ॥ सामर्थ्यैः नृणां कौतुकं आश्चर्यं कुर्वन् असौ श्रीविष्णुतीर्थाचार्यः ध्रुवं निश्चयं यथा भवति तथा दास्यं यातं बादारायणतीर्थाख्यं अनुग्रहं कुर्वन् सन् इत्यर्थः । महतामपि ज्ञानिनामपि महान्तं ज्ञानादिगुणैः महान्तं व्यधात् चकार ॥

मन्दोपकारिणी – असाविति ॥ असौ विष्णुतीर्थः ध्रुवं निश्चयो यथा स्यात् तथा दास्यं स्वस्य शिष्यत्वं यान्तं प्राप्तवन्तं बादरायणतीर्थं महतां श्रेष्ठानामपि महान्तं उत्तमं व्यधात् चक्रे । किं कुर्वन् अनुग्रहं कुर्वन् । तस्मिन् महत्वसम्पादकं प्रसादं कुर्वन् इत्यर्थः ।

स्वयं कथंभूतः सामर्थ्यैः स्वसामर्थ्यैः नृणां कौतुकं आश्चर्यं कुर्वन् । 'विपूर्वक डु धाञ् धारणपोषणयोः लुङ् परस्मैपदं अधात् अधाताम् अधुः' ॥ ११८ ॥

आरुरोह दुरारोहं स परैः प्रीतिकृद्धरेः ।
महान्तं महिमानं च महीध्रं च गुहप्रियम् ॥ ११९ ॥

पदार्थदीपिकोद्बोधिका – आरुरोहेति ॥ हरेः प्रीतिकृत् यः श्रीविष्णुतीर्थाचार्यः परैः अन्यैः दुरारोहं अप्राप्यं महान्तं महिमानं आरुरोह प्राप इत्यर्थः । गुहप्रियं षण्मुखप्रियं महीध्रं च आरुरोह । नरागम्यं कुमारपर्वताख्यसह्यशिखरं आरुरोह इत्यर्थः ॥ ११९ ॥

मन्दोपकारिणी – आरुरोहेति ॥ हरेः प्रीतिकृत् प्रीतिं सन्तोषं करोतीति प्रीतिकृत् । विष्णुप्रियकर इति यावत् । सः विष्णुतीर्थः परैः अन्यैः दुरारोहं आरोढुं प्राप्तुं अशक्यं महान्तं बहुलं महिमानं महत्त्वं आरुरोह प्राप इत्यर्थः । तथा गुहप्रियं गुहस्य सुब्रह्मण्यनामकस्य प्रियं, परैः दुरारोहं आरोढुं अशक्यं महीध्रं कुमारपर्वतं सह्याद्रिशिखरं आरुरोह इत्यर्थः । विष्णुतीर्थः एवं अन्याप्राप्यमहिमानं सम्पाद्य श्रीविष्णुप्रीतिजनकं तपः कर्तुं नरागम्यं कुमारनामकपर्वतं सह्याख्याद्रिशिखरं आरुरोह इति भावः । 'महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः' इत्यमरः ॥ ११९ ॥

आकृष्टोऽस्य गुणैर्व्याप्तैर्यो गोदाया उपाययौ ।
स पद्मनाभतीर्थाख्यः शिष्योऽन्योऽभूत् सुचेतसः ॥ १२० ॥

पदार्थदीपिकोद्बोधिका – आकृष्ट इति ॥ व्याप्तैः अस्य श्रीमध्वस्य गुणैः आकृष्टो यो गोदाया गोदावरीतीरात् उपाययौ । स सुचेतसः श्रीपूर्णप्रज्ञाचार्यस्य अन्यः शिष्यः पद्मनाभतीर्थाख्योऽभूत् ॥ १२० ॥

मन्दोपकारिणी – इदानीं पद्मनाभतीर्थमहिमानं वक्ति ॥ **आकृष्ट इत्यष्टभिः श्लोकैः** ॥ व्याप्तैः भूमौ सर्वत्र प्रसारितैः अस्य श्रीमध्वाचार्यस्य गुणैः पाण्डित्यतत्वज्ञानहरिभक्त्यादि-गुणैः आकृष्टः वशीकृतः यः पण्डिताग्रणीः द्विजः गोदायाः गोदावर्याः सकाशात् उपाययौ। पूर्वं इति शेषः । सः सुचेतसः शोभनचित्तस्य मध्वाचार्यस्य पद्मनाभतीर्थाख्यः अन्यः विष्णुतीर्थादपरः शिष्यः अभूत् अजायत इत्यर्थः। शोभनोपपदभट्टनामक इति

नवमसर्गे बदरिकाश्रमात् आगमनकाले यः आगतः स एव शोभनभट्टः अयं पद्मनाभतीर्थः इति सम्प्रदायः ॥ १२० ॥

श्रुत्या मत्या सदा भक्त्या विरक्त्या नित्यसेवया ।
अस्मै प्रसन्नः प्राज्येक्षः सद्यो विद्यां ददौ शुभाम् ॥ १२१ ॥

पदार्थदीपिकोद्बोधिका – श्रुत्येति ॥ श्रुत्या वेदान्तशास्त्रश्रवणेन मत्या मननेन सदा-भक्त्या सनातनभक्त्या विरक्त्या नित्यसेवया प्रसन्नः, प्राज्या भूयसी ईक्षा ज्ञानं यस्य स प्राज्येक्षः श्रीपूर्णप्रज्ञाचार्यः तस्मै पद्मनाभतीर्थार्याय सद्यः द्राक् 'सद्यो द्राङ्मंक्षु च द्रुतं' इत्यमरः । शुभां विद्यां परमात्मतत्त्वविद्यां ददौ ॥ १२१ ॥

मन्दोपकारिणी – श्रुत्येति ॥ श्रुत्या वेदान्तशास्त्रश्रवणेन मत्या श्रुतस्य मननेन चिन्तनेन सदा सदातनया भक्त्या विरक्त्या वैराग्येन नित्यसेवया नित्यं तत्सेवया च प्रसन्नः प्रीतः प्राज्येक्षः प्राज्या पूर्णा ईक्षा प्रज्ञा यस्य सः प्राज्येक्षः श्रीमध्वाचार्यः । 'प्रभूतं प्राज्यं प्रचुरं' इत्यमरः । अस्मै पद्मनाभतीर्थाय सद्यः द्रुतं शुभां विद्यां अध्यात्मविद्यां ददौ उपदिदेश ॥ १२१ ॥

वेदान्ताब्धिं न यो जातु जहौ विद्वत्तिमिङ्गिलः ।
युक्तिप्रवाहसंरम्भात् परशास्त्रनदीचरः ॥ १२२ ॥

पदार्थदीपिकोद्बोधिका – वेदान्तेति ॥ युक्तिप्रवाहा वैशेषिकादीनां युक्तिसमूहाः तेषु संरम्भात् कोपात्, परशास्त्राण्येव वैशेषिकादिपरशास्त्राण्येव नद्यः तासु चरतीति तथोक्तः । तन्न्यायेन तद्युक्तिनिराकरणार्थं वैशेषिकादिपरशास्त्राख्यनदीषु प्रवर्तमान इत्यर्थः । यो विद्वत्तिमिङ्गिलो जातु कदाचिदपि वेदान्ताब्धिं वेदान्तशास्त्राख्यसमुद्रं न जहौ । तिमिङ्गिलो नाम मत्स्यविशेषः । 'तिमिर्नाममहामत्स्यस्तद्गिलस्तु तिमिङ्गिलः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव' इत्युक्तेः । स यथा जात्वपि समुद्रं न जहाति एवं असौ वेदान्तशास्त्रं न जात्वपि जहौ इत्यर्थः ॥ १२२ ॥

मन्दोपकारिणी – वेदान्तेति ॥ यो विद्वत्तिमिङ्गिलः विद्वान् पण्डितः पद्मनाभतीर्थ एव तिमिङ्गिलः, तिमिङ्गिलो नाम महामत्स्यविशेषः । 'तिमिङ्गिलादयश्चाथ यादांसि

जलजन्तवः' इत्यमरः । जातु कदाचिदपि वेदान्ताब्धिं वेदान्तशास्त्राख्यसमुद्रं न जहौ न त्यक्तवान् 'ओहाक् त्यागे इति धातोः लिट् परस्मैपदं जहौ जहतुः जहुः' । यथा तिमिङ्गिलो नाम मत्स्यविशेषः कदाचिदपि समुद्रं न जहाति एवं असौ पद्मनाभतीर्थः वेदान्तशास्त्रं न जहौ इत्यर्थः । कथंभूतः युक्तिप्रवाहसंरम्भात् तद्युक्तिनिराकरणार्थं इति यावत् । परशास्त्रनदीचरः परेषां वैशेषिकादीनां शास्त्राण्येव नद्यः तासु चरः प्रवर्तमानः । अन्यशास्त्रोक्तयुक्तिनिराकरणार्थं अन्यशास्त्रविचारकः स्वशास्त्रे तु सर्वदा श्रद्धया निरत इति भावः ॥ १२२ ॥

व्याख्याप्रणादमात्रेण वीरम्मन्यान् स्वमण्डले ।
मायाविग्रामसिंहान्यो वादिसिंहो निराकरोत् ॥ १२३ ॥

पदार्थदीपिकोद्बोधिका – व्याख्येति ॥ यो वादिसिंहः स्वमण्डले स्वयूथे वीरं मन्यमानाः वीरंमन्याः तान् । वयमेव वीरा इति मन्यमानानित्यर्थः । माया एषां अस्तीति मायाविनः त एव ग्रामसिंहाः तान् । मायावादिसारमेयानित्यर्थः । व्याख्याप्रणादमात्रेण व्याख्यारूपध्वनिमात्रेण निराकरोत् । व्याख्याप्रणादश्रवणमात्रेण मायिनो बिभ्यति स्मेति भावः ॥ १२३ ॥

मन्दोपकारिणी – व्याख्येति ॥ यः वादिसिंहः वादी पद्मनाभतीर्थाख्यः सिंहः मृगेन्द्रः स्वमण्डले स्वेषां स्वजातीनां मण्डले यूथे वीरम्मन्यान् वयमेव वीरा इति मन्यमानान् मायाविग्रामसिंहान् मायाविनः मायावादिनः एव ग्रामसिंहाः सारमेयाः तान् व्याख्याप्रणादमात्रेण व्याख्यानरूपध्वनिमात्रेण निराकरोत् । व्याख्यानध्वनिश्रवणमात्रेणैव मायिनो भयं प्रापुः इति भावः ॥ १२३ ॥

मत्तदुर्वादिमातङ्गतर्कमस्तकदारणे ।
पञ्चास्यो योऽभवद्व्यक्तं चतुरास्योऽपि केवलम् ॥ १२४ ॥

भावप्रकाशिका – चतुरास्योऽपि चतुरवदनोऽपि ॥ १२४ ॥

पदार्थदीपिकोद्बोधिका – मत्तेति ॥ यः, चतुरं आस्यं मुखं यस्य स चतुरास्यः तथापि मत्ता विद्यागर्विता ये दुर्वादिनः त एव मातङ्गाः तेषां यानि तर्कमस्तकानि

कुयुक्त्याख्यकुम्भस्थलानि तेषां दारणे विदलने व्यक्तं स्पष्टं यथा भवति तथा पञ्चास्यः सिंहोऽभवत् । अत्र चतुरास्योऽपि पञ्चास्योऽभवदिति विरोधः । तस्य अभासात् विरोधाभासालङ्कारः ॥ १२४ ॥

मन्दोपकारिणी – मत्तेति ॥ यः केवलं चतुरास्यः चतुरं आस्यं वदनं यस्य स चतुरास्योऽपि मत्तदुर्वादिमातङ्गतर्कमस्तकदारणे मत्ताः विद्यया गर्ववन्तः दुर्वादिन एव मातङ्गाः गजाः मत्ताश्च ते दुर्वादिमातङ्गाश्च तेषां तर्का एव मस्तकाः मूर्धानः गण्डस्थलानीति यावत् । 'मूर्धा ना मस्तकोऽस्त्रियां' इत्यमरः । तेषां दारणे विदारणे व्यक्तं स्पष्टं पञ्चास्यः सिंहोऽभूत् । 'सिंहो मृगेन्द्रः पञ्चास्यः' इत्यमरः । चतुरास्योऽपि पञ्चास्य इति विरोधाभासालङ्कारः ॥ १२४ ॥

सन्यायरत्नावलिरप्युदपादि यतः शुभा ।
टीका परानुव्याख्याया अनर्घा बोधसागरात् ॥ १२५ ॥

पदार्थदीपिकोद्बोधिका – सन्यायेति ॥ बोधेन सागर इव बोधसागरः तस्मात् । यतः श्रीपद्मनाभतीर्थार्यात् परा उत्तमा च साऽनुव्याख्या च तस्याः टीका, न विद्यतेऽर्घं मौल्यं यस्याः सा अनर्घा सन्यायरत्नावलिरपि तन्नामकः ग्रन्थोऽपि उदपादि जज्ञे । समुद्रादनर्घरत्नावलिरिवेति श्लेषार्थः ॥ १२५ ॥

मन्दोपकारिणी – सन्यायेति ॥ बोधसागरात् ज्ञानसमुद्रात् यतः यस्मात् श्रीपद्मनाभतीर्थात् परानुव्याख्यायाः परायाः उत्तमायाः अनुव्याख्यायाः मध्वकृतानुव्याख्यानग्रन्थस्य टीका विवृतिः सन्यायरत्नावलिरपि सन्यायरत्नावल्याख्यग्रन्थोऽपि उदपादि जज्ञे । कथंभूता शुभा अनर्घा असदृशी समुद्रात् अनर्घरत्नावलिरिति श्लेषार्थः । 'पद गताविंत्यतो धातोः कर्तरि लुङ् आत्मनेपदं अपादि अपादिषातां अपादिषत' ॥ १२५ ॥

वेदप्रवचनाचार्यशिष्योऽसाविति पूजितः ।
सभ्यः सभायां यो वेदं व्याचख्यौ वेदसारवित् ॥ १२६ ॥

पदार्थदीपिकोद्बोधिका – वेदेति ॥ सभ्यः सभाया उचित यः श्रीपद्मनाभतीर्थाख्यः वेदसारवित् वेदार्थतात्पर्यवित् सन् सभायां वेदं व्याचख्यौ । असौ वेदप्रवचने वेदव्याख्याने आचार्यः श्रीमध्वः तस्य शिष्य इति पूजितः ॥ १२६ ॥

मन्दोपकारिणी – वेदेति ॥ असौ वेदप्रवचनाचार्यशिष्यः वेदप्रवचनानां वेदव्याख्यातॄणां आचार्यः गुरुः तस्य श्रीमध्वाचार्यस्य शिष्यः इति जनैः पूजितः सभ्यः सभायोग्यः वेदसारवित् वेदानां सारं तात्पर्यार्थं वेत्ति जानातीति वेदसारवित् यः पद्मनाभतीर्थार्यः सभायां वेदं व्याचख्यौ व्याख्यातवान् । 'ख्या प्रकथने इति धातोः लिट् परस्मैपदं चख्यौ चख्यतुः चख्युः' ॥ १२६ ॥

अनयोः प्रथमे शिष्याश्चरमे चाभवन्निह ।
अनन्तबोधस्यानेके यतीन्द्रा बहुदेशजाः ॥ १२७ ॥

पदार्थदीपिकोद्बोधिका – अनयोरिति ॥ अनन्तबोधस्य श्रीपूर्णप्रज्ञस्य अनयोः सकाशात् श्रीविष्णुतीर्थपद्मनाभतीर्थयोः सकाशात् प्रथमे चरमे च पश्चात्तनाश्च अनेके बहवः बहुदेशजा नानादेशजा नानादेशसम्भवा यतीन्द्राः शिष्या अभवन् ॥ १२७ ॥

मन्दोपकारिणी – अनयोरिति ॥ इह भुवि अनन्तबोधस्य श्रीपूर्णप्रज्ञाचार्यस्य अनयोः श्रीविष्णुतीर्थपद्मनाभतीर्थयोः सकाशात् प्रथमे पूर्वजाताः चरमे च पश्चादपि जाताः अनेके बहवः यतीन्द्राः शिष्याः अभवन् आसन् । कथंभूताः बहुदेशजाः बहुषु नानाविधेषु देशेषु जाताः ॥ १२७ ॥

वशीकृतहृषीकाश्च जननाद्युपमर्दिनः ।
नरसिंहपदाधारा अभ्यस्तोपेन्द्रनामकाः ॥ १२८ ॥

भावप्रकाशिका – हृषीकेशतीर्थाः । जनार्दनतीर्थाः । नरहरितीर्थाः लोकैरभ्यस्तं 'उपेन्द्रतीर्थाः' इति नामैषाम् ॥ १२८ ॥

पदार्थदीपिकोद्बोधिका – तत्रापि महत्तमानां केषाञ्चिन्नामधेयान्याह— ॥ **वशीकृतेत्यादिना** ॥ वशीकृतानि हृषीकाणि इन्द्रियाणि यैः ते वशीकृतहृषीकाः । 'हृषीकं विषयेन्द्रियम्' इत्यमरः । अत एव हृषीकाणां ईशाः हृषीकेशतीर्थार्या इत्यर्थः । जननं आदिः येषां तानि, जननादीनि उपमर्दयितुं शीलं एषां अस्तीति जननाद्युपमर्दिनः जन्ममरणादिदोषनिराकरणशीला इत्यर्थः । अत एव जनार्दनतीर्थार्या इति भावः । नरसिंहस्य पदः पादस्तदेव आधारो येषां ते तथोक्ता नरसिंहतीर्थाख्या इति भावः ।

अभ्यस्तं लोकैः परिचितं उपेन्द्रनाम येषां ते तथोक्ता उपेन्द्रतीर्था इत्यर्थः । असकृदुच्चरितभगवन्नामा इति ध्वनितोऽर्थः ॥ १२८ ॥

मन्दोपकारिणी – तत्र केषाञ्चित् श्रेष्ठानां नामानि आह ॥ **वशीकृतेति** ॥ केचित् यतयः वशीकृतहृषीकाः वशीकृतानि हृषीकाणि इन्द्रियाणि यैः ते वशीकृतहृषीकाः 'हृषीकं विषयीन्द्रियं' इत्यमरः । अनेन हृषीकेशतीर्थाख्याः इत्युक्तं भवति । हृषीकाणां इन्द्रियाणां ईशनात् वशीकरणात् हृषीकेश इति निर्वचनात् । केचित् यतीन्द्रास्तु जननाद्युपमर्दिनः जननं उत्पत्तिः आदिशब्देन मरणं ग्राह्यम् । जननादेः जननमरणादिरूपसंसारस्य उपमर्दिनः निराकरणशीलाः । अनेन जनार्दनतीर्थाख्याः इत्युक्तं भवति । उपलक्षणतया जननादिरूपं संसारं अर्दयन्तीति जनार्दनाः इति निर्वचनात् । अन्ये तु नरसिंहपदाधाराः नरसिंहाख्यपदस्य नाम्नः आधाराः वाच्याः । अनेन नरसिंहतीर्थाख्याः इत्युक्तं भवति । अभ्यस्तोपेन्द्रनामकाः अभ्यस्तं लोकपरिचितं उपेन्द्र इति नाम येषां ते अभ्यस्तोपेन्द्रनामकाः । उपेन्द्रतीर्था इति लोके प्रसिद्धाः इति ॥ १२८ ॥

अदीर्घान्याभिधाना ये श्रीमद्रामपदाश्रयाः ।
अप्रत्यक्षगुणोद्रिक्ता भक्तिवैराग्यसागराः ॥ १२९ ॥

भावप्रकाशिका – अदीर्घ इति । अर्थतोऽन्यत् 'वामनतीर्था' इत्यभिधानमेषाम् । अल्पीकृतलौकिकव्यवहाराश्च । रामतीर्थाः । अक्षजं प्रत्यक्षमधो यद्गुणेभ्यस्तेऽधोक्षजतीर्था इति । हृषीकेश इत्यादि सूचितम् । भक्तिज्ञानवैराग्यसागरा इति । सर्वत्रापि तीर्थशब्दोऽभिप्रेतः । सागरस्यापि शुद्धतीर्थत्वात् । एतेषां एतानि नामानि गुणयोगैर्वर्तन्त इति प्रकटयितुं तत्तद्गुणवत्वकथनेन सूचितानि । यथायोग्यं सर्वेषां सर्वगुणवत्त्वज्ञापनाय च ॥

पदार्थदीपिकोद्बोधिका – अदीर्घेति ॥ अन्यत् उक्तेभ्योऽन्यत् तच्च तदभिधानञ्च । दीर्घो न भवतीत्यदीर्घः वामन इति यावत् । अदीर्घ इत्यन्याभिधानं येषां तेऽदीर्घान्याभिधानाः वामनतीर्थार्या इति यावत् । अल्पीकृतलौकिकव्यहाराश्चेति ध्वनितोऽर्थः । श्रीमद्राम इति पदं तस्याश्रयाः श्रीमद्रामतीर्थार्या इत्यर्थः । प्रत्यक्षागोचरा अप्रत्यक्षास्तादृशा ये गुणाः तैः उद्रिक्ता अभिवृद्धाः । अधःकृतं अक्षजं प्रत्यक्षं येन स अधोक्षज इति व्युत्पत्तिः । अक्षजाधःकरणञ्च तदगोचरगुणवत्वं तस्मात् अधोक्षजतीर्था

इत्यर्थः । 'वशीकृतहृषीकाश्चे'त्यादिनोक्ताः सर्वेऽपि यतीनां मध्ये भक्तिवैराग्यसागराः, भक्तिवैराग्याभ्यां सागरा इव सागराः परिपूर्णा इत्यर्थः । भक्तिवैराग्यादिगुणसागरत्वमेव वशीकृतहृषीकत्वादिगुणैः सूचितम् । भक्त्यादिसागरत्वोक्तचैव हृषीकेशादिनाम्नां तीर्थशिरस्कत्वं सूचितम् । सागरस्यापि विशिष्टतीर्थत्वादेतेषामेतानि नामानि तत्तद्गुणयोगैरेव वर्तन्त इति सूचयितुं तत्तद्गुणकथनपूर्वकमेव सूचितानि । यथायोग्यं सर्वेषां च सर्वगुणत्वज्ञापनाय सर्वत्र बहुवचनम् ॥ १२९ ॥

मन्दोपकारिणी – अदीर्घेति ॥ केचित् अदीर्घान्याभिधानाः दीर्घो न भवतीति अदीर्घः । ह्रस्वः । वामन इति यावत् । अदीर्घ इति वामन इति अन्यं पूर्वोक्तनामभ्यः अन्यत् अभिधानं येषां ते अदीर्घान्याभिधानाः । वामनतीर्थाख्या इत्यर्थः । ये केचन श्रीमद्रामपदाश्रयाः राम इति पदं नाम श्रीमच्च तत् रामपदं श्रीमद्रामपदं तस्य आश्रयाः वाच्याः रामतीर्थाख्याः इत्यर्थः । अप्रत्यक्षगुणोद्रिक्ताः प्रत्यक्षाः न भवन्तीति अप्रत्यक्षाः अप्रत्यक्षाश्च ते गुणाश्च तैः उद्रिक्ताः उत्कृष्टाः अधोक्षजतीर्थाख्याः इत्यर्थः । अधःकृतं अक्षजं प्रत्यक्षं येन स अधोक्षजः इति व्युत्पत्तेः । अक्षजस्य अधः करणं नाम चक्षुराद्यगोचरगुणवत्वं ज्ञेयम् । हृषीकेशादयः सर्वेऽपि यतीन्द्राः भक्तिवैराग्यसागराः उपलक्षणतया भक्तिवैराग्यतत्त्वज्ञानादिगुणसमुद्राः । बहुवचनं तु एतेषां रजतपीठस्थ श्रीकृष्णपूजकत्वरूपाधिक्यवत्वेन उत्तमत्वं द्योतयितुं उक्तं इति ज्ञेयम् । यद्वा तत्तच्छब्द-वाच्यानां बहुत्वात् बहुवचनं इति ज्ञेयम् । अथवा अनयोः प्रथमे शिष्याः इत्यनेन बहवः शिष्याः अभवन् इत्युक्तम् । ते कीदृशाः इत्यतः तान् विशिनष्टि वशीकृतेत्यादिना । तथा हि सर्वेऽपि यतीन्द्राः वशीकृतहृषीकाः पूर्व एवार्थः । इन्द्रियनिग्रहवन्तः इत्यर्थः । जननाद्युपमर्दिनः जननादेः उत्पत्तिमरणादिरूपसंसारस्य उपमर्दिनः निराकरणशीलाः । यथा संसारनाशः स्यात् तादृशकर्मानुष्ठानवन्तः इति भावः । नरसिंहपदाधाराः नरसिंहस्य भगवतः पदे चरणे आधारः आश्रयः येषां ते नरसिंहपदाधाराः । केचन नरसिंहोपासकाः इत्यर्थः । अभ्यस्तोपेन्द्रनामकाः अभ्यस्तानि असकृदुच्चारितानि उपेन्द्रस्य भगवतः नामानि यैः ते तथोक्ताः । सर्वदा हरिनामकीर्तनपराः इत्यर्थः । अदीर्घान्याभिधानाः अदीर्घानि अल्पीकृतानि अन्यानि लौकिकानि अभिधानानि व्यवहाराः यैः ते तथोक्ताः । यावदुपयुक्तलौकिकव्यापारवन्तः इत्यर्थः । श्रीमद्रामपदाश्रयाः रामभक्ताः इत्यर्थः । अप्रत्यक्षगुणोद्रिक्ताः अप्रत्यक्षगुणेन अपरोक्षज्ञानाख्यगुणेन उद्रिक्ताः उत्कृष्टाः अपरोक्ष-

ज्ञाननिश्चयवन्तः इत्यर्थः। यद्वा अप्रत्यक्षगुणेन अतीतानागतविषयकज्ञानाख्यगुणेनापि उद्रिक्ताः त्रिकालदर्शिनः इत्यर्थः । भक्तिवैराग्यसागराः पूर्व एवार्थः ॥ १२९ ॥

पादैः पुनन्तः पृथिवीं दर्शयन्तो हरेः पदम् ।
धूतदुस्समयध्वान्ता आदित्या इव गां गताः ॥ १३० ॥

पदार्थदीपिकोद्बोधिका – पुनः कथंभूता इत्यत आह— ॥ **पादैरिति** ॥ पादैः स्वचरणैः पृथिवीं पुनन्तः । सूर्यकिरणसम्बन्धात् भुवो यथा शुद्धिः स्यात् एवमेतच्चरण सम्बन्धात् अपि इति भावः । हरेः पदं पद्यत इति पदं स्वरूपं तद्दर्शयन्तः । सच्छास्त्र-व्याख्यानेन प्रकाशयन्तः । भास्कराश्च हरेः पदं आकाशम्। धूतः दुस्समयध्वान्तः दुःशास्त्रान्धकारो यैः ते तथोक्ताः शास्त्रव्याख्यानेनैव निरस्तदुःशास्त्रतिमिरा इत्यर्थः । सूर्याश्च निरस्तान्धकाराः गां भुवं गता आदित्य इव पृथ्वीं अलञ्चक्रुः इत्युत्तरत्र सम्बन्धः ॥

मन्दोपकारिणी – पुनः कीदृशाः इत्यत आह ॥ **पादैरिति** ॥ गां भूमिं गताः प्राप्ताः आदित्याः इव सूर्याः इव राजमानाः । सूर्यसाम्यमेव उपपादयति - पादैः अङ्घ्रिभिः पृथिवीं पुनन्तः पवित्रयन्तः । सूर्या अपि पादैः रश्मिभिः पृथिवीं पुनन्तः । 'पादा रश्म्यङ्घ्रितुर्यांशाः' इत्यमरः । सूर्यकिरणसम्बन्धात् भुवो यथा शुद्धिः स्यात् एवं एतेषां अङ्घ्रिसम्बन्धादपि इति भावः । हरेः पदं पद्यते गम्यते इति पदं स्वरूपं दर्शयन्तः । सच्छास्त्रव्याख्यानेन प्रदर्शयन्तः । भास्कराश्च हरेः पदं विष्णुपदं आकाशं प्रकाशयन्तः । धूतदुस्समयध्वान्ताः सच्छास्त्रव्याख्यानेन धूतानि दुस्समयाः दुःशास्त्राण्येव ध्वान्तानि अन्धकाराः यैस्ते तथोक्ताः । सूर्याः अपि निरस्ततिमिराः हि ॥ १३० ॥

मोक्षशास्त्रामृताम्भोधिसेवया नित्यनिर्वृताः ।
चक्रिचारुतरार्चासु चक्रिणश्चरणार्चकाः ॥ १३१ ॥

पदार्थदीपिकोद्बोधिका – **मोक्षेति** ॥ मोक्षसाधनं शास्त्रं मोक्षशास्त्रं श्रीमध्वप्रणीत-वेदान्तशास्त्रं तदेवामृताम्भोधिः इव अमृतसमुद्र इव तस्य सेवा श्रवणमननादिसेवा तया नित्यं सदा निर्वृताः सुखं प्राप्ताः चक्रिणः श्रीहरेश्चारुतरार्चासु सुन्दरतमप्रतिमासु चक्रं अस्यास्तीति चक्री श्रीहरिः तस्य चरणयोः अर्चकाः पूजकाः पृथ्वीं अलञ्चक्रुः इत्युत्तरत्र सम्बन्धः ॥

मन्दोपकारिणी – मोक्षेति ॥ पुनः कथंभूताः मोक्षशास्त्रामृताम्भोधिसेवया मोक्षशास्त्रं मोक्षसाधनं मध्वप्रणीतवेदान्तशास्त्रं तदेव अमृताम्भोधिः अमृतसमुद्रः तस्य सेवया श्रवणमननादिरूपस्नानपानादिसेवया नित्यनिर्वृताः नित्यं सुखपूर्णाः चक्रिचारुतरार्चासु चक्रिणः हरेः चारुतरासु अतिसुन्दरासु अर्चासु प्रतिमासु । 'अर्चा पूजाप्रतिमयोः' इति चक्रिणः चक्रायुधस्य हरेः चरणार्चकाः चरणयोः पादयोः अर्चकाः पूजकाः ॥ १३१ ॥

मध्वप्रशिष्या बहवः शिष्या येषां मुहुस्तथा ।
अलञ्चक्रुरलं पृथ्वीं सर्वे सद्गुणभूषणाः ॥ १३२ ॥

भावप्रकाशिका – एषां प्रशिष्याणां शिष्यास्तथा बहवः ॥ १३२ ॥

पदार्थदीपिकोद्बोधिका – मध्वेति ॥ सद्गुणाः तपोज्ञानभक्तिवैराग्यादिसद्गुणा एव भूषणानि एषां ते तथोक्ता बहवो मध्वप्रशिष्याः मध्वशिष्यशिष्याः तथा येषां प्रशिष्याणां शिष्याश्च ते सर्वे पृथ्वीं भूमिं अलं सम्यक् अलञ्चक्रुः अलंकृतवन्तः ॥ १३२ ॥

मन्दोपकारिणी – मध्वेति ॥ बहवः मध्वप्रशिष्याः श्रीमध्वाचार्यस्य प्रशिष्याः साक्षात् शिष्याणां शिष्याः । तथा येषां प्रशिष्याणां शिष्याः मुहुः पुनः सर्वे शिष्याः शिष्यशिष्याः एवं सर्वेऽपि शिष्याः प्रशिष्याः प्रप्रशिष्याः तच्छिष्याश्च पृथ्वीम् । 'गोत्रा कुः पृथिवी पृथ्वी' इत्यमरः अलं सम्यक् अलञ्चक्रुः भूषयामासुः । कथंभूताः सद्गुणभूषणाः सन्तः निर्दुष्टाः गुणाः तपोज्ञानभक्तिवैराग्यादय एव भूषणं अलङ्कारो येषां ते तथा ॥ १३२ ॥

सदा सकलसच्छास्त्रव्याख्यासौख्यामृताब्धिगाः ।
सर्वे दुर्वादिदुर्वादकाण्डखण्डनमण्डनाः ॥ १३३ ॥

पदार्थदीपिकोद्बोधिका – सदेति ॥ सर्वेऽपि सदा सकलानि यानि सच्छास्त्राणि तेषां या व्याख्या तया यत्सौख्यं तदेवामृताब्धिः सुधासमुद्रः तं गच्छन्तीति तथोक्ताः । दुर्वादिनां ये दुर्वादा दुष्टवचनानि त एव काण्डमिव तस्य यत्खण्डनं तदेव मण्डनमलङ्कारो येषां ते तथोक्ताः । काण्डं नाम वृक्षवेण्वादीनां पर्वनामकं कठिनस्थलम् ॥ १३३ ॥

मन्दोपकारिणी – सदेति ॥ सर्वेऽपि सदा सकलसच्छास्त्रव्याख्यासौख्यामृताब्धिगाः सकलं च तत् सच्छास्त्रं मोक्षशास्त्रं च तस्य व्याख्यया लब्धं च तत् सौख्यं च तदेव

अमृताब्धिः अमृतसमुद्रः तत्र गच्छन्ति विद्यन्ते क्रीडन्तीति तथोक्ताः । सर्वदा मध्वशास्त्र-व्याख्यानजन्यस्वरूपसुखं अनुभवन्तः इत्यर्थः । दुर्वादिदुर्वादकाण्डखण्डनमण्डनाः दुर्वादिनां कुवादिनां दुर्वादाः दुर्वचनानि तेषां काण्डः समूहः तस्य खण्डनं निराकरणमेव मण्डनं विभूषणं येषां ते तथोक्ताः ॥ १३३ ॥

भूरिभक्तिभराः केचिदप्यल्पश्रुतिसम्पदः ।
अप्यल्पबोधा अपरे बहुश्रुतमहागुणाः ॥ १३४ ॥

पदार्थदीपिकोद्बोधिका – भूरीति ॥ एषु श्रीमध्वप्रशिष्यादिषु अल्पा श्रुतिसम्पत् येषां ते तथोक्ता अपि भूरि भूयसी भक्तिः तां बिभ्रतीति तथोक्ताः । अपरे अल्पो बोधो येषां ते तथोक्ता अपि बहु यत् श्रुतं श्रवणं तेन महागुणा येषां ते तथोक्ताः ॥ १३४ ॥

मन्दोपकारिणी – भूरीति ॥ एषु मध्वशिष्यप्रशिष्यादिषु मध्ये केचित् अल्पश्रुति-सम्पदः अल्पा श्रुतिसम्पत् शास्त्रश्रवणसम्पत् येषां ते तथोक्ताः । अल्पशास्त्रश्रवणवन्तोऽपि भूरिभक्तिभराः भूरिः भूयसी भक्तिः भूरिभक्तेः भरः अतिशयः येषां ते तथोक्ताः । 'भूरि स्वर्णे बहौ त्रिषु' इत्यमरः । अपरे शिष्याः अल्पबोधाः अपि अल्पः बोधः बुद्धिः येषां ते तथोक्ताः मन्दबुद्धयोऽपि बहुश्रुतमहागुणाः बहुश्रवणलक्षणः महान् गुणो येषां ते तथोक्ताः । केचित् अल्पश्रवणाः बहुभक्तिमन्तः केचित् मन्दमतयः बहुश्रवणाः इत्यर्थः ॥

बहवो गृहिणोऽप्यस्मात् समग्रानुग्रहं ययुः ।
दीप्ता यत्राग्नय इव त्रयो लिकुचशेखराः ॥ १३५ ॥

भावप्रकाशिका – त्रयः त्रिविक्रमाचार्यः शङ्करार्यौ द्वौ च ॥ १३५ ॥

पदार्थदीपिकोद्बोधिका – बहव इति ॥ अस्मात् श्रीमध्वात् बहवो गृहिणोऽपि समग्रानुग्रहं सम्पूर्णानुग्रहं ययुः । यत्र शिष्यभूतगृहिणां मध्ये त्रयो लिकुचशेखराः त्रिविक्रमार्य एकः शङ्करार्यनामानौ द्वाविति त्रयो लिकुचवंशजश्रेष्ठाः अग्नय इव दीप्ताः प्रकाशनशीलाः ॥ १३५ ॥

मन्दोपकारिणी – बहव इति ॥ अस्मात् श्रीमध्वाचार्यात् बहवः गृहिणोऽपि गृहस्थाश्रमवन्तोऽपि विप्राः समग्रानुग्रहं ययुः प्रापुः । यत्र शिष्यप्रशिष्यभूतगृहस्थेषु मध्ये

त्रयः लिकुचशेखराः लिकुचकुलशेखराः शिखास्थानीयाः गृहस्थाः । त्रिविक्रमाचार्यः एकः तदनुजः शङ्कराचार्यो द्वितीयः तद्वंशस्थ एव अन्यः शङ्कराचार्य इति त्रयो लिकुचशेखराः त्रयः अग्नय इव आवहनीयगार्हपत्यदक्षिणाग्न्याख्याः अग्नय इव दीप्ताः बभूवुः इत्यर्थः ॥

माध्वं नियोगं ये प्रायो नात्यजन् विदुषां वराः ।
शिष्यक्षेत्रेषु सद्विद्याबीजावापैकदीक्षिताः ॥ १३६ ॥

पदार्थदीपिकोद्बोधिका – माध्वमिति ॥ शिष्या एव क्षेत्राणि तेषु । सद्विद्या एव बीजानि तेषां अवापः तस्मिन् एकदीक्षिता मुख्यनिरताः, विदुषां वरा ये लिकुचश्रेष्ठाः प्रायः मध्वस्य सम्बन्धी माध्वः तं नियोगं आज्ञां न अत्यजन् ॥ १३६ ॥

मन्दोपकारिणी – माध्वमिति ॥ विदुषां पण्डितानां वराः श्रेष्ठाः ये त्रयः लिकुच-शेखराः प्रायः बाहुल्येन । 'प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोः' इति विश्वः । माध्वं मध्वाचार्यसम्बन्धिनं नियोगं आज्ञां नात्यजन् नातिक्रान्ताः । कथंभूताः शिष्यक्षेत्रेषु शिष्या एव क्षेत्राणि केदाराः तेषु सस्याद्युत्पत्तिस्थलानि इत्यर्थः । 'क्षेत्रं शरीरे केदारे' इति विश्वः। सद्विद्याबीजावापैकदीक्षिताः सती निर्दुष्टा विद्या मध्वशास्त्रं तदेव बीजं व्रीह्यादि तस्यावापे आवपने एव एकदीक्षिताः मुख्यनिरताः ॥ १३६ ॥

ग्रामण्यो ब्राह्मणाग्रण्यः प्रापुः पूर्णेक्षशिष्यताम् ।
येषां सद्गुप्तिमात्रेण भवेत् किल परं पदम् ॥ १३७ ॥

पदार्थदीपिकोद्बोधिका – ग्रामण्य इति ॥ येषां ब्राह्मणादिवर्णानां सतां गुप्तिमात्रेण रक्षामात्रेण परं उत्तमं पदं स्थानं मोक्ष इत्यर्थः । भवेत्किल । उपलक्षणमेतत् असतां निग्रहाच्चेति ज्ञातव्यम् । पूर्वं भगवता भार्गवेण रामेण तौलवमण्डलस्थानां सतां रक्षायै दुष्टानां निग्रहार्थं च नियुक्तत्वात्तदुभयं च तेषां विहितं कर्म, विहितकर्मणा च परं पदं भवत्येवेति भावः । तेषां ग्रामण्यः ब्राह्मणानां श्रेष्ठा ब्राह्मणाग्रण्यः पूर्णा ईक्षा ज्ञानं यस्य स पूर्णेक्षः श्रीमध्वः तस्य शिष्यतां प्रापुः ॥ १३७ ॥

मन्दोपकारिणी – ग्रामण्य इति ॥ ग्रामण्यः ग्रामाधिपतयः ब्राह्मणरक्षणसमर्थभूताः । 'ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु' इत्यमरः । ब्राह्मणाग्रण्यः ब्राह्मणाः अग्रण्यः

श्रेष्ठाः येषां ते ब्राह्मणाग्रण्यः । क्षत्रवैश्यशूद्राश्च इत्यर्थः । पूर्णेक्षशिष्यतां पूर्णेक्षस्य पूर्णप्रज्ञा चार्यस्य शिष्यतां प्रापुः । ते के येषां ग्रामाधिपतीनां सद्वृत्तिमात्रेण सतां सज्जनानां रक्षण-मात्रेण पालनेनैव । उपलक्षणं एतत् असतां निग्रहेणापि परं पदं मोक्षः भवेत् किल ॥ १३७ ॥

शुश्रुषापक्षपाताद्यैः केभ्यश्चित् केवलं ददौ ।
रामप्रियो राम इव स्वां गतिं योगिदुर्लभाम् ॥ १३८ ॥

पदार्थदीपिकोद्बोधिका – शुश्रूषेति ॥ रामप्रियः श्रीमध्वः केभ्यश्चिदधिकारिभ्यः केवलं शुश्रूषा च पक्षपातः च तावाद्यौ येषां तानि तथोक्तानि तैः । योगिदुर्लभां गतिं राम इव ददौ। रामो यथा स्वां गतिं ददौ एवं श्रीमध्वोऽपि केषाञ्चिच्छुश्रूषादिना प्रसन्नः सन् स्वेन गम्यं ब्रह्म गमयामासेत्यर्थः । वायुर्हि ब्रह्म गमयितुं समर्थो नान्यः 'स एनान् ब्रह्म गमयति' । 'विद्युत्पतिर्वायुरेव नयेद् ब्रह्म न च अपरः' इत्यादिश्रुतिस्मृतिभ्यः ॥ १३८ ॥

मन्दोपकारिणी – शुश्रूषेति ॥ रामप्रियः रामचन्द्रस्य प्रियः प्रीतिविषयः श्रीमध्वाचार्यः केभ्यश्चित् कतिपयजनेभ्यः केवलं शुश्रूषापक्षपाताद्यैः शुश्रूषा हरिगुरुपरिचर्या पक्षपातः वैष्णवसिद्धान्ते आग्रहः एतौ आद्यौ येषां तानि तैः साधनैः । आदिशब्देन भक्त्यादिकं ग्राह्यं केवलशुश्रूषादिप्रधानकैः साधनैः इत्यर्थः । योगिदुर्लभां भगवदनुग्रह-रहितयोगिभिः दुर्लभां अप्राप्यां स्वां स्वकीयां गतिं ददौ । क इव रामः राघवरामः इव । 'रामः पशुविशेषे स्यात् जामदग्न्ये हलायुधे । राघवे चासितश्वेतमनोज्ञेषु तु वाच्यवत्' इति विश्वः । यथा केषाञ्चित् अधिकारिणां खगादीनां सदैव रामभावनादिरूपशुश्रूषादिना प्रसन्नः सन् रामः स्वां गतिं ददौ । 'खगा मृगास्तृणादयः' इत्युक्तेः । एवं श्रीमध्वोऽपि केषाञ्चिच्छिष्याणां स्वस्वयोग्यशुश्रूषणादिना प्रसन्नस्सन् स्वां गतिं स्वस्य या गतिः तां गतिं ददौ । स्वेन गम्यं ब्रह्म गमयामास इत्यर्थः । 'विद्युत्पतिः वायुरेव गमयेत् ब्रह्म नापरः' इति श्रुतेः वायुरेव हि ब्रह्म गमयितुं समर्थः नापरः ॥ १३८ ॥

शिष्यप्रशिष्यातिशया ईदृशा यद्दयोदयात् ।
को नेच्छेत् सुलभं भक्त्या तत्पादसुरपादपम् ॥ १३९ ॥

पदार्थदीपिकोद्बोधिका – शिष्येति ॥ यस्य श्रीमध्वस्य दया यद्दया तस्या उदयः तस्मात् । शिष्याश्च प्रशिष्याश्च तेषां अतिशयाः सामर्थ्यविशेषा ईदृशा उक्तप्रकारेण प्रसिद्धा

यत् यस्मात् भक्त्या सुलभं तस्य श्रीमध्वस्य यः पादः स एव सुरपादपः कल्पवृक्षः तं तत्पादसुरपादपं कः पुरुषो नेच्छेत्? सर्वोऽपि इच्छेदेव इत्यर्थः ॥ १३९ ॥

मन्दोपकारिणी – शिष्यप्रशिष्येति ॥ यद्दयोदयात् यस्य श्रीमध्वाचार्यस्य दयायाः उदयात् अभिव्यक्तेः शिष्यप्रशिष्यातिशयाः शिष्याश्च प्रशिष्याश्च शिष्यप्रशिष्याः तेषां अतिशयाः सामर्थ्यविशेषाः ईदृशाः उक्तप्रकारेण प्रसिद्धाः भक्त्या सुलभं तत्पादसुरपादपं तस्य श्रीमध्वाचार्यस्य पादौ चरणौ तावेव सुराणां देवानां पादपः तरुः तं को नेच्छेत् ? सर्वेऽपि वाञ्छन्त्येव ॥ १३९ ॥

इत्थं सद्भिः सद्भिरर्च्यो धरायां चक्रे वासं शेषशय्ये शयाने ।
ग्रामे वातैः पविते काण्वतीर्थैर्भक्तप्रीत्या सन्मठेऽनूनबोधः ॥ १४० ॥

भावप्रकाशिका – किं बहुना तदा धरायां जातैः सद्भिः पूज्यः । शयनैकादश्यामतीतायाम् । सन्मठे 'तान्त्र्य' इत्यपभ्रष्टनाम्नि अधिवासे ॥ १४० ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां पञ्चदशः सर्गः ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – इत्थमिति ॥ धरायां भूमौ इत्थमेवं सद्भिः सज्जनैः अर्च्यः पूज्यः अनूनबोधः श्रीपूर्णप्रज्ञाचार्यः, शेषः शय्या पर्यङ्को यस्य स शेषशय्यः श्रीहरिः तस्मिन् शयाने सति शयनैकादश्यामिति शेषः । कण्वतीर्थादागताः काण्वतीर्थाः तैः वातैः वायुभिः पविते पवित्रीकृते ग्रामे एकवाटकनामके ग्रामे 'तान्त्र्य' इत्यपभ्रष्टनामके सन्मठः शोभनमठस्तस्मिन्, भक्तप्रीत्या तद्ग्रामगतभक्तजनानुग्रहेण वासं चक्रे चातुर्मास्यमुवासेति भावः । शालिनीवृत्तम् । मस्तौ गौ चेच्छालिनी वेदलोकैः' इत्युक्तेः ॥ १४० ॥

मन्दोपकारिणी – इत्थमिति ॥ धरायां भूमौ इत्थं सद्भिः एवं भूतैः सद्भिः सज्जनैः अर्च्यः पूज्यः अनूनबोधः ऊनो अल्पो न भवतीति अनूनः पूर्णः बोधो यस्यासौ तथोक्तः । श्रीमध्वाचार्यः शेषशय्ये शेषः शेषदेवः शय्या तल्पं यस्य सः शेषशय्यः तस्मिन् भगवति शयाने सति आषाढशुद्धैकादश्यां शेषशायिनि शेषाख्यशयने शयाने सतीत्यर्थः । काण्वतीर्थैः कण्वस्य कण्वमुनेः तीर्थं जलाशयं कण्वतीर्थं कण्वतीर्थसम्बन्धिनः

काण्वतीर्थाः तैः काण्वतीर्थजलस्पृष्टैः वातैः वायुभिः । 'नभस्वद्वातपवनपवमानप्रभञ्जनाः' इत्यमरः । पाविते पवित्रीकृते ग्रामे कण्वतीर्थतीरगते कस्मिंश्चित् ग्रामे सन्मठे प्रशस्ते मठे । 'मठश्छात्रादिनिलयः' इत्यमरः । भक्तप्रीत्या तद्ग्रामस्थभक्तानां प्रीत्या वासं चक्रे चातुर्मास्यं उवास इति भावः । शालिनीवृत्तं 'मस्तौ गौ चेच्छालिनी वेदलोकैः' इति वचनात् ॥ १४० ॥

आनन्दतीर्थभगवद्वदनेन्दुबिम्बं विद्यासुधाविततकान्ति सुकान्तिकान्तम् ।
यैः प्रैक्ष्यतात्र भवतापशमाय भक्तैः तद्दासदास्यमपि किं न ददाति पुंसः ॥ १४१ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते सुमध्वविजये महाकाव्ये आनन्दाङ्के पञ्चदशः सर्गः ॥

पदार्थदीपिकोद्बोधिका – स्वानन्देति ॥ यैः भक्तैः भवस्य संसारस्य ये तापाः तेषां शमो विनाशः तस्मै समर्थमिति यावत् । विद्यासुधाविततकान्ति विद्या च सा सुधामयी चेति विद्यासुधाविततता व्याप्ता च सा कान्तिः च विततकान्तिः विद्यासुधाविततकान्तिः यस्य तत् सर्वलोकव्याप्तविद्यारूपसुधामयकान्तियुक्तमित्यर्थः । सुधाकान्त्या शोभनकान्त्या कान्तं भद्रं स्वानन्दतीर्थस्य भगवत् पूज्यं यद्वदनेन्दुबिम्बं प्रैक्ष्यत द्रष्टम् । तद्दासदास्यमपि तेषां आनन्दतीर्थमुखेन्दुबिम्बं द्रष्टवतां भक्तानां ये दासाः तेषां दास्यं कैङ्कर्यमपि पुंसः किं न ददाति ? सर्वं अपि अभीष्टं ददाति इति भावः । वसन्ततिलकावृत्तम् । लक्षणं तूक्तम् ॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां पञ्चदशः सर्गः ॥

मन्दोपकारिणी – आनन्दतीर्थेति ॥ अत्र भुवि भक्तैः यैः तत्कालभवैः मध्वभक्तैः भवतापशमाय भवः संसार एव तापः संतापः तस्य शमाय परिहाराय । समर्थमिति शेषः । विद्यासुधाविततकान्ति सुधया विततता व्याप्ता सुधामयीत्यर्थः सा च सा कान्तिः कला च सुधाविततकान्तिः अमृतकला इत्यर्थः विद्यैव सुधाविततकान्तिः यस्य तत् तथोक्तम् । विद्यालक्षणामृतकलापूर्णं इत्यर्थः । सुकान्तिकान्तं शोभनकान्त्या कान्तं मनोहरम् । आनन्दतीर्थभगवद्वदनेन्दुबिम्बं आनन्दतीर्थश्चासौ भगवांश्च आनन्दतीर्थभगवान् तस्य वदनं

मुखमेव इन्दोः चन्द्रस्य बिम्बं मण्डलं प्रैक्ष्यत द्रष्टम् । तद्दासदास्यमपि तेषां श्रीमदानन्दतीर्थभगवत्पादवदनचन्द्रमण्डलं साक्षात् दृष्टवतां पुंसां ये दासाः तेषां दास्यमपि दासत्वमपि पुंसः अधिकारिणः किं अभीष्टं न ददाति सर्वं ददात्येव इत्यतः श्रीमदानन्दतीर्थभगवत्पादशिष्यप्रशिष्यादिपरंपराप्रविष्टानां मध्वमतानुवर्तिनां पुंसां दासत्वमपि जन्मान्तरेऽपि भूयात् इति प्रार्थनीयं इति भावः । वसन्ततिलकावृत्तं 'उक्ता वसन्ततिलका तभजा जगौ गः' इत्युक्तेः ॥ १४१ ॥

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः

साधुभ्यो मधुमथनांघ्रिभक्तिभाग्भ्यः श्रौतेभ्यो विततमतेर्महानुभावम् ।
वेदान्तं स्वयमिव बन्धमोक्षमूलं व्याचष्ट स्फुटमथ कोऽपि कोविदोऽत्र॥ १ ॥

पदार्थदीपिकोद्बोधिका – साधुभ्य इति ॥ अथ अत्र श्रीमध्वशिष्येषु कोऽपि कोविदो विद्वान् स्वयं स्वयमेव श्रीमध्वभक्तानुकम्पयेत्यर्थः । मधोः मथनः मधुमथनो मधुसूदनः तस्य अंघ्री तयोः भक्तिः तां भजन्तीति तथोक्ताः तेभ्यः । श्रुतीनां सम्बन्धिनः श्रौताः तेभ्यो वैदिकेभ्य इत्यर्थः । साधुभ्यः सज्जनेभ्यः । विततमतेः श्रीपूर्णप्रज्ञस्य, बन्धात् संसारबन्धात् मोक्षो मोचनं तस्य मूलं कारणभूतं महान् योऽनुभवः सामर्थ्यः तं तदनुभवप्रकटनरूपकथां इत्यर्थः । स्फुटं सम्यक् वेदानां अन्तो निर्णयो यस्मात् स वेदान्तः तमिव व्याचष्ट जगाद । प्रहर्षिणीवृत्तम् । 'म्नौज्रौगस्त्रिदशयति प्रहर्षणीयम्' इत्युक्तेः ॥ १ ॥

मन्दोपकारिणी – अथ कथान्तरमारभ्यते **साधुभ्य इति** ॥ अत्र मध्वशिष्येषु कोऽपि कश्चित् कोविदः विद्वान् शिष्यः 'सन् सुधीः कोविदो बुधः' इत्यमरः । स्वयं स्वयमेव मध्वभक्तानुकम्पया इत्यर्थः । मधुमथनाङ्घ्रिभक्तिभाग्भ्यः मधुमथनस्य मधुनामकदैत्यसंहारिणः विष्णोः अङ्घ्रयोः पादयोः भक्तिं भजन्तीति भक्तिभाजः तेभ्यः । श्रौतेभ्यः श्रुतिसम्बधिभ्यः वेदपाठकेभ्यः इत्यर्थः । साधुभ्यः सज्जनेभ्यः विततमतेः वितता विशाला पूर्णा मतिः यस्य सः विततमतिः तस्य श्रीमध्वाचार्यस्य । महानुभावं महान् पुरुषार्थप्रदत्वेन अत्युत्तमः अनुभावः महिमा तं मध्वमाहात्म्यप्रकटरूपकथां इति यावत् । स्फुटं सम्यक् व्याचष्ट जगाद । 'चक्षिङ् व्यक्तायां' वाचीत्यतो लङ् आत्मनेपदं आचष्ट आचक्षातां आचक्षत । कथंभूतं बन्धमोक्षमूलं बन्धात् संसारात् मोक्षस्य मूलं कारणभूतं किमिव वेदान्तमिव बन्धमोक्षकारणभूतं वेदान्तशास्त्रमिव । यथा कश्चित् शिष्येभ्यो वेदान्तशास्त्रं व्याख्यायात् एवं मध्वशिष्यः मध्वविजयप्रकटनरूपां कथां विष्णुभक्तेभ्यः वेदपाठकेभ्यः सज्जनेभ्यः अब्रवीत् इति भावः । प्रहर्षिणीवृत्तं प्रायः सर्गपर्यन्तं 'त्र्याशाभिर्मनजरगाः प्रहर्षिणीयं' इति तल्लक्षणात् ॥ १ ॥

गोमत्यास्तटनिकटेऽच्छकीर्तिचन्द्रं विश्वज्ञं क्षितिपतिरन्त्यवर्णजन्मा ।
विद्वेष्टा श्रुतिगुणसाधकं श्रुतीनां वाचालो वचनमुवाच वाग्मिवर्यम्॥ २ ॥

पदार्थदीपिकोद्बोधिका – गोमत्या इति ॥ गोमत्याः तन्नामकनद्याः तटस्य तीरस्य निकटं समीपः तस्मिन् वर्तमानः श्रुतीनां विद्वेष्टा दूषकः वाचालो बहुभाषणः अन्त्यो यो वर्णः शूद्रवर्णः तस्मिन् जन्म यस्य स तथा कश्चित् क्षितिपती राजा अच्छा या कीर्तिः तया चन्द्र इव अच्छकीर्तिचन्द्रः तं चन्द्रवत् प्रकाशमानं इत्यर्थः । श्रुतीनां ये गुणाः प्रामाण्यादयः तेषां साधकः तम् । वाग्मिषु वर्यं विश्वज्ञं श्रीमध्वं इति वचनमुवाच ॥ २ ॥

मन्दोपकारिणी – क्रमेण एकैकं महिमानं कथयति शिष्यः इत्याह ॥ **गोमत्या इति** ॥ श्रुतीनां विद्वेष्टा दूषकः वाचालः बहुभाषणः 'स्याज्जल्पकस्तु वाचालो वाचाटो बहुगर्ह्यवाक्' इत्यमरः । अन्त्यवर्णजन्मा अन्त्यवर्णात् जन्म उत्पत्तिः यस्य स तथोक्तः 'शूद्राश्चावरवर्णाश्च' इत्यमरः शूद्रजातिः इत्यर्थः । कश्चित् क्षितिपतिः राजा गोमत्याः गोमत्याख्यनद्याः तटनिकटे तटस्य तीरस्य निकटे समीपदेशे वर्तमानं 'समीपे निकटासन्ने संनिकृष्टसनीडवत्' इत्यमरः । अच्छकीर्तिचन्द्रं अच्छया कीर्त्या चन्द्रवत् प्रकाशमानम् । श्रुतिगुणसाधकं श्रुतीनां गुणाः प्रामाण्यादिगुणाः तेषां साधकम् । वाग्मिवर्यं वाग्मिषु वचनप्रकारचतुरेषु वर्यं श्रेष्ठं 'वाचो युक्तिपटुर्वाग्मी' इत्यमरः । विश्वज्ञं सर्वज्ञं श्रीमध्वाचार्यं वक्ष्यमाणप्रकारवचनं उवाच । 'वच परिभाषणे' इत्यतो लिट् परस्मैपदम् ॥ २ ॥

उन्मत्तप्रलपितवन्न तद्धि मानं यद्वाक्यं व्यभिचरति क्वचित्फलेऽत्र ।
दृष्टान्तो भवति तदप्रमाणतायां सर्वेषां श्रुतिवचसां च सर्वथेति ॥ ३ ॥

भावप्रकाशिका – इदमाकूतम् । या ओषधीरित्यादिसूक्तैर्जपैरोषधीबीजेभ्यः सद्यः पुष्पफलादिनिष्पत्तिरुच्यते वैदिकैः । न चोपलभ्यते । ततस्तेषां व्यभिचारित्वम् । स इह च प्रयोगः– 'विमतं वाक्यं न मानं व्यभिचारित्वात् उन्मत्तवाक्यवदिति' । अथ च सर्वो वेदोऽप्रमाणं वेदत्वात् व्यभिचारिवेदवाक्यवदिति ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – उन्मत्तेति ॥ स क्षितिपतिः अत्र वेदे यद्वाक्यं क्वचित् कुत्रचित् फले व्यभिचरति तद्वाक्यं उन्मत्तप्रलपितवत् स्वोक्तफले व्यभिचारिवाक्यवादित्यर्थः मानं प्रमाणं न हि । तत् फलव्यभिचारिवाक्यं सर्वेषां श्रुतिवचसां अप्रमाणतायां दृष्टान्तः सर्वथा भवति इत्युवाच इति पूर्वेण सम्बन्धः । अयमत्राभिप्रायः श्रुतौ ओषधिबीजे हस्ते गृहीत्वा 'या ओषधीः पूर्वा जाता देवेभ्य' इत्यादिसूक्तजपात् सद्य एवां कुरदलपुष्प-

फलाद्युत्पत्तिः भवति इत्युच्यते । इदानीं तथा कृतेऽपि फलं न दृश्यते । तस्मात् या ओषधीः इत्यादि फलानुपलंभात्तद्वाक्यं फले व्यभिचरतीति सम्मतं तथा च— या ओषधीरित्यादिवाक्यं न प्रमाणं फलव्यभिचारित्वात् उन्मत्तवाक्यवदिति । ततश्च तद्वाक्यदृष्टान्तेन वेदमात्रस्य अप्रामाण्यं साधयितुं शक्यते । तथा हि विप्रतिपन्नं सर्वं वेदवाक्यं अप्रमाणं वेदत्वात् या ओषधीः इत्यादिवेदवाक्यवत् इति ॥ ३ ॥

मन्दोपकारिणी – किमिति उवाच इत्यत आह ॥ **उन्मत्तेति** ॥ अत्र वेदे यद्वाक्यं क्वचित् कुत्रचित् फले स्वोक्तफले व्यभिचरति अनृतं भवति तत् तद्वाक्यं उन्मत्तप्रलपितवत् उन्मत्तस्य मद्यपायिनः प्रलपितवत् वचनवत् 'व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः मानं प्रमाणं न भवति हि सर्वानुभवसिद्धम् । तत् फलव्यभिचारित्वेन संप्रतिपन्नं वाक्यं सर्वेषां च सर्वेषामपि श्रुतिवचसां वेदवाक्यानां अप्रमाणतायां अप्रामाण्यसाधने दृष्टान्तः निदर्शनं सर्वथा नियमेन भवति इति उवाच इति पूर्वेणान्वयः । अयं भावः श्रुतौ ओषधिबीजं हस्ते गृहीत्वा 'या ओषधीः पूर्वा जाता देवेभ्यः' इत्यादिसूक्तजपेन सद्य एवाङ्कुरपुष्पफलाद्युत्पत्तिः भवति इत्युच्यते । तदुक्तप्रकारेण सूक्तफलं तु नोपलभ्यते तस्मात् तद्वाक्यं न मानं उन्मत्तवाक्यवत् । अत्र 'या ओषधीरित्यादिवाक्यं प्रमाणं न भवति अनृतवचनत्वात् उन्मत्तवचनवत्' इति प्रयोगो ज्ञेयः । तथा 'सर्ववेदः अप्रमाणं वेदत्वात् अप्रमाणत्वेन सम्प्रतिपन्न 'या ओषधीः' इत्येतत् वेदवाक्यवत्' इति सर्ववेदाप्रमाण्ये प्रयोगो ज्ञेयः ॥ ३ ॥

वेदोक्तं फलमलमाप्यतेऽधिकारादित्युक्तोऽतनुमनसाभ्यधत्त धूर्तः ।
योग्यत्वे सति न हि दृश्यतेऽधिकारी नातः स्यात् स खरविषाणवत्सदेति ॥ ४ ॥

भावप्रकाशिका – विशुद्धमातापितृजन्यत्वादिमूलाधिकाराद्धि फलमुच्यत इति व्यभिचारित्त्वहेतोरसिद्धिद्योतकोक्तो नास्ति कोऽप्यधिकारी योग्यत्वे सत्यनुपलभ्यमानत्वात् खरविषाणवदिति ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – वेदोक्तमिति ॥ अधिकारात् वेदोक्तानुष्ठाने तदुक्तफलप्राप्तौ चाधिकारे सति एव वेदोक्तं फलं अलं सम्यग् आप्यते न अनुष्ठानमात्रेण । अयं भावः वेदोक्तकर्मानुष्ठानेऽपि फलादर्शनमात्रेण न वेदाप्रामाण्यं अनुमातुं शक्यते । फलादर्शनस्य

अधिकाराभावनिबन्धनत्वात् । तद्वेदोक्तकर्माधिकारिणां च कृते च कर्मणि फलं दृश्यत एव अनधिकारिणा कृतेऽपि तत्फलं न दृश्यते । अनधिकारिकृतं अकृतमेवेति न्यायात् इति । तनु न भवति इति अतनु अतनु मनो यस्य स तथा तेन पूर्णप्रज्ञेन इत्युक्तो धूर्तः शूद्रभूपतिः अधिकारी वेदोक्तफलाधिकारी हि यस्मात् योग्यत्वे सति न दृश्यते अतः तस्मात् स भवद्विवक्षितोऽधिकारी खरविषाणवत् सदा न स्यात् नास्त्येवेति भावः । इति इत्थं अभ्यधत्त उक्तवान् । तथा च अत्र प्रयोगः— भवद्विवक्षितोऽधिकारी नास्त्येव योग्यत्वे सति अनुपलभ्यमानत्वात् खरविषाणवत् इति ॥ ४ ॥

मन्दोपकारिणी – वेदोक्तमिति ॥ अधिकारात् योग्यतायाः वेदोक्तं वेदचोदितं फलं अलं निश्चयेन आप्यते प्राप्यत एव । अयं भावः वेदोक्तधर्मानुष्ठानेऽपि फलादर्शनमात्रेण न वेदाप्रामाण्यं अनुमातुं शक्यते । फलादर्शनस्य अधिकाराभावनिबन्धनत्वात् । तत्तद्वेदोक्तकर्माधिकारिणां च फलं च दृश्यत एव अनधिकारिणा कृतेऽपि फलं न दृश्यते अनधिकारिकृतं अकृतमेवेति न्यायात् । इति एवं प्रकारेण अतनुमनसा अतनु अनल्पं मनो यस्य स अतनुमनाः तेन श्रीमध्वाचार्येण उक्तः उदितः धूर्तः शठः राजा 'धूर्तः स्यात्खण्डलवणे धत्तूरे ना शठे त्रिषु' इति विश्वः अभ्यधत्त अब्रवीत् । किमिति अधिकारी वेदोक्तफलं प्राप्तुं योग्यः पुरुषः हि यस्मात् योग्यत्वे सति दृष्टियोग्यत्वे सति न दृश्यते नोपलभ्यते । अतः तस्मात् सः युष्मद्विवक्षितः अधिकारी पुरुषः सदा न स्यात् नास्त्येव इत्यर्थः । किंवत् खरविषाणवत् खरस्य गर्दभस्य विषाणं शृङ्गमिव 'खरः स्याद्गर्दभे देवतालितीक्ष्णाग्रकेऽपि च' इति विश्वः 'शृङ्गं विषाणं आख्यातं' इति च । अयं भावः यदुक्तमधिकारिणो वेदोक्तं फलं भवतीति तदनुपपन्नम् । कुत्रापि तादृशाधिकारिणः अनुपलम्भात् । तथा च प्रयोगः - 'भवद्विवक्षितोऽधिकारी नास्त्येव योग्यत्वे सति अनुपलभ्यमानत्वात् खरविषाणवत्' इति ॥ ४ ॥

आक्षेपं तमसहमान उच्चमानः सद्योऽसौ निजकरपल्लवद्वयेन ।
आदाय व्यतनुत बीजमोषधीनां सूक्तेनांकुरदलपुष्पबीजसृष्टिम् ॥ ५ ॥

भावप्रकाशिका – ओषधीनां मुद्गाह्वयानाम् ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – आक्षेपमिति ॥ तं तत्कृतं आक्षेपं असहमानः उच्चः महान् मानो यस्य स तथोक्तः महाज्ञान इति वा असौ श्रीमध्वाचार्यः ओषधीनां अगदाख्यानां

धान्यानां बीजं, निजौ यौ करौ तावेव पल्लवौ तयोः द्वयं तेन आदाय सूक्तेन 'या ओषधी'रित्यादिसूक्तेन जत्वा अङ्कुरश्च दलानि च पुष्पाणि च बीजानि च तेषां सृष्टिं व्यतनुत चक्रे ॥ ५ ॥

मन्दोपकारिणी – आक्षेपमिति ॥ तं राजकृतं आक्षेपं निराकरणं असहमानः अमर्षमाणः उच्चमानः उच्चः महान् मानः अभिमानः यस्यासौ उच्चमानः । असौ श्रीमध्वाचार्यः ओषधीनां मुद्गाख्यानां धान्यानां बीजं समुदायैकवचनं बीजानि निजकरपल्लवद्वयेन करावेव पल्लवौ किसलयौ । निजौ च तौ करपल्लवौ च तयोः द्वयेन अञ्जलिना इत्यर्थः । आदाय गृहीत्वा सूक्तेन 'या ओषधीः पूर्वा जाता देवेभ्यः' इत्यादिना सूक्तजपेन सद्यः तत्क्षण एव 'सद्यः सपदि तत्क्षणे' इत्यमरः अङ्कुरदलपुष्पबीजसृष्टिं अङ्कुराश्च दलानि पर्णानि च बीजानि फलानि च एतेषां सृष्टिं उत्पत्तिं क्रमेण व्यतनुत कृतवान् । 'तनु विस्तारे' इत्यतो लङ् आत्मनेपदं अतनुत अतन्वातां अतन्वत ॥ ५ ॥

व्याख्याता निशि स कदाचन प्रदीपे संशान्ते पुनरपि वाचयाम्बभूव ।
शिष्यान् स्वान् पुरुकरुणाम्बुधिर्निजांघ्रेरङ्गुष्ठस्फुटनखरान्तरोचिषैव॥ ६ ॥

पदार्थदीपिकोद्बोधिका – व्याख्यातेति ॥ कदाचन निशि व्याख्याता व्याख्यां कुर्वन् स श्रीमध्वः प्रदीपे संशांते नष्टेऽपि निजांघ्रेः स्वचरणस्य अङ्गुष्ठस्य स्फुटो व्यक्तो नखरान्तः नखाग्रं तस्य रोचिः तेनैव पुनः अपि स्वान् शिष्यान् पुरुः भूयसी या करुणा शिष्यदया तदम्बुधिः इव अम्बुधिः पूर्ण इत्यर्थः । तथा सन् वाचयाम्बभूव ॥ ६ ॥

मन्दोपकारिणी – व्याख्यातेति ॥ कदाचन कस्मिंश्चित् दिवसे निशि रात्रौ 'निशा निशीथिनी रात्रिः' इत्यमरः व्याख्याता व्याख्यानं कुर्वन्, सः श्रीमध्वाचार्यः प्रदीपे संशान्ते केनचित् निमित्तेन नष्टे सत्यपि निजांघ्रेः स्वचरणस्य अङ्गुष्ठस्फुटनखरांतरोचिषैव नखरस्य नखस्य 'नखोऽस्त्री नखरोऽस्त्रियाम्' इत्यमरः अन्तस्य प्रान्तस्य 'अन्तर्मध्ये तथा प्रान्ते' इति विश्वः नखरान्तस्य नखप्रान्तभागस्य रोचिः प्रकाशः नखरान्तरोचिः 'रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः' इत्यमरः स्फुटं च तत् नखरान्तरोचिश्च इति तथोक्तः अङ्गुष्ठस्य स्फुटनखरान्तरोचिः तेनैव पुनः स्वान् शिष्यान् श्रावकान् वाचयाम्बभूव । कथंभूतः पुरुकरुणाम्बुधिः पुरुश्चासौ करुणा च तस्याः अम्बुधिः । शिष्येषु बहुदयावान्

कदाचित् निशि व्याख्यां कुर्वन् मध्वः दीपे नष्टेऽपि स्वचरणाङ्गुष्ठनखप्रकाशेनैव पुस्तकं शिष्यैः वाचयामास इति भावः ॥ ६ ॥

तीर्थार्थं पृथुतरवप्रपातिवारां धाराणां रयसहनक्षमां महेक्षः ।
आनीतां दशशतपुम्भिरत्यशक्त्या प्रेक्ष्योचे विपुलशिलां क्वचित् स मुक्ताम् ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – तीर्थेति ॥ महती ईक्षा ज्ञानं यस्य स महेक्षः पूर्णप्रज्ञः क्वचित् कुत्रचित् देशे तीर्थार्थं नदीतीरस्थापनार्थं दश च तानि शतानि च दशशतानि पुमांसश्च तैः सहस्रसङ्ख्याकैः इत्यर्थः आनीतां अत्यशक्त्या मध्ये मुक्तां पृथुतरं यद्वप्रं उन्नतस्थलं तस्मात् पातीनि पतनशीलानि यानि वारि जलानि तेषां धाराणां रयस्य वेगस्य सहनं वहनं तस्मिन् क्षमां समर्थां विपुलशिलां प्रेक्ष्य इत्यूचे ॥ ७ ॥

मन्दोपकारिणी – तीर्थार्थमिति ॥ सः महेक्षः महती पूर्णा ईक्षा बुद्धिः यस्य सः महेक्षः मध्वाचार्यः । क्वचित् कुत्रचित् देशे विपुलशिलां विपुला महती च सा शिला च तां प्रेक्ष्य दृष्ट्वा ऊचे अब्रवीत् । कथंभूतां शिलां तीर्थार्थं तीर्थनिमित्तेन नदीतीरे स्थापनार्थमिति यावत् । दशशतपुंभिः दश च तानि शतानि च सहस्रं इत्यर्थः दशशतसङ्ख्याकाश्च ते पुमांसश्च दशशतपुमांसः तैः सहस्रसङ्ख्याकैः पुरुषैः आनीतां किंचित् दूरे कथंचित् आनीतां अत्यशक्त्या अत्यन्तं असामर्थ्येन क्वचित् मध्ये मुक्तां भूमौ निक्षिप्तां पुनः कथंभूतां पृथुतरवप्रपातिवारां अतिशयेन पृथुः उच्चः पृथुतरः पृथुतरश्चासौ वप्रः रोधश्च 'वप्रः प्राकाररोधसोः' इति विश्वः रोधो नाम तीरं 'कुलं रोधश्च तीरं च' इत्यमरात् पृथुतरवप्रः पृथुतरवप्रात् पाति निपतन्ति च तानि वारि जलानि च पृथुतरवप्रपातिवारि तेषां 'आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलं' इत्यमरः धाराणां सन्ततीनां 'धारा सैन्याग्रिमस्कन्धसन्तत्योः पतनान्तरे' इति विश्वः । यद्वा धाराणां सम्पातानां 'धारासम्पात आसारः' इत्यमरः प्रवाहानां इति यावत् । रयसहनक्षमां रयस्य जवस्य सहने क्षमां शक्तां 'रंहस्तरसी तु रयः स्यदः जवोऽथ' इत्यमरः 'क्षमं शक्ते हिते त्रिषु' इति च । अत्युन्नतकूलात् पतज्जलप्रवाहवेगं सोढुं समर्थां इत्यर्थः ॥ ७ ॥

लोकानामुपकृतये कुतः शिलेयं निन्ये नो इति जनता जगाद तत्र ।
नेतारो यतिवर मानवा न हीमां भीमश्चेदिह यतते नयेन्न वेति ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – लोकानामिति ॥ लोकानां जनानां उपकृतये क्षेमाय शिला कुतो नो निन्ये न नीता इत्यूचे इति सम्बन्धः । तदा तत्र प्रदेशे स्थिता जनता जनसमूहः— 'हे यतिवर! श्रीमध्व! इमां शिलां नेतारो नेतुं समर्था मानवा मनुष्या न हि न विद्यन्ते । भीमो भीमसेन इह शिलानयने यतते चेत् तर्हि नयेद्वा न वा' इति जगाद ॥ ८ ॥

मन्दोपकारिणी – लोकानामिति ॥ लोकानां जनानां उपकृतये उपकाराय इयं शिला कुतः कस्मात् कारणात् भवद्भिः नोनिन्ये एतत्स्थलात् न नीता इत्यूचे इति पूर्वेण सम्बन्धः 'णीञ् प्रापणे' इति धातोः कर्मणि लिट् । तत्र तदा जनता जनसमूहः श्रीमध्वाचार्यं प्रति जगाद अब्रवीत् । कथं, हे यतिवर ! संन्यासिश्रेष्ठ ! इमां शिलां नेतारः उन्नेतुं समर्थाः मानवाः मनुष्याः न हि न विद्यन्ते हि 'मनुष्या मानुषा मर्त्या मनुजा मानवा नराः' इत्यमरः । भीमश्चेत् भीमसेनश्चेत् इह एतच्छिलानयने यतते चेत् नयेद्वा न वा भीमसेनोऽपि इमां शिलां नेतुं प्रयत्नं तावत् कुर्यात् । नेतुं समर्थो भवेत् न वा इति भावः । 'गद व्यक्तायां वाचीति धातोः लिट् परस्मैपदं' 'णीञ् प्रापणे' इति धातोः विधिलिङ् परस्मैपदम् । इति जनता जगाद इति सम्बन्धः ॥ ८ ॥

निन्ये तां गिरिमिव वानरीकृतात्मा लीलावत्करकमलेन सोऽमलेन ।
तत्रापि न्यधित तयाऽस्य सूच्यतेऽलं तत्तुङ्गां ननु निकषाधुनाऽपि कर्म ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – निन्य इति ॥ स श्रीमध्वः अमलेन, लीला अस्यास्तीति लीलावत् तच्च तत्करकमलं च तेन तां शिलां वानरीकृतः वानरत्वेन कृत आत्मा स्वरूपं यस्य स तथोक्तः हनूमद्रूपः स इत्यर्थः । स्वयं गिरिमिव गन्धमादनपर्वतमिव निन्ये नीतवान् । अत्र लीलावत् इत्युक्त्या अनायासः सूचितः । यत्र सा शिला स्थापयितुमिष्टा तत्र तुङ्गां तुङ्गभद्राया निकषा समीपे 'अभितः परितः समया निकषा' इत्यादिना द्वितीया न्यधित निक्षिप्तवान् । अस्य श्रीमध्वाचार्यस्य तत्कर्म अधुनापि तया शिलया अलं सम्यग् सूच्यते ननु । खण्डकलशाख्यतुङ्गभद्रातीर इयं शिला कैश्चन यतिभिः आनीतेति वार्ता श्रूयत इति भावः ॥ ९ ॥

मन्दोपकारिणी – निन्येति ॥ सः श्रीमध्वः अमलेन काठिण्यदोषरहितेन कोमलेन इति यावत् । लीलावत्करकमलेन लीलावान् आयासरहितश्चासौ करश्च स एव कमलं पद्मं

तेन। यदा लीलावत् इति भिन्नं पदम् । लीला अस्यास्तीति लीलावत् । लीलया सहितं यथा भवति तथेति भावः । तां सहस्रपुरुषैः उद्धर्तुं अशक्यां शिलां निन्ये निनाय अनायासेन नीतवान् इत्यर्थः । कः कमिव वानरीकृतात्मा अवानरः वानरवत् सम्पद्यमानः वानरीकृतः आत्मा देहो येन स तथोक्तः हनुमान् गिरिमिव गन्धमादनपर्वतमिव । तत्र शिलास्थापनाय अभिप्रेतस्थले तां शिलां न्यधितापि स्थापयामास च । तया शिलया अस्य श्रीमध्वाचार्यस्य तत् शिलास्थापनरूपं कर्म व्यापारः तुङ्गां तुङ्गभद्रायाः निकषा समीपे 'समीपे निकषांतिके' इत्यमरः 'अभितः परितः समया निकषा हा प्रातियोगेऽपि षष्ठ्यर्थे द्वितीया' । अधुनापि इदानीं अपि अलं सम्यक् सूच्यते ज्ञायते इति श्रूयते ननु निश्चयः इत्युक्तं भवति ॥ ९ ॥

सङ्घातैरधिकथनैरलङ्कृताध्वा शिष्याणां यतमनसामुतेतरेषाम् ।
यत्रामा वसति तिथाविनेन चन्द्रस्तत्रासौ सकलमतिः ससार सिन्धुम् ॥ १० ॥

भावप्रकाशिका – यतमनसां यतीनामितरेषां गृहिणाम् ॥ १० ॥

पदार्थदीपिकोद्बोधिका – सङ्घातैरिति ॥ असौ सकलमतिः पूर्णप्रज्ञः यत्र यस्यां तिथौ चन्द्रः इनेन सूर्येण अमा सह वसति, तत्र तस्यां तिथौ, अमावास्यायामित्यर्थः । तस्यां उपरागे च सति स्नातुं सिन्धुं, यतमनसां यतीनां इतरेषां गृहीणां, उत अपि अत एव उभयेषां शिष्याणां अधिकघनैः मार्गे अतीवसम्मर्दभाग्भिः सङ्घाताः समूहाः तैः अलङ्कृतोऽध्वा यस्य स तथा सन् ससार जगाम ॥ १० ॥

मन्दोपकारिणी – सङ्घातैरिति ॥ असौ सकलमतिः सकला पूर्णा मतिः प्रज्ञा यस्य स सकलमतिः मध्वाचार्यः । यत्र यस्यां तिथौ चन्द्रः इनेन सूर्येण 'इनः सूर्ये नृपे पतौ' इति विश्वः अमा सह 'अमा सह समीपे च' इति अभिधानं वसति तत्र तिथौ अमावास्यायां इत्यर्थः । तस्यां सूर्योपरागे सति तत्पर्वकाले स्नातुं सिन्धुं ससार जगाम । 'सृ गतौ' इति धातोः लिट् परस्मैपदम् । यतमनसां यतं निगृहीतं मनो येषां यतीनां इत्यर्थः । इतरेषां यतीतरेषां उत गृहस्थादीनां अपि एवं उभयविधशिष्याणां अधिकथनैः अधि अधीतानि कथनानि वचांसि येषां ते अधिकथनाः तैः सङ्घातैः समूहैः 'स्तोमौघनिकरव्रातवारसङ्घात संचयाः' इत्यमरः अलङ्कृताध्वा अलङ्कृतः अध्वा मार्गो यस्य स तथोक्तः 'अयनं वर्त्म

मार्गाध्वपन्थानः' इत्यमरः । मार्गे शास्त्रविषयकातिशयितवाग्व्यापारं कुर्वद्भिः यतिभिः गृहिभिः शिष्यैः सह सूर्यग्रहणे सति स्नातुं समुद्रं प्रति जगाम इति भावः ॥ १० ॥

आर्द्राङ्गाः सपदि निमज्जनात् सरस्यां कण्वस्य द्विजऋषभस्य वल्लभायाम् ।
तत्रायन् खरकिरणोपरागहेतोर्ग्रामीणा अपि सकलाः सबालवृद्धाः॥ ११ ॥

पदार्थदीपिकोद्बोधिका – आर्द्राङ्गा इति ॥ तत्र तस्मिन् काले सबालवृद्धाः सकला ग्रामीणा अपि एकवाटग्रामजना अपि खराः तीक्ष्णाः किरणा यस्य स तथा तस्य सूर्यस्य य उपरागो ग्रहणं स एव हेतुः तस्मात् समुद्रस्नानार्थं द्विजर्षभस्य द्विजश्रेष्ठस्य कण्वस्य कण्वाख्यमुनेः वल्लभायां प्रियायां सरस्यां सरोवरे सपदि सद्यः निमज्जनं अवगाहनं तस्मात् आर्द्राण्यङ्गानि येषां ते तथोक्ताः सन्तः तत्र समुद्रतीरे आयन् आगताः ॥ ११ ॥

मन्दोपकारिणी – आर्द्राङ्गा इति ॥ तत्र मध्वाचार्यगमनकाले सबालवृद्धाः बालाः पूर्ववयस्काः तैः सहिताः सबालवृद्धाः सकलाः ग्रामीणा अपि ग्रामस्थसर्वजनाः अपि खरकिरणोपरागहेतोः खराः तीक्ष्णाः किरणाः रश्मयः यस्य सः खरकिरणः सूर्यः तस्य उपरागः ग्रहः ग्रहणं स एव हेतुः कारणं तस्मात् 'उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च' इत्यमरः । तत्र समुद्रस्नानार्थं आयन् आगताः । 'इण् गतौ' इत्यतो लङ् परस्मैपदं ऐत् ऐतां आयन् । कथंभूताः द्विजऋषभस्य द्विजश्रेष्ठस्य कण्वस्य कण्वनामकमुनेः वल्लभायां प्रीतिविषयायां सरस्यां सरसि कण्वतीर्थे इत्यर्थः 'कासारः सरसी सरः' इत्यमरः । सपदि सद्यः निमज्जनात् स्नानात् आर्द्राङ्गाः आर्द्रं क्लिन्नं अङ्गं शरीरं येषां ते तथोक्ताः एकवाटादिग्रामजनाः सबालवृद्धाः सर्वेऽपि कण्वतीर्थे स्नात्वा आर्द्राङ्गा एव सूर्योपरागनिमित्तं मध्वाचार्यागमनकाले स्नातुं समुद्रं प्रत्याययुः इति भावः ॥ ११ ॥

सर्वज्ञं सपरिजनं समीक्षमाणाः फुल्लाक्षाः स्मितवदनाः शुभा ननन्दुः ।
दौर्मुख्यं दधत उतापरे निनिन्दुर्नाश्चर्यं द्वयमपि तत् स्वभावतन्त्रम्॥ १२ ॥

पदार्थदीपिकोद्बोधिका – सर्वज्ञमिति ॥ सपरिजनं सपरिवारं सर्वज्ञं श्रीपूर्णप्रज्ञाचार्यं समीक्षमाणा अत एव स्मितं मन्दहासोपेतं वदनं येषां ते तथोक्ताः । फुल्लानि विकसितानि अक्षीणि येषां ते तथोक्ताः । शुभाः सज्जनाः ननन्दुः । दौर्मुख्यं तद्दर्शनेन दुर्मुखत्वं दधतः

अपरे दुर्जना निनिन्दुः । स्वभावतन्त्रं स्वभावाधीनं तद्वयमपि सदसतोः सन्तोषनिन्दाद्वयमपि आश्चर्यं न । स्वभावतन्त्रमिति हेतुगर्भं विशेषणम् ॥ १२ ॥

मन्दोपकारिणी – सर्वज्ञमिति ॥ सपरिजनं परिजनैः परिवारजनैः सहितं सर्वज्ञं श्रीपूर्णप्रज्ञाचार्यं समीक्षमाणाः पश्यन्तः । अत एव स्मितवदनाः स्मितं मन्दहासयुक्तं वदनं मुखं येषां ते तथोक्ताः । फुल्लाक्षाः फुल्ले विकसिते अक्षिणी नेत्रे येषां ते तथोक्ताः शुभाः सज्जनाः ननन्दुः तुतुषुः 'टु नदि समृद्धौ' इति धातोः लिट् । उत किं तु अपरे असज्जनाः दौर्मुख्यं श्रीमध्वाचार्यदर्शनेन दुर्मुखत्वं दधतः कुर्वन्तः सन्तः निनिन्दुः गर्हयामासुः । 'णिदि कुत्सायां' इति धातोः लिट् । तद्वयमपि नन्दननिन्दनोभयमपि नाश्चर्यं कुतः स्वभावतन्त्रं स्वस्वरूपाधीनम् । हेतुगर्भविशेषणं एतत् ॥ १२ ॥

मा मैनं भुवनगुरुं विनिन्दतेत्थं निर्भर्त्स्याभ्यपतदिवोत्तरङ्गहस्तः ।
सङ्क्षोभी घनघनघोषघोरवेषः संरम्भी खलदमनाय सिन्धुराजः॥ १३ ॥

पदार्थदीपिकोद्बोधिका – मा मेति ॥ उन्नता ये तरङ्गा उत्तरङ्गा त एव हस्ता यस्य स तथोक्तः । संक्षोभी अत्यन्तक्षोभयुक्तः घनघनोऽतिगम्भीरो यो घोषः तेन घोरो भयङ्करो वेषो रूपं यस्य स तथोक्तः । संरम्भी कोपवान् सिन्धुराजः समुद्रः भुवनगुरुं जगद्गुरुं एनं श्रीमध्वं, मा मा विनिन्दत इत्थं निर्भर्त्स्य खलदमनाय खलशिक्षणाय अभ्यपतत् इव श्रीमध्वं द्विषतां खलानां निग्रहाय समुद्रोऽभ्यपतत् इव आसीत् ॥ १३ ॥

मन्दोपकारिणी – मा मेति ॥ इह आगमनवेलायां उत्तरङ्गहस्तः उत् उन्नतः तरङ्ग एव हस्तो यस्य स तथोक्तः । सङ्क्षोभी सं अत्यन्तं क्षोभः चलनं अस्यास्तीति सङ्क्षोभी घनघनघोषघोरवेषः घनघनेन अतिसान्द्रेण अत्युच्चेनेति यावत् घोषेण ध्वनिना घोरः भयङ्करः वेषः आकारो यस्य स तथोक्तः । संरम्भी संरम्भः वेगः कोपो वा अस्यास्तीति संरम्भी । सिन्धुराजः सिन्धूनां राजा समुद्रः 'सिन्धुः समुद्रे नद्यां च' इति विश्वः । भुवनगुरुं भुवनानां लोकानां गुरुं एनं श्रीमध्वाचार्यं मा मा विनिन्दत न विनिन्दत इत्थं निर्भर्त्स्य धिक्कृत्य खलदमनाय खलानां क्षुद्रजनानां दमनाय शिक्षणाय वधाय इति यावत् । अभ्यपतदिव अभ्यगात् इव इति लुप्तोपमा 'पत्लृ पतन' इत्यतो लङ् परस्मैपदम् । यथा राजा सर्वेषां गुरोः निन्दकान् दृष्ट्वा महाकोपेन शब्दं कुर्वन् घोररूपः सन् हस्तपादादिकं कम्पयन् अयं

गुरुः न निन्दनीयः इति धिक्कृत्य तद्धननाय हस्तं उद्यम्य अभिमुखे आयाति तद्वत् अयं समुद्रोऽपि तादृशव्यापारवान् अभ्यपतत् इवेति कविः उत्प्रेक्षते इति भावः ॥ १३ ॥

सम्मोदात् तरलतरो द्रुताभिगामी गम्भीरस्वननुतिमान् सुफेनहासः ।
वीच्यङ्गैरधिकतरैरिहाधिवेलं मध्वाय प्रणतिमिव व्यधात् समुद्रः ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – सम्मोदादिति ॥ सम्मोदात् सन्तोषात् इव तरलतरो अतिचञ्चलः । द्रुतं अभिगन्तुं शीलमस्येति तथोक्तः, तरङ्गरूपेण द्रुतं अभ्यागच्छन् इत्यर्थः। गम्भीरस्वन एव नुतिः स्तोत्रं साऽस्यास्तीति तथोक्तः । सुफेन एव धवलतया शोभनफेन एव हासो यस्य तथोक्तः समुद्रः अधिकं ततैः विस्तीर्णैः वीच्यङ्गैः वीचिरूपावयवैः वेलायां अधि अधिवेलं विभक्त्यर्थेऽव्ययीभावः वेलायामित्यर्थः मध्वाय प्रणतिं नमस्कारं व्यधात् इव आसीत् ॥ १४ ॥

मन्दोपकारिणी – कविः सिन्धुं प्रकारान्तरेण उत्प्रेक्षते ॥ **सम्मोदादिति** ॥ इह आगमनवेलायां समुद्रः अधिकतरैः अत्युच्चैः वीच्यङ्गैः वीचयः तरङ्गा एव अङ्गानि हस्तपादाद्यवयवाः तैः 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु' इत्यमरः । अधिवेलं वेलां अधि समुद्रतीरे इत्यर्थः 'वेलाऽब्धितीराभिवृद्धयोः कालमर्यादयोरपि' इति भास्करः । मध्वाय प्रणतिं नमस्कारं व्यधादिव अकरोदिव । कथंभूतः सम्मोदात् सन्तोषात् तरलतरः अतिचञ्चलः 'चञ्चलं तरलं चैव' इत्यमरः । द्रुताभिगामी तरङ्गरूपेण द्रुतं शीघ्रेण अभिगामी आभिमुख्येन आगच्छन् गम्भीरस्वननुतिमान् गम्भीरश्चासौ स्वनः ध्वनिश्च स एव नुतिः स्तुतिः अस्यास्तीति तथोक्तः गम्भीरशब्दाख्यस्तोत्रयुक्तः इत्यर्थः सुफेनहासः सु धवलतया शोभमानः फेन एव हासः मन्दहासो यस्य स तथोक्तः । फेनो नाम जलोपरि दृश्यमानः धवलवर्णः जलविकारः । यथा कश्चित् पुरुषः चिरादागतं स्वगुरं दृष्ट्वा सन्तोषात् हस्तपादादिकंपनवान् शीघ्रेणाभिगम्य उच्चध्वनिना स्तुतिं कुर्वन् स्मितवदनः सन् अष्टाङ्गैः यथा प्रणमेत् तद्वत् इति भावः ॥ १४ ॥

गोलीलास्वतिशयिनावगाधभावान्नोल्लङ्घ्यौ विविधगुणप्रकाशरत्नौ ।
मध्वाब्धी परममतेः प्रियं जनानां लावण्यं न तु जलधेरयं विशेषः॥ १५ ॥

भावप्रकाशिका – विविधगुणज्ञानाख्यरत्नः विविधवर्णतेजस्करत्नश्च लावण्यं सौन्दर्यं लवणभावश्च ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – गोलीलास्विति ॥ मध्वाब्धी, गवां लीला विलासा गोलीलाः तासु अतिशयोऽनयोः अस्ति इति अतिशयिनौ विविधवाग्विलासेष्वतिशयवान् मध्वः, जलविलासेषु अतिशयवान् समुद्रः, अगाधस्य भावो अगाधभावः तस्मात् गम्भीरत्वादित्यर्थः नोल्लङ्घ्यौ । विविधगुणप्रकाशरत्नौ, मध्वस्तु विविधा गुणा भक्तिवैराग्यादयो यस्य तादृशः प्रकाशो ज्ञानं स एव रत्नं यस्य स तथोक्तः । समुद्रोऽपि विविधा गुणा रक्तनैल्यादयो नानावर्णा प्रकाशश्च येषां तादृशानि रत्नानि यस्मिन् स तथोक्तः । एवं साम्येऽपि परममतेः श्रीपूर्णप्रज्ञस्य लावण्यं सौन्दर्यं जनानां पश्यतां जनानां प्रियम् । जलधेः लावण्यं लवणत्वं जनानां प्रियं न भवब्ध्यो एव मध्वातिरयं विशेषः । अत्र व्यतिरेकालङ्कारः ॥ १५ ॥

मन्दोपकारिणी – गोलीलेति ॥ मध्वाब्धी मध्वश्च अब्धिश्च इत्युभौ । अगाधभावात् अगाधः गम्भीरश्चासौ भावः स्वभावश्च तस्मात् । गोलीलासु गवां वाचां जलानां च लीलासु 'भूवाग्वारिषु गौर्मता' इति विश्वः । अतिशयिनौ इतरवैलक्षण्येन वर्तमानौ । गाम्भीर्यादेव नोल्लङ्घ्यौ इतरैः अत्येतुं अशक्यौ विविधगुणप्रकाशरत्नौ विविधाः गुणाः भक्तिवैराग्यादयः यस्य स तथोक्तः स चासौ प्रकाशः ज्ञानं च स एव रत्नं यस्य स तथोक्त इति मध्वपक्षे। समुद्रपक्षे तु विविधाश्च ते गुणाश्च रक्तनीलादयः तैः प्रकाशमानानि रत्नानि यस्मिन् स इति रक्तनीलादिनानावर्णयुक्तरत्नवान् इत्यर्थः । विविधगुणप्रकाशरत्नश्च इति एकशेषः । यद्यपि उभौ एवं समानौ तथापि परममतेः परमा अत्युत्तमा मतिः बुद्धिः यस्य तस्य श्रीमध्वाचार्यस्य लावण्यं सौन्दर्यं जनानां प्रियं इष्टम् । जलधेः समुद्रस्य लावण्यं लवणत्वं तु जनानां प्रियं न तु नैव भवति । एवं मध्वसमुद्रयोः अयं विशेषः वैलक्षण्यं अस्तीति शेषः ॥ १५ ॥

अम्भोधेस्त्वरिततरोर्मिपाणिमृष्टे स्वच्छेऽसौ विकटतटासने निषण्णः ।
व्याचख्यावतिचिरमैतरेयशाखासूक्तानि प्रभुरतिसुन्दरप्रकारम्॥ १६ ॥

पदार्थदीपिकोद्बोधिका – अम्भोधेरिति ॥ प्रभुः असौ श्रीमध्वः अम्भोधेः अत्यन्तं त्वरिता त्वरिततरा ऊर्मयः तरङ्गाः ता एव पाणयः तैः मृष्टं तस्मिन् । स्वच्छे निर्मले । विकटं श्रेष्ठं विशालं वा यत्तटं तीरं तदेव आसनं पीठं तस्मिन् 'विशङ्कटं विशालं स्यात्करालं विकटं

तथा' इति हलः । निषण्णः सन् ऐतरेयशाखायाः सूक्तानि अतिसुन्दरः अतिरमणीयः प्रकारो यथा भवति तथा अत्यन्तं चिरं यथा भवति तथा अतिचिरं व्याचख्यौ ॥ १६ ॥

मन्दोपकारिणी – अम्भोधेरिति ॥ प्रभुः समर्थः असौ श्रीमध्वाचार्यः अम्भोधेः समुद्रस्य त्वरिततरोर्मिपाणिमृष्टे अत्यन्तं त्वरिताः त्वरिततराः अतिवेगाः इत्यर्थः । तादृशाश्च ताः ऊर्मयः तरङ्गाश्च ता एव पाणयः हस्ताः तैः मृष्टे मार्जिते स्वच्छे निर्मले विकटतटासने विकटं सुन्दरं च तत् तटं तीरं च तदेव आसनं तस्मिन् निषण्णः उपविष्टस्सन् ऐतरेयशाखासूक्तानि ऐतरेयशाखायाः ऋक्शाखायाः सूक्तानि अतिसुन्दर-प्रकारं यथा भवति तथा अतिचिरं बहुकालं व्याचख्यौ व्याख्यातवान् । 'ख्या प्रकथने' इति धातोः लिट् परस्मैपदं व्याचख्यौ व्याचख्यतुः व्याचख्युः ॥ १६ ॥

गाम्भीर्यात् स्वनमधरीकरोति सिन्धोः श्राव्यत्वं वहति तथाऽप्यहो स्वनोऽस्य ।
पूर्णेन्दुप्रभवदनः क एष धन्यो मत्वेत्थं जनजलधिस्तमाशु पर्यैत् ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – गाम्भीर्यादिति ॥ अस्य श्रीमध्वस्य स्वनः, गाम्भीर्यात् सिन्धोः समुद्रस्य स्वनं ध्वनिं अधरीकरोति तिरस्करोति तथापि समुद्रस्वनात् अतिगम्भीरोऽपि श्राव्यं श्रोतव्यत्वं वहति अहो आश्चर्यम् । पूर्णेन्दोः प्रभेव प्रभा यस्य तत्पूर्णेन्दुप्रभं तादृशं वदनं यस्य स तथोक्तः । एष धन्यः कः ? इत्थं मत्वा जनजलधिः जनसमुद्रः तं श्रीमध्वं आशु पर्यैत् आवृणोत् ॥ १७ ॥

मन्दोपकारिणी – गाम्भीर्यादिति ॥ अस्य श्रीमध्वाचार्यस्य स्वनः व्याख्यानध्वनिः गाम्भीर्यात् सिन्धोः समुद्रस्य स्वनं ध्वनिं अधरीकरोति अधःकरोति । समुद्रध्वन्यपेक्षया व्याख्यानध्वनेः अत्युच्चत्वात् इति भावः । तथापि समुद्रस्वनात् अतिगम्भीरत्वेऽपि अस्य मध्वस्य स्वनः नादः श्राव्यत्वं श्रोतव्यत्वं वहति धत्ते अहो आश्चर्यम् । अत्युच्चोऽपि व्याख्यानस्वनः श्राव्यो भवति । पूर्णेन्दुप्रभवदनः पूर्णः षोडशकलापरिपूर्णश्चासौ इन्दुः चन्द्रश्च तस्य प्रभं सदृशं वदनं यस्य स तथोक्तः । धन्यः एष पुरुषः कः कोऽनु इत्थं मत्वा जनजलधिः जनाख्यसमुद्रः तं श्रीमध्वाचार्यं आशु शीघ्रं पर्यैत् आवृणोत् ॥ १७ ॥

वेदानां समुचितभाववाददक्षं ये वेदद्विषमिममूचिरे महेर्ष्याः ।
धिग्धिक् तानिति जनता जगाद गाढं स्वाश्चर्यात्किल कलिताञ्जलिर्नमन्ती ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – वेदानामिति ॥ महती ईर्ष्या असूया येषां ते महेर्ष्याः ये दुर्जना वेदानां ऐतरेयशाखागतवेदवाक्यानां समुचितो अत्युपपन्नो यो भावो अभिप्रायः तस्य वादे वर्णने दक्षं समर्थं इमं श्रीमध्वं वेदद्विषं वेददूषकं ऊचिरे तान् दुष्टान् धिक् धिक् । अत्र तात्पर्ये द्विरुक्तिः । जनता मिलितजनसमूहः तत्र स्वाश्चर्यात् अत्याश्चर्यात् कलितो रचितोऽञ्जलिः यया तादृशी सती बद्धाञ्जलिः इत्यर्थः । नमन्ती नमस्कारं कुर्वन्ती सती जगाद किल ॥ १८ ॥

मन्दोपकारिणी – वेदानामिति ॥ महेर्ष्याः महती भूयसी इर्ष्या असूया येषां ते महेर्ष्याः ये जनाः वेदानां समुचितभाववाददक्षं समुचितः अत्युपपन्नः भावः अभिप्रायः तस्य वादे कथने दक्षं समर्थं मध्वाचार्यं, वेदद्विषं वेदान् द्वेष्टीति वेदद्विट् तं वेददूषकं ऊचिरे जगदुः तान् दुष्टजनान् धिक् धिक् इति जनता तत्र मिलितजनसमूहः गाढं दृढं जगाद किल । कथंभूता जनता, स्वाश्चर्यात् अत्याश्चर्यात् कलिताञ्जलिः कलितः बद्धः अञ्जलिः करसम्पुटः यया सा तथोक्ता नमन्ती ॥ १८ ॥

सन्मानं विपुलह्रदे विधाय भक्त्या बिभ्राणाश्चरणरजोऽस्य देवसेव्यम् ।
तत्स्नानादधिकशुचौ नदाधिराजे सस्नुस्ते द्विजनिकराः प्रशस्तकाले ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – सन्मानमिति ॥ ते द्विजनिकरा विपुलह्रदे श्रीपूर्णप्रज्ञाय भक्त्या सन्नाम सम्यग् नमस्कारं विधाय अस्य श्रीमध्वस्य देवसेव्यं देवनिषेव्यं चरणरजो बिभ्राणाः सन्तः तत्स्नानात् श्रीमध्वस्नानात् अधिकशुचौ अतिपवित्रे नदाधिराजे समुद्रे प्रशस्तकाले सस्नुः स्नानं चक्रुः ॥ १९ ॥

मन्दोपकारिणी – सन्मानमिति ॥ ते द्विजनिकराः विप्राणां समूहाः विपुलह्रदे पूर्णप्रज्ञाचार्यस्य भक्त्या सन्मानं बहुमानं विधाय कृत्वा, देवसेव्यं अस्य मध्वाचार्यस्य चरणरजः पादयोः धूलिं बिभ्राणाः धृतवन्तः सन्तः तत्स्नानात् तस्य मध्वाचार्यस्य स्नानात् अधिकशुचौ अतिशयपवित्रे नदाधिराजे नदानां पुरुषजलाशयानां अधिराजे स्वामिनि समुद्रे प्रशस्तकाले विहिते काले उपरागकाले इत्यर्थः । सस्नुः स्नातवन्तः । 'ष्णा शौचे' इत्यतो लिट् परस्मैपदम् ॥ १९ ॥

कल्लोलैः करिनिकरैरिवानिवार्यैरुल्लोलैर्जननिकरान्निपातयद्भिः ।
आक्रान्ताः प्रबलतरैश्च लोठ्यमाना हास्यत्वं प्रययुरुदन्वतीह नैके ॥ २० ॥

पदार्थदीपिकोद्बोधिका – कल्लोलैरिति ॥ इह उदन्वति अत्र समुद्रे स्नानं कुर्वन्तः, एके न भवन्ति इति नैके बहवः न समासोऽयं 'नैकधे'त्यादिवत्, जना उल्लोलैः अतिचञ्चलैः अनिवार्यैः जननिकरान् निपातयद्भिः प्रबलतरैः तरङ्गैः करिनिकरैः इव गजसमूहैः इव आक्रान्ता अत एव पतिताः सन्तः लोठ्यमानाः सन्तः क्लिश्यमानाः सन्तः हास्यत्वं प्रययुः । उल्लोलशब्दो महातरङ्गवाचको वा 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु । महत्सूल्लोलकल्लोला'वित्यमरः । उल्लोलैः अङ्गभूतैः कल्लोलैः महातरङ्गैः अपि आक्रान्ता इति योजना ॥ २० ॥

मन्दोपकारिणी – कल्लोलैरिति ॥ इह अस्मिन् उदन्वति सिन्धौ 'उदन्वानुदधिः सिंधुः' इत्यमरः । नैके अनेके बहवः हास्यत्वं हासविषयत्वं प्रययुः प्रापुः । कथंभूताः उल्लोलैः अत्यन्तचञ्चलैः अनिवार्यैः अपरिहार्यैः जननिकरान् मनुष्यसमूहान् निपातयद्भिः प्रबलतरैः अतिप्रबलैः कल्लोलैः स्थूलतरङ्गैः 'महत्सूल्लोलकल्लोलौ' इत्यमरः । आक्रान्ताः मज्जिताः लोठ्यमानाः । कैरिव करिनिकरैः गजश्रेष्ठैरिव । यथा लोके मत्तगजेन आक्रान्तः पुरुषः भूमौ लोठ्यमानो भवति तथा महत्तरङ्गैः आक्रान्ता पुरुषाः भूमौ पतिताः सन्तः लोठ्यमाना बभूवुः इति भावः ॥ २० ॥

मज्जन्तं पृथुलहरीनिगूढमूर्तिं सम्पूर्णप्रमतिमसज्जनो जहास ।
यो लोकत्रयविजयी गुरुः प्रसिद्धः सोऽयं हा पतति लघूर्मिलीलयेति॥ २१ ॥

पदार्थदीपिकोद्बोधिका – मज्जन्तमिति ॥ असज्जनो मज्जन्तं स्नानं कुर्वन्तं पृथवो महान्त्यो या लहर्यः तरङ्गाः ताभिः निगूढा मूर्तिः शरीरं यस्य स तथा तं 'ऊर्मिरुत्कलिकोल्लासः कल्लोलो लहरी तथा' इति हलः । सम्पूर्णप्रमतिं श्रीमध्वं, यो मध्वो लोकत्रयविजयी गुरुः प्रसिद्धः सोऽयं श्रीमध्वो लघूर्मिलीलया पतति हा इति जहास ॥२१॥

मन्दोपकारिणी – मज्जन्तमिति ॥ असज्जनः दुर्जनः मज्जन्तं स्नातुं निमज्जन्तं पृथुलहरीनिगूढमूर्तिं पृथ्व्यः स्थूलाश्च ताः लहर्यः तरङ्गाश्च ताभिः निगूढा मूर्तिः शरीरं यस्य

स तथोक्तः तम् । सम्पूर्णप्रमतिं श्रीमध्वाचार्यं जहास उपहसितवान् । कथं, यः गुरुः मध्वः लोकत्रयविजयी लोकत्रयं विजयते इति लोकत्रयविजयी इति प्रसिद्धः सोऽयं गुरुः लघूर्मिलीलया लघ्व्यश्च ताः ऊर्मयः तरङ्गाश्च तासां लीलया क्रियया 'लीला विलासक्रिययोः' इति विश्वः । पतति हा कष्टं इति जहास इति सम्बन्धः । 'हस् हसने' इत्यतो लिट् परस्मैपदं जहास जहसतुः जहसुः । 'पतॢ गतौ' इत्यतो लट् परस्मैपदं पतति पततः पतन्ति ॥ २१ ॥

नीचानामवचवचांस्यजीगणन्नो दभ्राणां क्षुभितकराण्यदभ्रसङ्ख्यः ।
क्रोष्टूनां श्वकलकलप्रदं विरावं पञ्चास्यो न हि गणयेदुदारवीर्यः ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – नीचानामिति ॥ अदभ्रसङ्ख्यः श्रीपूर्णप्रज्ञाचार्यः, दभ्राणां अल्पनां क्षुभितकराणि क्षोभकराणि नीचानां दुर्जनानां वक्तुं अनुचितानि अवचानि यानि वचांसि नो अजीगणत् न गणयामास । तथा हि शुनां कलकलः कोलाहलः श्वकलकलस्तं प्रददाति इति तथोक्तः तम् । क्रोष्टूनां सृगालानां विरावो ध्वनिः तम् । उदारं उत्तमं वीर्यं यस्य स तथोक्तः पञ्चास्यः सिंहो न गणयेत् हि ॥ २२ ॥

मन्दोपकारिणी – नीचानामिति ॥ अदभ्रसङ्ख्यः अदभ्रा बहुला सङ्ख्या ज्ञानं यस्य स तथोक्तः पूर्णप्रज्ञाचार्यः । दभ्राणां अल्पानां नीचानां नीचजनानां क्षुभितकराणि क्षुभितं मनोविषादं कुर्वन्तीति तथोक्तानि तानि । अवचवचांसि दुर्वचनानि नो अजीगणत् न गणयामास । तथा हि श्वकलकलप्रदं शुनां सारमेयानां कलकलं कोलाहलशब्दं प्रददातीति तथोक्तः तम् । क्रोष्टूनां शृगालानां विरावं शब्दं उदारवीर्यः उदारं महत् वीर्यं प्रभावः यस्य स तथोक्तः । पञ्चास्यः सिंहः न गणयेद्धि । यथा शृगालशब्दं श्रुत्वा शुनकाः भीता भवन्ति न सिंहा तद्वत् अयं मध्वोऽपि अल्पपण्डितक्षोभकदुर्जनवचनेन न चुक्षोभ इति भावः । 'गण संख्याने इत्यतो णिजन्तात् लुङ् परस्मैपदम्' ॥ २२ ॥

जन्मस्थित्यवसितिदायिनं कटाक्षं लोकानामघटयदम्बुधौ बृहद्धीः ।
आक्रान्तोऽधिकगुरुणा स तेन तावन्मुञ्चन् सञ्चलनमभूत्तटाकदेश्यः ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – जन्मेति ॥ बृहद्धीः श्रीपूर्णप्रज्ञाचार्यः लोकानां जन्म-स्थित्यवसितिदायिनं उत्पत्तिस्थितिलयप्रदानशीलं कटाक्षं अम्बुधौ अघटयत् कटाक्षेणाम्बुधिं

ददर्शेति भावः । तावत् तदा अधिकगुरूणां महानुभावेन तेन कटाक्षेण आक्रान्तः सोऽम्बुधिः सञ्चलनं मुञ्चन् सन् तटाकेन सदृशः तटाकदेश्योऽभूत् ॥ २३ ॥

मन्दोपकारिणी – जन्मेति ॥ बृहद्धीः बृहती पूर्णा धीः प्रज्ञा यस्य स तथोक्तः श्रीपूर्णप्रज्ञाचार्यः । लोकानां सर्वजनानां जन्मस्थित्यवसितिदायिनं जन्म उत्पत्तिश्च स्थितिः पालनं च अवसितिः नाशश्च इति तथोक्तः ताः दातुं शीलं अस्यास्तीति तथोक्तः तं कटाक्षं अपाङ्गदृष्टिं 'अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने' इत्यमरः । अम्बुधौ समुद्रे अघटयत् संयोजितवान् । अपाङ्गेन समुद्रं ददर्श इति भावः । तावत् तदा अधिकगुरुणा महासमर्थेन तेन कटाक्षेण आक्रान्तः वशीकृतः सः समुद्रः सञ्चलनं कंपं मुञ्चन् त्यजन् सन् तटाकदेश्यः तटाकस्य जलाशयस्य क्षुद्रसरोवरस्य देश्यः सदृशः अभूत् ॥ २३ ॥

इत्याद्यैरपि चरितैरनन्यसाध्यैः न स्थेष्ठां बहुमतिमाप दुर्जनोऽस्मिन् ।
विद्वेषं व्यधित पुनर्निरस्तभाग्ये तस्मिन् दुर्मनसि तदेव शोभनं स्यात् ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ दुर्जनः इति आद्यानि येषां तानि तैः । अनन्यसाध्यैः चरितैः कर्मभिः उपलक्षितेऽपि अस्मिन् श्रीमध्वे स्थेष्ठां अतिस्थिरां बहुमतिं बहुमानं न आप । इत्याद्यनन्यसाध्यचरितेऽपि अस्मिन् श्रीमध्वे दुर्जनो न अतिबहुमानं चकारेति भावः । न केवलं एतावत् पुनः विद्वेषं व्यधित चकार । निरस्तं भाग्यं यस्य स तथा तस्मिन् । दुष्टं मनो यस्य दुर्मनाः तस्मिन् दुष्टचित्त इत्यर्थः । तस्मिन् दुर्जने तदेव शोभनं स्यात् तमोयोग्यानां श्रीमध्वे विद्वेष एव युक्त इत्यर्थः ॥ २४ ॥

मन्दोपकारिणी – इत्याद्यैरिति ॥ इत्याद्यैः इति पूर्वोक्तचरितं आद्यं येषां तानि तैः अनन्यसाध्यैः अन्यैः मध्वाचार्यातिरिक्तैः साध्यानि कर्तुं शक्यानि न भवन्तीति अनन्यसाध्यानि तैः । चरितैः कर्मभिः उपलक्षितेऽपि अस्मिन् श्रीमध्वे दुर्जनः स्थेष्ठां स्थिरां बहुमतिं बहुमानं नाप नाकरोत् । पूर्वोक्तप्रकारेण अनन्यसाध्यचरितानि दृष्ट्वापि दुष्टानां मध्ये महत्वबुद्धिः नाभूत् इति भावः । पुनः प्रत्युत विद्वेषं व्यधित अकरोत् । तद्युक्तं इत्याह निरस्तभाग्ये दैवहीने दुर्मनसि दुष्टचित्ते तस्मिन् पूर्वोक्तदुर्जने तदेव मध्वद्वेषकारणमेव शोभनं युक्तं स्यात् । वैष्णवद्वेषस्य तमोयोग्यस्वभावत्वात् इति भावः ॥ २४ ॥

सम्प्राप्तं सह सहजेन गण्डवाटं स्वोजस्सम्प्रकटन आदिशद्विशङ्कम् ।
शुश्रूषामयमुचितो विधातुमीषल्लोकानामिति वचसा परीक्षकाणाम् ॥ २५ ॥

भावप्रकाशिका – गण्डवाटस्य 'कोडिआडी'त्यपभ्रष्टभाषा ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – सम्प्राप्तमिति ॥ कर्तृपदमध्याहार्यम् । स श्रीमध्वः सहजेन भ्रात्रा सह सम्प्राप्तं गण्डवाटं तन्नामकं द्विजं 'गण्डवाटं' इत्यस्य कोडिपाडि इत्यपभ्रष्टनाम। तौलवभाषया गण्डस्य कोडीति वाटस्य पाडीति प्रसिद्धेः । अयं गण्डवाट ईषत् शुश्रूषां सेवां विधातुं कर्तुं उचित इति परीक्षकाणां श्रीमध्वसामर्थ्यपरीक्षकाणां लोकानां जनानां वचसा स्वस्य गण्डवाटस्य ओजः सामर्थ्यं तस्य सम्प्रकटनं सम्यग्प्रकाशनं तस्मिन् विगता शङ्का यथा भवति तथा विशङ्कं आदिशत् । मयि त्वद्बलं प्रकाशयेत्यवददिति भावः ॥ २५ ॥

मन्दोपकारिणी – सम्प्राप्तमिति ॥ कतृपदमध्याहार्यम् । सः मध्वः सहजेन भ्रात्रा सह सम्प्राप्तं गण्डवाटं तन्नामकं कञ्चन पुरुषं विशंकं निस्संशयं यथा भवति तथा । स्वोजः सम्प्रकटने स्वस्य ओजसः बलस्य 'ओजो बले च दीप्तौ च' इति विश्वः । सम्प्रकटने प्रदर्शनार्थं आदिशत् आज्ञापयामास केन हेतुना, ''अयं गण्डवाटः ईषत् किञ्चित् शुश्रूषां त्वत्सेवां विधातुं कर्तुं उचितः योग्यः'' इति इत्थं परीक्षकाणां श्रीमध्वाचार्यसामर्थ्य-परीक्षकाणां लोकानां जनानां वचसा वाक्येन ''स्वभ्रात्रा सहितोऽयं गण्डवाटाख्यब्राह्मणः त्वत्सेवां कर्तुं योग्य'' इति श्रीमध्वाचार्यबलपरीक्षकजनगूढाभिसन्धिवचनेन स्वसमीपं आगतं गण्डवाटं निर्भयेन यावत् स्वशक्तिप्रदर्शनाय आज्ञापयामास इति भावः ॥ २५ ॥

श्रीकान्तेश्वरसदनेऽनयत्किलैको यस्त्रिंशन्नरवरनीतकेतुयष्टिम् ।
आहत्यागुरुगदयैव नारिकेलाद्यो लेभे तरलतरात्फलानि कामम् ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – श्रीकान्तेश्वरेति ॥ यो गण्डवाटः, श्रीमच्च तत् कान्तेश्वर-सदनं च तस्मिन् । कान्तेश्वरो नाम कश्चन देवः । त्रिंशच्च ते नरवरा नरश्रेष्ठाः च तैः नीता या केतुरूपयष्टिः ध्वजस्तम्भः तां एकोऽनयत् किल । यो गण्डवाटो, अगुरुश्च सा गदा च तयैव आहत्या ताडनेन तरलतरात् अतिचञ्चलात् नालिकेरात् नालिकेरवृक्षात् फलानि कामं यथेच्छं लेभे ॥ २६ ॥

मन्दोपकारिणी – श्रीकान्तेति ॥ यः गण्डवाटः श्रीकान्तेश्वरसदने तन्नामकदेवालये त्रिंशन्नरवरनीतकेतुयष्टिं त्रिंशत्सङ्ख्याकाश्च ते नरवराः मनुष्यश्रेष्ठाश्च तैः नीता च सा केतुचष्टिः ध्वजस्तम्भश्च तां 'ग्रहभेदे ध्वजे केतुः' इत्यमरः । एक एव अनयत् किल आनीतवान् । यः गण्डवाटः अगुरुगदया अगुर्वी च सा गदा च तया अस्थूलगदयैव आहत्य ताडयित्वा अल्पगदाप्रहारेणैव इति यावत् । तरलतरात् अत्यन्तं कंपितात् नारिकेलात् नारिकेलवृक्षात् गलितानि इत्यध्याहारः फलानि कामं यथेष्टं लेभे प्राप । 'कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितं' इत्यमरः ॥ २६ ॥

एतादृग्बलविभवः स तस्य कण्ठं तज्ज्येष्ठोऽप्यभित उभौ समं गृहीत्वा ।
निष्पेष्टुं परममवापतुः प्रयत्नं सङ्घर्षात्क्रमपरिवर्धमानतैक्ष्ण्यम् ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – एतादृगिति ॥ एतादृक् बलविभवो बलैश्वर्यं यस्य स तथा स गण्डवाटः । तस्य ज्येष्ठः तज्ज्येष्ठः सोऽपि उभौ सङ्घर्षात् तयोः करैः मथनात् क्रमपरिवर्धमानं तैक्ष्ण्यं काठिन्यं यस्य स तथा तं तस्य मध्वस्य कण्ठं अभितः समं युगपत् गृहीत्वा निष्पेष्टुं परमं प्रयत्नं अवापतुः जग्मतुः ॥ २७ ॥

मन्दोपकारिणी – एतादृगिति ॥ एतादृग्बलविभवः एतादृक् पूर्वोक्तप्रकारः बलस्य शरीरबलस्य विभवः अतिशयो यस्य स तथोक्तः महाबलिष्ठः इत्यर्थः । सः गण्डवाटः तज्ज्येष्ठोऽपि तस्य गण्डवाटस्य अग्रजोऽपि इति उभौ अपि तस्य श्रीमध्वाचार्यस्य कंठं गलं अभितः समंतात् समं युगपत् गृहीत्वा स्वपाणिभ्यां निगृह्य निष्पेष्टुं मिथो निष्पीडयितुं परमं अतिशयितं प्रयत्नं उद्योगं अवापतुः प्रापतुः । कथंभूतं कण्ठं सङ्घर्षात् तयोः करैः मथनात् क्रमपरिवर्धमानतैक्ष्ण्यं क्रमेण परिवर्धमानं तैक्ष्ण्यं तीक्ष्णत्वं यस्य स तथोक्तः तं तत्करघर्षणेन वर्धमानकण्ठोऽभूत् इति भावः ॥ २७ ॥

आस्विन्नावलसतरौ गुरोर्नियोगाच्छत्राग्र्यानिलमहितौ च तावुभाभ्याम् ।
मुक्त्वाऽयःकठिनतरत्वचं शिरोधिं पर्यायात् स्फुटवचनां निपेततुः कौ ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – आस्विन्नाविति ॥ आ सम्यक् स्विन्नौ कण्ठमर्दनायासेन स्वेदं प्राप्तौ, गुरोः श्रीमध्वाचार्यस्य नियोगात् आज्ञायाः उभाभ्यां छत्राग्र्ययोः छत्रश्रेष्ठयोः

अनिलेन वायुना महितौ आश्वासितौ अलसतरौ अतिश्रान्तौ तावुभौ अयोवत् अतिकठिना त्वक् यस्याः तां पर्यायात् क्रमेण स्फुटानि स्पष्टानि वचनानि यस्याः तां शिरोधिं कण्ठं मुक्त्वा त्यक्त्वा कौ भूमौ निपेततुः ॥ २८ ॥

मन्दोपकारिणी – आस्विन्नाविति ॥ आस्विन्नौ अत्यन्तं स्वेदं प्राप्तौ अलसतरौ अत्यन्तं अलसौ मन्दव्यापारौ इत्यर्थः । गुरोः मध्वाचार्यस्य नियोगात् आज्ञायाः उभाभ्यां शिष्याभ्यां छत्राग्र्यानिलमहितौ छत्राग्र्ययोः व्यजनश्रेष्ठयोः अनिलेन वायुना महितौ सेवितावपि तौ गण्डवाटतदग्रजौ अयःकठिनतरत्वचं अयोवत् लोहवत् कठिणतरा अतिकठिना त्वक् चर्म यस्याः सा तां, पर्यायात् अनुक्रमात् स्फुटवचनां स्फुटानि स्पष्टानि वचनानि यस्याः सा तां शिरोधिं कन्धरां मुक्त्वा त्यक्त्वा कौ भूमौ 'गोत्राः कुः पृथिवी पृथ्वी' इत्यमरः निपेततुः पतितौ इत्यर्थः । 'पपात पेततुः पेतुः' ॥ २८ ॥

आश्वस्तौ शुचिहृदिमावनूनमानावुद्धर्तुं समगददङ्गुलीं धरास्थाम् ।
सङ्गृह्य प्रसभरसादतिप्रयत्नौ सामर्थ्यं ययतुरिमौ न कम्पनेऽस्याः ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – आश्वस्ताविति ॥ शुचिहृत् पूर्णप्रज्ञः आश्वस्तौ गतश्रमौ अनूनः सम्पूर्णो मानो अभिमानो ययोः तौ पुनरपि समर्थाविति पूर्णाहङ्कारावित्यर्थः इमौ गण्डवाटौ धरास्थां भूमिष्ठां अङ्गुलीं उद्धर्तुं समगदत् जगाद । प्रसभरसात् अतिबलात्कारेण गृहीत्वा प्रयतावपि अङ्गुलिं उद्धर्तुं प्रयत्नवन्तौ अपि इमौ अस्या अङ्गुल्याः कम्पने चालने सामर्थ्यं न ययतुः ॥ २९ ॥

मन्दोपकारिणी – आश्वस्ताविति ॥ शुचिहृत् शुचि शुद्धं हृत् हृदयं मनः यस्य स तथोक्तः श्रीपूर्णप्रज्ञाचार्यः । आश्वस्तौ गतश्रमौ अनूनमानौ ऊनः न्यूनो न भवतीति अनूनः पूर्ण इत्यर्थः मानः अहंकारो ययोः तौ । इमौ गण्डवाटतदग्रजौ प्रति धरास्थां धरायां भूमौ तिष्ठतीति धरास्था तां अङ्गुलीं उद्धर्तुं समगदत् उक्तवान् । 'गद व्यक्तायां वाचि' इति धातोः लङ् परस्मैपदं अगदत् अगदताम् अगदन् । इमौ भ्रातरौ प्रसभरसात् अतिबलात्कारात् अङ्गुलीं संगृह्य गृहीत्वा अतिप्रयत्नौ अपि अङ्गल्युद्धरणे अतियत्नवन्तौ अपि अस्याः अङ्गुल्याः कम्पने चालने सामर्थ्यं शक्तिं न ययतुः न प्रापतुः । पूर्णाहंकारौ तावुभावपि भूमौ स्थापिताङ्गुलिं उद्धर्तुं मध्वेन उक्तौ सन्तौ अतिबलात्कारेणापि

अङ्गुलिचालने समर्थौ न बभूवतुः किं उद्धर्तुं इति भावः । 'या प्रापणे' इत्यतो लिट् परस्मैपदं ययौ ययतुः ययुः ॥ २९ ॥

निर्यत्नं वटुमधिरुह्य मन्दहासी स प्रायादिह परितो नृसिंहगेहम् ।
एश्वर्यैरिति लघिमादिकैरुपेतो मध्वोऽभूत् त्रिभुवनचित्ररत्नराजः ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – निर्यत्नमिति ॥ स श्रीमध्वः इह तौलवमण्डले निर्गतो यत्नः प्रयत्नो यस्मात् सः निर्यत्नः तं स्वत एव प्रयत्नशून्यमित्यर्थः वटुं ब्रह्मचारिणं अधिरुह्य मन्दहासोऽस्यास्तीति मन्दहासी सन् नृसिंहगेहम् नृसिंहदेवालयं परितः प्रायात् । इति उक्तप्रकारेण लघिमा आदिर्येषां तानि तैः । अणिमा, महिमा, गरिमा, लघिमा ईशित्वं वशित्वं प्राकाम्यं परकायप्रवेशः, इति अष्टभिः ऐश्वर्यैः उपेतो श्रीमध्वः त्रयाणां भुवनानां समाहारः त्रिभुवनं तस्मिन् चित्ररत्नानि आश्चर्यश्रेष्ठानि तेषां राजा श्रेष्ठः त्रिभुवन-चित्ररत्नराजोऽभूत् ॥ ३० ॥

मन्दोपकारिणी – निर्यत्नमिति ॥ सः मध्वाचार्यः । इह जनतायां वटुं कंचन ब्रह्मचारिणं निर्यत्नं आयासरहितं यथा भवति तथा ब्रह्मचारिणः यथा श्रमो न स्यात् तथेति भावः । अधिरुह्य आरुह्य मन्दहासी ईषत् हासोऽस्यास्तीति तथोक्तः सन् नृसिंहगेहं नृसिंहस्य भगवतः गेहं आलयं परितः समंतात् प्रायात् प्रदक्षिणं कृतवान् इत्यर्थः । अनेन लघिमा सूचितः । इति पूर्वोक्तप्रकारेण लघिमादिकैः लघिमा लघुत्वं आदिर्येषां तानि तैः ऐश्वर्यैः 'अणिमा महिमा गरिमा लघिमा वशित्वं ईशित्वं प्राकाम्यं परकायप्रवेशः' इति अष्टभिः ऐश्वर्यैः उपेतः युक्तः मध्वः । त्रिभुवनचित्ररत्नराजः त्रयाणां भुवनानां समाहारः त्रिभुवनं तस्मिन् त्रिलोक्यां चित्राणि च तानि रत्नानि आश्चर्यकरवस्तूनि च तेषु राजा श्रेष्ठः अभूत् । एवं अतिमानुषो मध्वः त्रिभुवनगताश्चर्यवस्तुषु परमाश्चर्योत्तमः अभूत् इति भावः ॥ ३० ॥

पञ्चाशन्नरपनरोपनीतमात्रां यो वार्क्षीं गृहमधिरोहिणीं निनाय ।
स व्याख्यास्वरदमनाय पूर्ववाटो निर्देशाद्व्यधित गुरोर्गलप्रपेषम् ॥ ३१ ॥

भावप्रकाशिका – पूर्ववाटस्य 'मूडेम्बाडी'त्यपभ्रष्टभाषा ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – पञ्चाशदिति ॥ यः पूर्ववाटः पञ्चाशत् च ते नरपनरा राजपुरुषाः तैः उपनीतमात्रां कथञ्चित् उपनीतां वृक्षस्य विकारो वार्क्षी तां वृक्षमयीं इत्यर्थः अधिरोहिणीं निःश्रेणीं गृहं स्वगृहं निनाय स पूर्ववाटः 'मूडम्पाडित्ताय' इत्यपभ्रष्टसंज्ञा तौलवभाषायां, गुरोः श्रीमध्वस्य निर्देशात् 'त्वं शक्तश्चेत् मम कण्ठनिरोधं कुरु' इति निर्देशात्, व्याख्याया यो **स्वरः** ध्वनिः तस्य दमनाय निग्रहाय व्याख्यासमये स्वरनिग्रहं कर्तुमित्यर्थः । गलप्रपेषं कण्ठनिष्पेषं व्यधित चकार ॥ ३१ ॥

मन्दोपकारिणी – पञ्चाशदिति ॥ यः पूर्ववाटः तन्नामकद्विजः पञ्चाशन्नरपनरोपनीत-मात्रां नरपनराः राजभृत्याः पञ्चाशत्संख्याकाश्च ते नरपनराश्च तैः उपनीतमात्रां कथंचित् आनीतां वार्क्षीं वृक्षकृतां अधिरोहिणीं निःश्रेणीं 'निश्रेणिस्त्वधिरोहिणी' इत्यमरः । गृहं मन्दिरं प्रति निनाय एक एव ऊढवान् प्रापयामास सः पूर्ववाटः गुरोः श्रीमध्वाचार्यस्य निर्देशात् आज्ञायाः, व्याख्यास्वरदमनाय व्याख्यायाः प्रवचनस्य स्वरस्य ध्वनेः दमनाय निरोधाय व्याख्यानसमये स्वरनिग्रहं कर्तुं इत्यर्थः । गलप्रपेषं कण्ठनिष्पेषं व्यधित कृतवान् ॥३१॥

स्विन्नेऽस्मिन्नपि यतमान आग्रहोग्रे प्राच्यात्तत्प्रवचननिस्वनोऽतिरेजे ।
उद्धर्तुं विपुलहृदङ्गुलिं च नालं सोऽभूदित्यजनि कुतूहलं जनानाम् ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – स्विन्न इति ॥ आग्रहेण उग्रः तीव्र आग्रहोग्रः तस्मिन् । व्याख्यास्वरदमनायातीवाग्रहयुक्त इत्यर्थः । अत एव स्विन्ने अस्मिन् पूर्ववाटे यतमाने पुनः अपि प्रयत्नं कुर्वति सति तस्य श्रीमध्वस्य प्रवचनस्य व्याख्यानस्य निस्वनो निनादः प्राच्यात् पूर्वं विद्यमानादपि अतिरेजे अतितरां रेजे । स पूर्ववाटः विपुलहृदङ्गलिं श्रीपूर्णप्रज्ञा-चार्याङ्गुलिं उद्धर्तुं अलं समर्थो न अभूत् इति जनानां कुतूहलं अजनि ॥ ३२ ॥

मन्दोपकारिणी – स्विन्न इति ॥ आग्रहोग्रे आग्रहेण व्याख्यानस्वरनिरोधाग्रहेण उग्रे क्रूरे स्विन्ने स्वेदयुक्ते अस्मिन् पूर्ववाटे यतमाने सति पुनरपि व्याख्यानस्वरदमनाय प्रयत्नं कुर्वति सति तत्प्रवचननिस्वनः तस्य श्रीमध्वाचार्यस्य प्रवचनस्य व्याख्यनस्य निस्वनः निनादः प्राच्यात् अपि पूर्वकालीनस्वरादपि अतिरेजे अधिकं शुशुभे । पूर्वापेक्षया अत्युच्चः एव ध्वनिः अभूत् इति भावः । सः पूर्ववाटः विपुलहृदङ्गुलिं च विपुलहृदः श्रीमध्वाचार्यस्य अङ्गुलिमपि उद्धर्तुं अलं समर्थः नाभूत् इति एवं जनानां कुतूहलं आश्चर्यं अजनि

अजायत। 'जनी प्रादुर्भावे' इत्यतः कर्तरि लुङ् अजनि-अजनिष्ट अजनिषातां अजनिषत। परमसमर्थः पूर्ववाटः श्रीमध्वाचार्याङ्गुलिचालने यदा समर्थो न बभूव तदा जनानां अत्याश्चर्यं अभूत् इति भावः ॥ ३२ ॥

पर्यैक्षि प्रभुरितरैः शिवाग्निपूर्वैः नोपैक्षि प्रबलतरैस्तथाप्रयत्नैः।
नावैक्षि क्वचिदपि शक्त्यपूर्तिरस्मिन्नुत्प्रैक्षि स्वयमपि भीम इत्यवश्यम् ॥ ३३ ॥

भावप्रकाशिका – पूर्वशब्देन वासुदेवोग्रामोदादयः ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – पर्यैक्षीति ॥ प्रभुः श्रीमध्वः इतरैः अन्यैः शिवाग्निपूर्वैः शिवाग्निः तन्नामको द्विजः पूर्वो येषां तैः बलवद्भिः पुनः अपि बलविषये पर्यैक्षि परीक्षितो अभूत् । तथाप्रयत्नैः तादृशप्रयत्नवद्भिः प्रबलतरैः पुरुषैः नोपैक्षि नोपेक्षितः । अस्मिन् श्रीमध्वाचार्ये क्वचिदपि कस्मिंश्चिद्विषये शक्त्यपूर्तिः शक्तेरपूर्णता नावैक्षि न दृष्टा । स्वयमपि अवश्यं भीम इति उत्प्रैक्षि 'अयं सर्वथा भीमो भवितुं अर्हतीति' जनैः उत्प्रेक्षितः ॥३३॥

मन्दोपकारिणी – पर्यैक्षीति ॥ प्रभुः श्रीमध्वाचार्यः । इतरैः पूर्वोक्तेभ्यः अन्यैः प्रबलतरैः अतिबलिष्ठैः शिवाग्निपूर्वैः तन्नामकब्राह्मणपूर्वकैः जनैः पर्यैक्षि परीक्षितोऽभूत् । तथा प्रबलतरैः प्रयत्नैरपि नोपैक्षि उपेक्षितो नाभूत् । अस्मिन् श्रीमध्वाचार्ये क्वचिदपि कस्मिंश्चिदपि विषये शक्त्यपूर्तिः सामर्थ्याभावः अपूर्णत्वं इति यावत् नावैक्षि जनैः न दृष्टा। स्वयमपि स्वयमेव अवश्यं मुख्यतः भीम इति उत्प्रैक्षि जनैः उत्प्रेक्षितः । जना अयं निश्चयेन भीमसेन एव इति तर्कयामासुः इति भावः ॥ ३३ ॥

लेखिन्या मुहुरपिनह्य कृष्यमाणं नाप्येकं तनुरुहमस्य तूदपाटि।
नासाग्रे मृदुनि कृतैश्च मुष्टिघातैः नास्येन्दोरतिबलिभिः प्रसन्नतासि॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – लेखिन्यामिति ॥ अत्यन्तं बलं अतिबलं तदेषां अस्ति इति अतिबलिनः तैः पुरुषैः **लेखिन्यां** मुहुर्बहुवारं अपिनह्य संवेष्टच कृष्यमाणमपि अस्य श्रीमध्वस्य एकं, तनौ रोहतीति तत् रोमापीत्यर्थः न उदपाटि नोत्पाटितम् । मृदुनि नासाग्रे कृतैर्मुष्टिघातैः मुष्टिताडनैः आस्येन्दोः श्रीमध्वमुखचन्द्रस्य प्रसन्नता नासि न निराकृता । असु क्षेपण इति धातोः कर्मणि लुङ् ॥ ३४ ॥

मन्दोपकारिणी – लेखिन्येति ॥ अतिबलिभिः अतिसमर्थैः पुरुषैः । लेखिन्या लोमोत्पाटनसाधनायोमयायुधेन मुहुः बहुवारं अपिनह्य सन्नह्य गृहीत्वेति यावत् । कृष्यमाणं आकृष्यमाणं उत्पाठ्यमानं इत्यर्थः । अस्य श्रीमध्वाचार्यस्य एकमपि तनुरुहं रोम न तु उदपाटि नोत्पाटितं हि । 'उत् पूर्वात्' पट गतौ इत्यतः कर्मणि लुङ् अपाटि अपाटिषातां अपाटिषत । मृदुनि कोमले नासाग्रे नासायाः नासिकायाः अग्रे प्रान्तभागे कृतैः ताडितैः मुष्टिघातैः मुष्टिप्रहारैश्च आस्येन्दोः श्रीमध्वाचार्यमुखचन्द्रस्य प्रसन्नता प्रसादः नासि न निरस्ता । 'असु क्षेपणे' इति धातोः कर्मणि लुङ् आसि आसिषातां आसिषत अतिबलिभिः मुष्टिभिः नासाग्रे ताडितोऽपि मुखविकासो न गतः इत्युक्त्या ताडनप्रयुक्तवेदना नास्तीति उक्तं भवति ॥ ३४ ॥

पश्वास्यः श्वभिरिव वै विहीनसारैरम्भोधिर्नगसरितां जलैरिवाल्पैः ।
खद्योतैरिव तरणिर्विडम्बयन् नॄन् प्रत्यर्थिस्वसमनरैर्व्यवाहरत्सः ॥ ३५ ॥

भावप्रकाशिका – श्वादयः क्रमेण प्रत्यर्थ्यादिदृष्टान्ताः ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – पश्वास्य इति ॥ नॄन् नरान् विडम्बयन् स श्रीमध्वः प्रत्यर्थिनो विरोधिनः ते च स्वाः स्वभक्ताः ते च समा उदासीनाः ते च ते नराश्च तैः पश्वं विस्तृतमास्यं यस्य स पश्वास्यः सिंहः, प्रत्यर्थिभिः, विहीनो रहितः सारो बलं येषां ते विहीनसारः तैः श्वभिः इव । हि इति व्यवहारायोग्यतोच्यते । अम्भोधिः समुद्रः स्वकीयैः अल्पैः, नगात् पर्वतात् उत्पन्नाः सरितो नद्यः तासां जलैरिव । तरणिः सूर्यः समैः खद्योतैः इव व्यवाहरत् व्यवहृतवान् ॥ ३५ ॥

मन्दोपकारिणी – पश्वास्य इति ॥ नॄन् नरान् विडम्बयन् अनुकुर्वन् तत्सदृशव्यापारं कुर्वन् इत्यर्थः । सः श्रीमध्वाचार्यः प्रत्यार्थिस्वसमनरैः प्रत्यर्थिनः शत्रवः स्वे स्वकीयाः समाः उदासीनाः ते च ते नराश्च इति तथोक्ताः तैः । व्यवाहरत् । वै प्रसिद्धम् । तत्तदनुसारेण त्रिविधैरपि जनैः व्यवहारं चकार इत्यर्थः । तत्र कः कैरिव पश्वास्यः सिंहः विहीनसारैः निस्सारैः दुर्बलैः इत्यर्थः प्रत्यर्थिभूतैः श्वभिः शुनकैः इव मध्वः प्रत्यर्थिभूतैः वादिभिः समं व्यवाहरत् इत्यर्थः । तथा अम्भोधिः समुद्रः अल्पैः स्वल्पैः नदसरितां नदाश्च सरितः नद्यश्च तासां जलैः इव मध्वः स्वभक्तैः जनैः व्यवाहरत् । तरणिः सूर्यः खद्योतैः

इव रात्रौ प्रकाशककीटविशेषैरिव मध्वः उदासीननरैः व्यवाहरत् इत्यर्थः 'खद्योतो ज्योतिरिङ्गणः' इत्यमरः । 'वि अव, पूर्वकात् हृञ् हरणे' इति धातोः लङ् ॥ ३५ ॥

पारन्तीसुरसदनं विशालसंवित् सम्प्राप्तः खलु सुचिरान्निवेद्यहीनम् ।
ग्राम्याग्र्यक्षितिपतिभिर्दिनार्धमात्रात्तद्भूतीर्व्यधित सभूतबल्यनल्पाः ॥ ३६ ॥

भावप्रकाशिका – पारन्तीसुरसदनस्य केवुडदेवालय इत्यपभ्रष्टभाषा ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – पारन्तीति ॥ विशालसंवित् श्रीपूर्णप्रज्ञाचार्यः सुचिरात् बहुकालं निविद्येन नैवेद्यादिना हीनं रहितं पारन्त्याख्यं सुरसदनं देवतालयं सम्प्राप्तः, ग्रामे भवा ग्राम्याः तेषां अग्र्याः श्रेष्ठा ग्रामण्य इत्यर्थः ते च क्षितिपतिः तद्देशाधिपतिः भूपः स च तैः दिनस्यार्धमात्रं दिनार्धमात्रं तस्मात् उदयमारभ्य अस्तमयपर्यन्तमित्यर्थः भूतबलिना सहितं यथा भवति तथा सभूतबलि तथा अनल्पा अतिबहुलास्तस्य देवस्य भूतयो विभवाः ताः व्यधित कारयामास ॥ ३६ ॥

मन्दोपकारिणी – पारंतीति ॥ विशालसंवित् विशाला पूर्णा संवित् ज्ञप्तिः यस्य सः पूर्णप्रज्ञाचार्यः । सुचिरात् बहुकालं निवेद्यहीनं निवेद्येन उपहारेण हीनं नैवेद्यादिपूजाहीनं इत्यर्थः, पारन्तीसुरसदनं तन्नामकदेवालयं सम्प्राप्तस्सन् ग्राम्याग्र्यक्षितिपतिभिः ग्रामे भवाः ग्राम्याः तेषु अग्र्याः श्रेष्ठाश्च पारन्तीदेवालययोगक्षेमविचाराधिकृताः ग्रामाधिपतयः इत्यर्थः क्षितिपतिः तद्देशराजा च एतैः सह दिनार्धमात्रात् अर्धदिवसेनैव सभूतबलि भूतबलिना सहितं यथा भवति तथा । अनल्पाः बहुलाः तद्भूतीः तस्य पारन्तीदेवालयस्य भूतीः विभवान् महोत्सवान् इति यावत् । व्यधित कारयामास खलु निश्चयः । बहुकालं पूजादिमहोत्सवरहितं पारन्तीदेवालयं दृष्ट्वा तत्रत्यग्रामाधिपतीन् तद्देशनृपं च प्रेरयित्वा तैः तद्देवालयस्थहरेः देवालये क्रियमाणपूजादिबहुमहोत्सवान् कारयामासेति भावः ॥ ३६ ॥

भीमत्वे सह सहजैः प्रतिष्ठितः प्राक् पञ्चात्मा मुररिपुरञ्चितो यदत्र ।
पाञ्चाल्या बलिसलिलं समं ददत्या सोऽस्मार्षीत्तदिममथ प्रपूज्यपूज्यः ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – भीमत्व इति ॥ प्राक् स्वस्य पूर्वं भीमत्वे सति सह जाताः सहजा भ्रातर इत्यर्थः । तैः युधिष्ठिरादिभिः सह अत्र पारन्तीदेवालये प्रतिष्ठितः पञ्च

आत्मानः स्वरूपाणि यस्य स पञ्चात्मा मुररिपुः बलेः पूजायाः सलिलं बलिसलिलं श्रीबलिपूजाङ्गभूतमुदकमित्यर्थः ददत्या समानीय प्रदिशन्त्या पाञ्चाल्या द्रौपद्या समं सह यद्यस्मात्पूजितः तस्मात् प्रपूज्यैः प्रकर्षेण पूज्यैः रुद्रादिभिः पूज्यः श्रीमध्वः अथ एतद्देवालयदर्शनानन्तरं तं इमं तत्र आत्मना प्रतिष्ठितं मुररिपुं अस्मार्षीत् ॥ ३७ ॥

मन्दोपकारिणी – भीमत्व इति ॥ प्राक् पूर्वजन्मनि भीमत्वे स्वस्य भीमभावे सति सहजैः सोदर्यैः धर्मादिभिः सह अत्र पारन्तीदेवालये पञ्चात्मा पञ्चरूपः मुररिपुः हरिः प्रतिष्ठितः । धर्मादिभिः पञ्चभिः एकैकेन एकैकं इति पञ्चप्रतिमाः प्रतिष्ठिताः इति भावः । बलिसलिलं बलेः भूतबलिदानस्य सलिलं अङ्गभूतं उदकं ददत्या प्रदिशंत्या पाञ्चाल्या द्रौपद्या समं सार्धं अञ्चितः पूजितश्च यत् यस्मात् तत् तस्मात् प्रपूज्यपूज्यः प्रपूज्यैः प्रकर्षेण पूज्यैः रुद्रादिभिः पूज्यः सः श्रीमध्वाचार्यः अथ पारन्तीदर्शनानन्तरं इमं आत्मना प्रतिष्ठितं अर्चितं च देवं अस्मार्षीत् स्मृतवान् 'स्मृ स्मरणे' इति धातोः लुङ् परस्मैपदं अस्मार्षीत् अस्मार्ष्टां अस्मार्षुः ॥ ३७ ॥

आयास्यन् किल सरिदन्तराख्यदेशं ग्रीष्मे निर्जलमिह शुश्रुवांस्तटाकम् ।
तत्काले परमभिवर्षयन् घनौघं तत्पूर्त्यै व्यधित कुतूहलं नराणाम् ॥ ३८ ॥

भावप्रकाशिका – सरिदन्तरस्य **'इडेतुदे'** इत्यपभ्रष्टभाषा ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – आयास्यन्निति ॥ ग्रीष्मे सरिदन्तरमित्याख्या यस्य स च असौ देशश्च तं 'इडेतुदे' इत्यपभ्रष्टसंज्ञा, आयास्यन् आगमिष्यन् इह अस्मिन् ग्रामे तटाकं, निर्गतं जलं यस्मात् स निर्जलः तं शुश्रुवान् श्रुतवान् । स चासौ कालश्च तत्कालः तस्मिन् ग्रीष्मकाल इत्यर्थः परं केवलं तत्पूर्त्यै तद्ग्रामतटाकपूर्त्यर्थमेव घनौघं मेघसमूहं अभिवर्षयन् श्रीमध्वो जनानां कुतूहलं कौतुकं व्यधित चकार किल ॥ ३८ ॥

मन्दोपकारिणी – आयास्यन्निति ॥ ग्रीष्मे ग्रीष्मर्तौ सरिदन्तराख्यदेशं आयास्यन् आगमिष्यन् इह अस्मिन् पारन्तीदेवालयग्रामे तटाकं पद्माकरं निर्जलं जलरहितं शुश्रुवान् सन् तत्काले तस्मिन् एव काले ग्रीष्मकाले एव इत्यर्थः परं केवलं तत्पूर्त्यै तद्ग्रामस्थतटाकस्य पूर्त्यर्थमेव घनौघं घनानां मेघानां ओघं समूहं अभिवर्षयन् वृष्टियुक्तं कुर्वन् श्रीमध्वाचार्यः नराणां कुतूहलं आश्चर्यं व्यधित कृतवान् । किल इत्याश्चर्ये । तद्ग्राममात्रे अकालवृष्ट्या सर्वेषां परमाश्चर्यं अभूत् इति भावः ॥ ३८ ॥

दुर्मन्त्रैः खलपटलैः प्रचोद्यमानो ग्रामेशो वृषलपतिः प्रहर्तुमेनम् ।
सम्प्राप्तस्तत उत यान्तमीक्षमाणः प्रोद्यन्तं रविमिव विस्मितो ननाम ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – दुर्मन्त्रैरिति ॥ खलपटलानि दुष्टसमूहास्तैः 'पटलं पेटलं चक्रं' इति हलः कर्तृभिः, दुर्मन्त्रैः कुत्सितालोचनैः करणैः, एनं श्रीमध्वाचार्यं प्रहर्तुं हन्तुं प्रचोद्यमानः प्रेर्यमाणो ग्रामेशः सरिदन्तरग्रामाधिपो वृषलपतिः सम्प्राप्तः सन् तत उत तस्मात् ग्रामात् यान्तं गच्छन्तं तं प्रोद्यन्तं रविमिव ईक्षमाणः पश्यन् विस्मितः सन् ननाम ॥ ३९ ॥

मन्दोपकारिणी – दुर्मन्त्रैरिति ॥ खलपटलैः दुर्जनसमूहैः 'पटलं तु छदिर्व्रजः' इति विश्वः । दुर्मन्त्रैः दुष्टविचारैः करणैः । एनं श्रीमध्वाचार्यं प्रहर्तुं संहर्तुं प्रचोद्यमानः प्रेर्यमाणः ग्रामेशः सरिदन्तरग्रामाधिपतिः वृषलपतिः वृषलानां शूद्राणां पतिः स्वामी 'शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः' इत्यमरः । सम्प्राप्तः सन् तत उत तस्मात् ग्रामादपि यान्तं गच्छन्तं मध्वाचार्यं प्रोद्यन्तं उदयं प्राप्नुवन्तं रविमिव सूर्यमिव ईक्षमाणः पश्यन् विस्मितः आश्चर्ययुक्तः सन् ननाम नमस्कृतवान् । 'णमु प्रह्वत्वे शब्दे' च इति धातोः लिट् परस्मैपदं ननाम नेमतुः नेमुः ॥ ३९ ॥

क्षेत्राग्र्यं त्रिभुवनवैद्यनाथनाथं प्रस्थाय प्रचुरतरान्तरः प्रभावी ।
श्रीकृष्णामृतपरमार्णवाभिधानां चक्रे सद्वचनततिं स्वभक्तभूत्यै ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – क्षेत्राग्र्यमिति ॥ प्रभावः अस्यास्तीति प्रभावी सामर्थ्यवान् इत्यर्थः । प्रचुरतरं आन्तरं ज्ञानं यस्य स श्रीमध्वः, त्रयाणां भुवनानां समाहारः त्रिभुवनं तस्मिन् ये वैद्याः तेषां नाथो धन्वन्तरिः स नाथः स्वामी यस्य तत्तथोक्तं क्षेत्राग्र्यं ग्रामश्रेष्ठं 'कोक्कड' इत्यपभ्रष्टसंज्ञकं प्रस्थाय प्राप्य स्वभक्तभूत्यै स्वभक्तस्य अपभ्रष्टभाषया 'इडेप्पा-डित्ताय' इति तद्ग्रामस्थस्य भूत्यै श्रेयसे तस्य ज्ञानोपदेशाय इत्यर्थः 'श्रीकृष्णामृत'मिति परमार्णवाभिधानं महार्णवाभिधानं यस्य ग्रन्थस्य स तथा तम् । सद्वचनानां निर्दुष्टश्लोकरूपवचनानां वाक्यानां ततिः समूहो यस्मिन् स तथा तं अप्रामाण्यदोषरहितानां प्रमाणीकृतपुराणादिगतानां वचनसमूहात्मकं ग्रन्थसमूहं इत्यर्थः चक्रे ॥ ४० ॥

मन्दोपकारिणी – क्षेत्राग्र्यमिति ॥ प्रभावी प्रभावः सामर्थ्यं अस्यास्तीति प्रभावी 'बलं प्रभावश्च' इत्यमरः । प्रचुरतरान्तरः प्रचुरतरं अत्यन्तपूर्णं अन्तरं मनः यस्य सः

तथोक्तः श्रीमध्वाचार्यः त्रिभुवनवैद्यनाथनाथ त्रिभुवने त्रिलोक्यां वैद्यानां भिषजां नाथः स्वामी भगवान् धन्वन्तरिः स एव नाथः स्वामी यस्य तत् तथोक्तम् । भिषग्वैद्यौ चिकित्सकौ इत्यमरः । क्षेत्राग्र्यं क्षेत्रेषु सिद्धस्थानेषु अग्र्यं श्रेष्ठं ग्रामं प्रस्थाय गत्वा स्वभक्तभूत्यै तद्ग्रामस्थस्य स्वभक्तस्य कस्यचित् ब्राह्मणस्य भूत्यै ऐश्वर्याय तस्य ज्ञानोपदेशाय इत्यर्थः 'विभूतिर्भूतिरैश्वर्यं' इत्यमरः । श्रीकृष्णामृतपरमार्णवाभिधानां कृष्णामृतमहार्णव इति अभिधानं आख्या यस्याः सा तथोक्ता ताम् । सद्वचनततिं सतां निर्दोषत्वेन प्रमाणभूतपुराणादिगतानां वचनानां ततिं समूहं पुराणादिगतवचनसङ्ग्रहरूपं कृष्णामृतमहार्णवाख्यं ग्रन्थं चक्रे इत्यर्थः ॥ ४० ॥

स ग्रामं परमपि यात उच्चभूतिं विद्वांसः क्व कुहरकूपदर्दुराभाः ।
इत्यूचे मदमतिमानिनोऽखिलज्ञम्मन्यस्य क्षपयितुमेव तज्जनस्य ॥ ४१ ॥

भावप्रकाशिका – उच्चस्य **'उजेर्य'** इत्यपभ्रष्टभाषा ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ उच्चा उत्कृष्टा भूतिः ऐश्वर्यं यस्मिन् स उच्चभूतिः तं तौलवभाषया 'उजेर्य' इति नामकं, परं अन्यं ग्रामं अभियातो गतः स मध्वः अत्यन्तं मानः पाण्डित्याभिमानोऽतिमानः सोऽस्यास्तीति तथोक्तः तस्य अत एव आत्मानं अखिलज्ञं सर्वज्ञं मन्यस्तस्य तस्य ग्रामस्य जनः तज्जनः तस्य मदं विद्यामदं क्षपयितुं नाशयितुं कुहरोऽतिगम्भीरो यः कूपः तस्य दर्दुरा मण्डूकाः तेषां आभा इव आभा येषां ते तथोक्ता विद्वांसः क्व कुत्र वर्तन्ते? किमिति मन्निकटं न आयान्ति इति ॥ ४१ ॥

मन्दोपकारिणी – स इति ॥ सः मध्वाचार्यः उच्चभूतिं तन्नामकं परं अन्यं ग्राममपि यातः गतः सन् । अतिमानिनः अत्यन्ताभिमानिनः अत एव अखिलज्ञम्मन्यस्य आत्मानं सर्वज्ञं मन्यमानस्य तज्जनस्य तद्ग्रामस्थजनस्य मदं गर्वं क्षपयितुमेव खण्डयितुमेव इत्यूचे । कथं कुहरकूपदर्दुराभाः कुहरः अतिगह्वरः कूपः उदपानं 'पुंस्येवांधुः प्रहिः कूप उदपानं' इत्यमरः । तत्र गतानां दर्दुराणां मण्डूकानां आभाः सदृशाः अप्रसिद्धकूपगतमण्डूकवत् जल्पन्तः इत्यर्थः । विद्वांसः विपश्चितः क्व कुत्र वर्तन्ते किमिति मन्निकटं न आयास्यन्तीति भावः, इत्यूचे इति सम्बन्धः ॥ ४१ ॥

सर्वज्ञोऽप्ययमधिकं न यज्ञभङ्गीं संवित्ते यतिरिति बद्धनिश्चयोऽसौ ।
आभान्तं परिषदि मत्सरादपृच्छत्कर्मार्थश्रुतिगहनार्थखण्डभावम् ॥ ४२ ॥

भावप्रकाशिका – छन्दसां वै षष्ठेनाह्नाप्तानां रसोत्यनेदत् । स प्रजापतिरबिभेत् परङ् यं छन्दसां रसो लोकानभ्येष्यतीति तं पुरस्ताच्छन्दोभिः पर्यगृह्णात् । नाराशंस्या गायत्र्या रैभ्या तृष्टुभेत्यादीति ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – सर्वज्ञ इति ॥ अयं श्रीमध्वः सर्वज्ञोऽपि यतिः सन्यासी हेतुगर्भविशेषणं यतित्वादित्यर्थः अत एव यज्ञ अनधिकारित्वात् यज्ञभङ्गीं यज्ञप्रकारं न संवित्ते न जानाति इति बद्धो निश्चयो येन स तथोक्तः असौ जनः, परिषदि सभायां आभान्तं शोभमानं श्रीमध्वाचार्यं, कर्म अर्थः प्रतिपाद्यं यस्याः सा कर्मार्था सा च सा श्रुतिश्च तस्या यो गहनो दुर्विज्ञेयोऽर्थो यस्य स च असौ खण्डश्च तस्य भावः अभिप्रायः तं कर्मार्थश्रुतिगहनार्थखण्डभावम् । श्रुतिश्च 'छन्दसां वै षष्ठेनाह्नाप्तानां रसोत्यनेदत् स प्रजापतिरबिभेत् परङ्यं छन्दसां रसो लोकानभ्येष्यतीति तं पुरस्ताच्छन्दोभिः पर्यगृह्णात् । नाराशंस्या गायत्र्या रयिभ्या तृष्टुभे'त्यादीति मत्सरात् अपृच्छत् 'दुह्याच्' इत्यादिना द्विकर्मकत्वम् ॥ ४२ ॥

मन्दोपकारिणी – सर्वज्ञ इति ॥ अयं श्रीमध्वाचार्यः सर्वज्ञोऽपि यतिरिति हेतुगर्भविशेषणं सन्यासित्वात् इत्यर्थः । अधिकं यथा भवति तथा यज्ञभङ्गीं यज्ञानुष्ठानप्रकारं न संवित्ते सम्यक् न जानाति । 'विद ज्ञाने' इत्यतः लट् आत्मनेपदं संवित्ते संविदाते संविदते। इति एवं प्रकारेण बद्धनिश्चयः असौ पूर्वोक्तग्रामीणजनः, परिषदि सभायां आभान्तं शोभमानं श्रीमध्वाचार्यं कर्मार्थश्रुतिगहनार्थखण्डभावं कर्म अर्थः प्रतिपाद्यः यस्यां सा च सा श्रुतिश्च ब्राह्मणं इत्यर्थः तस्यां गहनः दुर्ज्ञेयः अर्थः विविक्षितार्थो यस्य सः स चासौ खण्डश्च तस्य भावं अभिप्रायं 'छन्दसां वै षष्ठेनाह्ना' इत्यादिब्राह्मणखण्डार्थं इत्यर्थः। मत्सरात् द्वेषात् अपृच्छत् । 'प्रच्छ ज्ञीप्सायां' इत्यतो लङ् परस्मैपदं अपृच्छत् अपृच्छतां अपृच्छन् । द्विकर्मकोऽयं धातुः । मध्वाचार्यस्य सर्वविषयकज्ञानसत्वेऽपि अस्य सन्यासित्वेन यज्ञकर्मण्यधिकाराभावात् यज्ञाद्यनुष्ठानप्रकारं ज्ञानं नास्त्येव इति निश्चित्य अत्र एतस्य पराभवं करिष्यामः इति मात्सर्येण यज्ञकर्मानुष्ठानप्रकारप्रतिपादकदुर्ज्ञेयार्थब्राह्मणखण्डस्य अर्थं अपृच्छन् इति ॥ ४२ ॥

छन्दोभ्यश्च्युतरससंग्रहप्रवीणान् षष्ठेऽह्नि प्रतिविहितान् प्रजाधिपेन ।
नाराशंस्यचरमचारुमन्त्रभेदानूचेऽसौ तमभिदधद्विसंशयांशः ॥ ४३ ॥

भावप्रकाशिका – तत्र नीवीव नर्देत्स हि तासान्यूङ्ख इत्यस्य यथा नीवी वस्त्रं सुधौतं विकासितं नर्देत् तथा नर्देत् । स एव हि तासां न्यूङ्ख इति ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – छन्दोभ्य इति ॥ विगतः संशयांशः संशयलेशो यस्य स तथोक्तः असौ श्रीमध्वस्तं तत्पृष्टस्य खण्डस्यार्थं अभिदधत् वदन् सन् 'तत्र नीवीव निर्देत्स हि तासान्यूङ्ख' इत्यस्य च वाक्यस्य यथा नीवी वस्त्रं सुधौतं विकासितं नर्देत् नादं करोति तथा नर्देत् स एव हि तासां न्यूङ्ख इति अर्थं वदन्नित्यर्थः । छन्दोभ्यः छन्दसां सकाशात् च्युतस्य निर्गतस्य रसस्य सङ्ग्रहे प्रवीणान् समर्थान् । प्रजाधिपेन ब्रह्मणा षष्ठे अह्नि प्रतिविहितान् विनियुक्तान् नाराशंस्यचरमचारुमन्त्रभेदान् चरमाश्च ते चारुमन्त्रभेदाश्च तान् नाराशंस्यादिनामकमन्त्रभेदानित्यर्थः ऊचे ॥ ४३ ॥

मन्दोपकारिणी – छन्दोभ्य इति ॥ विसंशयांशः संशयलेशरहितः असौ श्रीमध्वाचार्यः तं 'छन्दसां वै षष्ठेनाह्ना इत्यादिब्राह्मणखण्डार्थं अभिदधत् कथयन्नेव छन्दोभ्यः छन्दसां सकाशात् च्युतरससंग्रहप्रवीणान् च्युतस्य उद्भूतस्य रसस्य सारस्य संग्रहे मेलने प्रवीणान् समर्थान् प्रजाधिपेन ब्रह्मणा षष्ठेऽह्नि षष्ठे दिवसे प्रतिविहितान् विनियुक्तान् नाराशंस्यचरम-चारुमन्त्रभेदान् चरमो न भवतीति अचरमः प्रथमः इत्यर्थः नाराशंसीमन्त्र एव अचरमः येषां ते तथोक्ता चारवश्च ते मन्त्राश्च चारुमन्त्राः नाराशंस्यचरमाश्च ते चारुमन्त्राश्च तेषां भेदान् विशेषान् ऊचे अवदत् 'वच परिभाषणे' इत्यतो लिट् आत्मनेपदं ऊचे ऊचाते ऊचिरे ॥ ४३ ॥

पाण्डित्यं परममवेक्ष्य तस्य तादृक् सङ्घर्षक्षुभितमना विपक्षसङ्घः ।
नार्थः स्यादयमिति वर्णयन्नथ त्वं तं ब्रूहीत्युरुमतिनेरितोऽद्रवद्वाक् ॥ ४४ ॥

भावप्रकाशिका – भगवदुक्तं श्रुत्वा निर्हेतुकं नेत्युक्तवान् । तेन पृष्टः स्वयमविद्वान-पागमत् ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – पाण्डित्यमिति ॥ तादृक् परमं पाण्डित्यं उक्तश्रुत्यर्थकथनरूपं उत्तमपाण्डित्यं अवेत्यापि सङ्घर्षात् विवादवादरूपमथनात् क्षुभितं मनो

यस्य स तथोक्तः विपक्षसङ्घः प्रतिवादिसमूहः अयं भवदभिहितोऽर्थः न स्यात् इति वर्णयन् निर्हेतुकं वदन् अथ एवं तर्हि त्वं तं तत्खण्डनार्थं ब्रूहीति उर्वी मर्यस्य स तथोक्तः तेन श्रीपूर्णप्रज्ञार्येण ईरितः सन् द्राक् शीघ्रं अद्रवत् ॥ ४४ ॥

मन्दोपकारिणी – पाण्डित्यमिति ॥ तस्य श्रीमध्वाचार्यस्य तादृक् तादृशं दुर्विज्ञेय-विवक्षितार्थखण्डव्याख्यानसामर्थ्यलक्षणं परमं अत्युत्तमं पाण्डित्यं अवेक्ष्य सङ्घर्षक्षुभितमनाः सङ्घर्षेण विवादरूपमथनेन क्षुभितं व्यथितं मनः यस्य स तथोक्तः। विपक्षसङ्घः प्रतिवादिसमुदायः अयं भवदभिहितः अर्थः खण्डार्थः न स्यात् भवति इति वर्णयन् वदन्। अथ अनन्तरं हे विपक्षसङ्घ त्वं तं एतत्खण्डार्थं ब्रूहि वद इति उरुमतिना मध्वाचार्येण ईरितः उदितः सन् द्राक् शीघ्रं अद्रवत् दुद्राव। 'द्रु गतौ' इति धातोः लङ् परस्मैपदं अद्रवत् अद्रवतां अद्रवन् ॥ ४४ ॥

सोऽपृच्छत्तमथ महाह्वयोपसर्गा यत्रोक्ता मनुचरणोपसृज्यरूपाः।
तस्यार्थं वचनचयस्य तं ब्रुवाणः स्थैर्यार्थं सपदि स लेखयाम्बभूव ॥ ४५ ॥

भावप्रकाशिका – 'महानाम्नीनामुपसर्गानुपसृजती'त्यादिखण्डस्य ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ स विपक्षसङ्घः शत्रुसमूहः, अथ पुनः आगत्य तं श्रीमध्वं तस्य खण्डस्य अर्थं अपृच्छत्। यत्र यस्मिन् खण्डे महतः सर्वोत्तमस्य विष्णोः आह्वय इन्द्रादिनाम यासां ता महाह्वया महानाम्न्य इत्यर्थः तासां उपसर्गा अवयवा 'विदा मघवन्विदा गातुमनुकेशिषो दिशः शिक्षा शचीनां पते पूर्विणा पुरूवसोः' इत्यादीनामुपसर्गा अवयवा इत्यर्थः 'प्रचेतन, प्रचेतय, आयाहि पिबमत्स्व क्रतुछन्दक्रत बृहत् सुम्न आधेहि नो वसो' इति पञ्चावयवाः। मनुचरणोपसृज्यरूपा मनुचरणैः ऋङ्मन्त्रपादैः सह 'आधत्तान्यं जठरे प्रेमरिच्यत प्रचेतन दाताराधस्तुवते काम्यं वसु प्रचेतय अस्माकं बोधिचोदित आयाहि पिबमत्स्व तं त्वा परिष्वजामहे, या ते रातिर्ददिर्वसु' एतैः पञ्चभिर्मनुचरणैः सह उपसृज्यरूपाः संयोज्यरूपा उक्ताः, संयोजनीया उक्ता इत्यर्थः। तत्संयोजनप्रकारश्च श्रीमदाचार्यैः खण्डार्थाख्यप्रकरणे स्वयमेवोक्तः, तथा हि— 'आधत्तान्यं जठरे प्रेमरिच्यते, प्रचेतना, दाताराधस्तुवते काम्य वसु प्रचेतय, अस्माकं बोधिचोदितायाहि पिबमत्स्वतन्त्वा-परिष्वजामहे क्रतुच्छन्दक्रतं बृहत् यतिरातिर्दतिर्वसु सुन्मे आधेहि नो वसो' इति यथाक्रमं

पञ्चाह्वयोपसर्गाणां पञ्चभिर्मनुचरणैः सह संयोजनप्रकारः प्रदर्शितः । एवं च तैः पृष्टस्य 'महानाम्नीनामुपसर्गानुपसृजति' इत्यादेर्वचनचयस्य तमर्थं ब्रुवाणः तत्स्थैर्यार्थं अव्युच्छेदेन लोके प्रचयार्थं सपदि लेखयाम्बभूव ॥ ४५ ॥

मन्दोपकारिणी – स इति ॥ सः विपक्षसङ्घः अथ पुनः आगत्य तं श्रीमध्वाचार्यं तस्य खण्डस्य अर्थं अभिधेयं अपृच्छत् । तस्य कस्य, यत्र यस्मिन् खण्डे महाह्वयोपसर्गाः महत् आह्वयं नाम यासु ऋक्षु वर्तते ताः महाह्वयाः माहानाम्नीसंज्ञिकाः इत्यर्थः तासां विदा मघवन्विदेत्यादिऋचां उपसर्गाः प्रचेतन प्रचेतय आयाहि पिबमत्स्व क्रतुच्छन्दऋतं बृहत् सुम्न आधेहि नोवसो इति पञ्चावयवाः । मनुचरणोपसृज्यरूपाः मनूनां ऋङ्मन्त्राणां अधत्तान्यं जठरे प्रेमरिच्यत दाताराधस्तुवते काम्यं वसु अस्माकं बोधिचोदिता तंत्वा परिष्वजामहे यातेरातिर्ददिर्वसु इति चरणैः पञ्चभिः पादैः सह उपसृज्यरूपाः संयोज्यरूपाः । अनेन यस्मिन् खण्डे महानाम्नीसंज्ञके ऋगेकदेशाः प्रचेतनेत्यादयः पञ्च अधत्तान्यं जठरेत्यादि ऋक्पादैः पञ्चभिः क्रमेण संयोजनीयाः इत्युक्तं भवति । तत्संयोगप्रकारश्च श्रीमदाचार्यैः कर्मनिर्णये प्रदर्शितः । स चेत्थं अधत्तान्यं जठरे प्रेमरिच्यत प्रचेतन दाताराधस्तुवते काम्यं वसु प्रचेतय अस्माकं बोधिचोदिता आयाहि पिबमत्स्व तं त्वा परिष्वजामहे क्रतुच्छन्दऋतं बृहत् यातेरातिर्ददिर्वसु सुम्न आधेहि नो वसो इति । एवं पृष्टः सः श्रीमध्वः तस्य वचनचयस्य वादिपृष्टमहानाम्नीऋक्समुदायस्य तं एतादृशसंयोजनरूपं अर्थं ब्रुवाणः वदन् सन् स्थैर्यार्थं स्वोक्तार्थस्य लोके प्रचयादिरूपदार्ढ्यार्थं सपदि सद्य एव लेखायाम्बभूव ग्रन्थरूपेण अलेखयत् । महानाम्नीखण्डव्याख्यानरूपं कर्मनिर्णयाख्यं प्रकरणं चक्रे इति भावः ॥४५॥

सम्पूर्णं शशिनमिवोदितं कृशः श्वा चुक्षोभाशुभनिकरो निरीक्ष्य मध्वम् ।
प्रत्यर्थी स्वयमिति दूरतोऽभिधावन् किं तेन क्षतममृताकरस्य तस्य ॥ ४६ ॥

भावप्रकाशिका – अमृतं मोक्षश्च ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – सम्पूर्णमिति ॥ अशुभनिकरो दुष्टसमूहः मध्वं, सम्पूर्णं उदितं शशिनं इव निरीक्ष्य स्वयं प्रत्यर्थी इति श्रीमध्वप्रतिभट इति दुष्टो रवो यस्य स दूरवः दुष्टध्वनिः सन्नित्यर्थः 'रोरी'ति लोपे 'ढ्रलोप' इत्यादिना दीर्घः अभिधावन् सन् अभिमुखतया गच्छन् सन् कृशश्चासौ श्वा च कृशश्वा दुर्बलशुनक इव चुक्षोभ । क्षुभ सञ्चलन

इति धातुः । पराभूतः सन् नष्टधैर्योऽभूदिति भावः । अमृताकरस्य मोक्षाकरस्य सकल-सज्जनमोक्षप्रदस्येत्यर्थः तस्य श्रीमध्वाचार्यस्य तेन अशुभजनक्षोभेण दुष्टकलकलध्वनिनेत्यर्थः अभिगमनेन चामृताकरस्य अमृतमयकिरणानामाकरस्य शशिनः शुनां वाशितेनेव किं क्षतम्? किं क्लिष्टम्? ॥ ४६ ॥

मन्दोपकारिणी – सम्पूर्णमिति ॥ अशुभनिकरः दुर्जनसमुदायः मध्वं निरीक्ष्य दृष्ट्वा चुक्षोभ क्षोभं प्राप्तवान् पराभूतम्सन् धैर्यरहितः अभूत् इत्यर्थः । 'क्षुभ संचलने' इति धातोः लिट् परस्मैपदं चुक्षोभ चुक्षुभतुः चुक्षुभुः । कः कथमिव कृशः दुर्बलः श्वा सारमेयः सम्पूर्णं षोडशकलासम्पूर्णं उदितं उदयं प्राप्तं शशिनं चन्द्रं दृष्ट्वेव । कीदृशः, स्वयं प्रत्यर्थी श्रीमध्वाचार्यस्य प्रतिपक्षी तत्सम इति यावत् इति ज्ञात्वा कलकलशब्दं कुर्वन् इति शेषः दूरतः दूरदेशात् अभिधावन् मध्वस्य अभिमुखं आद्रवन् । शुनकोऽपि विरावं कुर्वन् दूरात् चन्द्राभिमुखं ऊर्ध्वमुखो भूत्वा आद्रवति । अनेन चन्द्रमध्वयोः उभयोरपि हानिर्नास्तीति सोपपत्तिकां नीतिं आह ॥ किं इति । अमृताकरस्य अमृतस्य मोक्षस्य सुधायाश्च आकरस्य खनिभूतस्य उत्पत्तिस्थानभूतस्य इत्यर्थः । 'आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यते' इति विश्वः । तस्य श्रीमध्वाचार्यस्य चन्द्रस्य तेन दुर्जनेन श्वानेन च किं क्षतं का हानिः न कापि हानिः प्रत्युत बलवद्विरोधेन स्वस्यैव हानिः इति भावः ॥ ४६ ॥

निःस्वानां कतिपयभुक्तियुक्तभक्तं भक्तानां व्यधित चतुर्गुणं दयालुः ।
भुङ्क्ते स्म त्रिदशनरोपभोज्यमन्नं सम्प्रीत्यै स धनवतां बृहत्प्रबोधः ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – निःस्वानामिति ॥ दयालुः स बृहत्प्रबोधः पूर्णप्रज्ञः निर्गतं स्वं धनं येभ्यस्ते निःस्वास्तेषां भक्तानां, कतिपयानां भुक्तिः भोजनं तस्यां युक्तं उपयुक्तं यद्भक्तं अन्नं चत्वारो गुणा गणना यस्य तत् चतुर्गुणं व्यधित चकार । धनवतां भक्तानां सम्प्रीत्यै त्रयश्च ते दश च त्रिदश ते च ते नराश्च तैः उपभोग्यं भोक्तुमर्हं अन्नं भुंक्ते स्म बुभुजे किल 'लट् स्मे' इति स्म योगे भूते लट् ॥ ४७ ॥

मन्दोपकारिणी – निस्स्वानां इति ॥ दयालुः कृपाशीलः बृहत्प्रबोधः बृहन् महान् प्रबोधः ज्ञानं यस्य सः श्रीमध्वाचार्यः । निस्स्वानां निर्गतः स्वः धनं येभ्यः ते तथोक्ताः तेषां दरिद्राणां इत्यर्थः 'स्वोऽर्थोराद्रविणं वसु' इत्यभिधानम् । भक्तानां स्वभक्तानां

कतिपयभुक्तियुक्तभक्तं कतिपयानां स्वल्पजनानां भुक्त्यै भोजनाय युक्तं पर्याप्तं भक्तं अन्नं 'भिस्सा स्त्री भक्तमन्धोऽन्नं' इत्यमरः चतुर्गुणं व्यधित कृतवान् । पञ्चजनपर्याप्तमन्नं विंशतिजनपर्याप्तं, विंशतिजनपर्याप्तमन्नं अशीतिजनपर्याप्तं इत्येवं क्रमेण चतुर्गुणाधिकं अकरोत् इति भावः । सः मध्वः धनवतां सभाग्यानां भक्तानां सम्प्रीत्यै सन्तोषार्थं त्रिदशनरोपभोज्यं त्रयश्च ते दश च त्रिदश । त्रिदश च ते नराः मनुष्याश्च तेषां त्रिंशत् जनानां उपभोज्यं भोजनार्हं अन्नं स्वयं एक एव भुङ्क्ते स्म भुक्तवान् । 'भुज परिपालनाभ्यवहारयोः' इति धातोः लट् परस्मैपदं भुङ्क्ते भुञ्जाते भुञ्जते । स्मशब्दयोगेन अतीतार्थकः ॥ ४७ ॥

वृष्ट्यादेः स नियमनादि चक्र एतच्चित्रं किं भुवननियामके समीरे ।
अप्येवं भुवनगुरोः कृतानुवादः कृत्येषु प्रवर इतीह वर्णयामः ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – वृष्ट्यादेरिति ॥ स श्रीमध्वः वृष्ट्यादेः नियमनमादिर्यस्य तन्नियमनादि चक्रे । यदा वृष्टिरपेक्षिता तदा वर्षयामास । यदा नापेक्षिता तदा वृष्टिकालेऽपि निवारयामास इत्यर्थः । एतत् वृष्ट्यादिनियमनं त्रिभुवननियामके समीरे वायौ किं चित्रम्? किमाश्चर्यम्? एवं अपि भुवनगुरोः श्रीमध्वस्य कृतानुवादः चरितानुवादः कृत्येषु तदितर-व्यापारेषु प्रवर इति हेतोः इह वर्णयामः ॥ ४८ ॥

मन्दोपकारिणी – वृष्ट्यादेरिति ॥ सः मध्वाचार्यः वृष्ट्यादेः तटाकमात्रपूरकवृष्टिः आदिः यस्य सः वृष्ट्यादिः तस्य । आदिपदेन वृषलराजबुद्धिनियमनादिकं गृह्यते एवमादिकार्यस्य नियमनादि, अत्र आदिशब्देन अन्नस्य बहुत्वाल्पत्वकरणं ग्राह्यं चक्रे कृतवान् इत्येतत् भुवननियामके भुवनानां सर्वलोकानां नियामके अन्तःप्रेरके समीरे वायुस्वरूपे मध्वाचार्ये किं चित्रं किमाश्चर्यं न किमपि आश्चर्यं इत्यर्थः । एवमपि पूर्वोक्तसर्वमाहात्म्यस्य आश्चर्यकरत्वाभावेऽपि भुवनगुरोः सर्वलोकगुरोः श्रीमध्वाचार्यस्य कृतानुवादः कृतानां चरित्राणां अनुवादः प्रकथनं कृत्येषु तदितरासाध्यव्यापारेषु प्रवर इति श्रेष्ठ इति इह अस्मिन् ग्रन्थे वर्णयामः, वयं इति शेषः । 'वर्ण क्रियाविस्तारगुणवचनेषु' इति धातोः लट् परस्मैपदं वर्णयामि वर्णयावः वर्णयामः ॥ ४८ ॥

इत्यूचे धरणिसुरेण केवलं नो माध्वीयं विविधकथा कथासु मान्या ।
साक्षादप्यमरवरैरुदीर्यमाणा गन्धर्वैर्द्युसदसि तन्मुदे जगेऽसौ ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ कथासु विविधकथासु मान्या । मध्वस्य सम्बन्धिनी माध्वी इयं विविधकथा केवलं धरणिसुरेण ब्राह्मणेन इत्यूच इति नो किन्तु अमरैरपि साक्षात् उदीर्यमाणाऽसौ कथा द्युसदसि स्वर्गसभायां तेषां अमराणां मुदे सन्तोषाय जगे अगायत ॥ ४९ ॥

मन्दोपकारिणी – इतीति ॥ कथासु पुण्यश्लोकानां कथासु मान्या अत्यादरणीया माध्वी श्रीमध्वाचार्यसम्बन्धिनी । इयं पूर्वोक्ता विविधकथा अनेकविधचरित्रं केवलं धरणिसुरेण मध्वाचार्यशिष्यभूतब्राह्मणेनैव ऊचे वर्णिता इति नो इत्येव न भवति किंतु अमरवरैरपि देवश्रेष्ठैरपि साक्षात् स्वमुखेनैव उदीर्यमाणा वर्ण्यमाना असौ माध्वीकथा द्युसदसि स्वर्गसभायां तन्मुदे तेषां देवानां मुदे सन्तोषाय गन्धर्वैः जगे अगायत । 'गै शब्दे कर्मणि लिट् जगे जगाते जगिरे' । 'वच परिभाषणे' इति धातोः कर्मणि लिट् ऊचे ऊचाते ऊचिरे ॥ ४९ ॥

तां पद्यप्रणिगदितां तु मूर्छयित्वा तानानामुचिततयात्तपञ्चमाद्याः ।
गान्धारं द्युविषयमुज्ज्वलं सृजन्तो ग्रामं ते प्रजगुरकाकिकम्रकण्ठाः ॥ ५० ॥

भावप्रकाशिका – मूर्छयित्वा स्वरविकासानामादिं कृत्वा । आदिस्वरावस्था मूर्छनेत्यभिहिता । तानानामुचिततया असङ्करत्वेन गानाद्गानान्तरप्राप्तिस्तानम् । एकैकधनुर्मण्डलमात्रं श्रुतिः । पञ्चमाद्याः स्वराः । 'द्वे द्वे निषादगान्धारौ त्रिश्रुती धैवतर्षभौ । चतुःश्रुतय उद्दिष्टाः षड्जमध्यमपञ्चमा इति' सरिगमपदनीति क्रमः । श्रुतिसमुदायो ग्रामः । षड्जग्रामो मध्यमग्रामो गान्धारग्राम इति त्रिविधो ग्रामः । तत्र गान्धारस्तु द्युविषय एव । 'सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्छनाः । तानान्येकोनपञ्चाशदेतद्गानस्य लक्षणमिति च 'काकिश्च तुम्बुरुश्चैव कण्ठदोषौ प्रकीर्तिताविति च ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – तामिति ॥ न विद्यते काकिः काक्याख्यकण्ठदोषो यस्य सः अकाकिः, अत एव कम्रकण्ठो रमणीयकण्ठो येषां ते तथोक्ताः 'काकिश्च तुम्बुरुश्चैव कण्ठदोषौ प्रकीर्तितौ' इत्यभिधानम् । तानानां उचिततया असङ्करत्वेन आत्तपञ्चमाद्याः पञ्चमः पञ्चमाख्यस्वर आद्यो येषां निषादर्षभषड्जमध्यमधैवतानां ते तथोक्ताः, आत्ता गातुमिष्टतयाऽङ्गीकृताः पञ्चमाद्याः सप्तस्वरा यैः ते तथोक्ताः । द्युविषयं स्वर्गलोकविषयं

उज्वलं शोभमानं गान्धारं गान्धाराख्यश्रुतिसमुदायं उत्सृजन्त उच्चैः सृजन्तः सम्यक् प्रकटयन्त इत्यर्थः । ग्रामो नाम श्रुतिसमुदायस्तम् । एकधनुर्मण्डलस्यापि स्वरः श्रुतिरित्युच्यते तत्र निषाधगान्धारयोर्द्वे द्वे श्रुती, धैवतर्षभयोस्तिस्रस्तिस्रः षड्जपञ्चम-मध्यमानां चतस्रश्चतस्रः श्रुतयः । तथा चोक्तं गानलक्षणे— 'द्वे द्वे निषाधगान्धारौ त्रिश्रुती धैवतर्षभौ । चतुःश्रुतय उद्दिष्टाः षड्जपञ्चममध्यमाः' इति । तत्र षड्जग्रामो मध्यमग्रामो गान्धारग्राम इति त्रिविधो ग्रामः । तत्र गान्धारस्तु द्युविषय एव 'सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्च्छनाः । तानान्येकोनपञ्चाशदेतद्गानस्य लक्षणम्' इति च । ते गन्धर्वाः पद्येन पद्यरूपेण खण्डेन प्रणिगदिता प्रोक्ता पद्यप्रणिगदिता तां पद्यखण्डेन देवैर्विरचिता-मित्यर्थः तां माध्वीं कथां मूर्च्छयित्वा तत्तत्स्वरविकासानामादिं कृत्वा 'आदिस्वरविकासनं मूर्च्छने'ति । प्रजगुः प्रकर्षेण गानं चक्रुः ॥ ५० ॥

मन्दोपकारिणी – तामिति ॥ अकाकिकम्रकण्ठाः न विद्यते काकिः तन्नामकः कण्ठदोषो यस्य सः अकाकिः 'काकिश्च तुम्बुरुश्चैव कण्ठदोषौ प्रकीर्तितौ' इत्यभिधानम् । अत एव कम्रः मनोहरः कमनीयध्वनियुक्तः अकाकिकम्रः कण्ठः गलः येषां ते तथोक्ताः । उज्वलं प्रकाशमानं द्युविषयं स्वर्गस्थानां योग्यं गान्धारं गान्धारनामकं ग्रामं तन्त्रिसमुदायं सृजन्तः प्रकटयन्तः । तानानां उचिततया उपपन्नतया असङ्करत्वेनेति यावत् । आत्त-पञ्चमाद्याः पञ्चमः पञ्चमाख्यस्वर एव आद्यो येषां ते पञ्चमाद्याः आत्ताः गातुं स्वीकृताः पञ्चमाद्याः पञ्चमादिसप्तस्वराः यैः ते तथोक्ताः ते गन्धर्वाः मूर्च्छयित्वा विजातीयस्वर-विकासादिकं कृत्वा पद्यप्रणिगदितां देवैः पद्यरूपेण कथितां तां माध्वीं कथां प्रजगुः प्रकर्षेण गीतवन्तः । सप्तस्वरास्तु निषादऋषभेत्यादयः प्रसिद्धाः । तथा सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्च्छनाः । तानान्येकोनपञ्चाशदेतद्ग्रामस्य लक्षणं इत्यादिभरतशास्त्रोक्तं ज्ञेयम् ॥

आनम्रैः सुमुकुटमौलिभिः कराग्रैरातामैः प्रतिकलितैः स्मितैर्मुखाब्जैः ।
आश्रावि स्थिरतरभक्तिभिः सुरेन्द्रैस्तद्गीता दशधिषणार्यवर्यचर्या ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – आनम्रैरिति ॥ स्थिरतरा भक्तिः येषां ते तथोक्ताः तैः । आनम्रैः सम्यक् प्रवणैः शोभनानि मकुटानि येषां ते सुमकुटा मौलयः शिरांसि येषां ते तथोक्ताः तैः । यद्वा सुमुकुटाश्च ते मौलयश्च तैः उपलक्षितैः इति । प्रतिकलितैः

अञ्जलित्वेन शिरसि प्रतिबद्धैः आताम्रैः अतिलोहितैः कराग्रैः उपलक्षितैः, सुस्मितैः मुखाब्जैः उपलक्षितैः, सर्वत्र 'इत्थं भूतलक्षण' इति तृतीया । सुरेन्द्रैः, तैः गन्धर्वैः गीता तद्गीता दश धिषणा ज्ञानानि यस्य स दशधिषणः श्रीपूर्णप्रज्ञः स च असौ आर्यवर्यः आचार्यवर्यः तस्य चर्या चरित्रं आश्रावि श्रुता ॥ ५१ ॥

मन्दोपकारिणी – आनम्रैरिति ॥ स्थिरतरभक्तिभिः अत्यन्तं स्थिरा स्थिरतरा तादृशी भक्तिः येषां ते तैः । सुरेन्द्रैः देवश्रेष्ठैः इन्द्रादिभिः । तद्गीता तैः गन्धर्वैः गीता दशधिषणार्यवर्यचर्या श्रीमध्वाचार्यचरित्रं आश्रावि श्रुता । कथंभूतैः आनम्रैः प्रह्वीभूतैः सुमुकुटमौलिभिः शोभनं मुकुटं किरीटं येषु ते तथोक्ताः सुमुकुटाः मौलयः शिरांसि येषां ते तथोक्ताः तैः । प्रतिकलितैः अन्योन्यं सम्बद्धैः अञ्जलित्वेन कृतैः आताम्रैः अतिलोहितैः कराग्रैः हस्ताङ्गुलिभिः स्मितैः मन्दहासयुक्तैः मुखाब्जैः मुखकमलैश्च उपलक्षितैः इत्थं-भूतलक्षणे तृतीया ॥ ५१ ॥

गीर्वाणैर्विजयमहोत्सवस्य पूजां कुर्वाणैरविरलसंविदस्तदानीम् ।
विस्मेरैर्मुनिनिकरोपदेवयुक्तैः सुस्मेरैरथ तमवेक्षितुं प्रजग्मे ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – गीर्वाणैरिति ॥ अथ तदानीं अविरला पूर्णा संवित् यस्य स तथा तस्य श्रीमध्वस्य विजय एव नानादुर्वादिविजय एव महोत्सवः तस्य पूजां कुर्वाणैः सुस्मेरैः सुष्ठु मन्दस्मितयुक्तैः विस्मेरैः विस्मयशीलैः मुनिनिकराः मुनीनां समूहाश्च उपदेवा गन्धर्वाः ते च, तैः युक्ताः, तैः गीर्वाणैः देवैः तं श्रीमध्वाचार्यं अवेक्षितुं प्रजग्मे गतम् ॥

मन्दोपकारिणी – गीर्वाणैरिति ॥ अथ गायनश्रवणानन्तरं तदानीं तस्मिन् काले अविरलसंविदः श्रीपूर्णप्रज्ञाचार्यस्य विजयमहोत्सवस्य नानावादिपराजयादिपरमोत्सवस्य पूजां सम्भावनां कुर्वाणैः श्रीमध्वोत्कर्षं ज्ञात्वा तुष्यद्भिः इत्यर्थः । अत एव विस्मेरैः आश्चर्य-युक्तैः, मुनिनिकरोपदेवयुक्तैः मुनीनां निकराः समूहाश्च उपदेवाः गन्धर्वाश्च तैः युक्तैः सुस्मेरैः मन्दहासयुक्तैः गीर्वाणैः देवैः तं श्रीमध्वाचार्यं अवेक्षितुं द्रष्टुं प्रजग्मे गतम् । 'गम्लृ गतौ' इति धातोः भावे लिट् जग्मे इति एकवचनमेव भावस्यैकत्वात् ॥ ५२ ॥

आदर्शं गुणगणदर्शने मुरारेः सच्छास्त्रं रचितमनेन वर्णयन्तः ।
प्रद्योतैरुडुपदवीं प्रसादयन्तः प्रैक्षन्त प्रचुरमनोविलासमेते ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – आदर्शमिति ॥ मुरारेः श्रीकृष्णस्य गुणगणदर्शने गुणसमूहज्ञाने आदर्शं दर्पणायितं, अनेन श्रीमध्वाचार्येण रचितं सच्छास्त्रं वर्णयन्तः प्रद्योतैः स्वप्रकाशैः उडुपदवीं नक्षत्रमार्गं आकाशं इत्यर्थः । प्रकाशयन्त एते गीर्वाणा देवा प्रचुरो मनोविलासो यस्य स तथा तं श्रीपूर्णप्रज्ञाचार्यं प्रैक्षन्त ददृशुः ॥ ५३ ॥

मन्दोपकारिणी – आदर्शमिति ॥ मुरारेः श्रीनारायणस्य गुणगणदर्शने गुणानां स्वातन्त्र्याद्यनन्तगुणानां गणस्य समूहस्य दर्शने ज्ञाने आदर्शं दर्पणायितं 'दर्पणे मुकुरादर्शौ' इत्यमरः । अनेन श्रीमध्वाचार्येण रचितं कृतं सच्छास्त्रं वर्णयन्तः प्रद्योतैः स्वप्रकाशैः 'प्रकाशो द्योत आतपः' इत्यमरः उडुपदवीं उडूनां नक्षत्राणां पदवीं मार्गं आकाशं प्रसादयन्तः प्रकाशयन्तः एते देवाः प्रचुरमनोविलासं प्रचुरं पूर्णं मनो यस्य तस्य श्रीपूर्णप्रज्ञाचार्यस्य विलासं चरितं प्रैक्षन्त अपश्यन् । 'ईक्ष दर्शने' इत्यतो लङ् आत्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त ॥ ५३ ॥

नाकीन्द्रास्तमवनिभागमावसन्तं सुश्लोकैरपि भुवनानि भूषयन्तम् ।
नेमुः खादुपनिषदं तदैतरेयं व्याख्यान्तं विविधविशिष्टशिष्यमध्ये ॥ ५४ ॥

भावप्रकाशिका – आवसन्तम् 'उपान्वध्याङ्वस' इति कर्मत्वम् ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – नाकीन्द्रा इति ॥ नाकीन्द्रा देवश्रेष्ठा अवनिभागं भूभागं आवसन्तं भूलोकप्रदेशे वसन्तं इत्यर्थः । 'उपान्वध्याङ्वसः' इति कर्मत्वम् । सुश्लोकैः शोभनयशोभिः 'पद्ये यशसि च श्लोकः इत्यमरः, भुवनानि लोकान् भूषयन्तं, विविधा ब्रह्मचार्यादिनानाविधा ये विशिष्टशिष्याः ज्ञानभक्त्यादिगुणैः उत्तमशिष्याः तेषां मध्ये ऐतरेयीमुपनिषदं व्याख्यान्तं व्याकुर्वन्तं तं पूर्वोक्तगुणवत्त्वेन प्रसिद्धं श्रीमदाचार्यं खादाकाशान्नेमुर्नमश्चक्रुः ॥ ५४ ॥

मन्दोपकारिणी – नाकीन्द्रा इति ॥ तदा स्वागमनकाले नाकीन्द्राः देवश्रेष्ठाः तं श्रीमध्वाचार्यं खात् आकाशात् ल्यब्लोपनिमित्ता पञ्चमी आकाशे स्थित्वा नेमुः नमस्कृतवन्तः । कथंभूतं अवनिभागं भूप्रदेशं आवसन्तं वासं कुर्वन्तं 'उपान्वध्याङ्वसः' इति कर्मत्वम् । सुश्लोकैः शोभनाश्च ते श्लोकाः तैः स्वकीर्तिभिः इत्यर्थः 'पद्ये यशसि च श्लोकः' इत्यमरः । भुवनानि चतुर्दशलोकान् भूषयन्तं अलङ्कुर्वन्तं विविधविशिष्टशिष्यमध्ये विविधाः

गृहस्थयत्यादिरूपेण बहुविधाः विशिष्टाः सदाचारभक्त्यादिमत्वेन उत्तमाः विविधाश्च ते विशिष्टाश्च ते शिष्याश्च तेषां मध्ये तत् प्रसिद्धं ऐतरेयं तन्नामकं उपनिषदं व्याख्यान्तं व्याख्यानं कुर्वन्तम् ॥ ५४ ॥

श्रीमन्तं शशिवदनं कुशेशयाक्षं गम्भीरस्वरमतिदिव्यलक्षणाढ्यम् ।
पश्यन्तः स्वगुरुमथार्चयन् कृतार्था वाण्या तं हरिरतिपूर्णकाममेते ॥ ५५ ॥

पदार्थदीपिकोद्बोधिका – श्रीमन्तमिति ॥ श्रीमन्तं भाग्यवन्तं कान्तिमन्तं वा शशिवदनं चन्द्रमुखं कुशेशयाक्षं पद्माक्षं गम्भीरः स्वरो ध्वनिर्यस्य स तथा तम् । अतिदिव्यानि अलौकिकानि यानि लक्षणानि अङ्गसम्पदः तैः आढ्यं सम्पूर्णं स्वगुरुं पश्यन्तः अत एव कृतार्था एते देववरा हरौ रतिर्दर्शनजन्यसुखं तया पूर्णः कामोऽभीष्टं यस्य स तथा तम् । सन्दर्शनादिजन्यं सुखं रतिः इत्युच्यते तं श्रीमध्वाचार्यं वाण्या वचनेन आर्चिचन् विशेषतोऽर्चयामासुः अस्तुवन् इत्यर्थः ॥ ५५ ॥

मन्दोपकारिणी – श्रीमन्तमिति ॥ श्रीमन्तं कान्तिमन्तं शशिवदनं चन्द्रसदृशमुखं कुशेशयाक्षं कुशेशयवत् कमलवत् अक्षिणी यस्य सः तम् । गम्भीरस्वरं गम्भीरः महान् स्वरः ध्वनिः यस्य तम् । अतिदिव्यलक्षणाढ्यं अतिदिव्यानि देवान् अतिक्रम्य विद्यमानानि लक्षणानि षण्णवत्यङ्गुलत्वादिद्वात्रिंशल्लक्षणानि तैः आढ्यं सम्पन्नं परिपूर्णमिति यावत् । हरिरतिपूर्णकामं हरौ श्रीमन्नारायणे रत्या आसक्त्या ज्ञानभक्तिवैराग्यादिना इति यावत् पूर्णः परिपूर्णः कामोऽभिलाषो यस्य तं स्वगुरुं स्वेषां ज्ञानोपदेशकं तं श्रीमध्वाचार्यं पश्यन्तः प्रेक्षमाणाः अत एव कृतार्थाः कृतकृत्याः एते पूर्वोक्तदेवश्रेष्ठाः वाण्या वचनेन उपलक्षणं एतत् त्रिकरणशुद्धया इत्यर्थः आर्चयन् पूजयामासुः अस्तुवन् इत्यर्थः । 'अर्च पूजायां' इत्यतो लङ् परस्मैपदं आर्चयत् आर्चयतां आर्चयन् ॥ ५५ ॥

अहरो दुरागमतमः स्वगोगणैरकरोर्मुकुन्दगुणवृन्ददर्शनम् ।
अजयश्चतुर्दश जगन्ति सद्गुणैः शरणं गुरो करुणयाऽपि नो भवेः ॥ ५६ ॥

पदार्थदीपिकोद्बोधिका – अहर इति ॥ स्वगोगणैः स्ववचनसमूहैः दुरागम एव दुःशास्त्रमेव तमोऽन्धकारः तत् अहरः निराकृतवानसि । मुकुन्दगुणानां वृन्दं समूहस्तस्य

दर्शनं ज्ञानं अकरोः कृतवानसि । सद्गुणैः निर्दुष्टगुणैः चतुरधिका दश चतुर्दश तानि च तानि जगन्ति च चतुर्दशलोकस्थपुरुषानित्यर्थः अजयः । हे गुरो त्वं नोऽस्माकं करुणया दयया शरणं रक्षको भवेः भव । श्लोकेऽस्मिन् मञ्जुभाषिणीवृत्तम् । 'सजसा जगौ च यदि मञ्जुभाषिणी' इति तल्लक्षणात् ॥ ५६ ॥

मन्दोपकारिणी – किमिति अस्तुवन् इत्यत आह ॥ **अहर इति** ॥ हे गुरो ! श्रीपूर्णप्रज्ञाचार्य ! त्वं स्वगोगणैः स्वस्य गवां शास्त्ररूपवचनानां गणैः समूहैः दुरागमतमः दुष्टाश्च ते आगमाश्च ते एव तमः अन्धकारं अहरः निराकृतवानसि । 'हृञ् हरणे' इति धातोः लङ् परस्मैपदं अहरः अहरतं अहरत । तथा स्वगोगणैः मुकुन्दगुणवृन्ददर्शनं मुकुन्दस्य मोक्षप्रदस्य श्रीहरेः गुणानां स्वातन्त्र्याद्यनेकगुणानां वृन्दस्य समूहस्य दर्शनं प्रतिपादनं अकरोः कृतवान् असि । 'डु कृञ् करणे' इति धातोः लङ् परस्मैपदं अकरोः अकुरुतं अकुरुत । सद्गुणैः निर्दुष्टस्वकीयगुणैः चतुर्दश जगन्ति अजयः जितवानसि । सर्वापेक्षया अत्युत्कृष्टगुणोऽसि इति भावः । 'जि जये' इति धातोः लङ् परस्मैपदं अजयः अजयतं अजयत । नः अस्माकं करुणयापि कृपयैव शरणं रक्षिता भवेः 'शरणं गृहरक्षित्रोः' इत्यमरः । 'भू सत्तायां' इति धातोः प्रार्थनायां विधिलिङ् भवेः भवेतं भवेत । मञ्जुभाषिणी वृत्तं 'सजसा जगौ च' इति तल्लक्षणात् ॥ ५६ ॥

नमस्ते प्राणेश प्रणतविभवायावनिमगा नमः स्वामिन् रामप्रियतम हनूमन् गुरुगुण ।
नमस्तुभ्यं भीम प्रबलतम कृष्णेष्ट भगवन् नमः श्रीमन्मध्व प्रदिश सुदृशं नो जय जय ॥ ५७ ॥

पदार्थदीपिकोद्बोधिका – **नम इति** ॥ हे प्राणेश ! समस्तजीवानामीश ! स्वामिन् ! 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि' इति वैजयन्ती । श्रीमुख्यवायो ! प्रणतविभवः प्रणतजनभूतिः तस्मै अवनिं भूमिं अगाः भुव्यवतीर्णोऽसि तस्मै ते नमः । रामप्रियतम ! श्रीरामस्यातिप्रिय ! गुरुगुण ! महागुण ! हे हनूमन् ! ते नमः । प्रबलतम ! कृष्णेष्ट ! कृष्णप्रिय ! भगवन् ! स्वामिन् भीम ! तुभ्यं नमः । हे श्रीमध्व ! तुभ्यं नमः । त्वं शोभना च सा दृक् च सुदृक् तां शोभनज्ञानं नोऽस्माकं प्रदिश देहि । त्वं जय जय दुष्टान् विजय विजय । तात्पर्ये द्विरुक्तिः । शिखरिणीवृत्तम् । 'रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इत्युक्तेः ॥ ५७ ॥

मन्दोपकारिणी – **नम इति** ॥ हे प्राणेश प्राणानां इन्द्रियाणां ईश नियामक मुख्यप्राण त्वं प्रणतविभवाय हरौ त्वयि च नम्रीभूतानां सज्जनानां विभवाय तत्त्वज्ञानादि-सकलैश्वर्याय अवनिं भूमिं प्रति अगाः प्राप्तवानसि भूमौ अवतीर्णोऽसि इत्यर्थः । 'इण् गतौ' इत्यतो लुङ् परस्मैपदं अगाः अगातं अगात । ते तुभ्यं नमः अस्तु । हे स्वामिन् रामप्रियतम गुरुगुण बहुगुण हनूमन् ते नमः अस्तु । प्रबलतम अतिप्रबल कृष्णेष्ट कृष्णस्य श्रीयादवकृष्णस्य प्रिय हे भीम श्रीभीमसेन तुभ्यं नमः अस्तु हे भगवन् निरवधिक-ज्ञानाद्यैश्वर्यपूर्ण श्रीमन्मध्व श्रीमदानन्दतीर्थगुरो ते नमः अस्तु । नः अस्माकं सुदृशं सम्यक् ज्ञानं प्रदिश उत्कृष्टत्वेन देहि । त्वं च जय जय सर्वोत्कृष्टत्वेन वर्तस्व । अनेन वायोः अवतारत्रयाणां च अत्यन्ताभेदो ज्ञापितः । शिखरिणी वृत्तम् ॥ ५७ ॥

इति निगदितवन्तस्तत्र वृन्दारकेन्द्रा गुरुविजयमहं तं लालयन्तो महान्तम् ।
ववृषुरखिलदृश्यं पुष्पवारं सुगन्धं हरिदयितवरिष्ठे श्रीमदानन्दतीर्थे ॥ ५८ ॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते
सुमध्वविजये महाकाव्ये आनन्दाङ्के षोडशः सर्गः ॥

भावप्रकाशिका - सुरनाथगुरुः सुरभीकृतदिङ्मुखया नवचन्दनमिश्रितया ।
अतिकोमलया तुलसीप्रसवच्छटयैक्ष्यत पुंभिरसौ लसितः ॥ १ ॥
प्राणाधीशः प्राण उक्थो ज्येष्ठः श्रेष्ठोऽखिलेश्वरः ।
पाप्मनाऽविद्ध इत्यादिनानोपनिषदीरितः ॥ २ ॥
स 'देवश्रेष्ठ' इत्यादिभारताद्यैश्च वर्णितः ।
प्राण इत्येव लोकैश्च स महामहिमा ह्यतः ॥ ३ ॥
सर्वज्ञानबलादीनामनुसन्धानसुक्षमः ।
प्राणावतारेष्वभितस्तस्मान्नात्राप्यपूर्णता ॥ ४ ॥
सामर्थ्यांशांशमेवात्र प्रादुश्चक्रे जगद्गुरुः ।
तत्राप्यमर्त्यदृश्यांशो देवैरेवान्वभूयत ॥ ५ ॥
चर्या दृष्टा नरैः काश्चिद्विस्मृता देवमायया ।
अविस्मृताश्च पुरुषैर्नास्माभिः सकलाः श्रुताः ॥ ६ ॥
श्रुताश्च काश्चिन्नैवोक्ता देवगुह्यत्वनिश्चयात् ।
अन्यास्तथैव न प्रोक्ता ग्रन्थबाहुल्यभीतितः ॥ ७ ॥
उक्ताश्च विस्तृता,नैव तस्मादेवात्र कारणात् ।
प्रायेण नैकमात्रोक्ताः कथिता इह सर्वशः ॥ ८ ॥
मया दृष्टा ध्रुवमिति प्रोक्ताः प्रायेण पूरुषैः ।
द्वयोर्वक्त्रोर्विरोधे तु स्वीकृता प्रबलस्य गीः ।
तुल्येन सूक्ष्मदृष्ट्यादौ देवे नैव परीक्ष्यते ॥ ९ ॥
काव्यश्रिये वा गुरुकीर्तये वा प्रोक्तं स्वयैवापि मनीषयेति ।
तस्मान्न शंक्येत महाजनेऽस्मिन् पुंसा कुशाग्रीयधियाऽप्यवश्यम् ॥१०॥
मन्दप्रबोधजनतोपकृतिं विधित्सु-
र्मध्वप्रसङ्गपरमोत्सवलम्पटोऽसौ ।
कृत्वाऽपि मध्वविजयं व्यधितास्य किंचित्
भावप्रकाशनमिदं हरये नमोऽतु ॥ ११ ॥
त्रिविक्रमविपश्चितो गुणनिधेः सुशिष्याः सुताः
सतामभिमतास्त्रयो यस्तृतीयोऽत्र नारायणः ।
स मध्वविजयं व्यधाद्गुरुगिरा सदानन्ददः
प्रसीदतु ततः सदा दशमतिः स नारायणः ॥ १२ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचितायां आनन्दांकितस्य स्वकृतश्रीमध्वविजयमहाकाव्यस्य भावप्रकाशिकाख्यटीकायां षोडशः सर्गः समाप्तः॥
॥ इति सुमध्वविजयभावप्रकाशिका ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ इति 'अहर' इत्याद्युक्तप्रकारेण निगदितवन्तः नितरां वाचं उक्तवन्तः महान्तं तं गुरुविजयमहं गुरोः श्रीमदाचार्यस्य यो विजयः दुर्वादिविजयः स एव मह उत्सवः तं लालयन्तः वृन्दारकेन्द्रा देवश्रेष्ठाः हरिदयितवरिष्ठे श्रीहरिप्रियेषु उत्तमे तत्र श्रीमदानन्दतीर्थे श्रीमध्वाचार्ये सु शोभनो गन्धः परिमलो यस्य स तथोक्तः तं पुष्पवारं पुष्पसमूहं अखिलैः मनुष्यादिभिः द्रष्टुं योग्यं यथा भवति तथा अखिलदृश्यं ववृषुः पुष्पवृष्टिं चक्रुरित्यर्थः । मालिनीवृत्तम् । 'ननमयययुतेऽयं मालिनी भोगिलोकैः' इत्युक्तेः ॥ ५८ ॥

श्रीमन्मध्वमुनिप्रबर्हविलसच्चित्तारविन्दालयः ।
सान्द्रानन्दचिदादिसद्गुणतनुर्दोषातिदूरः सदा ॥
ब्रह्माहीन्द्रवरेन्द्रपूर्वविबुधैराराधितांघ्रिद्वयः ।
सुप्रीतो भवतात्सदा मम हरिर्भक्तेष्टचिन्तामणिः ॥ १ ॥
वेदाङ्गाभिधदेशिकैर्निजजनज्ञानादिसंसिद्धये ।
या व्याख्याभिधदीपिका विरचिता श्रीकृष्णपूजाविधौ ॥
तस्या बोधनमात्रमत्र हि कृतं बालावबोधाय यत् ।
तन्मात्रेण च तोषमेतु भगवान् श्रीविट्ठलो मध्वगः ॥ २ ॥
स्तनंधयानां कृतिवद्व्यस्तेयं सुकृतेः कृतिः ।
तथा भूयात्पितृवद्बुधानां तोषकारिणी ॥ ३ ॥

इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां षोडशः सर्गः ॥

मन्दोपकारिणी – इतीति ॥ तत्र अन्तरिक्षे वृन्दारकेन्द्राः देवश्रेष्ठाः इन्द्रादयः इति पूर्वोक्तप्रकारेण निगदितवन्तः भाषमाणाः सन्तः महान्तं सर्वोत्तमं तं गुरुविजयमहं गुरोः श्रीमध्वाचार्यस्य विजयरूपं महं उत्सवं लालयन्तः सम्मानयन्तः सन्तः हरिदयितवरिष्ठे हरेः श्रीनारायणस्य दयितेषु प्रियवस्तुषु भक्तेषु इत्यर्थः वरिष्ठे सर्वोत्कृष्टे श्रीमदानन्दतीर्थे सुगन्धं अतिसुगन्धोपेतं पुष्पवारं पुष्पाणां निचयं अखिलदृश्यं तत्र विद्यमानानां सर्वेषां जनानां दृष्टिगोचरं यथा भवति तथा ववृषुः अवाकिरन् । इत्यशेषमतिमङ्गलं 'वृषु सेचने इति धातोः लिट् परस्मैपदं ववर्ष ववृषतुः' मालिनी वृत्तं 'ननमयययुतेयं मालिनी भोगिलोकैः' ॥५८॥

इत्थं सत्यनिधिच्छलारिनरसिंहाचार्यशिष्येण वै
शेषाख्येन विपश्चिता विरचिता मन्दोपकारिण्यलम् ।
टीका सर्वगुरूत्तमध्वविजयाख्यानस्य काव्योत्तम-
ग्रन्थस्येष्टदमद्गुरूत्तमहृदिस्था स्यात्तु कृष्णेऽर्पिता ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचर्यविरचित श्रीमत्सुमध्वविजयस्य टीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण विरचितायां मन्दोपकारिण्यां षोडशः सर्गः । समाप्त इत्यशेषमतिमङ्गलम् ॥

प्रमेयनवमालिका

अणुमध्वविजयः

श्रीशप्रीत्यै प्रजातः सुमहितमहिमा श्रीहनूमान्निदेशात्
रामस्योल्लंघिताब्धिः सहरिरथ गतः सेतुना पिष्टदुष्टः ।
भूभृन्नी रावणारिं पुरगमुरुदयं पूजयित्वा ससीतं
पश्यन् किम्पूरुषे तं सततमपि महाप्राणमुख्योऽवतान्माम् ॥ १ ॥

भीमोऽभूद् यो न भेद्यश्चकितरिपुकृतापत्प्रतारी सलीलं
रक्षोघ्नः प्राप्तकृष्णो मखकृदुत वने दुष्टहा कीचकघ्नः ।
हत्वा दुर्योधनादीन् स्वपदमुपगतो यद्द्विषः क्रोधतन्त्राः
भूत्वा भूमौ कुशास्त्रं व्यधिषत मणिमत्पूर्वकाः पातु सोऽस्मान् ॥ २ ॥

अज्ञानोत्सादनार्थं सुरवरवचसा सूचितो रूप्यभर्त्रा
जातो मध्यालयार्याद् गुरुमतितपसो वासुदेवाभिधानः ।
गोदात्रे मोक्षदाता रजतपतिपदासेवको भूतभर्त्रा
मान्यः प्राणः कुलित्थैरपि निजसहजातर्पितः प्रीयतां मे ॥ ३ ॥

आनन्दं मन्दहासामृतरसकलया सन्दधानः प्रजानां
आस्येन्दोः शोभमानैरपि कलवचनैर्बाललीलाविलासैः ।
गोपुच्छालम्बनाद्यैर्वृषपतिविहितापत्प्रणोदी प्रणुद्यात्
अज्ञानाद्यापदं मे स्वयमिव भगवान् वासुदेवोऽसुदेवः ॥ ४ ॥

एकाकी योजनाभ्यां व्यवहितमगमद्यस्त्रिवर्षोऽमरौको
यो लाल्यो लोकमात्रा स्वलिपिपरिचये तातविस्मेरताकृत् ।
प्राज्ञम्मन्यं शिवाख्यं परिषदि जितवान् शाखिनामर्थमूचे
दुर्गं पित्रोपनीतः सुरवरमहितो मह्यतां मे वचोभिः ॥ ५ ॥

पायान्मां यो भुजङ्गं सदरिमदयमद् द्रागुपाध्यायसेवी
विश्वेभ्योवेगदूरप्लवनविधिनियुद्धादिवीर्यातिशायी ।
येनास्ता मूढशङ्का श्रुतिशुचिवचसाऽलं गुरोः शीर्षशूला
सख्युर्नारायणज्ञोऽथ य उपनिषद व्याख्यतास्मै सुरार्थ्यः ॥ ६ ॥

संन्यासे बद्धबुद्धिः कृतहरिनमनः पार्थपूज्यं यतिं प्राक्
प्राज्ञं गुर्वाज्ञयाऽलं सुगुणहरिविदं सत्तपस्तृप्तदेवम् ।

प्राप्तं सर्वज्ञशिष्याख्यवरमुपगतो द्विः स्वतातं निषेद्धुं
प्राप्तं चानुत्तरं यो व्यधित सहजवान् मातरं चावतान्माम् ॥ ७ ॥

पूर्णप्रज्ञाख्य आसीद्यतिकुलतिलको यः शुभाचार ईश-
प्रत्तोऽस्मा ईश्वराज्ञागतसुरसरिति स्नानकृज्जैत्रपत्रः ।
दुष्पद्यच्छिच्च लोके प्रवचनचतुरः सत्पुराणेतिहास-
स्योक्तौ मेधाप्रदर्शी दिशतु शुभदृशं मह्यमृज्वग्रणीः सः ॥ ८ ॥

साक्षादानन्दतीर्थोऽनुमितिभिरुरुजिद् योऽनुमातीर्थनामा
बुद्ध्यब्धिं वादिसिंहं सपदि विजितवान् दुष्टभाष्यापनोदी ।
अच्छेद्योक्तिः प्रमोदं पितुरपि कृतवान् नर्मगर्भं गुरूक्तो
भाष्यं कर्तुं ह्यवोचत् प्रियसखयतये सूत्रभावं स माऽव्यात् ॥ ९ ॥

याम्याशां यान् प्रभोक्ता बहुफलसमितेः क्षीरिणीं प्रेक्ष्य यान्तीं
स्यानन्दूरं च दैत्यं सपदि विजितवान् फाल्गुनं तीर्थमाप्तः ।
सेतुं चात्रापि हास्यं खलमथ कृतवान् सर्वजिद् रंगनाथं
नत्वा यान् विश्ववन्द्यो ह्युपनदि विबुधौकस्यवेन्मां स धन्यः ॥ १० ॥

विश्वादीनां शतार्थप्रवचनचतुरो दानसूक्तार्थवादी
दिव्यज्ञानप्रकाशी सकलजिदखिलज्ञाभिधः प्राप्तरूप्यः ।
भीमो वा भीमसन्धः खलकुलदमने गीतिकाभाष्यकारी
गुर्वर्ची यानुदीर्ची मम मनसी लसेत् तीर्थशोधी स मध्वः ॥ ११ ॥

गङ्गातारी सुकर्मोपगतबदरिकान्तोऽत्र नारायणं यो
नत्वैकान्ते समुद्यः प्रवचनकृदथो सत्तपाः कृष्णनुन्नः ।
आप्तेभ्यः कार्यलेखी स्वमनुगतनिजप्रेरकः पाणिमात्रात्
मारुत्याभः प्रपश्यन् हरिमपि गिरिणा सार्धमृद्धयै स मे स्यात् ॥ १२ ॥

योऽपश्यन् स्वाश्रमाग्र्यं मुनिमहितगुणो दिव्यसालं च चित्रं
तत्रर्षीणां समाजे हरिमपि मुनितः सत्यवत्यां प्रजातम् ।
कर्तारं भारतादेर्भरतवरगुरुं ब्रह्मसूत्रस्य चाहो
निर्दोषं नित्यपूर्णागणितगुणमसौ प्रीयतां मे स चेशः ॥ १३ ॥

सर्वाङ्गैः सर्ववन्द्यैर्विमलकुवलयश्यामलैः शोभमानं
सज्ज्ञानानन्दतेजः प्रवरगुणमयैः पूर्णलावण्यरूपैः ।
बिम्बोष्ठं पद्मपादं शुभकपिशजटं सैणचर्माणमीशं
दृष्ट्वा नत्वोपगूढः स गुरवतु नः सूपविष्टो मुनीष्टः ॥ १४ ॥

शिष्यं व्यासस्य नारायणमथ च गतं सर्वहेतुं सुमत्स्यं
साश्वास्यं कूर्मकोलौ नृहरिमथ मनुं वामनं बुद्धरामौ ।
व्यासं काकुत्स्थकृष्णावतिचिरमितरानन्दनं कल्कियज्ञौ
सिद्धेशं नौमि धन्वन्तरिवरवनिताख्यं तमेनं स्मरन्तम् ॥ १५ ॥

दत्तात्रेयं कुमारं हृदि दधदृषभं हंसकृष्णौ हरिं तं
धार्मं नारायणाख्यं सदशशतसहस्राद्यनन्तावतारम् ।
तन्वन्नस्तत्त्वसूक्त्यै वरमुचितनरैरेष सेव्यत्वमाप्तः
कृच्छ्राद्यात्रोन्मुखो मे स गतिरपि हरिर्व्यासनारायणाख्यः ॥ १६ ॥

लब्ध्वाऽनुज्ञां मुकुन्दात् स्वजनमुपगतोऽनेकभिक्षाप्रभोक्ताऽ-
तुल्यं भाष्यं च कुर्वन् स्वसमगुणगणं सम्प्रयातः पुनर्यान् ।
षट्शास्त्राशेषशाखास्वखिलविजयवान् शोभनं सूरिवर्यं
शिष्यं लब्ध्वाऽतिजैत्रं पुनरपि विविधान् प्राप्तरूप्यो गतिर्मे ॥ १७ ॥

सख्ये व्याख्याय भाष्यं कलिमलमपनीयाच्युतज्ञाय चालं
काष्णिमर्चामचाल्यां त्रिदशकतरुणैर्लीलयाऽऽनीय रूप्ये ।
आस्थाप्योदस्य यज्ञप्रतिहतिनिरतान् कारयित्वा स्वयज्ञं
व्यासं नत्वा पुनश्च प्रतिगतरजतः सम्प्रसीदेत् स मध्वः ॥ १८ ॥

सागस्त्वादीशदेवं परवशखननं यो व्यधादप्लवः स्वैः
गङ्गातारी स्वनीत्या वशितयवनराड् वर्त्मनि क्वापि चोरान् ।
हन्तुं यातान् मिथोऽहन् क्वचिदपि निजशिष्येण चाद्रावयद् द्राक्
योगेनाभूच्छिलाभः क्वचिदपि सगणस्तं महेक्षं दिदृक्षे ॥ १९ ॥

दैत्यव्याघ्रोपघाती नरसखकरतो लब्धगौरोपलार्चो
व्यासाज्ञाभृत् सुतर्ता लघु सुरसरितो वारिसंस्तम्भयोगात् ।
भित्वा भूमिं द्युनद्या मठमुपगतया वन्दितो मूर्तिमत्या
यूनोऽनेकान् विजिग्ये युगपदपिगतान् यः सलीलं तमीडे ॥ २० ॥

स्वर्गाह्वोक्तिप्रखण्डी सकलसमयिजिद्व्याख्ययाऽभात् पुराऽऽजौ
शिष्याणामायुधानि प्रकटयति पुरा पूजितः शूलिनाऽभूत् ।
प्रत्यक्षेण क्वचिद्यो दशशतगुरुरम्भापयोभुक् क्षणात् सद्-
गानैः पुष्पादिकारीत्यभिहितचरितो यः शुभैस्तं प्रपद्ये ॥ २१ ॥

व्याख्यां श्रुत्वा मुनिभ्योऽभ्यधित समयतो यस्य लभ्यं फणींद्रो
वैकुंठं हेमनानामणिमयसदनं श्रीशधामास्तदोषम् ।

सायुज्याद्याप्तसौख्यैरखिलविषयिभिः सुन्दरीभोगभाग्भि-
ब्रह्माद्यैर्नाथदग्भिर्विलसितमतुलं सोऽनुगृह्णातु नोऽलम् ॥ २२ ॥

नानादुर्नीतिवादैर्विहितमुरुमदं मायिभूतासुरेन्द्रैः
योऽयं वेदान्तिसिंहो व्यजयत कुरवं पुण्डरीकं च काण्डम् ।
विश्वाश्चर्यप्रकारं प्रवचनमकरोत् छन्दसां यत्स्पृधाऽन्यः
तत् कुर्वन् हास्य आसीद् द्विजवरनिकरे स्याम तद्दासदासाः ॥ २३ ॥

पद्माख्यं सिन्धुराजं प्रियजनपरमागस्कृतं प्राप्य भीते-
रन्यान् कुर्वाणमग्रे सपदि निजगृहे गोगणैर्मध्वपार्थः ।
यो यद्दासोक्तिबाणैर्विदलितहृदया दुद्रुवुर्मायिदैत्याः
विश्वज्ञाह्वो हरिर्यो जगति विजयते स प्रदद्याज्जयं नः ॥ २४ ॥

श्रीकान्ताङ्घ्रिप्रसंगादधिकशुचितमो यान् यथा गाङ्ग ओघो
राज्ञा संवन्दिताङ्घ्रिः सकलगुणगणोपेतपादादिकान्तः ।
सर्वेषां दर्शनीयो लिकुचकुलभवो वेदशास्त्रादिवेदी
प्रापायुग्विक्रमार्यो यमखिलगुरुमानन्दतीर्थं प्रवन्दे ॥ २५ ॥

लब्धग्रन्थः स्तुतोऽलं लिकुचकविवरेणेह निन्ये दिनानि
श्रीभर्तुः प्रीतिवृद्ध्यै विविधशुभकृतीः केवलं यस्तु कुर्वन् ।
निर्लेपो दग्धकर्मा मतिकृतिकरणैर्लोकशिक्षां च कर्तुं
देवैर्वृष्टामृतार्चः प्रवचनचतुरो मे प्रवक्तृत्वदः स्यात् ॥ २६ ॥

स्नातो देवाभिषेक्ता सदरिदरधरस्तन्त्रशास्त्रानुवृत्या
सम्यक् सम्पूज्य विष्णुं वरतुलसिकया दर्शनीयोऽथ भुक्त्वा ।
नानालोकाभिनन्दी गुरुरथ विलसद्व्याख्यया सान्ध्यकृत्यं
कृत्वा गोविन्दलीलाकथक उत कथां वैष्णवीं वाचयेन्नः ॥ २७ ॥

मान्योपन्यासधन्यो हरिरखिलगुणो ब्रह्म वेदैकवेद्यः
कर्ता विश्वस्य मोक्षं शुभसुखविषयं राति भक्तेभ्य इत्थम् ।
सत्तर्कैः साधयित्वा श्रुतिशतसहितैः सूरिसूनुं विजित्य
व्याख्याता तस्य पूर्णप्रमतिरनुदिनं व्याख्ययाऽऽप्याययेन्माम् ॥ २८ ॥

साम्नस्त्रैविक्रमार्याब्धरचयदनुभाष्यं शतग्रन्थकर्ता
सोदर्यं स्वं विरक्तं यतिमकृत महासद्गुणं विष्णुतीर्थम् ।
वादीन्द्रं पद्मनाभं प्रियमथ च परान् सद्गुणान् श्लाघ्यशिष्यान्
योऽनेकान् सद्गृहस्थानपि स विजयते कण्वतीर्थान्तिकस्थः ॥ २९ ॥

संस्तव्यो वेदमानं समवितुमतनोदोषधीर्यः क्षणान्ते
दीप्ताङ्गुष्ठः शिलानीः श्रुतिविवरणकृद् वर्णितः स्तम्भिताब्धिः ।
अङ्गुल्या गण्डवाटावतुलबलचणौ चालने यस्य नालं
प्राग्वाटो वा वटूढो मम मनसि लसेदप्यलाव्यैकलोमा ॥ ३० ॥

पारन्तीशाभिनन्दी सपदि स सरितामन्तरेऽवर्षयद् यो
ग्रीष्मे मित्रीचकाराप्यहितमथ गतो वैद्यनाथं स्वभूत्यै ।
छन्दःखण्डार्थवादी जितकुमतिकुलो दुर्जनेर्ष्याभ्युपेक्षी
लध्वन्नं बृंहयेदत्त्यपि बहु धनिनामल्पकल्पेन तुष्येत् ॥ ३१ ॥

वृष्ट्यादीनां नियन्तेत्यभिहितचरितः सर्वगीर्वाणरत्नैः
गन्धर्वैर्गीयमानो द्युसदसि सकलैः कौतुकाद्गम्यमानः ।
दृष्ट्वा संस्तूयमानः सुरतरुकुसुमैरार्य आकीर्यमाणो
मध्वो जाज्वल्यतेऽसौ जगति विजयते सत्सभामङ्गलाय ॥ ३२ ॥

दशप्रमतिविक्रमं बहुविधात्मना हेमवत्
सुमध्वविजयाभिधं व्यधित भावदीपाह्वयम् ।
प्रमेयनवमालिकां पुनरिमां च दक्षांचितां
सतां श्रवणभूषणं व्यदधदेष नारायणः ॥ ३३ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिता प्रमेयनवमालिका समाप्तः

अणुमध्वविजयः

श्रीमध्वाष्टकम्

अज्ञाननाशाय सतां जनानां कृतावताराय वसुंधरायाम् ।
मध्वाभिधानाय महामहिम्ने हतारिसंघाय नमोऽनिलाय ॥ १ ॥

येन स्वसिद्धान्तसरोजमद्धा विकासितं गोभिरलं विशुद्धैः ।
दुस्तर्कनीहारकुलं च भिन्नं तस्मै नमो मध्वदिवाकराय ॥ २ ॥

प्रपन्नतापप्रशमैकहेतुं दुर्वादिवादीन्धनधूमकेतुम् ।
निरन्तरं निर्जितमीनकेतुं नमाम्यहं मध्वमुनिप्रकाण्डम् ॥ ३ ॥

शान्तं महान्तं नतपातकान्तं कान्तं नितान्तं कलितागमान्तम् ।
स्वान्तं नमन्तं त्रिपुरारिकान्तं कान्तं श्रियो मध्वगुरुं नमामि ॥ ४ ॥

पुन्नामनाम्ने मुरवैरिधाम्ने सम्पूर्णनाम्ने समधीतनाम्ने ।
सङ्कीर्तिताधोक्षजपुण्यनाम्ने नमोऽस्तु मध्वाय विमुक्तिनाम्ने ॥ ५ ॥

सन्मानसंसज्जनताशरण्यं सन्मानसंतोषितरामचन्द्रम् ।
सन्मानसव्यक्तपदं प्रशान्तं नमाम्यहं मध्वमुनिप्रकाशम् ॥ ६ ॥

संस्तूयमानाय सतां समूहैश्चन्द्रायमानाय चिदम्बुराशेः ।
दीपायमानाय हरिं दिदृक्षोरलं नमो मध्वमुनीश्वराय ॥ ७ ॥

गुणैकसिन्धुं गुरुपुङ्गवं तं सदैकबन्धुं सकलाकलापम् ।
मनोजबन्धोः श्रितपादपद्मं नमाम्यहं मध्वमुनिं वरेण्यम् ॥ ८ ॥

मध्वाष्टकं पुण्यमिदं त्रिसंध्यं पठंत्यलं भक्तियुता जना ये ।
तेषामभीष्टं वितनोति वायुः श्रीमध्वनामा गुरुपुङ्गवोऽयम् ॥ ९ ॥

परमपुरुषश्रीचरणसरोरुहमधुकररूपकमानसमुदितम् ।
गुरुकुलतिलकश्रीमदानन्दतीर्थयोगिवरं सततं वन्दे ॥ १० ॥

श्रीमल्लिकुचवंश्येन मध्वाष्टकमुदीरितम् ।
श्रीमत्त्रिविक्रमाख्येन गुर्वनुग्रहकारकम् ॥ ११ ॥

॥ इति कविकुलतिलक श्रीत्रिविक्रमपण्डिताचार्यविरचितं मध्वाष्टकम् ॥

अणुमध्वचरितम्

द्वापरे भीमसेनेन हतेषु सुरशत्रुषु ।
मणिमानवनौ जातो यतिरूपः कलौ युगे ।
मायामतं विनिर्माय ततः सर्वानमोहयत् ॥ १ ॥

तदाज्ञप्तो भगवता वायुः सम्प्रार्थितः सुरैः ।
त्रिंशताब्दोत्तरचतुःसहस्राब्देभ्य उत्तरे ॥ २ ॥

एकोनचत्वारिंशाब्दे विलम्बिपरिवत्सरे ।
आश्वीनशुक्लदशमीदिवसे भुवि पावने ॥ ३ ॥

पाजकाख्ये शुचिक्षेत्रे दुर्गया चाभिवीक्षिते ।
जातो मध्याह्नवेलायां बुधवारे मरुत्तनुः ॥ ४ ॥

भूसुरेन्द्रोपनीतो यस्तत एकादशाब्दके ।
सौम्ये जग्राह भगवांस्तुरीयाश्रममुत्तमम् ॥ ५ ॥

ततः समासे दशके दिवसानां गते परान् ।
मध्वनामा जिगायायं वादिनो वादकौशली ॥ ६ ॥

गीताभाष्यं विधायाऽदौ दृष्ट्वा च बदरीतटे ।
वेदव्यासस्य चादेशात् सूत्रभाष्यमथाकरोत् ॥ ७ ॥

पुनर्गत्वा च बदरीं व्यासमानम्य पूर्णधीः ।
भाष्यादिसेवां विज्ञाप्य रूप्यपीठमिदं पुनः ॥ ८ ॥

आगत्य भारतस्याथ तात्पर्यं कर्मनिर्णयम् ।
कृत्वा च चतुरो मासानुषित्वा कण्वतीर्थके ॥ ९ ॥

एकोनाशीतिवर्षाणि नीत्वा मानुषदृष्टिगः ।
पिङ्गलाब्दे माघशुद्धनवम्यां बदरीं ययौ ॥ १० ॥

॥ इति श्रीवायुपुराणोक्तं अणुमध्वचरितम् ॥

श्रीमध्वमुनिप्रतापाष्टकम्

क्वचित्सुरान्शास्ति सुराङ्गनाः क्वचित् क्वचिच्च गन्धर्वपतीनृषीन् क्वचित् ।
क्वचित्पितॄन् क्वापि नृपान्नरान्क्वचिच्छुभानयं मध्वमुनिः प्रतापवान् ॥ १ ॥

क्वचित्प्रभुं स्तौति समीक्षते क्वचित् क्वचित्स्मरन्नृत्यति गायति क्वचित् ।
क्वचित् तमाराधयतीश्वरं क्वचिन्नमत्ययं मध्वमुनिः प्रतापवान् ॥ २ ॥

क्वचिद्धरेर्जीवजडातिभिन्नतां क्वचित् प्रभोः सर्वगुणैश्च पूर्णताम् ।
क्वचिच्च तस्याखिलदोषशून्यतां वदत्ययं मध्वमुनिः प्रतापवान् ॥ ३ ॥

क्वचिच्च विष्णोरुरुचित्ररूपतां क्वचिच्च मुक्ताखिलजीवयन्तृताम् ।
क्वचिच्च तस्याव्ययचिन्मयाकृतिं व्यनक्त्ययं मध्वमुनिः प्रतापवान् ॥ ४ ॥

क्वचित् स्मृतीः क्वापि पुराणसंहिताः प्रवक्ति सूत्रं क्वचिदागमोक्तिभिः ।
क्वचिच्च धर्मं चरति क्वचिच्च तं ब्रवीत्ययं मध्वमुनिः प्रतावान् ॥ ५ ॥

क्वचिच्च चार्वाककणादगौतमप्रभाकराद्वैतितथागतादिकैः ।
कृतं मतं युक्तिशतैर्विखण्डयन् विभात्ययं मध्वमुनिः प्रतापवान् ॥ ६ ॥

परान्पराभावयति क्वचित्क्वचिन्निजान् कथायां कुशलीकरोत्ययम् ।
क्वचिद् बुधान्वैष्णवमार्गमागतान् पुनात्ययं मध्वमुनिः प्रतापवान् ॥ ७ ॥

क्वचित्समस्तागमनिर्णयोदिताः कृतीः कृता व्याकुरुते सभान्तरे ।
प्रहृष्टरोमा नृहरौ क्वचिन्मनो युनक्त्ययं मध्वमुनिः प्रतापवान् ॥ ८ ॥
इदं प्रतापाष्टकमच्युतप्रियश्रुतिप्रतीतामलमध्वयोगिनः ।
यतिस्तदीयोऽकृत वादिराज उदारधीस्तस्य कृपाकलाप्तये ॥ ९ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचितं श्रीमध्वमुनिप्रतापाष्टकम् ॥

श्रीमुख्यप्राणाष्टकम्

भक्तिं श्रीरमणस्य पादयुगले प्रीत्या प्रदेहीश म-
चित्तं तत्पदपद्मचिन्तनरतं नित्यं विधेह्यच्युतम् ।
त्वत्तातं मयि सुप्रसन्नमधुना विज्ञाप्य कुर्वंजसा
स्वास्मिन् प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ १ ॥

त्वय्युत्तिष्ठति यत्कलेवरमभूत् पातैकपात्रं सुरा-
स्त्रा(स्था)तुं नैव हि शेकुरादिपुरुषोऽप्यासीदुपेक्षारतः ।
श्वासाख्यं मनुमस्य यत्तव वशं ब्रूतेऽविगीता श्रुतिः
स त्वं प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ २ ॥

येनात्मीयजनावनाय बलिना नीतः पुरोच्चाचल-
स्तीर्णः पूर्णपयोनिधिः खलहृता दृष्टा च सीताकृतिः ।
तत्ते किं कथनीयमस्ति जगति व्यक्तस्य सत्पालने
स्वामिन् रामपदाब्जभृङ्ग तदव श्रीमन् हनूमन् नमः ॥ ३ ॥

सेवाभिः परितुष्टधीः कविजनैर्गेयाभिराद्यः पुमान्
ब्रह्माणं किल भाविनं समतनोत् सन्तं भवन्तं प्रभुः ।
साम्राज्ये सति विस्मृतिर्निजजने निन्द्या हि यत् त्वादृशां
स्वामिन् रामपदाब्जभृङ्ग तदव श्रीमन् हनूमन् नमः ॥ ४ ॥

कामी येन हि कीचको विनिहतः क्रोधी च दुश्शासनः
स्तब्धो लुब्धसुयोधनश्च मणिमान् मुग्धो मदान्धो बकः ।
कृष्णेर्ष्याभिरतश्च मागधपतिः षड्वैरिवर्गात् सदा
स त्वं भीम गुणाभिराम दयया दासं हि मामुद्धर ॥ ५ ॥

दाहाद्येन विमोचितो निजजनः स त्वं भवाग्नेरव
स्वीयाध्वप्रतिबन्धकश्च निहतः किर्मीरनामा रणे ।

प्रोद्यन्मध्वमताध्वगस्य सदय प्रत्यर्थितः सादय
स्वामिन् सोमकुलाग्रगण्य भवतः पोतं हि मां न त्यज ॥ ६ ॥

विद्वत्सिन्धुमहोदय द्विजपथप्रज्ञप्तिबीजोदय
प्रत्यर्थ्यम्बुजमुद्रण प्रियजनप्रत्यूहघर्मार्दन ।
हल्लग्रामलकृष्ण सस्मितदयावीक्षासुधाधिष्ण्य मां
श्रीमन्मध्वमुनीन्द्रचन्द्र कुमुदस्थानीयमुद्बोधय ॥ ७ ॥

यद्वागाख्यकराः सतां सुखकरा दुर्वादिगर्वज्वराः
सद्विद्याम्बुधिपोषको यदुदयोऽविद्याम्बुधेः शोषकः ।
यः शर्वेण शिरोधृतोऽपि विशदं चक्रे मुरारेः पदं
सोऽव्याद्दद्भुतमध्वतारकपतिर्हार्दान्धकारच्युतिः ॥ ८ ॥

पद्यानामिदमष्टकं प्रविलसन्मध्वाकृति(तेः)स्पष्टकं
तद्दासप्रियवादिराजयतिना तद्दत्तवाग्भूतिना ।
हृद्यं यः पठतीरितं सुचरितं स स्याद्दिशामष्टके
माद्यन्मायिमतङ्गभङ्गकरणे सिंहप्रबर्हप्रभः ॥ ९ ॥

॥ इति श्रीमद्वादिराजतीर्थपूज्यचरणविरचितं श्रीमुख्यप्राणाष्टकम् (मध्वाष्टकम्) ॥

अणुवायुस्तुतिः

चन्द्रविभूषणचन्द्रपुरोगैर्वंद्यपदाम्बुरुहं पवमानम् ।
आनन्दतीर्थमहामुनिराजं गोविन्दभक्तशिखामणिमीडे ॥ १ ॥

प्राणगणाधिपतिं भुवि वाणीप्राणसमं दयया ह्यवतीर्णम् ।
आनन्दतीर्थमहामुनिराजं गोविन्दभक्तशिखामणिमीडे ॥ २ ॥

श्रीहनुमन्तमनन्तभुजिष्यं लङ्घितसिन्धुमुदस्तमहीध्रम् ।
आनन्दतीर्थमहामुनिराजं गोविन्दभक्तशिखामणिमीडे ॥ ३ ॥

भीषणदुष्टकुलान्तकभीमं भीममभीतिदमिष्टजनानाम् ।
आनन्दतीर्थमहामुनिराजं गोविन्दभक्तशिखामणिमीडे ॥ ४ ॥

शान्तमनन्तनिशान्तसमाह्वे शान्तकुलेखकुले किल जातम् ।
आनन्दतीर्थमहामुनिराजं गोविन्दभक्तशिखामणिमीडे ॥ ५ ॥

॥ इति श्रीकल्याणीदेवीविरचिता अणुवायुस्तुतिः ॥

ग्रन्थमालिकास्तोत्रम्

कृष्णं विद्यापतिं नत्वा पूर्णबोधार्यसद्गुरून् ।
जयतीर्थमुनीन् नत्वा वक्ष्येऽहं ग्रन्थमालिकाम् ॥१॥

नारायणेन व्यासेन प्रेरितस्तत्त्वसंविदे ।
ग्रन्थान् मध्वश्चकारासौ सप्तत्रिंशदमन्दधीः ॥ २ ॥

गीताभाष्यं विधाया(चकारा)सौ प्रथमं तुष्टिदं हरेः ।
भाष्याणुभाष्ये चक्रेऽथ ह्यनुव्याख्यानमुत्तमम् ॥ ३ ॥

प्रमाणलक्षणं नाम कथालक्षणसंज्ञकम् ।
उपाधिखण्डनं चक्रे मायावादस्य खण्डनम् ॥ ४ ॥

चक्रे प्रपञ्चमिथ्यात्वमानखण्डनमेव च ।
चकार तत्त्वसंख्यानं साधनं विष्णुदर्शने ॥ ५ ॥

ग्रन्थं तत्त्वविवेकाख्यं तत्त्वोद्योतं हरेः प्रियम् ।
कर्मनिर्णयनामानं ग्रन्थं न्यायार्थबृंहितम् ॥ ६ ॥

सुखतीर्थयतिश्चक्रे विष्णुतत्त्वविनिर्णयम् ।
ऋग्भाष्यं च चकारासौ सर्ववेदार्थनिर्णयम् ॥ ७ ॥

ऐतरेयं तैत्तिरीयं बृहदारण्यमेव च ।
ईशावास्यं काठकं च छान्दोग्याथर्वणे तथा ॥ ८ ॥

माण्डूकं नाम षट्प्रश्नं तथा तलवकारकम् ।
चक्रे भाष्याणि दिव्यानि दशोपनिषदां गुरुः ॥ ९ ॥

निर्णयं सर्वशास्त्राणां गीतातात्पर्यनिर्णयम् ।
संन्यायविवृतिं नाम(चक्रे) न्यायशास्त्रनिकृन्तनीम् ॥

नरसिंहनखस्तोत्रं चक्रे यमकभारतम् ।
द्वादशस्तोत्रमकरोत् कृष्णामृतमहार्णवम् ॥ ११ ॥

तन्त्रसारं चकारासौ सदाचारस्मृतिं सुधीः ।
श्रीमद्भागवतस्यापि तात्पर्यं ज्ञानसाधनम् ॥ १२ ॥

महाभारततात्पर्यनिर्णयं संशयच्छिदम् ।
यतिप्रणवकल्पं च प्रणवार्थप्रकाशकम् ॥ १३ ॥

जयन्तीनिर्णयं चक्रे देवकीगर्भजन्मनः ।
कृष्णस्य कृष्णभक्तोऽयं द्वैपायनकराब्जभूः ॥ १४ ॥

त्रिंशत्सहस्रं द्व्यधिकमधिकं कृष्णतुष्टिदम् ।
एतेषां पाठमात्रेण मध्वेशः प्रीयतामिति ॥ १५ ॥

॥ इति श्रीव्यासराजकृत ग्रन्थमालिकास्तोत्रम् ॥

१. श्रीपूर्णप्रज्ञग्रन्थमालिका

भाष्याणां दशकं च पञ्चकयुतं तिस्रश्च निर्णीतयो
विष्णोः स्तोत्रयुगं दशप्रकरणं कल्पद्वयं च स्मृतिः ।
श्रीकृष्णामृततन्त्रसारयमकन्यायावलीदीपनं
येनाकारि सदैव मध्वमुनिराट् दद्यात् सुविद्यां मम ॥

॥ इति श्रीयदुपत्याचार्यकृता श्रीपूर्णप्रज्ञग्रन्थमालिका ॥

२. श्रीपूर्णप्रज्ञग्रन्थमालिका

गीताभाष्यं सभावं नयविवृतिमनुव्याकृतिं चाणुभाष्यं
भाष्यं सूत्रस्य काव्यं स्तुतियुगलमपि स्वीयभावं स्मृतिं च ।
ऋग्भाष्यं तन्त्रसारं प्रकरणदशकं वेदसारस्य भाष्यं
कल्पद्वन्द्वं सुधाब्धिं दशमतिरतनोद्धारतस्यापि भावम् ॥

॥ इति बिदरहळ्ळी श्रीश्रीनिवासतीर्थकृता श्रीपूर्णप्रज्ञग्रन्थमालिका ॥

II

श्रीमध्वद्वादशनामस्तोत्रम्

पूर्णप्रज्ञो ज्ञानदाता मध्वो ध्वस्तदुरागमः ।
तत्त्वज्ञो वैष्णवाचार्यो व्यासशिष्यो यतीश्वरः ॥ १ ॥

आनन्दतीर्थः शंनामा जितवादी जितेन्द्रियः ।
श्रीमदानन्दसन्नाम्नामेवं द्वादशकं जपेत् ।
लभते वैष्णवीं भक्तिं गुरुभक्तिसमन्विताम् ॥ २ ॥

॥ इति श्रीमध्वद्वादशनामस्तोत्रम् ॥

मध्वनामावलिः

अनादिभवदुःखौघबाधितानां नृणामिह ।
श्रीमध्वविजये काव्ये नादिरायणपण्डितैः ॥ १ ॥

श्रीमध्वाचार्यनामानि यानि प्रोक्तानि तान्यहम् ।
पाठवृत्त्याऽभीष्टसिद्धौ उद्धरामि सुभक्तितः ॥ २ ॥

स वासुदेवो मां पायादमानवनवाकृतिः ।
विष्णुदासो हरिपदः पृथुधीः पातु मां सदा ॥ ३ ॥

त्रिसन्ध्यं मां पालयतु वसुदेवसुताह्वयः ।
सदा चतुरधीः पातु मां तथा त्रिजगद्गुरुः ॥ ४ ॥

अव्याद्भुवनभर्ता द्विजकुमारोऽपि माऽवतु ।
छलमानुषो गुरुश्चैव द्विजसूनुस्तथैव च ॥ ५ ॥

पातुं मां च त्रिभुवनगुरुश्चैव जगद्गुरुः ।
विभुस्त्वव्याद्विश्वविच्चालयबुद्धिस्तथैव च ॥ ६ ॥

पूर्णबोधः पालयतु मां तथैव महामतिः ।
भूरिचेता पूर्णबुद्धिर्महात्मा पूर्णधीरपि ॥ ७ ॥

प्रभुस्तथा महाहृच्च भूरिहृच्च सदाऽवतु ।
पातु माऽमित बुद्धिश्चादभ्रचेतास्तथैव च ॥ ८ ॥

आनन्दतीथोऽवतु मां गुरुबुद्धिरखण्डधीः ।
अनुमानतीर्थश्च तथा सुखतीर्थो गरिष्ठधीः ॥ ९ ॥

मां पूर्णचेतास्त्ववतु मां तथैव बृहन्मतिः ।
महामानसमध्वौ च पालयेतां सदैव माम् ॥ १० ॥

तथा संमोदतीर्थश्च पातु मां कृपया सदा ।
हंसराट्च सदाऽव्यात् प्रमोदतीर्थस्तथैव च ॥ ११ ॥

समग्रधीरार्यवर्यः सुचित्तश्च सदाऽवतु ।
विश्वेशचेता मां पातु चारुधीरन्वहं तथा ॥ १२ ॥

कृतान्तवित्तमः पातु जगद्गुरुर्गुरुश्च माम् ।
सम्पूर्णसंख्यो मां पातुमां विद्याधिपतिस्तथा ॥ १३ ॥

महामनास्सदा पातु मां पायादप्यमन्दधीः ।
स्वानन्दतीर्थस्त्ववतु व्यूढहृच्च तथैव माम् ॥ १४ ॥

पातु विस्तृतचित्तश्च शुद्धधीश्च सदाऽवतु ।
पालयेतां त्रिकालं मां सकलज्ञायतचेतसौ ॥ १५ ॥

पृथुधीरन्वहं सूरिमौलिर्मां सर्वदाऽवतु ।
अव्यात्पृथुलचेता मां मामव्यात्सर्वविद्यतिः ॥ १६ ॥

पूर्णदृक् पुष्टबुद्धिश्च पालयेतां सदैव माम् ।
मां विशङ्कटबुद्धिश्च पालयत्वनुकम्पया ॥ १७ ॥

मरुदंशोऽमन्दमनिषोऽघनाशनकीर्तिमान् ।
सदा प्रचुरधीः पातु पुरुसंख्यस्तथैव च ॥ १८ ॥

मामदभ्रमनीषः पृषदधिपांशः सदाऽवतु ।
शुद्धहृन्मां पालयतु उत्तमचेतास्तथैव च ॥ १९ ॥

सद्गुरुर्वृजिननाशनामाऽऽनन्दधीस्तथा ।
परिपूर्णप्रमतिरप्यव्यान्मां कृपया सदा ॥ २० ॥

अव्यान्महाधीरमितप्रमतिः पुरुधीस्तथा ।
गुरुमानसोऽनन्तहृदव्यान्मां ऋजुपुङ्गवः ॥ २१ ॥

अमितान्तरोऽव्यात्प्रभूतधीः भूरितरमानसः ।
अमरदिसद्गणश्चाव्यान्मामविरलान्तरः ॥ २२ ॥

मां महासुखतीर्थश्च पायात् दुःखौघवारिधेः ।
विरलेतरान्तरः पातु तथा धीरमतिश्च माम् ॥ २३ ॥

सौख्यतीर्थः पातु कविः लोकनायक एव च ।
प्राज्ञमौलिमणिः पातु तथा पृथुलमानसः ॥ २४ ॥

सर्वधीः सततं पायादलेशधीर्मां सदाऽवतु ।
पूर्णसंख्यः पूज्यचरणो दशाप्रमतिरेव च ॥ २५ ॥

सदा माऽव्याद्बहुलधीः पातु मां विस्तृतान्तरः ।
महिष्ठधीर्विविश्वेशवेत्ता पातु मामनुकम्पया ॥ २६ ॥

परात्मवेदकोऽव्याद्वितानचेतस्तथैव च ।
पृथुप्रभोधो मां पातु गरिष्ठहृदयोऽपि माम् ॥ २७ ॥

महीयोमतिरप्यव्याद्वैष्णवाग्रेसरश्च माम् ।
जगदीशः पातु महापुरुषोत्तमदासकः ॥ २८ ॥

माऽव्याच्च धन्यप्रवरः प्राज्ञः पात्वपि मां सदा ।
अदीनसत्वो मां पातु तथाऽनन्तगुणान्तरः ॥ २९ ॥

गुरुप्रबर्हो मामव्याद्व्यासशिष्यश्च माऽवतु ।
तथैव मामजसमः पायाद्ध्वस्तदुरागमः ॥ ३० ॥

आयामाहृद्योग्यपि मां पायाद्विष्णुसुहृच्च माम् ।
पायात्सदा मां भुवनविभूषण इतीरितः ॥ ३१ ॥

तथा माऽव्याद्धरिपदरतश्च प्रचुरान्तरः ।
भगवत्तमश्च विपुलप्रमतिश्च सदाऽवतु ॥ ३२ ॥

महनीयपादश्चाव्यान्माममानवकलस्तथा ।
पायान्महानन्दतीर्थोऽनन्तस्वान्तस्तथैव च ॥ ३३ ॥

वेदान्तसिंहश्चाव्यान्मां भूरिचित्तस्तथैव च ।
हर्षतीर्थः पालयतु कविः विद्वद्वर्यस्तथैव च ॥ ३४ ॥

उत्तमप्रीतितीर्थश्चाचार्यवर्यस्तथैव च ।
गोविन्दभक्तोऽप्यव्यान्मां धन्यबुद्धिस्तथैव च ॥३५॥

प्राज्यप्रज्ञोऽपि विस्तारिबुद्धिरव्याच्च सङ्कटात् ।
अव्यादग्र्यानन्दतीर्थो हर्यंशः सर्वविच्च माम् ॥ ३६ ॥

अदभ्रधिषणोऽव्यादमितमतिपदोऽपि माम् ।
सदा गुरुमतिः पातु तथैव पृथुदर्शनः ॥ ३७ ॥

कृपार्द्रमनसा सम्यक् पातु प्राज्ञदिवाकरः ।
परमानन्दसुतीर्थः सूरिराजस्तथैव च ॥ ३८ ॥

व्रतिराजः प्राणपतिः शतसंख्यस्तथैव च ।
अव्यात्पुरुषरत्नस्त्रि जगत्पूज्यश्च माऽवतु ॥ ३९ ॥

अनन्तमानसोऽव्यात्प्रबर्हबोधस्तथैव च ।
गूढदेवश्च मां पातु परिपूर्णमतिश्च माम् ॥ ४० ॥

मामव्यात्प्रचुरप्रज्ञो बहुबोधस्तथैव च ।
बहुलप्रबोधश्चाव्याद्दशहृदयश्चापि माऽवतु ॥ ४१ ॥

उरुचेताश्चपरमानन्दतीर्थस्तथैव च ।
बहुलहृन्मां कृत्यवेदि प्रवेकोऽवतु मां सदा ॥ ४२ ॥

विपुलहृदयो माममृतान्नसेव्यस्तथैव च ।
सहस्रप्रकाशोऽप्यवतु तथा पृथुमतिश्च माम् ॥ ४३ ॥

अखिलज्ञोऽपरिमितमनीषः पातु मां सदा ।
रक्षत्वलवबोधो मां मान्यधीरन्वहं तथा ॥ ४४ ॥

समधिकधिषणोप्यधिकबोधस्तथाऽवतु ।
सन्मतिमांश्च प्रचुरतरहृन्मां सदाऽवतु ॥ ४५ ॥

पायाच्चाधिकधिषणस्तथाऽतनुमनाश्च माम् ।
परिपूर्णसंवित्पायान्मां भूयोबोधस्तथैव च ॥ ४६ ॥

विश्वज्ञश्च तथाऽखण्डज्ञविश्वाभिज्ञ स्तथैव च ।
अत्युच्चधिषणः पायात्पापाच्चक्रायुधप्रियः ॥ ४७ ॥

भूयोधीश्च महाचार्यो मारुतांशश्च माऽवतु ।
वेदवादिराट्चोर्वीक्षोऽव्यान्मां ब्रह्मसमस्तथा ॥४८॥

प्रीतितीर्थश्च वेदान्तगुरुरव्याच्च सर्वदा ।
पायात्सदाऽनन्तमतिः पवनांशस्तथैव च ॥ ४९ ॥

महाबोधश्च कृत्स्नज्ञः सुचेताश्च सदाऽवतु ।
प्राज्येक्षश्चैव वेदप्रवचनाचार्य एव च ॥ ५० ॥

अनन्तबोधः पूर्णेक्षोऽव्यान्मां रामप्रियः सदा ।
सदर्च्योऽनुमानबोधोऽप्यव्याद्भितमतिस्तथा ॥५१॥

उच्चमानो महेक्षश्च पायाद्यतिवरोऽपि माम् ।
सकलमतिश्च सर्वज्ञः तथा परममतिश्च माम् ॥५२॥

विपुलहृच्च मां पायात्संपूर्णप्रमतिस्तथा ।
अदभ्रसंख्यश्च तथा बृहद्धीः शुचिहृत्तथा ॥ ५३ ॥

विशालसंवित्प्रपूज्यपूज्यः प्रचुरतरान्तरः ।
तथैवोरुमतिः पायाद्भवेऽस्मिन् दुःखसागरात् ॥५४॥

पायाद्बृहत्प्रबोधश्च भुवनगुरुस्तथैव च ।
तथैव दशधिषणः आर्यवर्यः सुपालयेत् ॥ ५५ ॥

तथाऽविरलसंविच्च ज्ञानं दत्वाऽशुपालयेत् ।
मामव्यात्प्रचुरमनोविलासोऽनिष्टसागरात् ॥ ५६ ॥

श्रीमदानन्दतीर्थश्च दद्यादिष्टं सदा मम ।
सद्व्याख्यानप्रवाहं च दत्वा मां रक्षतु ध्रुवम् ॥५७॥

इत्थं श्रीमध्वनामानि श्रीमध्वविजयाच्छुभात् ।
श्रीनिवासेनोद्धृतानि यादवाचार्यसेविना ॥ ५८ ॥

सप्तत्रिंशोत्तरशतद्वयसंख्यान्यलं नरः ।
मौञ्ज्युद्वाहादिकृत्येषु तथेतर शुभेषु च ॥ ५९ ॥

त्रिकाले यः पठेन्नित्यं शुचिस्तद्गतमानसः ।
ऐहिकामुष्मिकान्कामान् स लभेत्तदनुग्रहात् ॥ ६० ॥

॥ इति श्रीयदुपत्याचार्यपूज्यपादाराधकवेणुपल्ली श्रीनिवासविरचिता मध्वनामावलिः ॥

सुमध्वविजयव्याख्यानेषु उदाहृत प्रमाणवचनानि

अ

अग्निना रायिमश्नवत - XII-40 भा
अग्नौ प्रास्ताहुतिः - XIV-14 वि
अग्निमीळे पुरोहितं - XII-40 वि.छ.
अर्चकस्य तपो योगात् - IX-42 छ
अर्ध्यपाद्याचमनीयादिषोडशोपचाराः
- XIV-36 भा.वि.छ.
अथ कस्मादुच्यते ब्रह्मेति - XII-15 वि.छ.
अन्येऽपि स्वात्मनो मुख्याः - XI-24 वि.छ.
अपराधसहस्राणि - XIV-36 छ
अमिताक्षरं पञ्चरात्रं गद्यमाहुर्मनीषिणः
- XII-53 वि.छ
अवकाशवन्तो दिव्यत्वात् - XI-24 वि.छ.
अहं पिबेयं मधूनां - IX-50 छ
अहं सोमं प्रथमं पिबेयं - IX-50 छ
अहिंसा प्रथमं पुष्पं
- XIV-37, भा.वि.छ. (-अष्टभावपुष्पाणि)
अक्षण्वन्तः कर्णवन्तः सखायः - XV-62 छ

आ

आत्मा वा इदमेक अग्र - XV-8 वि.छ.
आदरं भजनं भक्तिरित्युक्तेः - IX-1 वि.
आदिहस्वा वत्सानुसृतिरंत्या
- XII-32 भा.वि.छ. (शिक्षायाम्)
आनन्दं ब्रह्मणो विद्वान् - XV-18 भा.वि.छ.
आनन्दतीर्थपार्थस्य भयादास्ते स पृष्टतः
- XII-46 भा.
आनन्दतीर्थपुंसिंहो मायावादिदितेः क्षुतान्
- XII-51 भा and XII-47 वि
आनन्दतीर्थभगवत्पदपद्मरेणुः - XIV-4 भा.प्र.
आराधयामि मणिसन्निभमात्मबिम्बं
- XIV-37 भा.वि.

उ

उत्तमानां स्वरूपन्तु पादशब्देन
IX-27 छ and XI-5 छ
उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादाः
- XV-73 वि

ए

एकमात्रो भवेद्ह्रस्वो - XII-31 भा.वि.
एष पन्था - XV-8 वि.छ.
एतेन ह वाव - XV-9 वि.छ.
ऐश्वर्यस्य समग्रस्य वीर्यस्य - XIV-14 भा, वि.

क

कः स्यात् पितामहे - XII-31 छ

च

चन्द्रमा मनसो जातः - XII-31 वि

ज

जगत्प्रवाहः सत्योऽयं - XII-5 वि.छ.
ज्योतिष्टोमेन स्वर्ग कामो यजेत - IX-53 वि.छ.

त

तत्त्वमसि - XV-34 भा.वि.
ता वा एता ऋचः - XV-8 वि.छ.
तिमिर्नाममहामत्स्यः तद्गिलस्तु तिमिङ्गिलः।
- XV-122 वि.
तां पश्यन्तीं प्रथममुदितां - XII-31 भा.
त्रिरात्रफलदा नद्यो - XIV-29 भा.वि.छ.

द

दशेति सर्वमुद्दिष्टं सर्वं पूर्णं - IX-30 छ
देवा वै सोमस्य - IX-50, भा.वि.छ.
द्रव्यं कर्म च कालश्च - XV-9 वि.छ.

न

न तं विदाम - XV-8, वि.छ.
न ऋते त्वत्क्रियते - XV-9 भा.वि.छ.

निरपेक्षगुणैः पूर्णो धन्य इति
- X-25 छ. X-54 वि.
निर्विशेषो ब्रह्मवावो - X-54 वि.
नेह नानास्ति किञ्चन - XII-6 वि.छ.

प

पञ्चभेदाः इमे नित्याः - XII-5 वि.छ.
परो मात्रया तन्वा वृधानः - XV-9 छ.
पूर्वां संध्यां जपंस्तिष्ठेत् - XIV-49 भा.वि.छ.
प्रायः सेऽयमनायासं - XIV-39 भा.प्र.

ब

बीभत्सुर्विजयः पार्थः - X-20 वि.
ब्रह्मा सिरसि ललाटे सद्रः - XII-31, भा.वि.छ.

भ

भारतीविजय संविदानन्द ...
एकविंशतिकुभाष्याणि - IX-12 भा.वि.छ.
भुक्त्वा पीत्वाऽर्चनं ... द्वात्रिंशदपराधाः
- XIV-36 भा.वि.छ.

म

मय्यनन्तगुणेऽनन्ते - XII-15 वि.छ.
मुखवासश्च ताम्बूलं - षडनूपचाराः
- XIV-36 भा.वि.उ.

य

यतो वा इमानि भूतानि जायन्ते
- XV-34 भा.वि.छ.
यतो वाचो निवर्तन्ते
- XII-4 वि.छ. and XV-34 वि.
यो नः पिता जनिता - XV-8 वि.छ.
यं कामये तं तमुग्रं कृणोमि - XV-15 वि.छ.
यं यं कामं कामयेत - XI-79 भा.
यः पार्थिवानि - XV-8 वि
यः सर्वज्ञः स सर्ववित् - XV-18 भा.वि.छ.
यत्याश्रमे तुरीये वै प्रीतिः - IX-53 वि.छ.
यत्रानन्दश्च मोदाश्च ...
- XV-61 वि. & XV-62 भा.छ.
या ओषधी पूर्वा जाता देवेभ्यः
- XVI-3 भा.वि.छ.

र

रौद्रं गवि - षोडशदेवताः - XIV-50 भा.वि.छ.

व

विश्वं सत्यं मघवाना - XII-6 वि.छ.
विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया
- IX-8, वि.छ.

श

श्रुतिसहाय्यरहितं अनुमानं न कुत्रचित् -XV-13 छ

स

स इमान् लोकनसृजत - XIV-23 भा.वि.छ.
स तत्र पर्येति ... - XV-62 वि.छ.
सत्यं भिदा सत्यं भिदा 12-5 वि.छ.
सत्यं ज्ञानमनन्तं ब्रह्म - XV-8 वि.छ.
XV-34 भा. and XV-35 छ.
सूत्रार्थो वर्ण्यते यत्र - IX-11 वि.छ.
सद्भावे साधुभावे च - IX-33 छ
सन्धिं च विग्रहं चैव ... - XIV-14 भा.
स यदि पितृलोककामो भवति - XI-78, भा.वि.छ.
स यदि स्त्रीलोककामो भवति :..
- XI-78 भा.वि.छ.
स्वःसुन्दरीभुजलतापरिरम्भणीधूः - XIV-4 भा.
सर्वेषु भूतेषु एतमेव - XV-8 वि.छ.
सोऽरोदीद्यदरोदीत्तद्रुदस्य रुद्रत्वं - XV-15 वि.छ.
सोऽश्नुते सर्वान् कामान् सह - XV-62 छ.

मध्वभाष्यात् पूर्वतनैकविंशति भाष्याणि

१.	भारतीविजयः	८.	वामनः	१५.	पिशाचः
२.	संविदानन्दः	९.	यादवप्रकाशः	१६.	वृत्तिकारः
३.	ब्रह्मघोषः	१०.	रामानुजः	१७.	विजयभट्टः
४.	शतानन्दः	११.	भर्तृप्रपञ्चः	१८.	विष्णुक्रान्तः
५.	उद्धर्तः	१२.	द्रविडः	१९.	वादीन्द्रः
६.	विजयः	१३.	ब्रह्मदत्तः	२०.	माधवदासः
७.	रुद्रभट्टः	१४.	भास्करः	२१.	सङ्करः

(IX-12 भावप्रकाशिका छ.वि.)

षोडशोपचाराः

१. अर्घ्यम्	५. पुनराचमनीयम्	९. यज्ञोपवीतम्	१३. धूपः
२. पाद्यम्	६. स्नानम्	१०. आसनम्	१४. दीपम्
३. आचमनीयम्	७. वस्त्रम्	११. गन्धः	१५. नैवेद्यम्
४. मधुपर्कः	८. भूषणम्	१२. पुष्पम्	१६. नमस्काराः

(xiv-36 भा.प्र.वि.छ.)

द्वात्रिंशदपराधाः

भुक्त्वा पीत्वाऽर्चनं दन्तकाष्ठाभक्ष्युपसर्पणम् ।
मैथुनानन्तरं चार्चा शवं स्पृष्ट्वोपसर्पणम् ॥

अर्चान्तरे मूत्रविष्ठाविसर्गौ सास्रभाषणम् ।
नीलवस्त्रावृतस्याग्नी राजान्नात्तिरूपागतिः ॥

उपस्पृश्याविधानैस्तु शुश्राषोरपि रुष्टता ।
अकर्मण्यप्रसूनार्चा रक्तकौपीनवस्त्रता ॥

कृष्णवस्त्रैर्हेरेः कर्मविधिः स्पृष्टिस्तमस्यपि ।
कामानुसारिता कृष्णवस्त्रस्य परिधूननम् ॥

श्वस्पृष्टिः कोलमांसात्तिर्जालपादासनं तथा ।
उपसर्पः पंकिले च चितिं स्पृष्ट्वोपसर्पणम् ॥

पिण्याकात्तिश्चोपसर्तुः पोत्रिमांसोपपादनम् ।
उपयातुर्मद्यपानं कुसुम्भदलभक्षणम् ।
परप्रावरणग्राहः स्वंजनादेरकल्पनम् ।
पुष्पदाने धूपदानं हरिवोढुरूपानहौ ॥

अभेरीहतुरभ्याप्तिरजीर्णान्नस्य पूजनम् ।
द्वात्रिंशदपराधास्तु कथिता गुरूदोषदाः ॥

वसुंधरायै कोलेन विष्णुना प्रभविष्णुना ॥

-XIV-36 भा.प्र.वि.

षडनूपचाराः

मुखवासश्च ताम्बूलं दर्पणं छत्रचामरे ।
पादुके चेति विज्ञेया उपचाराः परे बुधैः ॥ -XIV-36, भा.वि.छ.

अष्टभावपुष्पाणि

अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते ।।
ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तु सप्तमम् ।
सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः ।।

–XIV-37 भा.वि.छ.

अष्टमठमूलपुरुषाः

आचार्यैः अनुगृहीत प्रतिमाः

१. श्रीहृषीकेशतीर्थः - पलिमारुमठः - श्रीसीतानुजाभ्यां सहितः रघूत्तमः
२. श्रीनरहरितीर्थः - अदमारुमठः - श्रीचतुर्भुजः कालियमर्दनः हरिः
३. श्रीजनार्दनतीर्थः - कृष्णापुरमठः - श्रीकृष्णः द्विहस्तः भुजगस्य मर्दनः
४. श्री उपेन्द्रतीर्थः - पुत्तिगेमठः - श्रीविट्ठलः
५. श्री वामनतीर्थः - शिरूरुमठः - श्रीविट्ठलः
६. श्री विष्णुतीर्थः - सोदामठः - श्रीसूकरात्मकः (श्रीभूवराहः)
७. श्री रामतीर्थः - काणियूरुमठः - श्रीनृसिंहः
८. श्री अधोक्षजतीर्थः - पेजावरमठः - श्रीविट्ठलः

सुमध्वविजयव्याख्यानेषु उल्लिखित सर्वमूलग्रन्थरचितस्थलनिर्देशनम्

गीताभाष्यम् - रजतपीठपुरम् - (VI-23-32)
ब्रह्मसूत्रभाष्यम् -बदरिकाश्रम (अनन्तमठ)(IX-13-14)
महाभारततात्पर्यनिर्णयः रुप्यपीठपुरम् (उडुपि)
(अणुमध्वचरितम्, श्लो.८.९)
कृष्णामृतमहार्णवम् - कोक्कड XVI-40
कर्मनिर्णयः - उच्चभूति (उजिरे) XVI-41-45
गानशास्त्रम् - पशुपे (गोवा) (X-53. भा.प्र)

पाठभेदाः

सर्गः	श्लोकः	विश्वपतिपाठः	छलारीपाठः
IX	८	वासुदेवमगणय्य-	वासुदेवमगणेय-
	२०	नन्दितीर्थ-	नन्दतीर्थ-
	२१	अनघर्घमप्यहो	अनर्घ्यमप्यहो
	२३	अनर्घगुणमूल्यं	अनर्घ्यगुणमूल्यं
X	४	पान्थजनैः	पान्थजनं
	६	न अनेनेन अनेन	न अनेन अनेनेन

सर्गः	श्लोकः	विश्वपतिपाठः	छलारीपाठः
	४१	सशम्भुशक्रं	सशर्वशक्रं
	५४	काममायामिहृत्	काममायामहृत्
XI	८	परिभाति	प्रतिभाति
	१४	अगणय्य-	अगणेय-
	२९	शुकनिस्स्वना	शुकनिस्वना
	३१	निवसानि	सुवसनानि
	३३	परिलोडिताभिः	प्रतिलोडिताभिः
	४८	न हि	न तु
	५४	अपिचोदिता	पतिचोदिता
	६२	न समस्ति दोषरहिते	न समस्तदोषरहिते
	७५	समानन्दयतीह	सदानन्दयतीह
XII	१०	पृष्टः	प्रष्टुः
	२०	कश्चित्	कोऽपि
	२६	वादव्याजाक्षेपकामाः	वादव्याजात्क्षेपकामाः
	२७	अशुचीच्छः	अशुचीच्छुः
	२८	तेजोराजीराजितेन	तेजोराशीराजितेन
	३२	वत्सानुवृत्यां	वत्सानुवृत्या
XIII	५	दृढभावात्	दृढभावान्
	६	दूरभुवश्च	दूरभवैश्च
	१०	व्यजानन्	अजानन्
	१८	भुवनत्रयभारिणं	भुवनत्रयधारिणं
	२६	स्फुटानुयातं	स्फुटानुयान्तं
	३६	प्रतिमालक्षणलक्षणाय	प्रतिमालक्षणदर्शनाय
	४०	अनुकूलगुणस्वरादिभाजा	अनुरूपगुणस्वरादिभाजा
	४९	प्रतिभावितमात्मना	प्रतिपादितमात्मना
	५२	गुणाढ्यं भज	गुणाढ्यं स्मर
	५५	भाष्याण्यपि	भाष्याण्यथ
	६०	स्फुटमाचरन्त	भृशमाचरन्त
XIV	२१	सपदि	झटिति
	२२	सिचययवनिकां	असिचयवनिकां
	२५	नाऽदिशन्नो	नोऽदिशन्नो

सर्गः	श्लोकः	विश्वपतिपाठः	छलारीपाठः
	२६	प्रतीच्यां	प्रतीच्याः
	२६	स्वर्निम्नगाद्यैश्च तीर्थैः	स्वर्निम्नगाद्यैः सुतीर्थैः
	३५	पुष्पराज्याऽऽर्चिचत्सः	पुष्पराज्यार्चयत्सः
	३८	मुनिसुरनराणां	सुरमुनिनराणां
	४०	सूक्ष्मवस्त्रास्तृते	सूक्ष्मवस्त्रावृते
	४५	संविद्रते	संविन्दते
XV	१९	नोरीचिकीर्षति	नाङ्गीचिकीर्षति
	२२	धर्मता	धर्मिता
	२९	अङ्गोतापस	अहो तापस
	३७	नित्यसन्त्यागसंश्रवी	नित्यं सन्त्यागसंश्रवी
	३९	एतयोः	तत्त्वयोः
	४५	पुंस्त्वाच्चैत्रवादित्यस्ता	पुंस्त्वाच्चैत्रबदित्यस्ताः
	४५	सर्वज्ञे	सार्वज्ञो
	४५	केवलानुमा	केवलानुमाः
	४६	दुःखाकरोऽतिघोरः	दुःखीकरोऽतिघोरः
	४८	निर्विशेषिता	निर्विशेषता
	५०	भजेत्	व्रजेत्
	५१	मुक्ते निरस्यता	मुक्तेः निरस्यता
	५२	देहवत्त्वतः	देहवत्वतः
	६३	विष्णुर्मोक्षस्य दातेति	विष्णुर्मोक्षादिदातेति
	७२	अभाषत	अवोचत्
	९५	संस्थाप्य	निक्षिप्य
	१०३	पर्यशोधयत्	भुव्यशोधयत्
	११०	योगिलभ्यम्	योगलभ्यम्
	११६	यातं	प्राप्तं
	१३०	भास्करा इव	अदित्या इव
XVI	१०	अधिकघनैः	अधिकथनैः
	१८	तत्र	गाढं
	२०	लोठ्यमानाः	लोड्यमानाः
	२६	नालिकेरात्	नारिकेलात्
	२९	प्रसभरसादपिप्रयत्तौ	प्रसभरसादतिप्रयत्नौ

सर्गः	श्लोकः	विश्वपतिपाठः	छलारीपाठः
	३४	लेखिन्यां	लेखिन्या
	३५	ही	वै
	३५	अम्भोधिर्नगसरितां	अम्भोधिर्नदसरितां
	४१	अभियात	अपियात
	४४	परममवेत्य	परममवेक्ष्य
	४४	सङ्घर्षात्क्षुभितमनसा	सङ्घर्षक्षुभितमनसा
	४७	त्रिदशनरोपभोग्यमन्नं	त्रिदशनरोपभोज्यमन्नं
	५१	सुमकुटमौलिभिः	सुमुकुटमौलिभिः
	५३	प्रकाशयन्तः	प्रसादयन्तः
	५४	तदैतरेयी	तदैतरेयं
	५५	आर्चिचन	आर्चयन्

भावप्रकाशिकागततुळुनामानि

जराघटितगोत्रः (९/४४)	मरिडिताय:	गण्डवाटः १६/२५	कोडिनजाडि
गोविषयः १०/५३	पशुपे	पूर्ववाटः १६/३१	मूडेम्बाडि
चोलजः १२/२	पद्मतीर्थः	पारन्तीसुरसदनम् १६/३६	केकुटदेवल
द्विपि(पुरिः) १२/२	पुण्डरीकपुरिः	सरिदन्तरम् १६/३८	इडेतुदे
स्वरामः १२(५४)	कावु	उच्च १६/४१	उजेर्य
प्राग्र्यवाटः १२/५४	कोडिपाडि	पदार्थदीपिकोद्भोदिकागत	तुळुनामानि
विषयः १३/९	कबेनाड	मदनेश्वरः १२/९	मधूः
ग्रामद्वयम् १३/२४	वाटः, समुवायः	स्तम्भसिंह १३/२१	कबेसिंह (जयसिंह)
गुहः १३/४३	सुब्रह्मण्यपण्डितः	वाटः समवाय १३/२४	पीडि, कुडे
भानुः १३/५०	कश्चित् प्राभाकर-प्रचुरः	तुङ्गा १६/९ तुङ्गभद्रातीर	खण्डकलशख्य
अमरालयः १५/१	कुडिल् (कुडेल्)	वैद्यनाथेश्वरः १६/४०	कोक्कड
सन्मठः(एकवटकः)१५/१४०	तान्त्र्य	स्वभक्त १५/४०	इडेप्पाडित्ताय

श्रीसुमध्वविजयान्तर्गतसूक्तानि

अ

अपरस्परसङ्गतानि भाष्याण्यपि सर्वाणि न
मानतां व्रजेयुः (XIII-55)

क

कमपि सकलहृद्यं कल्पयेन्नैव दैवम् - (XIV-52)
कुर्मः सर्वं तत्परानुग्रहेण - (X-17)
क्रोष्टूनां श्वकलकलप्रदं विरावं पश्चास्यो न
हि गणयेदुदारवीर्यः - (XVI-22)

ग

गमनासनसङ्कथादिलीलाः स्मृतिमात्रेण
भवापवर्गदत्रिः। (XIII-42)
गौणविमुक्तये गुणाढ्यं भज देवं
वसुदेवसुतमेव (XIII-52)
गंतु प्रभुः प्रसभज्ञोऽपि तथा व्यधात् सः (X-19)

त

तोके सत्ने सूकरं केसरीव (XII-44)

ध

धर्माद्यभावे नो मान प्रत्यक्षैकप्रमाणिनः (XV - 43)

न

ननु विमृश्य कृती कुरुतेऽखिलम् - (XIII-68)
न हि दाक्ष्यस्य समोऽपरो गुणोऽस्ति (XIII-14)
नारविन्दमकरन्दमाप्तवानच्छपिच्छ इव
वाञ्छतीतरत् (IX-9)
नीतिं प्रकाशयितुमेव विपत्सुकार्यां तथा
व्यधात् सः। (X-19)

प

पिपासुरमृतं पिबन्निव (IX-37)

भ

भाग्यदैवमिह योग्यतानुगम् (IX-23)

व

विष्णोर्मौक्षस्य दातेति विश्वं भवति शोभनम्।
(XV-63)

म

मधु मधुकरराजो निष्पतन् पौष्पमाप्तुम्,
ननु परिचयहीनः काननेऽपि प्रभुः स्यात् (XIV-5)
मोहपीतलवणोदको मुहुः प्राक्

श

शुचिहरिपदमापत्सम्पदोराश्रितानां न हि
भवति विशेषः स्वप्रकाशोन्नतानाम् - (XIV-46)
श्रवणेनानुवादेन मननेनावृथाकरोत्।
कालं वेदन्तशास्त्रस्य (XV-99)

स

सिद्धये स्याद्धि यत्नः (XIV-21)
सिंहराडिव सृगालसमूहे (X-13)

श्रीसुमध्वविजय श्लोकानुक्रमणिका

अ

अकामानामनेकेषाम्	१५	१०४
अक्लिष्टं तत्सूत्रभाष्यम्	१२	१३
अखण्डखण्डनन्यायान्	१५	२७
अखिलखलकुलानाम्	१४	६
अगमदुचितमन्त्रैस्तूदयानाम्	१४	१४
अग्निशर्ममुखपञ्चषैर्द्विजैः	९	७
अच्युतप्रमतिरच्युतप्रियम्	९	३०
अतत्त्वावेदकं मानमिति	१५	३२
अतिकांतकाश्चिपदकाश्चिमिलत्	११	७०
अतिचित्रधाम्नि निजधाम्नि	११	२
अतिदक्षमतिं सपादलक्षे	१३	५१
अतिधवलितदन्ता दन्तकाष्ठैः	१४	८
अतिलोलदृशां समीक्षितुम्	१३	३७
अतिलौकिकान् रमयतो	११	६१
अतिसम्भ्रमतः परिभ्रमन्तम्	१३	१५
अतिसुन्दरमन्दहासराजन्	१३	३४
अतिसुन्दराः सुरभयः	११	२५
अथ तत्क्षणघट्टितोरुघण्टा	१३	१६
अथ दशशतशोचिष्याप्रयाति	१४	२६
अथ प्रत्युक्तं विविधान्	१५	६५
अतिभासुरकर्णभासितश्रीः	१३	३५
अथ माधवतीमपास्य	१३	३
अथ वेदपुराणभारतादि	१३	६०
अदीर्घान्याभिधाना ये	१५	१२९
अधार्याणीतरजनैः	१५	६७
अधिकधिषणमेनं व्याख्यया	१४	४५
अधिकारिणां गुणविशेषवशात्	११	७३
अधिकारिणां फलमलम्	११	४
अनतिपरिचितस्याप्यस्य सोऽयम्	१४	५
अनतिविरलभावा अप्यनन्योन्यसङ्गाः	१४	२०
अनयोः प्रथमे शिष्याः	१५	१२७
अनन्तमतिकारुण्यकल्पद्रुमवतो	१५	१०१
अनन्तोऽर्थः प्रकटितः	१५	८२
अनुपालिताः स्वदयितैर्दयिताः	११	३६
अनुभूयते सुखमनन्तसखैः	११	२४
अनैकान्तिकता हेतोः	१५	५३
अन्यत्र च चोरान्	१०	२१
अपरिमितमनीषस्योल्लसत्	१४	२८
अपरोऽपीष्यतेऽस्माभिः	१५	८६
अपि बुद्ध्यादिरहितः	१५	४९
अपि लीलया कुवलयोल्लसितैः	११	३४
अप्यल्पोऽसौ न ह्युपेक्षांबभूवे	१२	२८
अप्रकम्प्यवपुषं सुरासुरैः	१०	१४
अप्रमेयमतिशास्त्रमीदृशम्	९	२२
अप्लवदेवनदीतरणं ते	१०	१६
अभावभावस्याभावाद्भावरूपस्य	१५	३६
अभिकान्तमुन्नमितकान्तकुचा	११	५५
अभिदधति मुनींद्रा	१४	२९
अभिनन्दयन् हिमऋतुं सुसखा	११	४४
अमरैरमारानुगैः मुनींद्रैः	१३	७
अमृतमपि निरीक्ष्यस्रावि	१४	१३
अमृतस्रगुत्तमफलप्रसवान्	११	४६
अयमप्रतिवारणः प्रयाणे	१३	८
अयमेव गोविषयतः	१०	५३
अरुणाश्मवर्णतनवस्तनवः	११	२८

अलमलमनुवादेनानुवाच्येत	१४	४४
अवतीर्य पुरैव वाहनात्	१३	२२
अवदत् स कथां रथाङ्गपाणेः	१३	४०
अवधार्य यदेतिकार्यमार्यः	१३	६१
अवधार्य विशेषकारिशङ्ख-	१३	१२
अवनिवनवनध्रुग्वायुखाहम्महत्सु	१४	४८
अवसरमधिगम्य भ्रूविजृम्भादभीष्टो	१४	४१
अवाप्तवान् पुनरिषुपातमस्मरत्	१०	५१
अविदितरसभेदं शीतलं लध्वगन्धम्	१४	३३
अशनैः शनकैरिवाव्रजन्तम्	१३	२८
अशुभानपहाय मायिजुष्टान्	१३	४
असत्वादित्यसौ हेतुः	१५	३९
असमोत्तमो मतोऽसौ	१०	४७
असौ दास्यं ध्रुवं यातम्	१५	११८
अस्तदूषणमवंध्यभाषणम्	९	११
अहरो दुरागमतमः स्वगोगणैः	१६	५६
अहो तापस नो शून्यम्	१५	२९
अहो महाबोधसेवा-	१५	११४
अम्भोधेस्त्वरिततरोर्मिपाणिमृष्टे	१६	१६

आ

आकर्ण्येत्थं तस्य वाणीमथान्यो	१२	१७
आकृष्टोऽस्य गुणैर्व्याप्यैः	१५	१२०
आक्षेपं तमसहमान उच्चमानः	१६	५
आङादेशादुत्तरं रादिशब्दम्	१२	४०
आत्मनः प्रियतमक्रतोरमुम्	९	४५
आदर्शं गुणगणदर्शने मुरारेः	१६	५३
आदौ ह्रस्वत्वेन वत्सानुवृत्या	१२	३२
आनन्दतीर्थभगवद्वदनेन्दुबिम्बम्	१५	१४१
आननन्द सहि मध्वशास्त्रमाकर्णयन्	९	३७
आनम्रैः सुमुकुटमौलिभिः	१६	५१
आम्नायमाम्नायविदाम्	१०	३३
आम्नायं ये पेठुराम्नायपूर्वम्	१२	३०
आम्नायानाममानत्वे धर्मादेः	१५	४३
आयास्यन् किल सरिदंतराख्यदेशम्	१६	३८
आरुरोह दुरारोहं	१५	११९
आर्द्राङ्गाः सपदि निमज्जनात् सरस्याम्	१६	११
अश्चर्यरत्नेष्वधिकं जगत्त्रये-	११	७५
आश्रमान्तरमवाप्य कृष्णतः	९	२
आश्वस्तौ शुचिहृदिमावनूनमाना	१६	२९
आस्तामास्तामेष वो विश्वमोषो	१२	४७
आस्माकेऽपेक्षिते पक्षे मोक्षम्	१५	४७
आस्विन्नावलसतरौ गुरोः	१६	२८

इ

इज्यते यज्ञशीलैः स यज्ञः	११	७६
इति तातवचो निशम्य किंचित्	१३	५३
इति तैरुदीरितमुदारमतिर्वचनम्	११	५
इति निगदित मायावादिविद्वेषवेषे	१२	५४
इति निगदितवन्तस्तत्र वृन्दारकेन्द्रा	१६	५८
इति भुवनविभूषणस्य	१०	५५
इति मायिजनेन तत्र तत्र	१३	६५
इति विविधगोधारावारैः	१०	५६
इतिहासपुराणाब्देः	१५	७६
इतीरयन् पञ्चदशैष यूनः	१०	३९
इत्थं सद्भिः सद्भिरर्च्यो धरायाम्	१५	१४०
इत्यर्थितो व्यधान्मध्वः	१५	८८
इत्यादीन् दर्शयंत्यर्थान्	१५	६४
इत्याद्येते कार्यमालोच्य काले	१२	२५
इत्याद्यैरपि चरितैरनन्यसाध्यैः	१६	२४
इत्युक्तस्यैरेष विस्तारिबुद्धेः प्रामुम्	१२	३९
इत्यूचे धरणिसुरेण केवलं नो	१६	४९

इदमित्थमितीक्षणैः नराणाम्	१३	२७
इनविरहमसह्यं प्राप्य पद्मैः	१४	५२
इमान् स्वस्वपूर्वाश्रयानात्म	१०	९
ई		
ईश्वरो न सुखी तेन	१५	६०
उ		
उक्तमुक्तमभिधेयमुत्तमम्	९	९
उक्ताङ्गेभ्यः कादिकान् व्यञ्जयन्तम्	१२	३१
उक्तिभिस्तमसकृत् सुयुक्तिभिः	९	३४
उन्मत्तप्रलपितवन्न तद्धि मानम्	१६	३
उपचरति नितान्तं हन्त	१४	४
उपचारनन्दनमिदं द्युवनम्	११	३८
उदयति विनताया नन्दने	१४	७
उदयमिति इवास्तं यंश्च	१४	४६
उपयाहि यशः शशाङ्कगौरम्	१३	६४
ए		
एकविंशतिकुभाष्यदूषकम्	९	१२
एकं तत्त्वं वष्टिमायामयीयम्	१२	४
एकाकी किल यश्चक्रे	१५	८०
एतादृग्बलविभवः स तस्य कंठम्	१६	२७
एवं चेत् कारणं मा स्म	१५	३०
एवं चेद्भिमतो ज्ञानी	१५	१७
एवं स्वरूपदेहत्वम्	१५	५५
एषु दभ्रमतीन् दभ्रान्	१५	८५
औ		
औपाधिकोऽस्य भेदश्चेत्	१५	२१
क		
कथनं तदुदारधैर्यसारम्	१३	४१
कदाचिच्चोराणां निकरम्	१०	२०
कामत्रासविहीनस्य तस्य	१५	११२
कमलापतिः कमलयाऽमलया	११	१७
कर्मभिःसकलकौतुकैः	९	२९
करपल्लवैस्तरलितैर्ललितैः	११	३२
कलभाषण एव सूरिपोतः	१३	४७
कलिताञ्जलिना स्फुटानुयातम्	१३	२६
कल्लोलैः करिनिकरैरिवानिवार्यैः	१६	२०
कवीन्द्रतिलको विद्वच्छेखरः	१५	११७
कवीन्द्रैर्न समाप्यन्ते सङ्गृह्यापि	१५	७३
कस्तन्त्रसारं सम्प्राप्य	१५	७८
कारणं परिणामि स्याद्	१५	१४
काल्पीः क्लृप्तीर्व्यञ्जयंश्छांदसीश्च	१२	३५
किंचाखण्डेऽत्र वाक्यानि	१५	३५
कुचकुम्भपूर्णतरकान्तिसुधा	११	३३
कृतपरमसपर्यः सान्द्रसच्चन्दनाम्भः	१४	३८
कृतमपकृतमार्यैः क्षम्यताम्	१४	२
कृष्णाभीष्टा शास्त्रविस्पष्टसंज्ञा	१२	४२
कोऽपि तं गुणविशेषविच्च	९	२३
क्वचिच्छिलाच्छटा भ्रमादमुम्	१०	२२
क्वचिदीश्वरदेवमेष भूपम्	१०	४
क्रीतवान् नरपतिर्महादरम्	९	२५
क्षणदामिह तावदूषिवांसम्	१३	१०
क्षणदासु विचक्षणःस वीक्ष्य	१३	६७
क्षेत्राग्र्यं त्रिभुवनवैद्यनाथनाथं	१६	४०
ख		
खपुष्पवदखण्डत्वाद्व्यतिरिक्तम्	१५	४२
ग		
गणयेद्रमाऽस्य न गुणान्	११	१९
गमनासनसङ्कथादिलीलाः	१३	४२
गमनोत्सवविस्मितैर्निषेव्यो	१३	६

गाङ्गमङ्गलतरङ्गभङ्गद	९	२७
गाम्भीर्यं धृतिमुरुवीर्यमार्यभावम्	१०	१८
गाम्भीर्यात् स्वनमधरीकरोति सिन्धोः	१६	१७
गाम्भीर्याद्यैर्युक्तमौदार्यकार्यैः	१२	३४
गीतातात्पर्यभाष्याभ्यामाभ्याम्	१५	७५
गीर्वाणैर्विजयमहोत्सवस्य पूजाम्	१६	५२
गुणादिभेदे सम्बन्धमवेक्ष्यापि	१५	२३
गुरुचरणसरोजद्वन्द्वनिर्णेजनाम्भो	१४	३२
गुरुप्रबर्हस्य पदारविंदम्	१०	३६
गुर्वाज्ञागौरवाट्टीकां कुर्वन्	१५	७२
गोपिकाप्रणयिनः श्रियः पतेः	९	४१
गोभिस्तमांस्यपनयन् गतिदम्	१४	५५
गोमत्यास्तटनिकटेऽच्छकीर्तिचन्द्रम्	१६	२
गोलीलास्वतिशयिनावगाधभावा-	१५	१६
गौणैस्तर्कैर्गौणवाक्याभिगुप्तैः	१६	१५
ग्रन्थेभ्य एभ्योऽगाधेभ्यो	१५	८७
ग्रामण्यो ब्राह्मणाग्रण्यः	१५	१३७
ग्रामे ग्रामे वार्यतां माननैषाम्	१२	२४

घ

घटनोपनिषत्सु नाल्पबुद्धेः	१३	५७
घनरसनिकरोऽसावन्तरत्यन्तशुद्धो	१४	२७

च

चतुरोऽसौ प्रवचने	१५	१०२
चरमसमयसुप्ताः पूर्वमुत्थाय	१४	९
चिच्छेधातुच्छधिषणस्तांस्तदा	१५	६६
चूर्णकृद्विविधशङ्खचूर्णकः	९	२१
चोदयन्तमथ गन्तुमादरात्	९	१

छ

छन्दःसार्थं सार्थमत्रामुनेत्थम्	१२	३७
छन्दोभ्यश्च्युतरससङ्ग्रहप्रवीणान्	१६	४३

ज

जगत्प्रदीपायितगोगणाढ्ये	१०	२९
जघनांशुकैरवयवाभरणैः	११	५२
जननं समये समये जगतः	१०	४५
जन्मस्थित्यवसितिदायिनं कटाक्षम्	१६	२३
ज्यायसो दूषणेनैव	१५	३८

ज्ञ

ज्ञात्रादिरूपमस्य स्यात्	१५	५४
ज्ञानप्रयत्नवाञ्छावान्	१५	५०
ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे	१२	७

त

ततःस्वतःप्रमाणेन	१५	६३
तत्रतत्र ससभासु भासुरो	९	२०
तत्र देवमभिवन्द्य यातवान्	९	१४
तत्रानन्तस्वान्तवेदान्तिसिंहे	१२	१
तदनादिकालमितमुक्तिरतेरगणय्य	११	१४
तदा तदाननांभोजात्	१५	३
तनुमध्यमा निजगृहाणि गताः	११	५३
तमरुणमणिवर्णं दिव्यदेहाख्यगेहे	१४	३७
तरणिभिरिव गौरैरूर्ध्वपुण्ड्रैः	१४	३०
तरुणप्रभाकरसहस्ररुचम्	११	१८
तव वेदनदीर्विगाह्य भूयः	१३	६३
तस्य त्रासात् पृष्ठतस्तिष्ठतोऽभूत्	१२	४५
तस्य वल्लभतमाऽऽस वासभूः	९	४
तस्य व्याप्यैः शिष्यजालैस्तुगौणैः	१२	१४
तं विष्णुमङ्गलगतं बहुलप्रभोदम्	१३	६९
तां पद्यप्रणिगदितां तु	१६	५०
तिमिरनिकरकुंभिव्रातमत्यंततीव्रम्	१४	१५
तीर्थार्थं पृथुतरवप्रपातिवाराम्	१६	७
तीर्थेषु तीर्थेषु च सौख्यतीर्थः	१०	२६

तीव्रव्रतोऽतीन्द्रियविद्	१५	११५
तूर्णं तीर्णादभ्रमार्गोऽथ सार्यः	१२	४३
तेजः शङ्कामात्रतो यद्विलीनम्	१२	१८
तेजोविद्वच्चक्रचन्द्रस्यलीनम्	१२	४८
तेन सम्प्रार्थितं प्राप्तम्	१५	११६
तेनाथ मुक्तैरतिविस्मयस्तैः	१०	४१
तेनोपयातेन कदाचनाथ	१०	३७
ते पृथक् पृथगमुं स्वशाखया	९	१६
त्रिदिवादिलभ्यमपि नास्य फलम्	११	६
त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्ल-	१४	२३

द

दक्षपक्षविहृतेन ताडयन्	९	३५
दयिताऽस्य सती गुणानुरूपा	१३	४४
दलितेन्द्रनीलमणिनीलविभ्रमम्	१४	५३
दशमतिशिष्यः कश्चिच्छुभजनतायै	१०	२
दशोपनिषदो देवीः	१५	७४
दण्डार्हबुद्धिविषयो	१०	१९
दिशं प्रयान्तं शशिनः	१५	१०३
दुर्मन्त्रैः खलपटलैः प्रचोद्यमानो	१६	३९
दुष्टात्माऽसौ भद्रमेकाकिनं यः	१२	४४
दुःखव्याप्तं सुखं बद्धे	१५	५१
दुःखं परिजिहीर्षन् यः सुखम्	१५	१९
दुःखाकरोति यदैवम्	१५	४६
दृष्टान्तो यस्य नेष्टोऽयम्	१५	६१
द्वन्द्वदुःखानले वीरो	१५	१०५

ध

धत्तेरुपाण्यनन्तान्यपि भुवनपतेः	१२	५२
धनमिव सधनायेभ्योऽर्कसूनुः	१४	२५
धन्योऽमह्यत नाकिनामहितहृद्भाणः	१०	५४
धृतमातपवारणं वरेण्यम्	१३	१७

न

नखनिर्जितपद्मरागरागम्	१३	२९
न जघास न सुष्वाप	१५	९४
न जडा जले पतत साहसादहो	१०	११
नतमुन्नमय्य मुखचन्द्रमसम्	११	५८
ननु तत्र विश्वविभवैकपदम्	११	८
नन्नु विप्रतिपन्नः स्यत्	१५	५२
ननु सौख्यादिमान्नेशो	१५	१६
नन्वनन्यशरणात्मनां सताम्	९	४०
नवमल्लिकास्रजमभीष्टतमः	११	४१
न पौरुषेयं वचनम्	१५	४४
न भवन्ति यत्र मृतिजन्मजराः	११	२३
नमस्ते प्राणेश प्रणतविभवा	१६	५७
न रतिः श्रमादिखचिता नियमात्	११	६२
नरदेवदिदृक्षया समेता	१३	२४
नवकंबुकन्ठमहिमांशुमहो	११	६७
नवभानुभाः कनककान्तिपरम्	११	७४
न वानरेन्द्रस्य विलङ्घिताब्धेः	१०	२८
न विश्वकृत् पशुपतिः	१५	१५
नाकींद्रास्तमवनिभागमावसंतम्	१६	५४
नात्यत्वरा नातिरया न स्खलन्ति	१५	४
नानासुभाषितस्तोत्रगाथादि-	१५	८४
नानेनेनानेनानेनोनूनेन	१०	६
नापरेषु रतिमाययौ	९	१९
नारायणोऽनन्तगुणो	१५	८
निखिलागमावगमितैरमितैः	११	७२
निजधर्मरतो गृहिप्रबर्हः	१३	५४
निन्ये तां गिरिमिव वानरीकृतात्मा	१६	९
निम्नभूरिव सतीः प्रजा	९	२८
नियुद्धसिध्यै युगपद्धि	१०	३८

निर्यत्नं वटुमधिरुह्य १६ ३०
निर्विकारचरितोऽपि परीतः १० १३
निष्कलङ्कमिव चन्द्रमण्डलम् ९ ३६
निहितमुचितमुच्चं योगपीठम् १४ १८
निःस्वानां कतिपयभुक्तियुक्तभक्तम् १६ ४७
नीचानामवचवचांस्यजीगणन्नो १६ २२
नेदृशैः कविभिरेव केवलम् ९ २७

प

पदं पशोर्वा विनतातनूजः १० ३०
पद्मेशपदपद्माश्रित्कृत्याङ्गम् १५ ७
परतत्त्वविवर्तत्वादपरस्याखिलस्य च १५ २६
परपक्षरथारूढं खरतर्कमहायुधम् १५ २
परमथ परमान्नं प्राप्तमेवाप्रयासम् १४ ३९
परमागमार्थवरशास्त्रमिदम् ११ ७
परमाण्वादिदेशेषु व्याप्यै १५ ५८
परमेश्वरयोः प्रसादयोगात् १३ ४५
परिणायकानुपवनाभिमुखा ११ २७
परिपूर्णचन्द्रपरिहासिमुखम् ११ ६६
परिपूर्णशशाङ्कबिम्बशङ्काविषयम् १३ ३३
परिवारजना न मार्गदुःखम् १३ २०
परिवृढघनसङ्घे राजसिंहोर्जशक्त्या १४ १
परिवृतमवनम्रैर्ग्रामणीग्राम्यपूर्वैः १४ ३
पर्यैक्षि प्रभुरितरैः शिवाग्निपूर्वैः १६ ३३
पवनांशानुजो जित्वा १५ १०९
पञ्चाशन्नरपनरोपनीतमात्राम् १६ ३१
पञ्चास्यः श्वभिरिव वैविहीनसारैः १६ ३५
पादैः पुनन्तः पृथिवीम् १५ १३०
पारन्तीसुरसदनं विशालसंवित् १६ ३६
पारम्पर्येणागतं तत्त्वशास्त्रम् १२ २२
पाराशर्यः परतत्त्वप्रसिद्धयै १० २५
पारिव्राज्यं प्रार्थयंतम् १५ ९३
पाण्डित्यं परममवेक्ष्य तस्य १६ ४४
पुरतो मधुरस्वरैः वदद्भिः १३ २५
पुरतो विसृताः समधिशुद्धयै १३ ११
पुराणस्थानपांथानाम् १५ ७७
पूर्णदृष्टिजलधेर्गृहीतवान् ९ ३२
पूर्वाशामापूर्य विश्वप्रकाशी १२ ४९
पृथिवीपतिनाऽनुगम्यमानो १३ २३
पृथुदर्शनमुत्थितं कृतार्थम् १३ १
पृथुवक्षसमुन्नतां सभित्तिम् १३ ३२
पृथुवृत्ततुङ्गकठिनोरसिजद्वय ११ ५६
प्रकारं प्रकटीकर्तुमारभ्य १० ५
प्रगतासु तासु रणितैरशना- ११ ३५
प्रचुरांतरप्रवचनं फणिराड् ११ १
प्रणतिपरमकृत्याः सम्मतेर्ये १४ ४२
प्रणतिरभसधूलीबद्धशोभाविशेषा १४ १७
प्रणम्यगुरुमादरादथ ९ ५५
प्रणम्याचष्टशिष्टोऽसौ क्षम्यताम् १५ ७०
प्रतिपादितमात्मना यथार्थम् १३ ४९
प्रधानमपराधीनं कारणम् १५ ९
प्रमदातिरेकमुपयातवता ११ ४७
प्रश्नःपृष्टः खण्ड्यते तेन नूनम् १२ १०
प्राच्यं शस्त्रं यत् सपादं तु लक्षम् १२ ११
प्राज्यप्रज्ञः प्राज्यया प्रज्ञयाऽसौ १२ ३८
प्राज्ञवित्तमयमाप्तुमागतैः ९ १५
प्राज्ञो राज्ञां त्रिदिवपदवीम् १० ४९
प्राप स नारायणतः १० २४
प्राप्तस्ततो हस्तिनराजधानीम् १० ३४
प्रीतिमार्यतिरुत्तमां पुरा ९ ३१
प्रेमामृतप्रसन्नास्यस्मिताङ्गा- १५ ९८

प्लवैरपेतामवलोक्य सिन्धुम् १० २७

ब

बभुरमलगुणानां शोभनाच्छादनानाम् १४ १९
बलाय सर्वानुमानां वेदाः १५ १३
बहवो गृहिणोऽप्यस्मात् १५ १३५
बालसङ्गमपि बोधयद्भृशम् ९ १०
बाहुल्येन ह्येतदुक्त्वा खलु १२ १६
ब्रह्मवेदननिविष्टचेतसाम् ९ ५१
ब्रूयुरौपाधिकं भेदम् १५ २२

भ

भक्तैरनुगिरं नीतं प्रार्थितो १५ १०६
भगवत्तमस्य विपुलप्रमतेः ११ ३
भगवत्समीपमुपयातवताम् ११ २२
भगवत्युदिते सगोविलासे १३ ५०
भगवंश्चित्रकवितां लौकिकीम् १५ ८३
भगवानिह नः स्वकिंकराणाम् १३ २
भवनं विभाति भुवनैकपतेः ११ १५
भित्वाभुवं देवनदी जगाम १० ३५
भीतैररातेरतिमात्रमत्र १० ३१
भीमत्वे सह सहजैः प्रतिष्ठितः १६ ३७
भुवनाद्भुतमध्वचेष्टितम् १० ३
भुवनत्रयधारिणं मुकुन्दम् १३ १८
भूयोबोधस्ततो भूयो १५ १
भूरिभक्तिभराः केचिदप्यल्पश्रुतिसंपदः १५ १३४
भ्रष्टा भाट्टा न प्रभाकृत्प्रभा १२ ८

म

मज्जन्तं पृथुलहरीनिगूढमूर्तिम् १६ २१
मणिराजिराजितमहामुकुटम् ११ ६५
मत्तदुर्वादिमातङ्गतर्कमस्तकदारणे १५ १२४
मदनेश्वरवल्लभप्रदेशे प्रभुमायान्तम् १३ २१
मधुरपतगरावाः शन्तनैशाम्बुबाष्पाः १४ १६
मधुरस्वरास्ततपतत्रततिप्रकटान्त- ११ ४२
मध्वप्रशिष्या बहवः १५ १३२
मध्वानुजे मध्वनाथो १५ ११३
मध्वेन्दोर्नित्यसम्बन्धान्निस्तमः १५ ९१
मन्यन्ते शून्यमेवान्ये १५ २४
मरकतमणिवर्णे भूतधात्रीपुरन्ध्राः १४ ४७
मर्त्यामर्त्यामर्त्यविद्विट्पुरोगम् १२ ५
महानन्दतीर्थस्य ये भाष्यभावम् ११ ७९
मन्दहासमृदुसुन्दराननम् ९ ३
मन्दहासमृदुसुन्दराननम् ९ ४३
माध्वं नियोगं ये प्रायो १५ १३६
मानिनोऽपि हि वशीचकार ९ ४४
मानैर्मान्यैर्भासमानोऽसमानैः १२ २९
मा मैनं भुवनगुरुम् १६ १३
माङ्गल्याङ्गव्यक्तभावा त्रिलोकीम् १२ ३३
मुक्तो रुपादिवित्सत्वाज्जडान्यत्वे १५ ५९
मृदुकम्रशय्यमनुरागवताम् ११ ५४
मृदुगामिविमानसम्पदो- १४ ५४
मृदुसूक्ष्मघनारुणाविकाच्छ- १३ ३१
मौकुन्दे सुन्दरे रूपे १५ १११
मोक्षशास्त्रामृताम्भोधिसेवया १५ १३१

य

यच्चेतनाचेतनयोः १५ ११
यतधीर्गुरुचक्रिमूर्तिपूर्णम् १३ १३
यतयो गृहिणोऽथ वर्णिमुख्याः १३ १९
यतवचसि जनेऽस्मिन्नानते १४ २२
यथेष्टमध्यास्त शिलां यमी १५ १०८
यदि चेद्दृगुपास्यतेऽस्य रुपम् १३ ५९
यदि तेषु निराग्रहान्तराः स्मः १३ ५६

यदि नाभविष्यदिह विभ्रमता-	११	११
यद्यद्वैतं कर्कशैर्गौणतर्कै	१२	२०
यद्यप्येवं न ह्युपेक्षो विपक्षः	१२	२१
यद्वत्सिंहं ग्रामसिंहोऽशुचीच्छो	१२	२७
यमशेषभवप्रभवः स्मरताम्	१०	७
यस्तु तार्किकशिरवामणिः	९	१८
यस्त्रयीसकलपक्षशिक्षकः	९	१७
यं तत्त्वावेदकं वेद वेदांशम्	१५	३३
यं यं प्रापद्भूरिचित्तःप्रदेशम्	१२	९
यं यं सुखी कामयते-	११	७८
याज्यया समुचितानुवाक्यया	९	४८
यानि यानि चरितानि	९	५२
युक्ताया युक्तिमालायाः	१५	९०
युगपद्रचयन्नेनां कदाचित्	१५	८९
येषां विद्या शाङ्करी शङ्करीनो	१२	१९
यो दुःखसमवायोऽयम्	१५	२०
यो वेद वेदितार्थानां नित्यम्	१५	३७
योऽसौ देवो विश्वदीपः	१०	१७

र

रचितं ननु सूत्रमत्र मानम्	१३	५५
रभसावपातितपृथूरसिजः	११	६०
रविचक्ररुक्प्रकरचक्रकरम्	११	६८
रसिकाः सुधाप्सु सरसीषु ततो	११	५०
रहस्यतिरहस्यं तद्ब्रह्म	१५	९७
राज्ये कथञ्चिन्निक्षिप्य राजानम्	१५	९५
रिपुनृपप्रणिधिप्रतिशङ्कया	१०	१५

ल

लक्षणाभिः प्रवर्तन्ते वाक्यानि	१५	३४
ललना ललंत्यभिवरं प्रवरा	११	४८
लेखिन्यां मुहुरपिनह्य	१६	३४
लोकानामवलोकाय मार्गस्यास्य	१५	७९
लोकानामुपकृतये कृतः शिलेयम्	१६	८

व

वचसेत्यनेन स परान्यरुणद्	१०	१२
वदनेन्दुमवेक्ष्य नन्दनस्य	१३	४६
वनलीलया विविधया मुदिताः	११	४९
वरनूपुरं परमरुक्प्रपदम्	११	७१
वरपारिभद्रकसुकल्पतरुव्रज-	११	३९
वरपीवरांसमधिराजदुरोमणि-	११	६९
वर्तस्वाध्यधि सर्वं दीव्येदम्	१०	४६
वर्धितोर्मिहरिप्रेष्ठा	१५	६
वशीकृतहृषीकाश्च जननाद्युपमर्दिनः	१५	१२८
वाक्यैरतिबलीयोभिः प्रत्यक्षैरिव	१५	६८
वादादयः प्रकरणस्फुलिङ्गाः	१५	८१
वानरेन्द्र इव तीर्णवारिधिः	९	६
वारयत वारयत वैरिसुहृदोऽमून्	१०	१०
वायुना त्रिरपि पूर्वपायिना	९	५०
वासुदेवदयितो महिष्ठधीः	९	४७
विगीतं न विचार्यं स्यान्न	१५	४१
विततततमतमोऽतं साधयन्त्या	१०	४४
विततः सुखसच्चिदद्वयात्मा	१३	५८
विदितवान् व्यवहृत्य सुदर्शनम्	१३	६८
विधयो विहङ्गपतयोऽगणिता	११	२०
विधावत विधावत त्वरितमत्रि	१२	५१
विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसम्पदा	१५	९२
विधुरयमकलङ्कः स्याद्यदि	१४	५१
विपुलहृदयपार्श्वे दीपदीप्तिप्रदिप्ते	१४	१२
विप्रात्मेशः क्षणार्धं कृतनतिः	१०	५०
विमतं कारणं न स्यात्	१५	२८
विमतः पुरुषोऽज्ञःस्यात्	१५	४५
विमतो नावयववान्	१५	५६
विमलमलयजाम्भोबिन्दुभिश्चर्चितार्चो	१४	३५

विमलाकृतिः प्रकृतिरेव	११	१३
विवादस्य पदं न स्यात्	१५	३१
विवादाध्यासिता सृष्टिः	१५	१०
विविदुरतितरां ये देवताः	१४	५०
विविधजनपदस्थाः प्राक्	१४	४३
विविधप्रभुमध्यसन्निषण्णो	१३	३९
विविधस्तुलोपगतचित्रपटी-	११	१२
विविधा विधाय विहृतीः सलिले	११	५१
विशङ्कटं स्वस्तटिनीतटं ते	१०	३२
विशुद्धद्विकुलं श्रौतं	१५	९६
विष्णोर्भूयः शोधयद्भिः पदान्तम्	१२	४६
विश्वविस्मयकरः स्वतेजसा	९	४६
विस्तृतान्तरवियत्पदौ यती	९	३८
विहसितबिसभङ्गश्रीप्रकर्षम्	१४	३४
विहितमविहितं प्रागेव	१४	११
विहिनस्ति हि नो जनोऽतिवाग्मी	१३	६२
वीरदृष्टिकृतसिंहविभ्रमः	९	५
वृष्ट्यादेः स नियमनादि चक्र	१६	४८
वेदप्रवचनाचार्यशिष्योऽसौ	१५	१२६
वेदव्यासो न्वेष वेदो नु मूर्तो	१२	१२
वेदव्रातसुदर्शनः परिलसत्	१२	५३
वेदानां समुचितभाववाददक्षम्	१६	१८
वेदान्ताब्धिं न यो जातु	१५	१२२
वेदोक्तं फलमलमाप्यते	१६	४
वैकुण्ठेते श्रीविशेषा जनानाम्	११	७७
व्यक्तमुन्नतिमितोऽप्ययं जनः	९	२४
व्यदधत परिदृष्टज्योतिषः साधु	१४	४९
व्याख्याता निशि स कदाचन प्रदीपे	१६	६
व्याख्याप्रणादमात्रेण	१५	१२३
व्याख्यां भाष्यस्य भूयोधीः	१५	७१
व्यासदेवहृदयातिवल्लभम्	९	८
व्रत्याकारं वासुदेवद्विषं ते	१२	२६

श

शबलावलीकघटितस्पटिकद्युतिभिः	११	१०
शरदोल्लसत्कुवलयेक्षणया	११	४३
शार्दुलाख्यां प्राप्यसम्भावितः प्राक्	१२	४१
शास्त्रकल्पकतरोरमुष्यकः	९	२६
शिष्यप्रशिष्यातिशया ईदृशा	१५	१३९
शुभशुद्धनितम्बबिम्बराजन्	१३	३०
शुश्रूषापक्षपातार्द्यैः केभ्यश्चित्	१५	१३८
शून्यं ब्रह्माह्वयेनाहुः	१५	२५
श्रुणुताप्यलोकविषयं विषयम्	११	६४
श्रुणु वाचमिमां विचारितार्थाम्	१३	५२
श्रवणमननहेतोः प्राक्	१४	१०
श्रवणेनानुवादेन मननेनावृथाकरोत्	१५	९९
श्रीकान्तेश्वरसदनेऽनयत् किलैको	१६	२६
श्रीमन्तं शशिवदनं कुशेशयाक्षम्	१६	५५
श्रृत्या मत्या सदा भक्त्या	१५	१२१
श्रौते व्याख्योच्चारणे चारुणीते	१२	३६

स

सकमण्डलुमण्डलावलम्बम्	१३	१४
सकलावयवान् स्फुटं मिमानाः	१३	३६
सकलाङ्गयुतावभातशाखः	१३	४८
स ग्रामं परमपियात	१६	४१
सचतुर्भुजा वनजपत्रदृशो	११	२१
सज्जनान् सह महादरेणनॄन्	९	३९
स त्यजन् साहसी तच्च	१५	१०७
सत्यं सत्यं व्यावहार्यं विधत्ते	१२	६
सत्योच्छेदे सेच्छायातम्	१०	२३
स ददधिकबोधः षोडशात्रोपचारान्	१४	३६
सदाक्ष्यमाक्षिप्तसमस्तपक्षको	१०	४२
सदा सकलसच्छास्त्रव्याख्या-	१५	१३३
सन्यायरत्नावलिरप्युदपादि	१५	१२५

सन्मात्सर्यं बद्धुमूचेऽशुभानाम्	१२	३
सन्मानं विपुलहृदे विधाय	१६	१९
सपदि ददृशुरेके वाचनीयादिभागम्	१४	२१
सपदि समस्कुरुत भृशम्	१०	१
सप्ताष्टानि दिनान्येवं वादं कृत्वा	१५	६९
स प्रयुज्य निशिता निशातधीः	९	४९
समतीतविद्रुमभुवां सुदृशाम्	११	३०
समधिकधिषणस्य प्रेक्षमाणो जनौघः	१४	३१
समयेन गतोऽमहीयसाऽसौ	१३	९
समानया यानमास	१०	४८
सम्मोदात् तरलतरो	१६	१४
सरस्वतीवृत्तिकरीः शरीरिणाम्	९	५३
सर्वज्ञस्याज्ञतां वेदः श्रद्धेयो	१५	१८
सर्वज्ञं सपरिजनं समीक्षमाणाः	१६	१२
सर्वज्ञोऽप्ययमधिकं न यज्ञभङ्गीम्	१६	४२
सर्वविन्निर्मितं सर्वम्	१५	१२
सर्वाधारं ब्रह्मसंज्ञं विहायो	१२	५०
सविकासदृशां कृतांजलीनाम्	१३	३८
सविलासलास्यपरितुष्टदृशो	११	२६
स शङ्करपदद्विजोपहृतमाप्य	१०	५२
सहचरपरिक्लृप्ते सूक्ष्मवस्त्रा-	१४	४०
सहभोगमनन्यलभ्यमस्मै	९	५४
सञ्चरन्नञ्चनीयः कदाचिद्विभुः	१०	८
सङ्घातैरधिकघनैरलङ्कृताध्वा	१६	१०
सम्पूर्णं शशिनमिवोदितम्	१६	४६
सम्प्राप्तं सह सहजेन गण्डवाटम्	१६	२५
सम्भूयामि चोलजद्वीपिपुर्योः	१२	२
संसाधितार्थे भगवत्ययुक्तिवित्	१०	४३
स दान्तिभक्तिमाधुर्य-	१५	१००
साधुभ्यो मधुमथनांघ्रि भक्ति भाग्भ्यः	१६	१
सानुनीतिरथ नीतिमानयम्	९	३३
सितमध्ववचः सृणिप्रयोक्तॄन्	१३	६६
सितसौधसन्ततिरुचा स्फुरिता	११	९
सिद्धसाधनता हेतोस्ते भिन्नाश्चेत्	१५	५७
सुखसंविदात्मकतया वपुषाम्	११	६३
सुचिरद्युतीर्दधति सूक्ष्मतरम्	११	२९
सुतपःकवितादिसद्गुणानाम्	१३	४३
सुमनःफलशोभिनोऽत्र	१३	५
सुरतोत्सवोत्सुकतया त्वरयन्	११	५९
सूत्रस्यन्दनवृन्दाढ्या	१५	५
सोऽपृच्छत् तमथ महा-	१६	४५
सोऽङ्गीकरोति चेत् सत्त्वम्	१५	४०
सौमेरवं गौरवमावहन्ति	१०	४०
स्पर्शनाद्भगवतोऽतिपावनात्	९	४२
स्मरन्मुरारेकारं दध्यावध्यात्म-	१५	११०
स्मितफुल्लमुल्लसितचिल्लिलसन्	११	५७
स्मितमाधवीकुसुमरम्यतरौ	११	४०
स्वयमिन्दिरैव पतिमानकरी	११	१६
स्वरमचरमकाले मन्द्रमेवात्यजद्भिः	१४	२४
स्वव्याहत्यादिनोपेक्ष्या	१५	४८
स्वानन्दविषये मोक्षे	१५	६२
स्वाभिप्रायो ब्रह्मवत् स्यात्	१२	२३
स्विन्नेऽस्मिन्नपि यतमान	१६	३२

ह

हरिणीदृशां सुवसनानि	११	३१
हसितप्रसूननिकरोरुभर-	११	३७
हिमशीतवर्षपरितापपुरः	११	४५